SRIMANMAHABHARATAM

A NEW EDITION

MAINLY BASED ON

THE SOUTH INDIAN TEXTS,

With footnotes and Readings.

KARNAPARVA VIII.



EDITED BY

T. R. KRISHNACHARYA & T. R. VYASACHARYA,

Proprietors, Madhva Vilas Book Depot, Kumbakonam



PRINTED AT THE

Javaji Dadaji's "Nirnaya-sagar" Press,

BOMBAY.

1907


(*Registered according to the Act XXV of 1867.*)

[All rights reserved by the publisher.]

॥ श्रीः ॥

श्रीमन्महाभारतम् ।

सटिप्पणम् ।



कर्णपर्व ८.

एतच्च

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च

अनेकेषां विदुषां साहाय्येन दाक्षिणात्यबहुकोशानुसारेण

संशोध्य

मुंबापुर्यां

जावजी दादाजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८२९ प्लवंगनामसंवत्सरे ।

इदं पुस्तक १८६७ संख्याकराजनियमस्य २५ संख्याकविभागानुसारतो लेखारूढ

कृत्वास्य सर्वेऽधिकारा. प्रसिद्धिकर्त्रा स्वाधीना रक्षिता ।

कर्णपर्व.



श्रीः ।

श्रीमन्महाभारतम् ।



कर्णपर्व ८ ।

प्रथमोऽध्यायः ॥ १ ॥

शिबिराद्धास्तिनपुरमुपगतवता सञ्जयेन धृतराष्ट्रंप्रति कर्णादिनिधनकथनम् ॥ १ ॥ तच्छ्रवणेन मूर्च्छामुपगतवतो धृतराष्ट्रस्य सञ्जयादिभिराश्वासनम् ॥ २ ॥

श्रीवेदव्यासाय नमः ।
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १

'वैशंपायन उवाच ।
शिबिराद्धास्तिनपुरं प्राप्य भारत संजयः ।
प्रविवेश महाबाहुर्धृतराष्ट्रनिवेशनम् ॥ १
शोकेनापहतः सूतो विलपन्भृशदुःखितः ।
चिन्तयन्निधनं घोरं सूतपुत्रस्य पाण्डवैः ॥ २
अन्तःपुरं प्रविश्यैव सञ्जयो राजसत्तमम् ।
अश्रुपूर्णो भृशं त्रस्तो राजानमुपजग्मिवान् ॥ ३
उपस्थाय च राजानं विनिश्वस्य च सूतजः ।
नातिहृष्टमना राजन्निदं वचनमब्रवीत् ॥ ४

सञ्जय उवाच ।
सञ्जयोऽहं महाराज नमस्ते भरतर्षभ ।
हतो वैकर्तनः कर्णः कृत्वा कर्म सुदुष्करम् ॥ ५
चेदिकाशिकरूशानां मत्स्यानां सोमकैः सह ।
कृत्वाऽसौ कदनं शेते वातनुन्न इव द्रुमः ॥ ६
गोष्ठमध्येव ऋषभो गोव्रजैः परिवारितः ।
व्यालेन निहतो यद्वत्तथाऽसौ निहतः परैः ॥ ७
निराशान्पाण्डवान्कृत्वा दृढं राजन्ससात्यकान् ।
पाञ्चालानां रथांश्चैव विनिहत्य सहस्रशः ॥ ८
जित्वा शूरान्महेष्वासान्विद्राव्य च दिशोदश ।
हतो वैकर्तनः कर्णः पाण्डवेन किरीटिना ॥ ९
वैरस्य गत आनृण्यं दुर्गमस्य दुरात्मभिः ।
हत्वा कर्णं महाराज विशल्यः पाण्डवोऽभवत् ॥ १०
शोषणं सागराणां वा पतनं वा विवस्वतः ।
विशीर्णत्वं यथा मेरोस्तथा कर्णस्य पातनम् ॥ ११
योधाश्च बहवो राजन्हतास्तत्र जयैषिणः ।
राजानो राजपुत्राश्च शूराः परिघबाहवः ॥ १२
रथौघाश्च नरौघाश्च हता राजन्सहस्रशः ।
वारणा निहतास्तत्र वाजिनश्च महाहवे ॥ १३
क्षत्रियाश्च महाराज सेनयोरुभयोर्हताः ।
परस्परं वै वीक्ष्यात्र परस्परकृतागसः ॥ १४
किंचिच्छेषान्परान्कृत्वा तीर्त्वा पाण्डववाहिनीम् ।
पार्थवेलां समासाद्य हतो वैकर्तनो वृषा ॥ १५
जयाशा धार्तराष्ट्राणां वैरस्य च मुखं नृप ।
तीर्णं तत्पाण्डवै राजन्यत्पुरा नावबुध्यसे ॥ १६
प्रोच्यमानं महाराज बन्धुभिर्हितबुद्धिभिः ।
तदिदं समनुप्राप्तं व्यसनं त्वां महाभयम् ॥ १७
पुत्राणां राज्यकामेन त्वया राजन्हितैषिणा ।
चरितान्यहितान्येव तेषां ते फलमागतम् ॥ १८
हतो दुःशासनो राजन्यथोक्तं पाण्डवेन तु ।
प्रतिज्ञा भीमसेनेन निस्तीर्णा सा चमूमुखे ॥ १९
पीतं च क्षतजं तस्य धार्तराष्ट्रस्य संयुगे ।

पाण्डवेन महाराज कर्म कृत्वा सुदुष्करम् ॥ २०
वैशंपायन उवाच।

एतच्छ्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः।
शोकस्यान्तमपश्यन्वै हतं मत्वा सुयोधनम्।

* एतदन्तविंशतिश्लोकाना स्थाने झ. पाठे त्रयोऽध्याया वर्तन्ते।

प्रथमोऽध्यायः ॥ १ ॥

दुर्योधनादिभिः कर्णस्य सैनापत्येऽभिषेचनपूर्वकं युद्धाय निर्याणम् ॥ १ ॥ जनमेजयेन वैशंपायनंप्रति कर्णमरणश्राविणो धृतराष्ट्रस्य प्रवृत्तिप्रश्नः ॥ २ ॥

श्रीकृष्णाय नमः ॥
[नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १
वैशंपायन उवाच।
ततो द्रोणे हते राजन्दुर्योधनमुखा नृपाः।
भृशमुद्विग्नमनसो द्रोणपुत्रमुपागमन् ॥ १
ते द्रोणमनुशोचन्तः कश्मलाभिहतौजसः।
पर्युपासन्त शोकार्तास्ततः शारद्वतीसुतम् ॥ २
ते मुहूर्तं समाश्वस्य हेतुभिः शास्त्रसंमितैः।
रात्र्यागमे महीपालाः स्वानि वेश्मानि भेजिरे ॥ ३
ते वेश्मस्वपि कौरव्य पृथ्वीशा नाप्नुवन्सुखम्।
चिन्तयन्तः क्षयं तीव्रं दुःखशोकसमन्विताः ॥ ४
विशेषतः सूतपुत्रो राजा चैव सुयोधनः।
दुःशासनश्च शकुनिः सौबलश्च महाबलः ॥ ५
उषितास्ते निशां तां तु दुर्योधननिवेशने।
चिन्तयन्तः परिक्लेशान्पाण्डवानां महात्मनाम् ॥ ६
यत्तद्द्यूते परिक्लिष्टा कृष्णा चानायिता सभाम्।
तत्स्मरन्तोऽनुशोचन्तो भृशमुद्विग्नचेतसः ॥ ७
तथा तु संचिन्तयतां तान्क्लेशान्द्यूतकारितान्।
दुःखेन क्षणदा राजञ्जगामाब्दशतोपमा ॥ ८
ततः प्रभाते विमले स्थिता दिष्टस्य शासने।
चक्रुरावश्यकं सर्वे विधिदृष्टेन कर्मणा ॥ ९
ते कृत्वाऽवश्यकार्याणि समाश्वस्य च भारत।
योगमाज्ञापयामासुर्युद्धाय च विनिर्ययुः ॥ १०
कर्णं सेनापतिं कृत्वा कृतकौतुकमङ्गलाः।
पूजयित्वा द्विजश्रेष्ठान्दधिपात्रघृताक्षतैः ॥ ११
गोभिरश्वैश्च निष्कैश्च वासोभिश्च महाधनैः।
वन्द्यमाना जयाशीर्भिः सूतमागधबन्दिभिः ॥ १२
तथैव पाण्डवा राजन्कृतपूर्वाह्णिकक्रियाः।
शिबिरान्निर्ययुस्तूर्णं युद्धाय कृतनिश्चयाः ॥ १३
ततः प्रववृते युद्धं तुमुलं रोमहर्षणम्।
कुरूणां पाण्डवानां च परस्परजयैषिणाम् ॥ १४
तयोर्द्वौ दिवसौ युद्धं कुरुपाण्डवसेनयोः।
कर्णे सेनापतौ राजन्बभूवाद्भुतदर्शनम् ॥ १५
ततः शत्रुक्षयं कृत्वा सुमहान्तं रणे वृषः।
पश्यतां धार्तराष्ट्राणां फल्गुनेन निपातितः ॥ १६
ततस्तु संजयः सर्वं गत्वा नागपुरं द्रुतम्।
आचष्ट धृतराष्ट्राय यद्वृत्तं कुरुजाङ्गले ॥ १७
जनमेजय उवाच।
आपगेयं हतं श्रुत्वा द्रोणं चापि महारथम्।
आजगाम परामार्तिं वृद्धो राजाऽम्बिकासुतः ॥ १८
स श्रुत्वा निहतं कर्णं दुर्योधनहितैषिणम्।
कथं द्विजवर प्राणानधारयत दुःखितः ॥ १९
यस्मिञ्जयाशां पुत्राणां सममन्यत पार्थिवः।
तस्मिन्हते स कौरव्यः कथं प्राणानधारयत् ॥ २०
दुर्मरं तदहं मन्ये नृणां कृच्छ्रेऽपि वर्तताम्।
यत्र कर्णं हतं श्रुत्वा नात्यजज्जीवितं नृपः ॥ २१
तथा शान्तनवं वृद्धं ब्रह्मन्बाह्लीकमेव च।
द्रोणं च सोमदत्तं च भूरिश्रवसमेव च ॥ २२
तथैव चान्यान्सुहृदः पुत्रान्पौत्रांश्च पातितान्।
श्रुत्वा यन्नाजहात्प्राणांस्तन्मन्ये दुष्करं द्विज ॥ २३
एतन्मे सर्वमाचक्ष्व विस्तरेण महामुने।
न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत् ॥ २४

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धारम्भे प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ॥ २ ॥

धृतराष्ट्रेण भीष्मद्रोणौ प्रत्यनुशोचनपूर्वकं सञ्जयंप्रति दुर्योधनादिप्रवृत्तिप्रश्नः ॥ १ ॥

वैशंपायन उवाच।
हते कर्णे महाराज निशि गावल्गणिस्तदा।
दीनो ययौ नागपुरमश्वैर्वातसमैर्जवे ॥ १
स हास्तिनपुरं गत्वा भृशमुद्विग्नचेतनः।

विह्वलः पतितो भूमौ नष्टचेता इव द्विपः ॥ २१ आर्तनादो महानासीत्स्त्रीणां भरतसत्तम ॥ २२
तस्मिन्निपतिते भूमौ विह्वले राजसत्तमे। स शब्दः पृथिवीं कृत्स्नां पूरयामास सर्वशः॥२३

जगाम धृतराष्ट्रस्य क्षयं प्रक्षीणवान्धवम् ॥ २
स तमुद्वीक्ष्य राजानं कश्मलाभिहतौजसम्।
ववन्दे प्राञ्जलिर्भूत्वा मूर्ध्ना पादौ नृपस्य ह ॥ ३
संपूज्य च यथान्यायं धृतराष्ट्रं महीपतिम्।
हा कष्टमिति चोक्त्वा स ततो वचनमाददे ॥ ४
संजयोऽहं क्षितिपते कच्चिदास्ते सुखं भवान्।
स्वदोषैरापदं प्राप्य कच्चिन्नाद्य विमुह्यति ॥ ५
हितान्युक्तानि विदुरद्रोणगाङ्गेयकेशवैः।
अगृहीतान्यनुस्मृत्य कच्चिन्न कुरुषे व्यथाम् ॥ ६
रामनारदकण्वाद्यैर्हितमुक्तं सभातले।
न गृहीतमनुस्मृत्य कच्चिन्न कुरुषे व्यथाम् ॥ ७
सुहृदस्त्वद्धिते युक्तान्भीष्मद्रोणमुखान्परैः।
निहतान्युधि संस्मृत्य कच्चिन्न कुरुषे व्यथाम् ॥ ८
तमेवंवादिनं राजा सूतपुत्रं कृताजलिम्।
सुदीर्घमथ निःश्वस्य दुःखार्त इदमब्रवीत् ॥ ९

धृतराष्ट्र उवाच।

आपगेये हते शूरे दिव्यास्त्रवति सञ्जय।
द्रोणे च परमेष्वासे भृशं मे व्यथितं मनः ॥ १०
यो रथानां सहस्राणि दंशितानां दशैव तु।
अहन्यहनि तेजस्वी निजघ्ने वसुसंभवः ॥ ११
तं हतं यज्ञसेनस्य पुत्रेणेह शिखण्डिना।
पाण्डवेयाभिगुप्तेन श्रुत्वा मे व्यथितं मनः ॥ १२
भार्गवः प्रददौ यस्मै परमास्त्रं महाहवे।
साक्षाद्रामेण यो बाल्ये धनुर्वेद उपाकृतः ॥ १३
यस्य प्रसादात्कौन्तेया राजपुत्रा महारथाः।
महारथत्वं संप्राप्तास्तथाऽन्ये वसुधाधिपाः ॥ १४
तं द्रोणं निहतं श्रुत्वा धृष्टद्युम्नेन संयुगे।
सत्यसन्धं महेष्वासं भृशं मे व्यथितं मनः ॥ १५
ययोर्लोके पुमानस्त्रे न समोऽस्ति चतुर्विधे।
तौ द्रोणभीष्मौ श्रुत्वा तु हतौ मे व्यथितं मनः ॥१६
त्रैलोक्ये यस्य चास्त्रेषु न पुमान्विद्यते समः।
तं द्रोणं निहतं श्रुत्वा किमकुर्वत मामकाः ॥ १७
संशप्तकानां च बले पाण्डवेन महात्मना।
धनंजयेन विक्रम्य गमिते यमसादनम् ॥ १८
नारायणास्त्रे च हते द्रोणपुत्रस्य धीमतः।
विप्रद्रुतेष्वनीकेषु किमकुर्वत मामकाः ॥ १९
विप्रद्रुतानहं मन्ये निमग्नाञ्शोकसागरे।
प्लवमानान्हते द्रोणे सन्ननौकानिवार्णवे ॥ २०
दुर्योधनस्य कर्णस्य भोजस्य कृतवर्मणः।
मद्रराजस्य शल्यस्य द्रौणेश्चैव कृपस्य च ॥ २१
मत्पुत्रस्य च शेषस्य तथाऽन्येषां च सञ्जय।
विप्रद्रुतेष्वनीकेषु मुखवर्णोऽभवत्कथम् ॥ २२
एतत्सर्वं यथावृत्तं तथा गावल्गणे मम।
आचक्ष्व पाण्डवेयानां मामकानां च विक्रमम् ॥ २३

सञ्जय उवाच।

तवापराधाद्यद्वृत्तं कौरवेयेषु मारिष।
तच्छ्रुत्वा मा व्यथां कार्षीर्दिष्टे न व्यथते बुधः ॥ २४
यस्मादभावी भावी वा भवेदर्थो नरं प्रति।
अप्राप्तौ तस्य वा प्राप्तौ न कश्चिद्व्यथते बुधः ॥ २५

धृतराष्ट्र उवाच।

न व्यथाऽभ्यधिका काचिद्विद्यते मम सञ्जय।
दिष्टमेतत्पुरा मन्ये कथयस्व यथेच्छकम् ॥ २६

॥ इति श्रीमन्महाभारते कर्णपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ॥ ३ ॥

दुर्योधनेन द्रोणमरणनिर्विण्णानां सैनिकानां कर्णगुणानुवर्णनेन प्रोत्साहनम् ॥ १ ॥ सञ्जयेन धृतराष्ट्रंप्रति कर्णपराक्रमप्रशंसनपूर्वकं तन्निधनकथनम् ॥ २ ॥

सञ्जय उवाच।

हते द्रोणे महेष्वासे तव पुत्रा महारथाः।
बभूवुरस्वस्थमुखा विषण्णा गतचेतसः ॥ १
अवाङ्मुखाः शस्त्रभृतः सर्व एव विशांपते।
अवेक्षमाणाः शोकार्ता नाभ्यभाषन्परस्परम् ॥ २
तान्दृष्ट्वा व्यथिताकारान्सैन्यानि तव भारत।
ऊर्ध्वमेव निरैक्षन्त दुःखत्रस्तान्यनेकशः ॥ ३
शस्त्राण्येषां तु राजेन्द्र शोणिताक्तानि सर्वशः।
प्राभ्रश्यन्त कराग्रेभ्यो दृष्ट्वा द्रोणं हतं युधि ॥ ४
तानि बद्धान्यरिष्टानि लम्बमानानि भारत।
अदृश्यन्त महाराज नक्षत्राणि यथा दिवि ॥ ५
तथा तु स्तिमितं दृष्ट्वा गतसत्वमवस्थितम्।
बलं तव महाराज राजा दुर्योधनोऽब्रवीत् ॥ ६

विह्वलः चलनासमर्थः काष्ठवत्पतित ॥ २१ ॥

शोकार्णवे महाघोरे निमग्ना भरतस्त्रियः ।
रुरुदुर्दुःखशोकार्ता भृशमुद्विग्नचेतसः ॥ २४
राजानं च समासाद्य गान्धारी भरतर्षभ ।
निःसंज्ञा पतिता भूमौ सर्वाण्यन्तःपुराणि च ॥२५
ततस्ताः सञ्जयो राजन्समाश्वासयदातुराः ।
मुह्यमानाः सुबहुशो मुञ्चन्तीर्वारि नेत्रजम् ॥२६
समाश्वस्ताः स्त्रियस्तास्तु वेपमाना मुहुर्मुहुः ।
कदल्य इव वातेन धूयमानाः समन्ततः ॥ २७
राजानं विदुरश्चापि प्रज्ञाचक्षुषमीश्वरम् ।
आश्वासयामास तदा सिञ्चंस्तोयेन कौरवम् ॥२८
स लब्ध्वा शनकैः संज्ञां ताश्च दृष्ट्वा स्त्रियो नृपः ।
उन्मत्त इव राजेन्द्र स्थितस्तूष्णीं विशांपते ॥ २९
ततो ध्यात्वा चिरं कालं निःश्वस्य च पुनःपुनः ।
स्वान्पुत्रान्गर्हयामास बहुमेने च पाण्डवान् ॥ ३०
गर्हयंश्चात्मनो बुद्धिं शकुनेः सौबलस्य च ।
ध्यात्वा तु सुचिरं कालं वेपमानो मुहुर्मुहुः ॥ ३१
संस्तभ्य च मनो भूयो राजा धैर्यसमन्वितः ।
पुनर्गावल्गणिं सूतं पर्यपृच्छत सञ्जयम् ॥ ३२
न त्वया कथितं वाक्यं श्रुतं सञ्जय तन्मया ॥ ३३
कच्चिद्दुर्योधनः सूत न गतो वै यमक्षयम् ।
जये निराशः पुत्रो मे सततं जयकाम्यकः ।
ब्रूहि सञ्जय तत्त्वेन पुनरुक्तां कथामिमाम् ॥ ३४
वैशंपायन उवाच ।
एवमुक्तोऽब्रवीत्सूतो राजानं जनमेजय ।
हतो वैकर्तनो राजन्सहपुत्रैर्महारथः ।
भ्रातृभिश्च महेष्वासैः सूतपुत्रैस्तनुत्यजैः ॥ ३५
दुःशासनश्च निहतः पाण्डवेन यशस्विना ।
पीतं च रुधिरं कोपाद्भीमसेनेन संयुगे ॥ ३६
'वैशंपायन उवाच ।
एतच्छ्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः ।
दह्यमानोऽब्रवीत्सूतं मुहूर्तं तिष्ठ सञ्जय ।
व्याकुलं मे मनस्तात मा तावत्किंचिदुच्यताम् ३७
राजापि नाब्रवीत्किंचित्सञ्जयो विदुरस्तथा ।
तूष्णींभूतस्तदा सोऽथ बभूव जगतीपतिः ॥' ३८

॥ इति श्रीमन्महाभारते कर्णपर्वणि प्रथमोऽध्यायः ॥ १ ॥

भवतां बाहुवीर्यं हि समाश्रित्य मया युधि ।
पाण्डवेयाः समाहूता युद्धं चेदं प्रवर्तितम् ॥ ७
तदिदं निहते द्रोणे विषण्णमिव लक्ष्यते ।
युध्यमानाश्च समरे योधा वध्यन्ति सर्वशः ॥ ८
जयो वाऽपि वधो वाऽपि युध्यमानस्य संयुगे ।
भवेत्किमत्र चित्रं वै युध्यध्वं सर्वतोमुखाः ॥ ९
पश्यध्वं च महात्मानं कर्णं वैकर्तनं युधि ।
प्रचरन्तं महेष्वासं दिव्यैरस्त्रैर्महाबलम् ॥ १०
यस्य वै युधि संत्रासात्कुन्तीपुत्रो धनंजयः ।
निवर्तते सदा मन्दः सिंहात्क्षुद्रमृगो यथा ॥ ११
येन नागायुतप्राणो भीमसेनो महाबलः ।
मानुषेणैव युद्धेन तामवस्थां प्रवेशितः ॥ १२
येन दिव्यास्त्रविच्छूरो मायावी स घटोत्कचः ।
अमोघया रणे शक्त्या निहतो भैरवं नदन् ॥ १३
तस्य दुर्वारवीर्यस्य सत्यसन्धस्य धीमतः ।
बाह्वोर्द्रविणमक्षय्यमद्य द्रक्ष्यथ संयुगे ॥ १४
द्रोणपुत्रस्य विक्रान्तं राधेयस्यैव चोभयोः ।
पश्यन्तु पाण्डुपुत्रास्ते विष्णुवासवयोरिव ॥ १५
सर्व एव भवन्तश्च शक्ताः प्रत्येकशोऽपि वा ।
पाण्डुपुत्रान्रणे हन्तुं ससैन्यान्किमु संहताः ।
वीर्यवन्तः कृतास्त्राश्च द्रक्ष्यथाद्य परस्परम् ॥ १६
सञ्जय उवाच ।
एवमुक्त्वा ततः कर्णं चक्रे सेनापतिं तदा ।
तव पुत्रो महावीर्यो भ्रातृभिः सहितोऽनघ ॥ १७
सैनापत्यमथावाप्य कर्णो राजन्महारथः ।
सिंहनादं विनद्योच्चैः प्रायुध्यत रणोत्कटः ॥ १८
ससृञ्जयानां सर्वेषां पाञ्चालानां च मारिष ।
केकयानां विदेहानां चकार कदनं महत् ॥ १९
तस्येषुधाराः शतशः प्रादुरासञ्छरासनात् ।
अग्रे पुङ्खेषु संसक्ता यथा भ्रमरपङ्क्तयः ॥ २०
स पीडयित्वा पाञ्चालान्पाण्डवांश्च तरस्विनः ।
हत्वा सहस्रशो योधानर्जुनेन निपातितः ॥ २१

॥ इति श्रीमन्महाभारते कर्णपर्वणि तृतीयोऽध्याय ॥ ३ ॥

अन्त पुराणि स्त्रिय. ॥ २५ ॥ कदल्यइव वेपमाना आसन्निति शेष ॥ २७ ॥ दृष्ट्वा मनसैवात्मप्रत्ययेन दु खवतीर्ज्ञात्वा ॥२९॥ इष्टवियोगमात्रेण दशरथादिर्मृतः । अस्यतु जये नैराश्यमधिक मरणकारणमस्तीति भाव. ॥ ३४ ॥ प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ॥ २ ॥

धृतराष्ट्रेण निजसेनायां निहतानां नामनिवेदनं चोदितेन सञ्जयेन तत्कथनम् ॥ १ ॥

'जनमेजय उवाच ।
तच्छ्रुत्वा कर्णहननं पुत्रांश्चैव पलायितान् ।
धृतराष्ट्रो नृपश्चैव द्विजश्रेष्ठ किमब्रवीत् ॥ १
प्राप्तवान्व्यसनं घोरं पुत्रव्यसनजं महत् ।
काले यदुक्तवांस्तस्मिंस्तन्ममाचक्ष्व तत्त्वतः ॥' २
वैशंपायन उवाच ।
एतच्छ्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः ।
अब्रवीत्सञ्जयं सूतं शोकसंविग्नमानसः ॥ ३
दुष्प्रणीतेन मे तात पुत्रस्यादीर्घजीविनः ।
हतं वैकर्तनं श्रुत्वा शोको मर्माणि कृन्तति ॥ ४
तस्य मे संशयं छिन्धि दुःखपारं तितीर्षतः ।
कुरूणां सृञ्जयानां च के च जीवन्ति के मृताः ॥ ५
सञ्जय उवाच ।
हतः शान्तनवो राजन्दुराधर्षः प्रतापवान् ।
हत्वा पाण्डवयोधानामर्बुदं दशभिर्दिनैः ॥ ६
तथा द्रोणो महेष्वासः पाञ्चालानां रथव्रजान् ।
निहत्य युधि दुर्धर्षः पश्चाद्वृक्मरथो हतः ॥ ७
हतशेषस्य भीष्मेण द्रोणेन च महात्मना ।
अर्धं निहत्य सैन्यस्य कर्णो वैकर्तनो हतः ॥ ८
विविंशतिर्महाराज राजपुत्रो महाबलः ।
आनर्तयोधाञ्शतशो निहत्य निहतो रणे ॥ ९
तथा पुत्रो विकर्णस्ते क्षत्रव्रतमनुस्मरन् ।
क्षीणबाणो हतः शूरः स्थितो ह्यभिमुखः परैः ॥ १०
घोररूपान्परिक्लेशान्दुर्योधनकृतान्बहून् ।
प्रतिज्ञां स्मरता तेन भीमसेनेन पातितः ॥ ११
विन्दानुविन्दावावन्त्यौ राजपुत्रौ महारथौ ।
कृत्वा त्वसुकरं कर्म गतौ वैवस्वतक्षयम् ॥ १२
सिन्धुराष्ट्रमुखानीह दश राष्ट्राणि यानिह ।
यस्य तिष्ठन्ति वचने यः स्थितस्तव शासने ॥ १३
अक्षौहिणीर्दशैकां च विनिर्जित्य शितैः शरैः ।
सोऽर्जुनेन हतो राजन्महावीर्यो जयद्रथः ॥ १४
तथा दुर्योधनसुतस्तरस्वी युद्धदुर्मदः ।
वर्तमानः पितुः शास्त्रे सौभद्रेण निपातितः ॥ १५
तथा दौःशासनिः शूरो बाहुशाली रणोत्कटः ।
द्रौपदेयेन संगम्य गमितो यमसादनम् ॥ १६
किरातानामधिपतिः सागरानूपवासिनाम् ।
देवराजस्य धर्मात्मा प्रियो बहुमतः सखा ॥ १७
भगदत्तो महीपालः क्षत्रधर्मरतः सदा ।
धनंजयेन विक्रम्य गमितो यमसादनम् ॥ १८
तथा कौरवदायादो न्यस्तशस्त्रो महायशाः ।
हतो भूरिश्रवा राजञ्शूरः सात्यकिना युधि ॥ १९
श्रुतायुरपि चाम्बष्ठः क्षत्रियाणां धुरंधरः ।
चरन्नभीतवत्सङ्ख्ये निहतः सव्यसाचिना ॥ २०
तव पुत्रः सदामर्षी कृतास्त्रो युद्धदुर्मदः ।
दुःशासनो महाराज भीमसेनेन पातितः ॥ २१
यस्य राजन्गजानीकं बहुसाहस्रमद्भुतम् ।
सुदक्षिणः स संग्रामे निहतः सव्यसाचिना ॥ २२
कोसलानामधिपतिर्हत्वा बहुमतान्परान् ।
सौभद्रेणेह विक्रम्य गमितो यमसादनम् ॥ २३
बहुशो योधयित्वा तु भीमसेनं महारथम् ।
चित्रसेनस्तव सुतो भीमसेनेन पातितः ॥ २४
मद्रराजात्मजः शूरः परेषां भयवर्धनः ।
असिचर्मधरः श्रीमान्सौभद्रेण निपातितः ॥ २५
समः कर्णस्य समरे यः स कर्णस्य पश्यतः ।
वृषसेनो महातेजाः शीघ्रास्त्रो दृढविक्रमः ॥ २६
अभिमन्योर्वधं स्मृत्वा प्रतिज्ञामपि चात्मनः ।
धनंजयेन विक्रम्य गमितो यमसादनम् ॥ २७
नित्यं प्रसक्तवैरो यः पाण्डवैः पृथिवीपतिः ।
विश्राव्य वैरं पार्थेन श्रुतायुः स निपातितः ॥ २८
शल्यपुत्रस्तु विक्रान्तः सहदेवेन मारिष ।
हतो रुक्मरथो राजञ्श्यालो मातुलजो युधि ॥ २९
राजा भागीरथो वृद्धो बृहत्क्षत्रश्च केकयः ।
पराक्रमन्तौ विक्रान्तौ निहतौ वीर्यवत्तरौ ॥ ३०
भगदत्तसुतो राजन्कृतप्रज्ञो महाबलः ।

श्येनवच्चरता सङ्ख्ये नकुलेन निपातितः ॥ ३१
पितामहस्तव तथा बाह्लीकः सह बाह्लिकैः ।
निहतो भीमसेनेन महाबलपराक्रमः ॥ ३२
जयत्सेनस्तथा राजञ्जारासंधिर्महाबलः ।
मागधो निहतः सङ्ख्ये सौभद्रेण महात्मना ॥ ३३
पुत्रस्ते दुर्मुखो राजन्दुःसहश्च महारथः ।
गदया भीमसेनेन निहतौ शूरमानिनौ ॥ ३४
दुर्मर्षणो दुर्विषहो दुर्जयश्च महारथः ।
कृत्वा त्वसुकरं कर्म गता वैवस्वतक्षयम् ॥ ३५
उभौ कलिङ्गवृषकौ भ्रातरौ युद्धदुर्मदौ ।
कृत्वा चासुकरं कर्म गतौ वैवस्वतक्षयम् ॥ ३६
सचिवो वृषपर्वा ते शूरः परमवीर्यवान् ।
भीमसेनेन विक्रम्य गमितो यमसादनम् ॥ ३७
तथैव पौरवो राजा नागायुतबलो महान् ।
समरे पाण्डुपुत्रेण निहतः सव्यसाचिना ॥ ३८
वसातयो महाराज द्विसाहस्राः प्रहारिणः ।
शूरसेनाश्च विक्रान्ताः सर्वे युधि निपातिताः ॥३९
अभीषाहाः कवचिनः प्रहरन्तो रणोत्कटाः ।
शिबयश्च रथोदाराः कालिङ्गसहिता हताः ॥ ४०
गोकुले नित्यसंवृद्धा युद्धे परमकोपनाः ।
गोपालाः कृतवीरास्ते निहताः सव्यसाचिना ॥४१
श्रेणयो बहुसाहस्राः संशप्तकगणाश्च ये ।
ते सर्वे पार्थमासाद्य गता वैवस्वतक्षयम् ॥ ४२
श्यालौ तव महाराज राजानौ वृषकाचलौ ।
त्वदर्थमतिविक्रान्तौ निहतौ सव्यसाचिना ॥ ४३
उग्रकर्मा महेष्वासो नामतः कर्मतस्तथा ।
साल्वराजो महाबाहुर्भीमसेनेन पातितः ॥ ४४
ओघवांश्च महाराज बृहन्तः सहितौ रणे ।
पराक्रमन्तौ मित्रार्थे गतौ वैवस्वतक्षयम् ॥ ४५
तथैव रथिनां श्रेष्ठः क्षेमधूर्तिर्विशांपते ।
निहतो गदया राजन्भीमसेनेन संयुगे ॥ ४६
तथा राजन्महेष्वासो जलसन्धो महाबलः ।
सुमहत्कदनं कृत्वा हतः सात्यकिना रणे ॥ ४७
अलम्बुसो राक्षसेन्द्रः खरबन्धुरयानवान् ।
घटोत्कचेन विक्रम्य गमितो यमसादनम् ॥ ४८
राधेयः सूतपुत्रश्च भ्रातरश्च महारथाः ।
केकयाः सर्वशश्चापि निहताः सव्यसाचिना-॥४९
मालवा मद्रकाश्चैव द्राविडाश्चोग्रकर्मिणः ।
यौधेयाश्च ललित्थाश्च क्षुद्रकाश्चाप्युशीनराः ॥ ५०
मावेल्लकास्तुण्डिकेराः सावित्रीपुत्रकाश्च ये ।
प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च मारिष ॥
पत्तीनां निहताः सङ्घा हयानां प्रयुतानि च ।
रथव्रजाश्च निहता हताश्च वरवारणाः ॥ ५२
सध्वजाः सायुधाः शूराः सवर्माम्बरभूषणाः ।
कालेन महताऽऽयस्ताः कुशलैर्ये च वर्धिताः ॥५३
ते हताः समरे राजन्पार्थेनाक्लिष्टकर्मणा ।
अन्ये तथाऽमितबलाः परस्परवधैषिणः ॥ ५४
एते चान्ये च बहवो राजानः सगणा रणे ।
हताः सहस्रशो राजन्यन्मां त्वं परिपृच्छसि ॥ ५५
एवमेष क्षयो वृत्तः कर्णार्जुनसमागमे ।
महेन्द्रेण यथा वृत्रो यथा रामेण रावणः ॥ ५६
यथा कृष्णेन नरको मुरुश्च निहतो रणे ।
कार्तवीर्यश्च रामेण भार्गवेण यथा हतः ॥ ५७
सज्ञातिबान्धवः शूरः समरे युद्धदुर्मदः ।
रणे कृत्वा महद्युद्धं घोरं त्रैलोक्यमोहनम् ॥ ५८
यथा स्कन्देन महिषो यथा रुद्रेण चान्धकः ।
तथाऽर्जुनेन स हतो द्वैरथे युद्धदुर्मदः ॥ ५९
सामात्यबान्धवो राजन्कर्णः प्रहरतां वरः ।
जयाशा धार्तराष्ट्राणां वैरस्य च मुखं नृपः ॥ ६०
तीर्णं तत्पाण्डवै राजन्यत्पुरा नावबुध्यसे ।
उच्यमानो महाराज बन्धुभिर्हितकाङ्क्षिभिः ॥ ६१
'न कृतं च त्वया पूर्वं दैवेन विधिना बलात् ।'
तदिदं समनुप्राप्तं व्यसनं सुमहात्ययम् ॥ ६२

दुर्मनाश्च महारथ इति क. ख ङ. पाठः । विकर्णश्च महाबलः इति ङ. पाठः ॥ ३५ ॥ खरबन्धुरयानवान् गर्दभसंयुतरथवान् । अलायुधो राक्षसेन्द्रो बकबन्धुरयानवान् इति क. ख ङ. पाठ ॥ ४८ ॥ कर्णस्तथा हत इत्यनुकृष्यते ॥ ५९ ॥ द्वितीयोऽध्याय. ॥ २ ॥

पुत्राणां राज्यकामानां त्वया राजन्हितैषिणा। अहितान्येव चीर्णानि तेषां ते फलमागतम्॥ ६३

॥ इति श्रीमन्महाभारते कर्णपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ॥ ३ ॥

सञ्जयेन धृतराष्ट्रंप्रति युद्धे निहतानां परेषां नामकथनम् ॥ १ ॥

धृतराष्ट्र उवाच।
आख्याता मामकास्तात निहता युधि पाण्डवैः।
हतांश्च पाण्डवेयानां मामकैर्ब्रूहि सञ्जय ॥ १
सञ्जय उवाच।
कृतिनो युधि विक्रान्ता महासत्वा महाबलाः।
सानुबन्धाः सहामात्या गाङ्गेयेन निपातिताः॥ २
नारायणा बल्लवाश्च रामाश्च शतशो परे।
अनुरक्ताश्च वीरेण भीष्मेण युधि पातिताः॥ ३
समः किरीटिना सङ्ख्ये वीर्येण च बलेन च।
सत्यजित्सत्यसन्धेन द्रोणेन निहतो युधि॥ ४
पाञ्चालानां महेष्वासाः सर्वे युद्धविशारदाः।
द्रोणेन सह संगम्य गता वैवस्वतक्षयम्॥ ५
तथा विराटद्रुपदौ वृद्धौ सहसुतौ नृपौ।
पराक्रमन्तौ मित्रार्थे द्रोणेन निहतौ रणे॥ ६
यो बाल एव समरे संमितः सव्यसाचिना।
केशवेन च दुर्धर्षो बलदेवेन चाभिभूः॥ ७
परेषां कदनं कृत्वा महद्रणविशारदः।
परिवार्य मदामात्रैः षड्भिः परमकै रथैः।
अशक्नुवद्भिर्बीभत्सुमभिमन्युर्निपातितः॥ ८
कृतं तं विरथं वीरं क्षत्रधर्मे व्यवस्थितम्।
दौःशासनिर्महाराज सौभद्रं हतवान्रणे॥ ९
पटच्चरनिहन्ता च महत्या सेनया वृतः।
अम्बष्ठस्य सुतः श्रीमान्मित्रहेतोः पराक्रमन्॥ १०
आसाद्य लक्ष्मणं वीरं दुर्योधनसुतं रणे।
सुमहत्कदनं कृत्वा गतो वैवस्वतक्षयम्॥ ११
बृहन्तः सुमहेष्वासः कृतास्त्रो युद्धदुर्मदः।
दुःशासनेन विक्रम्य गमितो यमसादनम्॥ १२
मणिमान्दण्डधारश्च राजानौ युद्धदुर्मदौ।
पराक्रमन्तौ मित्रार्थे द्रोणेन युधि पातितौ॥ १३
अंशुमान्भोजराजस्तु सहसैन्यो महारथः।
भारद्वाजेन विक्रम्य गमितो यमसादनम्॥ १४
सामुद्रश्चित्रसेनश्च सह पुत्रेण भारत।
समुद्रसेनेन बलाद्गमितो यमसादनम्॥ १५
अनूपवासी नीलश्च व्याघ्रदत्तश्च वीर्यवान्।
अश्वत्थाम्ना विकर्णेन गमितौ यमसादनम्॥ १६
चित्रायुधश्चित्रयोधी कृत्वा च कदनं महत्।
चित्रमार्गेण विक्रम्य विकर्णेन हतो मृधे॥ १७
वृकोदरसमो युद्धे वृतः केकयजो युधि।
केकयेन च विक्रम्य भ्राता भ्रात्रा निपातितः॥ १८
जनमेजयो गदायोधी पार्वतीयः प्रतापवान्।
दुर्मुखेन महाराज तव पुत्रेण पातितः॥ १९
रोचमानौ नरव्याघ्रौ रोचमानौ ग्रहाविव।
द्रोणेन युगपद्राजन्दिवं संप्रापितौ शरैः॥ २०
नृपाश्च प्रतियुध्यन्तः पराक्रान्ता विशांपते।
कृत्वा नसुकरं कर्म गता वैवस्वतक्षयम्॥ २१
पुरुजित्कुन्तिभोजश्च मातुलौ सव्यसाचिनः।
संग्रामनिर्जितॉल्लोकान्गमितौ द्रोणसायकैः॥ २२
अभिभूः काशिराजश्च काशिकैर्बहुभिर्वृतः।
वसुदानस्य पुत्रेण त्याजितो देहमाहवे॥ २३
अमितौजा युधामन्युरुत्तमौजाश्च वीर्यवान्।
निहत्य शतशः शूरानस्मदीयैर्निपातिताः॥ २४
मित्रवर्मा च पाञ्चाल्यः क्षत्रधर्मा च भारत।
द्रोणेन परमेष्वासौ गमितौ यमसादनम्॥ २५
शिखण्डितनयो युद्धे क्षत्रदेवो युधांपतिः।

रोचमानौ एकनामानौ भ्रातरौ ॥ २० ॥

तृतीयोऽध्यायः ॥ ३ ॥

लक्ष्मणेन हतो राजंस्तव पौत्रेण भारत ॥ २६
सुचित्रश्चित्रवर्मा च पितापुत्रौ महारथौ ।
प्रचरन्तौ महावीरौ द्रोणेन निहतौ रणे ॥ २७
वार्धक्षेमिर्महाराज समुद्र इव पर्वणि ।
आयुधक्षयमासाद्य प्रशान्तिं परमां गतः ॥ २८
सेनाबिन्दुसुतः श्रेष्ठः शात्रवान्प्रहरन्युधि ।
बाह्लिकेन महाराज कौरवेन्द्रेण पातितः ॥ २९
धृष्टकेतुर्महाराज चेदीनां प्रवरो रथः ।
कृत्वा नसुकरं कर्म गतो वैवस्वतक्षयम् ॥ ३०
तथा सत्यधृतिर्वीरः कृत्वा कदनमाहवे ।
पाण्डवार्थे पराक्रान्तो गमितो यमसादनम् ॥३१
पुत्रस्तु शिशुपालस्य सुकेतुः पृथिवीपतिः ।
निहत्य शात्रवान्सङ्ख्ये द्रोणेन निहतो युधि ॥३२
तथा सत्यधृतिर्वीरो मदिराश्वश्च वीर्यवान् ।
सूर्यदत्तश्च विक्रान्तो निहतो द्रोणसायकैः ॥ ३३
'मात्स्यादवरजः श्रीमाञ्शतानीको निपातितः ।
श्रेणिमांश्च महाराज युध्यमानः पराक्रमी ।
कृत्वा नसुकरं कर्म गतो वैवस्वतक्षयम् ॥ ३४
तथैव युधि विक्रान्तो मागधः परमास्त्रवित् ।
भीष्मेण निहतो राजञ्शेतेऽद्य परवीरहा ॥ ३५
विराटपुत्रः शङ्खस्तु उत्तरश्च महारथः ।
कुर्वन्तौ सुमहत्कर्म गतौ वैवस्वतक्षयम् ॥ ३६
वसुदानश्च कदनं कुर्वाणोऽतीव संयुगे ।
भारद्वाजेन विक्रम्य गमितो यमसादनम् ॥ ३७
एते चान्ये च बहवः पाण्डवानां महारथाः ।
हता द्रोणेन विक्रम्य यन्मां त्वं परिपृच्छसि ॥३८

॥ इति श्रीमन्महाभारते कर्णपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ॥ ४ ॥

सञ्जयेन धृतराष्ट्रंप्रति हतावशिष्टानां नामकथनम् ॥ १ ॥

धृतराष्ट्र उवाच ।
मामकस्यास्य सैन्यस्य हृतोत्सेकस्य सञ्जय ।
अवशेषं न पश्यामि ककुदे मृदिते सति ॥ १
तौ हि वीरौ महेष्वासौ मदर्थे कुरुसत्तमौ ।
भीष्मद्रोणौ हतौ श्रुत्वा कोन्वर्थो जीवितेन मे ॥२
न च मृष्यामि राधेयं हतमाहवशोभिनम् ।
यस्य बाह्वोर्बलं तुल्यं कुञ्जराणां शतं शतम् ॥ ३
हतप्रवरसैन्यं मे यथा शंससि सञ्जय ।
अहतानपि मे शंस येऽत्र जीवन्ति केचन ॥ ४
एतेषु हि मृतेष्वद्य ये त्वया परिकीर्तिताः ।
येऽपि जीवन्ति ते सर्वे मृता इति मतिर्मम ॥ ५
सञ्जय उवाच ।
यस्मिन्महास्त्राणि समर्पितानि
चित्राणि शुभ्राणि चतुर्विधानि ।
दिव्यानि राजन्विहितानि चैव
द्रोणेन वीरे द्विजसत्तमेन ॥ ६
महारथः कृतिमान्क्षिप्रहस्तो
दृढायुधो दृढमुष्टिर्दृढेषुः ।
स वीर्यवान्द्रोणपुत्रस्तरस्वी
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ७
आनर्तवासी हृदिकात्मजोऽसौ
महारथः सात्वतानां वरिष्ठः ।
स्वयं भोजः कृतवर्मा कृतास्त्रो
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ८
आर्तायनिः समरे दुष्प्रकम्प्यः
सेनाग्रणीः प्रथमस्तावकानाम् ।
यः स्वस्रीयान्पाण्डवेयान्विसृज्य
सत्यां वाचं स्वां चिकीर्षुस्तरस्वी ॥ ९

ककुदे प्रधानपुरुषसमूहे भीष्मद्रोणकर्णरूपे मृदितेनाशिते सति ॥ १ ॥ मृताः मृतप्रायाः ॥५॥ चतुर्विधानि दृढदूरसूक्ष्मशब्दवेधीनि । विहितानि धनुर्वेदोदितानि ॥ ६ ॥ कृतिमान् अवन्ध्यास्त्र ॥ ७ ॥ आर्तायनिः शल्यः । स्वस्रीयान् भागिनेयान् ॥ ९ ॥

तेजोवधं मूतपुत्रस्य सङ्ख्ये
प्रतिश्रुत्याजातशत्रोः पुरस्तात् ।
दुराधर्षः शक्रसमानवीर्यः
शल्यः स्थितो योद्धुकामस्त्वदर्थे ॥ १०
शारद्वतो गौतमश्चापि राज-
न्महाबाहुर्बहुचित्रास्त्रयोधी ।
धनुश्चित्रं सुमहच्चारसाहं
व्यवस्थितो योद्धुकामः प्रगृह्य ॥ ११
गान्धारराजः ससुतश्च राज-
न्दुर्द्यूतदेवी कलहप्रियश्च ।
गान्धारमुख्यैर्यवनैश्च राज-
न्व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ १२
महारथः केकयराजपुत्रः
सदश्वयुक्तं च पताकिनं च ।
रथं समारुह्य कुरुप्रवीर
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ १३
तथा सुतस्ते ज्वलनार्कवर्ण
रथं समास्थाय कुरुप्रवीरः ।
व्यवस्थितः पुरुमित्रो नरेन्द्र
व्यभ्रे सूर्यो भ्राजमानो यथा खे ॥ १४
दुर्योधनो नागकुलस्य मध्ये
व्यवस्थितः सिंह इवाबभासे ।
रथेन जाम्बूनदभूषणेन
व्यवस्थितः समरे योत्स्यमानः ॥ १५
स राजमध्ये पुरुषप्रवीरो
रराज जाम्बूनदचित्रवर्मा ।
पद्मप्रभो वह्निरिवाल्पधूमो
मेघान्तरे सूर्य इव प्रकाशः ॥ १६
तथा सुषेणोऽप्यसिचर्मपाणि-
स्तवात्मजः सत्यसेनश्च वीरः ।
व्यवस्थितौ चित्रसेनेन सार्धं
हृष्टात्मानौ समरे योद्धुकामौ ॥ १७
ह्रीनिषेवो भारतराजपुत्र
उग्रायुधः श्रुतवर्मा जयश्च ।
शलश्च सत्यव्रतदुःशलौ च
व्यवस्थिताः सहसैन्या नराग्र्याः ॥ १८
कैतव्यानामधिपः शूरमानी
रणेरणे शत्रुहा राजपुत्रः ।
रथी हयी नागपत्तिप्रयायी
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ १९
वीरः श्रुतायुश्च धृतायुधश्च
चित्राङ्गदश्चित्रसेनश्च वीरः ।
व्यवस्थिता योद्धुकामा नराग्र्याः
प्रहारिणो मानिनः सत्यसन्धाः ॥ २०
कर्णात्मजः सत्यसन्धो महात्मा
व्यवस्थितः समरे योद्धुकामः ॥ २१
अथापरौ कर्णसुतौ वरास्त्रौ
व्यवस्थितौ लघुहस्तौ नरेन्द्र ।
बले महत्युल्बणसत्ववीर्यौ
समास्थितौ योद्धुकामौ त्वदर्थे ॥ २२
एतैश्च मुख्यैरपरैश्च राज-
न्योधप्रवीरैरमितप्रभावैः ।
व्यवस्थितो नागकुलस्य मध्ये
यथा महेन्द्रः कुरुराजो जयाय ॥ २३

धृतराष्ट्र उवाच ।
आख्याता जीवमाना ये परे सैन्या यथायथम् ।
इतीदमवगच्छामि व्यक्तमर्थाभिपत्तितः ॥ २४

वैशंपायन उवाच ।
एवं ब्रुवन्नेव तदा धृतराष्ट्रोऽम्बिकासुतः ।
हतप्रवीरं भूयिष्ठं किंचिच्छेषं स्वकं बलम् ।

नागपत्तिप्रयायी नागै पत्तिभिश्च प्रयातु शीलमस्य । नाग-रथप्रयायीति पाठान्तरम् ॥ १९ ॥ सैन्या. सेनामर्हन्ति ते राजानः । यथायथ पक्षद्वयेऽपि जीवमाना आख्याता । इदं भाविजयपराजयादिकम् । इति अनेन पक्षद्वयबलतोलनेन व्यक्त स्पष्टमभिगच्छामि जानामि । अर्थाभिपत्तितः फलोपपत्तित । तेन जयो मदीयाना नास्तीति निश्चिनोमीति भाव. । आख्याता वै जीवमाना. परेभ्योऽन्ये यथा ध्रुवम् । इतीदमवगच्छामि व्यक्तमर्थो व्यवस्थित. । इति क. ख. ङ. पाठः ॥ २४ ॥ चतुर्थोऽध्याय ॥ ४ ॥

श्रुत्वा व्यामोहमागच्छच्छोकव्याकुलितेन्द्रियः॥२५
मुह्यमानोऽब्रवीच्चापि मुहूर्तं तिष्ठ सञ्जय ।
व्याकुलं मे मनस्तात श्रुत्वा सुमहदप्रियम्॥ २६
मनो मुह्यति चाङ्गानि न च शक्नोमि धावितुम् ।
इत्येवमुक्त्वा वचनं धृतराष्ट्रोऽम्बिकासुतः ।
भ्रान्तचित्तस्ततः सोऽथ बभूव जगतीपतिः॥२७

॥ इति श्रीमन्महाभारते कर्णपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ॥ ५ ॥

धृतराष्ट्रेण कर्णगुणानुवर्णनपूर्वक शोचनम् ॥ १ ॥

जनमेजय उवाच ।
श्रुत्वा कर्णं हतं युद्धे पुत्रांश्चैव पलायिनः ।
नरेन्द्रः किंचिदाश्वस्तो द्विजश्रेष्ठ किमब्रवीत् ॥ १
प्राप्तवान्परमं दुःखं पुत्रव्यसनजं महत् ।
तस्मिन्यदुक्तवान्काले तन्ममाचक्ष्व पृच्छतः ॥ २
वैशंपायन उवाच ।
श्रुत्वा कर्णस्य निधनमश्रद्धेयमिवाद्भुतम् ।
भूतसंमोहनं भीमं मेरोः संसर्पणं यथा ॥ ३
चित्तमोहमिवायुक्तं भार्गवस्य महामतेः ।
पराजयमिवेन्द्रस्य द्विषद्भ्यो भीमकर्मणः ॥ ४
दिवः प्रपतनं भानोरुर्व्यामिव महाद्युतेः ।
संशोषणमिवाचिन्त्यं समुद्रस्याक्षयाम्भसः ॥ ५
महीवियद्दिगम्भूनां सर्वनाशमिवाद्भुतम् ।
कर्मणोरिव वैफल्यमुभयोः पुण्यपापयोः ॥ ६
संचिन्त्य निपुणं बुद्ध्या धृतराष्ट्रो जनेश्वरः ।
नेदमस्तीति संचिन्त्य कर्णस्य समरे वधम् ॥ ७
प्राणिनामेवमात्मत्वात्सादपीति विचार्य च ।
शोकाग्निना दह्यमानो धम्यमान इवाशये ॥ ८
विस्रस्ताङ्गः श्वसन्दीनो हाहेत्युक्त्वा सुदुःखितः ।
विललाप महाराज धृतराष्ट्रोऽम्बिकासुतः ॥ ९
धृतराष्ट्र उवाच ।
सञ्जयाधिरथिर्वीरः सिंहद्विरदविक्रमः ।
वृषभप्रतिमस्कन्धो वृषभाक्षगतिस्वरः ॥ १०
वृषभो वृषभस्येव यो युद्धे न निवर्तते ।
शत्रोरपि महेन्द्रस्य वज्रसंहननो युवा ॥ ११
यस्य ज्यातलशब्देन शरवृष्टिरवेण च ।
रथाश्वनरमातङ्गा नावतिष्ठन्ति संयुगे ॥ १२
यमाश्रित्य महाबाहुं द्विषत्सङ्घमचयुतम् ।
दुर्योधनोऽकरोद्वैरं पाण्डुपुत्रैर्महारथैः ॥ १३
स कथं रथिनां श्रेष्ठः कर्णः पार्थेन संयुगे ।
निहतः पुरुषव्याघ्रः प्रसह्यासह्यविक्रमः ॥ १४
यो नामन्यत वै नित्यमच्युतं च धनंजयम् ।
न वृष्णीन्सहितानन्यान्स्वबाहुबलदर्पितः ॥ १५
शार्ङ्गगाण्डीवधन्वानौ सहितावपराजितौ ।
अहं दिव्याद्रथादेकः पातयिष्यामि संयुगे ॥ १६
इति यः सततं मन्दमवोचल्लोभमोहितम् ।
दुर्योधनमवाचीनं राज्यकामुकमातुरम् ॥ १७
योऽजयत्सर्वकाम्भोजानावन्त्यान्केकयैः सह ।
गान्धारान्मद्रकान्मात्स्यांस्त्रिगर्तांस्तङ्गणाञ्शकान्
पाञ्चालांश्च विदेहांश्च कुलिन्दान्काशिकोसलान् ।
सुह्मानङ्गांश्च वङ्गांश्च निषादान्पुण्ड्रकीकटान्॥ १९
वत्सान्कलिङ्गान्दरदानश्मकानृषिकानपि ।
'शबरान्हारहूणांश्च प्रघूणान्सरलानपि ॥ २०
म्लेच्छराष्ट्राधिपांश्चैव दुर्गानाटविकांस्तथा ।'
जित्वैतान्समरे वीरः प्रदीप्तैः कङ्कपत्रिभिः ॥ २१
करमाहारयामास जित्वा सर्वानरींस्तथा ।
दुर्योधनस्य वृद्ध्यर्थं राधेयो रथिनां वरः ।
दिव्यास्त्रविमन्त्रातेजाः कर्णो वैकर्तनो वृषः॥२२
सेनागोपश्च स कथं शत्रुभिः परमास्त्रवित् ।
घातितः पाण्डवैः शूरैः समरे वीर्यशालिभिः॥२३

पुत्रांश्चैव निपातितान् इति झ पाठ ॥ १ ॥ भार्गवस्य रामस्य शुक्रस्य वा ॥ ४ ॥ कर्णस्य वध सचिन्त्य मनस्यालोच्य इदं कृत्स्नं जगत्सर्वसैन्यं वा नास्तीति संचिन्त्य निश्चित्य विललापेति तृतीयेन संबन्धः ॥ ७ ॥ अवाचीन चिन्तयाऽधोमुखम्॥१७॥

वृषो महेन्द्रो देवेषु वृषः कर्णो नरेष्वपि ।
तृतीयमन्यं लोकेषु वृषं नैवानुशुश्रुम ॥ २४
उच्चैःश्रवा वरोऽश्वानां राज्ञां वैश्रवणो वरः ।
वरो महेन्द्रो देवानां कर्णः प्रहरतां वरः ॥ २५
योऽजितः पार्थिवैः शूरैः समर्थैर्वीर्यशालिभिः ।
दुर्योधनस्य वृद्ध्यर्थं कृत्स्नामुर्वीमथाजयत् ॥ २६
यं लब्ध्वा मागधो राजा सांत्वमानोऽथ सौहृदैः ।
अरौत्सीत्पार्थिवं क्षत्रमृते यादवकौरवान् ॥ २७
तं श्रुत्वा निहतं कर्णं द्वैरथे सव्यसाचिना ।
शोकार्णवे निमग्नोऽहं भिन्ना नौरिव सागरे ॥ २८
तं वृषं निहतं श्रुत्वा द्वैरथे रथिनां वरम् ।
शोकार्णवे निमग्नोऽहमप्लवः सागरे यथा ॥ २९
ईदृशैर्यद्यहं दुःखैर्न विनश्यामि सञ्जय ।
वज्राद्दृढतरं मन्ये हृदयं मम दुर्भिदम् ॥ ३०
ज्ञातिसंबन्धिमित्राणामिमं श्रुत्वा पराभवम् ।
को मदन्यः पुमाँल्लोके न जह्यात्मृत जीवितम् ॥ ३१
विषमग्निं प्रपातं च पर्वताग्रादहं वृणे ।
'महाप्रस्थानगमनं जलं प्रायोपवेशनम् ।'
न हि शक्ष्यामि दुःखानि सोढुं कष्टानि सञ्जय ॥ ३२

॥ इति श्रीमन्महाभारते कर्णपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ॥ ६ ॥

कर्णवधश्रवणानन्तरीयकधृतराष्ट्रप्रवृत्ति पृष्टेन वैशंपायनेन कर्णदुर्योधनस्तुतिनिन्दापूर्वक सञ्जयंप्रति कर्णार्जुनयुद्धकथन-चोदनारूपधृतराष्ट्रप्रवृत्तिकथनम् ॥ १ ॥

सञ्जय उवाच ।
श्रिया कुलेन यशसा तपसा च श्रुतेन च ।
त्वामद्य सन्तो मन्यन्ते ययातिमिव नाहुषम् ॥ १
श्रुते महर्षिप्रतिमः कृतकृत्योऽसि पार्थिव ।
पर्यवस्थापयात्मानं मा विषादे मनः कृथाः ॥ २
धृतराष्ट्र उवाच ।
दैवमेव परं मन्ये धिक्पौरुषमनर्थकम् ।
यत्र सालप्रतीकाशः कर्णोऽहन्यत संयुगे ॥ ३
हत्वा युधिष्ठिरानीकं पाञ्चालानां रथव्रजान् ।
प्रताप्य शरवर्षेण दिशः सर्वा महारथः ॥ ४
मोहयित्वा रणे पार्थान्वज्रहस्त इवासुरान् ।
स कथं निहतः शेते वायुरुग्ण इव द्रुमः ॥ ५
शोकस्यान्तं न पश्यामि पारं जलनिधेरिव ।
चिन्ता मे वर्धतेऽतीव मुमूर्षा चापि जायते ॥ ६
कर्णस्य निधनं श्रुत्वा विजयं फल्गुनस्य च ।
अश्रद्धेयमहं मन्ये वधं कर्णस्य सञ्जय ॥ ७
वज्रसारमिदं नूनं हृदयं दुर्भिदं मम ।
यच्छ्रुत्वा पुरुषव्याघ्र हते कर्णे न दीर्यते ॥ ८
आयुर्नूनं सुदीर्घं मे विहितं दैवतैः पुरा ।
यत्र कर्णं हतं श्रुत्वा जीवामीह सुदुःखितः ॥ ९
धिग्जीवितमिदं चैव सुहृद्धीनस्य सञ्जय ।
अद्य चाहं दशामेतां गतः सञ्जय गर्हिताम् ।
कृपणं वर्तयिष्यामि शोच्यः सर्वस्य मन्दधीः ॥ १०
अहमेव पुरा भूत्वा सर्वलोकस्य सत्कृतः ।
परिभूतः कथं सूत परैः शक्ष्यामि जीवितुम् ॥ ११
दुःखाद्दुःखतरं मन्ये प्राप्तवानस्मि सञ्जय ।
भीष्मद्रोणवधेनैव कर्णस्य च महात्मनः ॥ १२
नावशेषं प्रपश्यामि सूतपुत्रे हते युधि ।
सहि पारं महानासीत्पुत्राणां मम सञ्जय ॥ १३
युद्धे हि निहतः शूरो विसृजन्सायकान्बहून् ।
को हि मे जीवितेनार्थस्तमृते पुरुषर्षभम् ॥ १४
रथादाधिरथिर्नूनं न्यपतत्सायकार्दितः ।
पर्वतस्येव शिखरं वज्रपाताद्विदारितम् ॥ १५
स शेते पृथिवीं नूनं शोभयन्रुधिरोक्षितः ।

जलवर्षित्वाद्देवेषु महेन्द्रो वृषः । धनवर्षित्वान्मनुष्येषु कर्णो वृषः । तृतीयमेवमभितो वृष्टिकर्तारं वृषम् ॥ २४ ॥ अप्लवः नौकाहीन ॥ २९ ॥ पञ्चमोऽध्याय. ॥ ५ ॥

मातङ्ग इव मत्तेन मातङ्गेन निपातितः ॥ १६
यो बलं धार्तराष्ट्राणां पाण्डवानां यतो भयम् ।
सोऽर्जुनेन हतः कर्णः प्रतिमानं धनुष्मताम् १७
स हि वीरो महेष्वासो मित्राणामभयंकरः ।
शेते विनिहतो वीरः शक्रेणेव पुरा बलः ॥ १८
पङ्गोरिवाध्वगमनं दरिद्रस्येव कामितम् ।
दुर्योधनस्य लोभश्च समान्येतानि सञ्जय ॥ १९
अन्यथा चिन्तितं कार्यमन्यथा तत्तु जायते ।
अहो नु बलवद्दैवं कालश्च दुरतिक्रमः ॥ २०
पलायमानः कृपणो दीनात्मा दीनपौरुषः ।
कच्चिद्विनिहतः सूत पुत्रो दुःशासनो मम ॥ २१
कच्चिन्न दीनाचरितं कृतवांस्तात संयुगे ।
कच्चिन्न निहतः शूरा यथाऽन्ये क्षत्रियर्षभाः ॥२२
युधिष्ठिरस्य वचनं मा युद्धमिति सर्वदा ।
दुर्योधनो नाभ्यगृह्णान्मूढः पथ्यमिवौषधम् ॥ २३
शरतल्पे शयानेन भीष्मेण सुमहात्मना ।
पानीयं याचितः पार्थः सोविध्यन्मेदिनीतलम् २४
जलस्य धारां जनितां दृष्ट्वा पाण्डुसुतेन च ।
अब्रवीत्स महाबाहुस्तात संशाम्य पाण्डवैः ॥ २५
प्रशमाद्धि भवेच्छान्तिर्मदन्तं युद्धमस्तु वः ।
भ्रातृभावेन पृथिवीं भुङ्क्ष्व पाण्डुसुतैः सह ॥ २६
अकुर्वन्वचनं तस्य नूनं शोचति पुत्रकः ।
तदिदं समनुप्राप्तं वचनं दीर्घदर्शिनः ॥ २७
अहं तु निहतामात्यो हतपुत्रश्च सञ्जय ।
द्यूततः कृच्छ्रमापन्नो लूनपक्ष इव द्विजः ॥ २८
यथा हि शकुनिं गृह्य छित्त्वा पक्षौ च सञ्जय ।
विसर्जयन्ति संहृष्टाः क्रीडमानाः कुमारकाः ॥ २९
लूनपक्षतया तस्य गमनं नोपपद्यते ।
तथाहमपि संप्राप्तो लूनपक्ष इव द्विजः ॥ ३०
क्षीणः सर्वार्थहीनश्च निर्ज्ञातिर्बन्धुवर्जितः ।
कां दिशं प्रतिपत्स्यामि दीनः शत्रुवशं गतः ॥ ३१
वैशंपायन उवाच ।
इत्येवं धृतराष्ट्रोऽथ विलप्य बहुदुःखितः ।
प्रोवाच सञ्जयं भूयः शोकव्याकुलमानसः ॥ ३२
धृतराष्ट्र उवाच ।
योऽजयत्सर्वकाम्बोजानम्बष्ठान्केकयैः सह ।
गान्धारांश्च विदेहांश्च जित्वा कार्यार्थमाहवे ॥ ३३
दुर्योधनस्य वृद्ध्यर्थं योऽजयत्पृथिवीं प्रभुः ।
स जितः पाण्डवैः शूरैः समरे बाहुशालिभिः ॥ ३४
तस्मिन्हते महेष्वासे कर्णे युधि किरीटिना ।
के वीराः पर्यतिष्ठन्त तन्ममाचक्ष्व सञ्जय ॥ ३५
कच्चिन्नैकः परित्यक्तः पाण्डवैर्निहतो रणे ।
उक्तं त्वया पुरा तात यथा वीरो निपातितः ॥ ३६
भीष्ममप्रतियुध्यन्तं शिखण्डी सायकोत्तमैः ।
पातयामास समरे सर्वशस्त्रभृतां वरम् ॥ ३७
तथा द्रौपदिना द्रोणो न्यस्तसर्वायुधो युधि ।
'धर्मराजवचः श्रुत्वा अश्वत्थामा हतस्त्विति ॥' ३८
युक्तयोगो महेष्वासः शरैर्बहुभिराचितः ।
निहतः खड्गमुद्यम्य धृष्टद्युम्नेन सञ्जय ॥ ३९
अन्तरेण हतावेतौ छलेन च विशेषतः ।
अशौषमहमेतद्वै भीष्मद्रोणौ निपातितौ ॥ ४०
भीष्मद्रोणौ हि समरे न हन्याद्वज्रभृत्स्वयम् ।
न्यायेन युध्यन्समरे तद्वै सत्यं ब्रवीमि ते ॥ ४१
कर्णं त्वस्यन्तमस्त्राणि दिव्यानि च बहूनि च ।
कथमिन्द्रोपमं वीरं मृत्युर्युद्धे समस्पृशत् ॥ ४२
यस्य विद्युत्प्रभां शक्तिं दिव्यां कनकभूषणाम् ।
प्रायच्छद्विषतां हन्त्रीं कुण्डलाभ्यां पुरंदरः ॥ ४३
यस्य सर्पमुखो दिव्यः शरः काञ्चनभूषणः ।
अशेत निशितः पत्री समरेष्वरिसूदनः ॥ ४४
भीष्मद्रोणमुखान्वीरान्योऽवमत्य महारथान् ।
जामदग्न्यान्महाघोरं ब्राह्ममस्त्रमशिक्षत ॥ ४५
यश्च द्रोणमुखान्दृष्ट्वा विमुखानर्दिताञ्शरैः ।
सौभद्रस्य महाबाहुर्न्यधमत्कार्मुकं शितैः ॥ ४६
यश्च नागायुतप्राणं वज्ररंहसमच्युतम् ।
विरथं सहसा कृत्वा भीमसेनमपाहसत् ॥ ४७

अप्रतियुध्यन्त शिखण्डिना प्रतियुद्धमनङ्गीकुर्वाणम् ॥ ३७ ॥ द्रौपदिना, द्रुपदपुत्रेण धृष्टद्युम्नेन ॥ ३८ ॥ फलेन च विशेषत. इति क. ङ. पाठः । बलेन च विशेषतः इति ख. पाठः ॥ ४० ॥ कुण्डलाभ्या सकवचाभ्यां । तादर्थ्ये चतुर्थी ॥ ४३ ॥ अशेत निहत· पत्री समरेष्वरिसूदन· इति ख पाठः । अशेत निहतः पत्री चन्दनेष्वरिसूदनः इति झ. पाठः ॥ ४४ ॥

सहदेवं च निर्जित्य शरैः सन्नतपर्वभिः ।
कृपया विरथं कृत्वा नाहनद्धर्ममचिन्तया ॥ ४८
यश्च मायासहस्राणि विकुर्वाणं जयैषिणम् ।
घटोत्कचं राक्षसेन्द्रं शक्रशक्त्या निजघ्निवान्॥४९
एतांश्च दिवसान्यस्य युद्धे भीतो धनञ्जयः ।
नागमद्वैरथं वीरः स कथं निहतो रणे ॥ ५०
[संशप्तकानां योधा ये आह्वयन्त सदाऽन्यतः ।
एतान्हत्वा हनिष्यामि पश्चाद्वैकर्तनं रणे ॥ ५१
इति व्यपदिशन्पार्थो वर्जयन्मूतजं रणे ।
स कथं निहतो वीरः पार्थेन परवीरहा ॥] ५२
रथभङ्गो न चेत्तस्य धनुर्वा न व्यशीर्यत ।
न चेदस्त्राणि नष्टानि स कथं निहतः परैः॥५३
को हि शक्तो रणे कर्णं विधुन्वानं महद्धनुः ।
विमुञ्चन्तं शरान्घोरान्दिव्यान्यस्त्राणि चाहवे ।
जेतुं पुरुषशार्दूलं शार्दूलमिव वेगिनम् ॥ ५४
ध्रुवं तस्य धनुश्छिन्नं रथो वाऽपि महीं गतः ।
अस्त्राणि वा प्रनष्टानि यथा शंससि मे हतम् ।
न ह्यन्यदपि पश्यामि कारणं तस्य नाशने॥५५
न हन्मि फल्गुनं यावत्तावत्पादौ न धावये ।
इति यस्य महाघोरं व्रतमासीन्महात्मनः ॥ ५६
यस्य भीतो रणे निद्रां धर्मराजो युधिष्ठिरः ।
त्रयोदशसमा नित्यं नाभजत्पुरुषर्षभः ॥ ५७
यस्य वीर्यवतो वीर्यमुपाश्रित्य महात्मनः ।
मम पुत्रः सभां भार्यां पाण्डूनां नीतवान्बलात् ५८
तत्रापि च सभामध्ये पाण्डवानां च पश्यताम् ।
दासभार्येति पाञ्चालीमब्रवीत्कुरुसन्निधौ ॥ ५९
[न सन्ति तपयः कृष्णे सर्वे षण्डतिलैः समाः ।
उपतिष्ठस्व भर्तारमन्यं वा वरवर्णिनि ॥ ६०
इत्येवं यः पुरा वाचो रूक्षाः संश्रावयन्रुषा ।
सभायां सूतजः कृष्णां स कथं निहतः परैः॥ ६१
यदि भीष्मो रणश्लाघी द्रोणो वा युधि दुर्मदः ।
न हनिष्यति कौन्तेयान्पक्षपातात्सुयोधन ।
सर्वानेव हनिष्यामि व्येतु ते मानसो ज्वरः॥६२
किं करिष्यति गाण्डीवमक्षय्यौ च महेषुधी ।
स्निग्धचन्दनदिग्धस्य मच्छरस्याभिधावतः ।
स नूनमृषभस्कन्धो ह्यर्जुनेन कथं हतः ॥] ६३
यश्च गाण्डीवमुक्तानां स्पर्शमुग्रमचिन्तयन् ।
अपतिर्ह्यसि कृष्णेति ब्रुवन्पार्थानवैक्षत ॥ ६४
यस्य नासीद्भयं पार्थात्सपुत्रात्सजनार्दनात् ।
स्वबाहुबलमाश्रित्य मुहूर्तमपि सञ्जय ॥ ६५
तस्य नाऽहं वधं मन्ये देवैरपि सवासवैः ।
प्रतीपमभिधावद्भिः किं पुनस्तात पाण्डवैः ॥ ६६
न हि ज्यां संस्पृशानस्य तलत्रे वाऽपि गृह्णतः ।
पुमानाधिरथेः स्थातुं कश्चित्प्रमुखतोऽर्हति ॥ ६७
अपि स्यान्मेदिनी हीना सोममूर्यप्रभांशुभिः ।
न वधः पुरुषेन्द्रस्य संयुगेष्वपलायिनः ॥ ६८
येन मन्दः सहायेन भ्रात्रा दुःशासनेन च ।
वासुदेवस्य दुर्बुद्धिः प्रत्याख्यानमरोचत ॥ ६९
स नूनं वृषभस्कन्धं कर्णं दृष्ट्वा निपातितम् ।
दुःशासनं च निहतं मन्ये शोचति पुत्रकः ॥७०
हतं वैकर्तनं दृष्ट्वा द्वैरथे सव्यसाचिना ।
जयतः पाण्डवान्दृष्ट्वा किंस्विदुर्योधनोऽब्रवीत् ७१
[दुर्मर्षणं हतं दृष्ट्वा वृषसेनं च संयुगे ।
प्रभग्नं च बलं दृष्ट्वा वध्यमानं महारथैः ॥ ७२
पराङ्मुखांश्च राज्ञस्तु पलायनपरायणान् ।
विद्रुतान्रथिनो दृष्ट्वा मन्ये शोचति पुत्रकः ॥७३
अनेयश्चाभिमानी च दुर्बुद्धिरजितेन्द्रियः ।
हतोत्साहं बलं दृष्ट्वा किंस्विदुर्योधनोऽब्रवीत्॥७४
स्वयं वैरं महत्कृत्वा वार्यमाणः सुहृद्गणैः ।
प्रधने हतभूयिष्ठैः किंस्विदुर्योधनोऽब्रवीत् ॥ ७५
भ्रातरं निहतं दृष्ट्वा भीमसेनेन संयुगे ।

रथसङ्गो न चेत्तस्य इति क. ङ. पाठ । अहकारो न चेत्तस्य इति ख पाठः ॥ ५३ ॥ प्रतीप प्रातिभव्येन अभिधावद्भिः सर्वदिग्भ्यः समागतैः ॥ ६६ ॥ आधिरथेः अधिरथपुत्रस्य ॥ ६७ ॥ सोमसूर्यसाहचर्यात्प्रकर्षेण भातीति योगाच्च प्रभो वह्निस्तेषा त्रयाणामशुभिर्मयूखैः ॥ ६८ ॥ मन्दो दुर्योधन ॥ ६९ ॥ अनेयः अशिक्षणीय । यतोऽभिमानी विद्रुत्वाभिमानी । अतएव दुर्बुद्धिः हितमजानन् ॥ ७४ ॥ प्रधने रणे ॥ ७५ ॥

रुधिरे पीयमाने च किंस्विदुर्योधनोऽब्रवीत्॥] ७६
सह गान्धारराजेन सभायां यदभाषत।
कर्णोऽर्जुनं रणे हन्ता हते तस्मिन्किमब्रवीत्॥ ७७
द्यूतं कृत्वा पुरा हृष्टो वञ्चयित्वा च पाण्डवान्।
शकुनिः सौबलस्तात हते कर्णे किमब्रवीत्॥ ७८
कृतवर्मा महेष्वासः सात्वतानां महारथः।
हतं वैकर्तनं दृष्ट्वा हार्दिक्यः किमभाषत॥ ७९
ब्राह्मणाः क्षत्रिया वैश्या यस्य शिक्षामुपासते।
धनुर्वेदं चिकीर्षन्तो द्रोणपुत्रस्य धीमतः॥ ८०
युवा रूपेण संपन्नो दर्शनीयो महायशाः।
अश्वत्थामा हते कर्णे किमभाषत सञ्जय॥ ८१
आचार्यो यो धनुर्वेदे गौतमो रथसत्तमः।
कृपः शारद्वतस्तात हते कर्णे किमब्रवीत्॥ ८२
मद्रराजो महेष्वासः शल्यः समितिशोभनः।
दृष्ट्वा विनिहतं कर्णं सारथ्ये रथिनां वरः।
किमभाषत सौवीरो मद्राणामधिपो बली॥ ८३
दृष्ट्वा विनिहतं सर्वे योधा वारणदुर्जयाः।
ये च केचन राजानः पृथिव्यां योद्धुमागताः।
वैकर्तनं हतं दृष्ट्वा कान्यभाषन्त सञ्जय॥ ८४
द्रोणे तु निहते वीरे रथव्याघ्रे नरर्षभे।
के वा मुखमनीकानामासन्सञ्जय भागशः॥ ८५
मद्रराजः कथं शल्यो नियुक्तो रथिनां वरः।
वैकर्तनस्य सारथ्ये तन्ममाचक्ष्व सञ्जय॥ ८६
केऽरक्षन्दक्षिणं चक्रं सूतपुत्रस्य युध्यतः।
वामं चक्रं ररक्षुर्वा के वा वीरस्य पृष्ठतः॥ ८७
के कर्णं न जहुः शूराः के क्षुद्राः प्राद्रवंस्ततः।
कथं च वः समेतानां हतः कर्णो महारथः॥ ८८
पाण्डवाश्च स्वयं शूराः प्रत्युदीयुर्महारथाः।
सृजन्तः शरवर्षाणि वारिधारा इवाम्बुदाः॥ ८९
स च सर्पमुखो दिव्यो महेषुप्रवरस्तदा।
व्यर्थः कथं समभवत्तन्ममाचक्ष्व सञ्जय॥ ९०
मामकस्यास्य सैन्यस्य हतोत्सेधस्य सञ्जय।
अवशेषं न पश्यामि ककुदे मृदिते सति॥ ९१
तौ हि वीरौ महेष्वासौ मदर्थे त्यक्तजीवितौ।
भीष्मद्रोणौ हतौ श्रुत्वा को न्वर्थो जीवितेन मे ९२
पुनःपुनर्न मृष्यामि वधं कर्णस्य पाण्डवैः।
यस्य बाह्वोर्बलं तुल्यं कुञ्जराणां शतं शतम्॥ ९३
द्रोणे हते च यद्वृत्तं कौरवाणां परैः सह।
सङ्ग्रामे नरवीराणां तन्ममाचक्ष्व सञ्जय॥ ९४
यथा कर्णश्च कौन्तेयैः सह युद्धमयोजयत्।
तथा च द्विषतां हन्ता रणे शान्तस्तदुच्यताम् ९५

॥ इति श्रीमन्महाभारते कर्णपर्वणि षष्ठोऽध्यायः॥ ६॥

सप्तमोऽध्यायः॥ ७॥

अश्वत्थामवचनादुर्योधनेन सैनापत्येऽभिषिक्तेन कर्णेन रणाय सेनानियोजनम्॥ १॥

सञ्जय उवाच।
हते द्रोणे महेष्वासे तस्मिन्नहनि भारत।
कृते च मोघसंकल्पे द्रोणपुत्रे महारथे॥ १
द्रवमाणे महाराज कौरवाणां बलार्णवे।
व्यूह्य पार्थः स्वकं सैन्यमतिष्ठद्भ्रातृभिर्वृतः॥ २
तमवस्थितमाज्ञाय पुत्रस्ते भरतर्षभ।
विद्रुतं स्वबलं दृष्ट्वा पौरुषेण न्यवारयत्॥ ३
स्वमनीकमवस्थाप्य बाहुवीर्यमुपाश्रितः।
युद्ध्वा च सुचिरं कालं पाण्डवैः सह भारत॥ ४
लब्धलक्षैः परैर्हृष्टैर्व्यायच्छद्भिश्चिरं तदा।
संध्याकालं समासाद्य प्रत्याहारमकारयत्॥ ५
'निवेश्य बलवद्घोरं क्षुत्पिपासाबलैर्युतम्।
श्रमेण महता युक्तं तथा द्रोणवधेन च॥ ६
दीनरूपा रणे कर्म कृत्वा घोरं च शर्वरीम्।

कानि वाक्यानीति शेषः॥ ८४॥ प्रत्युदीयुः कथमिति शेषः॥ ८९॥ हतोत्सेधस्य विनष्टोत्कर्षस्य॥ ९१॥ षष्ठोऽध्यायः॥६॥

स्वबलप्रति विद्रुत द्रवन्त दृष्ट्वा॥ ३॥ लब्धलक्षै प्राप्तजयैः। व्यायच्छद्भि यतमानैः। प्रत्याहारं प्रत्यवहारम्।

निवेशं प्राप्य सा सेना विश्रम्य मुदिताऽभवत्॥'७.
कृत्वाऽवहारं सैन्यानां प्रविश्य शिविरं स्वकम्।
कुरवः सहिता मन्त्रं मन्त्रयांचक्रिरे मिथः॥ ८
पर्यङ्केषु परार्घ्येषु स्पर्ध्यास्तरणवत्सु च।
वरास्तनेषूपविष्टाः सुखशय्यास्विवामराः॥ ९
ततो दुर्योधनो राजा साम्ना परमवल्गुना।
तानाभाष्य महेष्वासान्प्राप्तकालमभाषत॥ १०
मतं मतिमतां श्रेष्ठाः सर्वे ब्रूत मा चिरम्।
एवंगतेन यत्कार्यं भवेत्कार्यतरं नृपाः॥ ११
सञ्जय उवाच।
एवमुक्ते नरेन्द्रेण नरसिंहा युयुत्सवः।
चक्रुर्नानाविधाश्चेष्टाः सिंहासनगतास्तदा॥ १२
तेषां निशाम्येङ्गितानि युद्धे प्राणाञ्जुहूषताम्।
समुद्वीक्ष्य मुखं राज्ञो बालार्कसमवर्चसम्।
आचार्यपुत्रो मेधावी वाक्यज्ञो वाक्यमाददे॥ १३
रागो योगस्तथा दाक्ष्यं नयश्चेत्यर्थसाधकाः।
उपायाः पण्डितैः प्रोक्तास्ते तु दैवमुपाश्रिताः॥१४
लोकप्रवीरा येऽस्माकं देवकल्पा महारथाः।
नीतिमन्तस्तथा युक्ता दक्षा रक्ताश्च ते हताः १५
न त्वेव कार्यं नैराश्यमस्माभिर्विजयं प्रति।
सुनीतैरिह सर्वार्थैर्दैवमप्यनुलोम्यते॥ १६
ते वयं प्रवरं नृणां सर्वैर्योधगुणैर्युतम्।
कर्णमेवाभिषेक्ष्यामः सैनापत्येन भारत॥ १७
कर्णं सेनापतिं कृत्वा प्रमथिष्यामहे रिपून्॥१८
एष ह्यतिबलः शूरः कृतास्त्रो युद्धदुर्मदः।
वैवस्वत इवासह्यः शक्तो जेतुं रणे रिपून्॥ १९
एतदाचार्यतनयाच्छ्रुत्वा राजंस्तवात्मजः।
'दुर्योधनो महाराज भृशं प्रीतमनास्तदा॥' २०
आशां बहुमतीं चक्रे कर्णं प्रति स वै तदा।
हते भीष्मे च द्रोणे च कर्णो जेष्यति पाण्डवान् २१
तामाशां हृदये कृत्वा समाश्वस्य च भारत।
[ततो दुर्योधनः प्रीतः प्रियं श्रुत्वाऽस्य तद्वचः।
प्रीतिसत्कारसंयुक्तं तथ्यमात्महितं शुभम्॥] २२
स्वं मनः समवस्थाप्य बाहुवीर्यमुपाश्रितः॥ २३
'प्रियसत्कारसंयुक्तं तथ्यमात्महिते रतम्।'
दुर्योधनो महाराज राधेयमिदमब्रवीत्॥ २४
कर्ण जानामि ते वीर्यं सौहृदं परमं मयि।
तथाऽपि त्वां महाबाहो प्रवक्ष्यामि हितं वचः॥२५
श्रुत्वा यथेष्टं च कुरु वीर यत्तव रोचते।
भवान्प्राज्ञतमो नित्यं मम चैव परा गतिः॥ २६
भीष्मद्रोणावतिरथौ हतौ सेनापती मम।
सेनापतिर्भवानस्तु ताभ्यां द्रविणवत्तरः॥ २७
वृद्धौ च तौ महेष्वासौ सापेक्षौ च धनंजये।
मानितौ च मया वीरौ राधेय वचनात्तव॥ २८
पितामहत्वं संप्रेक्ष्य पाण्डुपुत्रा महारणे।
रक्षितास्तात भीष्मेण दिवसानि दशैव तु॥ २९
न्यस्तशस्त्रे तु भवति हतो भीष्मः पितामहः।
शिखण्डिनं पुरुस्कृत्य फल्गुनेन महाहवे॥ ३०
हते तस्मिन्महेष्वासे शरतल्पगते तथा।
त्वयोक्ते पुरुषव्याघ्र द्रोणो ह्यासीत्पुरःसरः॥३१
तेनापि रक्षिताः पार्थाः शिष्यत्वादिति मे मतिः।
स चापि निहतो वृद्धो धृष्टद्युम्नेन सत्वरम्॥३२
निहताभ्यां प्रधानाभ्यां ताभ्यामतुलविक्रम।
त्वत्समं समरे योधं नान्यं पश्यामि चिन्तयन्॥३३
भवानेव तु नः शक्तो विजयाय न संशयः।
पूर्वं मध्ये च पश्चाच्च तथैव विहितं हितम्॥ ३४
स भवान्धुर्यवत्सङ्ख्ये धुरमुद्वोढुमर्हति।
अभिषेचय सैनान्ये स्वयमात्मानमात्मना॥ ३५

प्रत्यहारमिति वा पाठः॥ ५॥ पर्यङ्केष्वेव वरासनेषु॥ ९॥ कार्यतर आवश्यकतर यत्कार्यं कर्तव्यं पर मत संमत तत् प्रब्रूत॥ ११॥ चेष्टाः शौर्याभिनयरूपा भुजास्फालनाद्याः॥ १२॥ निशाम्य आलोच्य। वर्चस छान्दसष्टच्॥ १३॥ राग स्वामिभक्तिः। योगो देशकालादिसपत्ति। दाक्ष्य बलम्। नयो नीतिः॥ १४॥ सर्वार्थैः रागादिभिः सुनीतैः दैवमनुलोम्यतेऽनुकूल क्रियते। न केवल रागाद्यपेक्षया दैवस्य प्राबल्यमपितु दैवापेक्षयापि सुप्रणीता रागादय प्रबला इत्यर्थः॥ १६॥ बहुमती बाहुल्यवती अतिशयितामिति यावत्॥ २१॥ शुभ वच श्रुत्वा मन समवस्थाप्य समाधायाब्रवीदिति द्वयो संबन्धः॥ २२॥ ताभ्यां सकाशात् द्रविणवत्तर बलवत्तरः॥ २७॥ विहित त्वयेति शेषः॥ ३४॥ सैनान्ये

देवतानां यथा स्कन्दः सेनानीः प्रभुरव्ययः ।
तथा भवानिमां सेनां धार्तराष्ट्रीं बिभर्तु वै ॥३६
जहि शत्रुगणान्सर्वान्महेन्द्रो दानवानिव ।
अवस्थितं रणे दृष्ट्वा पाण्डवास्त्वां महारथाः ।
द्रविष्यन्ति च पाञ्चाला विष्णुं दृष्ट्वेव दानवाः ३७
तस्मात्त्वं पुरुषव्याघ्र प्रकर्षैतां महाचमूम् ॥ ३८
भवत्यवस्थिते यत्ते पाण्डवा मन्दचेतसः ।
द्रविष्यन्ति सहामात्याः पाञ्चालाः सृञ्जयाश्च ह ॥
यथा ह्यभ्युदितः सूर्यः प्रतपन्स्वेन तेजसा ।
व्यपोहति तमस्तीव्रं तथा शत्रून्प्रतापय ॥ ४०

सञ्जय उवाच ।

एवमुक्तस्तु राधेयो राज्ञा दुर्योधनेन ह ।
राज्ञां मध्ये महाबाहुः प्रीतात्मा स महाबलः ।
हर्षयन्नब्रवीत्कर्णो दुर्योधनमिदं वचः ॥ ४१

कर्ण उवाच ।

उक्तमेतन्मया पूर्वं गान्धारे तव सन्निधौ ।
जेष्यामि पाण्डवान्सर्वान्सपुत्रान्सजनार्दनान्४२
सेनापतिर्भविष्यामि तवाहं नात्र संशयः ।
स्थिरो भव महाराज जितान्विद्धि च पाण्डवान्४३

सञ्जय उवाच ।

एवमुक्तो महाराज ततो दुर्याधनो नृपः ।
उत्तस्थौ राजभिः सार्धं देवैरिव शतक्रतुः ॥ ४४
सैनापत्येन सत्कर्तुं कर्णं स्कन्दमिवामराः ।
ततोऽभिषिषिचुः कर्णं विधिदृष्टेन कर्मणा ॥ ४५
दुर्योधनमुखा राजन्राजानो विजयैषिणः ।
शातकुम्भमयैः कुम्भैर्माहेयैश्चाभिमन्त्रितैः ॥ ४६
तोयपूर्णैर्विषाणैश्च द्विपखड्गमहर्षभैः ।
मणिमुक्तायुतैश्चान्यैः पुण्यगन्धैस्तथौषधैः ॥ ४७
औदुम्बरे सुखासीनमासने क्षौमसंवृते ।
शास्त्रदृष्टेन विधिना संभारैश्च सुसंभृतैः ॥ ४८
ब्राह्मणाः क्षत्रिया वैश्यास्तथा शूद्राश्च संमताः ।
तुष्टुवुस्तं महात्मानमभिषिक्तं वरासने ॥ ४९
ततोऽभिषिक्ते राजेन्द्र निष्कैर्गोभिर्धनेन च ।
वाचयामास विप्राग्र्यान्राधेयः परवीरहा ॥ ५०
'स व्यरोचत राधेयः सूतमागधबन्दिभिः ।
स्तूयमानो यथा भानुरुदये ब्रह्मवादिभिः ॥ ५१
ततः पुण्याहघोषेण वादित्रनिनदेन च ।
जयशब्देन शूराणां तुमुलः सर्वतोऽभवत् ॥ ५२
जयेत्यूचुर्नृपाः सर्वे राधेयं तत्र संगताः ॥' ५३
जय पार्थान्सगोविन्दान्सानुगांस्तान्महामृधे ।
इति तं बन्दिनः प्राहुर्द्विजाश्च पुरुषर्षभम् ॥ ५४
जहि पार्थान्सपाञ्चालान्राधेय विजयाय नः ।
उद्यन्निव सदा भानुस्तमांस्युग्रैर्गभस्तिभिः ॥ ५५
न ह्यलं त्वद्विसृष्टानां शराणां वै सकेशवाः ।
उल्काः सूर्यरश्मीनां ज्वलतामिव दर्शने ॥ ५६
न हि पार्थाः सपाञ्चालाः स्थातुं शक्तास्तवाग्रतः ।
आत्तवज्रस्य समरे महेन्द्रस्येव दानवाः ॥ ५७

'सञ्जय उवाच ।

स सत्कृतः स्तूयमानः सुहृद्गणवृतो रुषा ।
कर्णो दुर्योधनं वाक्यमब्रवीत्प्रहसन्प्रियम् ॥ ५८
दुर्योधनाद्य सगणं पाण्डूनां प्रवरैः सह ।
फल्गुनं सूदयिष्यामि त्वत्प्रियार्थं सबान्धवम् ५९
सपर्वतार्णवद्वीपां शाधि गां गतपाण्डवाम् ।
पुत्रपौत्रप्रपौत्रेषु प्रतिष्ठां गमयिष्यसि ॥ ६०
नासह्यं विद्यते मह्यं त्वत्प्रियार्थमरिंदम ।
सत्यधर्मानुरक्तस्य सिद्धिरात्मवतो यथा ॥ ६१
अभिषिक्तस्तु राधेयः प्रभया सोऽमितप्रभः ।
अत्यरिच्यत रूपेण दिवाकर इवापरः ॥ ६२
सैनापत्ये तु राधेयमभिषिच्य सुतस्तव ।
अमन्यत तदात्मानं कृतार्थं कालचोदितः ॥६३
कर्णोऽपि राज्ञः संप्राप्य सैनापत्यमरिंदमः ।
योगमाज्ञापयामास सूर्यस्योदयनं प्रति ॥ ६४

सेनानीत्वे सैनापत्ये ॥ ३५ ॥ शातकुम्भमयैः सौवर्णैर्माहेयैर्महीमयैश्च कुम्भैः ॥ ४६ ॥ विषाणैः द्विपस्य गजस्य दन्तमयैः पात्रै । खड्गस्य गण्डकस्य । महर्षभस्य गवयस्य च शृङ्गैः । विषाण दन्तशृङ्गयोरिति विश्व । द्विपखड्गमहर्षभीयैरिति तद्धितलोप आर्षः ॥ ४७ ॥ शराणा दर्शनेपि नाल किमुत स्पर्शे इत्यर्थः ॥ ५६ ॥ सप्तमोऽध्याय. ॥ ७ ॥

तव पुत्रैर्वृतः कर्णः शुशुभे तत्र भारत । देवैरिव यथा स्कन्दः संग्रामे तारकामये ॥ ६५

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ॥ ८ ॥

कर्णार्जुनाभ्यां व्यूहरचनापूर्वकं रणाय निर्याणम् ॥ १ ॥

धृतराष्ट्र उवाच ।
सैनापत्यं तु संप्राप्य कर्णो वैकर्तनस्तदा ।
तथोक्तश्च स्वयं राज्ञा स्निग्धं भ्रातृसमं वचः ॥१
हितश्च प्रियकामश्च मम पुत्रस्य नित्यशः ।
अकरोत्किं महाप्राज्ञस्तन्ममाचक्ष्व सञ्जय ॥ २

सञ्जय उवाच ।
कर्णस्य मतमाज्ञाय पुत्रास्ते भरतर्षभ ।
योगमाज्ञापयामासुर्नन्दितूर्यपुरःसरम् ॥ ३
महत्यपररात्रे च तव सैन्यस्य भारिष ।
योगो योग इति ह्याशु प्रादुरासीन्महास्वनः ॥ ४
कल्पतां नागमुख्यानां रथानां च वरूथिनाम् ।
सन्नह्यतां नराणां च वाजिनां च विशांपते ॥५
क्रोशतां चैव योधानां त्वरितानां परस्परम् ।
बभूव तुमुलः शब्दो दिवस्पृक्सुमहांस्ततः ॥ ६
ततः श्वेतपताकेन बलाकावर्णवाजिना ।
हेमपृष्ठेन धनुषा नागकक्षेण केतुना ॥ ७
तूणीरशतपूर्णेन सगदेन वरूथिना ।
शतघ्नीकिङ्किणीशक्तिशूलतोमरधारिणा ॥ ८
कार्मुकैरुपपन्नेन विमलादित्यवर्चसा ।
रथेनाभिपताकेन सूतपुत्रो ह्यदृश्यत ॥ ९
ध्मापयन्वारिजं राजन्हेमजालविभूषितम् ।
विधुन्वानो महच्चापं कार्तस्वरविभूषितम् ॥ १०
दृष्ट्वा कर्णं महेष्वासं रथस्थं रथिनां वरम् ।
भानुमन्तमिवोद्यन्तं तमो घ्नन्तं दुरासदम् ॥ ११
न भीष्मव्यसनं केचिन्नापि द्रोणस्य भारिष ।
नान्येषां पुरुषव्याघ्र मेनिरे तत्र कौरवाः ॥ १२
ततस्तु त्वरयन्योधाञ्शङ्खशब्देन भारिष ।
कर्णो निष्कर्षयामास कौरवाणां महद्बलम् ॥१३
व्यूहं व्यूह्य महेष्वासो मकरं शत्रुतापनः ।
प्रत्युद्ययौ तथा कर्णः पाण्डवान्विजिगीषया ॥ १४
मकरस्य तु तुण्डे वै कर्णो राजन्व्यवस्थितः ।
नेत्राभ्यां शकुनिः शूर उलूकश्च महारथः ॥ १५
द्रोणपुत्रस्तु शिरसि ग्रीवायां सर्वसोदराः ।
मध्ये दुर्योधनो राजा बलेन महता वृतः ॥ १६
वामपादे तु राजेन्द्र कृतवर्मा व्यवस्थितः ।
नारायणबलैर्युक्तो गोपालैर्युद्धदुर्मदैः ॥ १७
पादे तु दक्षिणे राजन्गौतमः सत्यविक्रमः ।
त्रिगर्तैः सुमहेष्वासैर्दाक्षिणात्यैश्च संवृतः ॥ १८
अनुपादे तु यो वामस्तत्र शल्यो व्यवस्थितः ।
महत्या सेनया सार्धं मद्रदेशसमुत्थया ॥ १९
दक्षिणे तु महाराज सुषेणः सत्यसङ्गरः ।
वृतो रथसहस्रेण दन्तिनां च त्रिभिः शतैः ॥ २०
पुच्छे ह्यास्तां महावीर्यौ भ्रातरौ पार्थिवौ तदा ।
चित्रश्च चित्रसेनश्च महत्या सेनया वृतौ ॥ २१
तथा प्रयाते राजेन्द्र कर्णे नरवरोत्तमे ।
धनञ्जयमभिप्रेक्ष्य धर्मराजोऽब्रवीदिदम् ॥ २२
पश्य पार्थ यथा सेना धार्तराष्ट्रीह संयुगे ।
कर्णेन विहिता वीर गुप्ता वीरैर्महारथैः ॥ २३
हतवीरतमा ह्येषा धार्तराष्ट्री महाचमूः ।
फल्गुशेषा महाबाहो तृणैस्तुल्या मता मम ॥२४
एको ह्यत्र महेष्वासः सूतपुत्रो विराजते ।
सदेवासुरगन्धर्वैः सकिन्नरमहोरगैः ।

नन्दितूर्यमानन्दवाद्यम् ॥ ३ ॥ कल्पता सनह्यमानानाम् । वरूथिना रथगुप्तिमताम् । सन्नह्यतां नराणा सन्नह्यमानाना गजादीना च शब्दो बभूवेति द्वयो संबन्ध ॥ ५ ॥ श्वेतेत्यादिविशेषणद्वय रथेनेत्यस्य ॥ ७ ॥ अभिपताकेन वायोः प्रातिकूल्यादभिमुखपताकेन । एतत्पराजयसूचकम् ॥ ९ ॥ अनुपादे पादस्थानस्यापि पश्चाद्भागे ॥ १९ ॥ दक्षिणे अनुपादे ॥ २० ॥

चराचरैस्त्रिभिर्लोकैरजेयो यो महारथः ॥ २५
तं हत्वाऽद्य महाबाहो विजयस्तव फल्गुन ।
उद्धृतश्च भवेच्छल्यो मम द्वादशवार्षिकः ॥ २६
एवं ज्ञात्वा महाबाहो व्यूहं व्यूह यथेच्छसि ॥ २७

सञ्जय उवाच ।

भ्रातुरेतद्वचः श्रुत्वा पाण्डवः श्वेतवाहनः ।
अर्धचन्द्रेण व्यूहेन प्रत्यव्यूहत तां चमूम् ॥ २८
वामपार्श्वे तु तस्याथ भीमसेनो व्यवस्थितः ।
दक्षिणे च महेष्वासो धृष्टद्युम्नो व्यवस्थितः ॥ २९
मध्ये व्यूहस्य राजा तु पाण्डवश्च धनञ्जयः ।
नकुलः सहदेवश्च धर्मराजस्य पृष्ठतः ॥ ३०
चक्ररक्षौ तु पाञ्चाल्यौ युधामन्यूत्तमौजसौ ।
पार्थं न जहतुर्युद्धे पाल्यमानौ किरीटिना ॥ ३१
शेषा नृपतयो वीराः स्थिता व्यूहस्य दंशिताः ।
यथाभागं यथोत्साहं यथायत्नं च भारत ॥ ३२
एवमेतन्महाव्यूहं व्यूह्य भारत पाण्डवाः ।
तावकाश्च महेष्वासा युद्धायैव मनो दधुः ॥ ३३
दृष्ट्वा व्यूढां तव चमूं सूतपुत्रेण संयुगे ।
निहतान्पाण्डवान्मेने धार्तराष्ट्रः सबान्धवः ॥ ३४
तथैव पाण्डवीं सेनां व्यूढां दृष्ट्वा युधिष्ठिरः ।
धार्तराष्ट्रान्हतान्मेने सकर्णान्वै जनाधिपः ॥ ३५
ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
डिण्डिमाश्चाप्यहन्यन्त झर्झराश्च समन्ततः ॥ ३६
सेनयोरुभयो राजन्प्रावाद्यन्त महास्वनाः ।
सिंहनादश्च संजज्ञे शूराणां जयगृद्धिनाम् ॥ ३७
हयहेषितशब्दाश्च वारणानां च बृंहिताः ।
रथनेमिस्वनाश्चोग्राः संबभूवुर्जनाधिप ॥ ३८
न द्रोणव्यसनं कश्चिज्जानीते तत्र भारत ।
दृष्ट्वा कर्णं महेष्वासं मुखे व्यूहस्य दंशितम् ॥ ३९
उभे सैन्ये महाराज प्रहृष्टनरसङ्कुले ।
योद्धुकामे स्थिते राजन्हन्तुमन्योन्यमोजसा ॥ ४०
विजये जातसंरम्भे दृष्ट्वाऽन्योन्यं व्यवस्थिते ।
अनीकमध्ये राजेन्द्र चेरतुः कर्णपाण्डवौ ॥ ४१
नृत्यन्त्याविव ते सेने समेयातां परस्परम् ।
तयोः पक्षप्रपक्षेभ्यो निर्ययुर्युद्धलिप्सवः ॥ ४२
ततः प्रववृते युद्धं नरवारणवाजिनाम् ।
रथानां च महाराज अन्योन्यमभिनिघ्नताम् ॥ ४३

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धारम्भे अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः ॥ ९ ॥

संकुलयुद्धम् ॥ १ ॥ भीमेन क्षेमधूर्तिवधः ॥ २ ॥

सञ्जय उवाच ।

ते सेनेऽन्योन्यमासाद्य प्रहृष्टाश्वनरद्विपे ।
बृहत्यौ संप्रजह्राते देवासुरचमूसमे ॥ १
ततो नानारथाश्वेभाः पत्तयश्चोग्रविक्रमाः ।
संप्रहारान्भृशं चक्रुर्देहपाप्मविनाशनान् ॥ २
पूर्णचन्द्रार्कपद्मानां कान्तित्विङ्निन्धतः समैः ।
उत्तमाङ्गैर्नृसिंहानां नृसिंहास्तस्तरुर्महीम् ॥ ३
अर्धचन्द्रैस्तथा भल्लैः क्षुरप्रैरसिपट्टसैः ।
परश्वधैश्चापहृतान्युत्तमाङ्गानि युध्यताम् ॥ ४
व्यायतायतबाहूनां व्यायतायतबाहुभिः ।
बाहवः पातिता रेजुर्धरण्यां सायुधाङ्गदैः ॥ ५
तैः स्फुरद्भिर्महो भाति रक्ताङ्गुलितलैस्तथा ।
गरुडप्रहितैरुग्रैः पञ्चास्यैरुरगैरिव ॥ ६
द्विरदस्यन्दनाश्वेभ्यः पेतुर्वीरा द्विषद्धताः ।
विमानेभ्यो यथा क्षीणे पुण्ये स्वर्गसदस्तथा ॥ ७
गदाभिरन्ये गुर्वीभिः परिघैर्मुसलैरपि ।
पोथिताः शतशः पेतुर्वीरा वीरतरै रणे ॥ ८
रथा रथैर्विमथिता मत्ता मत्तैर्द्विपा द्विपैः ।

व्यूह रत्नय ॥ २७ ॥ अष्टमोऽध्याय. ॥ ८ ॥
तस्तरुः आस्तीर्णवन्त· ॥ ३ ॥ व्यायता पुष्टाः । आयताः दीर्घा ॥ ५ ॥ प्रहितै निरस्तै । ओहाक् त्यागे ॥ ६ ॥

सादिनः सादिभिश्चैव तस्मिन्परमसंकुले ॥ ९
रथैर्नरा रथा नागैरश्वारोहाश्च पत्तिभिः ।
अश्वारोहैः पदाताश्च निहता युधि शेरते ॥ १०
रथाश्वपत्तयो नागै रथाश्वेभाश्च पत्तिभिः ।
रथपत्तिद्विपाश्चाश्वै रथैश्चापि नरद्विपाः ॥ ११
रथाश्वेभनराणां तु नराश्वेभरथैः कृतम् ।
पाणिपादैश्च शस्त्रैश्च रथैश्च कदनं महत् ॥ १२
तथा तस्मिन्बले शूरैर्वध्यमाने हतेऽपि च ।
अस्मानभ्याययुः पार्था वृकोदरपुरोगमाः ॥ १३
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः ।
सात्यकिश्चेकितानश्च द्राविडैः सैनिकैः सह ॥ १४
वृता व्यूहेन महता पाण्ड्याश्चोलाः सकेरलाः ।
व्यूढोरस्का दीर्घभुजाः प्रांशवः पृथुलोचनाः ॥ १५
आपीडिनो रक्तदन्ता मत्तमातङ्गविक्रमाः ।
नानाविरागवसना गन्धचूर्णावचूर्णिताः ॥ १६
बद्धासयः पाशहस्ता वारणप्रतिवारणाः ।
समानमृत्यवो राजन्नात्यजन्त परस्परम् ॥ १७
कलापिनश्चापहस्ता दीर्घकेशाः प्रियंवदाः ।
पत्तयः सायकैर्विद्धा घोररूपपराक्रमाः ॥ १८
अथापरे पुनः शूराश्चेदिपाञ्चालकेकयाः ।
कारूशाः कोसलाः काश्या मागधाश्चापि दुद्रुवुः ॥
तेषां रथाश्वनागाश्च प्रवराश्चोग्रपत्तयः ।
नानाबाणरवैर्हृष्टा नृत्यन्ति च हसन्ति च ॥ २०
तस्य सैन्यस्य महतो महामात्रवरैर्वृतः ।
मध्ये वृकोदरोऽभ्यायात्त्वदीयान्नागधूर्गतः ॥ २१
स नागप्रवरोऽत्युग्रो विधिवत्कल्पितो बभौ ।
उदयाग्राद्रिभवनं यथाऽभ्युदितभास्करम् ॥ २२
तस्यायसं वर्मवरं वररत्नविभूषितम् ।
ताराव्याप्तस्य नभसः शारदस्य समं त्विषा ॥ २३
स तोमरव्यग्रकरश्चारुमौलिः स्वलंकृतः ।
शरन्मध्यन्दिनार्कोभस्तेजसा प्रादहद्रिपून् ॥ २४
तं दृष्ट्वा द्विरदं दूरात्क्षेमधूर्तिर्द्विपस्थितः ।
आह्वयन्नभिदुद्राव ग्रहसन्पूतनामुखे ॥ २५
तयोः समभवद्युद्धं द्विपयोरुग्ररूपयोः ।
यदृच्छया द्रुतवतोर्महापर्वतयोरिव ॥ २६
संसक्तनागौ तौ वीरौ तोमरैरितरेतरम् ।
बलवत्मूर्यरश्म्याभैर्भित्त्वाऽन्योन्यं विनेदतुः ॥ २७
व्यपसृत्य तु नागाभ्यां मण्डलानि विचेरतुः ।
प्रगृह्य चोभौ धनुषी जघ्नतुर्वै परस्परम् ॥ २८
ष्वेडितास्फोटितरवैर्वाणशब्दैस्तु सर्वतः ।
तौ जनं हर्षयन्तौ च सिंहनादं प्रचक्रतुः ॥ २९
समुद्यतकराभ्यां तौ द्विपाभ्यां कृतिनावुभौ ।
वातोद्धूतपताकाभ्यां युयुधाते महाबलौ ॥ ३०
तावन्योन्यस्य धनुषी छित्त्वाऽन्योन्यं विनेदतुः ।
शक्तितोमरवर्षेण प्रावृण्मेघाविवाम्बुभिः ॥ ३१
क्षेमधूर्तिस्तदा भीमं तोमरेण स्तनान्तरे ।
निर्विभेदातिवेगेन षड्भिश्चाप्यपरैर्नदन् ॥ ३२
स भीमसेनः शुशुभे तोमरैरङ्गमाश्रितैः ।
क्रोधदीप्तवपुर्मेघैः सप्तसप्तिरिवांशुमान् ॥ ३३
ततो भास्करवर्णाभमञ्जोगतिमयस्मयम् ।
ससर्ज तोमरं भीमः प्रत्यमित्राय यत्नवान् ॥ ३४
ततः करूशाधिपतिश्चापमानम्य सायकैः ।
दशभिस्तोमरं भित्त्वा षष्ठ्या विव्याध पाण्डवम् ॥ ३५
अथ कार्मुकमादाय भीमो जलदनिःस्वनम् ।
रिपोरभ्यर्दयन्नागमुन्नदन्पाण्डवः शरैः ॥ ३६
स शरौघार्दितो नागो भीमसेनेन संयुगे ।
गृह्यमाणोऽपि नातिष्ठद्वातोद्धूत इवाम्बुदः ॥ ३७
तमभ्यधावद्विरदं भीमो भीमस्य नागराट् ।
महावातेरितं मेघं वातोद्धूत इवाम्बुदः ॥ ३८
सन्निवार्यात्मनो नागं क्षेमधूर्तिः प्रतापवान् ।

आपीडिन भूषावन्त· । नाना पृथक् विविधरागाणि वसनानि येषा ते विरागवसना· ॥ १६ ॥ नागधूर्गत गजस्कन्धगत ॥ २१ ॥ उदयाग्राद्रिभवन उदयाद्रेरग्रभवनम् । अग्राद्रीत्यग्र-शब्दस्य पूर्वनिपात आर्ष । उदयनामा अग्राद्रि पूर्वपर्वत सएव भवनमिति वा ॥ २२ ॥ शारदस्य शरदा उपलक्षितस्य ॥ २३ ॥ चारुमौलिः रम्यकिरीट· ॥ २४ ॥ स भीमसेनः मेघैः सप्तसप्तिरिवाशुमान् । यथा मेघान्तर्हितस्य सूर्यस्य मरीचयः रश्मिरूपेण सर्वत प्रचरन्ति एव रश्मिस्थानीयास्तोमराः ॥ ३३ ॥ अञ्जोगति ऋजुगतिम् ॥ ३४ ॥ गृह्यमाणः निगृह्य-माण. क्षेमधूर्तिना ॥ ३७ ॥

विव्याधाभिद्रुतं बाणैर्भीमसेनस्य कुञ्जरम् ॥ ३९
ततः साधुविसृष्टेन क्षुरेणानतपर्वणा ।
छित्त्वा शरासनं शत्रोर्नागं चापि प्रमार्दयत् ॥ ४०
ततः क्रुद्धो रणे भीमं क्षेमधूर्तिः पराभिनत् ।
जघान चास्य द्विरदं नाराचैः सर्वमर्मसु ॥ ४१
स पपात महानागो भीमसेनस्य भारत ।
पुरा नागस्य पतनादवप्लुत्य स्थितो महीम् ॥ ४२
भीमसेनोऽपि तन्नागं गदया समपोथयत् ।
तस्मात्प्रमथितान्नागात्क्षेमधूर्तिरवप्लुतः ॥ ४३
'उद्धृत्य खड्गं निशितमभ्यधावत्स पाण्डवम् ।'
उद्यतायुधमायान्तं गदयाऽहन्वृकोदरः ॥ ४४
स पपात हतः सासिर्व्यसुस्तमभितो द्विपम् ।
वज्रप्रभग्नमचलं सिंहो वज्रहतो यथा ॥ ४५
तं हतं नृपतिं दृष्ट्वा करूशानां यशस्करम् ।
प्राद्रवन्व्यथिता सेना त्वदीया भरतर्षभ ॥ ४६

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ॥ १० ॥

द्वन्द्वयुद्धम् ॥ १ ॥ सात्यकिना विन्दानुविन्दवधः ॥ २ ॥

सञ्जय उवाच ।
ततः कर्णो महेष्वासः पाण्डवानामनीकिनीम् ।
जघान समरे शूरः शरैः सन्नतपर्वभिः ॥ १
तथैव पाण्डवा राजंस्तव पुत्रस्य वाहिनीम् ।
कर्णस्य प्रमुखे क्रुद्धा निजघ्नुस्ते महारथाः ॥ २
कर्णोऽपि राजन्समरे व्यहनत्पाण्डवीं चमूम् ।
नाराचैरर्करश्म्याभैः कर्मारपरिमार्जितैः ॥ ३
तत्र भारत कर्णेन नाराचैस्ताडिता गजाः ।
नेदुः सेदुश्च मम्लुश्च बभ्रमुश्च दिशो दश ॥ ४
वध्यमाने बले तस्मिन्सूतपुत्रेण मारिष ।
नकुलोऽभ्यद्रवत्तूर्णं सूतपुत्रं महारणे ॥ ५
भीमसेनस्तथा द्रौणिं कुर्वाणं कर्म दुष्करम् ।
विन्दानुविन्दौ कैकेयौ सात्यकिः समवारयत् ॥ ६
श्रुतकर्माणमायान्तं चित्रसेनो महीपतिः ।
प्रतिविन्ध्यस्तथा चित्रं चित्रकेतनकार्मुकम् ॥ ७
दुर्योधनस्तु राजानं धर्मपुत्रं युधिष्ठिरम् ।
संशप्तकगणा हृष्टा ह्यभ्यधावन्धनञ्जयम् ॥ ८
धृष्टद्युम्नः कृपं चापि तस्मिन्वीरवरक्षये ।
शिखण्डी कृतवर्माणं समासादयदच्युतम् ॥ ९
श्रुतकीर्तिस्तथा शल्यं माद्रीपुत्रः सुतं तव ।
दुःशासनं महाराज सहदेवः प्रतापवान् ॥ १०
कैकेयौ सात्यकिं युद्धे शरवर्षेण भास्वता ।
सात्यकिः केकयौ चापि च्छादयामास भारत ॥ ११
तावेनं भ्रातरौ वीरौ जघ्नतुर्हृदये भृशम् ।
विषाणाभ्यां यथा नागौ प्रतिनागं महावने ॥ १२
शरसंभिन्नवर्माणौ तावुभौ भ्रातरौ रणे ।
सात्यकिं सत्यकर्माणं राजन्विव्यधतुः शरैः ॥ १३
तौ सात्यकिर्महाराज प्रहसन्सर्वतोदिशः ।
छादयच्छरवर्षेण वारयामास भारत ॥ १४
वार्यमाणौ ततस्तौ हि शैनेयशरवृष्टिभिः ।
शैनेयस्य रथं तूर्णं छादयामासतुः शरैः ॥ १५
तयोस्तु धनुषी चित्रे छित्त्वा शौरिर्महायशाः ।
अथ तौ सायकैस्तीक्ष्णैर्वारयामास सात्यकिः ॥ १६
अथान्ये धनुषी चित्रे प्रगृह्य च महाशरान् ।
सात्यकिं छादयन्तौ तौ चेरतुर्लघु सुष्ठु च ॥ १७
ताभ्यां मुक्ता महाबाणाः कङ्कबर्हिणवाससः ।
द्योतयन्तो दिशः सर्वाः संपेतुः स्वर्णभूषणाः ॥ १८
बाणान्धकारमभवत्तयो राजन्महामृधे ।

अहन्हतवान् ॥ ४४ ॥ हतः गदया शकलीकृत । अतएव अभितोद्विप द्विपस्यभित. पपात ॥ ४५ ॥ नवमोऽध्याय ॥ ९ ॥

द्रौणिमभ्यद्रवत् ॥ ६ ॥ कृपेण युयुधे इति शेष ॥ ९ ॥

माद्रीपुत्र. सुत तवेत्यस्य व्याख्या दुःशासनमिति ॥ १० ॥

लघु शीघ्रम् । सुष्ठु शोभनम् ॥ १७ ॥

अन्योन्यस्य धनुश्चैव चिच्छिदुस्ते महारथाः ॥ १९
ततः क्रुद्धो महाराज सात्वतो युद्धदुर्मदः।
धनुरन्यत्समादाय सज्यं कृत्वा च संयुगे ॥ २०
क्षुरप्रेण सुतीक्ष्णेन ह्यनुविन्दशिरोऽहरत्।
अपतच्छिरो राजन्कुण्डलोपचितं महत् ॥ २१
शम्बरस्य शिरो यद्वन्निहतस्य महारणे।
शोचयन्केकयान्सर्वाञ्जगामाशु वसुंधराम् ॥ २२
तं दृष्ट्वा निहतं शूरं भ्राता तस्य महारथः।
सज्यमन्यद्धनुः कृत्वा शैनेयं पर्यवारयत् ॥ २३
स षष्ट्या सात्यकिं विद्ध्वा स्वर्णपुङ्खैः शिलाशितैः।
ननाद बलवन्नादं तिष्ठतिष्ठेति चाब्रवीत् ॥ २४
सात्यकिं च ततस्तूर्णं केकयानां महारथः।
शरैरनेकसाहस्रैर्बाह्वोरुरसि चार्पयत् ॥ २५
स शरैः क्षतसर्वाङ्गः सात्यकिः सत्यविक्रमः।
रराज समरे राजन्सपुष्प इव किंशुकः ॥ २६
सात्यकिः समरे विद्धः कैकेयेन महात्मना।
कैकेयं पञ्चविंशत्या विव्याध प्रहसन्निव ॥ २७
तावन्योन्यस्य समरे संछिद्य धनुषी शुभे।
हत्वा च सारथी तूर्णं हयांश्च रथिनां वरौ ॥ २८
विरथावसियुद्धाय समाजग्मतुराहवे।
शतचन्द्रचिते गृह्य चर्मणी सुभुजौ तथा ॥ २९
विरोचेतां महाराज्ञे निस्त्रिंशवरधारिणौ।
यथा देवासुरे युद्धे जम्भशक्रौ महाबलौ ॥ ३०
मण्डलानि ततस्तौ तु विचरन्तौ महारणे।
अन्योन्यमभितस्तूर्णं समाजग्मतुराहवे ॥ ३१
अन्योन्यस्य वधे चैव चक्रतुर्यत्नमुत्तमम्।
कैकेयस्य द्विधा चर्म ततश्चिच्छेद सात्वतः ॥ ३२
सात्यकेस्तु तथैवासौ चर्म चिच्छेद पार्थिवः।
चर्म च्छित्त्वा तु कैकेयस्तारागणशतैर्वृतम्।
चचार मण्डलान्येव गतप्रत्यागतानि च ॥ ३३
तं चरन्तं महाराज्ञे निस्त्रिंशवरधारिणम्।
अपहस्तेन चिच्छेद शैनेयस्त्वरयाऽन्वितः ॥ ३४
सवर्मा केकयो राजन्द्विधा च्छिन्नो महारणे।
निपपात महेष्वासो वज्राहत इवाचलः ॥ ३५
तं निहत्य रणे शूरः शैनेयो रथसत्तमः।
युधामन्युरथं तूर्णमारुरोह परंतपः ॥ ३६
ततोऽन्यं रथमास्थाय विधिवत्कल्पितं पुनः।
केकयानां महत्सैन्यं व्यधमत्सात्यकिः शरैः ॥ ३७
सा वध्यमाना समरे केकयानां महाचमूः।
तमुत्सृज्य रणे शत्रुं प्रदुद्राव दिशो दश ॥ ३८

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः ॥ ११ ॥

प्रतिविन्ध्यश्रुतकर्मभ्यां चित्रचित्रसेनयोः संहार ॥ १ ॥

सञ्जय उवाच।
श्रुतकर्मा ततो राजंश्चित्रसेनं महीपतिम्।
आजघ्ने समरे क्रुद्धः पञ्चाशद्भिः शिलीमुखैः ॥ १
चित्रसेनस्तु तं राजन्नवभिर्नतपर्वभिः।
श्रुतकर्माणमाहत्य सूतं विव्याध पञ्चभिः ॥ २
श्रुतकर्मा ततः क्रुद्धश्चित्रसेनं चमूमुखे।
नाराचेन सुतीक्ष्णेन मर्मदेशे समार्पयत् ॥ ३
सोऽतिविद्धो महाराज नाराचेन महात्मना।
मूर्च्छामभिययौ वीरः कश्मलं चाविवेश ह ॥ ४
एतस्मिन्नन्तरे चैनं श्रुतकीर्तिर्महायशाः।
नवत्या जगतीपालं छादयामास पत्रिभिः ॥ ५
प्रतिलभ्य ततः संज्ञां चित्रसेनो महारथः।
धनुश्चिच्छेद भल्लेन तं च विव्याध सप्तभिः ॥ ६
सोऽन्यत्कार्मुकमादाय वेगघ्नं रुक्मभूषितम्।
चित्ररूपधरं चक्रे चित्रसेनं शरोर्मिभिः ॥ ७
स शरैश्चित्रितो राजा चित्रमाल्यधरो युवा।

उपचितमलकृतम् ॥ २१ ॥ अपहस्तेन तिर्यग्घस्तेन ॥ ३४ ॥ दशमोऽध्याय. ॥ १० ॥

आहत्य सताञ्च ॥ २ ॥ मूर्च्छां अर्धनिद्राम्। कश्मलमचित्तत्वम् ॥ ४ ॥ एन श्रुतकर्माणम् ॥ ५ ॥ त श्रुतकर्माणम्॥६॥

अशोभत महारङ्गे श्वाविच्छललतो यथा ॥ ८
श्रुतकर्माणमथ वै नाराचेन स्तनान्तरे ।
विभेद तरसा शूरस्तिष्ठतिष्ठेति चाब्रवीत् ॥ ९
श्रुतकर्मापि समरे नाराचेन समर्पितः ।
सुस्राव रुधिरं तत्र गैरिकाम्बु यथाऽचलः ॥ १०
ततः स रुधिराक्ताङ्गो रुधिरेण कृतच्छविः ।
रराज समरे वीरः सपुष्प इव किंशुकः ॥ ११
श्रुतकर्मा ततो राजञ्शत्रुणा समभिद्रुतः ।
शत्रुसंवारणं क्रुद्धो द्विधा चिच्छेद कार्मुकम् ॥ १२
अथैनं छिन्नधन्वानं नाराचानां शतैस्त्रिभिः ।
छादयन्समरे राजन्विव्याध च सुपत्रिभिः ॥ १३
ततोऽपरेण भल्लेन तीक्ष्णेन निशितेन च ।
जहार सशिरस्त्राणं शिरस्तस्य महात्मनः ॥ १४
तच्छिरो न्यपतद्भूमौ चित्रसेनस्य दीप्तिमत् ।
यदृच्छया यथा चन्द्रश्च्युतः स्वर्गान्महीतलम् ॥ १५
राजानं निहतं दृष्ट्वा तेऽभिसारं तु मारिष ।
अभ्यद्रवन्त वेगेन चित्रसेनस्य सैनिकाः ॥ १६
ततः क्रुद्धो महेष्वासस्तत्सैन्यं प्राद्रवच्छरैः ।
अन्तकाले यथा क्रुद्धः सर्वभूतानि प्रेतराट् ॥ १७
ते वध्यमानाः समरे तव पौत्रेण धन्विना ।
व्यद्रवन्त दिशस्तूर्णं दावदग्धा इव द्विपाः ॥ १८
तांस्तु विद्रवतो दृष्ट्वा निरुत्साहान्द्विषज्जये ।
द्रावयन्निषुभिस्तीक्ष्णैः श्रुतकर्मा व्यरोचत ॥ १९
प्रतिविन्ध्यस्ततश्चित्रं भित्त्वा पञ्चभिराशुगैः ।
सारथिं च त्रिभिर्विद्ध्वा ध्वजमेकेषुणापि च ॥ २०
तं चित्रो नवभिर्भल्लैर्बाह्वोरुरसि चार्पयत् ।
स्वर्णपुङ्खैः प्रसन्नाग्रैः कङ्कबर्हिणवाजितैः ॥ २१
प्रतिविन्ध्यो धनुश्छित्त्वा तस्य भारत सायकैः ।
पञ्चभिर्निशितैर्बाणैरथैनं स हि जघ्निवान् ॥ २२
ततः शक्तिं महाराज स्वर्णघण्टां दुरासदाम् ।
प्राहिणोत्प्रतिविन्ध्याय विचिन्वन्तीममूनिव २३

तामापतन्तीं सहसा शक्तिमुल्कामिवाम्बरे ।
द्विधा चिच्छेद समरे प्रतिविन्ध्यो हसन्निव ॥ २४
सा पपात द्विधा छिन्ना प्रतिविन्ध्यशरैः शितैः ।
युगान्ते सर्वभूतानि त्रासयन्ती यथाऽशनिः ॥ २५
शक्तिं तां प्रहतां दृष्ट्वा चित्रो गृह्य महागदाम् ।
प्रतिविन्ध्याय चिक्षेप रुक्मजालविभूषिताम् २६
सा जघान हयांस्तस्य सारथिं च महारणे ।
रथं प्रमृद्य वेगेन धरणीमन्वपद्यत ॥ २७
एतस्मिन्नेव काले तु रथादाप्लुत्य भारत ।
शक्तिं चिक्षेप चित्राय स्वर्णदण्डामलंकृताम् २८
तामापतन्तीं जग्राह चित्रो राजन्महामनाः ।
ततस्तामेव चिक्षेप प्रतिविन्ध्याय पार्थिवः ॥ २९
समासाद्य रणे शूरं प्रतिविन्ध्यं महाप्रभा ।
निर्भिद्य दक्षिणं बाहुं निपपात महीतले ।
पतिताऽभासयच्चैव तं देशमशनिर्यथा ॥ ३०
प्रतिविन्ध्यस्ततो राजंस्तोमरं हेमभूषितम् ।
प्रेषयामास संक्रुद्धश्चित्रस्य वधकाङ्क्षया ॥ ३१
स तस्य गात्रावरणं भित्त्वा हृदयमेव च ।
जगाम धरणीं तूर्णं महोरग इवाशयम् ॥ ३२
स पपात तदा राजा तोमरेण समाहतः ।
प्रसार्य विपुलौ बाहू पीनौ परिघसन्निभौ ॥ ३३
चित्रं संप्रेक्ष्य निहतं तावका रणशोभिनः ।
अभ्यद्रवन्त वेगेन प्रतिविन्ध्यं समन्ततः ॥ ३४
सृजन्तो विविधान्बाणाञ्शतघ्नीश्च सकिङ्किणीः ।
तमवच्छादयामासुः सूर्यमभ्रगणा इव ॥ ३५
तान्विधम्य महाबाहुः शरजालेन संयुगे ।
व्यद्रावयत्तव चमूं वज्रहस्त इवासुरीम् ॥ ३६
ते वध्यमानाः समरे तावकाः पाण्डवैर्नृप ।
विप्रकीर्यन्त सहसा वातनुन्ना घना इव ॥ ३७
विप्रद्रुते बले तस्मिन्वध्यमाने समन्ततः ।
द्रौणिरेकोऽभ्ययाच्चूर्णं भीमसेनं महाबलम् ॥ ३८

कृतच्छवि· आहितशोभ ॥ ११ ॥ सुपत्रिभिः शोभनपुङ्खवद्भिर्नाराचाना शतैः ॥ १३ ॥ प्रेतराट् यमः ॥ १७ ॥ दावो दावाग्निस्तेन दग्धा ॥ १८ ॥ गात्रावरण कवचम् ॥ ३२ ॥ एकादशोऽध्याय. ॥ ११ ॥

ततः समागमो घोरो बभूव सहसा तयोः। यथा दैवासुरे युद्धे वृत्रवासवयोरिव ॥ ३९

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ॥ १२ ॥

भीमाश्वत्थाम्नोर्युद्धम् ॥ १ ॥

सञ्जय उवाच।
भीमसेनं ततो द्रौणी राजन्विव्याध पत्रिणा। परया त्वरया युक्तो दर्शयन्नस्त्रलाघवम् ॥ १
अथैनं पुनराजघ्ने नवत्या निशितैः शरैः। सर्वमर्माणि संप्रेक्ष्य मर्मज्ञो लघुहस्तवत् ॥ २
भीमसेनः समाकीर्णो द्रौणिना निशितैः शरैः। रराज समरे राजन्रश्मिवानिव भास्करः ॥ ३
ततः शरसहस्रेण सुप्रयुक्तेन पाण्डवः। द्रोणपुत्रमवच्छाद्य सिंहनादमथुञ्चत ॥ ४
शरैः शरांस्ततो द्रौणिः संवार्य युधि पाण्डवम्। ललाटेऽभ्याहनद्राजन्नाराचेन स्मयन्निव ॥ ५
ललाटस्थं ततो बाणं धारयामास पाण्डवः। यथा शृङ्गं वने दृप्तः खड्गो धारयते नृप ॥ ६
ततो द्रौणिं रणे भीमो यतमानं पराक्रमी। त्रिभिर्विव्याध नाराचैर्ललाटे विस्मयन्निव ॥ ७
ललाटस्थैस्ततो बाणैर्ब्राह्मणोऽसौ व्यशोभत। प्रावृषीव यथा सिक्तस्त्रिशृङ्गः पर्वतोत्तमः ॥ ८
ततः शरशतैर्द्रौणिरर्दयामास पाण्डवम्। न चैनं कम्पयामास मातरिश्वेव पर्वतम् ॥ ९
तथैव पाण्डवो युद्धे द्रौणिं शरशतैः शितैः। नाकम्पयत संहृष्टो वार्योघ इव पर्वतम् ॥ १०
तावन्योन्यं शरैर्घोरैश्छादयानौ महारथौ। रथवर्यगतौ वीरौ शुशुभाते बलोत्कटौ ॥ ११
आदित्याविव संदीप्तौ लोकक्षयकरावुभौ। स्वरश्मिभिरिवान्योन्यं तापयन्तौ शरोत्तमैः ॥ १२
ततः प्रतिकृते यत्नं कुर्वाणौ तौ महारणे। कृतप्रतिकृते यत्तौ शरसङ्घैरभीतवत् ॥ १३
व्याघ्राविव च संग्रामे चेरतुस्तौ नरोत्तमौ। शरदंष्ट्रौ दुराधर्षौ चापवक्त्रौ भयंकरौ ॥ १४
अभूतां तावदृश्यौ च शरजालैः समन्ततः। मेघजालैरिव च्छन्नौ गगने चन्द्रभास्करौ ॥ १५
चकाशेते मुहूर्तेन ततस्तावप्यरिंदमौ। विमुक्तावभ्रजालेन अङ्गारकबुधाविव ॥ १६
अथ तत्रैव संग्रामे वर्तमाने सुदारुणे। अपसव्यं ततश्चक्रे द्रौणिस्तत्र वृकोदरम् ॥ १७
किरञ्छरशतैरुग्रैर्धाराभिरिव पर्वतम्। न तु तन्मृषे भीमः शत्रोर्विजयलक्षणम् ॥ १८
प्रतिचक्रे ततो राजन्पाण्डवोऽप्यपसव्यतः। मण्डलानां विभागेन गतप्रत्यागतेन च ॥ १९
बभूव तुमुलं युद्धं तयोः पुरुषसिंहयोः। चरित्वा विविधान्मार्गान्मण्डलस्थानमेव च ॥ २०
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः। अन्योन्यस्य वधे चैव चक्रतुर्यत्नमुत्तमम् ॥ २१
ईषतुर्विरथं चैव कर्तुमन्योन्यमाहवे। ततो द्रौणिर्महास्त्राणि प्रादुश्चक्रे महारथः ॥ २२
तान्यस्त्रैरेव समरे प्रतिजघ्नेऽथ पाण्डवः। ततो घोरं महाराज अस्त्रयुद्धमवर्तत ॥ २३
ग्रहयुद्धं यथा घोरं प्रजासंहरणे ह्यभूत्। ते बाणाः समसज्जन्त मुक्तास्ताभ्यां तु भारत ॥ २४
द्योतयन्तो दिशः सर्वास्तव सैन्यं समन्ततः। बाणसङ्घैर्वृतं घोरमाकाशं समपद्यत ॥ २५
उल्कापाताबृतं युद्धं प्रजानां संक्षये नृप। बाणाभिघातात्संजज्ञे तत्र भारत पावकः ॥ २६
सविस्फुलिङ्गो दीप्तार्चिर्योऽदहद्वाहिनीद्वयम्।

खड्ग. गण्डक॰ ॥ ६ ॥ कृतप्रतिकृते अन्योन्यास्त्रप्रतिघाते ॥ १३ ॥ ईषतुः इच्छा चक्रतु ॥ २२ ॥ उल्कानामन्योन्याभिमुख पातास्तैरावृतमिवेति लुप्तोपमा ॥ २६ ॥

तत्र सिद्धा महाराज संपतन्तोऽब्रुवन्वचः ॥ २७
युद्धानामति सर्वेषां युद्धमेतदिति प्रभो ।
सर्वयुद्धानि चैतस्य कलां नार्हन्ति षोडशीम् ॥ २८
नेदृशं च पुनर्युद्धं भविष्यति कदाचन ।
अहो ज्ञानेन संपन्नावुभौ ब्राह्मणक्षत्रियौ ॥ २९
अहो शौर्येण संपन्नावुभौ चोग्रपराक्रमौ ।
अहो भीमबलो भीम एतस्य च कृतास्त्रता ॥ ३०
अहो वीर्यस्य सारत्वमहो सौष्ठवमेतयोः ।
स्थितावेतौ हि समरे कालान्तकयमोपमौ ॥ ३१
रुद्रौ द्वाविव संभूतौ यथा द्वाविव भास्करौ ।
यमौ वा पुरुषव्याघ्रौ घोररूपावुभौ रणे ॥ ३२
इति वाचः स्म श्रूयन्ते सिद्धानां वै मुहुर्मुहुः ।
सिंहनादश्च संजज्ञे समेतानां दिवौकसाम् ॥ ३३
अद्भुतं चाप्यचिन्त्यं च दृष्ट्वा कर्म तयो रणे ।
सिद्धचारणसङ्घानां विस्मयः समपद्यत ॥ ३४
प्रशंसन्ति तदा देवाः सिद्धाश्च परमर्षयः ।
साधु द्रौणे महाबाहो साधु भीमेति चाब्रुवन् ॥ ३५
तौ शूरौ समरे राजन्परस्परकृतागसौ ।
परस्परमुदीक्षेतां क्रोधादुद्वृत्य चक्षुषी ॥ ३६
क्रोधरक्तेक्षणौ तौ तु क्रोधात्स्फुरिताधरौ ।
क्रोधात्संदष्टदशनौ तथैव दशनच्छदौ ॥ ३७
अन्योन्यं छादयन्तौ स्म शरवृष्ट्या महारथौ ।
शराम्बुधारौ समरे शस्त्रविद्युत्प्रकाशिनौ ॥ ३८
तावन्योन्यं ध्वजं विद्ध्वा सारथिं च महारणे ।
अन्योन्यस्य हयान्विद्ध्वा विभिदाते परस्परम् ॥ ३९
ततः क्रुद्धौ महाराज बाणौ गृह्य महाहवे ।
उभौ चिक्षिपतुस्तूर्णमन्योन्यस्य वधैषिणौ ॥ ४०
तौ सायकौ महाराज द्योतमानौ चमूमुखे ।
आजघ्नतुः समासाद्य वज्रवेगौ दुरासदौ ॥ ४१
तौ परस्परवेगाच्च शराभ्यां च भृशाहतौ ।
निपेततुर्महावीर्यौ रथोपस्थे तयोस्तदा ॥ ४२
ततस्तु सारथिर्ज्ञात्वा द्रोणपुत्रमचेतनम् ।
अपोवाह रणाद्राजन्सर्वसैन्यस्य पश्यतः ॥ ४३
तथैव पाण्डवं राजन्विह्वलन्तं मुहुर्मुहुः ।
अपोवाह रथेनाजौ विशोकः शत्रुतापनम् ॥ ४४

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः ॥ १३ ॥

शल्येन श्रुतकीर्तिपराजयः ॥ १ ॥

'सञ्जय उवाच ।
श्रुतकीर्तिमथायान्तं किरन्तं निशिताञ्शरान् ।
मद्रराजो महाराज वारयामास हृष्टवत् ॥ १
मद्रराजं समासाद्य श्रुतकीर्तिर्महारथः ।
विव्याध भल्लैर्विंशत्या कार्तस्वरविभूषितैः ॥ २
प्रतिविव्याध तं शल्यं त्रिभिस्तूर्णमजिह्मगैः ।
सारथिं चास्य भल्लेन भृशं विव्याध भारत ॥ ३
स शल्यं शरवर्षेण च्छादयामास संयुगे ।
मुमोच निशितान्बाणान्मद्रराजरथं प्रति ॥ ४
ततः शल्यो महाराज श्रुतकीर्तिभुजच्युतान् ।
चिच्छेद समरे बाणान्बाणैः संनतपर्वभिः ॥ ५
श्रुतकीर्तिस्ततः शल्यं भित्त्वा नवभिरायसैः ।
सारथिं त्रिभिरानर्च्छत्पुनः शल्यं च पञ्चभिः ॥ ६
तस्य शल्यो धनुश्छित्त्वा हस्तावापं निकृत्य च ।
विव्याध समरे तूर्णं सप्तभिस्तं शरोत्तमैः ॥ ७
अथान्यद्धनुरादाय श्रुतकीर्तिर्महारथः ।
भद्रेश्वरं चतुःषष्ट्या बाह्वोरुरसि चार्पयत् ॥ ८
ततस्तु समरे राजंस्तेन विद्धः शिलीमुखैः ।

तथैव दशनच्छदौ क्रोधात्संदष्टौष्ठौ ॥ ३७ ॥

द्वादशोऽध्यायः ॥ १२ ॥

* झ. पुस्तके एतदनन्तर स्थिताः सप्ताध्याया एतत्पाठे क्रमेण ५२-५३-५४-५५-५६-५९-६० तमाध्यायतया वर्तन्ते ।

प्रतिविव्याध तं चापि नवत्या निशितैः शरैः॥ ९
तस्य मद्रेश्वरश्चापं पुनश्चिच्छेद मारिष।
स च्छिन्नधन्वा समरे गदां चिक्षेप सत्वरः॥ १०
पट्टैर्जाम्बूनदैर्बद्धां रूप्यपट्टैश्च भारत।
भ्राजमानां यथा नारीं दिव्यवस्त्रविभूषिताम्॥ ११
तामापतन्तीं सहसा दीप्यमानाशनिप्रभाम्।
शरैरनेकसाहस्रैर्व्यष्टम्भयत मद्रराट्॥ १२
विष्टभ्य च गदां वीरः पातयित्वा च भूतले।
श्रुतकीर्तिमथायत्तो राजन्विव्याध पञ्चभिः॥ १३
तस्य शक्तिं रणे भूयश्चिक्षेप भुजगोपमाम्।
तां द्विधा चाच्छिनच्छल्यो मेदिन्यां सा त्वशीर्यत॥
तस्य शल्यः क्षुरप्रेण यन्तुः कायाच्छिरोऽहरत्।
बालहस्ताद्यथा श्येन आमिषं वै नरोत्तम॥ १५
स पपात रथोपस्थात्सारथिस्तस्य भारत।
ततस्ते प्राद्रवन्सङ्ख्ये हयास्तस्य महात्मनः॥ १६
पलायमानैस्तैरश्वैः सोपनीतो रणाजिरात्।
श्रुतकीर्तिर्महाराज पश्यतां सर्वयोधिनाम्॥ १७
ततो मद्रेश्वरो राजा पाण्डवानामनीकिनीम्।
व्यगाहत मुदा युक्तो नलिनीं द्विरदो यथा॥ १८
लोलयामास स बलं सिंहः पशुगणानिव।
शल्यस्तत्र महारङ्गे पाण्डवानां महात्मनाम्॥ १९
निपात्य पाण्डुपाञ्चालान्पृतनासु व्यवस्थितः।
अशोभत रणे शल्यो विधूमोऽग्निरिव ज्वलन्॥ २०
सेनाकक्षं महद्दग्ध्वा कक्षमग्निरिवोत्थितः।
स्थितो रराज समरे पुरं दग्ध्वेव शङ्करः॥ २१

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे त्रयोदशोऽध्यायः॥ १३॥

चतुर्दशोऽध्यायः॥ १४॥

सहदेवेन दुःशासनपराजयः॥ १॥

सञ्जय उवाच।
सहदेवं तथा क्रुद्धं निघ्नन्तं तव वाहिनीम्।
दुःशासनो महाराज भ्राता भ्रातरमभ्ययात्॥ १
तौ समेतौ महाराज दृष्ट्वा तत्र महारथाः।
सिंहनादरवांश्चक्रुर्वासांस्यादुधुवुश्च ह॥ २
ततो भारत रुष्टेन तव पुत्रेण धन्विना।
पाण्डुपुत्रस्त्रिभिर्बाणैर्वक्षस्यभिहतो बली॥ ३
सहदेवस्ततो राजन्नाराचेन तवात्मजम्।
विद्ध्वा विव्याध सप्तत्या सारथिं च त्रिभिः शरैः॥ ४
दुःशासनस्ततश्चापं छित्त्वा राजन्महाहवे।
सहदेवं त्रिसप्तत्या बाह्वोरुरसि चार्पयत्॥ ५
सहदेवस्तु संक्रुद्धः खड्गं गृह्य महाहवे।
आविध्य प्रास्रजच्चूर्णं तव पुत्ररथं प्रति॥ ६
समार्गणगुणं चापं छित्त्वा तस्य महानसिः।
निपपात ततो भूमौ च्युतः सर्प इवाम्बरात्॥ ७
अथान्यद्धनुरादाय सहदेवः प्रतापवान्।
दुःशासनाय चिक्षेप बाणमन्तकरं ततः॥ ८
तमापतन्तं विशिखं यमदण्डोपमत्विषम्।
खड्गेन शितधारेण द्विधा चिच्छेद कौरवः॥ ९
ततस्तं निशितं खड्गमाविध्य युधि सत्वरः।
धनुश्चान्यत्समादाय शरं जग्राह वीर्यवान्॥ १०
तमापतन्तं सहसा निस्त्रिंशं निशितैः शरैः।
पातयामास समरे सहदेवो हसन्निव॥ ११
ततो बाणांश्चतुःषष्टिं तव पुत्रो महारणे।
सहदेवरथं तूर्णं प्रेषयामास भारत॥ १२
ताञ्छरान्समरे राजन्वेगेनापततो बहून्।
एकैकं पञ्चभिर्बाणैः सहदेवो न्यकृन्तत॥ १३
संनिवार्य महाबाणान्सहदेवः प्रतापवान्।
अथास्रौ सुबहून्बाणान्प्रेषयामास संयुगे॥ १४
तान्बाणांस्तव पुत्रोऽपि छित्त्वैकैकं त्रिभिः शरैः।
ननाद सुमहानादं नादयानो वसुंधराम्॥ १५

आदुधुवु भ्रामितवन्त॥ २॥

ततो दुःशासनो राजन्द्वाभ्यां पाण्डुसुतं रणे ।
सारथिं नवभिर्बाणैर्माद्रेयस्य समाचिनोत् ॥ १६
ततः क्रुद्धो महाराज सहदेवः प्रतापवान् ।
समाधत्त शरं घोरं मृत्युकालान्तकोपमम् ॥ १७
विकृष्य बलवच्चापं तव पुत्राय सोऽसृजत् ।
स तं निर्भिद्य वेगेन भित्त्वा च कवचं महत् ॥ १८
प्राविशद्धरणीं राजन्वल्मीकमिव पन्नगः ।
ततः संमुमुहे राजंस्तव पुत्रो महारथः ॥ १९
मूढं चैनं समालोक्य सारथिस्त्वरितो रथम् ।
अपोवाह भृशं त्रस्तो वध्यमानं शितैः शरैः ॥ २०
पराजित्य रणे तं तु कौरव्यं पाण्डुनन्दनः ।
दुर्योधनबलं दृष्ट्वा प्रममाथ समन्ततः ॥ २१
पिपीलिकपुटं राजन्यथा मृद्नन्नरो रुषा ।
तथा सा कौरवी सेना मृदिता तेन भारत ॥ २२

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः ॥ १५ ॥

कर्णनकुलयोर्युद्धम् ॥ १ ॥ कर्णेन नकुलस्य पराभावनपूर्वकं सोपहासमधिक्षेपः ॥ २ ॥

सञ्जय उवाच ।
नकुलं रभसं युद्धे द्रावयन्तं वरूथिनीम् ।
कर्णो वैकर्तनो राजन्वारयामास वै रुषा ॥ १
नकुलस्तु ततः कर्णं प्रहसन्निदमब्रवीत् ॥ २
चिरस्य बत दृष्टोऽहं दैवतैः सौम्यचक्षुषा ।
यस्य मे त्वं रणे पाप चक्षुर्विषयमागतः ॥ ३
त्वं हि मूलमनर्थानां वैरस्य कलहस्य च ।
त्वद्दोषात्कुरवः क्षीणाः समासाद्य परस्परम् ।
त्वामद्य समरे हत्वा कृतकृत्योऽस्मि विज्वरः ॥ ४
एवमुक्तः प्रत्युवाच नकुलं सूतनन्दनः ।
सदृशं राजपुत्रस्य धन्विनश्च विशेषतः ॥ ५
प्रहरस्व च मे वीर पश्यामस्तव पौरुषम् ।
कर्म कृत्वा रणे शूर ततः कत्थितुमर्हसि ॥ ६
अनुक्त्वा समरे तात शूरा युध्यन्ति शक्तितः ।
प्रयुध्यस्व मया शक्त्या हनिष्ये दर्पमेव ते ॥ ७
इत्युक्त्वा प्राहरत्तूर्णं पाण्डुपुत्राय सूतजः ।
विव्याध चैनं समरे त्रिसप्तत्या शिलीमुखैः ॥ ८
नकुलस्तु ततो विद्धः सूतपुत्रेण भारत ।
अशीत्याऽऽशीविषप्रख्यैः सूतपुत्रमविध्यत ॥ ९
तस्य कर्णो धनुश्छित्त्वा स्वर्णपुङ्खैः शिलाशितैः ।
त्रिंशता परमेष्वासः शरैः पाण्डवमर्दयत् ॥ १०
ते तस्य कवचं भित्त्वा पपुः शोणितमाहवे ।
आशीविषा यथा नागा भित्त्वा गां सलिलं पपुः ॥
अथान्यद्धनुरादाय हेमपृष्ठं दुरासदम् ।
कर्णं विव्याध सप्तत्या सारथिं च त्रिभिः शरैः ॥ १२
ततः क्रुद्धो महाराज नकुलः परवीरहा ।
क्षुरप्रेण सुतीक्ष्णेन कर्णस्य धनुराच्छिनत् ॥ १३
अथैनं छिन्नधन्वानं सायकानां शतैस्त्रिभिः ।
आजघ्ने प्रहसन्वीरः सर्वलोकमहारथम् ॥ १४
कर्णमभ्यर्दितं दृष्ट्वा पाण्डुपुत्रेण मारिष ।
विस्मयं परमं जग्मुर्ऋषयः सह दैवतैः ॥ १५
अथान्यद्धनुरादाय कर्णो वैकर्तनस्तदा ।
नकुलं पञ्चभिर्बाणैर्जत्रुदेशे समार्पयत् ॥ १६
उरस्थैरथ तैर्बाणैर्माद्रीपुत्रो व्यरोचत ।
स्वरश्मिभिरिवादित्यो भुवने विसृजन्प्रभाम् ॥ १७
नकुलस्तु ततः कर्णं विद्ध्वा सप्तभिराशुगैः ।
अथास्य धनुषः कोटिं पुनश्चिच्छेद मारिष ॥ १८
सोऽन्यत्कार्मुकमादाय समरे वेगवत्तरम् ।
नकुलस्य ततो बाणैः समन्ताच्छादयद्दिशः ॥ १९
संछाद्यमानः सहसा कर्णचापच्युतैः शरैः ।
चिच्छेद स शरांस्तूर्णं शरैरेव महारथः ॥ २०
ततो बाणमयं जालं विततं व्योम्न्यदृश्यत ।

पिपीलिकपुट पिपीलिकावासपटलम् ॥ २२ ॥ चतुर्दशोऽध्याय ॥ १४ ॥

रभस रणोत्सुकम् ॥ १ ॥ आशीविषा यथा राजन्भित्त्वा गा सलिल शमम् । इति क. ख. ट. पाठ. ॥ ११ ॥

खद्योतानामिव व्रातैः संपतद्भिर्यथा नभः॥ २१
तैर्विमुक्तैः शरशतैश्छादितं गगनं तदा।
शलभानां यथा व्रातैस्तद्वदासीद्दिशांपते॥ २२
ते शरा हेमविकृताः संपतन्तो मुहुर्मुहुः।
श्रेणीकृता व्यकाशन्त क्रौञ्चाः श्रेणीकृता इव २३
बाणजालवृते व्योम्नि च्छादिते च दिवाकरे।
न स्म संपतते भूतं किंचिदप्यन्तरिक्षगम्॥ २४
निरुद्धे तत्र मार्गे च शरसङ्घैः समन्ततः।
व्यरोचेतां महात्मानौ कालसूर्याविवोदितौ॥ २५
कर्णचापच्युतैर्बाणैर्वध्यमानास्तु सोमकाः।
अवालीयन्त राजेन्द्र वेदनार्ता भृशार्दिताः॥ २६
नकुलस्य तथा बाणैर्हन्यमाना चमूस्तव।
व्यशीर्यत दिशो राजन्वातनुन्ना इवाम्बुदाः॥२७
ते सेने हन्यमाने तु ताभ्यां दिव्यैर्महाशरैः।
शरपातमपाक्रम्य तस्थतुः प्रेक्षिके तदा॥ २८
प्रोत्सारितजने तस्मिन्कर्णपाण्डवयोः शरैः।
अविध्येतां महात्मानावन्योन्यं शरवृष्टिभिः॥२९
विदर्शयन्तौ दिव्यानि शस्त्राणि रणमूर्धनि।
छादयन्तौ च सहसा परस्परवधैषिणौ॥ ३०
नकुलेन शरा मुक्ताः कङ्कबर्हिणवाससः।
सूतपुत्रमवच्छाद्य व्यतिष्ठन्त यथाऽम्बरे॥ ३१
तथैव सूतपुत्रेण प्रेषिताः परमाहवे।
पाण्डुपुत्रमवच्छाद्य व्यतिष्ठन्ताम्बरे शराः॥ ३२
शरवेश्मप्रविष्टौ तौ ददृशाते न कैश्चन।
सूर्याचन्द्रमसौ राजञ्छाद्यमानौ घनैरिव॥ ३३
ततः क्रुद्धो रणे कर्णः कृत्वा घोरतरं वपुः।
पाण्डवं छादयामास समन्ताच्छरवृष्टिभिः॥ ३४
सोऽतिच्छन्नो महाराज सूतपुत्रेण पाण्डवः।
न चकार व्यथां राजन्भास्करो जलदैर्यथा॥ ३५
ततः प्रहस्याधिरथिः शरजालानि मारिष।
प्रेषयामास समरे शतशोऽथ सहस्रशः॥ ३६
एकच्छायमभूत्सर्वं तस्य बाणैर्महात्मनः।
अभ्रच्छायेव संजज्ञे संपतद्भिः शरोत्तमैः॥ ३७
ततः कर्णो महाराज धनुश्छित्त्वा महात्मनः।
सारथिं पातयामास रथनीडाद्ध्वजं च॥ ३८
ततोऽश्वांश्चतुरश्चास्य चतुर्भिर्निशितैः शरैः।
यमस्य भवनं तूर्णं प्रेषयामास भारत॥ ३९
अथास्य तं रथं दिव्यं तिलशो व्यधमच्छरैः।
पताकां चक्ररक्षांश्च गदां खड्गं च मारिष॥ ४०
शतचन्द्रं च तच्चर्म सर्वोपकरणानि च।
'सुवर्णविकृतं तच्च धनुः सशरमाहवे॥' ४१
हताश्वो विरथश्चैव विवर्मा च विशांपते।
अवतीर्य रथात्तूर्णं परिघं गृह्य धिष्ठितः॥ ४२
तमुद्यतं महाघोरं परिघं तस्य मृतजः।
व्यहनत्सायकै राजन्सुतीक्ष्णैर्भारसाधनैः॥ ४३
व्यायुधं चैनमालक्ष्य शरैः सन्नतपर्वभिः।
आर्पयद्बहुभिः कर्णो न चैनं समपीडयत्॥ ४४
स हन्यमानः समरे कृतास्त्रेण बलीयसा।
प्राद्रवत्सहसा राजन्नकुलो व्याकुलेन्द्रियः॥ ४५
तमभिद्रुत्य राधेयः प्रहसन्वै पुनःपुनः।
सज्यमस्य धनुः कण्ठे व्यवासृजत भारत॥ ४६
ततः स शुशुभे राजन्कण्ठासक्तमहाधनुः।
परिवेषमनुप्राप्तो यथा स्याद्व्योम्नि चन्द्रमाः॥ ४७
यथैव चासितो मेघः शक्रचापेन शोभितः।
'अशोभत महाराज पाण्डुपुत्रस्तथा रणे॥' ४८
तमब्रवीत्ततः कर्णो व्यर्थं व्याहृतवानसि।
वदेदानीं पुनर्हृष्टो वध्यमानः पुनःपुनः॥ ४९
मा योत्सीः कुरुभिः सार्धं बलवद्भिश्च पाण्डव।
सदृशैस्तात युध्यस्व व्रीडां मा कुरु पाण्डव॥ ५०
गृहं वा गच्छ माद्रेय यत्र वा कृष्णफल्गुनौ।
एवमुक्त्वा महाराज विससर्ज स तं तदा॥ ५१
वधप्राप्तं तु तं शूरो नाहनद्धर्मवित्तदा।
स्मृत्वा कुन्त्या वचो राजंस्तत एनं व्यसर्जयत्॥५२
विसृष्टः पाण्डवो राजन्सूतपुत्रेण धन्विना।
व्रीडन्निव जगामाथ युधिष्ठिररथं प्रति॥ ५३
आरुरोह रथं चापि सूतपुत्रप्रतापितः।
निःश्वसन्दुःखसंतप्तः कुम्भक्षिप्त इवोरगः॥ ५४
तं विजित्याथ कर्णोऽपि पाञ्चालांस्त्वरितो ययौ।

बालसूर्याविवोदितौ इति ख. पाठ॥ २५॥

एकबाणमभूत्सर्वं इति क ट. पाठ॥ ३७॥

रथेनातिपताकेन चन्द्रवर्णहयेन च ॥ ५५
तत्राक्रन्दो महानासीत्पाण्डवानां विशांपते ।
दृष्ट्वा सेनापतिं यान्तं पाञ्चालानां रथव्रजान् ॥ ५६
तत्राकरोन्महाराज कदनं सूतनन्दनः ।
मध्यं प्राप्ते दिनकरे चक्रवद्विचरन्प्रभुः ॥ ५७
भग्नचक्रै रथैः कैश्चिच्छिन्नध्वजपताकिभिः ।
हताश्वैर्हतसूतैश्च भग्नाक्षैश्चैव मारिष ।
ह्रियमाणानपश्याम पाञ्चालानां रथव्रजान् ॥ ५८
तत्रतत्र च संभ्रान्ता विचेरुरथ कुञ्जराः ।
दावाग्न्यभिपरीताङ्गा यथैव स्युर्महावने ॥ ५९
भिन्नकुम्भाः सरुधिराश्छिन्नहस्ताश्च वारणाः ।
छिन्नगात्रावराश्चैव च्छिन्नवालधयोऽपरे ।
छिन्नाभ्राणीव संपेतुर्हन्यमाना महात्मना ॥ ६०
अपरे त्रासिता नागा नाराचशरतोमरैः ।
तमेवाभिमुखं जग्मुः शलभा इव पावकम् ॥ ६१
अपरे निष्टनन्तश्च व्यदृश्यन्त महाद्विपाः ।
क्षरन्तः शोणितं गात्रैर्नगा इव जलस्रवाः ॥ ६२
उरश्छदैर्वियुक्तांश्च वालवन्धैश्च वाजिनः ।
राजतैश्च तथा कांस्यैः सौवर्णैश्चैव भूषणैः ॥ ६३
हीनांश्चाभरणैश्चैव खलीनैश्च विवर्जितान् ।
चामरैश्च कुथाभिश्च तूणीरैः पतितैरपि ॥ ६४
निहतैः सादिभिश्चैव शूरैराहवशोभितैः ।
अपश्याम रणे तत्र भ्राम्यमाणान्हयोत्तमान् ॥ ६५
प्रासैः खड्गैश्च रहितानृष्टिभिश्चापि भारत ।
हयसादीनपश्याम कञ्चुकोष्णीषधारिणः ॥ ६६
निहतान्वध्यमानांश्च वेपमानांश्च भारत ।
नागाङ्गावयवैर्हीनांस्तत्रतत्रैव भारत ॥ ६७
रथान्हेमपरिष्कारान्संयुक्ताञ्जवनैर्हयैः ।
भ्राम्यमाणानपश्याम हतेषु रथिषु द्रुतम् ॥ ६८
भग्नाक्षकूबरान्कांश्चिद्भग्नचक्रांश्च भारत ।
विपताकध्वजांश्चान्याञ्छिन्नेषादण्डबन्धुरान् ६९
विहीनान्रथिनस्तत्र धावमानांस्ततस्ततः ।
सूतपुत्रशरैस्तीक्ष्णैर्हन्यमानान्विशांपते ॥ ७०
विशस्त्रांश्च तथैवान्यान्सशस्त्रांश्च हतान्बहून् ।
तारकाजालसंछन्नान्वरघण्टाविशोभितान् ॥ ७१
नानावर्णविचित्राभिः पताकाभिरलंकृतान् ।
वारणाननुपश्याम धावमानान्समन्ततः ॥ ७२
शिरांसि बाहूनूरूंश्च च्छिन्नान्यांस्तथैव च ।
कर्णचापच्युतैर्बाणैरपश्याम समन्ततः ॥ ७३
महान्व्यतिकरो रौद्रो योधानामन्वपद्यत ।
कर्णसायकनुन्नानां युध्यतां च शितैः शरैः ॥ ७४
ते वध्यमानाः समरे सूतपुत्रेण सृञ्जयाः ।
तमेवाभिमुखं यान्ति पतङ्गा इव पावकम् ॥ ७५
तं दहन्तमनीकानि तत्रतत्र महारथम् ।
क्षत्रिया वर्जयामासुर्युगान्ताग्निमिवोल्बणम् ॥ ७६
हतशेषास्तु ये वीराः पाञ्चालानां महारथाः ।
तान्प्रभग्नान्द्रुतान्वीरः पृष्ठतो विकिरञ्छरैः ।
अभ्यधावत तेजस्वी विशीर्णकवचध्वजान् ॥ ७७
तापयामास तान्बाणैः सूतपुत्रो महाबलः ।
मध्यंदिनमनुप्राप्तो भूतानीव तमोनुदः ॥ ७८

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः ॥ १६ ॥

युयुत्सूलूकयोर्युद्धम् ॥ १ ॥ शकुनिसुतसोमयोर्युद्धम् ॥ २ ॥

सञ्जय उवाच ।
युयुत्सुं तव पुत्रस्य द्रावयन्तं बलं महत् ।
उलूको न्यपतत्तूर्णं तिष्ठतिष्ठेति चाब्रवीत् ॥ १
युयुत्सुश्च ततो राजञ्शितधारेण पत्रिणा ।
उलूकं ताडयामास वज्रेणेव महाबलम् ॥ २
उलूकस्तु ततः क्रुद्धस्तव पुत्रस्य संयुगे ।
क्षुरप्रेण धनुश्छित्त्वा ताडयामास कर्णिना ॥ ३
तदपास्य धनुश्छिन्नं युयुत्सुर्वेगवत्तरम् ।

म्रियमाणानपश्याम इति क. ख ट. पाठ. ॥ ५८ ॥ नागाङ्गावय- वैरित्यर्धं झ. पुस्तकएव दृश्यते ॥ ६७ ॥ पञ्चदशोऽध्याय. ॥ १५ ॥

अन्यदादत्त सुमहच्चापं संरक्तलोचनः ॥ ४
शाकुनिं तु ततः षष्ट्या विव्याध भरतर्षभ ।
सारथिं त्रिभिरानर्च्छत्तं च भूयो व्यविध्यत ॥५
उलूकस्तं तु विंशत्या विद्ध्वा स्वर्णविभूषितैः ।
अथास्य समरे क्रुद्धो ध्वजं चिच्छेद काञ्चनम् ॥ ६
स च्छिन्नयष्टिः सुमहाञ्शीर्यमाणो महाध्वजः ।
पपात प्रमुखे राजन्युयुत्सोः काञ्चनध्वजः ॥ ७
ध्वजमुन्मथितं दृष्ट्वा युयुत्सुः क्रोधमूर्च्छितः ।
उलूकं पञ्चभिर्बाणैराजघान स्तनान्तरे ॥ ८
उलूकस्तस्य समरे तैलधौतेन मारिष ।
शिरश्चिच्छेद भल्लेन यन्तुर्भरतसत्तम ॥ ९
तच्छिन्नमपतद्भूमौ युयुत्सोः सारथेस्तदा ।
तारारूपं यथा चित्रं निपपात महीतले ॥ १०
जघान चतुरोऽश्वांश्च तं च विव्याध पञ्चभिः ।
सोऽतिविद्धो बलवता प्रत्यपायाद्रथान्तरम् ॥११
तं निर्जित्य रणे राजन्नुलूकस्त्वरितो ययौ ।
पाञ्चालान्सृञ्जयांश्चैव विनिघ्नन्निशितैः शरैः ॥१२
शतानीकं महाराज श्रुतकर्मा सुतस्तव ।
व्यश्वसूतरथं चक्रे निमेषार्धादसंभ्रमः ॥ १३
हताश्वे तु रथे तिष्ठञ्शतानीको महारथः ।
गदां चिक्षेप संक्रुद्धस्तव पुत्रस्य मारिष ॥ १४
सा कृत्वा स्यन्दनं भस्म हयांश्चैव ससारथीन् ।
पपात धरणीं तूर्णं दारयन्तीव भारत ॥ १५
तावुभौ विरथौ वीरौ कुरूणां कीर्तिवर्धनौ ।
व्यपाक्रमेतां युद्धात्तु प्रेक्षमाणौ परस्परम् ॥ १६
पुत्रस्तु तव संभ्रान्तो विविंशो रथमारुहत् ।
शतानीकोऽपि त्वरितः प्रतिविन्ध्यरथं गतः १७
सुतसोमं तु शकुनिर्विद्ध्वा तु निशितैः शरैः ।
नाकम्पयत संक्रुद्धो वार्योघ इव पर्वतम् ॥ १८
सुतसोमस्तु तं दृष्ट्वा पितुरत्यन्तवैरिणम् ।
शरैरनेकसाहस्रैश्छादयामास भारत ॥ १९
ताञ्शराञ्शकुनिस्तूर्णं चिच्छेदान्यैः पतत्रिभिः ।
लघ्वस्त्रश्चित्रयोधी च जितकाशी च संयुगे ॥ २०
निवार्य समरे चापि शरांस्तान्निशितैः शरैः ।
आजघान सुसंक्रुद्धः सुतसोमं त्रिभिः शरैः ॥२१
'नाकम्पयत संक्रुद्धो वार्योघ इव पर्वतम् ।'
तस्याश्वान्केतनं सूतं तिलशो व्यधनच्छरैः ।
श्यालस्तव महाराज तत उच्चुक्रुशुर्जनाः ॥ २२
हताश्वो विरथश्चैव छिन्नकेतुश्च मारिष ।
धन्वी धनुर्वरं गृह्य रथाद्भूमावतिष्ठत ॥ २३
व्यसृजत्सायकांश्चैव स्वर्णपुङ्खाञ्शिलाशितान् ।
छादयामासुरथ ते तव श्यालस्य तं रथम् ।
शलभानामिव व्राताः शरव्राता महारथम् ॥२४
संछाद्यमानोऽपि दृढं विव्यधे नैव सौबलः ।
प्रममाथ शरांस्तस्य शरव्रातैर्महायशाः ॥ २५
तत्रातुष्यन्त योधाश्च सिद्धाश्चापि दिवि स्थिताः ।
सुतसोमस्य तत्कर्म दृष्ट्वाऽश्रद्धेयमद्भुतम् ।
रथस्थं शकुनिं यत्तु पदातिः समयोधयत् ॥ २६
तस्य तीक्ष्णैर्महावेगैर्भल्लैः संनतपर्वभिः ।
व्यहनत्कार्मुकं राजंस्तूणीरांश्चैव सर्वशः ॥ २७
स च्छिन्नधन्वा विरथः खड्गमुद्यम्य चानदत् ।
वैदूर्योत्पलवर्णाभं दन्तिदन्तमयत्सरुम् ॥ २८
भ्राम्यमाणं ततस्तं तु विमलाम्बरवर्चसम् ।
कालदण्डोपमं मेने सुतसोमस्य धीमतः ॥ २९
सोऽचरत्सहसा खड्गी मण्डलानि सहस्रशः ।
चतुर्दश महाराज शिक्षाबलसमन्वितः ॥ ३०
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विप्लुतं सृतम् ।
सम्पातसमुदीर्णं च दर्शयामास संयुगे ॥ ३१
सौबलस्तु ततस्तस्य शरांश्चिक्षेप वीर्यवान् ।
तानापतत एवाशु चिच्छेद परमासिना ॥ ३२
ततः क्रुद्धो महाराज सौबलः परवीरहा ।
प्राहिणोत्सुतसोमाय शरानाशीविषोपमान् ॥ ३३
चिच्छेद तांस्तु खड्गेन शिक्षया च बलेन च ।
दर्शयँल्लाघवं युद्धे तार्क्ष्यतुल्यपराक्रमः ॥ ३४
तस्य संचरतो राजन्मण्डलावर्तने तदा ।
क्षुरप्रेण सुतीक्ष्णेन खड्गं चिच्छेद सुप्रभम् ॥ ३५
स च्छिन्नः सहसा भूमौ निपपात महानसिः ।
अर्धमस्य स्थितं हस्ते सुत्सरोस्तत्र भारत ॥ ३६

मण्डलानामावर्तने अनुलोमविलोमाभ्यासे ॥ ३५ ॥ अस्य असे. सुत्सरो शोभनमुष्टे ॥ ३६ ॥ षोडशोऽध्याय ॥ १६ ॥

छिन्नमाज्ञाय निस्त्रिंशमवप्लुत्य पदानि षट् ।
प्राविध्यत ततः शेषं सुतसोमो महारथः ॥ ३७
तच्छित्त्वा सगुणं चापं रणे तस्य महात्मनः ।
पपात धरणीं तूर्णं स्वर्णवज्रविभूषितम् ॥ ३८
सुतसोमस्ततोऽभ्यच्छच्छ्रुतकीर्तेर्महारथम् ।
सौबलोऽपि धनुर्गृह्य घोरमन्यत्सुदुर्जयम् ॥ ३९
अभ्ययात्पाण्डवानीकं निघ्नञ्शत्रुगणान्बहून् ।
तत्र नादो महानासीत्पाण्डवानां विशांपते ॥ ४०
सौबलं समरे दृष्ट्वा विचरन्तमभीतवत् ।
तान्यनीकानि दृप्तानि शस्त्रवन्ति महान्ति च ।
द्राव्यमाणान्यदृश्यन्त सौबलेन महात्मना ॥ ४१
यथा दैत्यचमूं राजन्देवराजो ममर्द ह ।
तथैव पाण्डवीं सेनां सौबलेयो व्यनाशयत् ॥ ४२

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः ॥ १७ ॥

कृपकृतवर्मभ्यां धृष्टद्युम्नशिखण्डिनोः पराजयः ॥ १ ॥

सञ्जय उवाच ।
धृष्टद्युम्नं कृपो राजन्वारयामास संयुगे ।
यथा दृष्ट्वा वने सिंहं शरभो वारयेद्बुधि ॥ १
निरुद्धः पार्षतस्तेन गौतमेन बलीयसा ।
पदात्पदं विचलितुं नाशकत्तत्र भारत ॥ २
गौतमस्य रथं दृष्ट्वा धृष्टद्युम्नरथं प्रति ।
वित्रेसुः सर्वभूतानि क्षयं प्राप्तं च मेनिरे ॥ ३
तदा जल्पन्ति पाण्डूनां रथिनः सादिनस्तथा ।
द्रोणस्य निधनान्नूनं संक्रुद्धो द्विपदां वरः ॥ ४
शारद्वतो महातेजा दिव्यास्त्रविदुदारधीः ।
अपि स्वस्ति भवेदद्य धृष्टद्युम्नस्य गौतमात् ॥ ५
अपीयं वाहिनी कृत्स्ना मुच्येत महतो भयात् ।
अप्ययं ब्राह्मणः सर्वान्न नो हन्यात्समागतान् ॥ ६
यादृशं दृश्यते रूपमन्तकप्रतिमं रणे ।
गमिष्यत्यद्य पदवीं भारद्वाजस्य गौतमः ॥ ७
आचार्यः क्षिप्रहस्तश्च विजयी च सदा युधि ।
अस्त्रवान्वीर्यसम्पन्नः क्रोधेन च समन्वितः ॥ ८
पार्षतश्च महायुद्धे विमुखोऽद्याभिलक्ष्यते ।
इत्येवं विविधा वाचस्तावकानां परैः सह ।
व्यश्रूयन्त महाराज तयोस्तत्र समागमे ॥ ९
विनिःश्वस्य ततः क्रोधात्कृपः शारद्वतो नृप ।
पार्षतं चार्दयामास निश्चेष्टं सर्वमर्मसु ॥ १०
स हन्यमानः समरे गौतमेन महात्मना ।
कर्तव्यं न स्म जानाति मोहेन महता वृतः ॥ ११
तमब्रवीत्ततो यन्ता कच्चित्क्षेमं तु पार्षत ।
ईदृशं व्यसनं युद्धे न ते दृष्टं मया क्वचित् ॥ १२
दैवयोगात्तु ते बाणा नापतन्मर्मभेदिनः ।
प्रेषिता द्विजमुख्येन मर्माण्युद्दिश्य सर्वतः ॥ १३
व्यावर्तये रथं तूर्णं नदीवेगमिवार्णवात् ।
अवध्यं ब्राह्मणं मन्ये येन ते विक्रमो हतः ॥ १४
धृष्टद्युम्नस्ततो राजञ्शनकैरब्रवीद्वचः ।
मुह्यते मे मनस्तात गात्रखेदश्च जायते ॥ १५
वेपथुश्च शरीरे मे रोमहर्षश्च सारथे ।
वर्जयन्ब्राह्मणं युद्धे शनैर्याहि यतोऽर्जुनः ॥ १६
अर्जुनं भीमसेनं वा समरे प्राप्य सारथे ।
क्षेममद्य भवेन्मह्यमिति मे नैष्ठिकी मतिः ॥ १७
ततः प्रायान्महाराज सारथिस्त्वरयन्हयान् ।
यतो भीमो महेष्वासो युयुधे तव सैनिकैः ॥ १८
प्रद्रुतं च रथं दृष्ट्वा धृष्टद्युम्नस्य मारिष ।
किरञ्शरशतान्येव गौतमोऽनुययौ तदा ॥ १९
शङ्खं च पूरयामास मुहुर्मुहुररिंदमः ।
पार्षतं त्रासयामास महेन्द्रो नमुचिं यथा ॥ २०

शरभोऽष्टपाद सिंहघाती पशुपक्षिशरीरो नृसिंहवत् व्यात्मा ॥ १ ॥ ईदृश व्यसन युद्धे न मे दृष्ट कदाचन । दैवयोगादिमे बाणा न जघ्नुर्मम चाहवे इति क. ख. ट. पाठः ॥ १२ ॥ १३ ॥

शिखण्डिनं तु समरे भीष्ममृत्युं दुरासदम् ।
हार्दिक्यो वारयामास क्षयन्निव मुहुर्मुहुः ॥ २१
शिखण्डी तु समासाद्य हृदिकानां महारथम् ।
पञ्चभिर्निशितैर्भल्लैर्जत्रुदेशे समाहनत् ॥ २२
कृतवर्मा तु संक्रुद्धो भित्त्वा पञ्चा पतत्रिभिः ।
धनुरेकेन चिच्छेद हसन्राजन्महारथः ॥ २३
अथान्यद्धनुरादाय द्रुपदस्यात्मजो बली ।
तिष्ठतिष्ठेति संक्रुद्धो हार्दिक्यं प्रत्यभाषत ॥ २४
ततोऽस्य नवतिं बाणान्रुक्मपुङ्खान्सुतेजनान् ।
प्रेषयामास राजेन्द्र तेऽस्याभ्रश्यन्त वर्मणः ॥ २५
वितथांस्तान्समालक्ष्य पतितांश्च महीतले ।
क्षुरप्रेण सुतीक्ष्णेन कार्मुकं चिच्छिदे भृशम् ॥ २६
अथैनं छिन्नधन्वानं भग्नशृङ्गमिवर्षभम् ।
अशीत्या मार्गणैः क्रुद्धो बाह्वोरुरसि चार्पयत् ॥२७
कृतवर्मा तु संक्रुद्धो मार्गणैः क्षतविक्षतः ।
ववाम रुधिरं गात्रैः कुम्भवक्त्रादिवोदकम् ॥२८
रुधिरेण परिक्लिन्नः कृतवर्मा त्वराजत ।
वर्षेण क्लेदितो राजन्यथा गैरिकपर्वतः ॥ २९
अथान्यद्धनुरादाय समार्गणगुणं प्रभुः ।
शिखण्डिनं बाणगणैः स्कन्धदेशे व्यताडयत् ॥३०
स्कन्धदेशस्थितैर्बाणैः शिखण्डी तु व्यराजत ।
शाखाप्रशाखाविपुलः सुमहान्पादपो यथा ॥ ३१
तावन्योन्यं भृशं विद्ध्वा रुधिरेण समुक्षितौ ।
'पोह्यमानौ हि यथा महान्तौ शोणितह्रदे ।
तद्वद्विरेजतुर्वीरौ शोणितेन परिप्लुतौ ॥ ३२
यथा च किंशुकौ फुल्लौ पुष्पमासे समागते ।
रुधिरोक्षितसर्वाङ्गौ रक्तचन्दनरूपितौ ।
भुजगाविव संक्रुद्धौ रेजतुस्तौ नरोत्तमौ ॥ ३३
तावुभौ शरनुन्नाङ्गौ परस्परशरक्षतौ ।'
अन्योन्यशृङ्गाभिहतौ रेजतुर्वृषभाविव ॥ ३४
अन्योन्यस्य वधे यत्नं कुर्वाणौ तौ महारथौ ।
रथाभ्यां चेरतुस्तत्र मण्डलानि सहस्रशः ॥ ३५
कृतवर्मा महाराज पार्षतं निशितैः शरैः ।
रणे विव्याध सप्तत्या स्वर्णपुङ्खैः शिलाशितैः ॥ ३६
ततोऽस्य समरे बाणं भोजः प्रहरतां वरः ।
जीवितान्तकरं घोरं व्यसृजत्त्वरयाऽन्वितः ॥३७
स तेनाभिहतो राजन्मूर्च्छामाशु समाविशत् ।
ध्वजयष्टिं च सहसा शिश्रिये कश्मलावृतः ॥ ३८
अपोवाह रणात्तूर्णं सारथी रथिनां वरम् ।
हार्दिक्यशरसंतप्तं निःश्वसन्तं पुनःपुनः ॥ ३९
पराजिते ततः शूरे द्रुपदस्यात्मजे प्रभो ।
व्यद्रवत्पाण्डवी सेना व्यधमाना समन्ततः ॥ ४०

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः ॥ १८ ॥

अर्जुनेन संशप्तकपराजयः ॥ १ ॥

सञ्जय उवाच ।
श्वेताश्वोऽपि महाराज व्यधमत्तावकं बलम् ।
यथा वायुः समासाद्य तूलराशिं समन्ततः ॥ १
प्रत्युद्ययुस्त्रिगर्तास्तं शिबयः कौरवैः सह ।
वसातयोऽथ साल्वाश्च गोपालाश्च यशस्विनः ॥ २
सत्यदेवः सत्यकीर्तिर्मित्रदेवः श्रुतंजयः ।
सौश्रुतिश्चन्द्रदेवश्च मित्रवर्मा च भारत ॥ ३
त्रिगर्तराजः समरे भ्रातृभिः परिवारितः ।
पुत्रैश्चैव महेष्वासैर्नानाशस्त्रविशारदैः ॥ ४
व्यसृजन्त शरव्रातान्किरन्तोऽर्जुनमाहवे ।
अभ्यवर्तन्त सहसा वार्योघा इव सागरम् ॥ ५
ते त्वर्जुनं समासाद्य योधाः शतसहस्रशः ।
अगच्छन्विलयं सर्वे तार्क्ष्यं दृष्ट्वेव पन्नगाः ॥ ६
ते हन्यमानाः समरे न जहुः पाण्डवं रणे ।
हन्यमाना महाराज शलभा इव पावकम् ॥ ७
सत्यदेवस्त्रिभिर्बाणैर्विव्याध युधि पाण्डवम् ।

अभ्रश्यन्त भ्रष्टा । वर्म न चिच्छिदुरित्यर्थं ॥२५॥ ववाम वान्तवान् ॥२८॥ पार्षत शिखण्डिन ॥३६॥ सप्तदशोऽध्यायः ॥१७॥

मित्रदेवस्त्रिषष्ट्या तु चन्द्रदेवस्तु सप्तभिः ॥ ८
मित्रवर्मा त्रिसप्तत्या सौश्रुतिश्चापि सप्तभिः ।
श्रुतंजयस्तु विंशत्या सुशर्मा नवभिः शरैः ॥ ९
स विद्धो बहुभिः सङ्ख्ये प्रतिविव्याध तान्नृपान् ।
सौश्रुतिं सप्तभिर्विद्ध्वा चन्द्रदेवं त्रिभिः शरैः ॥ १०
श्रुतंजयं च विंशत्या चन्द्रदेवं तथाऽष्टभिः ।
मित्रदेवं शतेनैव सत्यदेवं त्रिभिः शरैः ॥ ११
नवभिर्मित्रवर्माणं सुशर्माणं तथाऽष्टभिः ।
श्रुतंजयं च राजानं हत्वा तत्र शिलाशितैः ॥ १२
सौश्रुतेः सशिरस्त्राणं शिरः कायादपाहरत् ।
त्वरितश्चन्द्रदेवं च शरैर्निन्ये यमक्षयम् ॥ १३
तथेतरान्महाराज यतमानान्महारथान् ।
पञ्चभिः पञ्चभिर्बाणैरेकैकं प्रत्यवारयत् ॥ १४
सत्यदेवस्तु संक्रुद्धस्तोमरं व्यसृजन्महत् ।
समुद्दिश्य रणे कृष्णं सिंहनादं ननाद च ॥ १५
स निर्भिद्य भुजं सव्यं माधवस्य महात्मनः ।
अयस्मयः स्वर्णदण्डो जगाम धरणीं तदा ॥ १६
माधवस्य तु विद्धस्य तोमरेण महारणे ।
प्रतोदः प्रापतद्धस्ताद्धयश्च विशांपते ॥ १७
वासुदेवं विभिन्नाङ्गं दृष्ट्वा पार्थो धनञ्जयः ।
क्रोधमाहारयत्तीव्रं कृष्णं चेदमुवाच ह ॥ १८
प्रापयाश्वान्महाबाहो सत्यदेवं प्रति प्रभो ।
यावदेनं शरैस्तीक्ष्णैर्नयामि यमसादनम् ॥ १९
प्रतोदं गृह्य सोऽन्यत्तु रश्मीन्संगृह्य च द्रुतम् ।
वाहयामास तानश्वान्सत्यदेवरथं प्रति ॥ २०
विष्वक्सेनं सुनिर्विद्धं दृष्ट्वा पार्थो धनञ्जयः ।
सत्यदेवं शरैस्तीक्ष्णैर्वारयित्वा महारथः ॥ २१
ततः सुनिशितैर्भल्लै राज्ञस्तस्य महच्छिरः ।
कुण्डलोपचितं कायाच्चकर्त पृतनान्तरे ॥ २२
तन्निकृत्य शितैर्बाणैर्मित्रवर्माणमाक्षिपत् ।
वत्सदन्तेन तीक्ष्णेन सारथिं चास्य मारिष ॥ २३
ततः शरशतैर्भूयः संशप्तकगणान्बली ।
पातयामास संक्रुद्धः शतशोऽथ सहस्रशः ॥ २४
ततो रजतपुङ्खेन राजञ्शीर्षं महात्मनः ।
मित्रदेवस्य चिच्छेद क्षुरप्रेण महारथः ।
सुशर्माणं सुसंक्रुद्धो जत्रुदेशे समाहनत् ॥ २५
ततः संशप्तकाः सर्वे परिवार्य धनंजयम् ।
शस्त्रौघैर्ममृदुः क्रुद्धा नादयन्तो दिशो दश ॥ २६
अभ्यर्दितस्तु तञ्जिष्णुः शक्रतुल्यपराक्रमः ।
ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे महारथः ॥ २७
ततः शरसहस्राणि प्रादुरासन्विशांपते ।
'कार्मुकात्पाण्डुपुत्रस्य पार्थस्यामिततेजसः ॥' २८
ततस्तु च्छिद्यमानानां ध्वजानां धनुषां तथा ।
रथानां सपताकानां तूणीराणां युगैः सह ॥ २९
अक्षाणामथ चक्राणां योक्त्राणां रश्मिभिः सह ।
कूबराणां वरूथानां पृषत्कानां च संयुगे ॥ ३०
अश्वानां पततां चापि प्रासानामृष्टिभिः सह ।
गदानां परिघानां च शक्तितोमरपट्टसैः ॥ ३१
शतघ्नीनां सचक्राणां भुजानां चोरुभिः सह ।
कण्ठसूत्राङ्गदानां च केयूराणां च मारिष ॥ ३२
हाराणामथ निष्काणां तनुत्राणां च भारत ।
छत्राणां व्यजनानां च शिरसां कुमुटैः सह ।
राशयश्चात्र दृश्यन्ते पतितानां महीतले ॥ ३३
सकुण्डलानि स्रक्षीणि पूर्णचन्द्रनिभानि च ।
शिरांस्युर्व्यामदृश्यन्त ताराजालमिवाम्बरे ॥ ३४
सुस्रग्वीणि सुवासांसि चन्दनेनोक्षितानि च ।
शरीराणि व्यदृश्यन्त निहतानां महीतले ॥ ३५
रुद्रस्याक्रीडसदृशं घोरमायोधनं तदा ॥ ३६
निहतै राजपुत्रैश्च क्षत्रियैश्च महाबलैः ।
'अर्जुनेन महाराज तत्रतत्र महारणे ॥' ३७
हस्तिभिः पतितैश्चैव तुरङ्गैश्चाभवन्मही ।
अगम्यरूपा समरे विशीर्णैरिव पर्वतैः ॥ ३८
नासीद्रथपथस्तस्य पाण्डवस्य महात्मनः ।
निघ्नतः शात्रवान्भल्लैर्हस्त्यश्वं चास्यतो महत् ॥ ३९
स्वानुगा इव सीदन्ति रथचक्राणि मारिष ।
चरतस्तस्य संग्रामे तस्मिल्लोहितकर्दमे ॥ ४०

आसीद्रथपथस्तस्य इति घ. ङ. पाठ । आसादितस्ततो राजन्रथचक्रे विशांपते इति क पाठः । आच्छादित ततो राजन्रथचक्र च मारिष इति ख पाठ ॥ ३९ ॥

सीदमानानि चक्राणि समूहुस्तुरगा भृशम् ।
श्रमेण महता युक्ता मनोमारुतरंहसः ॥ ४१
वध्यमानं तु तत्सैन्यं पाण्डुपुत्रेण धन्विना ।
प्रायशो विमुखं सर्वं नावतिष्ठत भारत ॥ ४२
ताञ्जित्वा समरे जिष्णुः संशप्तकगणान्बहून् ।
विरराज तदा पार्थो विधूमोऽग्निरिव ज्वलन् ॥ ४३

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे अष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः ॥ १९ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
युधिष्ठिरं महाराज विसृजन्तं शरान्बहून् ।
स्वयं दुर्योधनो राजा प्रत्यगृह्णादभीतवत् ॥ १
तमापतन्तं सहसा तव पुत्रं महारथम् ।
धर्मराजो द्रुतं दृष्ट्वा तिष्ठतिष्ठेति चाब्रवीत् ॥ २
स तु तं प्रतिविव्याध नवभिर्निशितैः शरैः ।
सारथिं चास्य भल्लेन भृशं क्रुद्धोऽभ्यताडयत् ॥ ३
ततो युधिष्ठिरो राजन्स्वर्णपुङ्खान्शिलीमुखान् ।
दुर्योधनाय चिक्षेप त्रयोदश शिलाशितान् ॥ ४
चतुर्भिश्चतुरो वाहांस्तस्य हत्वा महारथः ।
पञ्चमेन शिरः कायात्सारथेश्च समाक्षिपत् ॥ ५
षष्ठेन तु ध्वजं राज्ञः सप्तमेन तु कार्मुकम् ।
अष्टमेन तथा खड्गं पातयामास भूतले ।
पञ्चभिर्नृपतिं चापि धर्मराजोऽर्दयद्भृशम् ॥ ६
हताश्वात्तु रथात्तस्मादवप्लुत्य सुतस्तव ।
उत्तमं व्यसनं प्राप्तो भूमावेवावतिष्ठत ॥ ७
तं तु कृच्छ्रगतं दृष्ट्वा कर्णद्रौणिकृपादयः ।
अभ्यवर्तन्त सहसा परीप्सन्तो नराधिपम् ॥ ८
अथ पाण्डुसुताः सर्वे परिवार्य युधिष्ठिरम् ।
अन्वयुः समरे राजंस्ततो युद्धमवर्तत ॥ ९
ततस्तूर्यसहस्राणि प्रावाद्यन्त महामृधे ॥ १०
क्ष्वेलाः किलकिलाशब्दाः प्रादुरासन्महीपते ।
यत्राभ्यगच्छन्समरे पाञ्चालाः कौरवैः सह ॥ ११
नरा नरैः समाजग्मुर्वारणा वरवारणैः ।
रथाश्च रथिभिः सार्धं हयाश्च हयसादिभिः ॥ १२
द्वन्द्वान्यासन्महाराज प्रेक्षणीयानि संयुगे ।
विविधान्यप्यचिन्त्यानि शस्त्रवन्त्युत्तमानि च १३
ते शूराः समरे सर्वे चित्रं लघु च सुष्ठु च ।
अयुध्यन्त महावेगाः परस्परवधैषिणः ॥ १४
अन्योन्यं समरे जघ्नुर्योधव्रतमनुष्ठिताः ।
न हि ते समरं चक्रुः पृष्ठतो वै कथंचन ॥ १५
मुहूर्तमेव तद्युद्धमासीन्मधुरदर्शनम् ।
तत उन्मत्तवद्राजन्निर्मर्यादमवर्तत ॥ १६
रथी नागं समासाद्य दारयन्निशितैः शरैः ।
प्रेषयामास कालाय शरैः सन्नतपर्वभिः ॥ १७
नागा हयान्समासाद्य विक्षिपन्तो बहून्रणे ।
दारयामासुरत्युग्रं तत्रतत्र तदातदा ॥ १८
हयारोहाश्च बहवः परिवार्य हयोत्तमान् ।
तलशब्दरवांश्चक्रुः संपतन्तस्ततस्ततः ॥ १९
धावमानांस्ततस्तांस्तु द्रवमाणान्महागजान् ।
पार्श्वतः पृष्ठतश्चैव निजघ्नुर्हयसादिनः ॥ २०
विद्राव्य च बहूनश्वान्नागा राजन्मदोत्कटाः ।
विषाणैश्चापरे जघ्नुर्मृदुश्चापरे भृशम् ॥ २१
साश्वारोहांश्च तुरगान्विषाणैर्विव्यधू रुषा ।
अपरे चिक्षिपुर्वेगात्प्रगृह्यातिबलास्तदा ॥ २२
पादातैराहता नागा विवरेषु समन्ततः ।
चक्रुरार्तस्वरं घोरं दुद्रुवुश्च दिशो दश ॥ २३
पदातीनां तु सहसा प्रद्रुतानां महाहवे ।
उत्सृज्याभरणं तूर्णमववव्रू रणाजिरे ॥ २४
निमित्तं मन्यमानास्तु परिणाम्य महागजाः ।

सीदमानानि पङ्कमज्जनात् ॥ ४१ ॥ अष्टादशोऽध्याय ॥ १८ ॥
आभरणमववव्रुः अवगत्य वृतवन्त ॥ २४ ॥ निमित्त जयहेतुम् । महान्तो गजा येषा ते महागजा गजारोहा जगृहुर्हस्तिभिर्ग्राहयामासुः । परिणाम्य हस्तिनमिति शेष । बिभि-

जगृहुर्बिभिदुश्चैव चित्राण्याभरणानि च ॥ २५
तांस्तु तत्र प्रसक्तान्वै परिवार्य पदातयः ।
हस्त्यारोहान्निजघ्नुस्ते महावेगा बलोत्कटाः ॥ २६
अपरे हस्तिभिर्हस्तैः खं विक्षिप्ता महाहवे ।
निपतन्तो विषाणाग्रैर्भृशं विद्धाः सुशिक्षितैः ॥ २७
अपरे सहसा गृह्य विषाणैरेव सूदिताः ।
सेनान्तरं समासाद्य केचित्तत्र महागजैः ॥ २८
क्षुण्णगात्रा महाराज विक्षिप्य च पुनःपुनः ।
अपरे व्यजनानीव विभ्राम्य निहता मृधे ॥ २९
पुरःसराश्च नागानामपरेषां विशांपते ।
शरीराण्यतिविद्धानि तत्रतत्र रणाजिरे ॥ ३०
प्रतिमानेषु कुम्भेषु दन्तवेष्टेषु चापरे ।
निगृहीता भृशं नागाः प्रासतोमरशक्तिभिः ॥ ३१
निगृह्य च गजाः केचित् पार्श्वस्थैर्भृशदारुणैः ।
रथाश्वसादिभिस्तत्र संभिन्ना न्यपतन्भुवि ॥ ३२
सहयाः सादिनस्तत्र तोमरेण महामृधे ।
भूमावमृद्नन्वेगेन सचर्माणं पदातिनम् ॥ ३३
तथा सावरणान्कांश्चित्तत्रतत्र विशांपते ।
रथान्नागाः समासाद्य परिगृह्य च मारिष ।
व्याक्षिपन्सहसा तत्र घोररूपे भयानके ॥ ३४
नाराचैर्निहताश्चापि गजाः पेतुर्महाबलाः ।
पर्वतस्येव शिखरं वज्ररुग्णं महीतले ॥ ३५
योधा योधान्समासाद्य मुष्टिभिर्व्यहनन्युधि ।
केशेष्वन्योन्यमाक्षिप्य चिक्षिपुर्बिभिदुश्च ह ॥ ३६
उद्यम्य च भुजानन्ये निक्षिप्य च महीतले ।
पदा चोरः समाक्रम्य स्फुरतोऽपाहरञ्छिरः ॥ ३७
पततश्चापरो राजन्विजहारासिना शिरः ।
'मूतमन्यो महाराज पदा ताडितवांस्तदा ॥' ३८
जीवतश्च तथैवान्यः शस्त्रं काये न्यमज्जयत् ।
मुष्टियुद्धं महच्चासीद्योधानां तत्र भारत ।
तथा केशग्रहश्चोग्रो बाहुयुद्धं च भैरवम् ॥ ३९
समासक्तस्य चान्येन अविज्ञातस्तथाऽपरः ।
जहार समरे प्राणान्नानाशस्त्रैरनेकधा ॥ ४०
संसक्तेषु च योधेषु वर्तमाने च संकुले ।
कबन्धान्युत्थितानि स्युः शतशोऽथ सहस्रशः ४१
शोणितैः सिच्यमानानि शस्त्राणि कवचानि च ।
महारागानुरक्तानि वस्त्राणीव चकाशिरे ॥ ४२
एवमेतन्महद्युद्धं दारुणं शस्त्रसंकुलम् ।
उन्मत्तगङ्गाप्रतिमं शब्देनापूरयज्जगत् ॥ ४३
नैव स्वे न परे राजन्विज्ञायन्ते शरातुराः ।
योद्धव्यमिति युध्यन्ते राजानो जयगृद्धिनः ॥ ४४
स्वान्स्वे जघ्नुर्महाराज परांश्चैव समागतान् ।
उभयोः सेनयोर्वीरैर्व्याकुलं समपद्यत ॥ ४५
रथैर्भग्नैर्महाराज वारणैश्च निपातितैः ।
हयैश्च पतितैस्तत्र नरैश्च विनिपातितैः ॥ ४६
अगम्यरूपा पृथिवी क्षणेन समपद्यत ।
क्षणेनासीन्महीपाल क्षतजौघप्रवर्तिनी ॥ ४७
पाञ्चालानहतत्कर्णस्त्रिगर्ताश्च धनञ्जयः ।
भीमसेनः कुरून्राजन्हस्त्यनीकं च सर्वशः ॥ ४८
एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः ।
अपराह्णे गते सूर्ये काङ्क्षतां विपुलं यशः ॥ ४९

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे एकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः ॥ २० ॥

युधिष्ठिरेण दुर्योधनपराजयः ॥ १ ॥

धृतराष्ट्र उवाच ।
अतितीव्राणि दुःखानि दुःसहानि बहूनि च ।
त्वत्तोऽहं सञ्जयाश्रौषं पुत्राणां चैव संक्षयम् ॥ १
यथा त्वं मे कथयसे यथा युद्धमवर्तत ।

दुश्च शत्रून्गजैरेव ॥ २५ ॥ प्रतिमानेषु गजदन्तान्तरालेषु । प्रासैः कुम्भेषु तोमरैर्दन्तवेष्टेषु शक्तिभिश्च निगृहीता । प्रतिमान प्रतिच्छाया गजदन्तान्तरालयोरिति मेदिनी ॥ ३१ ॥

एकोनविंशोऽध्याय ॥ १९ ॥
अतितीव्राणि युद्धानीति क ट ड पाठ ॥ १ ॥

न सन्ति सूत कौरव्या इति मे निश्चिता मतिः॥ २
दुर्योधनश्च विरथः कृतस्तत्र महारथः।
धर्मपुत्रः कथं चक्रे तस्य वा नृपतिः कथम्॥ ३
अपराह्णे कथं युद्धमभवद्रोमहर्षणम्।
तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि सञ्जय॥ ४
सञ्जय उवाच।
संसक्तेषु तु सैन्येषु वध्यमानेषु भागशः।
रथमन्यं समास्थाय पुत्रस्तव विशांपते॥ ५
क्रोधेन महता युक्तः सविषो भुजगो यथा।
दुर्योधनः समालक्ष्य धर्मराजं युधिष्ठिरम्।
प्रोवाच सूतं त्वरितो याहियाहीति भारत॥ ६
तत्र मां प्रापय क्षिप्रं सारथे यत्र पाण्डवः।
ध्रियमाणातपत्रेण राजा राजति दंशितः॥ ७
स सूतश्चोदितो राज्ञा राज्ञः स्यन्दनमुत्तमम्।
युधिष्ठिरस्याभिमुखं प्रेषयामास संयुगे॥ ८
ततो युधिष्ठिरः क्रुद्धः प्रभिन्न इव कुञ्जरः।
सारथिं चोदयामास याहि यत्र सुयोधनः॥ ९
तौ समाजग्मतुर्वीरौ भ्रातरौ रथसत्तमौ॥ १०
समेत्य च महावीरौ संरब्धौ युद्धदुर्मदौ।
ववर्षतुर्महेष्वासौ शरैरन्योन्यमाहवे॥ ११
ततो दुर्योधनो राजा धर्मशीलस्य मारिष।
शिलाशितेन भल्लेन धनुश्चिच्छेद संयुगे॥ १२
तं नामृष्यत सङ्क्रुद्धो ह्यवमानं युधिष्ठिरः।
अपविध्य धनुश्छिन्नं क्रोधसंरक्तलोचनः॥ १३
अन्यत्कार्मुकमादाय धर्मपुत्रश्चमूमुखे।
दुर्योधनस्य चिच्छेद ध्वजं कार्मुकमेव च॥ १४
अथान्यद्धनुरादाय पुत्रस्ते भरतर्षभ।
'युधिष्ठिरस्य चिक्षेप शरान्कनकभूषणान्।
रुक्मपुङ्खान्प्रसन्नाग्रान्सविषानिव पन्नगान्॥'१५
तावन्योन्यं सुसंक्रुद्धौ शस्त्रवर्षाण्यमुञ्चताम्।
सिंहाविव सुसंरब्धौ परस्परजिगीषया॥ १६
जघ्नतुस्तौ रणेऽन्योन्यं नर्दमानौ वृषाविव।
अन्तरं मार्गमाणौ च चेरतुस्तौ महारथौ॥ १७
ततः पूर्णायतोत्सृष्टैः शरैस्तौ तु कृतव्रणौ।
विरेजतुर्महाराज किंशुकाविव पुष्पितौ॥ १८
ततो राजन्विमुञ्चन्तौ सिंहनादान्मुहुर्मुहुः।
तलयोश्च तथा शब्दान्धनुषश्च महाहवे॥ १९
शङ्खशब्दवरांश्चैव चक्रतुस्तौ नरेश्वरौ।
अन्योन्यं तौ महाराज पीडयांचक्रतुर्भृशम्॥२०
ततो युधिष्ठिरो राजा पुत्रं तव शरैस्त्रिभिः।
आजघानोरसि क्रुद्धो वज्रवेगैर्दुरासदैः॥ २१
प्रतिविव्याध तं तूर्णं तव पुत्रो महीपतिः।
पञ्चभिर्निशितैर्बाणैः स्वर्णपुङ्खैः शिलाशितैः॥२२
ततो दुर्योधनो राजा शक्तिं चिक्षेप भारत।
सर्वपारशवीं तीक्ष्णां महोल्काप्रतिमां तदा॥२३
तामापतन्तीं सहसा धर्मराजः शितैः शरैः।
त्रिभिश्चिच्छेद सहसा तं च विव्याध पञ्चभिः॥२४
निपपात ततः साऽथ स्वर्णदण्डा महास्वना।
निपतन्ती महोल्केव व्यराजच्छिखिसन्निभा॥२५
शक्तिं विनिहतां दृष्ट्वा पुत्रस्तव विशांपते।
नवभिर्निशितैर्भल्लैर्निजघान युधिष्ठिरम्॥ २६
सोऽतिविद्धो बलवता शत्रुणा शत्रुतापनः।
दुर्योधनं समुद्दिश्य बाणं जग्राह सत्वरः॥ २७
समाधत्त च तं बाणं धनुर्मध्ये महाबलः।
चिक्षेप च महाराज ततः क्रुद्धः पराक्रमी॥२८
स तु बाणः समासाद्य तव पुत्रं महारथम्।
व्यामोहयत राजानं धरणीं च ददार ह॥ २९
ततो दुर्योधनः क्रुद्धो गदामुद्यम्य वेगितः।
विधित्सुः कलहस्यान्तं धर्मराजमुपाद्रवत्॥ ३०
तमुद्यतगदं दृष्ट्वा दण्डहस्तमिवान्तकम्।
धर्मराजो महाशक्तिं प्राहिणोत्तव सूनवे॥ ३१
दीप्यमानां महावेगां महोल्कां ज्वलितामिव।
यमदण्डनिभां घोरां कालरात्रिमिवापराम्॥३२
रथस्थः स तया विद्धो वर्म भित्त्वा स्तनान्तरे।
भृशं संविग्नहृदयः पपात च मुमोह च॥ ३३

तस्य त च नृपतिर्दुर्योधन कथमयुध्यत इति शेष॥ ३॥ अपविध्य त्यक्त्वा॥१३॥ सर्वपारशवी सर्वविनाशिनीं गौरादि। तिरस्कारे विनाशे च पुसि पारशव. इति मेदिनी॥२३॥ दीप्यन्ती महोल्काभा राजञ्शक्तिर्दिशो दश इति ङ. पाठः॥ २५॥

नभस्तमाह च ततः प्रतिज्ञामनुपालय ।
नायं वध्यस्तव नृप इत्युक्तः स न्यवर्तत ॥ ३४
ततस्त्वरितमागम्य कृतवर्मा तवात्मजम् ।
प्रत्यपद्यत राजानं निमग्नं व्यसनार्णवे ॥ ३५
गदामादाय भीमोऽपि हेमपट्टपरिष्कृताम् ।
अभिदुद्राव वेगेन कृतवर्माणमाहवे ॥ ३६
एवं तदभवद्युद्धं त्वदीयानां परैः सह ।
अपराह्णे महाराज काङ्क्षतां विजयं युधि ॥ ३७

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः ॥ २१ ॥

संकुलयुद्धम् ॥ १ ॥ षोडशदिवसयुद्धोपसंहारः ॥ २ ॥

सञ्जय उवाच ।
ततः कर्णं पुरस्कृत्य त्वदीया युद्धदुर्मदाः ।
पुनरावृत्य संग्रामं चक्रुर्देवासुरोपमम् ॥ १
द्विरदनररथाश्वशङ्खशब्दैः
परिहृषिता विविधैश्च शस्त्रपातैः ।
द्विरदरथपदातिसादिसङ्घाः
परिकुपिताभिमुखाः प्रजज्ञिरे ते ॥ २
शितपरश्वथसासिपट्टसैः
रिषुभिरनेकविधैश्च सूदिताः ।
द्विरदरथहया महाहवे
वरपुरुषैः पुरुषाश्च वाहनैः ॥ ३
कमलदिनकरेन्दुसन्निभैः
सितदशनैः सुमुखाक्षिनासिकैः ।
रुचिरमकुटकुण्डलैर्महीं
पुरुषशिरोभिरुपस्तृता बभौ ॥ ४
परिघमुसलशक्तितोमरै-
र्नखरभुशुण्डिगदाशतैर्हताः ।
द्विरदनरहयाः सहस्रशो
रुधिरनदीप्रवहास्तदाऽभवन् ॥ ५
प्रहतरथनराश्वकुञ्जरं
प्रतिभयदर्शनमुल्बणव्रणम् ।
तदहितहतमाबभौ बलं
पितृपतिराष्ट्रमिव प्रजाक्षये ॥ ६

भीमस्तमाह च ततः प्रतिज्ञामनुचिन्तयन् इति झ. पाठ ॥ ३४ ॥ विंशोऽध्यायः ॥ २० ॥

अथ तव नरदेव सैनिका-
स्तव च सुताः सुरसूनुसन्निभाः ।
अमितबलपुरःसरा रणे
कुरुवृषभाः शिनिपुत्रमभ्ययुः ॥ ७
तदतिरुधिरभीममाबभौ
पुरुषवराश्वरथद्विपाकुलम् ।
लवणजलसमुद्धतस्वनं
बलमसुरामरसैन्यसप्रभम् ॥ ८
सुरपतिसमविक्रमस्तत-
स्त्रिदशवरावरजोपमं युधि ।
दिनकरकिरणप्रभैः पृषत्कै
रवितनयोऽभ्यहनच्छिनिप्रवीरम् ॥ ९
तमपि सरथवाजिसारथिं
शिनिवृषभो विविधैः शरैस्त्वरन् ।
भुजगविषसमप्रभै रणे
पुरुषवरं समवास्तृणोत्तदा ॥ १०
शिनिवृषभशरैर्निपीडितं
तव सुहृदो वसुषेणमभ्ययुः ।
त्वरिततरमतिरथा रथर्षभं
द्विरदरथाश्वपदातिभिः सह ॥ ११
तदुदधिनिभमाद्रवद्बलं
त्वरिततरैः समभिद्रुतं परैः ।
द्रुपदसुतमुखैस्तदाऽभवत्
पुरुषरथाश्वगजक्षयो महान् ॥ १२

लवणजल क्षारसमुद्र ॥ ८ ॥ त्रिदशवरावरजोपम विष्णुतुल्यम् ॥ ९ ॥

अथ पुरुषवरौ कृताह्निकौ
भवमभिपूज्य यथाविधि प्रभुम् ।
अरिवधकृतनिश्चयौ द्रुतं
तव बलमर्जुनकेशवौ सृतौ ॥ १३
जलदनिनदनिःस्वनं रथं
पवनविधूतपताककेतनम् ।
सितहयमुपयान्तमन्तिकं
कृतमनसो ददृशुस्तदाऽरयः ॥ १४
अथ विष्फार्य गाण्डीवं रथे नृत्यन्निवार्जुनः ।
शरसंबाधमकरोत्खं दिशः प्रदिशस्तथा ॥ १५
रथान्विमानप्रतिमान्मज्जयन्सायुधध्वजान् ।
ससारथींस्तदा बाणैरभ्राणीवानिलोऽवधीत् ॥१६
गजान्गजप्रयन्तॄंश्च वैजयन्त्यायुधध्वजान् ।
सादिनोऽश्वांश्च पत्तींश्च शरैर्निन्ये यमक्षयम्॥१७
तमन्तकमिव क्रुद्धमनिवार्यं महारथम् ।
दुर्योधनोऽभ्ययादेको निघ्नन्बाणैरजिह्मगैः ॥ १८
तस्यार्जुनो धनुः सूतमश्वान्केतुं च सायकैः ।
हत्वा सप्तभिरेकेन च्छत्रं चिच्छेद पत्रिणा ॥ १९
नवमं च समाधाय व्यसृजत्प्राणघातिनम् ।
दुर्योधनायेषुवरं तं द्रौणिः सप्तधाऽच्छिनत् ॥२०
ततो द्रौणेर्धनुश्छित्वा हत्वा चाश्वरथाञ्शरैः ।
कृपस्यापि तदत्युग्रं धनुश्चिच्छेद पाण्डवः ॥ २१
हार्दिक्यस्य धनुश्छित्त्वा ध्वजं चाश्वांस्तदाऽवधीत्
दुःशासनस्येष्वसनं छित्त्वा राधेयमभ्ययात् ॥२२
अथ सात्यकिमुत्सृज्य त्वरन्कर्णोऽर्जुनं त्रिभिः ।
विद्ध्वा विव्याध विंशत्या कृष्णं पार्थं पुनःपुनः २३
न ग्लानिरासीत्कर्णस्य क्षिपतः सायकान्बहून् ।
रणे विनिघ्नतः शत्रून्क्रुद्धस्येव शतक्रतोः ॥ २४
अथ सात्यकिरागत्य कर्णं विद्ध्वा शितैः शरैः ।
नवत्या नवभिश्चोग्रैः शतेन पुनरार्पयत् ॥ २५
ततः प्रवीराः पार्थानां सर्वे कर्णमपीडयन् ।
युधामन्युः शिखण्डी च द्रौपदेयाः प्रभद्रकाः॥२६
उत्तमौजा युयुत्सुश्च यमौ पार्षत एव च ।
चेदिकारूशमात्स्यानां केकयानां च यद्बलं॥२७
चेकितानश्च बलवान्धर्मराजश्च सुव्रतः ।
एते रथाश्वद्विरदैः पत्तिभिश्चोग्रविक्रमैः ॥ २८
परिवार्य रणे कर्णं नानाशस्त्रैरवाकिरन् ।
भाषन्तो वाग्भिरुग्राभिः सर्वे कर्णवधे धृताः ॥२९
तां शस्त्रवृष्टिं बहुधा कर्णश्छित्त्वा शितैः शरैः ।
अपोवाहास्त्रवीर्येण द्रुमं भङ्क्त्वेव मारुतः ॥३०
रथिनः समहामात्रान्गजानश्वान्ससादिनः ।
पत्तिव्रातांश्च संक्रुद्धो निघ्नन्कर्णो व्यदृश्यत ॥ ३१
तद्बध्यमानं पाण्डूनां बलं कर्णास्त्रतेजसा ।
विशस्त्रपत्रदेहासु प्राय आसीत्पराङ्मुखम् ॥ ३२
अथ कर्णास्त्रमस्त्रेण प्रतिहत्यार्जुनः स्वयन् ।
दिशं खं चैव भूमिं च प्रावृणोच्छरवृष्टिभिः ॥३३
मुसलानीव संपेतुः परिघा इव चेषवः ।
शतघ्न्य इव चाप्यन्ये वज्राण्युग्राणि चापरे ॥ ३४
तैर्बध्यमानं तत्सैन्यं सपत्त्यश्वरथद्विपम् ।
निमीलिताक्षमत्यर्थं वभ्राम च ननाद च ॥ ३५
निष्कैवल्यं तदा युद्धं प्रापुरश्वनरद्विपाः ।
हन्यमानाः शरैरार्तास्तदा भीताः प्रदुद्रुवुः ॥३६
स्वदीयानां तदा युद्धे संसक्तानां जयैषिणाम् ।
गिरिमस्तं समासाद्य प्रत्यपद्यत भानुमान् ॥३७
तमसा च महाराज रजसा च विशेषतः ।
न किंचित्प्रत्यपश्याम शुभं वा यदि वाऽशुभम् ३८
ते त्रस्यन्तो महेष्वासा रात्रियुद्धस्य भारत ।
अपयानं ततश्चक्रुः सहिताः सर्वयोधिभिः ॥ ३९
कौरवेष्वपयातेषु तदा राजन्दिनक्षये ।
जयं सुमनसः प्राप्य पार्थाः स्वशिबिरं ययुः ॥४०
वादित्रशब्दैर्विविधैः सिंहनादैः सगर्जितैः ।
परानुपहसन्तश्च स्तुवन्तश्चाच्युतार्जुनौ ॥ ४१
कृतेऽवहारे तैर्वीरैः सैनिकाः सर्व एव ते ।
आशीर्वाचः पाण्डवेषु प्रायुञ्जन्त नरेश्वराः ॥ ४२
ततः कृतेऽवहारे च प्रहृष्टास्तत्र पाण्डवाः ।
निशायां शिबिरं गत्वा न्यवसन्त नरेश्वराः ॥४३

सृतावागतौ ॥ १३ ॥ निष्कैवल्य निश्चित कैवल्य मरण यस्मिन्स्तत्तथा ॥ २६ ॥ प्रत्यपद्यत प्रविष्टः ॥ ३७ ॥

एकविंशोऽध्याय ॥ २१ ॥

ततो रक्षःपिशाचाश्च श्वापदाश्चैव सङ्घशः । जग्मुरायोधनं घोरं रुद्रस्याक्रीडसन्निभम् ॥ ४४

॥ इति श्रीमन्महाभारते कर्णपर्वणि षोडशदिवसयुद्धे एकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः ॥ २२ ॥

कृष्णतुल्यसारथेरभावात्स्वस्यार्जुनाद्यूनतां मन्यमानेन कर्णेन दुर्योधनं प्रति शल्यस्य सारथ्ये नियोजनचोदना ॥ १ ॥

धृतराष्ट्र उवाच ।
स्वेन च्छन्देन नः सर्वानवधीद्व्यक्तमर्जुनः ।
न ह्यस्य समरे मुच्येदन्तकोऽप्याततायिनः ॥ १
पार्थो ह्येकोऽहरद्भद्रामेकश्चाग्निमतर्पयत् ।
एकश्चेमां महीं जित्वा चक्रे बलिभृतो नृपान् ॥ २
एको निवातकवचानहनद्दिव्यकार्मुकः ।
एकः किरातरूपेण स्थितं शर्वमयोधयत् ॥ ३
एको ह्यरक्षद्धरतानेको भवमतोषयत् ।
तेनैकेन जिताः सर्वे मदीया ह्युग्रतेजसः ॥ ४
न ते निन्द्याः प्रशस्यास्ते यत्ते चक्रुर्ब्रवीहि तत् ।
ततो दुर्योधनः सूत पश्चात्किमकरोत्तदा ॥ ५

सञ्जय उवाच ।
हतप्रहतविध्वस्ता विवर्मायुधवाहनाः ।
दीनस्वरा दूयमाना मानिनः शत्रुनिर्जिताः ॥ ६
शिबिरस्थाः पुनर्मन्त्रं मन्त्रयन्ति स्म कौरवाः ।
भग्नदंष्ट्रा हतविषाः पादाक्रान्ता इवोरगाः ॥ ७
तानब्रवीत्ततः कर्णः क्रुद्धः सर्प इव श्वसन् ।
करं करेण निष्पीड्य प्रेक्षमाणस्तवात्मजम् ॥ ८
यत्तो दृढश्च दक्षश्च धृतिमानर्जुनः सदा ।
संबोधयति चाप्येनं यथाकालमधोक्षजः ॥ ९
सहसाऽस्त्रविसर्गेण वयं तेनाद्य वञ्चिताः ।
श्वस्त्वहं तस्य संकल्पं सर्वे हन्ता महीपते ॥ १०
एवमुक्तस्तथेत्युक्त्वा सोऽनुजज्ञे नृपोत्तमान् ।
तेऽनुज्ञाता नृपाः सर्वे स्वानि वेश्मानि भेजिरे ११
सुखोषितास्तां रजनीं हृष्टा युद्धाय निर्ययुः ।
तेऽपश्यन्विहितं व्यूहं धर्मराजेन दुर्जयम् ।
प्रयत्नात्कुरुमुख्येन बृहस्पत्युशनोमतात् ॥ १२
अथ प्रतीपकर्तारं प्रवीरं परवीरहा ।
सस्मार वृषभस्कन्धं कर्णं दुर्योधनस्तदा ॥ १३
पुरंदरसमं युद्धे मरुद्गणसमं बले ।
कार्तवीर्यसमं वीर्ये कर्णं राज्ञोऽगमन्मनः ॥ १४
सर्वेषां चैव सैन्यानां कर्णमेवागमन्मनः ।
सूतपुत्रं महेष्वासं बन्धुमात्ययिकेष्विव ॥ १५

धृतराष्ट्र उवाच ।
ततो दुर्योधनः सूत पश्चात्किमकरोत्तदा ।
यद्वोऽगमन्मनो मन्दाः कर्णं वैकर्तनं प्रति ॥ १६
अप्यपश्यत राधेयं शीतार्ता इव भास्करम् ।
कृतेऽवहारे सैन्यानां प्रवृत्ते च रणे पुनः ॥ १७
'दुर्योधनं च तत्राजौ पाण्डवेन भृशार्दितम् ।
पराक्रान्तान्पाण्डुसुतान्दृष्ट्वाऽपि च महारणे ॥' १८
कथं वैकर्तनः कर्णस्तत्रायुध्यत सञ्जय ।
कथं च पाण्डवाः सर्वे युयुधुस्तत्र सूतजम् ॥ १९
कर्णो ह्येको महाबाहुर्हन्यात्पार्थान्ससृञ्जयान् ।
कर्णस्य भुजयोर्वीर्यं शक्रविष्णुसमं युधि ॥ २०
तस्य शस्त्राणि घोराणि विक्रमश्च महात्मनः ।
कर्णमाश्रित्य संग्रामे मत्तो दुर्योधनो नृपः ॥ २१
दुर्योधनं ततो दृष्ट्वा पाण्डवेन भृशार्दितम् ।
पराक्रान्तान्पाण्डुसुतान्दृष्ट्वा चापि महारथः ॥ २२

स्वेन च्छन्देन इच्छया । आततायिन शस्त्रपाणे ॥ १ ॥ भद्रा सुभद्राम् । बलिभृत करदान् ॥ २ ॥ अरक्षत घोषयात्रायाम् । भरतान्दुर्योधनादीन् ॥ ४ ॥ हतास्ताडिता । प्रहताश्छिन्नानयवा. । विध्वस्ता. वाहनेभ्योऽध पातिता ॥ ६ ॥ महसा अकस्मात् सहस्राक्षनिसृष्ट्या च शक्त्या तेन स्म वञ्चिता. इति ख पाठ· । सहस्राक्षनिसर्गेण शक्त्या तेन स्म वञ्चिता इति ट पाठ ॥ १० ॥ बृहस्पत्युशनोमते इति झ पाठ, तत्र स्थितेनेति शेष ॥ १२ ॥ प्रतीपकर्तारं शत्रूणा छेत्तारम् । प्रवीर प्रकृष्ट वीरम् ॥ १३ ॥ आत्ययिकेषु प्राणसकटेषु ॥ १५ ॥ अप्यपश्यत । अपि प्रश्ने ॥ १७ ॥

कर्णमाश्रित्य संग्रामे मन्दो दुर्योधनः पुनः।
जेतुमुत्सहते पार्थान्सपुत्रान्सहकेशवान् ॥ २३
'यः सौबलं तथा तात नीतिमानिति मन्यते।
कर्णं चाप्रतिमं युद्धे देवैरपि दुरुत्सहम् ॥ २४
मन्यतेऽभ्यधिकं पार्थादेवं चास्य हृदि स्थितम्।
विजेष्यति रणे कर्ण एकः पर्थान्ससोमकान्।
मम चैव सदा मन्दः शंसते नित्यमग्रतः ॥' २५
अहो बत महद्दुःखं यत्र पाण्डुसुतान्रणे।
नातरद्रभसः कर्णो दैवं नूनं परायणम् ॥ २६
अहो द्यूतस्य निष्ठेयं घोरा संप्रति वर्तते ॥ २७
अहो तीव्राणि दुःखानि दुर्योधनकृतान्यहम्।
सोढा घोराणि बहुशः शल्यभूतानि सञ्जय ॥ २८
सौबलं च तदा तात नीतिमानिति मन्यते।
कर्णश्च रभसो नित्यं राजा तं चाप्यनुव्रतः ॥ २९
यदेवं वर्तमानेषु महायुद्धेषु सञ्जय।
अश्रौषं निहतान्पुत्रान्नित्यमेव विनिर्जितान्॥ ३०
न पाण्डवानां समरे कश्चिदस्ति हतः किल।
स्त्रीमध्यमिव गाहन्ते दैवं तु बलवत्तरम् ॥ ३१
सञ्जय उवाच।
[राजन्पूर्वनिमित्तानि धर्मिष्ठानि विचिन्तय] ३२
अतिक्रान्तं हि यत्कार्यं पश्चाच्चिन्तयते नरः।
तच्चास्य न भवेत्कार्यं चिन्तया च विनश्यति ॥ ३३
तदिदं तव कार्यं तु दूरप्राप्तं विजानता।
न कृतं यत्त्वया पूर्वं प्राप्ताप्राप्तविचारणम् ॥ ३४
उक्तोऽसि बहुधा राजन्मा युध्यस्वेति पाण्डवैः।
न च तत्त्वग्रहीर्द्वेषात्पाण्डवेषु विशांपते ॥ ३५
त्वया पापानि घोराणि समाचीर्णानि पाण्डुषु।
त्वत्कृते वर्तते घोरः पार्थिवानां जनक्षयः ॥ ३६
तच्चिदानीमतिक्रान्तं मा शुचो भरतर्षभ।
शृणु सर्वं यथावृत्तं घोरं वैशसमुच्यते ॥ ३७
प्रभातायां रजन्यां तु कर्णो राजानमभ्ययात्।
समेत्य च महाबाहुर्दुर्योधनमथाब्रवीत् ॥ ३८
कर्ण उवाच।
अद्य राजन्समेष्यामि पाण्डवेन यशस्विना।
निहनिष्यामि तं वीरं स वा मां निहनिष्यति ३९
बहुत्वान्मम कार्याणां तथा पार्थस्य भारत।
नाभूत्समागमो राजन्मम चैवार्जुनस्य च ॥ ४०
इदं तु मे यथाप्रज्ञं शृणु वाक्यं विशांपते।
अनिहत्य रणे पार्थं नाहमेष्यामि भारत ॥ ४१
हतप्रवीरे सैन्येऽस्मिन्मयि चावस्थिते युधि।
अभियास्यति मां पार्थः शक्रशक्तिविनाकृतम् ४२
ततः श्रेयस्करं यच्च तन्निबोध जनेश्वर।
आयुधानां च मे वीर्यं दिव्यानामर्जुनस्य च ॥ ४३
कार्यस्य महतो भेदे लाघवे दूरपातने।
सौष्ठवे चास्त्रपाते च सव्यसाची न मत्समः ॥ ४४
प्राणे शौर्येऽथ विज्ञाने विक्रमे चापि भारत।
निमित्तज्ञानयोगे च सव्यसाची न मत्समः ४५
सर्वायुधमहामात्रं विजयं नाम तद्धनुः।
इन्द्रार्थं प्रियकामेन निर्मितं विश्वकर्मणा ॥ ४६
येन दैत्यगणान्राजञ्जितवान्वै शतक्रतुः।
यस्य घोषेण दैत्यानां व्यासुह्यन्त दिशो दश ४७
तद्भार्गवाय प्रायच्छच्छक्रः परमसंमतम्।
तद्दिव्यं भार्गवो मह्यमददद्धनुरुत्तमम् ॥ ४८
तेन योत्स्ये महाबाहुमर्जुनं जयतां वरम्।
यथेन्द्रः समरे सर्वान्दैतेयान्वै समागतान्।
'निजघान तथा सर्वाञ्जेष्यामि युधि पाण्डवान् ॥'
धनुर्घोरं रामदत्तं गाण्डीवात्तद्विशिष्यते।
त्रिस्सप्तकृत्वः पृथिवी धनुषा येन निर्जिता ॥ ५०

निष्ठा विपाकः ॥ २७ ॥ कर्णश्च नीतिमानिति मन्यत इति पूर्वेणान्वय ॥ २९ ॥ स्त्रीमध्यमिव गाहन्ते निर्भयाः सेना मृद्नन्तीत्यर्थ ॥ ३१ ॥ निमित्तानि द्यूतादीनि धर्मिष्ठानीति-विपरीतलक्षणा। अधर्मिष्ठानीत्यर्थ ॥ ३२ ॥ प्राप्ताप्राप्त-विचारण युक्तायुक्तपरीक्षण न कृतमित्यन्वय ॥ ३४ ॥ जीवानामर्जुनस्य चेति ख. ङ पाठ ॥ ४३ ॥ कार्यस्य कर्तव्यस्य परकीयस्य भेदे विनाशे। लाघवे शैघ्र्ये। सौष्ठवे कौशले ॥ ४४ ॥ प्राणे शारीरबले। शौर्ये मानसबले। विज्ञाने अस्त्रशिक्षायाम्। विक्रमे फलोपधानेऽस्त्राणाम्। निमित्तज्ञानयोगे लक्षसबन्धावधारणे। प्राणस्थैर्ये च वीर्ये च इति क. ख. ङ पाठ ॥ ४५ ॥ महामात्र श्रेष्ठम् ॥ ४६ ॥

धनुषो ह्यस्य कर्माणि दिव्यानि प्राह भार्गवः ।
तद्रामो ह्यददन्मह्यं तेन योत्स्यामि पाण्डवम् ॥५१
अद्य दुर्योधनाहं त्वां नन्दयिष्ये सबान्धवम् ।
निहत्य समरे वीरमर्जुनं जयतां वरम् ॥ ५२
सपर्वतवनद्वीपा हतवीरा ससागरा ।
पुत्रपौत्रप्रतिष्ठा ते भविष्यत्यद्य पार्थिव ॥ ५३
नाशक्यं विद्यते मेऽद्य त्वत्प्रियार्थं विशेषतः ।
सम्यग्धर्मानुरक्तस्य सिद्धिरात्मवतो यथा ॥ ५४
न हि मे विक्रमं सोढुं स शक्तोऽग्निं तरुर्यथा ।
अवश्यं तु मया वाच्यं येन हीनोऽसि फल्गुनात् ॥
ज्या तस्य धनुषो दिव्या तथाऽक्षय्ये महेषुधी ।
सारथिस्तस्य गोविन्दो मम तादृङ्ग विद्यते ॥ ५६
तस्य दिव्यं धनुः श्रेष्ठं गाण्डीवमजितं युधि ।
विजयं च महद्दिव्यं ममापि धनुरुत्तमम् ॥ ५७
तत्राहमधिकः पार्थाद्धनुषा तेन पार्थिव ।
येन चाप्यधिको वीरः पाण्डवस्तन्निबोध मे ॥ ५८
रश्मिग्राहश्च दाशार्हः सर्वलोकनमस्कृतः ।
अग्निदत्तश्च वै दिव्यो रथः काञ्चनभूषणः ॥ ५९
अच्छेद्याः सर्वतो वीर वाजिनश्च मनोजवाः ।
ध्वजश्च दिव्यो द्युतिमान्वानरोपि भयङ्करः ॥ ६०
कृष्णश्च जगतः स्रष्टा रथं तमभिरक्षति ।
एभिस्त्रिभिरहं हीनो योद्धुमिच्छामि पाण्डवम् ६१
अयं तु सदृशः शौरेः शल्यः समितिशोभनः ।
सारथ्यं यदि मे कुर्याद्ध्रुवस्ते विजयो भवेत् ॥ ६२
तस्य मे सारथिः शल्यो भवत्वसुकरः परैः ।
नाराचान्गार्ध्रपत्रांश्च शकटानि वहन्तु मे ॥ ६३
रथाश्च मुख्या राजेन्द्र युक्ता वाजिभिरुत्तमैः ।
आयान्तु पश्चात्सततं मामेव भरतर्षभ ॥ ६४
एवमभ्यधिकः पार्थाद्भविष्यामि गुणैरहम् ।
शल्योप्यभ्यधिकः कृष्णादर्जुनादपि चाप्यहम् ६५
यथाऽश्वहृदयं वेद दाशार्हः परवीरहा ।
तथा शल्यो विजानीते हयज्ञानं महारथः ॥ ६६
बाहुवीर्ये समो नास्ति मद्रराजस्य कश्चन ।
तथाऽस्त्रे मत्समो नास्ति कश्चिदेव धनुर्धरः ॥ ६७
तथा शल्यसमो नास्ति हयज्ञाने हि कश्चन ।
सोऽयमभ्यधिकः कृष्णाद्भविष्यति रथो मम॥६८
एवं कृते रथस्थोऽहं गुणैरभ्यधिकोऽर्जुनात् ।
विजयेयमहं सङ्ख्ये फल्गुनं कुरुसत्तम ॥ ६९
समुद्यातुं न शक्ष्यन्ति देवा अपि सवासवाः ।
एतत्कृतं महाराज त्वयेच्छामि परंतप ॥ ७०
क्रियतामेष कामो मे मा वः कालोऽत्यगादयम् ।
एवं कृते कृतं मह्यं त्वया सर्वं भविष्यति ॥ ७१
ततो द्रक्ष्यसि सङ्ग्रामे यत्करिष्यामि भारत ।
सर्वथा पाण्डवान्सङ्ख्ये विजेष्ये वै समागतान्॥७२
न हि मे समरे शक्ताः समुद्यातुं सुरासुराः ।
किमु पाण्डुसुता राजन्रणे मानुषयोनयः ॥ ७३
सञ्जय उवाच ।
एवमुक्तस्तव सुतः कर्णेनाहवशोभिना ।
सम्पूज्य सम्प्रहृष्टात्मा ततो राधेयमब्रवीत् ॥ ७४
दुर्योधन उवाच ।
एवमेतत्करिष्यामि यथा त्वं कर्ण मन्यसे ।
सोपासङ्गा रथाः साश्वाः स्वनुयास्यन्ति संयुगे ७५
नाराचान्गार्ध्रपत्रांश्च शकटानि वहन्तु ते ।
अनुयास्याम कर्ण त्वां वयं सर्वे च पार्थिवाः॥७६
सञ्जय उवाच ।
एवमुक्त्वा महाराज तव पुत्रः प्रतापवान् ।
अभिगम्याब्रवीद्राजा मद्रराजमिदं वचः ॥ ७७

॥ इति श्रीमन्महाभारते कर्णपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥

सिद्धिर्मोक्ष । आत्मवतो जितचित्तस्य ॥५४॥ न भीमो विक्रम | सोढु इति क. ङ. पाठ ॥ ५५ ॥ द्वाविंशोऽध्याय ॥ २२ ॥

त्रयोविंशोऽध्यायः ॥ २३ ॥

दुर्योधनप्रार्थनया शल्येन कृच्छ्रात्कर्णरथसारथ्यकरणाभ्युपगमः ॥ १ ॥

सञ्जय उवाच ।
एवमुक्तो महाराज तव पुत्रः प्रतापवान् ।
मद्रेश्वरं प्रति रणे सुरसैन्यभयंकरम् ।
सर्वं तथाऽकरोत्तूर्णं राधेयस्तद्यथाऽब्रवीत् ॥ १
मद्रराजं च समरे प्रणम्य च महारथम् ।
विनयेनोपसंगम्य प्रणयाद्वाक्यमब्रवीत् ॥ २
सत्यव्रत महाभाग द्विषतां तापवर्धन ।
मद्रेश्वर रणेशूर परसैन्यभयंकर ॥ ३
'मत्प्रियार्थं हितार्थं च तथा पार्थवधाय च ।'
श्रुतवानसि कर्णस्य ब्रुवतो वदतां वर ।
यथा नृपतिसिंहानां मध्ये त्वां वरये स्वयम् ॥ ४
तच्चामप्रतिवीर्याद्य शत्रुपक्षक्षयावह ।
मद्रेश्वर प्रयाचेऽहं शिरसा विनयेन च ॥ ५
तस्मात्पार्थविनाशार्थं हितार्थं मम चैव हि ।
त्वं पाहि सर्वतः कर्णं भवं ब्रह्मेव सुव्रत ॥ ६
सारथ्यं रथिनां श्रेष्ठ प्रणयात्कर्तुमर्हसि ।
त्वयि यन्तरि राधेयो विद्विषो मे विजेष्यते ॥ ७
अभीषूणां हि कर्णस्य ग्रहीतान्यो न विद्यते ।
ऋते हि त्वां महाभाग वासुदेवसमं युधि ॥ ८
स पाहि सर्वथा कर्णं यथा ब्रह्मा महेश्वरम् ।
यथा च सर्वथाऽऽपत्सु वार्ष्णेयः पाति पाण्डवम् ।
तथा मद्रेश्वराद्य त्वं राधेयं प्रतिपालय ॥ ९
भीष्मो द्रोणः कृपः कर्णो भवान्भोजश्च वीर्यवान् ।
शकुनिः सौबलो द्रौणिरहमेव च नो बलम् ॥ १०
एवमेष कृतो भागो नवधा पृथिवीपते ।
न च भागोऽत्र भीष्मस्य द्रोणस्य च महात्मनः ॥ ११
ताभ्यामतीत्य तौ भागौ निहता मम शत्रवः ।
वृद्धौ हि तौ महेष्वासौ छलेन निहतौ युधि ॥ १२
कृत्वा चासुकरं कर्म गतौ स्वर्गमितोऽनघ ।
तथाऽन्ये पुरुषव्याघ्राः परैर्विनिहता युधि ॥ १३
अस्मदीयाश्च बहवः स्वर्गाय गमिताः परैः ।
त्यक्त्वा प्राणान्यथाशक्ति चेष्टां कृत्वा च पुष्कलाम् ।
तदिदं हतभूयिष्ठं बलं मम नराधिप ।
पूर्वमप्यल्पकैः पार्थैर्हतं किमुत साम्प्रतम् ॥ १५
बलवन्तो महात्मानः कौन्तेयाः सत्यविक्रमाः ।
बलं शेषं न हन्युर्मे यथा तत्कुरु पार्थिव ॥ १६
हतवीरमिदं सैन्यं पाण्डवैः समरे विभो ।
कर्णो ह्येको महाबाहुरस्मत्प्रियहिते रतः ॥ १७
भवांश्च पुरुषव्याघ्र सर्वलोकमहारथः ।
शल्य कर्णोऽर्जुनेनाद्य योद्धुमिच्छति संयुगे ॥ १८
तस्मिञ्जयाशा विपुला मद्रराज नराधिप ।
तस्याभीषुग्रहवरो नान्योऽस्ति भुवि कश्चन ॥ १९
पार्थस्य समरे कृष्णो यथाऽभीषुग्रहो वरः ।
तथा त्वमपि कर्णस्य रथेऽभीषुग्रहो भव ॥ २०
तेन युक्तो रणे पार्थो रक्ष्यमाणश्च पार्थिव ।
यानि कर्माणि कुरुते प्रत्यक्षाणि तथैव तत् ॥ २१
पूर्वं नः समरे ह्येवमवधीदर्जुनो रिपून् ।
इदानीं विक्रमो ह्यस्य कृष्णेन सहितस्य च ॥ २२
कृष्णेन सहितः पार्थो धार्तराष्ट्रीं महाचमूम् ।
अहन्यहनि मद्रेश द्रावयन्दृश्यते युधि ॥ २३
भागोऽवशिष्टः कर्णस्य तव चैव महाद्युते ।
तं भागं सह कर्णेन युगपन्नाशयाद्य हि ॥ २४
अरुणेन यथा सार्धं तमः सूर्यो व्यपोहति ।
तथा कर्णेन सहितो जहि पार्थं महाहवे ॥ २५
उद्यन्तौ च यथा सूर्यौ बालसूर्यसमप्रभौ ।
कर्णशल्यौ रणे दृष्ट्वा विद्रवन्तु महारथाः ॥ २६
सूर्यारुणौ यथा दृष्ट्वा तमो नश्यति मारिष ।
तथा नश्यन्तु कौन्तेयाः सपाञ्चालाः ससृञ्जयाः ॥
रथिनां प्रवरः कर्णो यन्तॄणां प्रवरो भवान् ।
संयोगो युवयोर्लोके नाभून्न च भविष्यति ॥ २८
यथा सर्वास्ववस्थासु वार्ष्णेयः पाति पाण्डवम् ।
तथा भवान्परित्रातु कर्णं वैकर्तनं रणे ।

अभीषूणा हयरश्मीनाम् ॥ ८ ॥ पुनर्नः समरे राजन्मावकर्ण० ६

धीदर्जुनो रिपून् । इति क. पाठ. ॥२२॥ त्रातु त्रायताम्॥२९॥

'सारथ्यं क्रियतां तस्य युध्यमानस्य संयुगे ॥ २९
यथा च समरे कृष्णो रक्षते सर्वतोऽर्जुनम् ।
तथा त्वमपि राधेयं रक्षस्व च महारणे ॥' ३०
त्वया सारथिना ह्येष अप्रधृष्यो भविष्यति ।
देवतानामपि रणे सशक्राणां महीपते ।
किं पुनः पाण्डवेयानां मा विशङ्कीर्वचो मम ॥३१
सञ्जय उवाच ।
दुर्योधनवचः श्रुत्वा शल्यः क्रोधसमन्वितः ।
'धार्तराष्ट्रमथोवाच सृक्किणी परिलेलिहन् ॥' ३२
त्रिशिखां भ्रुकुटिं कृत्वा धुन्वन्हस्तौ पुनःपुनः ।
क्रोधरक्ते महानेत्रे परिवृत्य महाभुजः ।
कुलैश्वर्यश्रुतबलैर्दृप्तः शल्योऽब्रवीदिदम् ॥ ३३
शल्य उवाच ।
न मामर्हसि राजेन्द्र नियोक्तुं कर्मणीदृशे ।
न हि पापीयसः श्रेयान्प्रेष्यत्वं कर्तुमर्हति ॥ ३४
यो ह्यभ्युपगतं मित्रं गरीयांसं विशेषतः ।
वशे पापीयसो धत्ते तत्कार्यमधरोत्तरम् ॥ ३५
ब्रह्मणा ब्राह्मणाः सृष्टा मुखात्क्षत्रं च बाहुतः ।
ऊरुभ्यामथ वैश्या वै शूद्राः पद्भ्यामिति श्रुतिः ३६
तेभ्यो वर्णविशेषाश्च प्रतिलोमानुलोमजाः ।
अथान्योन्यस्य संयोगाच्चातुर्वर्ण्यस्य भारत ॥ ३७
गोप्तारः संगृहीतारो दातारः क्षत्रियाः स्मृताः ३८
याजनाध्यापनैर्विप्रा विशुद्धैश्च प्रतिग्रहैः ।
लोकस्यानुग्रहार्थाय स्थापिता ब्राह्मणा भुवि ॥३९
कृषिश्च पाशुपाल्यं च विशां दानं च धर्मतः ।
ब्रह्मक्षत्रविशां शूद्रा विहिताः परिचारकाः ॥ ४०
ब्रह्मक्षत्रस्य विहिताः सूता वै परिचारकाः ।
न क्षत्रियो वै सूतानां शृणुयाच्च कथंचन ॥ ४१
अहं मूर्धाभिषिक्तो हि राजर्षिकुलजो नृपः ।
महारथसमाख्यातः सेव्यः स्तुत्यश्च वन्दिनां ४२
सोऽहमेतादृशो भूत्वा नेहारिबलसूदनः ।
सूतपुत्रस्य संग्रामे सारथ्यं कर्तुमुत्सहे ॥ ४३
अवमन्यसे मां गान्धारे ध्रुवं चाप्यतिशङ्कसे ।
यस्माद्ब्रवीषि विस्रब्धः सारथ्यं क्रियतामिति ४४
अस्मत्तोऽभ्यधिकं कर्णं मन्वानस्तं प्रशंससि ।
न चाहं युधि राधेयं गणये तुल्यमात्मनः ॥ ४५
आदिश्यतामभ्यधिको ममांशः पृथिवीपते ।
तमहं समरे हत्वा गमिष्यामि यथागतम् ॥ ४६
अथवाप्येक एवाहं योत्स्यामि तव शत्रुभिः ।
पश्य वीर्यं ममाद्य त्वं सङ्ग्रामे दहतो रिपून् ॥ ४७
न चापि कामान्कौरव्य निधाय हृदये पुमान् ।
अस्मद्विधः प्रवर्तेत मा मा त्वमतिशङ्किथाः ॥ ४८
अपि चाप्यवमानो मे न कर्तव्यः कथंचन ।
पश्य भीमौ मम भुजौ वज्रसंहननौ दृढौ ॥ ४९
धनुः पश्य च मे चित्रं शरांश्चाशीविषोपमान् ।
रथं च पश्य मे चित्रं सदश्वैर्वातवेगिभिः ॥ ५०
गदां च पश्य गान्धारे हेमपट्टविभूषिताम् ।
दारयेयं महीं क्रुद्धो विकिरेयं च पर्वतान् ।
शोषयेयं समुद्रांश्च पातयेयं च भास्करम् ॥ ५१
तं मामेवंविधं राजन्समर्थमरिनिग्रहे ।
कस्माद्युनक्षि सारथ्ये सूतस्याधिरथेस्तु माम् ॥ ५२
न चापि मम राधेयः कलामर्हति षोडशीम् ॥ ५३
सकर्णा ये त्रयो लोकाः सार्जुनाः सजनार्दनाः ।
निबद्धांस्तान्रणे राजन्न गणेयं कथंचन ॥ ५४
न चाहं प्राकृतः कश्चिन्न चास्म्यधिगतः स्वयम् ।
अयं चाप्यवमानो मे न कर्तव्यः कथंचन ॥ ५५
आपृच्छे त्वाद्य गान्धारे यास्यामि विषयं प्रति ।
न चाहं सूतपुत्रस्य सारथ्यमुपजग्मिवान् ॥ ५६
अवमानमहं प्राप्य न योत्स्यामि कथंचन ।
आपृच्छे त्वाऽद्य गान्धारे गमिष्यामि गृहाय वै ५७
सञ्जय उवाच ।
एवमुक्त्वा महाराज शल्यः समितिशोभनः ।
उत्थाय प्रययौ तूर्णं राजमध्यादमर्षितः ॥ ५८
प्रणयाद्बहुमानाच्च तं निगृह्य सुतस्तव ।
अब्रवीन्मधुरं वाक्यं साम्ना सर्वार्थसाधकम् ॥ ५९
यथा शल्य त्वमात्थेदमेवमेतदसंशयम् ।

पापीयसः नीचयोनेः प्रेष्यत्व दासत्वम् ॥ ३४ ॥ न विदुःशूद्रस्य सयोग शृणु चान्य ममानघ इति क ख. पाठः ॥ ४१ ॥

अभिप्रायस्तु मे कश्चित्तं निबोध जनेश्वर ॥ ६०
न कर्णोऽभ्यधिकस्त्वत्तो न चान्ये चैव पार्थिवाः।
न च मद्रेश्वर त्वां वै कृष्णः सोढुं च शक्ष्यति ॥ ६१
ऋतमेव हि पूर्वास्ते वदन्ति पुरुषोत्तमाः।
तस्मादार्तायनिः प्रोक्तो भवानिति मतिर्मम ॥ ६२
शल्यभूतस्तु शत्रूणां यस्मात्त्वं युधि मानद।
तस्माच्छल्येति ते नाम कथ्यते पृथिवीतले ॥ ६३
यदेतद्व्याहृतं पूर्वं भवता भूरिदक्षिण।
तदेव कुरु धर्मज्ञ मदर्थं यद्यदुच्यते ॥ ६४
न च त्वत्तो हि राधेयो न चाहमपि वीर्यवान्।
वृणेऽहं त्वां हयाग्र्याणां यन्तारमिह संयुगे ॥ ६५
मन्ये चाभ्यधिकं शल्य गुणैः कर्णं धनंजयात्।
भवन्तं वासुदेवाच्च लोकोऽयमतिमन्यते ॥ ६६
कर्णो ह्यभ्यधिकः पार्थादस्त्रैरेव नरर्षभ।
भवानभ्यधिकः कृष्णादश्वज्ञाने बले तथा ॥ ६७
यथाऽश्वहृदयं वेद वासुदेवो महामनाः।
द्विगुणं त्वं तथा वेत्सि मद्रराजेश्वरात्मज ॥ ६८

शल्य उवाच।

यन्मां ब्रवीषि गान्धारे मध्ये सैन्यस्य कौरव।
विशिष्टं देवकीपुत्रात्प्रीतिमानस्म्यहं त्वयि ॥ ६९
एष सारथ्यमातिष्ठे राधेयस्य यशस्विनः।
युध्यतः पाण्डवाग्र्येण यथा त्वं वीर मन्यसे ॥ ७०
समयश्च हि मे वीर कश्चिद्वैकर्तनं प्रति।
उत्सृजेयं यथाश्रद्धमहं वाचोऽस्य सन्निधौ ॥ ७१

सञ्जय उवाच।

तथेति राजन्पुत्रस्ते सह कर्णेन भारत।
अब्रवीन्मद्रराजस्य मतं भरतसत्तम ॥ ७२

॥ इति श्रीमन्महाभारते कर्णपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः ॥ २४ ॥

दुर्योधनेन शल्यंप्रति त्रिपुरासुरकथाकथनारम्भः ॥ १ ॥ त्रिपुरासुरोपद्रुतैर्देवैः स्तुत्वा रुद्रप्रसादनम् ॥ २ ॥

दुर्योधन उवाच।

भूय एव तु मद्रेश यच्चा वक्ष्यामि तच्छृणु।
यथा पुरावृत्तमिदं युद्धे देवासुरे प्रभो ॥ १
यदुक्तवान्पितुर्मह्यं मार्कण्डेयो महातपाः।
ब्रुवतस्तदशेषेण मम राजर्षिसत्तम।
निबोध मनसा चात्र न ते कार्या विचारणा ॥ २
'समुत्पन्नो हि राजानः प्रमोह इति निश्चयम्।
कृत्वा चैव व्यवस्यन्ति सर्वे धर्मार्थनिश्चयान् ॥ ३
देवानामसुराणां च महानासीत्समुच्छ्रयः।
सैंहिकेयास्तदोद्धृत्ता विबुधानवसूदयन्।
ते निरस्ताः कृता देवैर्दानवा बलगर्विताः ॥' ४
तत्रासीत्प्रथमो राजन्संग्रामस्तारकामयः।
निर्जिताश्च ततो दैत्या दैवतैरिति नः श्रुतिः ॥ ५
भग्नदर्पा निरुत्साहाः पातालं विविशुस्तदा ॥ ६
निर्जितेषु च दैत्येषु तारकस्य सुतास्त्रयः।
ताराक्षः कमलाक्षश्च विद्युन्माली च पार्थिव ॥ ७
तप उग्रं समास्थाय नियमे परमे स्थिताः।
तपसा कर्शयामासुर्देहांस्तान्शत्रुकर्शनाः ॥ ८
दमेन तपसा चैव नियमेन समाधिना।
तेषां पितामहः प्रीतो वरदः प्रददौ वरम् ॥ ९
अवध्यत्वं च ते सर्वे सर्वभूतेषु सर्वदा।
सहिता वरयामासुः सर्वलोकपितामहम् ॥ १०
तानब्रवीत्तदा देवः सर्वलोकगुरुः प्रभुः।
नास्ति सर्वामरत्वं वै निवर्तध्वमितोऽसुराः।
अन्यं वरं वृणीध्वं वै रोचते यादृशो हि वः ॥ ११
ततस्ते सहिता राजन्संप्रधार्यासकृद्बहु।

ऋतमेव अयनं आश्रयो येषा ते ऋतायनास्तेषा गोत्रापत्यमार्तायनिस्त्वम् ॥ ६२ ॥ वाच उत्सृजेय ता अनेन क्षन्तव्या इति भावः ॥ ७१ ॥ त्रयोविंशोऽध्यायः ॥ २३ ॥

पितुः पुरतः। मह्य मम ॥ २ ॥ तारकामयः तारकासुर एवामयो रोगवत्परावहेतुर्यत्र स तथा ॥ ५ ॥

सर्वलोकेश्वरं वाक्यं प्रणम्यैनमथाऽब्रुवन् ॥ १२
वस्तुमिच्छाम नगरं कर्तुं कामगमं शुभम् ।
सर्वकामसमृद्धार्थमवध्यं देवदानवैः ॥ १३
यक्षरक्षोरगगणैर्नानाजातिभिरेव च ।
न कृत्याभिर्न शस्त्रैश्च न शापैर्ब्रह्मवादिनाम् ।
वध्येत त्रिपुरं देव प्रयच्छेः प्रपितामह ॥ १४
वयं पुराणि त्रीण्येव समास्थाय महीमिमाम् ।
विचरिष्याम लोकेऽस्मिंस्त्वत्प्रसादपुरस्कृताः॥१५
ततो वर्षसहस्रेषु समेष्यामः परस्परम् ।
एकीभावं गमिष्यन्ति पुराण्येतानि चानघ॥ १६
समागतानि चैतानि यो हन्याद्भगवांस्तदा ।
एकेषुणा देववरः स नो मृत्युर्भविष्यति ॥ १७
दुर्योधन उवाच ।
तेषां तद्वचनं श्रुत्वा दानवानां पितामहः ।
एवमस्त्विति तान्देवः प्रत्युक्त्वा प्राविशद्दिवम्१८
ते तु लब्धवराः प्रीताः संप्रधार्य परस्परम् ।
पुरत्रयविसृष्ट्यर्थं मयं वव्रुर्महारथाः ।
विश्वकर्माणमजरं दैत्यदानवपूजितम् ॥ १९
ततो मयः स्वतपसा चक्रे धीमान्पुराणि च ।
त्रीणि काञ्चनमेकं वै रौप्यं कार्ष्णायसं तथा॥ २०
काञ्चनं दिवि तत्रासीदन्तरिक्षे च राजतम् ।
आयसं चाभवद्भौमं तदा तेषां परंतप ॥ २१
एकैकं योजनशतं विस्तृतं तावदायतम् ।
दृढं चाट्टालकयुतं बृहत्प्राकारतोरणम् ॥ २२
गृहप्रवरसंबाधमसंबाधमहापथम् ।
प्रासादैर्विविधैश्चापि द्वारैश्चैवोपशोभितम् ॥ २३
त्रिपुरं तेषु चाप्यासन्राजानो वै पृथक्पृथक् ।
दिव्यमाल्याम्बरधरा दैतेया राजसत्तम ॥ २४
काञ्चनं तारकाक्षस्य दिव्यमासीन्महात्मनः ।
राजतं कमलाक्षस्य विद्युन्मालिन आयसम् ॥ २५
त्रयस्ते दैत्यराजानस्त्रींल्लोकानाशु तेजसा ।
आक्रम्य तस्थुरूचुश्च कश्च नाम प्रजापतिः ॥ २६
तेषां दानवमुख्यानां प्रयुतान्यर्बुदानि च ।
कोट्यश्चाप्रतिवीराणां समाजग्मुस्ततस्ततः ॥ २७
मांसाशिनः सुदृप्ताश्च सुरैर्विनिकृताः पुरा ।
महदैश्वर्यमिच्छन्तस्त्रिपुरं दुर्गमाश्रिताः ॥ २८
सर्वेषां च पुनश्चैषां सर्वयोगवहो मयः ।
तमाश्रित्य हि ते सर्वेऽवर्तयन्नकुतोभयाः ॥ २९
यो हि यं मनसा कामं दध्यौ त्रिपुरसंश्रयः ।
तस्मै तस्मै मयस्तं तं विदधे मायया तदा ॥ ३०
तारकाक्षसुतश्चासीद्धरिर्नाम महाबलः ।
तपस्तेपे परमकं येनातुष्यत्पितामहः ॥ ३१
संतुष्टमवृणोद्देवं वापी भवतु नः पुरे ।
शस्त्रैर्विनिहता यत्र क्षिप्ताः स्युर्बलवत्तराः ॥ ३२
स तु लब्ध्वा वरं वीरस्तारकाक्षसुतो हरिः ।
ससृजे तत्र वापीं तां मृतसंजीविनीं प्रभो ॥ ३३
येन रूपेण यो दैत्यो येन वेषेण चाप्यथ ।
क्षिप्यते निहतो वाप्यां तादृशेनैव जायते ।
संपूर्णबलवीर्यस्तु राजञ्छौर्यसमन्वितः ॥ ३४
एवं वीर्येण संयुक्तां कृतां तेन महात्मना ।
तां प्राप्य त्रैपुरा वापीं लोकान्सर्वान्बबाधिरे॥ ३५
महता तपसा सिद्धाः सुराणां भयवर्धनाः ।
एकस्मिन्निहते दैत्ये सृजन्ति स्म दशासुरान् ।
न तेषां विद्यते युद्धे क्षयो राजन्कथंचन ॥ ३६
ततस्ते लोभमोहाभ्यामभिभूता विचेतसः ।
निर्भीकाः सहिताः सर्वे स्थापिताः समलोलुपाः॥
विद्राव्य सगणान्देवांस्तत्रतत्र तदातदा ।
विचेरुः स्वेन कामेन वरदानेन दर्पिताः ॥ ३८
देवोद्यानानि सर्वाणि स्थानानि च दिवौकसाम् ।
ऋषीणामाश्रमान्पुण्यान्रम्याञ्जनपदांस्तथा ।
उत्सादयन्त मर्यादां दानवा दुष्टचारिणः ॥ ३९
निःस्थानाश्च कृता देवा ऋषयः पितृभिः सह ।
दैत्यैस्त्रिभिस्त्रयो लोका ह्याक्रान्तास्तैः सुरेतरैः ४०
पीड्यमानेषु लोकेषु ततः शक्रो मरुद्वृतः ।
पुराण्यायोधयांचक्रे वज्रहस्तः समन्ततः ॥ ४१
नाशकत्तान्यभेद्यानि यदा भेत्तुं पुरंदरः ।
पुराणि वरदत्तानि धात्रा तेन नराधिप ॥ ४२
तदा भीतः सुरपतिर्मुक्त्वा तानि पुराण्यथ ।
तैरेव विबुधैः सार्धं पितामहमरिंदम ।
जगामाथ तदाख्यातुं विप्रकारं सुरेतरैः ॥ ४३

ते तत्त्वं सर्वमाख्याय शिरोभिः संप्रणम्य च ।
तद्वधोपायमाचक्ष्व भगवन्निति चाब्रुवन् ॥ ४४
श्रुत्वा तद्भगवान्देवो देवानिदमुवाच ह ।
श्रूयतां त्रिदशाः सर्वे यथेदं वाक्यगौरवम् ॥ ४५
दुरात्मानोऽसुरा नित्यं ते चापि विबुधा मम ।
न शक्नुवन्ति ते (ये)सर्वे युष्मान्वै पीडयन्ति ते ४६
अहं समस्तु सर्वेषां भूतानां नात्र संशयः ।
अविनीता निहन्तव्या इत्येवं प्रब्रवीमि वः ॥ ४७
एकेषुणा (हि) विभेद्यानि तानि दुर्गाणि नान्यथा।
शक्तस्तु तानि बाणेन भेत्तुं कामं त्रिलोचनः ४८
ते यूयं स्थाणुमीशानं जिष्णुमक्लिष्टकारिणम् ।
योद्धारं वृणुत क्षिप्रं स तान्हन्ता सुरेतरान् ॥ ४९
ते देवास्तेन वाक्येन चोदिताः प्रणताः स्थिताः ।
दिव्यं वर्षसहस्रं वै तपस्तप्त्वा सुरर्षभाः ।
शुभात्मानो महात्मानो जग्मुर्वै वृषभध्वजम् ५०
ब्रह्माणमग्रतः कृत्वा शरण्यं शरणागताः ।
तपः परममाजग्मुर्गृणन्तो ब्रह्म शाश्वतम् ॥ ५१
अनङ्गमथनं सर्वे भवं सर्वात्मना गताः ।
देवदेवं परं स्थाणुं वरदं त्र्यम्बकं शिवम् ॥ ५२
शर्वमीड्यमजं रुद्रं शशाङ्काङ्कितमूर्धजम् ।
तुष्टुवुर्वाग्भिरुग्राभिर्भयेष्वभयमच्युतम् ।
सर्वात्मानं महात्मानं येनाप्तं विश्वमात्मना ॥५३
तपोविशेषैर्विविधैर्योगं यो वेद चात्मनः ।
यः साङ्ख्यमात्मना वेत्ति यस्य चात्मा वशे सदा ५४
तं ते ददृशुरीशानं तेजोराशिमुमापतिम् ।
'परेण यत्नेन भवं त्रिदशाः शर्वमीश्वरम् ।'
अनन्यसदृशं लोके प्रतपन्तमकल्मषम् ॥ ५५
एकश्च भगवांस्तत्र नानारूपमकल्पयत् ।
आत्मनः प्रतिरूपाणि रूपाण्यथ महात्मनि ।
परस्परस्य चापश्यन्सर्वे परमविस्मिताः ॥ ५६
सर्वभूतमयं दृष्ट्वा तमजं जगतः पतिम् ।
देवा ब्रह्मर्षयश्चैव शिरोभिर्धरणीं गताः ॥ ५७
तान्स्वस्तिवाच्य चाभ्यर्च्य समुत्थाप्य च शंकरः ।
ब्रूतब्रूतेति भगवान्स्मयमानोऽभ्यभाषत ॥ ५८
त्र्यम्बकेणाभ्यनुज्ञातास्ततस्ते स्वस्थचेतसः ।
नमो नमो नमस्तेऽस्तु प्रभो इत्यब्रुवन्भवम् ॥ ५९
नमो देवाधिदेवाय प्रियाधान्नेऽतिमन्यवे ।
प्रजापतिमखघ्नाय प्रजापतिभिरीड्यते ॥ ६०
नमः स्तुताय स्तुत्याय स्तूयमानाय शंभवे ।
विलोहिताय रुद्राय नीलग्रीवाय शूलिने ॥ ६१
अमोघाय मृगाक्षाय प्रवरायुधयोधिने ।
अर्हाय चैव शुद्धाय क्षयाय क्रथनाय च ॥ ६२
दुर्वारणाय शुक्राय ब्रह्मणे ब्रह्मचारिणे ।
ईशानायाप्रमेयाय निहन्त्रे चर्मवाससे ॥ ६३
तपोरताय पिङ्गाय व्रतिने कृत्तिवाससे ।
कुमारपित्रे त्र्यक्षाय प्रवरायुधधारिणे ॥ ६४
प्रपन्नार्तिविनाशाय ब्रह्मद्विट्सङ्घघातिने ।
वनस्पतीनां पतये वनानां पतये नमः ॥ ६५
गवां च पतये नित्यं यज्ञानां पतये नमः ।
नमोस्तु ते ससैन्याय त्र्यम्बकायामितौजसे ।
मनोवाक्कर्मभिर्देव त्वां प्रपन्नान्भजस्व नः ॥ ६६
ततः प्रसन्नो भगवान्स्वागतेनाभिनन्द्य च ।
प्रोवाच व्येतु वस्त्रासो ब्रूत किं करवाणि वः॥ ६७
'देवाः शर्वस्य वचनं श्रुत्वा हर्षमुपागताः ॥' ६८

॥ इति श्रीमन्महाभारते कर्णपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः ॥ २५ ॥

देवैः रुद्रवचनात्तस्य स्वस्यार्धबलदानपूर्वकं त्रिपुरसंहारायाभिषेचनम् ॥ १ ॥

दुर्योधन उवाच ।
पितृदेवर्षिसङ्घेभ्योऽभये दत्ते महात्मना ।
सत्कृत्य शंकरं प्राह ब्रह्मा लोकपितामहः ॥ १
इमान्यसुरदुर्गाणि लोकांस्त्रीनाक्रमन्ति हि ।

ईड्यते ईड्यमानाय । कर्मणीदमपौरुषम् ॥ ६० ॥ भजस्व इष्टैः कामैः पूरयस्व ॥ ६६ ॥ व्येतु व्यपगच्छतु ॥ ६८ ॥

चतुर्विंशोऽध्याय. ॥ २४ ॥

कश्च प्रजापतिर्घोरांस्तान्सर्वाञ्जहि मा चिरम् ॥ २
वरातिसर्गादेवेश प्राजापत्यमिदं परम् ।
मयाऽधितिष्ठता दत्तो दानवेभ्यो महान्वरः ॥ ३
नास्त्यन्यो युधि तेषां वै निहन्ता इति नः श्रुतम् ।
तानतिक्रान्तमर्यादान्नान्यः संहर्तुमर्हति ।
त्वामृते सर्वभूतेश त्वं ह्येषां प्रत्यरिर्विधे ॥ ४
स त्वं देव प्रपन्नानां याचतां च दिवौकसाम् ।
कुरु प्रसादं वरद दानवाञ्जहि संयुगे ॥ ५
त्वत्प्रसादाज्जगत्सर्वं सुखमैधत मानद ।
शरण्यस्त्वं हि देवानां वयं त्वां शरणं गताः ॥ ६
ईश्वर उवाच ।
हन्तव्याः शत्रवः सर्वे युष्माकमिति मे मतिः ।
न त्वेकश्चोत्सहे हन्तुं बलिनः सुरविद्विषः ॥ ७
ते यूयं सहिताः सर्वे मदीयेनापि तेजसा ।
जयध्वं युधि तान्सर्वान्संघातेन महाबलान् ॥ ८
देवा ऊचुः ।
अस्मत्तेजोबलं यावत्तावद्द्विगुणमेव वा ।
तत्तेषामिति मन्यामो दृष्टतेजोबला हि ते ॥ ९
ईश्वर उवाच ।
वध्यास्ते सर्वथा पापा ये युष्मास्वपराधिनः ।
मम तेजोबलार्धेन सर्वे मृद्नथ शात्रवान् ॥ १०
देवा ऊचुः ।
बिभर्तुं तव तेजोर्धं न शक्ष्याम सुरेश्वर ।
सर्वेषां नो बलार्धेन त्वमेव जहि शात्रवान् ॥ ११
वयं च सर्वथा देव रक्षणीयास्तथैव च ।
स नो रक्ष महादेव त्वमेव जहि शात्रवान् ॥ १२
ईश्वर उवाच ।
मम तेजो न शक्ता हि सर्वे धारयितुं यदि ।
अहमेनान्वधिष्यामि युष्मत्तेजोर्धसंयुतः ॥ १३
बलार्धं यदि मे देवा न धारयितुमाहवे ।
शक्ताः सर्वे हि संगम्य यूयं तत्प्रब्रवीमि वः ॥ १४
समा भवन्ति मे सर्वे दानवाश्चामराश्च ये ।
शिवोऽस्मि सर्वभूतानां शिवत्वं तेन मे सुराः ॥ १५
किंत्वधर्मेण वर्तन्ते यस्मात्ते सुरशत्रवः ।
तस्माद्वध्या मयाप्येते युष्माकं च हितेप्सया ॥ १६
शरणं वः प्रपन्नानां धर्मेण च जिगीषताम् ।
साहाय्यं वः करिष्यामि निहनिष्यामि वो रिपून् ॥
दीयतां च बलार्धं मे सर्वैरपि पृथक्पृथक् ।
पशुत्वं चैव मे लोकाः सर्वे कल्पन्तु पीडिताः ॥ १८
पशूनां तु पतित्वं मे भवत्वद्य दिवौकसः ।
एवं न पापं प्राप्स्यामि पशून्हत्वा सुरद्विषः ॥ १९
कल्पयध्वं रथं दिव्यं रथाश्वांश्चैव पारगान् ।
धनुः शरं सारथिं च ततो जेष्यामि वो रिपून् ॥ २०
इति श्रुत्वा वचो देवा देवदेवस्य भूपतेः ।
विषादमगमन्सर्वे पशुत्वं प्रति शङ्किताः ॥ २१
तेषां भावं भवो ज्ञात्वा देवस्तानब्रवीदिदम् ।
मा वोस्तु पशुभावेऽस्मिन्भयं विबुधसत्तमाः ॥ २२
श्रूयतां पशुभावस्य विमोक्षः क्रियतां च सः ॥ २३
यो वः पशुपतेश्चर्यां चरिष्यति स मोक्ष्यते ।
पशुत्वादिति सत्यं वः प्रतिजाने समागमे ॥ २४
ये चाप्यन्ये चरिष्यन्ति व्रतं मोक्ष्यन्ति तेऽपि च २५
नै(त्य)ष्ठिकं द्वादशाब्दं वा अर्धमब्दमृतुत्रयम् ।
मासं द्वादशरात्रं वा स पशुत्वाद्विमोक्ष्यते ।
तस्मात्परमिदं गुह्यं व्रतं दिव्यं चरिष्यथ ॥ २६
तं तथेत्यब्रुवन्देवा देवदेवनमस्कृतम् ।
ऊचुश्चेदं गृहाणेदं तेजसोऽर्धमिति प्रभुम् ॥ २७
प्रत्युवाच तथेत्येव शूलधृद्राजसत्तम ।
ततस्ते प्रददुः सर्वे तेजसोऽर्धं महात्मने ॥ २८
सर्वमादाय सर्वेषां तेजसोऽर्धं दिवौकसाम् ।
तेजसाप्यधिको भूत्वा भूयोऽप्यतिबलोऽभवत् २९
ततः प्रभृति देवानां देवदेवोऽभवद्भवः ।
पतिश्च सर्वभूतानां पशूनां चाभवत्तदा ॥ ३०
तस्मात्पशुपतिश्चोक्तो भवत्वाच्च भवेति वै ॥ ३१
अर्धमादाय सर्वेषां तेजसा प्रज्वलन्निव ।
भासयामास तान्सर्वान्देवदेवो महाद्युतिः ॥ ३२
ततोऽभिषिषिचुः सर्वे सुरा रुद्रं पुरारिणम् ।
महादेव इति ह्यासीद्देवदेवो महेश्वरः ॥ ३३

॥ इति श्रीमन्महाभारते कर्णपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः ॥ २६ ॥

देवानामाज्ञया विश्वकर्मणा भूम्यादिसाधनै रुद्राय रथनिर्माणम् ॥ १ ॥

दुर्योधन उवाच ।
तेजसोऽर्धं सुरा दत्त्वा शंकराय महात्मने ।
पशुत्वमपि चोपेत्य विश्वकर्माणमव्ययम् ॥ १
ऊचुः सर्वे समाभाष्य रथः संकल्प्यतामिति ।
विश्वकर्माऽपि संचिन्त्य रथं दिव्यमकल्पयत् ॥ २
समेतां पृथिवीं देवीं विशालां पुरमालिनीम् ।
सपर्वतवनद्वीपां चक्रे भूतधरां रथम् ॥ ३
ईषां नक्षत्रवंशं च छत्रं मेरुमहागिरिम् ।
अनेकद्रुमसंछन्नं रत्नाकरमनुत्तमम् ॥ ४
हिमवन्तं च विन्ध्यं च नानाद्रुमलताकुलम् ।
अवस्करं प्रतिष्ठानं कल्पयामास वै तदा ॥ ५
अस्तंगिरिमधिष्ठानं नानाद्विजगणायुतम् ।
चकार भगवांस्त्वष्टा उदयं रथकूबरम् ॥ ६
मीननक्रझषावासं दानवालयमुत्तमम् ।
समुद्रमक्षं विदधे पत्तनाकरशोभितम् ॥ ७
चक्रं चक्रे चन्द्रमसं तारकागणमण्डितम् ।
दिवाकरं चाप्यपरं चक्रं चक्रेऽशुमालिनम् ॥ ८
गङ्गां सरस्वतीं तूणीं चक्रे विश्वकृदव्ययः ।
अलंकारा रथस्यासन्नापगाः सरितस्तथा ॥ ९
त्रीनग्नीन्मन्त्रवच्चक्रे रथस्याथ त्रिवेणुकम् ।
अनुकर्षान्रथे दीप्तान्वरूथांश्चापि तारकाः ॥ १०
ओषधीर्वीरुधश्चैव घण्टाजालं च भानुमत् ।
अलंचकार च रथं मासपक्षर्तुभिर्विभुः ॥ ११
अहोरात्रैः कलाभिश्च काष्ठाभिरयनैस्तथा ।
द्यां युगं युगपर्वाणि संवर्तकबलाहकान् ॥ १२
शम्यां धृतिं च मेधां च स्थितिं सन्नतिमेव च ।
ऋग्वेदं सामवेदं च धुर्यावश्वावकल्पयत् ॥ १३
पृष्ठाश्वौ तु यजुर्वेदः कल्पितोऽथर्वणस्तथा ।
अश्वानां चाप्यलंकारं विदधे पदसंचयम् ॥ १४
सिनीवालीमनुमतिं कुहूं राकां च सुप्रभाम् ।
योक्त्राणि चक्रे चाश्वानां कूश्माण्डांश्चापि पन्नगान्
तालपृष्ठोऽथ नहुषः कार्कोटकधनंजयौ ।
इतरे चाभवन्नागा हयानां वाहबन्धनम् ॥ १६
अभीशवः षडङ्गानि कल्पितानि महीपते ।
ओंकारः कल्पितस्तस्य प्रतोदो विश्वकर्मणा ॥ १७
यज्ञाः सर्वे पृथक्कृत्वा रथाङ्गानि च भागशः ।
अधिष्ठानं मनश्चासीत्परिरथ्या सरस्वती ॥ १८
नानावर्णानि शस्त्राणि पताकाः पवनेरिताः ।
विद्युदिन्द्रधनुर्युक्तं रथं दीप्त्या व्यदीपयत् ॥ १९
वर्म योद्धुं च विहितं नभो ग्रहगणाकुलम् ।
अभेद्यं भानुमच्चित्रं कालचक्रपरिक्षतम् ॥ २०
एवमस्मिन्महाराज कल्पिते रथसत्तमे ।
त्वष्ट्रा मनुजशार्दूल द्विषतां भयवर्धने ॥ २१
स्वान्यायुधानि दिव्यानि न्यदधाच्छंकरो रथे ।
ध्वजयष्टिं वियत्कृत्वा स्थापयामास गोवृषम् ॥ २२
ब्रह्मदण्डः कालदण्डो रुद्रदण्डश्च ते ज्वराः ।
परिष्कारा रथस्यासन्समन्तादिशमुद्धताः ॥ २३
विचित्रमृतुभिः षड्भिः कृत्वा संवत्सरं धनुः ।
छायामेवात्मनश्चक्रे धनुर्ज्यामक्षयां ध्रुवाम् ॥ २४
कालो हि भगवान्रुद्रस्तच्च संवत्सरं धनुः ।
तस्माद्रौद्री कालरात्री ज्या कृता धनुषो जरा ॥ २५
ततो रथे रथाश्वांस्तानृषयः समयोजयन् ।
एकैकशः सुसंहृष्टानादाय सुधृतव्रताः ॥ २६
दक्षिणस्यां धुरि कृत ऋग्वेदो मन्त्रपारगैः ।
सव्यतः सामवेदश्च युक्तो राजन्महर्षिभिः ॥ २७
पार्ष्णिदक्षिणतो युक्तो यजुर्वेदः सुरद्विजैः ।
इतरस्यां तथा पार्ष्ण्यां युक्तो राजन्नथर्वणः ॥ २८
एवं ते वाजिनो युक्ता यज्ञविद्भिस्तथा रथे ।
अशोभन्त तथा युक्ता यथैवाध्वरमध्यगाः ॥ २९
कल्पयित्वा रथं दिव्यं ततो बाणमकल्पयत् ।
चिन्तयित्वा हरिं विष्णुमव्ययं यज्ञवाहनम् ॥ ३०
शरं संकल्पयांचक्रे विश्वकर्मा महामनाः ।
तस्य वाजांश्च पुङ्खं च कल्पयामास वै तदा ॥ ३१
पुण्यगन्धवहं राजञ्श्वसनं राजसत्तम ।

अग्नीषोमौ शरमुखे कल्पयामास वै तदा ॥ ३२
अग्नीषोमात्मकं कृत्स्नमुच्यते वैष्णवं जगत् ।
विष्णुरात्मा भगवतो भवस्यामिततेजसः ॥ ३३
तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे शरस्य वै ।
तस्मिञ्शरे तीक्ष्णमन्युममुञ्चद्दुःसहं प्रभुः ॥ ३४
भृग्वङ्गिरोमन्युभवः क्रोधाग्निरतिदुःसहः ।
स नीललोहितो धूम्रः कृत्तिवासा भयानकः ॥३५
आदित्यायुतसंकाशस्तेजोज्वालावृतो भवः ।
दुश्चर्यच्यावको जेता हन्ता ब्रह्मद्विषां वरः ॥ ३६
तस्याङ्गानि समाश्रित्य स्थितं विश्वमिदं जगत् ।
जङ्गमाजङ्गमं राजञ्छुभेऽद्भुतदर्शनम् ॥ ३७
दृष्ट्वा तु तं रथं दिव्यं कवची स शरासनी ।
आददे स शरं दिव्यं सोमविष्ण्वग्निवायुजम् ॥३८
तमादाय महादेवस्त्रासयन्दैत्यदानवान् ।
आरुरोह तदा यत्तः कम्पयन्निव रोदसी ॥ ३९
महर्षिभिः स्तूयमानो वन्द्यमानश्च वन्दिभिः ।
उपनृत्तश्चाप्सरसां गणैर्नृत्तविशारदैः ॥ ४०
स शोभमानो वरदः खड्गी बाणी शरासनी ।
हसन्निवाब्रवीद्देवः सारथिः को भवेदिति ॥ ४१

॥ इति श्रीमन्महाभारते कर्णपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः ॥ २७ ॥

देवानां प्रार्थनया ब्रह्मणा रुद्ररथसारथ्यकरणम् ॥ १ ॥ रुद्रेण त्रिपुरदहनम् ॥ २ ॥ दुर्योधनेन दृष्टान्तप्रदर्शनपूर्वकं शल्यंप्रति कर्णरथसारथ्यकरणप्रार्थना ॥ ३ ॥

दुर्योधन उवाच ।
तमब्रुवन्देवगणा यं भवान्संनियोक्ष्यते ।
स भविष्यति देवेश सारथिस्ते न संशयः ॥ १
तानब्रवीन्महादेवो मत्तः श्रेष्ठतरो हि यः ।
तं सारथिं कुरुध्वं वै स्वयं संचिन्त्य मा चिरम् ॥ २
एतच्छ्रुत्वा वचो देवाः सर्वे गत्वा पितामहम् ।
प्रणिपत्योचुरेकाग्राः प्रसाद्यैनं महर्षिभिः ॥ ३
त्वया यत्कथितं देव त्रिदशारिनिबर्हणे ।
तथा तत्कृतमस्माभिः प्रसन्नश्च वृषध्वजः ॥ ४
रथश्च विहितोऽस्माभिर्विचित्रायुधसंवृतः ।
सारथिं च न जानीमः कः स्यात्तस्मिन्रथोत्तमे ॥ ५
तस्माद्विधीयतां कश्चित्सारथिर्देवसत्तम ।
सफलां तां गिरं देव कर्तुमर्हसि नो विभो ।
एवमस्त्विति हि पुरा भगवन्नुक्तवानसि ॥ ६
सदैव युक्तो रथसत्तमो वै
दुराधर्षो द्रावणः शात्रवाणाम् ।
पिनाकधन्वा विहितोऽत्र योद्धा
विभीषयन्दानवानुद्यतोऽसौ ७
तथैव वेदाश्च हया रथाश्च
धरा सशैला च रथो महात्मनः ।
नक्षत्रवंशानुगतो वरूथी
यस्मिन्योद्धा सारथिनाऽभिरक्ष्यः ॥ ८
तत्र सारथिरेष्टव्यः सर्वैरेतैर्विशेषवान् ॥ ९
तं प्रविष्टा रथं देवा रथयोद्धारमेव च ।
कवचानि च शस्त्राणि कार्मुकं च पितामह ॥ १०
त्वामृते सारथिं तत्र नान्यं पश्यामहे वयम् ।
त्वं हि सर्वैर्गणैर्युक्तो देवताभ्योऽधिकः प्रभो ॥ ११
त्वं देव शक्तो लोकेश नियन्तुं प्रद्रुतानिमान् ।
वेदांश्च सोपनिषदः सारथिर्भव नः स्वयम् ॥ १२
योद्धुं बलेन वीर्येण सत्त्वेन विनयेन च ।
अधिकः सारथिः कार्यो नास्ति चान्योऽधिको भवात्
स भवांस्तारयत्वस्मान्कुरु सारथ्यमव्यय ।
भवानभ्यधिकस्त्वत्तो नान्योस्ति भविता क्वचित् १४
त्वं हि देवेश सर्वैस्तु विशिष्टो वदतां वर ।
तं रथं त्वं समारुह्य संयच्छ परमान्हयान् ॥ १५
तव प्रसादाद्ध्येयुर्देव दैवतकण्टकाः ।
स नो रक्ष महाबाहो दैत्येभ्यो महतो भयात् ॥१६
त्वं हि नो गतिरव्यग्र त्वं नो गोप्ता महाव्रत ।
त्वत्प्रसादात्सुराः सर्वे पूज्यन्ते त्रिदिवे प्रभो ॥ १७
इति ते शिरसाऽगच्छंस्त्रिलोकेशं पितामहम् ।

देवाः प्रसादयामासुः सारथ्यायेति नः श्रुतम् १८
ब्रह्मोवाच।
एवमेतत्सुरास्तथ्यं नान्यस्त्वभ्यधिको भवात्।
सारथित्वं करिष्यामि शंकरस्य महात्मनः॥ १९
सर्वथा रथिनः श्रेयान्कर्तव्यो रथसारथिः।
तस्मादेतद्यथातत्त्वं ज्ञात्वा युष्मांश्च संगतान्।
संयच्छामि हयानेष विबुधाय कपर्दिने॥ २०
दुर्योधन उवाच।
एवमुक्त्वा जटाभारं संयम्य प्रपितामहः।
परिधायाजिनं गाढं संन्यस्य च कमण्डलुम्।
प्रतोदपाणिर्भगवानारुरोह रथं तदा॥ २१
सारथौ कल्पिते देवैरीशानस्य महात्मनः।
तस्मिन्नारोहति रथं कल्पितं लोकसंभृतम्।
शिरोभिः पतिता भूमौ तुरगा वेदसंभृताः॥ २२
उभाभ्यां लोकनाथाभ्यामास्थितं रथसत्तमम्।
वोढुं न शक्ता वेदाश्वा जानुभ्यामपतन्महीम्॥ २३
अभीशुभिस्तु भगवानुद्यम्य च हयान्विभुः।
अस्तु वीर्यं च शौर्यं च वेदाश्वानामिति प्रभुः।
रथं संचोदयामास देवानां प्रभुरव्ययः॥ २४
ततोऽधिरूढे वरदे रथं पशुपतिस्तदा।
साधुसाध्विति देवेशं स्तूयमानोऽभ्यभाषत॥ २५
याहि देव यतो दैत्याश्चोदयाश्वानरिंदम।
पश्य बाह्वोर्बलं मेऽद्य निघ्नतः शात्रवान्रणे॥ २६
ततोऽश्वांश्चोदयामास मनोमारुतरंहसः।
पुराण्युद्दिश्य खस्थानि दानवानां तरस्विनाम्॥ २७
ततस्ते सहसोत्पत्य वेदाख्या रथवाजिनः।
क्षणेन तेन दैत्यानां पुराणि प्रापयन्हरम्॥ २८
अथर्वाङ्गिरसौ चास्तां चक्ररक्षौ महात्मनः।
अथाधिज्यं धनुः कृत्वा शर्वः संधाय तं शरम्।
युक्त्वा पाशुपतास्त्रेण त्रिपुरं समचिन्तयत्॥ २९
तस्मिन्स्थिते ततो राजन्रुद्रे सज्जितकार्मुके।
पुराणि तेन कालेन जग्मुरेकत्वमाशु वै॥ ३०
एकीभावं गते चैव त्रिपुरत्वमुपागते।
बभूव तुमुलो हर्षो देवतानां महात्मनाम्॥ ३१
ततो देवगुणाः सर्वे सिद्धाश्च परमर्षयः।
जयेति वाचो मुमुचुः संस्तुवन्तो महेश्वरम्॥ ३२
ततोऽग्रतः प्रादुरभूत्त्रिपुरं जघ्नुषोऽसुरान्।
अनिर्देश्याग्यवपुषो देवस्यासह्यतेजसः॥ ३३
त्रीणि दृष्ट्वैव संस्थानि पुराण्यथ पिनाकधृत्।
स तद्विकृष्य भगवान्दिव्यं लोकेश्वरो धनुः।
त्रैलोक्यसारं तमिषुं मुमोच त्रिपुरं प्रति॥ ३४
एकबाणेन तं देवस्त्रिपुरं परमेश्वरः।
निजघ्ने सासुरगणं देवदेवो महेश्वरः॥ ३५
बाणतेजोग्निदग्धं तद्विप्रकीर्णं सहस्रधा।
महदार्तस्वरं कृत्वा नावशेषमुपागतम्।
मद्रेश सासुरगणं प्रापतत्पश्चिमार्णवे॥ ३६
एवं हि त्रिपुरं दग्धं दानवाश्चाप्यशेषतः।
महेश्वरेण क्रुद्धेन त्रैलोक्यस्य हितैषिणा॥ ३७
स चात्मक्रोधजो वह्निर्देहेत्युक्तो निवारितः।
त्रैलोक्यमविशेषेण पुनर्दग्धुं प्रचक्रमे॥ ३८
कालाग्निमिव निर्दग्धुमुत्थितं तं पुनः पुनः।
माकार्षीर्भस्मसाल्लोकानिति त्र्यक्षोऽब्रवीद्वचः ३९
ततः प्रकृतिमापन्ना देवलोकास्तथर्षयः।
तुष्टुवुर्वाग्भिरम्याभिः स्थाणुं त्रिपुरवैरिणम्॥ ४०
तेऽनुज्ञाता भगवता सर्वे जग्मुर्यथागतम्।
कृतकामाः प्रसन्नेन प्रजापतिमुखाः सुराः॥ ४१
एवं रुद्रस्य कृतवान्सारथ्यं तु पितामहः।
संयच्छ तुरगानस्य राधेयस्य महात्मनः॥ ४२
त्वं हि कृष्णाच्च कर्णाच्च फल्गुनाच्च गुणाधिकः।
बलतो रूपतो योगादस्त्रसंपद एव च॥ ४३
समासक्तं महीपाल कुरु मे हितमीप्सितम्।
युद्धे ह्ययं रुद्रकल्पस्त्वं च ब्रह्मसमोऽनघ।
तस्माच्छक्तौ युवां जेतुं मच्छत्रून्दिवि वा सुरान्॥ ४४
स यथा शल्य कर्णोऽयं श्वेताश्वं कृष्णसारथिम्।
प्रमथ्य हन्यात्कौन्तेयं तथा नीतिर्विधीयताम्॥ ४५
त्वयि राज्यं सुखं चैव जीवितं जयमेव च।
समासक्तं महीपाल कुरु मे हितमीप्सितम्॥ ४६
संयच्छास्य हयान्राजन्मत्प्रियार्थं परंतप॥ ४७

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तविंशोऽध्यायः॥ २७॥

अष्टाविंशोऽध्यायः ॥ २८ ॥

दुर्योधनेन कर्णसारथ्ये शङ्कमानं शल्यंप्रति परशुरामचरित्रकीर्तनपूर्वकं कर्णस्य तदन्तेवासित्वादिगुणवत्तया तत्सारथ्यकरणे दोषाभावप्रतिपादनम् ॥ १ ॥

दुर्योधन उवाच ।
इमं चाप्यपरं भूय इतिहासं निबोध मे ।
पितुर्मम सकाशे वै ब्राह्मणः प्राह धर्मवित् ॥ १
श्रुत्वा चैतद्वचश्चित्रं हेतुकार्यार्थतत्त्ववित् ।
कुरु शल्य विनिश्चित्य मा भूदत्र विचारणा ॥ २
भार्गवाणां कुले जातो जमदग्निर्महातपाः ।
तस्य रामेति विख्यातः पुत्रस्तेजोगुणान्वितः ॥ ३
स तीव्रं तप आस्थाय संप्रसादितवान्भवम् ।
अस्त्रहेतोः प्रसन्नात्मा नियतः संयतेन्द्रियः ॥ ४
तस्मै तुष्टो महादेवो भक्त्या च प्रशमेन च ।
हृद्गतं चास्य विज्ञाय दर्शयामास शंकरः ।
प्रत्यक्षेण महादेवः स्वां तनुं सर्वशंकरः ॥ ५
शंकर उवाच ।
राम तुष्टोऽस्मि भद्रं ते विदितं तव चेप्सितम् ।
कुरुष्व पूतमात्मानं सर्वमेतदवाप्स्यसि ॥ ६
दास्यामि ते तदाऽस्त्राणि यदा पूतो भविष्यसि ।
अपात्रमसमर्थं च दहन्त्यस्त्राणि भार्गव ॥ ७
इत्युक्तो जामदग्न्यस्तु देवदेवेन शूलिना ।
प्रत्युवाच महात्मानं शिरसाऽवनतः प्रभुम् ॥ ८
यदा जानासि देवेश पात्रं मामस्त्रधारणे ।
तदा शुश्रूषतेऽस्त्राणि भवान्मे दातुमर्हति ॥ ९
ततः स तपसा चैव व्रतेन नियमेन च ।
पूजोपहारबलिभिर्होममन्त्रपुरस्कृतैः ॥ १०
समाराधितवाञ्शर्वं बहुवर्षगणांस्तदा ।
प्रसन्नश्च महादेवो भार्गवस्य महात्मनः ॥ ११
असकृच्चाब्रवीत्तस्य गुणान्देव्याः सकाशतः ।
भक्तिमानेष सततं मयि रामो दृढव्रतः ॥ १२
एवमस्य गुणान्प्रीतो बहुशो कथयद्विभुः ।
देवतानां पितॄणां च समक्षमरिसूदन ॥ १३
एतस्मिन्नेव काले तु दैत्या ह्यासन्महाबलाः ।
तैस्तदा दर्पमोहाद्वै अबाध्यन्त दिवौकसः ॥ १४
ततः संभूय विबुधास्तान्हन्तुं कृतनिश्चयाः ।
चक्रुः शत्रुवधे यत्नं दैत्याञ्जेतुमशक्नुवन् ॥ १५
अभिगम्य ततो देवा महेश्वरमुमापतिम् ।
प्रासादयंस्तदा भक्त्या जहि शत्रुगणानिति ॥ १६
प्रतिज्ञाय ततो देवो देवतानां रिपुक्षयम् ।
रामं भार्गवमाहूय सोऽभ्यभाषत शंकरः ॥ १७
रिपून्भार्गव देवानां जहि सर्वान्समागतान् ।
लोकानां हितकामार्थं मत्प्रियार्थं तथैव च ॥ १८
परशुराम उवाच ।
का शक्तिर्मम देवेश अकृतास्त्रस्य संयुगे ।
निहन्तुं दानवान्सर्वान्कृतास्त्रान्युद्धदुर्मदान् ॥ १९
ईश्वर उवाच ।
गच्छ त्वं मदनुज्ञानान्निहनिष्यसि शात्रवान् ।
विजित्य च रिपून्सर्वान्गुणान्प्राप्स्यसि पुष्कलान् ॥
दुर्योधन उवाच ।
एतच्छ्रुत्वा तु वचनं प्रतिगृह्य च सर्वशः ।
रामः कृतस्वस्त्ययनः प्रययौ दानवान्प्रति ॥ २१
ततोऽजयद्देवशत्रून्महादर्पबलान्वितान् ।
वज्राशनिसमस्पर्शैः प्रहारैरेव भार्गवः ॥ २२
स दानवैः क्षततनुर्जामदग्न्यो नृपोत्तम ।
संस्पृष्टः स्थाणुना सद्यो निर्व्रणः समपद्यत ॥ २३
प्रीतश्च भगवान्देवः कर्मणा तेन तस्य वै ।
वरान्प्रादाद्बहुविधान्भार्गवाय महात्मने ॥ २४
उक्तश्च प्रीतियुक्तेन देवदेवेन शूलिना ॥ २५
निपातात्तव शस्त्राणां शरीरे याऽभवद्रुजा ।
तया ते मानुषं कर्म व्यपोहं भृगुनन्दन ।
गृहाणास्त्राणि दिव्यानि मत्सकाशाद्यथेप्सितं २६
ततोऽस्त्राणि समग्राणि वरांश्च मनसेप्सितान् ।
लब्ध्वा बहुविधान्रामः प्रणम्य शिरसा शिवम् ।

नाशकुवन्निति नञ्यध्याहारेण योजना ॥ १५ ॥

अष्टाविंशोऽध्यायः ॥ २८ ॥

अनुज्ञां प्राप्य देवेशाज्जगाम स महातपाः ॥ २७
एवमेतत्पुरावृत्तं तथा कथितवानृषिः ॥ २८
भार्गवोऽपि ददौ सर्वं धनुर्वेदं महात्मने ।
कर्णाय पुरुषव्याघ्रः सुप्रीतेनान्तरात्मना ॥ २९
वृजिनं न भवेत्किंचिदस्य कर्णस्य पार्थिव ।
सूतेन वर्धितो नित्यं न सूतो नृप एव सः ॥ ३०
विशुद्धयोनिं विज्ञाय दिव्यान्यस्त्राण्यदाद्भृगुः ।
नापि सूतकुले जातं मन्ये कर्णं कथंचन ।
देवपुत्रमहं मन्ये क्षत्रियाणां कुलोद्भवम् ॥ ३१
विसृष्टमविबोधार्थं कुलस्येति मतिर्मम ।
सर्वथा न ह्यसौ शल्य कर्णः सूतकुलोद्भवः ॥ ३२
सकुण्डलं सकवचं दीर्घबाहुमरिंदमम् ।
कथमादित्यसंकाशं मृगी सिंहं प्रसूयते ॥ ३३
पश्य ह्यस्य भुजौ पीनौ नागराजकरोपमौ ।
वक्षः पश्य विशालं च सर्वशस्त्रसहं रणे ॥ ३४
न त्वेव प्राकृतः कश्चित्कर्णो वैकर्तनो वृषा ।
महात्मा ह्येष राजेन्द्र रामशिष्यः प्रतापवान् ॥ ३५

॥ इति श्रीमन्महाभारते कर्णपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः ॥ २९ ॥

दुर्योधनप्रार्थितेन शल्येन समयकरणपूर्वक कर्णरथसारथ्यस्वीकरणम् ॥ १ ॥

दुर्योधन उवाच ।
एवं स भगवान्देवः सर्वलोकपितामहः ।
सारथ्यमकरोत्तत्र ब्रह्मा रुद्रोऽभवद्रथी ॥ १
रथिनोऽभ्यधिको वीर कर्तव्यो रथसारथिः ।
तस्मात्त्वं पुरुषव्याघ्र नियच्छ तुरगान्युधि ॥ २
यथा देवगणैस्तत्र वृतो यत्नात्पितामहः ।
तथाऽस्माभिर्भवान्यत्नात्कर्णादभ्यधिको वृतः ॥ ३
यथा देवैर्महाराज ईश्वरादधिको वृतः ।
तथा भवानपि क्षिप्रं रुद्रस्येव पितामहः ।
नियच्छ तुरगान्युद्धे राधेयस्य महाद्युते ॥ ४
शल्य उवाच ।
मयाप्येतन्नरश्रेष्ठ बहुशो नरसिंहयोः ।
कथ्यमानं श्रुतं दिव्यमाख्यानमतिमानुषम् ॥ ५
यथा च चक्रे सारथ्यं भवस्य प्रपितामहः ।
यथाऽसुराश्च निहता इषुणैकेन भारत ॥ ६
कृष्णस्य चापि विदितं सर्वमेतत्पुरा ह्यभूत् ॥ ७
यथा पितामहो जज्ञे भगवान्सारथिस्तदा ।
अनागतमतिक्रान्तं वेद कृष्णोऽपि तत्त्वतः ॥ ८
एतदर्थं विदित्वाऽपि सारथ्यमुपजग्मिवान् ।
स्वयंभूरिव रुद्रस्य कृष्णः पार्थस्य भारत ॥ ९
यदि हन्याच्च कौन्तेयं सूतपुत्रः कथंचन ।
दृष्ट्वा पार्थं हि निहतं स्वयं योत्स्यति केशवः ॥ १०
शङ्खचक्रगदापाणिर्धक्ष्यते तव वाहिनीम् ।
न चापि तस्य क्रुद्धस्य वार्ष्णेयस्य महात्मनः ।
स्थास्यते प्रत्यनीकेषु कश्चिदत्र नृपस्तव ॥ ११
सञ्जय उवाच ।
तं तथा भाषमाणं तु मद्रराजमरिंदमः ।
प्रत्युवाच महाबाहुरदीनात्मा सुतस्तव ॥ १२
मावमंस्था महाबाहो कर्णं वैकर्तनं रणे ।
सर्वशस्त्रभृतां श्रेष्ठं सर्वशास्त्रार्थपारगम् ॥ १३
यस्य ज्यातलनिर्घोषं श्रुत्वा भयकरं महत् ।
पाण्डवेयानि सैन्यानि विद्रवन्ति दिशो दश ॥ १४
प्रत्यक्षं ते महाबाहो यथा रात्रौ घटोत्कचः ।
मायाशतानि कुर्वाणो हतो मायापुरस्कृतः ॥ १५
न चातिष्ठत बीभत्सुः प्रत्यनीके कथंचन ।
एतांश्च दिवसान्सर्वान्भयेन महता वृतः ॥ १६
भीमसेनश्च बलवान्धनुष्कोट्याभिचोदितः ।
उक्तश्च संज्ञया राजन्मूढ औदरिको यथा ॥ १७

नरसिंहयोः कृष्णार्जुनयो. । अतस्तयोः साम्य मम कीर्तिकरमेवेति भावः । सुरसिंहयोरिति पाठे रुद्रपितामहयो. ॥ ५ ॥

माद्रीपुत्रौ तथा शूरौ येन जित्वा महारणे ।
कमप्यर्थं पुरस्कृत्य न हतौ युधि मारिष ॥ १८
येन वृष्णिप्रवीरस्तु सात्यकिः सात्वतां वरः ।
निर्जित्य समरे शूरो विरथश्च बलात्कृतः ॥ १९
सृञ्जयाश्चेतरे सर्वे धृष्टद्युम्नपुरोगमाः ।
असकृन्निर्जिताः सङ्ख्ये स्रयमानेन संयुगे ॥ २०
तं कथं पाण्डवा युद्धे विजेष्यन्ति महारथम् ।
यो हन्यात्समरे क्रुद्धो वज्रहस्तं पुरंदरम् ॥ २१
त्वं च सर्वास्त्रविद्वीरः सर्वविद्यास्त्रपारगः ।
बाहुवीर्येण ते तुल्यः पृथिव्यां नास्ति कश्चन ॥ २२
त्वं शल्यभूतः शत्रूणामविषह्यः पराक्रमे ।
ततस्त्वमुच्यसे राजञ्शल्य इत्यरिसूदन ॥ २३
तव बाहुबलं प्राप्य न शेकुः सर्वसात्वताः ।
तव बाहुबलाद्राजन्किं नु कृष्णो बलाधिकः ॥ २४
यथा हि कृष्णेन बलं धार्यं वै फल्गुने हते ।
तथा कर्णात्ययीभावे त्वया धार्यं महद्बलम् ॥ २५
किमर्थं समरे सैन्यं वासुदेवो न्यवारयत् ।
किमर्थं च भवान्सैन्यं न हनिष्यति मारिष ॥ २६
त्वत्कृते पदवीं गन्तुमिच्छेयं युधि मारिष ।
सोदराणां च वीराणां सर्वेषां च महीक्षिताम् ॥ २७
शल्य उवाच ।
यन्मां ब्रवीषि गान्धारे अग्रे सैन्यस्य मानद ।
विशिष्टं देवकीपुत्रात्प्रीतिमानस्म्यहं त्वयि ॥ २८
एष सारथ्यमातिष्ठे राधेयस्य यशस्विनः ।
युध्यतः पाण्डवाग्र्येण यथा त्वं वीर मन्यसे ॥ २९
समयश्च हि मे वीर कश्चिद्वैकर्तनं प्रति ।
उत्सृजेयं यथाश्रद्धमहं वाचोऽस्य सन्निधौ ॥ ३०
सञ्जय उवाच ।
तथेति राजन्पुत्रस्ते सह कर्णेन मारिष ।
अब्रवीन्मद्रराजानं सर्वक्षत्रस्य सन्निधौ ॥ ३१
सारथ्यस्याभ्युपगमाच्छल्येनाश्वासितस्तदा ।
दुर्योधनस्तदा हृष्टः कर्णं तमभिषस्वजे ॥ ३२

अब्रवीच्च पुनः कर्णं स्तूयमानः सुतस्तव ।
जहि पार्थान्रणे सर्वान्महेन्द्रो दानवानिव ॥ ३३
स शल्येनाभ्युपगते हयानां संनियच्छने ।
कर्णो हृष्टमना भूयो दुर्योधनमभाषत ॥ ३४
नातिहृष्टमना ह्येष मद्रराजोऽभिभाषते ।
राजन्मधुरया वाचा पुनरेनं ब्रवीहि वै ॥ ३५
ततो राजा महाप्राज्ञः सर्वास्त्रकुशलो बली ।
दुर्योधनोऽब्रवीच्छल्यं मद्रराजं महीपतिम् ॥ ३६
पूरयन्निव घोषेण मेघगम्भीरया गिरा ।
शल्य कर्णोऽर्जुनेनाद्य योद्धव्यमिति मन्यते ॥ ३७
तस्य त्वं पुरुषव्याघ्र नियच्छ तुरगान्युधि ।
कर्णो हत्वेतरान्सर्वान्फल्गुनं हन्तुमिच्छति ।
तस्याभीषुग्रहे राजन्प्रयाचे त्वां पुनः पुनः ॥ ३८
पार्थस्य सचिवः कृष्णो यथाऽभीषुग्रहो वरः ।
तथा त्वमपि राधेयं सर्वतः परिपालय ॥ ३९
सञ्जय उवाच ।
ततः शल्यः परिष्वज्य सुतं ते वाक्यमब्रवीत् ।
दुर्योधनमभित्रघ्नं प्रीतो मद्राधिपस्तदा ॥ ४०
शल्य उवाच ।
एवं चेन्मन्यसे राजन्गान्धारे प्रियदर्शन ।
तस्मात्ते यत्प्रियं किंचित्तत्सर्वं करवाण्यहम् ॥ ४१
यत्रास्मि भरतश्रेष्ठ योग्यः कर्मणि कर्हिचित् ।
तत्र सर्वात्मना युक्तो वक्ष्ये कार्यं परंतप ॥ ४२
यत्तु कर्णमहं ब्रूयां हितकामः प्रियाप्रिये ।
मम तत्क्षमतां सर्वं भवान्कर्णश्च सर्वशः ॥ ४३
कर्ण उवाच ।
ईशानस्य यथा ब्रह्मा यथा पार्थस्य केशवः ।
तथा नित्यं हिते युक्तो मद्रराज भवस्व नः ॥ ४४
शल्य उवाच ।
आत्मनिन्दात्मपूजा च परनिन्दा परस्तवः ।
अनाचरितमार्याणां वृत्तमेतच्चतुर्विधम् ॥ ४५
यत्तु विद्वन्प्रवक्ष्यामि प्रत्ययार्थमहं तव ।

किमर्थमिति । सारथ्यमात्र प्रतिज्ञाय प्रातिभव्य चेत्कृष्ण कुर्यात्तर्हि त्व युध्यन् तद्वन्मिथ्याप्रतिज्ञो न भविष्यसीति भावः ॥ २६ ॥ पदवीमानृण्यम् ॥ २७ ॥ वक्ष्ये वोढास्मि ॥ ४२ ॥

आत्म निन्दापरस्तवावपि श्रेयसा निन्द्यौ किमुतात्मपूजापरनिन्दे। तदुभयमह करोमीति भावः ॥ ४५ ॥

आत्मनः स्तवसंयुक्तं तन्निबोध यथातथम् ॥ ४६
अहं शक्रस्य सारथ्ये योग्यो मातलिवत्प्रभो ।
अप्रमादात्प्रयोगाच्च ज्ञानविद्याचिकित्सनैः ४७
ततः पार्थेन संग्रामे युध्यमानस्य तेऽनघ ।
वाहयिष्यामि तुरगान्विज्वरो भव सूतज ॥ ४८

॥ इति श्रीमन्महाभारते कर्णपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः ॥ ३० ॥

शल्येन सारथीभूयाधिष्ठितं रथमधिष्ठाय कर्णस्य रणाय निर्याणम् ॥ १ ॥

दुर्योधन उवाच ।
अयं ते कर्ण सारथ्यं मद्रराजः करिष्यति ।
कृष्णादभ्यधिको यन्ता देवेशस्येव मातलिः ॥ १
यथा हरिहयैर्युक्तं संगृह्णाति स मातलिः ।
शल्यस्तथा तवाद्यायं संयन्ता रथवाजिनाम् ॥ २
योधे त्वयि रथस्थे च मद्रराजे च सारथौ ।
रथश्रेष्ठो ध्रुवं सङ्ख्ये पार्थानभिभविष्यति ॥ ३
सञ्जय उवाच ।
ततो दुर्योधनो भूयो मद्रराजं तरस्विनम् ।
उवाच राजन्संग्रामेऽभ्युषिते पर्युपस्थिते ॥ ४
कर्णस्य यच्छ संग्रामे मद्रराज हयोत्तमान् ।
त्वयाऽभिगुप्तो राधेयो विजेष्यति धनंजयम् ॥ ५
इत्युक्तो रथमास्थाय तथेति प्राह भारत ।
शल्येऽभ्युपगते कर्णः सारथिं सुमनाऽब्रवीत् ॥ ६
त्वं सूत स्यन्दनं मह्यं कल्पयेत्यसकृत्त्वरन् ॥ ७
ततो जैत्रं रथवरं गन्धर्वनगरोपमम् ।
विधिवत्कल्पितं भद्रं जयेत्युक्त्वा न्यवेदयत् ॥८
तं रथं रथिनां श्रेष्ठः कर्णोऽभ्यर्च्य यथाविधि ।
संपादितं ब्रह्मविदा पूर्वमेव पुरोधसा ॥ ९
कृत्वा प्रदक्षिणं यत्नादुपस्थाय च भास्करम् ।
समीपस्थं मद्रराजमारोह त्वमथाब्रवीत् ॥ १०
ततः कर्णस्य दुर्धर्षं स्यन्दनप्रवरं महत् ।
आरुरोह महातेजाः शल्यः सिंह इवाचलम् ११
ततः शल्याश्रितं दृष्ट्वा कर्णः स्वं रथमुत्तमम् ।
अभ्यतिष्ठद्यथाऽम्भोदं विद्युत्वन्तं दिवाकरः ॥१२
तावेकरथमारूढावादित्याग्निसमत्विषौ ।
अभ्राजेतां यथा मेघं सूर्याग्नी सहितौ दिवि १३
संस्तूयमानौ तौ वीरौ तदास्तां द्युतिमत्तमौ ।
ऋत्विक्सदस्यैरिन्द्राग्नी स्तूयमानाविवाध्वरे ॥१४
स शल्यसंगृहीताश्वे रथे कर्णः स्थितो बभौ ।
धनुर्विष्फारयन्घोरं परिवेषीव भास्करः ॥ १५
आस्थितः स रथश्रेष्ठं कर्णः शरगभस्तिमान् ।
प्रबभौ पुरुषव्याघ्रो मन्दरस्थ इवांशुमान् ॥ १६
तं रथस्थं महाबाहुं युद्धायामिततेजसम् ।
दुर्योधनस्तु राधेयमिदं वचनमब्रवीत् ॥ १७
अकृतं द्रोणभीष्माभ्यां दुष्करं कर्म संयुगे ।
कुरुष्वाधिरथे वीर मिषतां सर्वधन्विनाम् ॥ १८
मनोगतं मम ह्यासीद्भीष्मद्रोणौ महारथौ ।
अर्जुनं भीमसेनं च निहन्तारावितिं ध्रुवम् ॥ १९
ताभ्यां यदकृतं वीर वीरकर्म महामृधे ।
तत्कर्म कुरु राधेय वज्रपाणिरिवापरः ॥ २०
गृहाण धर्मराजं वा जहि वा त्वं धनंजयम् ।
भीमसेनं च राधेय माद्रीपुत्रौ यमावपि ॥ २१
जयश्च तेऽस्तु भद्रं ते प्रयाहि पुरुषर्षभ ।
पाण्डुपुत्रस्य सैन्यानि कुरु सर्वाणि भस्मसात् ॥ २२
ततस्तूर्यसहस्राणि भेरीणामयुतानि च ।
वाद्यमानान्यरोचन्त मेघशब्दो यथा दिवि ॥ २३
प्रतिगृह्य तु तद्वाक्यं रथस्थो रथसत्तमः ।

अप्रमादोऽवधानम् । प्रयोगोऽश्वप्रेरणम् । ज्ञानमागामिदोषावेक्षणम् । विद्या तत्परिहारज्ञानम् । चिकित्सन दोषपरिहारसामर्थ्यम् ॥ ४७ ॥ एकोनत्रिंशोऽध्याय. ॥ २९ ॥

हरिहयैरिन्द्रतुरगैर्युक्त रथम् ॥ २ ॥ अभ्युषिते प्रात.काले ॥ ४ ॥ त्रिंशोऽध्यायः ॥ ३० ॥

अभ्यभाषत राधेयः शल्यं युद्धविशारदम् ॥ २४
चोदयाश्वान्महाबाहो यावद्धन्मि धनंजयम् ।
भीमसेनं यमौ चोभौ राजानं च युधिष्ठिरम् ॥ २५
अद्य पश्यतु मे शल्य बाहुवीर्यं धनंजयः ।
अस्यतः कङ्कपत्त्राणां सहस्राणि शतानि च ॥ २६
अद्य क्षेप्स्याम्यहं शल्य शरान्परमतेजनान् ।
पाण्डवानां विनाशाय दुर्योधनजयाय च ॥ २७
सञ्जय उवाच ।
एतच्छ्रुत्वा वचस्तस्य शल्यः कर्णं वचोऽब्रवीत् ।
कथं नु तान्महावीर्यान्पाण्डवानवमन्यसे ॥ २८
सर्वास्त्रज्ञान्महेष्वासान्सर्वानेव महाबलान् ।
अनिवर्तिनो महाभागानजय्यान्सत्यविक्रमान् ।
अपि सञ्जनयेयुर्ये भयं साक्षाच्छतक्रतोः ॥ २९
यदा श्रोष्यसि निर्घोषं विस्फूर्जितमिवाशनेः ।
राधेय पार्थधनुषस्तदा नैवं वदिष्यसि ॥ ३०
यदा द्रक्ष्यसि भीमेन कुञ्जरानीकमाहवे ।
विशीर्णदन्तं निहतं तदा नैवं वदिष्यसि ॥ ३१
यदा द्रक्ष्यसि संग्रामे धर्मपुत्रं यमौ तथा ।
शितैः पृषत्कैः कुर्वाणानभ्रच्छायामिवाम्बरे ॥ ३२
अस्यतः क्षिप्वतश्चारीँल्लघुहस्तान्दुरासदान् ।
पार्थिवानपि चान्यांस्त्वं तदा नैवं वदिष्यसि ॥ ३३
सञ्जय उवाच ।
अनादृत्य तु तद्वाक्यं मद्रराजेन भाषितम् ।
द्रक्ष्यस्यद्येत्यवोचत्तं शल्यं कर्णो जनेश्वर ॥ ३४

॥ इति श्रीमन्महाभारते कर्णपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः ॥ ३१ ॥

कर्णस्य रणप्रयाणकाले दुर्निमित्तप्रादुर्भावः ॥ १ ॥ कर्णेनात्मश्लाघनपूर्वकं पार्थवधे प्रतिज्ञाते तदसहमानेन शल्येनार्जुनप्रशंसनपूर्वकं कर्णोपालम्भः ॥ २ ॥

सञ्जय उवाच ।
दृष्ट्वा कर्णं महावीर्यं युयुत्सुं समवस्थितम् ।
चुक्रुशुः कुरवः सर्वे हृष्टरूपाः समन्ततः ॥ १
ततो दुन्दुभिनिर्घोषैर्भेरीणां निनदेन च ।
कोणशब्दैश्च विविधैर्गर्जितैश्च तरस्विनाम् ।
निर्ययुस्तावकाः सर्वे मृत्युं कृत्वा निवर्तनम् ॥ २
प्रयाते तु ततः कर्णे रथेषु मुदितेषु च ।
चचाल च मही सर्वा ररास च सुविस्वरम् ॥ ३
निःसरन्तो व्यदृश्यन्त सूर्यात्सप्त महाग्रहाः ॥ ४
उल्कापाताश्च संजज्ञुर्दिग्दाहाश्चैव दारुणाः ।
तथाऽशन्यश्च संपेतुर्ववुर्वाताश्च भैरवाः ॥ ५
मृगपक्षिगणाश्चैव पृतनां बहुशस्तव ।
अपसव्यं तदा चक्रुर्वेदयन्तो महाभयम् ॥ ६
प्रस्थितस्य च कर्णस्य निपेतुस्तुरगा भुवि ।
अस्रिवर्षं च पतितमन्तरिक्षाद्ध्वयानकम् ॥ ७
जज्वलुश्चैव शस्त्राणि ध्वजाश्चैव चकम्पिरे ।
अश्रूणि च व्यमुञ्चन्त वाहनानि विशांपते ॥ ८
एते चान्ये च बहव उत्पातास्तत्र मारिष ।
समुत्पेतुर्विनाशाय कौरवाणां सुदारुणाः ॥ ९
न च तान्गणयामासुः सर्वे दैवेन मोहिताः ।
प्रस्थितं सूतपुत्रं च जयेत्यूचुर्नराधिपाः ॥ १०
'शल्येन सहितं दृष्ट्वा कर्णमाहवशोभिनम् ।'
निर्जितान्पाण्डवांश्चैव मेनिरे तत्र कौरवाः ॥ ११

ततो रथस्थः परवीरहन्ता
भीष्मद्रोणावतिवीर्यौ समीक्ष्य ।
समुज्वलन्भास्करपावकाभो
वैकर्तनोऽसौ रथकुञ्जरो वृषा ॥ १२

तरस्विनामश्वादीनाम् ॥ २ ॥ ररास शब्दं चकार ॥ ३ ॥ निःसरन्तो युद्धार्थमिति शेषः । सूर्यात्सूर्यमारभ्य । सूर्यादयोऽन्योन्यं युध्यन्तीत्यर्थः ॥ ४ ॥ भीष्मद्रोणौ अतिक्रान्तवीर्यौ ययोस्तावतिवीर्यौ समीक्ष्य स्वकृत्यमालोच्य जगादेत्युत्तरेणान्वयः ॥ १२ ॥

स शल्यमाभाष्य जगाद वाक्यं
पार्थस्य दृष्ट्वाऽप्रतिमं च कर्म ।
मानेन दर्पेण विदह्यमानः
क्रोधेन दीप्यन्निव निःश्वसंश्च ॥ १३
नाहं महेन्द्रादपि वज्रपाणेः
क्रुद्धाद्बिभेम्यात्तधनू रथस्थः ।
दृष्ट्वाऽपि भीष्मप्रमुखाञ्शयाना-
न्नत्वेव मां सा स्थिरता जहाति ॥ १४
महेन्द्रविष्णुप्रतिमावनिन्दितौ
रथाश्वनागप्रवरप्रमाथिनौ ।
अवध्यकल्पौ निहतौ यदा परै-
स्तथापि मे नास्ति रणेऽद्य साध्वसम् ॥ १५
समीक्ष्य सङ्ख्येऽतिबलान्नराधिपान्
ससूतमातङ्गरथान्परैर्हतान् ।
कथं न सर्वानहितान्रणेऽवधी-
न्महास्त्रविद्ब्राह्मणपुङ्गवो गुरुः ॥ १६
स संस्मरन्द्रोणमहं महाहवे
ब्रवीमि सत्यं कुरवो निबोधत ।
न वो मदन्यः प्रसहेद्रणेऽर्जुनं
समागतं मृत्युमिवोग्ररूपिणम् ॥ १७
शिक्षा प्रसादश्च बलं धृतिश्च
द्रोणे महास्त्राणि च संनतिश्च ।
स चेदगान्मृत्युवशं महात्मा
सर्वाननन्यानातुरानद्य मन्ये ॥ १८
नेह ध्रुवं किंचिदपि प्रचिन्तयन्
वदामि लोके कर्मणो नित्ययोगात् ।
सूर्योदये को हि विमुक्तसंशयो
भावं कुर्वीताद्य गुरौ निपातिते ॥ १९
न नूनमस्त्राणि बलं पराक्रमः
क्रियाः सुनीतं परमायुधानि वा ।
अलं मनुष्यस्य सुखाय वर्तितुं
तथाहि युद्धे निहतः परैर्गुरुः ॥ २०
हुताशनादित्यसमानतेजसं
पराक्रमे विष्णुपुरंदरोपमम् ॥
नये बृहस्पत्युशनःसमं सदा
न चैनमस्त्रं तदुपास्त दुःसहम् ॥ २१
संप्राक्रुष्टे रुदितस्त्रीकुमारे
पराभूते पौरुषे धार्तराष्ट्रे ।
कृत्यं मया नाद्य जानामि शल्य
प्रयाहि तस्माद्विषतामनीकम् ॥ २२
स यत्र राजा पाण्डवः सत्यसन्धो
व्यवस्थितो भीमसेनार्जुनौ च ।
स वासुदेवः सात्यकिः सृञ्जयाश्च
यमौ च कस्तान्विषहेन्मदन्यः ॥ २३
तस्मात्क्षिप्रं मद्रपते प्रयाहि
रणे पाञ्चालान्पाण्डवान्सृञ्जयांश्च ।
तान्वा हनिष्यामि समेत्य सङ्ख्ये
यास्यामि वा द्रोणमुखो यमाय ॥ २४
न त्वेवाहं न गमिष्यामि मध्ये
तेषां शूराणामिति शल्याद्य विद्धि ।
मित्रद्रोहो मर्षणीयो न मेऽयं
त्यक्त्वा प्राणाननुयास्यामि द्रोणम् ॥ २५
प्राज्ञस्य मूढस्य च जीवितान्ते
नास्ति प्रमोक्षोऽन्तकसन्निभस्य ।
अतो विद्वन्नभियोत्स्यामि पार्थै
दिष्टं न शक्यं व्यतिवर्तितुं वै ॥ २६
कल्याणवृत्तः सततं हि राजा
वैचित्रवीर्यस्य सुतो ममासीत् ।
तस्यार्थसिद्ध्यर्थमहं त्यजामि
प्रियान्भोगान्दुस्त्यजं जीवितं च ॥ २७

आभाष्य सबोध्य ॥ १३ ॥ आतुरान् आसन्नमृत्यून् ॥ १८ ॥ भाव श्रेोऽहं स्यास्यामीति निश्चयम् ॥१९॥ अस्त्रादीनि मनुष्यस्य सुखाय वर्तितु नालमिति सबन्ध ॥ २० ॥ उपास्त उपातिष्ठत । त्रातुमिति शेषः । अस्त्र अस्त्रादि ॥ २१ ॥ तेषां भीष्मादीना मध्ये न गमिष्यामीति न अपितु गमिष्याम्येवेत्यर्थ. । सग्रामात्पलायने हि मित्रस्य दुर्योधनस्य द्रोह कृत स्यात्तच्चासह्यम् ॥ २५ ॥ जीवितान्ते आयुषः समाप्तौ । प्रमोक्षो मृत्युनिवर्तनम् ॥ २६ ॥

वैयाघ्रचर्माणमकूजनाक्षं
हैमं त्रिकोशं रजतत्रिवेणुम् ।
रथप्रवर्हं तुरगप्रवर्है-
र्युक्तं प्रादान्मह्यमिमं हि रामः ॥ २८
धनूंषि चित्राणि निरीक्ष्य शल्य
ध्वजान्गदाः सायकांश्चोग्ररूपान् ।
असिं च दीप्तं परमायुधं च
शङ्खं च शुभ्रं स्तनवन्तमुग्रम् ॥ २९
पताकिनं वज्रनिपातनिःस्वनं
सिताश्वयुक्तं शुभतूणशोभितम् ।
इमं समास्थाय रथर्षभं रणे
दृढं हनिष्याम्यहमर्जुनं बलात् ॥ ३०
तं चेन्मृत्युः सर्वहरोऽभिरक्षे-
त्सदाऽप्रमत्तः समरे पाण्डुपुत्रम् ।
तं वा हनिष्यामि रणे समेत्य
यास्यामि वा द्रोणमुखो यमाय ॥ ३१
यमवरुणकुबेरवासवा वा
यदि युगपत्सगणा महाहवे ।
जुगुपुरिह समेत्य फल्गुनं
किमु बहुना सह तैर्जयामि तम् ॥ ३२

सञ्जय उवाच ।

इति रणरभसस्य कत्थत-
स्तदुपनिशम्य वचः स मद्रराट् ।
अवहसदवमन्य वीर्यवान्
प्रतिषिषिधे च जगाद चोत्तरम् ॥ ३३

शल्य उवाच ।

विरम विरम कर्ण कत्थना-
दतिरभसोऽप्यतिवाचमुक्तवान् ।
क्व च हि नरवरो धनंजयः
क्व पुनरिह त्वमहो नराधमः ॥ ३४
यदुसदनमुपेन्द्रपालितं
त्रिदिवमिवामरराजरक्षितम् ।
प्रसभमतिविलोड्य को हरे-
त्पुरुषवरावरजामृतेऽर्जुनात् ॥ ३५
त्रिभुवनसृजमीश्वरेश्वरं
क इह पुमान्भवमाह्वयेद्युधि ।
मृगवधकलहे ऋतेऽर्जुनात्
सुरपतिवीर्यसमप्रभावतः ॥ ३६
असुरसुरमहोरगान्नरान्
गरुडपिशाचसयक्षराक्षसान् ।
इषुभिरजयदग्निगौरवात्
स्वभिलषितं च हविर्ददौ जयः ॥ ३७
स्मरसि ननु यदा परैर्हृतः
सहधृतराष्ट्रसुतो विमोक्षितः ।
अधिरथज नरोत्तमैर्युतान्
कुरुषु बहून्विनिहत्य तानरीन् ॥ ३८
प्रथममपि पलायिते त्वयि
प्रियकलहा धृतराष्ट्रसूनवः ।
स्मरसि ननु यदा प्रमोचिताः
खचरगणानवजित्य पाण्डवैः ॥ ३९
समुदितबलवाहनाः पुनः
पुरुषवरेण जिताः स्थ गोग्रहे ।
सगुरुगुरुसुताः सभीष्मकाः
किमु न जितः स तदा त्वयाऽर्जुनः ॥ ४०
इदमपरमुपस्थितं पुन-
स्तव निधनाय सुयुद्धमद्य वै ।
यदि न रिपुभयात्पलायसे
समरगतोऽद्य हतोऽसि सूतज ॥ ४१

सञ्जय उवाच ।

इति बहुपरुषं प्रभाषति
प्रमनसि मद्रपतौ रिपुस्तवम् ।
भृशमभिरुषितः परंतपः
कुरुपृतनापतिराह मद्रपम् ॥ ४२

वैयाघ्रचर्माणि व्याघ्रचर्मपरिवृतम् ॥ २८ ॥ रणरभसस्य रणोत्कटस्य ॥ ३३ ॥ अतिरभसोऽपि त्व अतिवाच स्वसामर्थ्यादधिकाम् ॥ ३४ ॥ पुरुषवरस्य कृष्णस्यावरजा कनीयसीं सुभद्राम् ॥ ३५ ॥ खचरगणान् गन्धर्वान् ॥ ३९ ॥

कर्ण उवाच।
भवतु भवतु किं विकत्थसे
ननु मम तस्य हि युद्धमुद्यतम्।
यदि स जयति मामिहाहवे
तत इदमस्तु सुकत्थितं तव ॥ ४३

सञ्जय उवाच।
एवमस्त्विति मद्रेश उक्त्वा नोत्तरमुक्तवान्।
याहि शल्येति चाप्येनं कर्णः प्राह युयुत्सया ४४
स रथः प्रययौ शत्रून्निघ्नतः शल्यसारथिः।
निघ्नन्नमित्रान्समरे तमोघ्नः सविता यथा ॥ ४५
ततः प्रायात्प्रीतिमान्वै रथेन
वैयाघ्रेण श्वेतयुजाऽथ कर्णः।
स चालोक्य ध्वजिनीं पाण्डवानां
धनंजयं त्वरया पर्यपृच्छत् ॥ ४६

॥ इति श्रीमन्महाभारते कर्णपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः ॥ ३२ ॥

कर्णेन स्वस्यार्जुनप्रदर्शकाय तदभिमतपारितोषिकप्रदानप्रतिज्ञानम् ॥ १ ॥

सञ्जय उवाच।
प्रयत्नेन तदा कर्णो हर्षयन्वाहिनीं तव।
एकैकं समरे दृष्ट्वा पाण्डवं पर्यपृच्छत ॥ १
यो ममाद्य महात्मानं दर्शयेच्छ्वेतवाहनम्।
तस्मै दद्यामभिप्रेतं धनं यन्मनसेच्छति ॥ २
न चेत्तदभिमन्येत तस्मै दद्यामहं पुनः।
शकटं रत्नसंपूर्णं यो मे ब्रूयाद्धनञ्जयम् ॥ ३
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान्।
शतं दद्यां गवां तस्मै नैत्यकं कांस्यदोहनम् ॥ ४
शतं ग्रामवरांश्चैव दद्यामर्जुनदर्शिने।
तथा तस्मै पुनर्दद्यां श्वेतमश्वतरीरथम्।
युक्तमञ्जनकेशीभिर्यो मे ब्रूयाद्धनञ्जयम् ॥ ५
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान्।
अन्यं वाऽस्मै पुनर्दद्यां सौवर्णं हस्तिषङ्गवम् ॥ ६
तथाप्यस्मै पुनर्दद्यां स्त्रीणां शतमलंकृतम्।
श्यामानां निष्ककण्ठीनां गीतवाद्यविपश्चिताम्॥७
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान्।
तस्मै दद्यां शतं नागाञ्शतं ग्रामाञ्शतं रथान् ॥८
सुवर्णस्य च मुख्यस्य हयाख्याणां शतं शतान्।
ऋद्ध्या गुणैः सुदान्तांश्च धुर्यवाहान्सुशिक्षितान् ९
तथा सुवर्णशृङ्गीणां गोधेनूनां चतुःशतम्।
दद्यां तस्मै सवत्सानां यो मे ब्रूयाद्धनञ्जयम् ॥१०
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान्।
अन्यदस्मै वरं दद्यां श्वेतान्पञ्चशतान्हयान् ॥ ११
हेमभाण्डपरिच्छन्नान्सुमृष्टमणिभूषणान्।
सुदान्तानपि चैवाहं दद्यामष्टादशापरान् ॥ १२
रथं च शुभ्रं सौवर्णं दद्यां तस्मै स्वलंकृतम्।
युक्तं परमकाम्भोजैर्यो मे ब्रूयाद्धनञ्जयम् ॥ १३
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान्।
अन्यदस्मै वरं दद्यां कुञ्जराणां शतानि षट् ॥ १४
काञ्चनैर्विविधैर्भाण्डैराच्छन्नान्हेममालिनः।
उत्पन्नानपरान्तेषु विनीतान्हस्तिशिक्षकैः ॥ १५
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान्।
अन्यदस्मै वरं दद्यां वैश्यग्रामांश्चतुर्दश ॥ १६

श्वेतयुजा श्वेताश्वयुजा ॥ ४६ ॥ एकत्रिंशोऽध्यायः ॥ ३१ ॥

अभिमन्येत अल्पमित्यवजानीत ॥ ३ ॥ अञ्जनकेशीभिः कृष्णकेशीभिरश्वतरीभिर्युवतीभिर्वा युक्तम् ॥ ५ ॥ हस्तिषङ्गव हस्तिषङ्कम् षट्त्वे षङ्गवजित्यनेन षङ्गवच्प्रत्ययः। हस्तिषङ्गवमिच्छन्ति वीराः षड्के च दन्तिनामिति प्राच्यः। अन्य वा सौवर्णरथमिति शेषः। हस्तितुल्याः षड् गाव उक्षाणो यस्मिन् तम्। षट्हस्तिन एव गोवत् वोढारो यस्य तादृशम् ॥ ६ ॥ श्यामानामप्रजातानाम्। निष्कमुरोभूषणम् ॥ ७ ॥ शतशतान्दशसहस्राणि। ऋद्ध्या पुष्ट्या। सुदान्तान् विनीतान्। धुर्यवाहान् रथोद्वहनक्षमान् ॥ ९ ॥ भाण्डमाभरणम् ॥ १२ ॥ अपरान्तेषु पश्चिमकच्छेषु ॥ १५ ॥

सुस्फीतान्धनसंयुक्तान्प्रत्यासन्नवनोदकान् ।
अकुतोभयान्सुसंपन्नान्राजभोज्यांश्चतुर्दश ॥ १७
दासीनां निष्ककण्ठीनां मागधीनां शतं तथा ।
प्रत्यग्रवयसां दद्यां यो मे ब्रूयाद्धनञ्जयम् ॥ १८
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ।
अन्यं तस्मै वरं दद्यां यमसौ कामयेत्स्वयम् ॥ १९
पुत्रदारान्विहायैव यदन्यद्वित्तमस्ति मे ।
तच्च तस्मै पुनर्दद्यां यच्च मनसेच्छति ॥ २०
हत्वा च सहितौ कृष्णौ तयोर्वित्तानि सर्वशः ।
तस्मै दद्यामहं यो मे प्रब्रूयात्केशवार्जुनौ ॥ २१
सञ्जय उवाच ।
एता वाचः सुबहुशः कर्ण उच्चारयन्युधि ।
दध्मौ सागरसंभूतं सुस्वरं शङ्खमुत्तमम् ॥ २२
ता वाचः सूतपुत्रस्य तथा युक्ता निशम्य तु ।
दुर्योधनो महाराज संहृष्टः सानुजोऽभवत् ॥ २३
ततो दुन्दुभिनिर्घोषो मृदङ्गानां च सर्वशः ।
सिंहनादः सवादित्रः कुञ्जराणां च निःस्वनः ॥ २४
प्रादुरासीत्तदा राजंस्त्वत्सैन्ये पुरुषर्षभ ।
योधानां संप्रहृष्टानां तथा समभवत्स्वनः ॥ २५
तथा प्रहृष्टे सैन्ये तं प्लवमानं महारथम् ।
विकत्थमानं च तदा राधेयमरिकर्शनम् ।
मद्रराजः प्रहस्येदं वचनं प्रत्यभाषत ॥ २६

॥ इति श्रीमन्महाभारते कर्णपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

कर्णगर्वोक्तिमसहमानेन शल्येन तद्गर्हणम् ॥ १ ॥

शल्य उवाच ।
मा सूतपुत्र मन्येथाः सौवर्णं हस्तिषङ्गवम् ।
प्रयच्छसि मुधैव त्वं द्रक्ष्यस्यद्य धनञ्जयम् ॥ १
मा सूतपुत्र दानेन सौवर्णं हस्तिषङ्गवम् ।
प्रयच्छ पुरुषायाद्य द्रक्ष्यसि त्वं धनञ्जयम् ॥ २
बलेन मत्तस्त्यजसि वसु वैश्रवणो यथा ।
अयत्नेनैव राधेय द्रष्टास्यद्य धनञ्जयम् ॥ ३
पुरा सृजसि यच्चापि वित्तं बहु च मूढवत् ।
अपात्रदानाद्ये दोषास्तान्मोहान्नावबुध्यसे ॥ ४
यत्प्रवेदयसे वित्तं बहु तेन खलु त्वया ।
शक्यं बहुविधैर्यज्ञैर्यष्टुं सूत यजस्व तैः ॥ ५
यच्च प्रार्थयसे हन्तुं कृष्णौ मोहाद्वृथैव तत् ।
न हि शुश्रुम संमर्दे क्रोष्टा सिंहौ निपातितौ ॥ ६
अप्रार्थितं प्रार्थयसे सुहृदो न हि सन्ति ते ।
ये त्वां निवारयन्त्याशु प्रपतन्तं हुताशने ॥ ७
कार्याकार्यं न जानीषे कालपक्वोऽस्यसंशयम् ।
बह्वबद्धमकर्णीयं को हि ब्रूयाज्जिजीविषुः ॥ ८
समुद्रतरणं दोर्भ्यां कण्ठे बद्ध्वा यथा शिलाम् ।
गिर्यग्राद्वा निपतनं तादृक्तव चिकीर्षितम् ॥ ९
सहितः सर्वयोधैस्त्वं व्यूढानीकैः सुरक्षितः ।
धनञ्जयेन युध्यस्व श्रेयश्चेत्प्राप्तुमिच्छसि ॥ १०
हितार्थं धार्तराष्ट्रस्य ब्रवीमि त्वां न हिंसया ।
श्रद्धत्स्वेदं मया प्रोक्तं यदि तेऽस्ति जिजीविषा ॥ ११
कर्ण उवाच ।
स्वबाहुवीर्यमाश्रित्य प्रार्थयाम्यर्जुनं रणे ।
त्वं तु मित्रमुखः शत्रुर्मा भीषयितुमिच्छसि ॥ १२
न मामस्मादभिप्रायात्कश्चिदद्य निवर्तयेत् ।
अपीन्द्रो वज्रमुद्यम्य किमु मर्त्यः कथंचन ॥ १३
सञ्जय उवाच ।
इति कर्णस्य वाक्यान्ते शल्यः प्राहोत्तरं वचः ।
चुकोपयिषुरत्यर्थं कर्णं मद्रेश्वरः पुनः ॥ १४
यदा वै त्वां फल्गुनबाहुवेगा-
ज्ज्याचोदिता वेगवन्तोऽग्निकल्पाः ।

प्रत्यग्रवयसामभिनवयौवनानाम् ॥ १८ ॥ प्लवमानं प्रयान्तम् ॥ २६ ॥ द्वात्रिंशोऽध्यायः ॥ ३२ ॥

वसु वित्तम् । द्रष्टासि द्रक्ष्यसि ॥ ३ ॥ अबद्ध अनर्थकम् । अकर्णीयं अनाकर्णनीयम् ॥ ८ ॥ सहितो युध्यस्व नत्वेकाकी ॥ १० ॥

अन्वेतारः कङ्कपत्राः शिताग्रा-
स्त्यक्ष्यत्येषा त्वां तदा कर्ण बुद्धिः॥ १५
यदा दिव्यं धनुरादाय पार्थः
प्रतापयन्पृतनां सव्यसाची।
त्वां मर्दयिष्यत्यसुखैः पृषत्कै-
स्तदापृच्छां त्यक्ष्यसे पाण्डवस्य॥ १६
बालश्चन्द्रं मातुरङ्के शयानो
यथा कश्चित्प्रार्थयतेऽपहर्तुम्।
तद्वन्मोहाद्द्योतमानं रथस्थं
जेतुं पार्थं काङ्क्षसे सूतपुत्र॥ १७
हरादस्त्रं तीक्ष्णधारं यथाऽद्य
सर्वाणि गात्राणि निकर्षसि त्वम्।
सुतीक्ष्णशस्त्रोपमकर्मणेह
युयुत्ससे फल्गुनेनाद्य कर्ण॥ १८
हन्यादसिं तीक्ष्णधारं यथाऽतः
सुतेजनं निहितं वै पृथिव्याम्।
तथा खनस्यद्य शितान्पृषत्का-
न्यथार्थयस्यर्जुनेनेह युद्धम्॥ १९
त्रिशूलमाश्लिष्य सुतीक्ष्णधारं
सर्वाणि गात्राणि विघर्षसि त्वम्।
सुतीक्ष्णधारोपमकर्मणा त्वं
युयुत्ससे योऽर्जुनेनाद्य कर्ण॥ २०
क्रुद्धं सिंहं केसरिणं बृहन्तं
बालो मूढः क्षुद्रमृगस्तरस्वी।
समाह्वयेद्धृष्टमुपेत्य योद्धुं
तथा त्वमद्याह्वयसे हि पार्थम्॥ २१
मा सूतपुत्राह्वय राजपुत्रं
महावीर्यं केसरिणं यथैव।
वने शृगालः पिशितेन तृप्तः
पार्थं समासाद्य विनङ्क्ष्यसि त्वम्॥ २२
ईषादन्तं महानागं प्रभिन्नकरटामुखम्।
शशको ह्वयसे युद्धे कर्ण पार्थं धनञ्जयम्॥ २३
बिलस्थं कृष्णसर्पं त्वं बाल्यात्काष्ठेन विध्यसि।
महाविषं पूर्णकोपं यत्पार्थं योद्धुमिच्छसि॥ २४
सिंहं केसरिणं क्रुद्धमभिक्रम्याभिनर्दसे।
शृगाल इव मूढस्त्वं नृसिंहं कर्ण पाण्डवम्॥ २५
सुपर्णं पतगश्रेष्ठं वैनतेयं तरस्विनम्।
खगेवाह्वयसे पार्थं तथा कर्णं धनञ्जयम्॥ २६
सर्वाम्भसां निधिं भीमं मूर्तिमन्तं झषाकुलम्।
चन्द्रोदये विवर्धन्तमप्लवस्त्वं तितीर्षसि॥ २७
ऋषभं दुन्दुभिग्रीवं तीक्ष्णशृङ्गं प्रहारिणम्।
वत्स आह्वयसे युद्धे कर्ण पार्थं धनञ्जयम्॥ २८
महामेघं महाघोषं दर्दुरः प्रतिनर्दसि।
बाणतोयप्रदं काले नरपर्जन्यमर्जुनम्॥ २९
यथा च श्वा गृहस्थस्तु व्याघ्रं वनगतं भषेत्।
तथा त्वं भषसे कर्ण नरव्याघ्रं धनञ्जयम्॥ ३०
शृगालो हि वने कर्ण शशैः परिवृतो वसन्।
मन्यते सिंहमात्मानं यावत्सिंहं न पश्यति॥ ३१
तथा त्वमपि राधेय सिंहमात्मानमिच्छसि।
अपश्यञ्शत्रुदमनं नरसिंहं रणेऽर्जुनम्॥ ३२
व्याघ्रं त्वं मन्यसेऽऽत्मानं यावत्कृष्णौ न पश्यसि।
समास्थितावेकरथे सूर्याचन्द्रमसाविव॥ ३३
यावद्गाण्डीवघोषं त्वं न शृणोषि महाहवे।
तावदेव त्वया कर्ण शक्यं वक्तुं यथेच्छसि॥ ३४
रथशङ्खधनुःशब्दैर्नादयन्तं दिशो दश।
नर्दन्तमिव शार्दूलं दृष्ट्वा क्रोष्टा भविष्यसि॥ ३५
नित्यमेव शृगालस्त्वं नित्यं सिंहो धनञ्जयः।
वीरप्रद्वेषणान्मूढ तस्मात्क्रोष्टेव लक्ष्यसे॥ ३६
यथाऽऽखुः स्याद्बिडालश्च श्वा व्याघ्रश्च बलाबले।
यथा शृगालः सिंहश्च यथा च शशकुञ्जरौ॥ ३७
यथाऽनृतं च सत्यं च यथा चापि विषामृते।
तथा त्वमपि पार्थश्च प्रख्यातावात्मकर्मभिः॥ ३८

॥ इति श्रीमन्महाभारते कर्णपर्वणि त्रयस्त्रिंशोऽध्यायः॥ ३३॥

झषैर्मीनैराकुलं पूर्णम्। अप्लवः बाहुभ्यामित्यर्थः॥ २७॥ दुन्दु-भिग्रीव दुन्दुभिस्वनकण्ठम्॥ २८॥ त्रयस्त्रिंशोऽध्यायः॥ ३३॥

चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

कर्णेन मर्मोद्घाटनपूर्वकं शल्यगर्हणम् ॥ १ ॥

सञ्जय उवाच ।
अधिक्षिप्तस्तु गाधेयः शल्येनामिततेजसा ।
शल्यमाह सुसंक्रुद्धो वाक्शल्यमवधारयन् ॥ १
कर्ण उवाच ।
गुणान्गुणवतां शल्य गुणवान्वेत्ति नागुणः ।
त्वं तु नित्यं गुणैर्हीनः किं ज्ञास्यसि गुणागुणान्॥२
अर्जुनस्य महास्त्राणि क्रोधं वीर्यं धनुः शरान् ।
अहं शल्याभिजानामि न त्वं जानासि तत्तथा॥ ३
तथा कृष्णस्य माहात्म्यमृषभस्य महीक्षिताम् ।
यथाहं शल्य जानामि न त्वं जानासि तत्तथा ॥ ४
एवमेवात्मनो वीर्यमहं वीर्यं च पाण्डवे ।
जानंस्तावाहवे युद्धे शल्य नाग्निं पतङ्गवत् ॥ ५
अस्ति चाऽयमिषुः शल्य सुपुङ्खो रक्तभोजनः ।
एकस्तूणीशयः पत्री सुधौतः समलङ्कृतः ॥ ६
शेते चन्दनचूर्णेन पूजितो बहुलाः समाः ।
आहेयो विषवानुग्रो नराश्वद्विपसङ्घहा ॥ ७
घोररूपो महारौद्रस्तनुत्रास्थिविदारणः ।
निर्भिन्द्यां येन रुष्टोऽहमपि मेरुं महागिरिम् ॥८
तमहं जातु नास्येयमन्यस्मिन्फल्गुनादृते ।
कृष्णाद्वा देवकीपुत्रात्सत्यं चापि शृणुष्व मे॥ ९
तेनाहमिषुणा शल्य वासुदेवधनंजयौ ।
योत्स्ये परमसंरब्धौ तत्कर्म सदृशं मम ॥ १०
सर्वेषां वृष्णिवीराणां कृष्णे लक्ष्मीः प्रतिष्ठिता।
सर्वेषां पाण्डुपुत्राणां जयः पार्थे प्रतिष्ठितः ।
उभयं तु समासाद्य को निवर्तितुमर्हति ॥ ११
तावेतौ पुरुषव्याघ्रौ समेतौ स्यन्दने स्थितौ ।
मामेकमभिसंयुद्धौ सुजातं पश्य शल्य मे॥ १२
पितृष्वसामातुलजौ भ्रातरावपराजितौ ।
मणी सूत्र इव प्रोतौ द्रष्टासि निहतौ मया॥ १३
अर्जुने गाण्डिवं कृष्णे चक्रं तार्क्ष्यकपिध्वजौ ।
भीरूणां त्रासजननं शल्य हर्षकरं मम ॥ १४
त्वं तु दुष्प्रकृतिर्मूढो महायुद्धेष्वकोविदः ।
भयावदीर्णः संत्रासादबद्धं बहु भाषसे ॥ १५
संस्तौषि तौ तु केनापि हेतुना त्वं कुदेशज ।
तौ हत्वा समरे हन्ता त्वामद्य सह बान्धवम् ॥१६
पापदेशज दुर्बुद्धे क्षुद्र क्षत्रियपांसन ।
सुहृद्रूपो रिपुः किं मां कृष्णाभ्यां भीषयिष्यसि १७
तौ वा मामद्य हन्तारौ हनिष्ये वाऽपि तावहम् ।
नाहं बिभेमि कृष्णाभ्यां विजानन्नात्मनो बलम् १८
वासुदेवसहस्रं वा फल्गुनानां शतानि वा ।
अहमेको हनिष्यामि जोषमास्स्व कुदेशज ॥ १९
स्त्रियो बालाश्च वृद्धाश्च प्रायः क्रीडागता जनाः२०
या गाथाः संप्रगायन्ति कुर्वतोऽध्ययनं यथा ।
ता गाथाः शृणु मे शल्य मद्रकेषु दुरात्मसु ॥२१
ब्राह्मणैः कथिताः पूर्वं यथावद्राजसन्निधौ ।
श्रुत्वा चैकमना मूढ मम वा ब्रूहि चोत्तरम् ॥२२
मित्रध्रुङ्मद्रको नित्यं यो नो द्वेष्टि स मद्रकः ।
मद्रके संगतं नास्ति क्षुद्रवाक्ये नराधमे ॥ २३
दुरात्मा मद्रको नित्यं नित्यमानृतिकोऽनृजुः ।
यच्चान्यदपि दौरात्म्यं मद्रकेष्विति नः श्रुतम्॥२४
पिता पुत्रश्च माता च श्वश्रूश्वशुरमातुलाः ।
भगिनी दुहिता भ्राता नप्ताऽन्ये ते च बान्धवाः२५
वयस्याभ्यागताश्चान्ये दासीदासाश्च संगताः ।
पुंभिर्विमिश्रा नार्यश्च ज्ञाताज्ञाताः स्वयेच्छया॥२६
येषां गृहेष्वशिष्टानां सक्तुमद्याशिनां सदा ।
पीत्वा शीधु सगोमांसं क्रन्दन्ति च हसन्ति च॥२७

आहेयः सर्पमयः ॥ ७ ॥ नास्येयं न क्षिपेयम् ॥ ९ ॥ सुजातं शोभनं जन्म ॥ १२ ॥ प्रोतौ एकसूत्रे मणीइव प्रेमसबद्धौ ॥ १३ ॥ जोष तूष्णीम् । आस्स्व तिष्ठ ॥ १९ ॥ क्रीडागताः लीलया आगताः ॥ २० ॥ मद्रकेषु कुत्सितेषु मद्रदेशेषु ॥ २१ ॥ क्षम वा ब्रूहि चोत्तरम् इति झ. पाठः ॥ २२ ॥ अनृतेन चरतीत्यानृतिकः ॥ २४ ॥ पुंभिः पुरुषैः विमिश्राः सगताः । इच्छया मैथुनिनोऽज्ञातवत् ज्ञाता अप्यविगीता इत्यर्थः ॥ २६ ॥ येषां मद्रकाणां सक्तुमिश्रितम-

गायन्ति चाप्यबद्धानि प्रवर्तन्ते च कामतः ।
कामप्रलापिनोऽन्योन्यं तेषु धर्मः कथं भवेत् ॥ २८
मद्रकेष्ववलिप्तेषु प्रख्याताशुभकर्मसु ।
नापि वैरं न सौहार्दं मद्रकेण समाचरेत् ॥ २९
मद्रके संगतं नास्ति मद्रको हि सदा मलः ।
मद्रकेषु च संसृष्टं शौचं गान्धारकेषु च ॥ ३०
राजयाजकयाज्ये हि यथा दत्तं हविर्नशेत् ।
शूद्रसंस्कारको विप्रो यथा याति पराभवम् ॥३१
यथा ब्रह्मद्विषो नित्यं गच्छन्तीह पराभवम् ।
यथैव संगतं कृत्वा नरः पतति मद्रकैः ॥ ३२
बालेष्वपि सदा न स्म धनं वृश्चिक ते विषम् ।
आथर्वणेन मन्त्रेण सर्वशान्तिः कृता मया ॥ ३३
इति वृश्चिकदष्टस्य विषवेगहतस्य च ।
कुर्वन्ति भेषजं प्राज्ञाः सत्यं तच्चापि दृश्यते ॥ ३४
एवं विद्वञ्जोषमास्स्व ब्रूहि चात्रोत्तरं वचः ।
वासांस्युत्सृज्य नृत्यन्ति स्त्रियो मद्यविमोहिताः ॥
मैथुनेऽसंगताश्चापि यथाकामवराश्च ताः ।
तासां पुत्र कथं धर्मं मद्रको वक्तुमर्हति ॥ ३६
यास्तिष्ठन्त्यः प्रमेहन्ति यथैवोष्ट्रदशेरकाः ।
तासां विभ्रष्टधर्माणां निर्लज्जानां ततस्ततः ।
त्वं पुत्रस्तादृशीनां हि धर्मं वक्तुमिहेच्छसि ॥ ३७
सौवीरकं याच्यमाना मद्रिका कर्षति स्फिचौ ।
अदातुकामा वचनमिदं वदति दारुणम् ॥ ३८
मा मां सौवीरकं कश्चिद्याचतां दयितं मम ।
पुत्रं दद्यां पतिं दद्यां न तु दद्यां सुवीरकम् ॥३९
गौर्यो बृहत्यो निर्ह्रीका मद्रिकाः कम्बलावृताः ।
घस्मरा नष्टशौचाश्च प्राय इत्यनुशुश्रुम ॥ ४०
प्रमेहित्वा स्फिचौ भूमौ घर्षन्त्यो हीनशोधनाः ।
शुद्धा नाद्भिर्न मृद्भिश्च नित्योच्छिष्टा भवन्ति हि ४१
एवमादि मयाऽन्यैर्वा शक्यं वक्तुं भवेद्बहु ।
आकेशान्तान्नखाग्राच्च वक्तव्येषु कुकर्मसु ॥ ४२
मद्रकाः सिन्धुसौवीरा धर्मं विद्युः कथं त्विह ।
पापदेशोद्भवा म्लेच्छा धर्माणामविचक्षणाः ॥४३
एष मुख्यतमो धर्मः क्षत्रियस्येति नः श्रुतम् ।
यदाजौ निहतः शेते सद्भिः समभिपूजितः ॥४४
आयुधानां सांपराये यन्मुञ्चेयमहं ततः ।
ममैष प्रथमः कल्पो निधने स्वर्गमिच्छतः ॥४५
सोयं प्रियसखा चासि धार्तराष्ट्रस्य धीमतः ।
तदर्थे हि मम प्राणा यच्च मे विद्यते वसु ॥ ४६
व्यक्तं त्वमप्युपहितः पाण्डवैः पापदेशज ।
यथा चामित्रवत्सर्वं त्वमस्मासु प्रवर्तसे ॥ ४७
कामं न खलु शक्योऽहं त्वद्विधानां शतैरपि ।
संग्रामाद्विमुखः कर्तुं धर्मज्ञ इव नास्तिकैः ॥ ४८
सारङ्ग इव घर्मार्तः कामं विलप शुष्य च ।
नाहं भीषयितुं शक्यः क्षत्रधर्मे व्यवस्थितः ॥४९
तनुत्यजां नृसिंहानामाहवेष्वनिवर्तिनाम् ।
या गतिर्गुरुणा प्रोक्ता प्रेम्णा रामेण तां स्मरे ॥५०
स्वेषां त्राणार्थमुद्यन्तं वधार्थं द्विषतामपि ।
विद्धि मामास्थितं वृत्तं पौरूरवसमुत्तमम् ॥ ५१
न तद्भूतं प्रपश्यामि त्रिषु लोकेषु मद्रप ।
यो मामस्मादभिप्रायाद्वारयेदिति मे मतिः ॥ ५२
एवं विद्वञ्जोषमास्स्व त्रासात्किं बहु भाषसे ।
न त्वां हत्वा प्रदास्यामि क्रव्याद्भ्यो मद्रकाधम ५३
मित्रप्रतीक्षया शल्य धृतराष्ट्रस्य चोभयोः ।
अपवाददितिक्षाभिस्त्रिभिरेतैर्हि जीवसि ॥ ५४
पुनश्चेदीदृशं वाक्यं मद्रराज वदिष्यसि ।

त्स्याशिनाम् । शीधु मद्यम् ॥ २७ ॥ मद्रकेषु संसृष्ट नष्ट एव गान्धारकेषु शौच नष्ट भवेत् ॥ ३० ॥ राजा याजको यस्य तस्मिन्याज्ये हविर्नष्टं भवेत् ॥ ३१ ॥ यथैवेति । यथा मद्रकै संगत कृत्वा पतति हेवृश्चिक तथा ते विष हतमित्यध्याहार । यद्येतत्सत्य तर्हि तव विष नश्यत्विति मन्त्रेण सर्वथा विष नश्यतीत्यर्थ । मयेत्यात्मानुभवसिद्धमिदमिति द्योतयति ॥ ३२ ॥ ॥३३॥ यथाकामं वरयन्ति ताः । मैथुने संगता याश्च तथा कामकराश्च ह । तासा पुत्रो मम कथ मद्रको योगमर्हति । इति क. पाठः ॥ ३६ ॥ प्रमेहन्ति मूत्रयन्ते । दशेरका· गर्दभाः । यथैवोष्ट्रा यथेळका· इति ट. पाठ ॥ ३७ ॥ सुवीरक काञ्जिकम् । स्फिचौ कटिप्रोथौ ॥ ३८ ॥ निर्ह्रीकाः निर्लज्जाः । घस्मरा. बहुभक्षका. ॥ ४० ॥ वक्तव्येषु गर्हणीयेषु ॥ ४२ ॥ सांपराये समूहे संग्रामे इत्यर्थ.। मुञ्चेय जीवितमिति शेषः ॥ ४५ ॥ उपहितः उपजप्तः ॥ ४७ ॥ सारङ्ग इव घर्मान्ते इति क. ङ. पाठः ॥ ४९ ॥ अपवादो निन्दा तितिक्षा च तैस्त्रिभिर्हेतुभि. ॥ ५४ ॥ चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

शिरस्ते पातयिष्यामि गदया वज्रकल्पया ॥५५
श्रोतारस्त्विदमद्येह द्रष्टारो वा कुदेशज ।
कर्णं वा जघ्नतुः कृष्णौ कर्णो वा निजघान तौ ॥
एवमुक्त्वा तु राधेयः पुनरेव विशांपते ।
अब्रवीन्मद्रराजानं याहियाहीत्यसंभ्रमम् ॥ ५७

॥ इति श्रीमन्महाभारते कर्णपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

शल्येन कर्णंप्रति हंसकाकीयाख्यानकथनम् ॥ १ ॥

सञ्जय उवाच ।
मारिषाधिरथेः श्रुत्वा वाचो युद्धाभिनन्दिनः ।
शल्योऽब्रवीत्पुनः कर्णं निदर्शनमुदाहरन् ॥ १
जातोऽहं यज्वनां वंशे संग्रामेष्वनिवर्तिनाम् ।
राज्ञां मूर्धाभिषिक्तानां स्वयं धर्मपरायणः ॥ २
यथैव मत्तो मद्येन त्वं तथा लक्ष्यसे वृष ।
तथाऽद्य त्वां प्रमाद्यन्तं चिकित्सेयं सुहृत्तया ॥ ३
इमां काकोपमां कर्ण प्रोच्यमानां निबोध मे ।
श्रुत्वा यथेष्टं कुर्यास्त्वं निहीन कुलपांसन ॥ ४
नाहमात्मनि किंचिद्वै किल्बिषं कर्ण संस्मरे ।
येन मां त्वं महाबाहो हन्तुमिच्छस्यनागसम् ॥ ५
अवश्यं तु मया वाच्यं बुद्ध्वा तव हिताहितम् ।
विशेषतो रथस्थेन राज्ञश्चैव हितैषिणा ॥ ६
समं च विषमं चैव रथिनश्च बलाबलम् ।
श्रमः खेदश्च सततं हयानां रथिना सह ॥ ७
आयुधस्य परिज्ञानं रुतं च मृगपक्षिणाम् ।
सारं चैवाप्यसारं च शल्यानां च प्रतिक्रिया ॥ ८
अस्त्रयोगं च युद्धं च निमित्तानि तथैव च ।
सर्वमेतन्मया ज्ञेयं रथस्यास्य कुटुम्बिना ।
अतस्त्वां कथये कर्ण निदर्शनमिदं पुनः ॥ ९
वैश्यः किल समुद्रान्ते प्रभूतधनधान्यवान् ।
यज्वा दानपतिः क्षान्तः स्वकर्मस्थोऽभवच्छुचिः ॥
बहुपुत्रः प्रियापत्यः सर्वभूतानुकम्पकः ।
राज्ञो धर्मप्रधानस्य राष्ट्रे वसति निर्भयः ॥ ११
पुत्राणां तस्य बालानां कुमाराणां यशस्विनाम् ।
काको बहूनामभवदुच्छिष्टकृतभोजनः ॥ १२
तस्मै सदा प्रयच्छन्ति वैश्यपुत्राः कुमारकाः ।
मांसोदनं दधि क्षीरं पायसं मधुसर्पिषी ॥ १३
स चोच्छिष्टभृतः काको वैश्यपुत्रैः कुमारकैः ।
सदृशान्पक्षिणो दृप्तः श्रेयसश्चावमन्यते ॥ १४
अथ हंसाः समुद्रान्ते प्रजग्मुरतिपातिनः ।
गरुडस्य गतौ तुल्याश्चक्राङ्गा हृष्टचेतसः ॥ १५
कुमारकास्तदा हंसान्दृष्ट्वा काकमथाब्रुवन् ।
भवानेव विशिष्टोऽसि पतत्रिभ्यो विहंगम ॥ १६
एतेऽतिपातिनः पश्य विहंगान्वियदाश्रितान् ।
एहि त्वमपि शक्तो हि कस्मान्न पतितं त्वया ॥ १७
प्रतार्यमाणस्तैः सर्वैरल्पबुद्धिभिरण्डजः ।
तद्वचः सत्यमित्येव मौर्ख्यादर्पाच्च जग्मिवान् ॥ १८
तान्सोनुपत्य जिज्ञासुः क एषां श्रेष्ठभागिति ।
उच्छिष्टदर्पितः काको बहूनामेकपातिनाम् ॥ १९
तेषां यं प्रवरं मेने हंसानां दूरपातिनाम् ।
स तमाह्वत दुर्बुद्धिः पताव इति पक्षिणम् ।
तच्छ्रुत्वा प्राहसन्हंसा ये तत्रासन्समागताः ॥ २०
भाषतो बहु काकस्य बालिश्यात्पततां वराः ।
इदमूचुः स चक्राङ्गा वचः काकं विहंगमाः ॥ २१
हंसा ऊचुः ।
वयं हंसाश्चरामेमां पृथिवीं मानसौकसः ।
पक्षिणां च वयं नित्यं दूरपातेन पूजिताः ॥ २२

रुत जयपराजयसूचकम् ॥ ८ ॥ निमित्तानि दिव्यान्तरिक्षभौमानि ब्रह्मायानुकूल्यप्रातिकूल्यादीनि । निदर्शन दृष्टान्तम् ॥ ९ ॥ अतिपातिनः गत्यतिशयगामिन. । चक्राङ्गाः मानसचारिण. ॥ १५ ॥ पतत्रिभ्योऽन्येभ्य· प्रतार्यमाणोऽन्यथाप्रत्याय्यमानः ॥ १६ ॥ श्रेष्ठभाक् श्रेष्ठ अङ्ग भजते ॥ १९ ॥ पतावः गच्छावः ॥ २० ॥

कथं हंसं नु बलिनं चक्राङ्गं दूरपातिनम् ।
काको भूत्वा निपतने समाह्वयसि दुर्मते ।
कथं त्वं पतिता काक सहास्माभिर्ब्रवीहि तत् ॥ २३
अथ हंसवचो मूढः कुत्सयित्वा पुनः पुनः ।
प्रजगादोत्तरं काकः कत्थनो जातिलाघवात् ॥ २४
काक उवाच ।
शतमेकं च पातानां पतिताऽस्मि न संशयः ।
शतयोजनमेकैकं विचित्रं विविधं तथा ॥ २५
उड्डीनमवडीनं च प्रडीनं डीनमेव च ।
निडीनमथ संडीनं तिर्यक्डीनगतानि च ॥ २६
विडीनं परिडीनं च पराडीनं सुडीनकम् ।
अभिडीनं महाडीनं निर्डीनमतिडीनकम् ॥ २७
अवडीनं प्रडीनं च संडीनं डीनडीनकम् ।
संडीनोड्डीनडीनं च पुनर्डीनविडीनकम् ॥ २८
संपातं समुदीर्षं च ततोऽन्यद्व्यतिरिक्तकम् ।
गतागतं प्रतिगतं बह्वीश्च निकुडीनकाः ।
कर्ताऽस्मि मिषतां वोऽद्य ततो द्रक्ष्यथ मे बलम् २९
तेषामन्यतमेनाहं पतिष्यामि विहायसम् ।
प्रदिशध्वं यथान्यायं केन हंसाः पताम्यहम् ॥ ३०
ते वै ध्रुवं विनिश्चित्य संपतध्वं मया सह ।
पातैरेभिः खलु खगाः पतितुं खे निराश्रये ॥ ३१
एवमुक्ते तु काकेन प्रहस्यैको विहंगमः ।
उवाच काकं राधेय वचनं तन्निबोध मे ॥ ३२
हंस उवाच ।
शतमेकं च पातानां त्वं काक पतिता ध्रुवम् ।
एकमेव तु यं पातं विदुः सर्वे विहंगमाः ।
तमहं पतिता काक नान्यं जानामि कंचन ॥ ३३
काक उवाच ।
पत त्वमपि तत्राशु येन पातेन मन्यसे ॥ ३४
अथ काकं प्रजहसुर्ये तत्रासन्समागताः ।
कथमेकेन पातेन हंसः पातशतं जयेत् ।
एकेन वायस त्वैनं पातेनाभिभविष्यति ॥ ३५
हंसश्चोत्पतितः काको बलवानाशुविक्रमः ।
प्रपेततुः स्पर्धया च ततस्तौ हंसवायसौ ।
उपर्युपरि वेगेन समुद्रं मकरालयम् ॥ ३६
हंसस्त्वेकेन पातेन काकः पातशतेन च ।
स्पर्धिनौ सहितौ तूर्णं खमास्थाय तरस्विनौ ॥ ३७
हंसस्तु मृदुनैकेन विक्रान्तुमुपचक्रमे ।
पूर्वमेव तु वै काकः स तं तूर्णं प्रचक्रमे ॥ ३८
नात्यहीयत काकश्च मुहूर्तमिव सूतज ॥ ३९
काकोपि हंसं चापल्याच्छीघ्रतां प्रतिदर्शयन् ।
वेगेनातीत्य तरसा पुनरेति मुहुर्मुहुः ॥ ४०
तुण्डेनाभ्यहनच्चैनं कुर्वन्नामापसव्यतः ।
रोरूयन्निव चाप्येनं समाह्वयति वै मुहुः ।
विसिस्मापयिषुः पातैर्दर्शयन्नात्मनः क्रियाम् ४१
अथ तानि विचित्राणि पतितानीतराणि च ।
दृष्ट्वा प्रमुदिताः काका विनेदुरधिकैः स्वरैः ॥ ४२
हंसाश्चापहसन्ति स्म प्रवदन्ति प्रियाणि च ।
कुर्वाणा विविधान्नावानिच्छन्तो जयमात्मनः ४३
उत्पत्योत्पत्य च प्राहुर्मुहूर्तमिति चेति च ।
वृक्षाग्रेभ्यः स्थलेभ्यश्च निपतन्त्युत्पतन्ति च ॥ ४४
अवमत्य च हंसं तमिदं काकोऽब्रवीद्वचः ।
योऽसावुत्पतितो हंसः सोऽसावेव प्रहीयते ॥ ४५
अथ हंसस्तु तच्छ्रुत्वा भाषितं पततांवरः ।
विगाह्य हंसो विक्षोभ्य प्रापतत्पश्चिमां दिशम् ४६
उपर्युपरि वेगेन सागरं मकरालयम् ।
बहुसत्वसमाकीर्णं वीचीभिर्भीमदर्शनम् ॥ ४७
अथाचिरेण राधेय काको वेगादहीयत ।
ततोऽतीव परिश्रान्तः कथंचिद्धंसमन्वगात् ॥ ४८
भीश्चैनमाविशत्तीव्रं काकं कर्ण विचेतसम् ।
द्वीपान्द्रुमान्वितान्पश्यन्विश्रमार्थं श्रमातुरः ।
निपतेयं क्वनु श्रान्त इति तस्मिञ्जलार्णवे ॥ ४९
अवगाह्य समुद्रोऽपि बहुसत्वगणालयः ।
महान्भूतशतोद्भासी नभसस्तु विशिष्यते ॥ ५०
गाम्भीर्याद्धि समुद्रस्य न विशेषं कुलाधम ।
दिशश्च नाम्भसां कर्ण समुद्रस्था विदुर्जनाः ।

मिषतां पश्यताम् ॥ २९ ॥ केन पातेन ॥ ३० ॥ एक मुख्यम् ॥ ३३ ॥ कथमेकेन पातेन जयेम शतपातिनम् । एकेनैव स यात्वेनं पातेनाभिविष्यसि इति ट. पाठः ॥ ३५ ॥ पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

विपश्चितोप्यपारत्वात्किं पुनः कर्ण वायसः ॥५१
अथ हंसोप्यतिक्रामन्मुहूर्तमिव दूरतः ।
अतिक्रम्य च चक्राङ्गः काकं तं समुदैक्षत ॥ ५२
शनकैः परिहीनं तं परिश्रान्तमचेतसम् ।
अवेक्षमाणस्तं काकं प्रत्यागम्य हसन्निव ॥ ५३
तं प्रहस्य च चक्राङ्गः काकं मन्दगतिं तदा ।
हीयमानमथो दृष्ट्वा हंसः प्राह यथार्थवत् ।
उज्झिहीर्षुर्निमज्जन्तं स्मरन्सत्पुरुषव्रतम् ॥ ५४
बहूनि पतितानि त्वमाचक्षाणो मुहुर्मुहुः ।
पतस्यव्याहरन्खेदं ततो गर्ह्यं प्रभाषसे ॥ ५५
किं नाम पतितं काक यत्त्वं पतसि सांप्रतम् ।
जलं स्पृशसि पक्षाभ्यां तुण्डेन च पुनःपुनः॥ ५६
प्रब्रूहि कतमोऽयं ते पातो वर्तति वायस ।
एह्येहि काक शीघ्रं त्वमेष त्वां परिपालये ॥ ५७
स पक्षाभ्यां स्पृशन्नार्तस्तुण्डेन च जलं तदा ।
काको दृढं परिश्रान्तः सहसा निपपात ह॥ ५८
सागराम्भसि तं दृष्ट्वा पतन्तं दीनचेतसम् ।
म्रियमाणमिदं वाक्यं हंसः काकमुवाच ह॥ ५९
शतमेकं च पातानां पताम्यहमिति स्म ह ।
श्लाघन्नात्मानमद्य त्वं काक भाषितवानसि॥ ६०
स त्वमेकशतं पातं पतन्नभ्यधिको मया ।
कथमेवं परिश्रान्तः पतितोऽसि महार्णवे ॥ ६१
प्रत्युवाच ततः काकः सीदमान इदं वचः ।
उपरीतं तदा हंसं प्रसमीक्ष्य प्रसादयन् ॥ ६२
उच्छिष्टान्नेन पुष्टोऽहं दर्पोत्सिक्तः कुसत्वतः ।
सुपर्ण इव चात्मानं ज्ञातवान्पुत्रलाघवात् ॥ ६३
शरणं त्वां प्रपन्नोऽहमुदकान्तमवाप्नुयाम् ।
हंसेदानीं परिश्रान्तमापदो मां समुद्धर ॥ ६४
यदि नाम पुनर्जीवन्गच्छेयं स्वं निवेशनम् ।
नैनं पुनर्हीनमपि क्षेप्ताऽहं खे विचारिणम्॥ ६५
तमेवं करुणं दीनं विलपन्तमचेतसम् ।
काककाकेति वाशन्तं निमज्जन्तं महार्णवे ।
कृपयाऽभिपरीतो वै कृपां चक्रे दुरात्मनि॥ ६६
अथ त्रं पततं दीनं जलक्लिन्नमचेतनम् ।
पद्भ्यामुत्क्षिप्य वेपन्तं पृष्ठमारोपयत्तदा ॥ ६७
स हंसः पृष्ठमारोप्य काकं कर्ण विचेतसम् ।
अविस्मयंस्तदा कर्ण पुनरेव समानयत् ।
तमेव देशं तरसा स्पर्धया पेततुर्यतः ॥ ६८
उत्सृज्य त्वब्रवीन्मैवं पुनः कार्यं त्वयेति ह ।
स्थाप्य चैनं पुनर्द्वीपे समाश्वस्य च विक्लवम् ।
गतो यथेप्सितं देशं हंसो मन इवाशुगः ॥ ६९
एवमुच्छिष्टपुष्टः स काकोऽहंसपराजितः ।
बलं वीर्यं महत्कर्ण त्यक्त्वा क्षान्तिमुपागतः॥७०
उच्छिष्टभोजनः काको यथा वैश्यकुले पुरा ।
एवं त्वमुच्छिष्टभृतो धार्तराष्ट्रैर्न संशयः ॥ ७१
सदृशाञ्श्रेयसश्चापि सर्वान्कर्णावमन्यसे ।
द्रोणद्रौणिकृपैर्गुप्तो भीष्मेणान्यैश्च कौरवैः ॥ ७२
विराटनगरे पार्थमेकं किं नावधीस्तदा ।
यत्र व्यस्ताः समस्ताश्च निर्जिताः स्थ किरीटिना ।
सृगाला इव सिंहेन क्व ते वीर्यं तदा गतम् ॥७३
भ्रातरं निहतं दृष्ट्वा समरे सव्यसाचिना ।
पश्यतां कुरुवीराणां प्रथमं त्वं पलायितः ॥७४
तथा द्वैतवने कर्ण गन्धर्वैः समभिद्रुतान् ।
कुरून्सदारानुत्सृज्य त्वमेवाग्रे पलायितः ॥ ७५
हत्वा जित्वा च गन्धर्वांश्चित्रसेनमुखान्रणे ।
कर्ण दुर्योधनं पार्थः सभ्रातृकममोक्षयत् ॥ ७६
पुनः प्रभावः पार्थस्य पुराणः केशवस्य च ।
कथितः कर्ण रामेण सभायां कुरुसंसदि ॥ ७७
सततं च त्वमश्रौषीर्वचनं द्रोणभीष्मयोः ।
अवध्यौ वदतोः कृष्णौ सन्निधौ च महीक्षिताम् ७८
कियन्तं तत्र वक्ष्यामि येनयेन धनञ्जयः ।
त्वत्तोऽतिरिक्तः सर्वेभ्यो भूतेभ्यो ब्राह्मणो यथा॥
इदानीमेव द्रष्टासि प्रधाने स्यन्दने स्थितौ ।
पुत्रं च वसुदेवस्य कुन्तीपुत्रं च पाण्डवम् ॥८०
यथाऽश्रयत चक्राङ्गं वायसो बुद्धिमास्थितः ।
तथाश्रयस्व वार्ष्णेयं पाण्डवं च धनञ्जयम् ॥ ८१
यदा त्वं युधि विक्रान्तौ वासुदेवधनञ्जयौ ।
द्रष्टास्येकरथे कर्ण तदा नैवं वदिष्यसि ॥ ८२
यदा शरशतैः पार्थो दर्पं तव वधिष्यति ।
तदा त्वमन्तरं द्रष्टा आत्मनश्चार्जुनस्य च ॥ ८३

देवासुरमनुष्येषु प्रख्यातौ यौ नरोत्तमौ ।
तौ मावमंस्था मौर्ख्यात्त्वं खद्योत इव रोचनौ ॥८४
सूर्याचन्द्रमसौ यद्वत्तद्वदर्जुनकेशवौ ।
प्राकाश्येनाभिविख्यातौ त्वं तु खद्योतवन्नृषु ८५
एवं विद्वन्मावमंस्थाः सूतपुत्राच्युतार्जुनौ ।
नरसिंहौ नरश्वा त्वं जोषमास्स्व विकत्थसे ॥८६

॥ इति श्रीमन्महाभारते कर्णपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः ॥ ३६ ॥

कर्णेन शल्यंप्रति स्वस्य परशुरामात् तथा कुतश्चिद्ब्राह्मणाच्च शापप्राप्तिकथनम् ॥ १ ॥

सञ्जय उवाच ।
मद्राधिपस्याधिरथिर्महात्मा
वचो निशम्याप्रियमप्रतीतः ।
उवाच शल्यं विदितं ममैत-
द्यथाविधावर्जुनवासुदेवौ ॥ १
शौरे रथं वाहयतोऽर्जुनस्य
बलं महास्त्राणि च पाण्डवस्य ।
अहं विजानामि यथावदद्य
परोक्षभूतं तव तत्तु शल्य ॥ २
तौ चाप्यहं शस्त्रभृतां वरिष्ठौ
व्यपेतभीर्योधयिष्यामि कृष्णौ ।
संतापयत्यभ्यधिकं हि रामा-
च्छापोऽद्य मां ब्राह्मणसत्तमाच्च ॥ ३
'पुरा महेन्द्राद्गिवरे समुद्रे
तपस्विनं राममुपेत्य शल्य ।
अस्त्रार्थिनं माऽद्य शिष्यं गृहाणे-
त्यथाऽब्रुवं ब्राह्मणच्छद्मना च ॥ ४
तत्रावसं ब्राह्मण इत्यविप्रो
ब्रह्मास्त्रलोभादनृतेन चाहम् ।
तज्जामदग्न्येन परं महास्त्रं
समग्रयुक्तं विहितं ममासीत् ॥ ५
अस्त्रं यदा तद्विदितं ममासी-
त्तदाऽब्रवीद्ब्राह्मणो मां महर्षिः ।
आपद्गतेनास्त्रमिदं प्रयोज्यं
त्वया रणे गच्छता साधयेति ॥' ६
तत्रापि मे देवराजेन विघ्नो
हितार्थिना फल्गुनस्यैव शल्य ।
कृतो विभेदेन ममोरुमेत्य
प्रविश्य कीटस्य तनुं विरूपाम् ॥ ७
ममोरुमेत्य प्रविभेद कीटः
सुप्ते गुरौ तत्र शिरो निधाय ।
ऊरुप्रभेदाच्च महान्बभूव
शरीरतो मे घनशोणितौघः ॥ ८
गुरोर्भयाच्चापि न चेलिवानहं
ततो विबुद्धो ददृशे स विप्रः ।
स धैर्ययुक्तं प्रसमीक्ष्य मां वै
न त्वं विप्रः कोऽसि सत्यं वदेति ॥ ९
तस्मै तदाऽऽत्मानमहं यथाव-
दाख्यातवान्सूत इत्येव शल्य ।
स मां निशाम्याथ महातपस्वी
संशप्तवान्रोषपरीतचेताः ॥ १०
सूत त्वया ह्याप्तमिदं तवास्त्रं
न कर्मकाले प्रतिभास्यतीति ।
अन्यत्र तु स्यात्तव मृत्युकाला-
दब्राह्मणे ब्रह्म न हि ध्रुवं स्यात् ॥ ११
तदद्य पर्याप्तमतीव मेऽस्त्र-
मुपस्थितेऽस्मिंस्तुमुले विमर्दे ॥ १२
शल्योग्रधन्वानमहं वरिष्ठं
तरस्विनं भीममसह्यवीर्यम् ।
सत्यप्रतिज्ञं युधि पाण्डवेयं
धनञ्जयं मृत्युमुखं नयिष्ये ॥ १३

चेलिवान् चलितवान् ॥ ९ ॥

कर्मकाले स्वप्रतिज्ञारक्षणकाले ॥ ११ ॥

अस्त्रं ततोऽन्यत्प्रतिपन्नमद्य
येन क्षेप्स्ये समरे शत्रुपूगान् ।
प्रतापिनं बलवन्तं कृतास्त्रं
तमुग्रधन्वानममितौजसं च ।
क्रूरं शूरं रौद्रममित्रसाहं
धनञ्जयं संयुगेऽहं हनिष्ये ॥ १४
अपांपतिर्वेगवानप्रमेयो
निमज्जयिष्यन्बहुलाः प्रजा इव ।
महारवं यः कुरुते समुद्रो
वेलेव तं वारयाम्यप्रमेयम् ॥ १५
प्रमुञ्चन्तं बाणसङ्घानमेया-
न्मर्मच्छिदो वीरहणः सुपत्रान् ।
कुन्तीपुत्रं प्रतियोत्स्यामि युद्धे
ज्यां कर्षतामुत्तमं मर्त्यलोके ॥ १६
एवं बलेनातिबलं महास्त्रं
समुद्रकल्पं सुदुरापमुग्रम् ।
शरौघिणं पार्थिवान्मज्जयन्तं
वेलेव पार्थमिषुभिर्वारयिष्ये ॥ १७
कृती कृतास्त्रो दृढहस्तयोधी
दिव्यास्त्रविच्छ्वेतहयः प्रमाथी ।
सुरासुरान्युधि वै यो जयेत
तेनाद्य मे पश्य युद्धं सुघोरम् ॥ १८
अभीर्मानी पाण्डवो युद्धकामो
ह्यमानुषैरस्यति मां महास्त्रैः ।
तस्यास्त्रमस्त्रैरभिभूय सङ्ख्ये
बाणोत्तमैः पातयिष्यामि पार्थम् ॥ १९
सहस्ररश्मिप्रतिमं ज्वलन्तं
दिशश्च सर्वाः प्रतपन्तमुग्रम् ।
तमोनुदं मेघ इवातिमात्रं
धनञ्जयं छादयिष्यामि बाणैः ॥ २०
वैश्वानरं धूमकेतुं ज्वलन्तं
तेजस्विनं नरवीरान्दहन्तम् ।
पर्जन्यभूतः शरवर्षैर्यथाऽग्निं
तथा पार्थं शमयिष्यामि युद्धे ॥ २१
आशीविषं दृष्टिहरणं सुघोरं
सुतीक्ष्णदंष्ट्रं ज्वलनप्रभावम् ।
क्रोधात्प्रदीप्तानलवद्दहन्तं
कुन्तीपुत्रं शमयिष्यामि भल्लैः ॥ २२
प्रवाहिणं बलवन्तं महौजसं
प्रभञ्जनं मातरिश्वानमुग्रम् ।
युद्धे सहिष्ये हिमवानिवाचलो
धनञ्जयं क्रुद्धममृष्यमाणम् । २३
विशारदं रथमार्गेषु शक्तं
धुर्यं नित्यं समरेषु प्रवीरम् ।
लोके वरं सर्वधनुर्धराणां
धनञ्जयं संयुगेऽहं हनिष्ये ॥ २४
अद्याहवे यस्य न तुल्यमन्यं
मन्ये मनुष्यं धनुराददानम् ।
सर्वामिमां यः पृथिवीं सहेत
तथापि तेनाद्य रणे समेष्ये ॥ २५
यः सर्वभूतानि सदैवतानि
प्रस्थेऽजयत्खाण्डवे सव्यसाची ।
को जीवितं रक्षमाणो हि तेन
युयुत्सतेऽस्त्रैर्मानुषो मामृतेऽन्यः ॥ २६
मानी कृतास्त्रः कृतहस्तयोधी
दिव्यास्त्रविच्छ्वेतहयः प्रमाथी ।
तस्याहमद्यातिरथस्य काया-
च्छिरो हरिष्यामि शितैः पृषत्कैः ॥ २७
योत्स्याम्येनं शल्य धनञ्जयं वै
मृत्युं पुरस्कृत्य रणे जयं वा ।
अन्यो हि न ह्येकरथेन मर्त्यो
युध्येत यः पाण्डवमिन्द्रकल्पम् ॥ २८
तस्याहवे पौरुषं पाण्डवस्य
ब्रूयां पृष्टः समितौ क्षत्रियाणाम् ।

अस्त्रं ततो रामदत्तादस्त्रादन्यत्प्रतिपन्नं प्राप्तं अहिबाणाख्यमित्यर्थः ॥ १४ ॥ रथमार्गेष्वसक्त इति ट. पाठः । रथमार्गेष्वनित्य इति ख. पाठ. ॥ २४ ॥ खाण्डवे खाण्डवदाहे ॥ २६ ॥

किं त्वं मूर्खः प्रहसन्मूढचेता
आख्यासि मे पौरुषं फल्गुनस्य ॥ २९
अत्यप्रियो यः पुरुषो निष्ठुरो हि
क्षुद्रः क्षेप्ता क्षमिणश्चाक्षमावान् ।
हन्यामहं त्वादृशानां शतानि
क्षमाम्यहं क्षमिणां काल एषः ॥ ३०
अवोचस्त्वं पाण्डवार्थे प्रियाणि
प्रधर्षयन्मां मूढवत्पापकर्मन् ।
मय्यार्जवे जिह्ममतिर्यतस्त्वं
मित्रद्रोही साप्तपदं हि मित्रम् ॥ ३१
कालस्त्वयं प्रत्युपयाति दारुणो
दुर्योधनो युद्धमुपागमद्यत् ।
तस्यार्थसिद्धिं त्वभिकाङ्क्षमाण-
स्तमन्वेष्ये यत्र चैकान्तमस्ति ॥ ३२
'तथाप्यहं पाण्डववासुदेवौ
योत्स्ये रणे मद्विधस्यैव कर्म ।
न प्राकृतः सज्जते वै कदाचि-
द्यः प्रत्युदीयात्कृष्णधनञ्जयौ तौ ॥' ३३
मित्रं मिन्देर्नन्दतेः प्रीयतेर्वा
संत्रायतेर्मिनुतेर्मोदतेर्वा ।
दुर्योधने सर्वमिदं ममास्ति
तच्चापि सर्वं मम वेत्ति राजा ॥ ३४
शत्रुः शदेः शासतेर्वा श्यतेर्वा
शृणातेर्वा श्वसतेः सीदतेर्वा ।
श्रमेः शुचो बहुशः सूदतेश्च
प्रायेण सर्वं त्वयि तच्च मय्यम् ॥ ३५
दुर्योधनार्थं तव च प्रियार्थं
यशोर्थमात्मार्थमपीश्वरार्थम् ।
तस्मादहं पाण्डववासुदेवौ
योत्स्ये यत्नात्कर्म च पश्य मेऽद्य ॥ ३६
'शल्याद्याहं संगतः पाण्डवेन
मुच्येयं चेज्जीवमानः कथंचित् ।
शश्वन्मृत्योः स्यामनाधृष्यरूपो
व्यक्तं तस्मात्संयुगाद्विप्रमुक्तः ॥' ३७
अस्त्रं ब्राह्मं मनसा संजपन्वै
यदाऽस्यते क्रोधितः सव्यसाची ।
तदापि मे नैव मुच्येत पार्थो
न चेत्पतेद्विषमे मेऽद्य चक्रम् ॥ ३८
अस्त्राणि विद्धा समरे गतानि
ब्राह्माणि दिव्यान्यथ मानुषाणि ।
आसादयिष्याम्यहमुग्रवीर्यं
नागोत्तमं नाग इव प्रभिन्नः ॥ ३९
वैवस्वताद्दण्डहस्ताद्गुरुणाद्वापि पाशिनः ।
सगदाद्वा धनपतेः सवज्राद्वा सुराधिपात् ॥ ४०
अथान्यस्मादपि सुरादमित्रादाततायिनः ।
इति शल्य विजानीहि यथा नाहं बिभेम्युत ॥ ४१
तस्मान्न मे भयं पार्थान्नापि चैव जनार्दनात् ।
सह युद्धं हि मे ताभ्यां सांपराये भविष्यति ॥ ४२
श्वभ्रे ते पततां चक्रमिति मां ब्राह्मणोऽब्रवीत् ।
युध्यमानस्य संग्रामे प्राप्तस्यैकायनं भयम् ॥ ४३
तस्माद्बिभेमि बलवद्ब्राह्मणव्याहृतादहम् ।
एते हि सोमराजान ईश्वराः सुखदुःखयोः ॥ ४४
कदाचिद्ब्राह्मणस्याथ योग्यहेतेरहं नृप ।
अजानन्नक्षिपं बाणं घोररूपं भयावहम् ॥ ४५
होमधेन्वास्ततो वत्सः प्रमत्त इषुणा हतः ।
चरन्वै विजने शल्य ततोऽनु व्याजहार सः ॥ ४६

आर्जवे कर्तव्ये सति ॥ ३१ ॥ अह सिद्धिं काङ्क्षमाणोऽस्मि । त्वं तु तन्मन्यसे यत्र ऐकान्त्यं सख्य नास्ति । अस्मत्पक्षीयोन्यत्र स्नेहवानसीत्यर्थः । तदेवाह मित्रमिति । मिन्दयति मेदयति वा स्नेहार्थान्मिन्देर्मिंदेर्वा मित्रमिति रूपम् । नन्दतेरित्यत्र मदतेरिति पाठः । मदी हर्षे इत्यस्य वा रूपम् । मादयति तर्पयतीति वा मादयतेर्मित्रम् । मिदतेस्त्राणार्थस्य वा मिदेरिद रूपम् । नन्दयतेः प्रीयतेः संत्रायतेर्वाऽर्थे वर्तमानस्य मिदेर्मित्रमिति वार्थः । मिनुते मान करोति सर्वं हितमस्य सगृह्णातीति वा मोदतेऽस्य सुखेनेति वा मित्रमित्येतेऽर्थाः. मयि सन्तीत्यर्थः. ॥ ३४ ॥ शत्रुरिति शदेः शातनार्थात् शास्ते शासनार्थात् श्यतेस्तनूकरणार्थात् शृणातेर्हिंसार्थात् श्वसतेरुच्छ्वासार्थादन्तर्भावितण्यर्थात् सीदतेः सूदतेर्वा दन्त्यस्थाने तालव्यस्योपसर्जनात् शत्रुरिति शब्द उत्पन्नस्तदर्थश्च सर्वस्त्वय्यस्तीत्यर्थः ॥ ३५ ॥ सोमराजानः ब्राह्मणाः ॥ ४४ ॥

यस्माद्वृत्तस्त्वया चात्र होमधेन्वा हतो नृप ।
तस्मात्त्वमपि राधेय वाक्शल्यं महदाप्नुहि ॥ ४७
श्वभ्रे ते पतिता चक्रं युध्यमानस्य शत्रुणा ।
प्राप्त एकायने काले मृत्युसाधारणे त्वयि ॥ ४८
स्पर्धसे येन संग्रामे यदर्थं घटसेऽनिशम् ।
तत एव ध्रुवं मृत्युं सूत प्राप्स्यसि संयुगे ॥ ४९
अहं प्रसादयांचक्रे ब्राह्मणं संशितव्रतम् ॥ ५०
गवां दशशतं वित्तं बलीवर्दांश्च षट्शतम् ।
प्रच्छन्नं काञ्चनैः कामं ब्राह्मणार्थमहं तदा ॥ ५१
दासीशतं निष्ककण्ठं शतमश्वतरीरथान् ।
कन्यानां निष्ककण्ठीनां सहस्रं समलंकृतम् ॥ ५२
ईषादन्तान्नागशतान्दासीदासशतानि च ।
दद्मि तैर्द्विजमुख्यो मे प्रसादं न चकार सः ॥ ५३
कृष्णानां श्वेतवत्सानां गोशतानि चतुर्दश ।
ददन्हि न लभे तस्मात्प्रसादं द्विजसत्तमात् ॥ ५४
यत्किंचिन्मामकं वित्तं त्वदधीनं करोमि तत् ।
इति मां याचमानं वै ब्राह्मणः प्रत्यवारयत् ।
क्रोधदीप्तेक्षणः शल्य निर्दहन्निव चक्षुषा ॥ ५५
व्याहृतं यन्मया सूत तत्तथा न तदन्यथा ।
अनृतोक्तं प्रजां हन्यात्ततः पापमवाप्नुयाम् ॥ ५६
तस्माद्धर्माभिरक्षार्थं नानृतं वक्तुमुत्सहे ।
मा त्वं ब्रह्मगतिं हिंसाः प्रायश्चित्तं कृतं त्वया ५७
मद्वाक्यं नानृतं लोके कश्चित्कुर्यात्समाप्नुहि ।
'यन्मयोक्तं सरोषेण गच्छ सूतज माचिरम् ॥ ५८
इति मामसकृत्क्रुद्धः स उवाच द्विजोत्तमः ।
एते हि सोमराजान ईश्वराः सुखदुःखयोः ॥ ५९
नाहं बिभेमि बीभत्सोर्न शल्य मधुसूदनात् ।
तस्माद्बिभेम्यहं शापात्तेन सत्येन ते शपे ॥ ६०
सह युद्धं समेताभ्यामद्येदं समुपस्थितम् ।
युद्धेऽस्मिञ्जीवितं मेऽद्य शल्य संशयमागतम् ॥ ६१
शक्रोऽप्यमरराट् ताभ्यामुपगम्याहवं सह ।
संशयं परमं गच्छेत्कथं वा मन्यते भवान् ॥ ६२
इत्येवं ते मयाऽऽख्यातं क्षिप्तेन न सुहृत्तया ।
जानामि त्वाऽधिक्षिपन्तं दोषमात्मगतं शृणु ॥' ६३

॥ इति श्रीमन्महाभारते कर्णपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥

सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

कर्णेन सोपहासं शल्यगर्हणम् ॥ १ ॥

सञ्जय उवाच ।
ततः पुनर्महाराज मद्रराजमरिंदमः ।
अभ्यभाषत राधेयः संनिवार्योत्तरं वचः ॥ १
निर्भर्त्सनार्थं शल्य त्वं यत्तु जल्पितवानसि ।
नाहं शक्यस्त्वया वाचा विभीषयितुमाहवे ॥ २
यदि मां देवताः सर्वा योधयेयुः सवासवाः ।
तथापि मे भयं न स्यात्किमु पार्थात्सकेशवात् ॥ ३
नाहं भीषयितुं शक्यः शुद्धकर्मा महाहवे ।
अभिजानीहि शक्तस्त्वमन्यं भीषयितुं रणे ॥ ४
नीचस्य बलमेतावत्पारुष्यं यत्त्वमात्थ माम् ।
अशक्तो हि गुणान्वक्तुं वल्गसे बहु दुर्मते ॥ ५
न हि कर्णः समुद्भूतो भयार्थमिह मद्रक ।
विक्रमार्थमहं जातो यशोर्थं च तथाऽऽत्मनः ॥ ६
सखिभावेन सौहार्दान्मित्रभावेन चैव हि ।
कारणैस्त्रिभिरेतैस्त्वं शल्य जीवसि सांप्रतम् ॥ ७
राज्ञश्च धार्तराष्ट्रस्य कार्यं सुमहदुद्यतम् ।
मयि तच्चाहितं शल्य तेन जीवसि मे क्षणम् ॥ ८
कृतश्च समयः पूर्वं क्षन्तव्यं विप्रियं तव ।
'समयः परिपाल्यो मे तेन जीवसि सांप्रतम् ॥' ९
ऋते शल्यसहस्रेण विजयेयमहं परान् ।

मा त्व ब्राह्मणगर्हः स्याः इति क पाठः ॥ ५७ ॥ तदनुव्याहृत कुर्यात्सर्वलोकेपि सूतज इति ख. पाठः । नैतत्ते व्याहृत कुर्या सममेकोऽपि सूतज इति क. ङ पाठ । नैतदव्याहृत कुर्यात्सर्वलोकोऽपि सूतज इति ट. पाठः ॥ ५८ ॥ षट्त्रिंशोऽध्यायः ॥ ३६ ॥

एतदेव त्रय व्याचष्टे राज्ञश्चेत्यादिना ॥ ८ ॥

मित्रद्रोहस्तु पापीयानिति जीवसि सांप्रतम्॥ १०
शल्य उवाच।
आर्तप्रलापांस्त्वं कर्ण यान्ब्रवीषि परान्प्रति।
न ते कर्णसहस्रेण शक्या जेतुं परे युधि॥ ११
सञ्जय उवाच।
तथा ब्रुवन्तं परुषं कर्णो मद्राधिपं तदा।
परुषं द्विगुणं भूयः प्रोवाचाप्रियदर्शनम्॥ १२
इदं त्वमेकाग्रमनाः शृणु मद्रजनाधिप।
संनिधौ धृतराष्ट्रस्य प्रोच्यमानं मया श्रुतम्॥ १३
देशांश्च विविधांश्चित्रान्पूर्ववृत्तांश्च पार्थिवान्।
ब्राह्मणाः कथयन्ति स्म धृतराष्ट्रनिवेशने॥ १४
तत्र वृद्धः पुरावृत्ताः कथाः कश्चिद्द्विजोत्तमः।
बाह्लीकदेशं मद्रांश्च कुत्सयन्वाक्यमब्रवीत्॥ १५
बहिष्कृता हिमवता गङ्गया च तिरस्कृताः।
सरस्वत्या यमुनया कुरुक्षेत्रेण चापि ये॥ १६
पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः।
तान्धर्मबाह्यानशुचीन्बाह्लीकानपि वर्जयेत्॥ १७
गोवर्धनो नाम वटः सुभाण्डं नाम पत्तनम्।
एतद्राजन्कलिद्वारमाकुमारात्स्मराम्यहम्॥ १८
कार्येणात्यर्थगूढेन बाह्लीकेषूषितं मया।
तत एषां समाचारः संवासाद्विदितो मया॥ १९
शाकलं नाम नगरमापगानामनिम्नगा।
चण्डाला नाम बाह्लीकास्तेषां वृत्तं सुनिन्दितम् २०
पानं गुडासवं पीत्वा गोमांसं लशुनैः सह।
अपूपसक्तुमद्यानामाशिताः शीलवर्जिताः॥ २१
गायन्त्यथ च नृत्यन्ति स्त्रियो मत्ता विवाससः।
नगरापणवेशेषु बहिर्माल्यानुलेपनाः॥ २२
मत्ताः प्रगीतविरुतैः खरोष्ट्रनिनदोपमैः।
अनावृता मैथुने ताः कामचाराश्च सर्वशः॥ २३
आहुरन्योन्यसूक्तानि प्रब्रुवाणा मदोत्कटाः।
हेहतेहेहतेत्येवं स्वामिभर्तृहतेति च॥ २४
आक्रोशन्त्यः प्रनृत्यन्ति व्रात्याः पर्वस्वसंयताः।
तासां किलावलिप्तानां निवसन्कुरुजाङ्गले॥ २५
कश्चिद्बाह्लीकदुष्टानां नातिहृष्टमना जगौ।
सा नूनं बृहती गौरी सूक्ष्मकम्बलवासिनी॥ २६
मामनुस्मरती शेते बाह्लीकं कुरुवासिनम्।
शतद्रुं नु कदा तीर्त्वा तां च रम्यामिरावतीम्।
गत्वा स्वदेशं द्रक्ष्यामि स्थूलजङ्घाः शुभाः स्त्रियः॥
मनःशिलोज्वलापाङ्ग्यो गौर्यस्ताः काकुकूजिताः।
कम्बलाजिनसंवीता रुदन्त्यः प्रियदर्शनाः॥ २८
मृदङ्गानकशङ्खानां मर्दलानां च निःस्वनैः।
खरोष्ट्राश्वतरैश्चैव मत्ता यास्यामहे सुखम्॥ २९
शमीपीलुकरीराणां वनेषु सुखवर्त्मसु।
अपूपान्सक्तुपिण्डांश्च प्राश्नन्तो मथितान्वितान्॥
पथिषु प्रवलो भूत्वा तथा संपततोऽध्वगान्।
चेलापहारं कुर्वाणास्ताडयिष्याम भूयसः॥ ३१
एवंशीलेषु व्रात्येषु बाह्लीकेषु दुरात्मसु।
कश्चेतयानो निवसेन्मुहूर्तमपि मानवः॥ ३२
कर्ण उवाच।
ईदृशा ब्राह्मणेनोक्ता बाह्लीका मोघचारिणः।
येषां षड्भागहर्ता त्वमुभयोः पुण्यपापयोः॥ ३३
इत्युक्त्वा ब्राह्मणः साधुरुत्तरं पुनरुक्तवान्।
बाह्लीकेष्वविनीतेषु प्रोच्यमानं निबोध तत्॥३४
तत्र स्म राक्षसी गाति सदा कृष्णचतुर्दशीम्।
नगरे शाकले स्फीते आहत्य निशि दुन्दुभिम्॥३५
कथं वस्तादृशो गाथाः पुनर्गास्यामि शाकले।
गव्यस्य तृप्ता मांसस्य पीत्वा गौडं सुरासवम्॥ ३६
गौरीभिः सह नारीभिर्बृहतीभिः स्वलंकृता।
पलाण्डुगण्डूषयुताः खादन्तश्चैशिकान्बहून्॥ ३७
वाराहं कौक्कुटं मांसं गव्यं गार्दभमौष्ट्रकम्।

पञ्चाना वक्ष्यमाणानाम्। सिन्धु षष्ठी यासाम्। अन्तरमवकाशमाश्रिता॥ १७॥ गोवर्धन॰ गवां छेदनस्थानम्॥ १८॥ वृत्त चरित्रम्॥ २०॥ अनावृता॰ स्वपरपुरुषविवेकहीनाः॥ २३॥ सूक्तानि विनोदवचनानि। हेहते भोलिङ्गताडिते इत्याक्रोशे द्वित्वम्। संधिश्छान्दस। स्वामिहते भर्तृहते इति च तद्वत्॥ २४॥ पर्वसु उत्सवदिनेषु आक्रोशन्त्य॰ गालयन्त्य.। तासां पतिरिति शेष॥ २५॥ खरादियानैः॥ २९॥ मथित तक्रम्॥ ३०॥ भूयस बहून्॥ ३१॥ वाराह विड्वराहजम्॥ ३८॥ सप्तत्रिंशोऽध्याय॥ ३७॥

धानाश्च ये न खादन्ति तेषां जन्म निरर्थकम् ३८
एवं गायन्ति ये मत्ताः शीधुना पीलुकावने ।
सबालवृद्धाः क्रन्दन्ति तेषां धर्मः कथं भवेत् ॥ ३९
यत्र लोकेश्वरः कृष्णो देवदेवो जनार्दनः ।
विस्मृतः पुरुषैरुग्रैस्तेषां धर्मः कथं भवेत् ॥ ४०
इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
यदन्योऽप्युक्तवानस्मान्ब्राह्मणः कुरुसंसदि ॥ ४१
पञ्चनद्यो वहन्त्येता यत्र पीलुवनान्युत ।
शतद्रुश्च विपाशा च तृतीयैरावती तथा ॥ ४२
चन्द्रभागा वितस्ता च सिन्धुषष्ठा महानदी ।
आरट्टा नाम बाह्लीका एतेष्वार्यो हि नो वसेत् ४३
व्रात्यानां दासमीयानां विदेहानामयज्वनाम् ।
न देवाः प्रतिगृह्णन्ति पितरो ब्राह्मणास्तथा ॥ ४४
तेषां प्रनष्टधर्माणां बाह्लीकानामिति श्रुतिः ।
ब्राह्मणेन यथा प्रोक्तं विदुषा साधुसंसदि ॥ ४५
काष्ठकुण्डेषु बाह्लीका मृण्मयेषु च भुञ्जते ।
सक्तुमद्यावलिप्तेषु श्वावलीढेषु निर्घृणाः ॥ ४६
आविकं चौष्ट्रिकं चैव क्षीरं गार्दभमेव च ।
तद्विकारांश्च बाह्लीकाः खादन्ति च पिबन्ति च ४७
पात्रसंकरिणो जाल्माः सर्वान्नक्षीरभोजनाः ।
आरट्टा नाम बाह्लीका वर्जनीया विपश्चिता ॥ ४८
इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
यदन्योऽप्युक्तवान्मह्यं ब्राह्मणः कुरुसंसदि ॥ ४९
युगन्धरे पयः पीत्वा प्रोष्य चाप्यच्युतस्थले ।
तद्भद्भूतिलये स्नात्वा कथं स्वर्गं गमिष्यति ॥ ५०
पञ्चनद्यो वहन्त्येता यत्र निःसृत्य पर्वतात् ।
आरट्टा नाम बाह्लीका न तेष्वार्यो ह्यहं वसेत् ५१
बाह्लीका नाम हीकश्च विपाशायां पिशाचकौ ।
तयोरपत्यं बाह्लीका नैषा सृष्टिः प्रजापतेः ॥ ५२
ते कथं विविधान्धर्माञ्ज्ञास्यन्ते हीनयोनयः ॥ ५३
कारस्करान्माहिषकान्करम्भान्कटकालिकान् ।
कर्करान्वीरकान्वीरा उन्मत्तांश्च विवर्जयेत् ॥ ५४
इति तीर्थानुसंचारी राक्षसी काचिदब्रवीत् ।
एकरात्रमुषित्वेह महोलूखलमेखला ॥ ५५
आरट्टा नाम ते देशा बाह्लीकं नाम तद्वनम् ।
वसातिसिन्धुसौवीरा इति प्रायोऽतिकुत्सिताः ५६

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

शल्यकर्णयोर्वाक्कलहः ॥ १ ॥ दुर्योधनेन तयोः सान्त्वनम् ॥ २ ॥

कर्ण उवाच ।
इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
उच्यमानं मया सम्यक्त्वमेकाग्रमनाः शृणु ॥ १
ब्राह्मणः किल नो गेहमध्यगच्छत्पुराऽतिथिः ।
आचारं तत्र संप्रेक्ष्य प्रीतो वचनमब्रवीत् ॥ २
मया हिमवतः शृङ्गमेकेनाध्युषितं चिरम् ।
दृष्टाश्च बहवो देशा नानाधर्मसमावृताः ॥ ३
न च केन च धर्मेण विरुध्यन्ते प्रजा इमाः ।
सर्वाश्चाप्याचरन्धर्मं यदुक्तं वेदपारगैः ॥ ४
अटता तु मया देशान्नानाधर्मसमाकुलान् ।
आगच्छता महाराज बाह्लीकेषु निशामितम् ॥ ५
तत्र वै ब्राह्मणो भूत्वा पुनर्भवति क्षत्रियः ।
वैश्यः शूद्रश्च बाह्लीकस्ततो भवति नापितः ॥ ६
नापितश्च ततो भूत्वा पुनर्भवति ब्राह्मणः ।
द्विजो भूत्वा च तत्रैव पुनर्दासोऽभिजायते ॥ ७
भवन्त्येककुले विप्राः शिष्टा ये कामचारिणः ।
गान्धारा मद्रकाश्चैव बाह्लीकाश्चाप्यतेजसः ॥ ८
एतन्मया श्रुतं तत्र धर्मसंकरकारकम् ।
कृत्स्नामटित्वा पृथिवीं बाह्लीकेषु विपर्ययः ॥ ९
इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।

निशामित श्रुतम् ॥ ५ ॥ ब्राह्मणो भूत्वेत्यादि तज्जातीय-कर्माचरणनिबन्धनम् ॥ ६ ॥ विप्रा. प्रसृष्टा इति पाठे कुले एकएव विप्रो भवत्यन्ये भ्रातरः प्रसृष्टाः संकीर्णक्रिया इत्यर्थः ॥ ८ ॥ तत्र बाह्लीकेषु । धर्मसकरकारको विपर्यय श्रुत इति लिङ्गं विपरिणेयम् । विपर्ययो विहितवैपरीत्यम् ॥ ९ ॥

यदप्यन्योऽब्रवीद्वाक्यं बाह्लीकानां विकुत्सितं १०
आनीयेहाक्षता काचिदारट्टात्किल दस्युभिः।
अधर्मतश्चोपयाता सा तानभ्यशपत्ततः॥ ११
बालां बन्धुमतीं यन्मामधर्मेणोपगच्छथ।
तस्मात्कुमार्यः स्वैरिण्यो भविष्यन्ति कुलेषु वः॥१२
न चैवास्मात्प्रमोक्षध्वं घोराच्छापान्नराधमाः।
तस्मात्तेषां भागहरः कथं धर्मान्वदिष्यसि॥ १३
कुरवः सहपाञ्चालाः साल्वा मात्स्याः सनैमिशाः।
कोसलाः काशपौण्ड्राश्च कालिङ्गा मागधास्तथा१४
चेदयश्च महाभागा धर्मं जानन्ति शाश्वतम्।
नानादेशेष्वसन्तश्च प्रायो बाह्यालयानृते॥ १५

आमत्स्येभ्यः कुरुपाञ्चालसाल्वा
आनैमिशाश्चेदयो ये विशिष्टाः।
धर्मं पुराणमुपजीवन्ति सन्तो
मद्रानृते पाञ्चनदांश्च जिह्मान्॥ १६

एवं विद्वान्धर्मकथासु राजं-
स्तूष्णींभूतः शल्य भवेः सदा त्वम्।
त्वं तस्य गोप्ता च जनस्य राजा
षड्भागहर्ता शुभदुष्कृतस्य॥ १७

अथवा दुष्कृतस्य त्वं हर्ता तेषामरक्षिता।
रक्षिता पुण्यभाग्राजा प्रजानां त्वं ह्यपुण्यभाक् १८
पूज्यमाने पुरा धर्मे सर्वदेशेषु शाश्वते।
धर्मं पाञ्चनदं दृष्ट्वा धिगित्याह पितामहः॥ १९
व्रात्यानां दाशकीयानां कृतेऽप्यशुभकर्मणाम्।
ब्रह्मणा निन्दितान्धर्मान्कश्चित्सिद्धात्मकोऽब्रवीत्
इति पाञ्चनदं धर्ममवमेने पितामहः।
स्वधर्मस्थेषु वर्णेषु सोऽप्येतान्नाभ्यपूजयत्॥ २१
इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते।
कल्माषपादः सरसि निमज्ज्याक्षसोऽब्रवीत्॥ २२
क्षत्रियस्य मलं भैक्ष्यं ब्राह्मणस्याश्रुतं मलम्।
मलं पृथिव्या बाह्लीकाः स्त्रीणां कौतूहलं मलम्॥२३
निमज्जमानमुद्धृत्य कश्चिद्राजा निशाचरम्।
अपृच्छत्तेन चाख्यातं तच्छृणुष्व नराधिप॥ २४
मानुषाणां मलं म्लेच्छा म्लेच्छानां मुष्टिका मलम्।
मुष्टिकानां मलं षण्ढाः षण्ढानां राजयाजकाः॥२५
राजयाजकयाज्यानां मद्रकाणां च यन्मलम्।
तद्भवेद्वै तव मलं यद्यस्मान्न विमुञ्चसि॥ २६
इति रक्षोपसृष्टेषु विषवीर्यहतेषु च।
विद्वद्भिर्भेषजं दृष्टं संसिद्धवचनोत्तरम्॥ २७

ब्राह्या पञ्चालाः कौरवेयास्तु धर्म्याः
सत्या मत्स्याः शूरसेनाश्च याज्याः।
प्राच्या दासा वृषला दाक्षिणात्याः
स्तेना बाह्लीकाः संकरा वै सुराष्ट्राः॥ २८

कृतघ्नता परवित्तापहारो
मद्यपानं गुरुदारावमर्दः।
वाक्पारुष्यं गोवधो रात्रिचर्या
बहिर्गेहं परवस्त्रोपभोगः॥ २९

येषां धर्मस्तान्प्रति नास्त्यधर्मो
ह्यारट्टजान्पाञ्चनदान्धिगस्तु।
आपाञ्चालाः कुरवो नैमिशाश्च
मत्स्याश्चैवाप्यनुजानन्ति धर्मम्।
अथोदीच्याश्चेदयो मागधाश्च
शिष्टान्धर्मानुपजीवन्ति वृद्धाः॥ ३०

प्राचीं दिशं श्रिता देवा जातवेदःपुरोगमाः।
दक्षिणा पितृभिर्गुप्ता यमेन शुभकर्मणा॥ ३१
प्रतीचीं वरुणः पाति पालयन्नसुरान्बहून्।
उदीचीं भगवान्सोमो ब्रह्मा च ब्राह्मणैः सह ३२
रक्षःपिशाचान्हिमवान्गुह्यकान्गन्धमादनः।

कृते कृतयुगे॥ २०॥ नाभ्यपूजयत् न प्रशसितवान्॥ २१॥ म्लेच्छाः पापरता धर्माधर्मविचारहीनाः। म्लेच्छ पापरते जातिभेदे स्यादपभाषणे इति विश्व। षढा वर्षवरा॥ २५॥ रक्षोपसृष्टेषु रक्षसा उपद्रुतेषु॥ २७॥ प्राच्या दासाः शूद्रधर्माणः। दाशा इति पाठे मत्स्यजीविनः। वृष धर्म लान्ति आददते ते वृषला. धर्मसग्रहपरा. धर्मद्रोहिण इति वा॥ २८॥ बहिर्गेह रात्रिचर्या प्रच्छन्न चौर्यपारदार्यादि॥ २९॥ प्राचीमित्यत्र जातवेद इत्यनेनाग्नेयीसहिता प्राची देवानामाश्रया। दक्षिणा पितृणां तत्रैव श्राद्धादिधर्मो दृश्यते॥ ३१॥ एव प्रतीची वरुण उदीची सोम इति कुबेरेशानयोर्ग्रहणम्। परिशेषान्नैर्ऋत्यां वायव्यां च बाह्लीकाश्रयाया नैर्ऋतास्त्वादृशा वातूलाश्च सन्तीत्यर्थ.॥ ३२॥ तथा रक्ष.पिशाचाश्च हिमवन्तं

ध्रुवं सर्वाणि भूतानि विष्णुः पाति सुरोत्तमः॥३३
इङ्गितज्ञाश्च मगधाः प्रेक्षितज्ञाश्च कोसलाः।
अर्धोक्ताः कुरुपाञ्चालाः सर्वोक्ता दाक्षिणापथाः॥
पार्वतीयाश्च विषमा यथैव गिरयस्तथा।
सर्वज्ञा यवना राजञ्शूराश्चैव विशेषतः।
म्लेच्छाः स्वसंज्ञानियता नानुक्तमितरे जनाः॥३५
प्रतिरब्धास्तु बाह्लीका न च केचन मद्रकाः।
स त्वमेतादृशः शल्य नोत्तरं वक्तुमर्हसि॥ ३६
एवं ज्ञात्वा जोषमास्स्व प्रतीपं
मा स्म क्रुद्धः पापभृतां वरिष्ठ।
पूर्वं हत्वा त्वां सपुत्रं बलेश्च
पश्चाद्धंस्ये वासुदेवार्जुनौ च॥ ३७

शल्य उवाच।

आतुराणां परित्यागः स्वदारसुतविक्रयः।
अङ्गे प्रवर्तते कर्ण येषामधिपतिर्भवान्॥ ३८
रथातिरथसङ्ख्यायां यत्त्वां भीष्मस्तदाब्रवीत्।
तान्विदित्वाऽऽत्मनो दोषान्निर्मन्युर्भव मा क्रुधः॥
सर्वत्र ब्राह्मणाः सन्ति सन्ति सर्वत्र क्षत्रियाः।
वैश्याः शूद्रास्तथा कर्ण स्त्रियः साध्व्यश्च सुव्रताः॥
रमन्ते चोपहासेन पुरुषाः पुरुषैः सह।
अन्योन्येन रताः क्षीबा देशेदेशे च मैथुनम्॥४१
परवाच्येषु निपुणः सर्वो भवति सर्वदा।
आत्मवाच्यं न जानीते जानन्नपि च मुह्यति॥ ४२
सर्वत्र सन्ति राजनः स्वंस्वं धर्ममनुव्रताः।
दुर्मनुष्यान्निगृह्णन्ति सन्ति सर्वत्र धार्मिकाः॥४३
न कर्ण देशसामान्यात्सर्वः पापं निषेवते।
यादृशाः स्वस्वभावेन देशांस्तांस्तादृशान्विदुः॥४४

सञ्जय उवाच।

ततो दुर्योधनो राजा कर्णशल्यावबारयत्।
सखिभावेन राधेयं शल्यं सौजन्यकेन च॥ ४५
ततो निवारितः कर्णो धार्तराष्ट्रेण मारिष।
प्रहस्य तत्र राजेन्द्र याहि शल्येत्यचोदयत्॥ ४६

॥ इति श्रीमन्महाभारते कर्णपर्वणि अष्टत्रिंशोऽध्यायः॥ ३८॥

एकोनचत्वारिंशोऽध्यायः॥ ३९॥

शल्यकर्णयोः संवादः॥ १॥ सेनाद्वयस्य परस्परमेलनम्॥ २॥

सञ्जय उवाच।

ततः परानीकमिदं व्यूहमप्रतिमं कृतम्।
समीक्ष्य कर्णः पार्थानां धृष्टद्युम्नाभिरक्षितम्॥ १
प्रययौ रथघोषेण सिंहनादरवेण च।
वादित्राणां च निनदैः कम्पयन्निव मेदिनीम्॥ २

सञ्जय उवाच।

ततः प्रयान्तं राधेयं मद्रराजः स्मयन्निव।
अवधूय इदं वाक्यमब्रवीत्कुरुसन्निधौ॥ ३
चमूं तवेमां विपुलां समृद्धा-
मसङ्ख्येयामश्वनराकुलां च।
तथा प्रवेष्टा समरे धनञ्जयः
कक्षं दहन्दीप्त इवाश्रयाशी॥ ४
रथे स्थितौ वीरवरौ वरेण्यौ
सिंहस्कन्धौ लोहितपद्मनेत्रौ।
द्रष्टा भवानद्य विना प्रयत्ना-
त्तथाहि मे शकुना वेदयन्ति॥ ५

नगोत्तमम्। गुह्यकाश्च महाराज पर्वत गन्धमादनम् इति झ-पाठः। एवमपि सबाह्लीकान्सनैर्ऋतान् देशान् विष्णु पाति पर्जन्यवत् न देशान्तरेष्विव बाह्लीकेषु विशेषतो देवतानुग्रहो दृश्यत इत्यभिप्राय॥ ३३॥ अतएव तेषा मौढ्य वर्णयति इङ्गितज्ञाश्चेति। अर्धोक्ताः कुरुपाञ्चाला साल्वा कृत्स्नानुशासनाः इति झ. पाठ.॥ ३४॥ विषमाः दुःखसाध्याः। सर्व जान-

न्तोऽपि यवना म्लेच्छाश्च स्वसंज्ञाया स्वीयै कृतो यो धर्मसकेतस्तत्रैव नियता'। वैदिक धर्म न मानयन्तीत्यर्थः। इतरे त्वनुक्त हित नावबुध्यन्ते॥३५॥ प्रतिरथा इतिपाठे हितवादिनि प्रतिकूला। गुरुद्रोहिण इत्यर्थ। तादृशश्च त्व हितोपदेष्टार मां निन्दसीत्यर्थः॥ ३६॥ अष्टत्रिंशोऽध्याय'॥ ३८॥

अद्य द्रष्टाऽसि तं वीरं श्वेताश्वं कृष्णसारथिम्।
निघ्नन्तं शात्रवान्सङ्ख्ये यं कर्ण परिपृच्छसि ॥ ६
अद्य तौ पुरुषव्याघ्रौ लोहिताक्षौ परंतपौ।
वासुदेवार्जुनौ कर्ण द्रष्टाऽस्यमितविक्रमौ ॥ ७
सारथिर्यस्य गोविन्दो गाण्डीवं यस्य कार्मुकम्।
तं चेद्धन्ताऽसि राधेय त्वं नो राजा भविष्यसि ॥८
प्रवात्येष महावायुरभितस्तव वाहिनीम्।
क्रव्यादा व्याहरन्त्येते मृगाः कुर्वन्ति भैरवम् ॥ ९
पश्य कर्ण महाघोरं भयं वै रोमहर्षणम्।
अर्कं जीमूतसंकाशः कबन्धो वार्य तिष्ठति ॥ १०
पश्य यूथं मृगशतं मृगाणां सर्वतोदिशम्।
ररास दीप्तलाङ्गूलमादित्यमभि संस्थितम् ॥ ११
पश्य काकांश्च गृध्रांश्च समवेतान्सहस्रशः।
आदित्यमभिवीक्षन्ते ह्यशिवाः कर्ण सस्वराः ॥ १२
श्वेतवाजिसमायुक्ते तव कर्ण महारथे।
पताकाः प्रज्वलन्त्येता ध्वजश्चातीव कम्पते ॥१३
उदीर्यतो हयान्पश्य महाकायान्महाजवान्।
प्लवमानान्महावीर्यानाकाशे गरुडानिव ॥ १४
ध्रुवमेषु निमित्तेषु भूमिमावृत्य पार्थिवाः।
स्वप्स्यन्ति निहताः कर्ण शतशोऽथ सहस्रशः ॥१५
शङ्खानां तुमुलः शब्दः श्रूयते रोमहर्षणः।
आनकानां च राधेय मृदङ्गानां च हन्यताम् ॥ १६
शृणु शब्दान्बहुविधान्नराश्वरथवाजिनाम्।
ज्यातलत्रेषुशब्दांश्च शृणु कर्ण महात्मनाम् ॥ १७
हेमरूप्यप्रमृष्टानां वाससां शिल्पिनिर्मिताः।
सहेमचन्द्रतारामाः पताकाः किङ्किणीयुताः॥१८
नानावर्णा रणे भान्ति श्वसनेन प्रकम्पिताः।
पश्य कर्णार्जुनस्यैताः सौदामिन्य इवाम्बुदे ॥१९
ध्वजाः कणकणायन्ते वातेनातिसमीरिताः।
सपताकरथाश्चापि पाञ्चालानां महात्मनाम्॥२०
एष रेणुः समुद्धूतो दिवमावृत्य तिष्ठति।
गजवाजिप्रणुन्ना च कम्पते कर्ण मेदिनी ॥ २१
श्रूयते मेघसंकाशो रथनेमिस्वनस्तथा।
पश्य कुन्तीसुतं वीरं बीभत्सुमपराजितम्।
प्रहरिष्यन्तमायान्तं कपिप्रवरकेतनम् ॥ २२
गजाश्वरथपत्त्योघांस्तावकान्युधि निघ्नतः।
ध्वजाग्रं दृश्यते तस्य ज्याशब्दश्चैव श्रूयते ॥ २३
एष संशप्तकान्भूयस्तानेवाभिमुखो गतः।
करोति कदनं चैष संग्रामे द्विषतां बली ॥ २४
सञ्जय उवाच।
इति ब्रुवाणं मद्रेशं कर्णः प्रोवाच मन्युमान् ॥ २५
पश्य संशप्तकैः क्रुद्धैः समन्तात्समभिद्रुतः।
एष सूर्य इवाम्भोदैश्छन्नः पार्थो न दृश्यते।
एष दान्तोऽर्जुनः शल्य निमग्नः शोकसागरे ॥ २६
शल्य उवाच।
वरुणं कोऽम्भसा हन्यादिन्धनेन च कोऽनलम्।
कोवाऽनिलं निगृह्णीयात्पिबेद्वा को महार्णवम् २७
ईदृग्रूपमहं मन्ये पार्थस्य युधि निर्जयम्।
न हि शक्योऽर्जुनो जेतुं युधि देवासुरैरपि ॥ २८
अथैवं परितोषस्ते वाग्भिस्त्वं सुमना भव।
न हि शक्यो युधा जेतुमन्यं कुरु मनोरथम् ॥ २९
बाहुभ्यामुद्धरेद्भूमिं दहेत्क्रुद्ध इमाः प्रजाः।
पातयेत्त्रिदिवादेवान्नार्जुनं समरे जयेत् ॥ ३०
पश्य कुन्तीसुतं भीमं वीरमक्लिष्टकारिणम्।
प्रहरन्तं महाबाहुं स्थितं मेरुमिवाचलम् ॥ ३१
अमर्षी पुरुषव्याघ्रः सदा वैरमनुस्मरन्।
एष भीमो जयप्रेप्सुर्युधि तिष्ठति वीर्यवान् ॥ ३२
एष धर्मभृतां श्रेष्ठो धर्मराजो युधिष्ठिरः।
तिष्ठत्यसुकरः सङ्ख्ये परैः परपुरंजयः ॥ ३३
एतौ च पुरुषव्याघ्रावाश्विनेयौ महारथौ।
नकुलः सहदेवश्च तिष्ठतो युधि दुर्जयौ ॥ ३४
एते तिष्ठन्ति कार्ष्णेयाः पञ्च पञ्चाचला इव।
योत्स्यमाना महावीर्या भीमार्जुनसमा युधि ॥ ३५
एते द्रुपदपुत्राश्च धृष्टद्युम्नपुरोगमाः।
हीनाः सत्यजिता वीरास्तिष्ठन्ति परमौजसः ॥३६
यत्र कृष्णार्जुनौ वीरौ यत्र राजा युधिष्ठिरः।
तत्र धर्मश्च सत्यं च यतो धर्मस्ततो जयः ॥ ३७
इति संवदतोरेव तयोः पुरुषसिंहयोः।
ते सेने समसज्जेतां गङ्गायमुनवद्बृशम् ॥ ३८

॥ इति श्रीमन्महाभारते कर्णपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः ॥ ४० ॥

दुर्योधनेन सेनाप्रोत्साहनम् ॥ १ ॥ भीमेन दुर्योधनपराजयपूर्वकं गजानीकवधः ॥ २ ॥

सञ्जय उवाच ।
दुर्योधनस्ततः कर्णमुपेत्य भरतर्षभ ।
अब्रवीन्मद्रराजं च तथैवान्यान्महारथान् ॥ १
यदृच्छयाऽयमव्यग्रो धर्मः परमकः सखा ।
सुखिनः क्षत्रियाः कर्ण लभन्ते युद्धमीदृशम् ॥ २
यादृशं क्षत्रियैः शूरैः शूराणां दीव्यतां युधि ।
इष्टं भवति राधेय तदिदं समुपस्थितम् ॥ ३
हत्वा तु पाण्डवान्युद्धे स्थिरामुर्वीं प्रशासथ ।
निहता वा परैर्युद्धे वीरलोकानवाप्स्यथ ॥ ४
दुर्योधनस्य वचनं श्रुत्वा तत्क्षत्रियर्षभाः ।
सिंहनादानुदक्रोशन्वादित्राणि च जघ्निरे ॥ ५
तस्मिन्प्रमुदिते सैन्ये त्वदीये भरतर्षभ ।
हर्षयंस्तावकान्योधान्द्रौणिर्वचनमब्रवीत् ॥ ६
प्रत्यक्षं सर्वसैन्यानां भवतां चापि पश्यताम् ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ ७
स तेनाहममर्षेण पित्र्यं चापि भारत ।
धृष्टद्युम्नमहत्वाऽहं न विमोक्ष्यामि दंशनम् ॥ ८
कृत्वाऽनृतां प्रतिज्ञां वो नाप्स्यि प्राप्ता महत्फलम् ।
अर्जुनं भीमसेनं च यश्च मां प्रतियोत्स्यति ।
सर्वांस्तान्प्रमथिष्यामि इति मे निश्चिता मतिः ॥ ९
सञ्जय उवाच ।
एवमुक्ते ततः सर्वा हर्षिता भारती चमूः ।
अभ्यवर्तत कौन्तेयांस्तथा तां चापि पाण्डवाः १०

स सन्निपातो रथयूथपानां
महाहवे भारत लोभनीये ।
जनक्षयः कालयुगान्तकल्पः
प्रावर्ततात्रे कुरुसृञ्जयानाम् ॥ ११

ततः प्रवृत्ते युधि संप्रहारे
भूतानि सर्वाणि सदैवतानि ।
अत्सन्समेतानि सहाप्सरोभि-
र्निरीक्षतीभिर्युधि वीरसङ्घान् ॥ १२

दिव्यैश्च गन्धैः परमैश्च पुष्पै-
रन्यैश्च रत्नैर्विविधैर्नराग्र्याः ।
रणेषु कर्मोद्वहतः प्रहृष्टा-
ननन्दयन्नप्सरसः प्रहृष्टाः ॥ १३

समीरणस्तांस्तु निषेव्य गन्धा-
न्निषेवते तानपि योधमुख्यान् ।
निषेव्यमाणास्त्वनिलेन योधाः
परस्परं चुक्रुशुराजिमध्ये ॥ १४

तथा तु तस्मिंस्तुमुले प्रवृत्ते
दुर्योधनः क्रोधममृष्यमाणः ।
'अवेक्ष्य भीमं बलमध्यसंस्थः
समार्पयत्क्षुद्रकाणां शतेन ॥ १५

दुःशासनश्चित्रसेनश्च वीर-
स्तथोलूकः कितवः सौबलश्च ।
गजानीकैः सर्वतो भीमसेनं
तथाविषक्तं सहसैवाभ्यगच्छन् ॥ १६

तमापतन्तं संप्रेक्ष्य गजानीकं वृकोदरः ।
दुर्योधनं महाबाहुः शरवर्षैरवाकिरत् ॥ १७
दुर्योधनं ततो भीमः सायकैर्वज्रसंनिभैः ।
पाण्डवो विमुखीकृत्य गजानभ्यद्रवद्बली ॥ १८
ततः पावकसङ्काशैर्भीमबाणैरवक्रगैः ।
शलभैरिव नागांस्तानर्दयामास पाण्डवः ॥ १९
ततः कुञ्जरयूथानि भीमसेनो महाबलः ।
व्यधमन्निशितैर्बाणैर्महावातो घनानिव ॥ २०
नित्यमत्ताश्च मातङ्गाः शूरैर्मत्तैरधिष्ठिताः ।
आरोहकैर्महामात्रैस्तोमराङ्कुशपाणिभिः ॥ २१
सुवर्णजालैः प्रच्छन्ना मणिजालैश्च कुञ्जराः ।
रूप्यजाम्बूनदाभासः क्षुरमालाभ्यलङ्कृताः ॥ २२
वध्यमानाः शरैः राजन्भीमसेनेन ते गजाः ।
विभिन्नहृदयाः केचित्तत्रैवाभ्यपतन्भुवि ॥ २३
निपतद्भिर्महावेगैर्हेमभाण्डविभूषितैः ।
अशोभत महाराज धातुचित्रैरिवाचलैः ॥ २४

दीप्ताभरणवद्भिश्च गजपृष्ठनिपातितैः ।
संगरः शुशुभे राजन्क्षीणपुण्यैरिवामरैः ॥ २५
महापरिघसंकाशौ चन्दनागरुरूषितौ ।
अपश्यं भीमसेनस्य धनुर्विक्षिपतो भुजौ ॥ २६
तस्य ज्यातलनिर्घोषमस्यतः सव्यदक्षिणम् ।
तं श्रुत्वाऽभ्यद्रवन्नागा भीमसेनभयार्दिताः ॥ २७
तस्य भीमस्य तत्कर्म राजन्नेकस्य धीमतः ।
अपश्याम महाराज तदद्भुतमिवाभवत् ॥ २८

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे चत्वारिंशोऽध्यायः ॥ ४० ॥

एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

सेनाद्वये व्यूहरचनावर्णनम् ॥ १ ॥

सञ्जय उवाच ।
ततः परानीकमिदं व्यूहमप्रतिमं महत् ।
समीक्ष्य कर्णः पार्थानां धृष्टद्युम्नाभिरक्षितम् ॥ १
प्रययौ रथघोषेण सिंहनादरवेण च ।
वादित्राणां च निनदैः कम्पयन्निव मेदिनीम् ॥ २
वेपमान इव क्रोधाद्युद्धशौण्डः परंतपः ।
प्रतिव्यूह्य महातेजा यथावद्भरतर्षभ ॥ ३
व्यधमत्पाण्डवीं सेनामासुरीं मघवानिव ।
युधिष्ठिरं चाभ्यहनदपसव्यं चकारह ॥ ४
कर्णस्य रथघोषेण मौर्वीनिष्पेषणेन च ।
सुसंग्राहेण रश्मीनां समकम्पन्त सृञ्जयाः ॥ ५
तानि सर्वाणि सैन्यानि कर्णं दृष्ट्वा विशांपते ।
बभूवुः संप्रहृष्टानि तावकानि युयुत्सया ॥ ६
अश्रूयन्त ततो वाचस्तावकानां विशांपते ।
कर्णार्जुनमहायुद्धमेतदद्य भविष्यति ॥ ७
अद्य दुर्योधनो राजा हतामित्रो भविष्यति ।
अद्य कर्णं रणे दृष्ट्वा फल्गुनो विद्रविष्यति ॥ ८
अद्य तावद्वयं युद्धे कर्णस्यैवानुगामिनः ।
कर्णबाणमयं भीमं युद्धं द्रक्ष्याम संयुगे ॥ ९
चिरकालेप्सितमिदमद्येदानीं भविष्यति ।
अद्य द्रक्ष्याम संग्रामं घोरं देवासुरोपमम् ॥ १०
अद्येदानीं महद्युद्धं भविष्यति भयानकम् ।
अद्येदानीं जयो नित्यमेकस्यैकस्य वा रणे ॥ ११
अर्जुनं किल राधेयो वधिष्यति महारणे ।
अथवा कं नरं लोके न स्पृशन्ति मनोरथाः ॥ १२
इत्युक्त्वा विविधा वाचः कुरवः कुरुनन्दन ।
आजघ्नुः पटहांश्चैव तूर्याश्चैव सहस्रशः ॥ १३
भेरीनादांश्च विविधान्सिंहनादांश्च पुष्कलान् ।
मुरजानां महाशब्दानानकानां महारवान् ॥ १४
नृत्यमानाश्च बहुशस्तर्जमानाश्च मारिष ।
अन्योन्यमभ्ययुर्युद्धे युद्धरङ्गगता नराः ॥ १५
तेषां पदाता नागानां पादरक्षाः समन्ततः ।
पट्टसासिधराः शूराश्चापबाणमुसुण्ठिनः ॥ १६
भिण्डिपालधराश्चैव शूलहस्ताः सुचक्रिणः ।
तेषां समागमो घोरो देवासुररणोपमः ॥ १७
धृतराष्ट्र उवाच ।
कथं सञ्जय राधेयः प्रत्यव्यूहत पाण्डवान् ।
धृष्टद्युम्नमुखान्सङ्ख्ये भीमसेनाभिरक्षितान् ।
सर्वानेव महेष्वासानजय्यानमरैरपि ॥ १८
के च प्रपक्षौ पक्षौ वा मम सैन्यस्य सञ्जय ।
प्रविभज्य यथान्यायमवतस्थुः सुदंशिताः ॥ १९
कथं पाण्डुसुताश्चापि प्रत्यव्यूहन्त मामकान् ।
कथं चैतन्महद्युद्धं प्रावर्तत सुदारुणम् ॥ २०
क्व च बीभत्सुरभवद्यत्कर्णोऽन्याद्युधिष्ठिरम् ।
को ह्यर्जुनस्य सान्निध्ये शक्तो जेतुं युधिष्ठिरम् ॥ २१
सर्वभूतानि यो ह्येकः खाण्डवे जितवान्पुरा ।
कस्तमन्यस्तु राधेयात्प्रतियुध्येज्जिजीविषुः ॥ २२
सञ्जय उवाच ।
शृणु व्यूहस्य रचनामर्जुनश्च यथा गतः ।
परिवार्य नृपान्सर्वान्सङ्ग्रामश्चाभवद्यथा ॥ २३
कृपः शारद्वतो राजन्मागधश्च तरस्विनः ।
सात्वतः कृतवर्मा च दक्षिणं पक्षमाश्रिताः ॥ २४

तेषां प्रपक्षे शकुनिरुलूकश्च महारथः ।
साद्दिभिर्विमलप्रासैस्तदानीमभ्यरक्षताम् ॥ २५
गान्धारैश्चाप्यसंभ्रान्तैः पार्वतीयैश्च दुर्जयैः ।
शलभानामिव व्रातैः पिशाचैरिव दुर्दृशैः ॥ २६
चतुर्विंशत्सहस्राणि रथानामनिवर्तिनाम् ।
संशप्तका युद्धशौण्डा वामपार्श्वमपालयन् ॥ २७
समन्वितास्तव सुतैः कृष्णार्जुनजिघांसवः ।
तेषां प्रपक्षाः काम्भोजाः शकाश्च यवनैः सह ॥२८
निदेशात्सूतपुत्रस्य सरथाश्वेभपत्तयः ।
आह्वयन्तोऽर्जुनं तस्थुः केशवं च महाबलम् ॥२९
ततः सेनामुखे कर्णोऽप्यवातिष्ठत दंशितः ।
चित्रवर्माङ्गदः स्रग्वी पालयन्वाहिनीमुखम् ॥ ३०
रक्षमाणैः सुसंरब्धैः पुत्रैः शस्त्रभृतां वरः ।
वाहिनीं प्रमुखे वीरः संप्रकर्षन्नशोभत ॥ ३१
अशोकस्तु महाबाहुः सूर्यवैश्वानरप्रभः ।
महाद्विपस्कन्धगतः पिङ्गाक्षः प्रियदर्शनः ।
दुःशासनो वृतः सैन्यैः स्थितो व्यूहस्य पृष्ठतः ॥३२
तन्मध्ये स महाबाहुः स्वयं दुर्योधनो नृपः ।
चित्राश्वैश्चित्रसन्नाहैः सोदर्यैरभिरक्षितः ॥ ३३
रक्ष्यमाणो महावीर्यैः सहितैर्मद्रकेकयैः ।
अशोभत महाराज देवैरिव शतक्रतुः ॥ ३४
अश्वत्थामा कुरूणां च ये प्रवीरा महारथाः ।
नित्यमत्ताश्च मातङ्गाः शूरैर्म्लेच्छैः समन्विताः ।
अन्वयुस्तद्रथानीकं क्षरन्त इव तोयदाः ॥ ३५
ते ध्वजैर्वैजयन्तीभिर्व्वलद्भिः परमायुधैः ।
सादिभिश्चास्थिता रेजुर्द्रुमवन्त इवाचलाः ॥ ३६
तेषां पदातिनागानां पादरक्षाः सहस्रशः ।
पट्टसासिधराः शूरा बभूवुरनिवर्तिनः ॥ ३७
सादिभिः स्यन्दनैर्नागैरधिकं समलङ्कृतैः ।
स व्यूहराजो विबभौ देवासुरचमूपमः ॥ ३८
बार्हस्पत्यः सुविहितो नायकेन विपश्चिता ।
नृत्यतीव महाव्यूहः परेषां भयमादधत् ॥ ३९
तस्य पक्षप्रपक्षेभ्यो निष्पतन्ति युयुत्सवः ।
हस्त्यश्वरथमातङ्गाः प्रावृषीव बलाहकाः ॥ ४०
ततः सेनामुखे कर्णं दृष्ट्वा राजा युधिष्ठिरः ।
धनंजयममित्रघ्नमेकवीरमुवाच ह ॥ ४१
पश्यार्जुन महाव्यूहं कर्णेन विहितं रणे ।
युक्तं पक्षैः प्रपक्षैश्च परानीकं प्रकाशते ॥ ४२
तत्समीपगतं ह्येतत्प्रत्यमित्रं महद्बलम् ।
यथा नाभिभवत्यस्मांस्तथा नीतिर्विधीयताम् ४३
सञ्जय उवाच ।
एवमुक्तोऽर्जुनो राज्ञा प्राञ्जलिर्नृपमब्रवीत् ॥ ४४
यथा यथा भवानाह तत्तथा न तदन्यथा ।
यत्तस्य विहितं कार्यं तत्करिष्यामि सुव्रत ।
प्रधानमथ चैवास्य विनाशं च करोम्यहम् ॥ ४५
तस्मात्त्वं जहि राधेयं भीमसेनः सुयोधनम् ।
वृषसेनं च नकुलः सहदेवोऽपि सौबलम् ॥ ४६
दुःशासनं शतानीको हार्दिक्यं शिनिपुङ्गवः ।
धृष्टद्युम्नो द्रोणसुतं स्वयं योत्स्याम्यहं कृपम् ॥४७
द्रौपदेया धार्तराष्ट्राञ्शिष्टान्सह शिखण्डिना ।
ते ते च तांस्तानहितानस्माकं घ्नन्तु मामकाः ॥४८
सञ्जय उवाच ।
इत्युक्तो धर्मराजेन तथेत्युक्त्वा धनंजयः ।
व्यादिदेश स्वसैन्यानि स्वयं चागाच्चमूमुखम् ४९
धनंजयो महाराज दक्षिणं पक्षमाश्रितः ।
भीमसेनो महाबाहुर्वामं पक्षमुपाश्रितः ॥ ५०
सात्यकिर्द्रौपदेयाश्च स्वयं राजा च पाण्डवः ।
व्यूहस्य प्रमुखे तस्थुः स्वेनानीकेन संवृताः ॥५१
स्वबलेनारिसैन्यं तत्प्रत्यवस्थाप्य पाण्डवः ।
प्रत्यव्यूहत्पुरस्कृत्य धृष्टद्युम्नशिखण्डिनौ ॥ ५२
तत्सादिनागकलिलं पदातिरथसंकुलम् ।
धृष्टद्युम्नमुखं घोरमशोभत महद्बलम् ॥ ५३

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

संकुलयुद्धम् ॥ १ ॥

धृतराष्ट्र उवाच ।
तथा व्यूढेष्वनीकेषु संसक्तेषु च सञ्जय ।
संशप्तकाः कथं पार्थं कथं कर्णं च पाण्डवाः ॥ १
एतद्विस्तरशो युद्धं ब्रूहि कुशलो ह्यसि ।
न हि तृप्यामि वीराणां शृण्वानो युधि विक्रमम् २

सञ्जय उवाच ।
तत्संस्थितमथो दृष्ट्वा प्रत्यमित्रं महद्बलम् ।
प्रत्यव्यूहत्ततः कर्णो हितार्थं तनयस्य ते ॥ ३
तत्सादिनागकलिलं पदातिरथसंकुलम् ।
धृष्टद्युम्नमुखं घोरमशोभत महद्बलम् ॥ ४
पारावतसवर्णाश्वश्चन्द्रसूर्यसमद्युतिः ।
स पार्षतो बभौ धन्वी कालो विग्रहवानिव ॥ ५
पार्षतं त्वभितस्तस्थुर्द्रौपदेया युयुत्सवः ।
सानुगा दीप्तवपुषश्चन्द्रं तारागणा इव ॥ ६
अथ व्यूढेष्वनीकेषु प्रेक्ष्य संशप्तकान्रणे ।
क्रुद्धोऽर्जुनोऽभिदुद्राव व्याक्षिपन्गाण्डिवं धनुः ७
अथ संशप्तकाः पार्थमभ्यधावन्वधैषिणः ।
विजये धृतसंकल्पा मृत्युं कृत्वानिवर्तनम् ॥ ८
तदश्वसङ्घबहुलं पत्तिनागरथाकुलम् ।
उदीर्यमाणं संरब्धं धनंजयमभिद्रवत् ॥ ९
तदुद्यतं महत्सैन्यं सागरौघसमं जवे ।
पार्थवेलां समासाद्य विष्ठितं समदृश्यत ॥ १०
मृद्नन्तं शरवर्षौघैर्द्रुतमर्जुनमार्दयत् ॥ ११
स संप्रहारस्तुमुलस्तेषामासीत्किरीटिना ।
तस्यैव तु यथा राजन्निवातकवचैः सह ॥ १२
रथानश्वान्ध्वजान्नागान्पत्तीन्गजगतानपि ।
इषून्धनूंषि खड्गांश्च चक्राणि च परश्वधान् ॥ १३
सायुधानुद्यतान्बाहून्विविधान्यायुधानि च ।
चिच्छेद द्विषतां पार्थः शिरांसि च सहस्रशः ॥ १४

तस्मिन्सैन्यमहावर्ते पातालतलसन्निभे ।
निमग्नं तं रथं मत्वा नेदुः संशप्तका मुदा ॥ १५
स पुरस्तादरीन्हत्वा पुनरुत्तरतोऽवधीत् ।
दक्षिणेन च पश्चाच्च क्रुद्धो रुद्रः पशूनिव ॥ १६
अथ पाञ्चालचेदीनां सृञ्जयानां च मारिष ।
त्वदीयैः सह संग्राम आसीत्परमदारुणः ॥ १७
कृपश्च कृतवर्मा च शकुनिश्चापि सौबलः ।
हृष्टसेनाः सुसंरब्धा रथानीकप्रहारिणः ॥ १८
कोसलैः काश्यमत्स्यैश्च कारूशैः केकयैरपि ।
शूरसेनैः शूरवरैर्युयुधुर्युद्धदुर्मदाः ॥ १९
तेषामन्तकरं युद्धं देहपाप्मविनाशनम् ।
क्षत्रविट्शूद्रवीराणां धर्म्यं स्वर्ग्यं यशस्करम् ॥ २०
दुर्योधनोऽथ सहितो भ्रातृभिर्भरतर्षभ ।
गुप्तः कुरुप्रवीरैश्च मद्राणां च महारथैः ॥ २१
पाण्डवैः सह पाञ्चालैश्चेदिभिः सात्यकेन च ।
युध्यमानं रणे कर्णं कुरुवीरोऽभ्यपालयत् ॥ २२
कर्णोऽपि निशितैर्बाणैर्विनिहत्य महाचमूम् ।
प्रमृद्य च रथश्रेष्ठान्युधिष्ठिरमपीडयत् ॥ २३
विपत्रायुधदेहासून्कृत्वा शत्रून्सहस्रशः ।
युक्त्वा स्वर्गयशोभ्यां च स्वेभ्यो मुदमुदावहत् २४
तद्विगाह्य महानीकं सूतपुत्रो महारथः ।
नदीं प्रवर्तयामास शोणितौघतरङ्गिणीम् ॥ २५
शोणितोदां क्षुण्णमत्स्यां नागनक्रदुरत्ययाम् ।
मांसमज्जाकर्दमिनीं चक्रकूर्मसहोडुपाम् ॥ २६
पातितैर्मेघसंकाशैस्तत्रतत्र महाद्विपैः ।
अशनीभिरिव ध्वस्ता नदी राजन्विराजते ॥ २७
तां शरोर्मिमहावर्तां छत्रहंससमाकुलाम् ।
तनुत्रोष्णीषसङ्घाटामस्थिपाषाणसंकुलाम् ॥ २८
अपारामनपारां च शङ्खदुन्दुभिघोषिणीम् ।
रौद्रां नदीं महाराज रजसा सर्वतोवृताम् ॥ २९

क्षत्रविट्शूद्रवीराणामित्यनेन ब्राह्मणादृते युद्ध सर्वेषा श्रेयस्करमित्यर्थः ॥ २० ॥ युक्त्वा योजयित्वा ॥ २४ ॥

द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

अतितीक्ष्णां नराकीर्णां नदीमन्तकगामिनीम् ।
सज्ञं च विषमं चैव समायान्तीं महाभयाम् ॥ ३०
आकुलाश्चात्र सीदन्ति नराः शोणितकर्दमे ।
नरैरभिपरिक्षिप्ता यथा राजन्महाद्रुमाः ॥ ३१
ततस्ते तत्रतत्रैव प्रचरन्तो महानदीम् ।
विचेरुः सर्वतो योधा नौवारणमहारथैः ॥ ३२
शोणितेन समं राजन्कृतमासीत्समन्ततः ।
नदीवेगैर्यथा भूमिस्तद्वदासीद्दिशांपते ॥ ३३
एवं भारत संग्रामो नरवाजिगजक्षयः ।
कुरूणां सृञ्जयानां च देवासुरसमोऽभवत् ॥ ३४

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

संकुलयुद्धम् ॥ १ ॥

धृतराष्ट्र उवाच ।
युक्तं प्रविश्य पार्थानां सैन्यं कुर्वञ्जनक्षयम् ।
कर्णो राजानमभ्येत्य तन्ममाचक्ष्व सञ्जय ॥ १
के च प्रवीराः पार्थानां युधि कर्णमवारयन् ।
कांश्च प्रमथ्याधिरथिर्युधिष्ठिरमपीडयत् ॥ २
सञ्जय उवाच ।
धृष्टद्युम्नमुखान्पार्थान्दृष्ट्वा कर्णो व्यवस्थितान् ।
समभ्यधावत्त्वरितः पाञ्चालाञ्छत्रुकर्शनः ॥ ३
तं तूर्णमभिधावन्तं पाञ्चाला जितकाशिनः ।
प्रत्युद्ययुर्महात्मानं हंसाः सर इवोष्णगे ॥ ४
ततः शङ्खसहस्राणां निःस्वनो हृदयंगमः ।
प्रादुरासीदुभयतो भेरीशब्दश्च दारुणः ॥ ५
नानावाद्यनिनादश्च द्विपाश्वरथनिःस्वनः ।
सिंहनादश्च वीराणामभवद्दारुणस्तदा ॥ ६
साद्रिद्रुमार्णवा भूमिः सवाताम्बुदमम्बरम् ।
सार्केन्दुग्रहनक्षत्रा द्यौश्च व्यक्तं विघूर्णिता ॥ ७
इति भूतानि तं शब्दं मेनिरे ते च विव्यथुः ।
यानि चाप्यल्पसत्वानि प्रायस्तानि मृतानि वै ॥ ८
अथ कर्णो भृशं क्रुद्धः शीघ्रमस्त्रमुदीरयन् ।
जघान पाण्डवीं सेनामासुरीं मघवानिव ॥ ९
स पाण्डवबलं कर्णः प्रविश्य विसृजञ्छरान् ।
प्रभद्रकाणां प्रवरानहनत्सप्तसप्ततिम् ॥ १०
ततः सुपुङ्खैर्निशितैरथ श्रेष्ठो रथेषुभिः ।
अवधीत्पञ्चविंशत्या पाञ्चालान्पञ्चविंशतिम् ॥ ११
सुवर्णपुङ्खैर्नाराचैः परकायविदारणैः ।
चेदिकानवधीद्वीरः शतशोऽथ सहस्रशः ॥ १२
तं तथा समरे कर्म कुर्वाणमतिमानुषम् ।
परिवव्रुर्महाराज पाञ्चालानां रथव्रजाः ॥ १३
ततः संधाय विशिखान्पञ्च भारत दुःसहान् ।
पाञ्चालानवधीत्पञ्च कर्णो वैकर्तनो वृषः ॥ १४
भानुदेवं चित्रसेनं सेनाबिन्दुं च भारत ।
तपनं शूरसेनं च पाञ्चालानहनद्रणे ॥ १५
पाञ्चालेषु च शूरेषु वध्यमानेषु सायकैः ।
हाहाकारो महानासीत्पाञ्चालानां महाहवे ॥ १६
तेषां संक्रीडमानानां हाहाकारं प्रकुर्वताम् ।
पुनरेव च तान्कर्णो जघानाशु पतत्रिभिः ॥ १७
चक्ररक्षौ तु कर्णस्य पुत्रौ मारिष दुर्जयौ ।
सुषेणः सत्यसेनश्च त्यक्त्वा प्राणानयुध्यताम् ॥ १८
पृष्ठगोप्ता तु कर्णस्य ज्येष्ठः पुत्रो महारथः ।
वृषसेनोऽन्वयात्कर्णं पृष्ठतः परिपालयन् ॥ १९
धृष्टद्युम्नः सात्यकिश्च द्रौपदेया वृकोदरः ।
जनमेजयः शिखण्डी च प्रवीराश्च प्रभद्रकाः ॥ २०
चेदिकेकयपाञ्चाला यमौ मात्स्याश्च दंशिताः ।
समभ्यधावन्राधेयं जिघांसन्तः प्रहारिणम् ॥ २१
त एनं विविधैः शस्त्रैः शरधाराभिरेव च ।
अभ्यवर्षन्विमर्दन्तं प्रावृषीवाम्बुदा गिरिम् ॥ २२

अभ्येत्य यदकरोत्तन्ममाचक्ष्वेत्यन्वयः ॥ १ ॥

विमर्दन्त विमृद्नन्तम् ॥ २२ ॥

पितरं तु परीप्सन्तः कर्णपुत्राः प्रहारिणः।
त्वदीयाश्चापरे राजन्वीरा वीरानवारयन् ॥ २३
सुषेणो भीमसेनस्य च्छित्त्वा भल्लेन कार्मुकम्।
नाराचैः सप्तभिर्विद्ध्वा हृदि भीमं ननाद ह ॥ २४
अथान्यद्धनुरादाय सुदृढं भीमविक्रमः।
सज्यं वृकोदरः कृत्वा सुषेणस्याच्छिनद्धनुः ॥ २५
विव्याध चैनं दशभिः क्रुद्धो नृत्यन्निवेषुभिः।
कर्णं च तूर्णं विव्याध त्रिसप्तत्या शितैः शरैः ॥ २६
सत्यसेनं च दशभिः साश्वसूतायुधध्वजम्।
पश्यतां सुहृदां मध्ये कर्णपुत्रमपातयत् ॥ २७
क्षुरप्रणुन्नं तत्तस्य शिरश्चन्द्रनिभाननम्।
शुभदर्शनमेवासीन्नालभ्रष्टमिवाम्बुजम् ॥ २८
हत्वा कर्णसुतं भीमस्तावकान्पुनरार्दयत्।
कृपहार्दिक्ययोश्छित्त्वा चापौ तावप्यथार्दयत् २९
दुःशासनं त्रिभिर्विद्ध्वा शकुनिं षड्भिरायसैः।
उलूकं च पतत्रिं च चकार विरथावुभौ ॥ ३०
हे सुषेण हतोऽसीति ब्रुवन्नादत्त सायकम्।
तमस्य कर्णश्चिच्छेद त्रिभिश्चैनमताडयत् ॥ ३१
अथान्यं परिजग्राह सुपर्वाणं सुतेजनम्।
सुषेणायासृजद्भीमस्तमप्यस्याच्छिनद्वृषः ॥ ३२
पुनः कर्णस्त्रिसप्तत्या भीमसेनमथेषुभिः।
पुत्रं परीप्सन्विव्याध क्रुद्धः शत्रुजिघांसया ॥ ३३
सुषेणस्तु धनुर्गृह्य भारसाधनमुत्तमम्।
नकुलं पञ्चभिर्बाणैर्बाह्वोरुरसि चार्पयत् ॥ ३४
नकुलस्तं तु विंशत्या विद्ध्वा भारसहैर्दृढैः।
ननाद बलवन्नादं कर्णस्य भयमादधत् ॥ ३५
तं सुषेणो महाराज विद्ध्वा दशभिराशुगैः।
चिच्छेद च धनुः शीघ्रं क्षुरप्रेण महारथः ॥ ३६
अथान्यद्धनुरादाय नकुलः क्रोधमूर्च्छितः।
सुषेणं नवभिर्बाणैर्वारयामास संयुगे ॥ ३७
स तु बाणैर्दिशो राजन्नाच्छाद्य परवीरहा ॥
आजघ्ने सारथिं चास्य सुषेणं च ततस्त्रिभिः।
चिच्छेद चास्य सुदृढं धनुर्भल्लैस्त्रिभिस्त्रिधा ॥ ३८
अथान्यद्धनुरादाय सुषेणः क्रोधमूर्च्छितः।
आविध्यन्नकुलं षष्ट्या सहदेवं च सप्तभिः ॥ ३९
तद्युद्धं सुमहद्घोरमासीद्देवासुरोपमम्।
निघ्नतां सायकैस्तूर्णमन्योन्यस्य वधं प्रति ॥ ४०
सात्यकिर्वृषसेनं तु विद्ध्वा सप्तभिरायसैः।
'पुनर्विव्याध सप्तत्या सारथिं च त्रिभिः शितैः ४१
वृषसेनस्तु शैनेयं शरेणानतपर्वणा।
आजघान महाराज शङ्खदेशे महारथम् ॥ ४२
शैनेयो वृषसेनेन पत्रिणा परिपीडितः।
कोपं चक्रे महाराज क्रुद्धो वेगं च दारुणम् ॥ ४३
जग्राहेषुवरान्वीरः शीघ्रं वै दश पञ्च च।
सात्यकिर्वृषसेनस्य सूतं हत्वा त्रिभिः शरैः ॥' ४४
धनुश्चिच्छेद भल्लेन जघानाश्वांश्च सप्तभिः।
ध्वजमेकेषुणोन्मथ्य त्रिभिस्तं हृद्यताडयत् ॥ ४५
अथावसन्नः स्वरथे मुहूर्तात्पुनरुत्थितः।
स रणे युयुधानेन विसूताश्वरथध्वजः।
कृतो जिघांसुः शैनेयं खड्गचर्मधृगभ्ययात् ॥ ४६
तस्य चापततः शीघ्रं वृषसेनस्य सात्यकिः।
वाराहकर्णैर्दशभिरविध्यदसिचर्मणी ॥ ४७
दुःशासनस्तु तं दृष्ट्वा विरथं व्यायुधं कृतम्।
आरोप्य स्वरथं तूर्णमपोवाह रथान्तरम् ॥ ४८
अथान्यं रथमास्थाय वृषसेनो महारथः।
द्रौपदेयांस्त्रिसप्तत्या युयुधानं च पञ्चभिः ॥ ४९
भीमसेनं चतुःषष्ट्या सहदेवं च पञ्चभिः।
नकुलं त्रिंशता बाणैः शतानीकं च सप्तभिः ॥ ५०
शिखण्डिनं च दशभिर्धर्मराजं शतेन च।
एतांश्चान्यांश्च राजेन्द्र प्रवीराञ्जयगृद्धिनः ॥ ५१
अभ्यर्दयन्महेष्वासः कर्णपुत्रो विशांपते।
कर्णस्य युधि दुर्धर्षस्ततः पृष्ठमपालयत् ॥ ५२
युयुधानं च राधेयो नवैर्नवभिरायसैः।
विसूताश्वरथं कृत्वा ललाटे त्रिभिरार्पयत् ॥ ५३
स तन्यं रथमास्थाय विधिवत्कल्पितं पुनः।
युयुधे पाण्डुभिः सार्धं कर्णस्य व्यधमद्बलम् ॥ ५४
धृष्टद्युम्नस्ततः कर्णमविध्यदशभिः शरैः।
द्रौपदेयास्त्रिसप्तत्या युयुधानस्तु सप्तभिः ॥ ५५
भीमसेनश्चतुःषष्ट्या सहदेवश्च सप्तभिः।
नकुलस्त्रिंशता बाणैः शतानीकस्तु सप्तभिः ॥ ५६

शिखण्डी दशभिर्वीरो धर्मराजः शतेन तु ।
एते चान्ये च राजेन्द्र प्रवीरा जयगृद्धिनः ।
अभ्यर्दयन्महेष्वासं सूतपुत्रं महामृधे ॥ ५७
तान्सूतपुत्रो विशिखैर्दशभिर्दशभिः शरैः ।
रथेनानुचरन्वीरः प्रत्यविध्यदरिंदमः । ५८
'सात्यकिं भीमसेनं च धृष्टद्युम्नं शिखण्डिनम् ।
द्रौपदेयांश्च संरब्धान्यतमानान्महारथान् ॥ ५९
पश्यतां सर्वसैन्यानामथैनान्सूतनन्दनः ।
विरथान्रथिनः श्रेष्ठान्निमेषार्धाच्चकार ह ॥ ६०
अमोघत्वाच्च बाणानां भूतसङ्घा विसिष्मयुः॥'६१
तत्रास्त्रवीर्यं कर्णस्य लाघवं च महात्मनः ।
अपश्याम महाभाग तदद्भुतमिवाभवत् ॥ ६२
न ह्याददानं ददृशुः संदधानं च सायकान् ।
विमुञ्चन्तं च संरम्भादपश्यन्नेव तं जनाः ॥ ६३
प्रतीच्यां दिशि तं दृष्ट्वा प्राच्यां पश्याम लाघवात् ।
न च पश्याम राजेन्द्र क्व नु कर्णो व्यतिष्ठत ॥ ६४
इषूनेवास्य पश्यामो विनिकीर्णाऽन्समन्ततः ।
छादयानान्दिशो राजञ्शलभानामिव व्रजान् ६५
तस्य तैरिषुभिस्तीक्ष्णैः संपतद्भिः सहस्रशः ।
मरीचिभिरिवोष्णांशोः शरैः सन्नतपर्वभिः ॥ ६६
व्याप्ताः सर्वा दिशो राजन्योधाश्च ददृशुस्तदा ।
शरैः संवृतमाकाशं तत्राभ्रैरिव चाभवत् ॥ ६७
द्यौर्वियद्भूर्दिशश्चैव प्रच्छन्ना निशितैः शरैः ।
अरुणाभ्रावृताकारं तस्मिन्देशे बभौ वियत् ॥ ६८
ततः पुनरमेयात्मा कर्णो राजा महारथः ।
न्यहनत्समरे योधान्योधवृत्तमनुष्ठितः ॥ ६९
नृत्यन्निव हि राधेयश्चापहस्तो रणाजिरे ।
यैर्विद्धः प्रत्यविद्ध्यत्तानेकैकं त्रिगुणैः शरैः ॥ ७०
शतैश्च दशभिश्चैतान्पुनर्विद्ध्वा ननाद च ।
साश्वसूतध्वजच्छत्रास्ततस्ते विवरं ददुः ॥ ७१
'ते हन्यमानाः कर्णेन पलायन्त दिशो दश ।
नादयन्तो दिशः सर्वाः कर्णत्रस्ता विचेतसः॥'७२
तान्प्रमथ्य महेष्वासान्राधेयः शरवृष्टिभिः ।
राजानीकमसंबाधं प्राविशच्छत्रुकर्शनः ॥ ७३
स रथांस्त्रिंशतं हत्वा चेदीनामनिवर्तिनाम् ।
राधेयो निशितैर्बाणैस्ततोऽभ्यागाद्युधिष्ठिरम् ७४
'ततस्ते विरथाः शूरा रथानन्यान्समास्थिताः ।
परिवव्रुर्महाराज धर्मपुत्रं युधिष्ठिरम् ॥' ७५
ततस्ते तु परे राजञ्छिखण्डी च ससात्यकिः ।
राधेयात्परिरक्षन्तो राजानं पर्यवारयन् ।
मुञ्चन्तो विविधान्बाणान्स्वर्णपुङ्खाञ्शिलाशितान्
तथैव तावकाः सर्वे कर्णं दुर्वारणं रणे ।
यत्ताः शूरा महेष्वासाः पर्यरक्षन्त सर्वशः ॥ ७७
नानावादित्रघोषाश्च प्रादुरासन्विशांपते ।
सिंहनादश्च संजज्ञे शूराणामभिगर्जताम् ॥ ७८
ततः पुनः समाजग्मुरभीताः कुरुपाण्डवाः ।
युधिष्ठिरमुखाः पार्थाः सूतपुत्रमुखा वयम् ॥ ७९

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

कर्णेन युधिष्ठिरस्य पराजयपूर्वकमपहासः ॥ १ ॥ संकुलयुद्धम् ॥ २ ॥

सञ्जय उवाच ।
विदार्य कर्णस्तां सेनां युधिष्ठिरमथाद्रवत् ।
रथहस्त्यश्वपत्तीनां सहस्रैः परिवारितः ॥ १
नानायुधसहस्राणि प्रेरितान्यरिभिर्वृषः ।
छित्त्वा बाणशतैरुग्रैस्तानविध्यदसंभ्रमात् ॥ २
निचकर्त शिरांस्येषां बाहूनूरूंश्च सूतजः ॥
ते हता भूतले पेतुर्भग्नाश्चान्ये विदुद्रुवुः ॥ ३
द्रविडान्ध्रनिषादास्तु पुनः सात्यकिचोदिताः ।

विवर अन्तर ददु प्रसृता इत्यर्थ ॥ ७१ ॥

त्रिचत्वारिंशोऽध्याय. ॥ ४३ ॥

अभ्यद्रवञ्जिघांसन्तः पत्तयः कर्णमाहवे ॥ ४
ते विबाहुशिरस्त्राणाः प्रहताः कर्णसायकैः ।
पेतुः पृथिव्यां युगपच्छिन्नं सालवनं यथा ॥ ५
एवं योधशतान्याजौ सहस्राण्ययुतानि च ।
हतानीयुर्महीं देहैर्यशसाऽपूरयन्दिशः ॥ ६
अथ वैकर्तनं कर्णं रणे क्रुद्धमिवान्तकम् ।
रुरुधुः पाण्डुपाञ्चाला व्याधिं मन्त्रौषधा इव ॥ ७
स तान्प्रमृद्याभ्यपतत्पुनरेव युधिष्ठिरम् ।
मन्त्रौषधिक्रियातीतो व्याधिरत्युल्बणो यथा ॥ ८
स राजगृद्धिभी रुद्धः पाण्डुपाञ्चालकेकयैः ।
नाशकत्तानतिक्रान्तुं मृत्युर्ब्रह्मविदो यथा ॥ ९
ततो युधिष्ठिरः कर्णमदूरस्थं निवारितम् ।
'तैर्योधप्रमुखैर्वीरं दृष्ट्वा विव्याध सायकैः ॥ १०
कर्णः पार्थशराविद्धस्तोत्रार्दित इव द्विपः ।
प्रमथ्य सहितान्वीरान्युधिष्ठिरमपीडयत् ॥ ११
ततो युधिष्ठिरः कर्णमासाद्य जयतां वरम् ।'
अब्रवीत्परवीरघ्नं क्रोधसंरक्तलोचनः ॥ १२
कर्णकर्ण वृथादृष्टे सूतपुत्र वचः शृणु ।
सदा स्पर्धसि संग्रामे फल्गुनेन तरस्विना ॥ १३
यथाऽस्मान्बाधसे नित्यं धार्तराष्ट्रमते स्थितः ।
यद्बलं यच्च ते वीर्यं प्रद्वेषो यस्तु पाण्डुषु ॥ १४
तत्सर्वं दर्शयस्वाद्य पौरुषं महदाश्रितः ।
युद्धश्रद्धां च तेऽद्याहं विनेष्यामि महाहवे ॥ १५
एवमुक्त्वा महाराज कर्णं पाण्डुसुतस्तदा ।
सुवर्णपुङ्खैर्दशभिर्विव्याधायस्मयैः शरैः ॥ १६
तं सूतपुत्रो दशभिः प्रत्यविध्यदरिंदमः ।
वत्सदन्तैर्महेष्वासः प्रहसन्निव भारत ॥ १७
सोऽवज्ञाय तु निर्विद्धः सूतपुत्रेण पाण्डवः ।
प्रजज्वाल ततः क्रोधाद्विषेव हुताशनः ॥ १८
ज्वालामालापरिक्षिप्तो राज्ञो देहो व्यदृश्यत ।
युगान्ते दग्धुकामस्य संवर्ताग्नेरिवापरः ॥ १९
ततो विस्फार्य सुमहच्चापं हेमपरिष्कृतम् ।
समाधत्त शितं बाणं गिरीणामपि दारणम् ॥ २०
ततः पूर्णायतोत्कृष्टं यमदण्डनिभं शरम् ।
मुमोच त्वरितो राजा सूतपुत्रजिघांसया ॥ २१
स तु वेगवता मुक्तो बाणो वज्राशनिस्वनः ।
विवेश सहसा कर्णं सव्ये पार्श्वे महारथम् ॥ २२
स तु तेन प्रहारेण पीडितः प्रमुमोह वै ।
स्रस्तगात्रो महाबाहुर्धनुरुत्सृज्य कम्पितः ॥ २३
गतासुरिव निश्चेताः शल्यस्याभिमुखोऽपतत् ।
राजाऽपि भूयो नाजघ्ने कर्णं पार्थहितेप्सया ॥ २४
ततो हाहाकृतं सर्वं धार्तराष्ट्रबलं महत् ।
विवर्णमुखमार्तं च कर्णं दृष्ट्वा तथागतम् ॥ २५
सिंहनादाश्च संजज्ञुः क्ष्वेलाः किलकिलास्तथा ।
पाण्डवानां महाराज दृष्ट्वा राज्ञः पराक्रमम् ॥ २६
प्रतिलभ्य तु राधेयः संज्ञां नातिचिरादिव ।
दध्रे राजविनाशाय मनः क्रूरपराक्रमः ॥ २७
स हेमविकृतं चापं विस्फार्य विजयं महत् ।
अवाकिरदमेयात्मा पाण्डवं निशितैः शरैः ॥ २८
ततः क्षुराभ्यां पाञ्चाल्यौ चक्ररक्षौ महात्मनः ।
जघान चन्द्रदेवं च दण्डधारं च संयुगे ॥ २९
तावुभौ धर्मराजस्य प्रवीरौ युधि भारत ।
रथाभ्याशे चकाशेते चन्द्रस्येव पुनर्वसू ॥ ३०
युधिष्ठिरः पुनः कर्णमविद्ध्यत्त्रिंशता शरैः ।
सुषेणं सत्यसेनं च त्रिभिस्त्रिभिरताडयत् ॥ ३१
शल्यं नवत्या विव्याध त्रिसप्तत्या च सूतजम् ।
तांस्तस्य गोप्तॄन्विव्याध त्रिभिस्त्रिभिराजिह्मगैः ॥ ३२
ततः प्रहस्याधिरथिः षष्ट्या राजञ्शितैः शरैः ।
विद्ध्वा युधिष्ठिरं सङ्ख्ये ननादातिरथस्तदा ॥ ३३
ततः प्रवीराः पाण्डूनामभ्यधावन्नमर्षिताः ।
युधिष्ठिरं परीप्सन्तः कर्णमभ्यर्दयञ्छरैः ॥ ३४
सात्यकिश्चेकितानश्च युयुत्सुः पाण्ड्य एव च ।
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः ॥ ३५
यमौ च भीमसेनश्च शिशुपालस्य चात्मजः ।
कारूशा मात्स्यशेषाश्च केकयाः काशिकोसलाः ॥
एते च त्वरिता वीरा वसुषेणमताडयन् ।

मन्त्रौषधक्रिया व्याधिर्विधिहीनक्रिया इव इति ख. ट. पाठः ॥ ८ ॥

जनमेजयश्च पाञ्चाल्यः कर्णं विव्याध सायकैः॥
वारणार्हकर्णनाराचैर्नालीकैर्निशितैः शरैः।
वत्सदन्तैर्विपाठैश्च क्षुरप्रैश्चटकामुखैः॥ ३८
नानाप्रहरणैश्चोग्रै रथहस्त्यश्वसादिभिः।
सर्वतोऽभ्यद्रवत्कर्णं परिवार्य जिघांसया॥ ३९
स पाण्डवानां प्रवरैः सर्वतः समभिद्रुतः।
छाद्यमानः शितैर्घोरैः स्वस्वनामाङ्कितैः शरैः॥ ४०
न चचाल रणे कर्णो महेन्द्रो दानवैरिव।
'निजघान महेष्वासान्पाञ्चालानेकविंशतिम्॥ ४१
ततः पुनरमेयात्मा चेदीनां प्रवरान्दश।
न्यहनद्भरतश्रेष्ठ कर्णो वैकर्तनस्तदा॥ ४२
तस्य बाणसहस्राणि संप्रपन्नानि मारिष।
दृश्यन्ते दिक्षु सर्वासु शलभानामिव व्रजाः॥ ४३
कर्णनामाङ्किता बाणाः स्वर्णपुङ्खाः सुतेजनाः।
नराश्वकायान्निर्भिद्य पेतुरुर्व्यां समन्ततः॥ ४४
कर्णेनैकेन समरे चेदीनां प्रवरास्तदा।
सृञ्जयानां च सर्वेषां शतशो निहता रणे॥ ४५
कर्णस्य शरसंछन्नं बभूव तुमुलं तमः।
नाज्ञायत ततः किंचित्परेषामात्मनोऽपि वा॥ ४६
तस्मिंस्तमसि भूते च क्षत्रियाणां भयंकरे।
विचचार महाबाहुर्निर्दहन्क्षत्रियान्बहून्॥' ४७
ततः शरमहाज्वालो वीर्योष्मा कर्णपावकः।
निर्दहन्पाण्डववनं चारु पर्यचरद्रणे॥ ४८
'ततस्तेषां महाराज पाण्डवानां महारथाः।
सृञ्जयानां च सर्वेषां शतशोऽथ सहस्रशः।
अस्त्रैः कर्णं महेष्वासं समन्तात्पर्यवारयन्॥ ४९
स संवार्य महास्त्राणि महेष्वासो महात्मनाम्।
ग्रहस्य पुरुषेन्द्रस्य कर्णश्चिच्छेद कार्मुकम्॥' ५०
ततः संधाय नवतिं निमेषान्नतपर्वणाम्।
विभेद कवचं राज्ञो रणे कर्णः शितैः शरैः॥ ५१
तद्धर्म हेमविकृतं रत्नचित्रं बभौ पतत्।
सविद्युदभ्रं सवितुः श्लिष्टं वातहतं यथा॥ ५२
तदङ्गात्पुरुषेन्द्रस्य भ्रष्टं वर्म व्यरोचत।
रत्नैरलंकृतं चित्रैर्व्यभ्रं निशि यथा नभः॥ ५३
भिन्नवर्मा शरैः पार्थो रुधिरेण समुक्षितः।
बभासे पुरुषश्रेष्ठ उद्यन्निव दिवाकरः॥ ५४
स शराचितसर्वाङ्गश्छिन्नवर्माऽथ संयुगे।
क्षात्रं धर्मं समास्थाय सिंहनादमकुर्वत॥ ५५
नर्दित्वा च चिरं कालं पाण्डवो रभसो रणे।
शक्तिं चिक्षेप वेगेन प्रदीप्तामशनीमिव॥ ५६
तां ज्वलन्तीमिवाकाशे शक्तिं सप्तभिराशुगैः।
भल्लैश्चिच्छेद राधेयः सा त्वशीर्यत वै रणे॥ ५७
हृदि बाह्वोर्ललाटे च क्षिप्रकारी युधिष्ठिरः।
चतुर्भिस्तोमरैः कर्णं ताडयित्वाऽनदन्मुदा॥ ५८
उद्भिन्नरुधिरः कर्णः क्रुद्धः सर्प इव श्वसन्।
जघान सूतं पार्थस्य पार्ष्टिं च नवभिः शरैः॥ ५९
ध्वजं चिच्छेद नृपतेस्त्रिभिर्विव्याध चैव तम्।
इषुधी चास्य चिच्छेद रथं च तिलशोऽच्छिनत्॥ ६०
एतस्मिन्नन्तरे शूराः पाण्डवानां महारथाः।
ववृषुः शरवर्षाणि राधेयं प्रति भारत॥ ६१
सात्यकिः पञ्चविंशत्या शिखण्डी नवभिः शरैः।
अवर्षतां महाराज राधेयं शत्रुकर्शनम्॥ ६२
शैनेयं तु ततः क्रुद्धः कर्णः पञ्चभिरायसैः।
विव्याध समरे राजंस्त्रिभिश्चान्यैः शिलीमुखैः॥ ६३
दक्षिणं तु भुजं तस्य त्रिभिः कर्णोऽभ्यविध्यत।
सव्यं षोडशभिर्बाणैर्यन्तारं चास्य सप्तभिः॥ ६४
अथास्य चतुरो वाहांश्चतुर्भिर्निशितैः शरैः।
सूतपुत्रोऽनयत्क्षिप्रं यमस्य सदनं प्रति॥ ६५
अथापरेण भल्लेन धनुश्छित्त्वा महारथः।
सारथेः सशिरस्त्राणं शिरः कायादपाहरत्॥ ६६
हताश्वसूते तु रथे स्थितः स शिनिपुङ्गवः।
शक्तिं चिक्षेप कर्णाय वैदूर्यमणिभूषिताम्॥ ६७
तामापतन्तीं सहसा द्विधा चिच्छेद भारत।
कर्णो वै धन्विनां श्रेष्ठस्तांश्च सर्वानवारयत्॥ ६८
ततस्तान्निशितैर्बाणैः पाण्डवानां महारथान्।
न्यवारयदमेयात्मा शिक्षया च बलेन च॥ ६९
अर्दयित्वा शरैस्तांस्तु सिंहः क्षुद्रमृगानिव।
पीडयन्धर्मराजानं शरैः सन्नतपर्वभिः।
अभ्यद्रवत राधेयो धर्मपुत्रं शितैः शरैः॥ ७०
ततः पार्थो ह्यपायासीद्धताश्वो हतसारथिः।

अशक्नुवन्मुखे स्थातुं ततः कर्णस्य दुर्मनाः ॥ ७१
तमभिद्रुत्य राधेयः पाण्डुपुत्रं युधिष्ठिरम् ।
अब्रवीत्प्रहसन्राजन्कुत्सयन्निव पाण्डवम् ॥ ७२
कथं नाम कुले जातः क्षत्रधर्मे व्यवस्थितः ।
प्रजह्यात्समरे शत्रून्प्राणान्रक्ष महाहवे ॥ ७३
न भवान्क्षत्रधर्मेषु कुशलोऽसीति मे मतिः ।
ब्राह्मे बले भवान्युक्तः स्वाध्याये यज्ञकर्मणि ॥ ७४
मा स्म युध्यस्व कौन्तेय मा स्म वीरान्समासदः ।
मा चैवं विप्रियं ब्रूहि मा च त्वं भज संयुगम् ॥ ७५
वक्तव्या मारिषाऽन्ये तु न वक्तव्यास्तु मादृशाः ।
मादृशान्हि ब्रुवन्युद्धे एतदन्यच्च लप्स्यसे ॥ ७६
स्वगृहं गच्छ कौन्तेय यत्र वा केशवार्जुनौ ।
न हि त्वां समरे राजन्हन्यात्कर्णः कथंचन ॥ ७७
सञ्जय उवाच ।
वरप्रदानं कुन्त्यास्तु कर्णः स्मृत्वा महारथः ।
वधप्राप्तं तु कौन्तेयं नावधीत्पुरुषोत्तमः ॥ ७८
एवमुक्त्वा ततः पार्थं विसृज्य च महाबलः ।
न्यहनत्पाण्डवीं सेनां वज्रहस्त इवासुरीम् ॥ ७९
ततोऽपायाद्रुतं राजन्व्रीडन्निव नरेश्वरः ॥ ८०
अथापयातं राजानं मत्वाऽन्वीयुस्तमच्युतम् ।
चेदिपाण्डवपाञ्चालाः सात्यकिश्च महारथः ।
द्रौपदेयास्तथा शूरा माद्रीपुत्रौ च पाण्डवौ ॥ ८१
ततो युधिष्ठिरानीकं दृष्ट्वा कर्णः पराङ्मुखम् ।
कुरुभिः सहितो वीरः प्रहृष्टः पृष्ठतोऽन्वगात् ॥ ८२
भेरीशङ्खमृदङ्गानां कार्मुकाणां च निःस्वनः ।
बभूव धार्तराष्ट्राणां सिंहनादरवस्तथा ॥ ८३
युधिष्ठिरस्तु कौरव्य रथमारुह्य सत्वरम् ।
श्रुतकीर्तेर्महाराज दृष्ट्वा तत्कर्णविक्रमम् ॥ ८४
काल्यमानं बलं दृष्ट्वा सूतपुत्रेण मारिष ।
स्वान्योधानब्रवीत्क्रुद्धो निघ्नतैतान्किमासत ॥८५
ततो राज्ञाऽभ्यनुज्ञाताः पाण्डवानां महारथाः ।
भीमसेनमुखाः सर्वे पुत्रांस्ते प्रत्युपाद्रवन् ॥ ८६
अभवत्तुमुलः शब्दो योधानां तत्र भारत ।
रथहस्त्यश्वपत्तीनां द्रवतां निनदो महान् ।
उद्यतप्रतिविष्टानां शस्त्राणां च ततस्ततः ॥ ८७
आगच्छत प्रहरत क्षिप्रं विपरिधावत ।
इति ब्रुवाणा ह्यन्योन्यं जघ्नुर्योधा महारणे ॥ ८८
अभ्रच्छायेव तत्रासीच्छरवृष्टिभिरम्बरे ।
समावृतैर्नरवरैर्निघ्नद्भिरितरेतरम् ॥ ८९
विपताकध्वजच्छत्रा व्यश्वसूतरथायुधाः ।
व्यङ्गाङ्गावयवाः पेतुः क्षितौ क्षीणाः क्षितीश्वराः ।
शिखराणीव शैलानां वज्राभिन्नानि मारिष ॥ ९०
सारोहा निहताः पेतुर्द्विपा भिन्ना महीतले ।
छिन्नभिन्नविपर्यस्तवर्मालंकारविग्रहाः ॥ ९१
सारोहास्तुरगाः पेतुर्हतवीराः सहस्रशः ।
विप्रविद्धायुधाङ्गाश्च द्विरदा रथिभिर्हताः ।
प्रतिवीरैश्च संमर्दे पत्तिसङ्घाः सहस्रशः ॥ ९२
विशालायतताम्राक्षैः पद्मेन्दुसदृशाननैः ।
शिरोभिर्युद्धशौण्डानां सर्वतः संवृता मही ॥ ९३
यथा भुवि तथा व्योम्नि निःस्वनं शुश्रुवुर्जनाः ।
विमानेऽप्सरसां सङ्गैर्गीतवादित्रनिःस्वनैः ॥ ९४
हतानभिमुखान्वीरान्वीरैः शतसहस्रशः ।
आरोप्यारोप्य गच्छन्ति विमानेष्वप्सरोगणाः ९५
तद्दृष्ट्वा महदाश्चर्यं प्रत्यक्षं स्वर्गलिप्सया ।
प्रहृष्टमनसः शूराः क्षिप्रं जघ्नुः परस्परम् ॥ ९६
रथिनो रथिभिः सार्धं चित्रं युयुधुराहवे ।
पत्तयः पत्तिभिर्नागाः सह नागैर्हयैर्हयाः ॥ ९७
एवं प्रवृत्ते संग्रामे गजवाजिनरक्षये ।
सैन्येन रजसा वृत्ते स्वे स्वाञ्जघ्नुः परे परान् ॥ ९८
कचाकचं युद्धमासीद्दन्तादन्ति नखानखि ।
मुष्टियुद्धं नियुद्धं च देहपाप्मविनाशनम् ॥ ९९
तथा वर्तति संग्रामे गजवाजिनरक्षये ।
नराश्वनागदेहेभ्यः प्रसृता लोहितापगा ॥ १००
गजाश्वनरदेहान्सा व्युवाह पतितान्बहून् ।
नराश्वगजसंबाधे नराश्वगजसादिनाम् ॥ १०१
लोहितोदा महाघोरा मांसशोणितकर्दमा ।

कचाकचि युद्धं इति झ पाठ ॥ ९९ ॥

चतुश्चत्वारिंशोऽध्याय ॥ ४४ ॥

नराश्वगजदेहान्वै वहन्ती भीरुभीषणा ॥ १०२
तस्मा नद्याः परं पारं व्रजन्ति विजयैषिणः ।
नागेन च प्लवन्तो वै निमज्योन्मज्य चापरे ॥१०३
ते तु लोहितदिग्धाङ्गा रक्तवर्मायुधाम्बराः ।
सस्रुस्तस्यां पपुश्चास्रं मम्लुश्च भरतर्षभ ॥ १०४
रथानश्वान्नरान्नागानायुधाभरणानि च ।
वर्माणि चाप्यपश्याम पतितानि सहस्रशः ।
खं द्यां भूमिं दिशश्चैव प्रायः पश्याम लोहिताः ॥
लोहितस्य तु गन्धेन स्पर्शेन च रसेन च ।
रूपेण चातिरक्तेन शब्देन च विसर्पता ।
विषादः सुमहानासीत्प्रायः सैन्यस्य भारत ॥१०६
ततस्तु विप्रहतं सैन्यं भीमसेनमुखैस्तव ।
भूयः समाद्रवन्वीराः सात्यकिप्रमुखास्तदा ॥१०७
तेषामापततां वेगमविषह्यं निरीक्ष्य च ।
पुत्राणां ते महासैन्यमासीद्राजन्पराङ्मुखम् ॥१०८
तत्प्रकीर्णरथाश्वेभं नरवाजिसमाकुलम् ।
विध्वस्तवर्मकवचं प्रविद्धायुधकार्मुकम् ॥ १०९
व्यद्रवत्तावकं सैन्यं लोड्यमानं समन्ततः ।
सिंहार्दितमिवारण्ये यथा गजकुलं तथा ॥ ११०

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

कर्णं पराजित्य जिघांसोर्भीमस्य शल्येन हेतुकथनपूर्वकं निषेधनम् ॥ १ ॥

सञ्जय उवाच ।
तानभिद्रवतो दृष्ट्वा पाण्डवांस्तावकं बलम् ।
दुर्योधनो महाराज वारयामास सर्वशः ॥ १
योधांश्च स्वबलं चैव समन्ताद्भरतर्षभ ।
क्रोशतस्तव पुत्रस्य न स्म राजन्यवर्तत ॥ २
ततः पक्षप्रपक्षस्थाः प्रकुक्षिस्थाश्च भारत ।
तदा सशस्त्राः कुरवो भीममभ्यद्रवन्रणे ॥ ३
कर्णोऽपि दृष्ट्वा द्रवतो धार्तराष्ट्रान्पराङ्मुखान् ।
मद्रराजमुवाचेदं याहि भीमरथं प्रति ॥ ४
एवमुक्तश्च कर्णेन शल्यो मद्राधिपस्तदा ।
हंसवर्णान्हयानग्र्यान्प्रैषीद्यत्र वृकोदरः ॥ ५
ते प्रेरिता महाराज शल्येनाहवशोभिना ।
भीमसेनरथं प्राप्य समसज्जन्त वाजिनः ॥ ६
दृष्ट्वा कर्णं समायान्तं भीमः क्रोधसमन्वितः ।
मतिं चक्रे विनाशाय कर्णस्य भरतर्षभ ॥ ७
सोऽब्रवीत्सात्यकिं वीरं धृष्टद्युम्नं च पार्षतम् ।
यूयं रक्षत राजानं धर्मात्मानं युधिष्ठिरम् ॥ ८
संशयान्महतो मुक्तः कथंचित्प्रेक्षतो मम ।
अग्रतोऽमे कृतो राजा छिन्नसर्वपरिच्छदः ॥ ९
दुर्योधनस्य प्रीत्यर्थं राधेयेन दुरात्मना ।
अन्तमद्य गमिष्यामि तस्य दुःखस्य पार्षत ॥ १०
हन्तास्म्यद्य रणे कर्णं स वा मां निहनिष्यति ।
संग्रामेऽद्य सुघोरेऽस्मिन्सत्यमेतद्ब्रवीमि वः ॥ ११
राजानमद्य भवतां न्यासभूतं ददानि वै ।
तस्य संरक्षणे सर्वे यतध्वं विगतज्वराः ॥ १२
एवमुक्त्वा महाबाहुः प्रायादाधिरथिं प्रति ।
सिंहनादेन महता सर्वाः सन्नादयन्दिशः ॥ १३
दृष्ट्वा त्वरितमायान्तं भीमं युद्धाभिनन्दिनम् ।
सूतपुत्रमथोवाच मद्राणामीश्वरो विभुः ॥ १४
शल्य उवाच ।
पश्य कर्ण महाबाहुं संक्रुद्धं पाण्डुनन्दनम् ।
दीर्घकालार्जितं क्रोधं मोक्तुकामं त्वयि ध्रुवम् ॥१५
ईदृशं नास्य रूपं मे दृष्टपूर्वं कदाचन ।
अभिमन्यौ हते कर्ण राक्षसे च घटोत्कचे ॥ १६
त्रैलोक्यस्य समस्तस्य शक्तः क्रुद्धो निवारणे ।
बिभर्ति सदृशं रूपं युगान्ताग्निसमप्रभम् ॥ १७
सञ्जय उवाच ।
इति ब्रुवति राधेयं मद्राणामीश्वरे नृप ।
अभ्यवर्तत वै कर्णं क्रोधदीप्तो वृकोदरः ॥ १८
अथागतं तु संप्रेक्ष्य भीमं युद्धाभिनन्दिनम् ।

अब्रवीद्वचनं शल्यं राधेयः प्रहसन्निव ॥ १९
यदुक्तं वचनं मेऽद्य त्वया मद्रजनेश्वर ।
भीमसेनं प्रति विभो तत्सत्यं नात्र संशयः ॥ २०
एष शूरश्च वीरश्च क्रोधनश्च वृकोदरः ।
निरपेक्षः शरीरे च प्राणतश्च बलाधिकः ॥ २१
अज्ञातवासं वसता विराटनगरे तदा ।
द्रौपद्याः प्रियकामेन केवलं बाहुसंश्रयात् ।
गूढभावं समाश्रित्य कीचकः सगणो हतः ॥ २२
सोऽद्य संग्रामशिरसि सन्नद्धः क्रोधमूर्च्छितः ।
किं करोद्यतदण्डेन मृत्युनापि व्रजेद्रणम् ॥ २३
चिरकालाभिलषितो ममायं तु मनोरथः ।
अर्जुनं समरे हन्यां मां वा हन्याद्धनंजयः ॥ २४
स मे कदाचिदद्यैव भवेद्भीमसमागमात् ॥ २५
निहते भीमसेने वा यदि वा विरथीकृते ।
अभियास्यति मां पार्थस्तन्मे साधु भविष्यति ।
अत्र यन्मन्यसे प्राप्तं तच्छीघ्रं संप्रधारय ॥ २६
सञ्जय उवाच ।
एतच्छ्रुत्वा तु वचनं राधेयस्यामितौजसः ।
उवाच वचनं शल्यः सूतपुत्रं तथागतम् ॥ २७
अभियाहि महाबाहो भीमसेनं महाबलम् ।
निरपेक्षश्च युध्यस्व शक्तिं स्वां संप्रदर्शयन् ॥ २८
यस्ते कामोऽभिलषितश्चिरात्प्रभृति हृद्गतः ।
स वै संपत्स्यते कर्ण सत्यमेतद्ब्रवीमि ते ॥ २९
एवमुक्ते ततः कर्णः शल्यं पुनरभाषत ।
हन्ताऽहमेनं संरब्धं मां वा हन्ता वृकोदरः ॥ ३०
एवमुक्त्वा महाराज राधेयो रथिनां वरः ।
युद्धे मनः समाधाय याहि याहीत्यचोदयत् ॥ ३१
ततः प्रायाद्रथेनाशु शल्यस्तत्र विशांपते ।
यत्र भीमो महेष्वासो व्यद्रावयत वाहिनीम् ॥ ३२
ततस्तूर्यनिनादश्च भेरीणां च महास्वनः ।
उदतिष्ठच्च राजेन्द्र कर्णभीमसमागमे ॥ ३३
भीमसेनोऽथ संक्रुद्धस्तस्य सैन्यं दुरासदम् ।
नाराचैर्विमलैस्तीक्ष्णैर्दिशः प्राद्रावयद्बली ॥ ३४
स सन्निपातस्तुमुलो घोररूपो विशांपते ।
आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मृधे ॥ ३५
ततो मुहूर्ताद्राजेन्द्र नातिकृच्छ्राद्वसन्निव ।
भीमसेनो महाबाहुः कर्णं प्रेप्सुरभिद्रवत् ॥ ३६
समापतन्तं संप्रेक्ष्य कर्णो वैकर्तनो वृषा ।
आजघान सुसंक्रुद्धो नाराचेन स्तनान्तरे ।
पुनश्चैनममेयात्मा शरवर्षैरवाकिरत् ॥ ३७
स विद्धः सूतपुत्रेण च्छादयामास पत्रिभिः ।
विव्याध निशितैः कर्णं नवभिर्नतपर्वभिः ॥ ३८
तस्य कर्णो धनुर्मध्ये द्विधा चिच्छेद पत्रिभिः ॥ ३९
अथैनं छिन्नधन्वानं प्रत्यविध्यत्स्तनान्तरे ।
नाराचेन सुतीक्ष्णेन सर्वावरणभेदिना ॥ ४०
सोऽन्यत्कार्मुकमादाय सूतपुत्रं वृकोदरः ।
राजन्मर्मसु मर्मज्ञो विव्याध निशितैः शरैः ।
ननाद बलवन्नादं कम्पयन्निव रोदसी ॥ ४१
तं कर्णः पञ्चविंशत्या नाराचानां समार्पयत् ।
मदोत्कटं वने दृप्तमुल्काभिरिव कुञ्जरम् ॥ ४२
ततः सायकभिन्नाङ्गः पाण्डवः क्रोधमूर्च्छितः ।
संरम्भामर्षताम्राक्षः सूतपुत्रवधेप्सया ॥ ४३
स कार्मुके महावेगं भारसाधनमुत्तमम् ।
गिरीणामपि भेत्तारं सायकं समयोजयत् ॥ ४४
विकृष्य बलवच्चापमाकर्णादतिमारुतिः ।
तं मुमोच महेष्वासः क्रुद्धः कर्णजिघांसया ॥ ४५
स विसृष्टो बलवता बाणो वज्राशनिस्वनः ।
अदारयद्रणे कर्णं वज्रवेगो यथाऽचलम् ॥ ४६
स भीमसेनाभिहतः सूतपुत्रः कुरूद्वह ।
निषसाद रथोपस्थे विसंज्ञः पृतनापतिः ।
'रुधिरेणावसिक्ताङ्गो गतासुवदरिंदमः ॥ ४७
एतस्मिन्नन्तरे दृष्ट्वा मद्रराजो वृकोदरम् ।
जिघांसुं छेत्तुमायान्तं साधयन्निदमब्रवीत् ॥ ४८
भीमसेन महाबाहो यत्त्वां वक्ष्यामि तच्छृणु ।
वचनं हेतुसंपन्नं श्रुत्वा चैतत्तथा कुरु ॥ ४९
अर्जुनेन प्रतिज्ञातो वधः कर्णस्य शुष्मिणः ।
तां तथा कुरु भद्रं ते प्रतिज्ञां सव्यसाचिनः ॥ ५०
भीमसेन उवाच ।
दृढव्रतत्वं पार्थस्य जानामि नृपसत्तम ।
राज्ञस्तु धर्षणं पापः कृतवान्मम सन्निधौ ॥ ५१

ततः कोपाभिभूतेन शेषं न गणितं मया ।
पतिते चापि राधेये न मे मन्युः शमं गतः ।
जिह्वोद्धरणमेवास्य प्राप्तकालं मतं मम ॥ ५२
अनेन सुनृशंसेन समवेतेषु राजसु ।
अस्माकं शृण्वतां शल्य यानि वाक्यानि मातुल ।
असह्येयानि नीचानि बहूनि श्रावितानि भो ॥ ५३
नूनं चैतत्प्रतिज्ञातं दूरस्थस्यापि पार्थिव ।
छेदनं चास्य जिह्वायास्तदैवाकाङ्क्षितं मया ।
राज्ञस्तु प्रियकामेन कालोऽयं परिपालितः ॥ ५४
भवता तु यदुक्तोऽसि वाक्यं हेत्वर्थसंहितम् ।
तद्गृहीतं महाराज कटुकस्यमिवौषधम् ॥ ५५
हीनप्रतिज्ञो बीभत्सुर्न हि जीवेत कर्हिचित् ।
अस्मिन्विनष्टे नष्टाः स्मः सर्व एव सकेशवाः ॥ ५६
अद्य चैव नृशंसात्मा पापः पापकृतां वरः ।
गमिष्यति परीभावं दृष्टमात्रः किरीटिना ॥ ५७
युधिष्ठिरस्य कोपेन पूर्वं दग्धो नृशंसकृत् ।
त्वया संरक्षितस्त्वद्य मत्समीपादुपागतः ॥ ५८
सञ्जय उवाच ।'
एवं मद्राधिपः श्रुत्वा विसंज्ञं सूतनन्दनम् ।
अपोवाह रथेनाजौ कर्णमाहवशोभिनम् ॥ ५९
पराजिते ततः कर्णे धार्तराष्ट्री महाचमूः ।
व्यपायात्सर्वतो भग्ना हाहाभूता समन्ततः ॥ ६०

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

भीमकर्णयोर्युद्धम् ॥ १ ॥ भीमेन दुर्योधनानुजानां कतिपयानां हननम् ॥ २ ॥ संकुलयुद्धं च ॥ ३ ॥

धृतराष्ट्र उवाच ।
सुदुष्करमिदं कर्म कृतं भीमेन सञ्जय ।
येन कर्णो महाबाहू रथोपस्थे निपातितः ॥ १
कर्णो ह्येको रणे हन्ता पाण्डवान्सृञ्जयैः सह ।
इति दुर्योधनः सूत प्राब्रवीन्मां मुहुर्मुहुः ॥ २
पराजितं तु राधेयं दृष्ट्वा भीमेन संयुगे ।
ततः परं किमकरोत्पुत्रो दुर्योधनो मम ॥ ३
सञ्जय उवाच ।
विमुखं प्रेक्ष्य राधेयं सूतपुत्रं महाहवे ।
पुत्रस्तव महाराज सोदर्यानिदमब्रवीत् ॥ ४
शीघ्रं गच्छत भद्रं वो राधेयं परिरक्षत ।
भीमसेनभयेऽगाधे मज्जन्तं व्यसनार्णवे ॥ ५
ते तु राज्ञा समादिष्टा भीमसेनं जिघांसवः ।
अभ्यवर्तन्त संक्रुद्धाः पतङ्गाः पावकं यथा ॥ ६
श्रुतायुर्दुर्धरः क्राथो विवित्सुर्विकटः समः ।
निषङ्गी कवची पाशी तथा नन्दोपनन्दकौ ॥ ७
दुष्प्रधर्षः सुबाहुश्च वातवेगसुवर्चसौ ।
धनुर्ग्राहो दुर्मदश्च जलसन्धः शलः सहः ॥ ८
एते रथैः परिवृता वीर्यवन्तो महाबलाः ।
भीमसेनं समासाद्य समन्तात्पर्यवारयन् ॥ ९
ते व्यमुञ्चञ्छरव्रातान्नानालिङ्गान्समन्ततः ।
स तैरभ्यर्द्यमानस्तु भीमसेनो महाबलः ॥ १०
तेषामापततां क्षिप्रं सुतानां ते जनाधिप ।
रथैः पञ्चशतैः सार्धं पञ्चाशदहनद्रथान् ॥ ११
विवित्सोस्तु ततः क्रुद्धो भल्लेनापाहरच्छिरः ।
भीमसेनो महाराज तत्पपात हतं भुवि ॥ १२
सकुण्डलशिरस्त्राणं पूर्णचन्द्रोपमं तथा ।
'अशोभत महाराज पूर्णचन्द्र इवाम्बरे ॥' १३
तं दृष्ट्वा निहतं शूरं भ्रातरः सर्वतस्तदा ।
अभ्यद्रवन्त समरे भीमं भीमपराक्रमम् ॥ १४
ततोऽपराभ्यां भल्लाभ्यां पुत्रयोस्ते महाहवे ।
जहार समरे प्राणान्भीमो भीमपराक्रमः ॥ १५
तौ धरामन्वपद्येतां वातरुग्णाविव द्रुमौ ।
विकटश्च सहश्चोभौ देवपुत्रोपमौ नृप ॥ १६

ततो मद्राधिपो दृष्ट्वा इति झ पाठः ॥ ५९ ॥

पञ्चचत्वारिंशोऽध्याय ॥ ४५ ॥

ततस्तु त्वरितो भीमः क्राथं निन्ये यमक्षयम्।
नाराचेन सुतीक्ष्णेन स हतो न्यपतद्भुवि ॥ १७
हाहाकारस्ततस्तीव्रः संबभूव जनेश्वर।
वध्यमानेषु वीरेषु तव पुत्रेषु धन्विषु ॥ १८
तेषां सुललिते सैन्ये पुनर्भीमो महाबलः।
नन्दोपनन्दौ समरे प्रैषयद्यमसादनम् ॥ १९
ततस्ते प्राद्रवन्भीताः पुत्रास्ते विह्वलीकृताः।
भीमसेनं रणे दृष्ट्वा कालान्तकयमोपमम् ॥ २०
पुत्रांस्ते निहतान्दृष्ट्वा सूतपुत्रः सुदुर्मनाः।
हंसवर्णान्हयान्भूयः प्रैषयद्यत्र पाण्डवः ॥ २१
ते प्रेषिता महाराज मद्रराजेन वाजिनः।
भीमसेनरथं प्राप्य समसज्जन्त वेगिताः ॥ २२
स सन्निपातस्तुमुलो घोररूपो विशांपते।
आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मृधे ॥ २३
दृष्ट्वा मम महाराज तौ समेतौ महारथौ।
आसीद्बुद्धिः कथं युद्धमेतदद्य भविष्यति ॥ २४
ततो भीमो रणश्लाघी छादयामास पत्रिभिः।
कर्णं रणे महाराज पुत्राणां तव पश्यताम् ॥ २५
ततः कर्णो भृशं क्रुद्धो भीमं नवभिरायसैः।
विव्याध परमास्त्रज्ञो भल्लैः संनतपर्वभिः ॥ २६
तान्निहत्य महाबाहुर्भीमो भीमपराक्रमः।
आकर्णपूर्णैर्विंशिखैः कर्णं विव्याध सप्तभिः ॥ २७
ततः कर्णो महाराज आशीविष इव श्वसन्।
शरवर्षेण महता छादयामास पाण्डवम् ॥ २८
भीमोऽपि तं शरव्रातैश्छादयित्वा महारथम्।
पश्यतां कौरवेयाणां विननर्द महाबलः ॥ २९
ततः कर्णो भृशं क्रुद्धो दृढमादाय कार्मुकम्।
भीमं विव्याध दशभिः कङ्कपत्रैः शिलाशितैः।
कार्मुकं चास्य चिच्छेद भल्लेन निशितेन च ॥ ३०
ततो भीमो महाबाहुर्हेमपट्टविभूषितम्।
परिघं घोरमादाय मृत्युदण्डमिवापरम्।
कर्णस्य निधनाकाङ्क्षी चिक्षेपातिबलो नदन् ॥ ३१
तमापतन्तं परिघं वज्राशनिसमस्वनम्।
चिच्छेद बहुधा कर्णः शरैराशीविषोपमैः ॥ ३२
ततः कार्मुकमादाय भीमो दृढतरं तदा।
छादयामास विशिखैः कर्णं परबलार्दनम् ॥ ३३
ततो युद्धमभूद्घोरं कर्णपाण्डवयोर्मृधे।
बलीन्द्रयोरिव मुहुः परस्परवधैषिणोः ॥ ३४
ततः कर्णो महाराज भीमसेनं त्रिभिः शरैः।
आकर्णपूर्णैर्विव्याध दृढमानम्य कार्मुकम् ॥ ३५
सोऽतिविद्धो महेष्वासः कर्णेन बलिनां वरः।
घोरमादत्त विशिखं कर्णकायावदारणम् ॥ ३६
तस्य भित्त्वा तनुत्राणं भित्त्वा कायं च सायकः।
प्राविशद्धरणीं राजन्वल्मीकमिव पन्नगः ॥ ३७
स तेनातिप्रहारेण व्यथितो विह्वलन्निव ॥
संचचाल रथे कर्णः क्षितिकम्पे यथाऽचलः॥ ३८
ततः कर्णो महाराज रोषामर्षसमन्वितः।
भीमं तं पञ्चविंशत्या नाराचानां समार्पयत् ॥ ३९
चिच्छेद कार्मुकं तूर्णं पाण्डवस्याशु पत्रिणा॥ ४०
ततो मुहूर्ताद्राजेन्द्र नातिकृच्छ्राद्धसन्निव।
विरथं भीमकर्माणं भीमं कर्णश्चकार ह ॥ ४१
विरथो भरतश्रेष्ठ प्रहसन्निनिलोपमः।
गदां गृह्य महाबाहुरपतत्स्यन्दनोत्तमात् ॥ ४२
गदया च महाराज कर्णस्य रथकूबरम्।
पोथयामास संक्रुद्धः समरे शत्रुतापनः ॥ ४३
स क्रोधवशमापन्नः पाण्डुपुत्रः प्रतापवान्।
विद्राव्य गदया वीरस्तव पुत्रान्महाहवे ॥ ४४
नागान्सप्तशताञ्राजन्नीषादन्तान्प्रहारिणः।
व्यधमत्सहसा भीमः क्रुद्धरूपः परंतपः ॥ ४५
दन्तवेष्टेषु नेत्रेषु कुम्भेषु च कटेषु च।
मर्मस्वपि च मर्मज्ञस्तान्नागानवधीद्बली ॥ ४६
'अर्दिता भीमसेनेन विनदन्तो भृशातुराः।'
ततस्ते प्राद्रवन्भीताः प्रहताश्च पुनःपुनः।
महामात्रास्तमावव्रुर्मेघा इव दिवाकरम् ॥ ४७
तान्स सप्तशतान्नागान्सारोहायुधकेतनान्।
भूमिष्ठो गदया जघ्ने वज्रेणेन्द्र इवाचलान्॥ ४८
ततः सुबलपुत्रस्य नागानतिबलान्पुनः।
पोथयामास कौन्तेयो द्विपञ्चाशदरिंदमः ॥ ४९
तथा रथशतं साग्रं पत्तींश्च शतशोऽपरान्।
न्यहनत्पाण्डवो युद्धे तापयंस्तव वाहिनीम्॥ ५०

प्रताप्यमानं सूर्येण भीमेन च महात्मना ।
तत सैन्यं संचुकोच चर्माग्रावाहितं यथा ॥ ५१
ते भीमभयसंत्रस्तास्तावका भरतर्षभ ।
विहाय समरे कर्ण दुद्रुवुर्वै दिशो दश ॥ ५२
रथाः पञ्चशताश्चान्ये ह्रादिनः शरवर्षिणः ।
भीममभ्यद्रवन्घ्नन्तः शरपूगैः समन्ततः ॥ ५३
तान्स पञ्चशतान्वीरान्सपताकध्वजायुधान् ।
पोथयामास गदया भीमो विष्णुरिवासुरान् ॥ ५४
ततः शकुनिनिर्दिष्टाः सादिनः शूरसंमताः ।
त्रिसाहस्राण्यभिययुः शरशक्त्यृष्टिपाणयः ॥ ५५
तान्प्रत्युद्गम्य यवनान्साश्वारोहांस्तदाऽरिहा ।
विविधान्विचरन्मार्गान्गदया समपोथयत् ॥ ५६
तेषामासीन्महाञ्छब्दस्ताडितानां च सर्वशः ।
अग्निभिर्दह्यमानानां नलानामिव भारत ॥ ५७
एवं सुबलपुत्रस्य त्रिसाहस्रान्हयोत्तमान् ।
हत्वाऽन्यं रथमास्थाय क्रुद्धो राधेयमभ्ययात् ॥५८
कर्णोऽपि समरे राजन्धर्मपुत्रमरिंदमम् ।
स शरैश्छादयामास सारथिं चाप्यपातयत् ॥५९
ततः स प्रद्रुतं सैन्यं दृष्ट्वा कर्णो महारथः ।
अन्वधावत्किरन्बाणैः कङ्कपत्रैरजिह्मगैः ॥ ६०
राजानमभिधावन्तं शरैरावृत्य रोदसी ।
क्रुद्धः प्रच्छादयामास शरजालेन मारुतिः ॥ ६१
सन्निवृत्तस्ततस्तूर्णं राधेयः शत्रुकर्शनः ।
भीमं प्रच्छादयामास समन्तान्निशितैः शरैः ॥ ६२
भीमसेनरथप्रेप्सुं कर्णं भारत सात्यकिः ।
अभ्यर्दयदमेयात्मा पार्ष्णिग्रहणकारणात् ॥ ६३
भीमसेनरथप्रेप्सुं कर्णो भारत सात्यकिम् ।
अभ्यवर्तत शैनेयमर्दयञ्छरवृष्टिभिः ॥ ६४
तावन्योन्यं समासाद्य वृषभौ सर्वधन्विनाम् ।
विसृजन्तौ शरान्दीप्तान्विभ्राजेतां मनस्विनौ ६५
ताभ्यां वियति राजेन्द्र विततं भीमदर्शनम् ।
कौञ्चपृष्ठारुणं रौद्रं बाणजालं व्यदृश्यत ॥ ६६
नैव सूर्यप्रभा राजन्न दिशः प्रदिशस्तथा ।
प्राज्ञासिष्म वयं ते वा शरैर्मुक्तैः सहस्रशः ॥ ६७
मध्याह्ने तपतो राजन्भास्करस्य महाप्रभाः ।
हृताः सर्वाः शरौघैस्तैः कर्णमाधवयोस्तदा ॥ ६८
सौबलं कृतवर्माणं द्रौणिमाधिरथिं कृपम् ।
संसक्तान्पाण्डवैर्दृष्ट्वा निवृत्ताः कुरवः पुनः ॥ ६९
तेषामापततां शब्दस्तीव्र आसीद्विशांपते ।
उद्वृत्तानां यथा वृष्ट्या सागराणां भयावहः ॥ ७०
ते सेने भृशसंसक्ते दृष्ट्वाऽन्योन्यं महाहवे ।
हर्षेण महता युक्ते परिगृह्य परस्परम् ॥ ७१
ततः प्रववृते युद्धं मध्यं प्राप्ते दिवाकरे ।
यादृशं नैवमस्माभिर्दृष्टपूर्वं न च श्रुतम् ॥ ७२
बलौघस्तु समासाद्य बलौघं सहसा रणे ।
उपसर्पत वेगेन वार्योघ इव सागरम् ॥ ७३
आसीन्निनादः सुमहान्बाणौघानां परस्परम् ।
गर्जतां सागरौघाणां यथा स्यान्निःस्वनो महान् ॥
ते तु सेने समासाद्य वेगवत्यौ परस्परम् ।
एकीभावमनुप्राप्ते नद्याविव समागमे ॥ ७५
ततः प्रववृते युद्धं घोररूपं विशांपते ।
कुरूणां पाण्डवानां च लिप्सतां सुमहद्यशः ॥७६
शूराणां गर्जतां तत्र ह्यविच्छेदकृता गिरः ।
श्रूयन्ते विविधा राजन्नामान्युद्दिश्य भारत ॥७७
यस्य यद्धि रणे व्यङ्गं पितृतो मातृतोऽपि वा ।
कर्मतः शीलतो वाऽपि स तच्छ्रावयते युधि ॥७८
तान्दृष्ट्वा समरे शूरांस्तर्जमानान्परस्परम् ।
अभवन्मे मती राजन्नेषामस्तीति जीवितम् ॥ ७९
तेषां दृष्ट्वा तु क्रुद्धानां वपूंष्यमिततेजसाम् ।
अभवन्मे भयं तीव्रं कथमेतद्भविष्यति ॥ ८०
ततस्ते पाण्डवा राजन्कौरवाश्च महारथाः ।
ततक्षुः सायकैस्तूर्णमन्योन्यं विजयैषिणः ॥ ८१

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
क्षत्रियास्ते महाराज परस्परवधैषिणः ।
अन्योन्यं समरे जघ्नुः कृतवैरा महौजसः ॥ १
रथौघाश्च हयौघाश्च नरौघाश्च समन्ततः ।
गजौघाश्च महाराज संसक्ताश्च परस्परम् ॥ २
गदानां परिघाणां च शक्तीनां च परस्परम् ।
प्रासानां भिण्डिपालानां मुसुण्ठीनां च सर्वशः ॥ ३
संपातं चानुपश्याम संग्रामे भृशदारुणे ।
शलभा इव संपेतुः शरवृष्ट्यः समन्ततः ॥ ४
नागान्नागाः समासाद्य व्यधमन्त परस्परम् ।
हया हयांश्च समरे रथिनो रथिनस्तथा ॥ ५
पत्तयः पत्तिसङ्घांश्च हयसङ्घांश्च पत्तयः ।
पत्तयो रथमातङ्गान्रथा हस्त्यश्वमेव च ।
नागाश्च समरे व्यङ्गं ममृदुः शीघ्रगा नृप ॥ ६
वध्यतां तत्र शूराणां क्रोशतां च परस्परम् ।
घोरमायोधनं जज्ञे पशूनां घातने यथा ॥ ७
रुधिरेण समास्तीर्णा बभौ भारत मेदिनी ।
शक्रगोपगणाकीर्णा प्रावृषीव वसुंधरा ॥ ८
यथा वा वाससी शुक्ले महारजनरञ्जिते ।
बिभ्रती युवती श्यामा तद्वदासीद्वसुंधरा ॥ ९
'बद्धचूडामणिधरैः शिरोभिश्चारुकुण्डलैः ।
उज्झितैर्वृषभाक्षाणां भ्राजते स्म वसुंधरा ॥' १०
शशशोणितदिग्धेव शातकुम्भमयीव च ।
'भूर्बभौ भरतश्रेष्ठ शान्तार्चिर्भिरिवानलैः ॥' ११
छिन्नानां चोत्तमाङ्गानां बाहूनां चोरुभिः सह ।
कुण्डलानां पिनद्धानां भूषणानां च भारत ॥ १२
निष्काणां हेमसूत्राणां शरीराणां च धन्विनाम् ।
चर्मणां सपताकानां सङ्घास्तत्रापतन्भुवि ।
'अगम्यकल्पा पृथिवी सर्वतो भृशकर्दमा ॥' १३
गजा गजान्समासाद्य विषाणैरार्दयन्नृप ।
विषाणाग्रहतास्तत्र भ्राजन्ते द्विरदोत्तमाः ।
रुधिरेणावसिक्ताङ्गा गैरिकप्रस्रवा इव ।
'प्रावृट्काले महाराज मेघा इव सविद्युतः ॥' १४
स्यन्दमाना यथा भान्ति पर्वता धातुमण्डिताः ।
'तथा रेजू रणे नागा रुधिरेण समाप्लुताः ॥' १५
तोमरान्सादिभिर्मुक्तान्प्रतिमानस्थितान्बहून् ।
हस्तैरुद्धृत्य तान्नागा बभञ्जुश्चापरे रणे ॥ १६
नाराचैश्छिन्नवर्माणो भ्राजन्ते स्म गजोत्तमाः ।
हिमागमे यथा राजन्व्यभ्रा इव महीधराः ॥ १७
शरैः कनकपुङ्खैश्च चिता रेजुर्गजोत्तमाः ।
उल्काभिः संप्रदीप्ताग्राः पर्वता इव भारत ॥ १८
केचिदभ्याहता नागैर्नागा नगवरोपमाः ।
न चेलुः समरात्तस्माच्छिन्नपक्षा इवाद्रयः ॥ १९
अपरे प्राद्रवन्नागाः शरार्ता व्रणपीडिताः ।
प्रतिमानैश्च कुम्भैश्च पेतुरुर्व्यां महाहवे ॥ २०
निषेदुः सिंहवच्चान्ये नदन्तो भैरवान्रवान् ।
वेमुश्च बहवो राजंश्चुक्रुशुश्चापरे गजाः ॥ २१
हयाश्च निहता बाणैर्हेमभाण्डविभूषिताः ।
निषेदुश्चैव मम्लुश्च बभ्रमुश्च दिशो दश ॥ २२
अपरे क्लिश्यमानाश्च व्यवेष्टन्त महीतले ।
भावान्बहुविधांश्चक्रुस्ताडिताः शरतोमरैः ॥ २३
नरास्तु निहता भूमौ क्रूजन्तस्तत्र मारिष ।
दृष्ट्वा च बान्धवान्न्ये पितॄन्न्ये पितामहान् ॥ २४
धावमानान्परांश्चान्ये दृष्ट्वान्ये तत्र भारत ।
ख्यातानि गोत्रनामानि शशंसुरितरेतरम् ॥ २५
तेषां छिन्ना महाराज भुजाः कनकभूषणाः ।
उद्वेष्टन्ते विवेष्टन्ते भ्रमन्ति ह्युत्पतन्ति च ॥ २६
निपतन्ति तथैवान्ये स्फुरन्ति च सहस्रशः ।
वेगांश्चान्ये रणे चक्रुः पञ्चास्या इव पन्नगाः ॥ २७
ते भुजा भोगिभोगाभाश्चन्दनाक्ता विशांपते ।
लोहितार्द्रा भृशं रेजुस्तपनीयध्वजा इव ॥ २८
वर्तमाने तथा घोरे संकुले सर्वतो दिशम् ।

अविज्ञाताः स्म युध्यन्ते विनिघ्नन्तः परस्परम्॥२९
भौमेन रजसाकीर्णे शस्त्रसंपातसंकुले ।
नैव स्वे न परे राजन्व्यज्ञायन्त तमोवृताः ॥ ३०
तथा तदभवद्युद्धं घोररूपं भयानकम् ।
लोहितोदा महानद्यः प्रसस्रुस्तत्र चासकृत् ॥ ३१
शीर्षपाषाणसंछन्नाः केशशैवलशाद्वलाः ।
अस्थिमीनसमाकीर्णा धनुःशरगदोडुपाः ॥ ३२
मांसशोणितपङ्किन्यो घोररूपाः सुदारुणाः ।
नदीः प्रवर्तयामासुः शोणितौघविवर्धिनीः॥ ३३
भीरुवित्रासकारिण्यः शूराणां हर्षवर्धनाः ।
ता नद्यो घोररूपास्तु नयन्त्यो यमसादनम्॥ ३४
अवगाढान्मज्जयन्त्यः क्षत्रस्याजनयन्भयम् ।
क्रव्यादानां नरव्याघ्र नर्दतां तत्रतत्र ह ॥ ३५
घोरमायोधनं जज्ञे प्रेतराजपुरोपमम् ।
उत्थितान्यगणेयानि कबन्धानि समन्ततः॥ ३६
नृत्यन्ति वै भूतगणाः सुतृप्ता मांसशोणितैः ।
पीत्वा च शोणितं तत्र वसां भुक्त्वा च भारत॥३७
मेदोमज्जावसामत्तास्तृप्ता मांसस्य चैव ह ।
धावमानाः स्म दृश्यन्ते काकगृध्रबकास्तथा॥३८
शूरास्तु समरे राजन्भयं त्यक्त्वा सुदुस्त्यजम् ।
योधव्रतसमाख्याताश्चक्रुः कर्माण्यभीतवत् ॥ ३९
शरशक्तिसमाकीर्णे क्रव्यादगणसंकुले ।
व्यचरन्त रणे शूराः ख्यापयन्तः स्वपौरुषम्॥ ४०
अन्योन्यं श्रावयन्ति स्म नामगोत्राणि भारत ।
पितृनामानि च रणे गोत्रनामानि वा विभो॥ ४१
श्रावयाणाश्च बहवस्तत्र योधा विशांपते ।
अन्योन्यमवमृद्नन्तः शक्तितोमरपट्टसैः ॥ ४२
वर्तमाने तथा युद्धे घोररूपे सुदारुणे ।
व्यषीदत्कौरवी सेना भिन्ना नौरिव सागरे॥ ४३

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

अर्जुनस्य संशप्तकैर्युद्धम् ॥ १ ॥

सञ्जय उवाच ।
वर्तमाने तथा युद्धे क्षत्रियाणां निमज्जने ।
गाण्डीवस्य महाघोषः श्रूयते युधि मारिष ॥ १
संशप्तकानामकरोत्कदनं यत्र पाण्डवः ।
कोसलानां तथा राजन्नारायणबलस्य च ॥ २
संशप्तकास्तु समरे शरवृष्टिः समन्ततः ।
अपातयन्पार्थमूर्ध्नि जयगृद्धाः प्रमन्यवः ॥ ३
तां शस्त्रवृष्टिमायान्तीमुरसा धारयन्प्रभुः ।
व्यगाहत परान्पार्थो विनिघ्नन्रथिनां वरान् ॥ ४
विक्षोभ्य तु रथानीकं कङ्कपत्रैः शिलाशितैः ।
आससाद ततः पार्थः सुशर्माणं महारथम् ॥ ५
स तस्य शरवर्षाणि ववर्ष रथिनां वरः ।
तथा संशप्तकाश्चैव पार्थस्य समरे स्थिताः ॥ ६
सुशर्मा तु ततः पार्थं विद्ध्वा दशभिराशुगैः ।
जनार्दनं त्रिभिर्बाणैरहनद्दक्षिणे भुजे ॥ ७
ततोऽपरेण भल्लेन केतुं पार्थस्य मारिष ।
विव्याध समरे राजन्सुशर्मा क्रोधमूर्च्छितः ॥ ८
स वानरवरो राजन्विश्वकर्मकृतो महान् ।
ननाद सुमहानादं नृत्यन्निव विभीषयन् ॥ ९
कपेस्तु निनदं श्रुत्वा संत्रस्ता तव वाहिनी ।
भयं विपुलमासाद्य निश्चेष्टा समपद्यत ॥ १०
ततः सा शुशुभे सेना निश्चेष्टाऽवस्थिता नृप ।
नानापुष्पसमाकीर्णं यथा चित्रीकृतं वनम् ॥ ११
प्रतिलभ्य ततः संज्ञां योधास्ते कुरुसत्तम ।
अर्जुनं सिषिचुर्बाणैः पर्वतं जलदा इव ॥ १२
संछाद्य समरे पार्थं परिवव्रुः समन्ततः ।
ते हयान्रथचक्रे तु रथेषां चापि मारिष ।
ग्रहीतुं प्रचक्रमुश्चैव क्रोधाविष्टाः समन्ततः॥ १३
निगृह्य तु रथं तस्य योधास्ते तु सहस्रशः ।
रथबन्धं प्रचक्रुर्हि पाण्डवस्यामितौजसः ॥ १४

रथमारुरुहुः केचित्कृष्णपार्थौ जिघृक्षवः ।
संशप्तकानां योधास्ते सिंहनादांश्च नेदिरे ॥ १५
अपरे जगृहुश्चैव केशवस्य महाभुजौ ।
पार्थं चैके महाराज रथस्थं जगृहुर्मुदा ॥ १६
अच्युतः स महाबाहुर्विधुन्वन्रणमूर्धनि ।
पातयामास तान्सर्वान्दुष्टहस्तीव हस्तिपान् ॥१७
स रथस्तैर्गृहीतस्तु पाण्डवस्य महात्मनः ।
स्पन्दितुं नाशकद्राजंस्तदद्भुतमिवाभवत् ॥ १८
ततः पार्थो महाबाहुः संवृतः स्तैर्महारथैः ।
निगृहीतं रथं दृष्ट्वा तांश्चाप्याद्रवतो बहून् ॥ १९
रथारूढांश्च सुबहून्पदाऽऽक्षिप्य न्यपातयत् ।
अपातयदसंभ्रान्तः शरैरासन्नयोधिभिः ॥ २०
तांस्तापयित्वा समरे पार्थः परपुरंजयः ।
स्मयन्निव महाबाहुः केशवं वाक्यमब्रवीत् ॥ २१
पश्य कृष्ण महाबाहो संशप्तकगणान्बहून् ।
कुर्वतोऽसुकरं कर्म मुमूर्षून्कालचोदितान् ॥ २२
रथबन्धमिमं प्राप्य पृथिव्यां नास्ति कश्चन ।
यः सहेत पुमाँल्लोके मदन्यः क्षत्रियर्षभः ॥ २३
पश्यैतानद्य समरे मत्प्रयुक्तैः सुतेजनैः ।
पात्यमानान्रणे कृष्ण शरैराशीविषोपमैः ॥ २४
इत्येवमुक्त्वा बीभत्सुः शङ्खप्रवरमुत्तमम् ।
व्यनादयदमेयात्मा देवदत्तं महामृधे ॥ २५
देवदत्तस्वनं श्रुत्वा केशवोऽपि महायशाः ।
पाञ्चजन्यस्वनं चक्रे पूरयन्निव रोदसी ॥ २६
तयोः शङ्खस्वनं श्रुत्वा संशप्तकवरूथिनी ।
संचचाल महाराज वित्रस्ता चाद्रवद्भृशम् ॥ २७
नागमस्त्रं ततः पार्थः प्रादुश्चक्रे हसन्निव ।
पादबन्धं स तेषां वै चक्रे तेन महास्त्रवित् ॥ २८
यानुद्दिश्य रणे पार्थः पादबन्धं चकार ह ।
ते बद्धाः पादबन्धेन योधाः संशप्तकास्तदा ॥ २९
निर्विचेष्टास्तदाऽभूवन्पाण्डवस्यास्त्रतेजसा ।
निर्विचेष्टांस्ततो योधानवधीत्पाण्डुनन्दनः ।
यथेन्द्रः समरे दैत्यांस्तारकस्य वधे पुरा ॥ ३०
ते वध्यमानाः समरे मुमुचुस्तं रथोत्तमम् ।
आयुधानि च सर्वाणि विस्रष्टुमुपचक्रमुः ॥ ३१
ततः सुशर्मा राजेन्द्र गृहीतां वीक्ष्य वाहिनीम् ।
सौपर्णमस्त्रं त्वरितः प्रादुश्चक्रे महारथः ॥ ३२
ततः सुपर्णाः संपेतुर्भक्षयन्तो भुजङ्गमान् ।
ततो विदुद्रुवुर्नागास्तान्दृष्ट्वा खेचरान्नृप ॥ ३३
तद्विमुक्तं बलं रेजे पादबन्धाद्दिशांपते ।
मेघबन्धाद्यथा मुक्तो भास्करस्तापयन्प्रजाः ॥ ३४
विप्रमुक्ताः स्वका योधाः फल्गुनस्य रथं प्रति ।
ससृजुः शरसङ्घांश्च शस्त्रसङ्घांश्च मारिष ॥ ३५
तां महास्त्रमयीं वृष्टिं शरैः संछिद्य भारत ।
अवधीत्सततो योधान्वासविः परवीरहा ॥ ३६
सुशर्मा तु ततो राजन्बाणेन नतपर्वणा ।
अर्जुनं हृदये विद्ध्वा विव्याधान्यैस्त्रिसप्तभिः ॥३७
स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ।
तत उच्चुक्रुशुः सर्वे हतः पार्थ इति ब्रुवन् ॥ ३८
ततः शङ्खनिनादाश्च भेरीशब्दाश्च पुष्कलाः ।
नानावादित्रनिनदाः सिंहनादाश्च जज्ञिरे ॥ ३९
प्रतिलभ्य ततः संज्ञां श्वेताश्वः कृष्णसारथिः ।
सोऽतिविद्धो महेष्वासः शरैराशीविषोपमैः ।
सुशर्माणं महाराज क्रोधाविष्टो महारथः ॥ ४०
ततः शरशतैः पार्थः संछाद्यैनं क्षणाद्रणे ।
दिशस्तु वारयामास बाणैस्तत्र महास्त्रवित् ॥ ४१
विमुखीकृत्य समरे सुशर्माणं धनंजयः ।
ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे हसन्निव ॥ ४२
ततो बाणसहस्राणि तदुत्सृष्टानि मारिष ।
सर्वदिक्षु व्यदृश्यन्त सूदयन्ति रथद्विपान् ॥ ४३
हयान्पत्तींश्च समरे शस्त्रैः शतसहस्रशः ।
रराज समरे राजञ्शक्रो निघ्नन्निवासुरान् ॥ ४४
वध्यमाने ततः सैन्ये भयं सुमहदाविशत् ।
संशप्तकगणानां च गोपालानां च भारत ॥ ४५
न हि तत्र पुमान्कश्चिद्योऽर्जुनं प्रतिबुध्यते ।
पश्यतां तत्र वीराणामहन्यत बलं तव ॥ ४६
हन्यमानं च तद्भूयिश्रेष्ठं च पराक्रमे ॥ ४७
अयुतं तत्र योधानां हत्वा पाण्डुसुतो रणे ।
व्यभ्राजत महाराज विधूमोऽग्निरिव ज्वलन् ॥४८
चतुर्दशसहस्राणि यानि दृष्टानि भारत ।

रथानामयुतं चैव त्रिसहस्राश्च दन्तिनः ॥ ४९
ततः संशप्तका भूयः परिवव्रुर्धनञ्जयम् ।
मर्तव्यमिति निश्चित्य जयं वाप्यनिवर्तनम् ॥ ५०
तत्र युद्धं महच्चासीत्तावकानां विशांपते ।
शूरेण बलिना सार्धं पाण्डवेन किरीटिना ।
जित्वा तान्यहनत्पार्थः शत्रून्शक्र इवासुरान् ५१

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

सकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
कृतवर्मा कृपो द्रौणिः सूतपुत्रश्च मारिष ।
उलूकः सौबलश्चैव राजा च सह सोदरैः ॥ १
सीदमानां चमूं दृष्ट्वा पाण्डुपुत्रभयार्दिताम् ।
समुज्जहुः स्म वेगेन भिन्नां नावमिवार्णवे ॥ २
ततो युद्धमतीवासीन्मुहूर्तमिव भारत ।
भीरूणां त्रासजननं शूराणां हर्षवर्धनम् ॥ ३
कृपेण शरवर्षाणि प्रतिमुक्तानि संयुगे ।
सृञ्जयांश्छादयामासुः शलभानां व्रजा इव ॥ ४
शिखण्डी च ततः क्रुद्धो गौतमं त्वरितो ययौ ।
ववर्ष शरवर्षाणि समन्ताद्द्विजपुङ्गवम् ॥ ५
कृपस्तु शरवर्षं तद्विनिहत्य महास्त्रवित् ।
शिखण्डिनं रणे क्रुद्धो विव्याध दशभिः शरैः ॥ ६
ततः शिखण्डी कुपितः शरैः सप्तभिराहवे ।
कृपं विव्याध कुपितं कङ्कपत्त्रैरजिह्मगैः ॥ ७
ततः कृपः शरैस्तीक्ष्णैः सोऽतिविद्धो महारथः ।
'ततः सुनिशितैस्तीक्ष्णैः क्षुरप्रैर्हेमभूषितैः ।'
व्यश्वसूतरथं चक्रे शिखण्डिनमथो द्विजः ॥ ८
हताश्वात्तु ततो यानादवप्लुत्य महारथः ।
खड्गं चर्म तथा गृह्य सत्वरं ब्राह्मणं ययौ ॥ ९
तमापतन्तं सहसा शरैः सन्नतपर्वभिः ।
वारयामास समरे तदद्भुतमिवाभवत् ॥ १०
तत्राद्भुतमपश्याम शिलानां प्लवनं यथा ।
निश्चेष्टो यद्रणे राजञ्छिखण्डी समतिष्ठत ॥ ११
कृपेण वारितं दृष्ट्वा शिखण्डिनमथो नृप ।
प्रत्युद्ययौ कृपं तूर्णं धृष्टद्युम्नो महारथः ॥ १२
धृष्टद्युम्नं ततो यान्तं शारद्वतरथं प्रति ।
प्रतिजग्राह वेगेन कृतवर्मा महारथः ॥ १३
युधिष्ठिरमथायान्तं शारद्वतरथं प्रति ।
सपुत्रं सहसैन्यं च द्रोणपुत्रो न्यवारयत् ॥ १४
नकुलं सहदेवं च त्वरमाणौ महारथौ ।
प्रतिजग्राह ते पुत्रः शरवर्षेण वारयन् ॥ १५
भीमसेनं करूशांश्च केकयान्सह सृञ्जयैः ।
कर्णो वैकर्तनो युद्धे वारयामास भारत ॥ १६
शिखण्डिने ततो बाणान्कृपः शारद्वतो युधि ।
प्राहिणोत्त्वरया युक्तो बीभत्सोरथ संनिधौ ॥ १७
ताञ्छरान्प्रेषितांस्तेन समन्तात्स्वर्णभूषितान् ।
चिच्छेद खड्गमाविध्य भ्रामयंश्च पुनःपुनः ॥ १८
शतचन्द्रं च तच्चर्म गौतमस्तस्य भारत ।
व्यधमत्सायकैस्तूर्णं तत उच्चुक्रुशुर्जनाः ॥ १९
स विचर्मा महाराज खड्गपाणिरुपाद्रवत् ।
कृपस्तं शरसंघातैराद्रवन्तमपीडयत् ॥ २०
शारद्वतशरैर्ग्रस्तं क्लिश्यमानं महाबलः ।
चित्रकेतुसुतो राजन्सुकेतुस्त्वरितो ययौ ॥ २१
विकिरन्ब्राह्मणं युद्धे बहुभिर्निशितैः शरैः ।
अभ्यापतदमेयात्मा गौतमस्य रथं प्रति ॥ २२
दृष्ट्वा विषक्तं तं चैव ब्राह्मणं च निवारितम् ।
अपयातस्ततस्तूर्णं शिखण्डी राजसत्तम ॥ २३
सुकेतुस्तु ततो राजन्गौतमं नवभिः शरैः ।
विद्ध्वा विव्याध सप्तत्या पुनश्चैनं त्रिभिः शरैः ॥ २४
अथास्य सशरं चापं पुनश्चिच्छेद मारिष ।
सारथिं च शरेणास्य भृशं मर्मस्वताडयत् ॥ २५
गौतमस्तु ततः क्रुद्धो धनुर्गृह्य नवं दृढम् ।
सुकेतुं त्रिंशता बाणैः सर्वमर्मस्वताडयत् ॥ २६

स विह्वलितसर्वाङ्गः प्रचचाल रथोत्तमे ।
भूमिकम्पे यथा वृक्षश्चचालाकम्पितो भृशम्॥२७
चलतस्तस्य कायात्तु शिरो ज्वलितकुण्डलम् ।
सोष्णीषं सशिरस्त्राणं क्षुरप्रेण व्यपातयत् ॥ २८
तच्छिरः प्रापतद्भूमौ श्येनाहृतमिवामिषम् ।
ततोऽस्य कायो वसुधां पश्चात्प्रापतदच्युत ॥२९
तस्मिन्हते महाराज पुत्रास्तस्य पदानुगाः ।
गौतमं समरे त्यक्त्वा दुद्रुवुस्ते दिशो दश ॥३०
धृष्टद्युम्नं तु समरे संनिवार्य महारथः ।
कृतवर्माऽब्रवीद्धृष्टस्तिष्ठतिष्ठेति भारत ॥ ३१
तदभूत्तुमुलं युद्धं वृष्णिपार्षतयो रणे ।
आमिषार्थे यथा युद्धं श्येनयोः क्रुद्धयोर्नृप॥ ३२
धृष्टद्युम्नस्तु समरे हार्दिक्यं नवभिः शरैः ।
आजघानोरसि क्रुद्धः पीडयन्हृदिकात्मजम्॥ ३३
कृतवर्मा तु समरे पार्षतेन दृढाहतः ।
पार्षतं सरथं साश्वं छादयामास सायकैः ॥ ३४
सरथश्छादितो राजन्धृष्टद्युम्नो न दृश्यते ।
मेघैरिव परिच्छन्नो भास्करो जलधारिभिः ॥३५
विधूय तं बाणगणं शरैः कनकभूषणैः ।
व्यरोचत रणे राजन्धृष्टद्युम्नः कृतव्रणः ॥ ३६
ततस्तु पार्षतः क्रुद्धः शस्त्रवृष्टिं सुदारुणाम् ।
कृतवर्माणमासाद्य व्यसृजत्पृतनापतिः ॥ ३७
तामापतन्तीं सहसा शस्त्रवृष्टिं सुदारुणाम् ।
शरैरनेकसाहस्रैर्हार्दिक्योऽवारयद्युधि ॥ ३८
दृष्ट्वा तु वारितां युद्धे शस्त्रवृष्टिं दुरासदाम् ।
कृतवर्माणमासाद्य वारयामास पार्षतः ॥ ३९
'यथा युग्मरथेनाजौ वाहान्वाहैरभिश्रयत् ।
गृहीत्वा चर्म खड्गं च रथं तस्यावपुप्लुवे ॥ ४०
मिलितेष्वथ वाहेषु प्रत्यासन्ने च पार्षते ।
दृष्ट्वाऽपदानं तस्याशु गदां जग्राह सात्वतः॥ ४१
गदापाणिस्ततो राजन्रथाच्चूर्णमवप्लुतः ।
तमदृष्ट्वा रथोपस्थे सारथिं समताडयत् ॥ ४२
खड्गेन शितधारेण स हतः प्रापतद्रथात् ।
कृतवर्मा ततो हृष्टस्तलशब्दं चकार ह ॥ ४३
पार्षतं चाब्रवीद्राजन्नेहीहीति पुनःपुनः ।
स तं न ममृषे युद्धे तलशब्दं समीरितम् ॥ ४४
अवप्लुत्य रथात्तस्मात्स्वरथं पुनरास्थितः ।
अभ्ययात्स तु तच्चूर्णं तिष्ठतिष्ठेति चाब्रवीत्॥ ४५
ततो राजन्महेष्वासं कृतवर्माणमाशु वै ।
गदां गृह्य पुनर्वेगात्कृतवर्माणमाहनत् ॥ ४६
सोऽतिविद्धो बलवता न्यपतन्मूर्च्छया हतः ।
श्रुतर्वा रथमारोप्य अपोवाह रणाजिरात् ॥' ४७
धृष्टद्युम्नस्तु समरे दृष्ट्वा शत्रुं महारथः ।
कौरवान्समरे तूर्णं वारयामास सायकैः ॥ ४८
ततस्ते तावका योधा धृष्टद्युम्नमुपाद्रवन् ।
सिंहनादरवांश्चक्रुस्ततो युद्धमवर्तत ॥ ४९

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

पञ्चाशोऽध्यायः ॥ ५० ॥

संकुलयुद्धम् ॥ १ ॥ अश्वत्थाम्ना युधिष्ठिरपराजयः ॥ २ ॥

सञ्जय उवाच ।
द्रौणिर्युधिष्ठिरं दृष्ट्वा शैनेयेनाभिरक्षितम् ।
द्रौपदेयैस्तथा शूरैरभ्यवर्तत हृष्टवत् ॥ १
किरन्निषुगणान्घोरान्हेमपुङ्खाञ्शिलाशितान् ।
दर्शयन्विविधान्मार्गाञ्शिक्षया लघुहस्तवान्॥ २
खं पूरयञ्शरैस्तीक्ष्णैर्वेगवद्भिः समन्ततः ।
युधिष्ठिरस्य समरे दिशः सर्वाः समावृणोत् ॥ ३
भारद्वाजशरैश्छन्नं न प्राज्ञायत किंचन ।
बाणभूतमभूत्सर्वमायोधनशिरो महत् ॥ ४
बाणजालं दिविष्ठं तत्स्वर्णपुङ्खविभूषितम् ।
शुशुभे भरतश्रेष्ठ विमानमिव विष्ठितम् ॥ ५
तेन च्छन्ने रणे राजन्बाणजालेन भास्वता ।
अभ्रच्छायेव संजज्ञे हृतरश्मिस्तमोनुदः ॥ ६
तदद्भुतमपश्याम बाणभूते नभस्थले ।

न स्म संपतते भूतं द्रौणेर्दृष्ट्वा पराक्रमम् ॥ ७
सात्यकिर्यतमानस्तु धर्मराजस्तु पाण्डवः ।
तथेतराणि सैन्यानि न स्म चक्रुः पराक्रमम् ॥ ८
लाघवं द्रोणपुत्रस्य दृष्ट्वा तत्र महारथाः ।
व्यस्मयन्त महाराज न चैनं प्रत्युदीक्षितुम् ॥ ९
शेकुस्ते सर्वराजानस्तपन्तमिव भास्करम् ।
वध्यमाने ततः सैन्ये द्रौपदेया महारथाः ॥ १०
सात्यकिर्धर्मराजश्च पाञ्चालाश्चापि संगताः ।
त्यक्त्वा मृत्युभयं घोरं द्रौणायनिमुपाद्रवन् ॥ ११
सात्यकिः सप्तविंशत्या द्रौणिं विद्ध्वा शिलीमुखैः ।
पुनर्विव्याध नाराचैः सप्तभिः स्वर्णभूषितैः ॥ १२
युधिष्ठिरस्त्रिसप्तत्या प्रतिविन्ध्यश्च सप्तभिः ।
श्रुतकर्मा त्रिभिर्बाणैः श्रुतकीर्तिश्च सप्तभिः ॥ १३
सुतसोमस्तु नवभिः शतानीकश्च सप्तभिः ।
अन्ये च बहवः शूरा विव्यधुस्तं समन्ततः ॥ १४
स तु क्रुद्धस्ततो राजन्नाशीविष इव श्वसन् ।
सात्यकिं पञ्चविंशत्या प्राविध्यत शिलीमुखैः १५
श्रुतकीर्तिं च नवभिः सुतसोमं च पञ्चभिः ।
अष्टभिः श्रुतकर्माणं प्रतिविन्ध्यं त्रिभिः शरैः १६
शतानीकं च नवभिर्धर्मपुत्रं च पञ्चभिः ।
तथेतरांस्ततः शूरान्द्वाभ्यां द्वाभ्यामताडयत् ।
श्रुतकीर्तेस्तथा चापं चिच्छेद निशितैः शरैः ॥ १७
अथान्यद्धनुरादाय श्रुतकीर्तिर्महारथः ।
द्रौणायनिं त्रिभिर्विद्ध्वा विव्याधान्यैः शितैः शरैः ॥
ततो द्रौणिर्महाराज शरवर्षेण मारिष ।
छादयामास तत्सैन्यं समन्ताद्भरतर्षभ ॥ १९
ततः पुनरमेयात्मा धर्मराजस्य कार्मुकम् ।
द्रौणिश्चिच्छेद विहसन्विव्याध च शरैस्त्रिभिः ॥ २०
ततो धर्मसुतो राजन्प्रगृह्यान्यन्महद्धनुः ।
द्रोणपुत्रं त्रिषष्ट्या तु बाह्वोरुरसि चार्पयत् ॥ २१
सात्यकिस्तु ततः क्रुद्धो द्रौणेः प्रहरतो रणे ।
अर्धचन्द्रेण तीक्ष्णेन धनुश्चिच्छेदाऽनदद्भृशम् ॥ २२
छिन्नधन्वा ततो द्रौणिः शक्त्या शक्तिमतां वरः ।
सारथिं पातयामास शैनेयस्य रथाद्द्रुतम् ॥ २३
अथान्यद्धनुरादाय द्रोणपुत्रः प्रतापवान् ।
शैनेयं शरवर्षेण च्छादयामास भारत ॥ २४
तस्याश्वाः प्रद्रुताः सङ्ख्ये पतिते रथसारथौ ।
तत्रतत्रैव धावन्तः समदृश्यन्त भारत ॥ २५
युधिष्ठिरपुरोगास्तु द्रौणिं शस्त्रभृतां वरम् ।
अभ्यवर्षन्त वेगेन विसृजन्तः शिताञ्छरान् ॥ २६
सहसा पतत्तस्तान्वै क्रुद्धरूपान्परंतपः ।
प्रहसन्प्रतिजग्राह द्रोणपुत्रो महारणे ॥ २७
ततः शरशतज्वालः सेनाकक्षं महारणे ।
द्रौणिर्ददाह समरे कक्षमग्निरिवोत्थितः ॥ २८
तद्बलं पाण्डुपुत्रस्य द्रोणपुत्रप्रतापितम् ।
चुक्षुभे भरतश्रेष्ठ तस्मिन्नेव चमूमुखे ॥ २९
तद्बलं पाण्डवेयस्य द्रोणपुत्रः शरार्चिषा ।
तापयन्भरतश्रेष्ठ गभस्तिभिरिवांशुमान् ॥ ३०
तत्पच्यमानं मर्षेण ब्राह्मणस्य च सायकैः ।
क्षुभ्यते पाण्डवं सैन्यं तिमिनेव नदीमुखम् ॥ ३१
दृष्ट्वा चैव महाराज द्रोणपुत्रपराक्रमम् ।
सर्वान्दुर्योधनः पार्थान्हतान्युद्धेऽभ्यमन्यत ॥ ३२
युधिष्ठिरस्तु त्वरितो द्रौणिं पीड्य महारथम् ।
अब्रवीद्द्रोणपुत्रं स रोषामर्षसमन्वितः ॥ ३३
'जानामि त्वां युधि श्रेष्ठ वीर्यवन्तं बलान्वितम् ।
कृतास्त्रं कृतिनं चैव तथा लघुपराक्रमम् ॥ ३४
बलमेतद्भवान्सर्वं पार्षते यदि दर्शयेत् ।
ततस्त्वां बलवन्तं च कृतविद्यं च विद्महे ॥ ३५
न हि वै पार्षतं दृष्ट्वा समरे शत्रुसूदनम् ।
भवेत्तव बलं किंचिद्ब्रवीमि त्वां न तु द्विजम् ॥' ३६
नैव नाम तव प्रीतिर्नैव नाम कृतज्ञता ।
यतस्त्वं पुरुषव्याघ्र मामेवाद्य जिघांससि ॥ ३७
ब्राह्मणेन तपः कार्यं शमश्च दमएव च ।
क्षत्रियेण धनुर्नाम्यं स भवान्ब्राह्मणब्रुवः ॥ ३८
मिषतस्ते महाबाहो युधि जेष्यामि कौरवान् ।
कुरुष्व समरे कर्म ब्रह्मबन्धो यथेष्टतः ॥ ३९
एवमुक्तो महाराज द्रोणपुत्रः स्मयन्निव ।
युक्तं तत्त्वं च संचिन्त्य नोत्तरं किंचिदब्रवीत् ॥ ४०
अनुक्त्वा च ततः किंचिच्छरवर्षेण पाण्डवम् ।
छादयामास समरे क्रुद्धोऽन्तक इव प्रजाः ॥ ४१

स च्छाद्यमानस्तु तदा द्रोणपुत्रेण मारिष ।
पार्थोऽपयातः शीघ्रं वै प्रगृह्य महतीं चमूम् ॥४२
अपयाते ततस्तस्मिन्धर्मपुत्रे युधिष्ठिरे ।
द्रोणपुत्रः स्थितो राजन्प्रत्यादेशान्महात्मनः ४३
ततो युधिष्ठिरो राजंस्त्यक्त्वा द्रौणिं महाहवे ।
प्रययौ तावकं सैन्यं युक्तः क्रूराय कर्मणे ॥ ४४

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे पञ्चाशोऽध्यायः ॥ ५० ॥

एकपञ्चाशोऽध्यायः ॥ ५१ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
भीमसेनं सपाञ्चालं चेदिकेकयसंवृतम् ।
सेनापतिः स्वयं क्रुद्धो वारयामास सायकैः ॥ १
ततस्तु चेदिकारूशान्सृञ्जयांश्च महारथान् ।
कर्णो जघान समरे भीमसेनस्य पश्यतः ॥ २
भीमसेनस्ततः कर्ण विहाय रथसत्तमम् ।
प्रययौ कौरवं सैन्यं कक्षमग्निरिव ज्वलन् ॥ ३
सूतपुत्रोऽपि समरे पाञ्चालान्केकयांस्तथा ।
सृञ्जयांश्च महेष्वासान्निजघान सहस्रशः ॥ ४
संशप्तकेषु पार्थश्च कौरवेषु वृकोदरः ।
पाञ्चालेषु तथा कर्णः क्षयं चक्रुर्महारथाः ॥ ५
ते क्षत्रिया दह्यमानास्त्रिभिस्तैः पावकोपमैः ।
जग्मुर्विनाशं समरे राजन्दुर्मन्त्रिते तव ॥ ६
ततो दुर्योधनः क्रुद्धो नकुलं नवभिः शरैः ।
विव्याध भरतश्रेष्ठ चतुरश्चास्य वाजिनः ॥ ७
ततः परममेयात्मा तव पुत्रो जनाधिप ।
क्षुरेण सहदेवस्य ध्वजं चिच्छेद काञ्चनम् ॥ ८
नकुलस्तु ततः क्रुद्धस्तव पुत्रं च सप्तभिः ।
जघान समरे राजन्सहदेवश्च पञ्चभिः ॥ ९
तावुभौ भरतश्रेष्ठौ ज्येष्ठौ सर्वधनुष्मताम् ।
विव्याधोरसि संक्रुद्धः पञ्चभिः पञ्चभिः शरैः ॥१०
ततोऽपराभ्यां भल्लाभ्यां धनुषी समकृन्तत ।
यमयोः प्रसभं वीरो विव्याधाशु त्रिभिस्त्रिभिः ११
तावन्ये धनुषी श्रेष्ठे शक्रचापनिभे शुभे ।
प्रगृह्य रेजतुः शूरौ देवपुत्रसमौ युधि ॥ १२
ततस्तौ रभसौ युद्धे भ्रातरौ भ्रातरं युधि ।
शरैर्ववर्षतुर्घोरैर्महामेघौ यथाऽचलम् ॥ १३
ततः क्रुद्धो महाराज तव पुत्रो महारथः ।
पाण्डुपुत्रौ महेष्वासौ वारयामास पत्रिभिः ॥ १४
धनुर्मण्डलमेवास्य ददृशे युधि भारत ।
सायकाश्चाप्यदृश्यन्त निश्चरन्तः समन्ततः ॥ १५
'तस्य सायकसंछन्नौ माद्रेयौ न विरेजतुः ।
मेघच्छन्नौ यथा व्योम्नि चन्द्रसूर्यौ गतप्रभौ ॥ १६
ते तु बाणा महाराज स्वर्णपुङ्खाः शिलाशिताः ।'
आच्छादयन्दिशः सर्वाः सूर्यस्येव मरीचयः ॥ १७
बाणभूते ततस्तस्मिन्संछन्ने च नभस्तले ।
राज्ञस्तु ददृशे रूपं कालान्तकयमोपमम् ॥ १८
पराक्रमं तु तं दृष्ट्वा तव सूनोर्महारथाः ।
मृत्योरुपान्तिकं प्राप्तौ माद्रीपुत्रौ स्म मेनिरे ॥ १९
ततः सेनापती राजन्पाण्डवानां महारथः ।
पार्षतः प्रययौ तत्र यत्र राजा सुयोधनः ॥ २०
माद्रीपुत्रौ ततः शूरौ व्यतिक्रम्य महारथौ ।
धृष्टद्युम्नस्तव सुतं पीडयामास सायकैः ॥ २१
तमविध्यदमेयात्मा तव पुत्रो ह्यमर्षणः ।
पाञ्चाल्यं पञ्चविंशत्या ग्रहस्य पुरुषर्षभः ॥ २२
ततः पुनरमेयात्मा तव पुत्रो ह्यमर्षणः ।
विद्ध्वा ननाद पाञ्चाल्यं षष्ट्या पञ्चभिरेव च ॥ २३
तथास्य सशरं चापं मुष्टिदेशे विशांपते ।
क्षुरप्रेण सुतीक्ष्णेन राजा चिच्छेद संयुगे ॥ २४
तदपास्य धनुश्छिन्नं पाञ्चाल्यः शत्रुकर्शनः ।
अन्यदादत्त वेगेन धनुर्भारसहं नवम् ॥ २५
क्रोधाद्रुधिररक्ताक्षः संरम्भात्प्रज्वलन्निव ।
अशोभत महेष्वासो धृष्टद्युम्नः कृतव्रणः ॥ २६
स पञ्चदश नाराचाञ्श्वसतः पन्नगानिव ।

जिघांसुर्भरतश्रेष्ठं धृष्टद्युम्नो व्यपासृजत् ॥ २७
ते वर्म हेमविकृतं भित्त्वा राज्ञः शिलीमुखाः ।
विविशुर्वसुधां वेगात्कङ्कबर्हिणवाससः ॥ २८
सोऽतिविद्धो महाराज पुत्रस्तेऽतिव्यराजत ।
वसन्तकाले सुमहान्प्रफुल्ल इव किंशुकः ॥ २९
स च्छिन्नवर्मा नाराचप्रहारैर्झर्झरीकृतः ।
धृष्टद्युम्नस्य भल्लेन क्रुद्धश्चिच्छेद कार्मुकम् ॥ ३०
अथैनं छिन्नधन्वानं त्वरमाणो महीपतिः ।
सायकैर्दशभी राजन्भ्रुवोर्मध्ये समार्पयत् ॥ ३१
तस्य तेऽशोभयन्वक्त्रं कर्मारपरिमार्जिताः ।
प्रफुल्लं पङ्कजं यद्वद्भ्रमरा मधुलिप्सवः ॥ ३२
तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महामनाः ।
अन्यदादत्त वेगेन धनुर्भल्लांश्च षोडश ॥ ३३
ततो दुर्योधनस्याश्वान्हत्वा सूतं च पञ्चभिः ।
धनुश्चिच्छेद भल्लेन जातरूपपरिष्कृतम् ॥ ३४
रथं सोपस्करं छत्रं शक्तिं खड्गं गदां ध्वजम् ।
भल्लैश्चिच्छेद दशभिः पुत्रस्य तव पार्षतः ॥ ३५
तपनीयाङ्गदं छत्रं नागं मणिमयं शुभम् ।
ध्वजं कुरुपतेश्छिन्नं ददृशुः सर्वपार्थिवाः ॥ ३६
दुर्योधनं तु विरथं छिन्नवर्मायुधध्वजम् ।
भ्रातरं समुदैक्षन्त सोदरा भरतर्षभ ॥ ३७
तमारोप्य रथे राजन्कुण्डधारो महारथम् ।
अपाहरदसंभ्रान्तो धृष्टद्युम्नस्य पश्यतः ॥ ३८
कर्णस्तु सत्यकिं हित्वा राजगृध्नुरमर्षणः ।
द्रोणहन्तारमुग्रेषुं ससाराभिमुखो रणे ॥ ३९
तं पृष्ठतोऽन्वयात्तूर्णं शैनेयोऽभिहतः शरैः ।
वारणं जघनोपान्ते विषाणाभ्यामिव द्विपः ॥ ४०
स भारतपुरोगानां राज्ञां च सुमहात्मनाम् ।
कर्णपार्षतयोर्युद्धे संक्रुद्धानां महारणे ॥ ४१
न पाण्डवानां नास्माकं कश्चिदासीत्पराङ्मुखः ।
प्रत्यदृश्यत यत्कर्णः पाञ्चालांस्त्वरितो ययौ ॥ ४२
तस्मिन्क्षणे नरश्रेष्ठ गजवाजिरथक्षयः ।
प्रादुरासीदुभयतो राजन्मध्यगतेऽहनि ॥ ४३
पाञ्चालास्तु महाराज त्वरिता विजिगीषवः ।
सर्वतोऽभ्यद्रवन्कर्णं पतत्रिण इव द्रुमम् ॥ ४४
तेषामाधिरथिः क्रुद्धः प्रधानान्वै तरस्विनः ।
विचिन्वन्निव बाणौघैः समासादयदग्रतः ॥ ४५
व्याघ्रकेतुः सुशर्मा च शुक्रश्चित्रायुधः क्रतुः ।
दुर्जयो रोचमानश्च सिंहसेनस्तथाऽष्टमः ।
महता रथवंशेन परिवव्रुर्नरोत्तमम् ॥ ४६
सृजन्तः सायकांस्तूर्णं कर्णमाहवशोभिनम् ।
यतमानांस्तु ताञ्शूरान्मनुजेन्द्रः शितैः शरैः ।
अष्टाभिरष्टौ राधेयः पाञ्चालान्व्यहनद्रणे ॥ ४७
अथापरान्महाराज सूतपुत्रः प्रतापवान् ।
जघान बहुसाहस्रान्योधान्युद्धविशारदान् ॥ ४८
विष्णुं च विष्णुवर्माणं देवापिं भद्रमेव च ।
दण्डधारं च समरे चित्रं चित्रायुधं हरिम् ॥ ४९
सिंहकेतुं रोचमानं शलभं च महारथम् ।
निजघान सुसंक्रुद्धश्चेदीनां च महारथान् ॥ ५०
तेषामाददतः प्राणानासीदाधिरथेर्वपुः ।
शोणिताभ्युक्षिताङ्गस्य रुद्रस्येवातिभैरवम् ॥ ५१
तत्र भारत कर्णेन मातङ्गास्ताडिताः शरैः ।
सर्वतोऽभ्यद्रवन्भीताः कुर्वन्तो महदाकुलम् ॥ ५२
निपेतुरुर्व्यां समरे कर्णसायकताडिताः ।
कुर्वन्तो विविधान्नादान्वज्रनुन्ना इवाचलाः ॥ ५३
गजवाजिमनुष्यैश्च निपतद्भिः समन्ततः ।
रथैर्भग्नैर्ध्वजैश्चैव समास्तीर्यत मेदिनी ॥ ५४
नैवं भीष्मो न च द्रोणो नान्ये युधि च तावकाः ।
चक्रुः स्म तादृशं कर्म यादृशं कृतवान्रणे ॥ ५५
मृगमध्ये यथा सिंहो दृश्यते निर्भयश्चरन् ।
पाञ्चालानां तथा मध्ये कर्णोऽचरदभीतवत् ॥ ५६
सूतपुत्रोऽथ नागेषु हयेषु च रथेषु च ।
नरेषु च नरव्याघ्रश्चकार कदनं महत् ॥ ५७
यथा मृगगणांस्त्रस्तान्सिंहो द्रावयते दिशः ।
पाञ्चालानां रथव्रातान्कर्णो व्यद्रावयत्तथा ॥ ५८
सिंहं स्म हि यथा प्राप्य न जीवन्ति मृगाः क्वचित् ।
तथा कर्णमनुप्राप्ता न जीवन्ति स्म सृंजयाः ॥ ५९
वैश्वानरमुखं प्राप्य दह्यन्ते शलभा यथा ।
कर्णाग्निं समरे प्राप्य दग्धा भारत सृञ्जयाः ॥ ६०
चेदिष्वेकेन कर्णेन पाञ्चालेषु च भारत ।

विश्राव्य नाम निहता बहवः शूरसंमताः ॥ ६१
मम चासीन्मती राजन्दृष्ट्वा कर्णस्य विक्रमम् ।
नैकोऽप्याधिरथेर्जीवन्पाञ्चाल्यो मोक्ष्यते युधि ६२
सङ्घे विमर्द्य पाञ्चालान्सूतपुत्रः पुनःपुनः ।
अभ्यधावत्सुसंक्रुद्धः कुन्तीपुत्रं युधिष्ठिरम् ॥ ६३
धृष्टद्युम्नश्च राजानं द्रौपदेयाश्च मारिष ।
परिवव्रुरमित्रघ्नं शतशश्चापरे जनाः ॥ ६४
शिखण्डी सहदेवश्च नकुलो नाकुलिस्तथा ।
जनमेजयः शिनेर्नप्ता बहवश्च प्रभद्रकाः ॥ ६५
एते पुरोगमा भूत्वा धृष्टद्युम्नश्च संयुगे ।
कर्णमस्यन्तमिष्वस्त्रैस्ततक्षुरमितौजसम् ॥ ६६
तांस्तत्राधिरथिः सङ्घे चेदिपाञ्चालपाण्डवान् ।
एको बहूनभ्यपतद्गरुत्मानिव पन्नगान् ॥ ६७
तैः कर्णस्याभवद्युद्धं घोररूपं विशांपते ।
तादृग्यादृक्पुरावृत्तं देवानां दानवैः सह ॥ ६८
तान्समेतान्महेष्वासाञ्शरवर्षौघवर्षिणः ।
एको व्यधमदव्यग्रस्तमांसीव दिवाकरः ॥ ६९
भीमसेनस्तु संसक्ते राधेये पाण्डवैः सह ।
सर्वतोऽभ्यहनत्क्रुद्धो यमदण्डनिभैः शरैः ॥ ७०
बाह्लीकान्केकयान्मात्स्यान्वासात्यान्मद्रसैन्धवान्
एकः संख्ये महेष्वासो योधयन्बह्वशोभत ॥ ७१
तत्र मर्मसु भीमेन नाराचैस्ताडिता गजाः ।
प्रपतन्तो हतारोहाः कम्पयन्ति स्म मेदिनीम् ७२
वाजिनश्च हतारोहाः पत्तयश्च गतासवः ।
अशेरत महाराज वमन्तो रुधिरं बहु ॥ ७३
ताडिताः सहसा नागा भीमसेनेन मारिष ।
निपतन्ति महावेगा वज्ररुग्णा इवाचलाः ॥ ७४
पतितैस्तैर्महाराज वेगवद्भिर्महारथैः ।
शुशुभे वसुधा राजन्विकीर्णैरिव पर्वतैः ॥ ७५
सहस्रशश्च रथिनः पत्तयः पतितायुधाः ।
अक्षताः समदृश्यन्त भीमाद्भीता गतासवः ॥ ७६
रथिभिः सादिभिः सूतैः पादातैर्वाजिभिर्गजैः ।
भीमसेनशरैश्छिन्नैराच्छन्ना वसुधाभवत् ॥ ७७
तत्स्तम्भितमिवातिष्ठद्भीमसेनभयार्दितम् ।
दुर्योधनबलं सर्वं निरुत्साहं कृतं रणे ।
निश्चेष्टं तुमुलं दीनं बभौ तस्मिन्महारणे ॥ ७८
प्रसन्नसलिले काले यथा स्यात्सागरो नृप ।
तद्वत्तव बलं तद्वै निश्चलं समवस्थितम् ॥ ७९
मन्युवीर्यबलोपेतं दर्पात्प्रत्यवरोपितम् ।
अभवत्तव पुत्रस्य तत्सैन्यं निष्प्रभं तदा ॥ ८०
ते बले भरतश्रेष्ठ वध्यमाने परस्परम् ।
रुधिरौघपरिक्लिन्ने रुधिरार्द्रे बभूवतुः ॥ ८१
सूतपुत्रोऽवधीत्क्रुद्धः पाण्डवानामनीकिनीम् ।
भीमसेनः कुरूणां च त्रिगर्तानां धनंजयः ॥ ८२
वर्तमाने तथा रौद्रे संग्रामेऽद्भुतदर्शने ।
निहत्य पृतनामध्ये संशप्तकगणान्बहून् ।
अर्जुनो जयतां श्रेष्ठो वासुदेवमथाब्रवीत् ॥ ८३
प्रभग्नं बलमेतद्धि योत्स्यमानं मया सह ।
एते धावन्ति सगणाः संशप्तकमहारथाः ॥ ८४
'दुर्जया ह्येव समरे देवैरपि सवासवैः ।'
अपारयन्तो मद्बाणान्सिंहशब्दं मृगा इव ॥ ८५
दीर्यते च महत्सैन्यं सृञ्जयानां महारणे ।
'कुरवश्चाभिधावन्ति भीमसेनभयार्दिताः ॥' ८६
हस्तिकक्ष्यो ह्यसौ कृष्ण केतुः कर्णस्य धीमतः ।
दृश्यते राजसैन्यस्य मध्ये विचरतो मुहुः ॥ ८७
न च कर्णं रणे शक्ता जेतुमेते महारथाः ।
जानीते हि भवान्कर्णं वीर्यवन्तं पराक्रमे ॥ ८८
तत्र याहि यतः कर्णो द्रावयत्येष नो बलम् ।
त्रिगर्तान्वर्जयन्याहि सूतपुत्रं महारथम् ।
एतन्मे रोचते कृष्ण यथा वा तव रोचते ॥ ८९
एतच्छ्रुत्वा वचस्तस्य गोविन्दः प्रहसन्निव ।
अब्रवीदर्जुनं तूर्णं कौरवान्याहि पाण्डव ॥ ९०
ततस्तव महासैन्यं गोविन्दप्रेरिता हयाः ।
हंसवर्णा विशंस्तूर्णं वहन्तोऽर्जुनमाहवे ॥ ९१
केशवप्रेरितैरश्वैः श्वेतैः काञ्चनभूषणैः ।
प्रविशद्भिस्तव बलं चतुर्दिशमदीर्यत ॥ ९२
मेघस्तनितनिर्ह्रादः स रथो वानरध्वजः ।
चलत्पताकस्तां सेनां विमानं द्यामिवाविशत् ९३
तौ विदार्य महासेनां प्रविष्टौ केशवार्जुनौ ।
क्रुद्धौ संरम्भरक्ताक्षौ विभ्राजेतां महाद्युती ॥ ९४

युद्धशौण्डौ समाहूतावागतौ तौ रणाध्वरम् ।
यज्ञभिर्विधिना हूतौ मखं देवाविवाश्विनौ॥ ९५
'क्रोधताम्रेक्षणौ शूरौ शुशुभाते महाबलौ ।
मदोत्कटौ यथा नागौ दृष्टिसंचारचारिणौ ॥' ९६
क्रुद्धौ तौ तु नरव्याघ्रौ योगवन्तौ बभूवतुः ।
तलशब्देन रुषितौ महानागाविवोत्कटौ ॥ ९७
विगाह्य तु रथानीकमश्वसङ्घांश्च फल्गुनः ।
व्यचरत्पृतनामध्ये पाशहस्त इवान्तकः ॥ ९८
तं दृष्ट्वा युधि विक्रान्तं सेनायां तव भारत ।
संशप्तकगणान्भूयः पुत्रस्ते समचूचुदत् ॥ ९९
ततो रथसहस्रेण द्विरदानां त्रिभिः शतैः ।
चतुर्दशसहस्रैस्तु तुरगाणां महाहवे ।
द्वाभ्यां शतसहस्राभ्यां पदातीनां च धन्विनाम् ॥
शूराणां लब्धलक्षाणां विदितानां समन्ततः ।
अभ्यवर्तन्त कौन्तेयं छादयन्तो महारथाः ॥१०१
शरवर्षैर्महाराज सर्वतः पाण्डुनन्दनम् ।
स च्छाद्यमानः समरे शरैः परबलार्दनः ॥ १०२
दर्शयन्रौद्रमात्मानं पाशहस्त इवान्तकः ।
निघ्नन्संशप्तकान्पार्थः प्रेक्षणीयतरोऽभवत् ॥१०३
ततो विद्युत्प्रभैर्बाणैः कार्तस्वरविभूषितैः ।
निरन्तरमिवाकाशमासीच्छन्नं किरीटिना ॥ १०४
किरीटिचापनिर्मुक्तैः संपतद्भिर्महाशरैः ।
समाच्छन्नं बभौ सर्वं काद्रवेयैरिव प्रभो ॥ १०५
रुक्मपुङ्खाञ्शरान्घोरान्प्रसन्नान्नतपर्वणः ।
अवासृजदमेयात्मा दिक्षु सर्वासु पाण्डवः ॥ १०६
मही वियद्दिशः सर्वाः समुद्रा गिरयोऽपि वा ।
स्फुटन्तीति जना जज्ञुः पार्थस्य तलनिःस्वनात् ॥
हत्वा दशसहस्राणि पार्थिवानां महारथः ।
संशप्तकानां कौन्तेयः प्रपक्षं त्वरितोभ्ययात्१०८
प्रपक्षं च समासाद्य पार्थः काम्भोजरक्षितम् ।
प्रममाथ बलं भल्लैर्दानवानिव वासवः ॥ १०९
प्रचिच्छेदाशु भल्लेन द्विषतामाततायिनाम् ।
शस्त्रपाणींस्तथा बाहूंस्तथापि च शिरांस्युत ॥११०
अङ्गाङ्गावयवैश्छिन्नैर्व्यायुधास्तेऽपतन्भुवि ।
विष्वग्वाताभिसंभग्ना बहुशाखा इव द्रुमाः १११
हस्त्यश्वरथपत्तीनां व्रातान्निघ्नन्तमर्जुनम् ।
सुदक्षिणादवरजः शरवृष्ट्याभ्यवीवृषत् ॥ ११२
तस्यास्यतोऽर्धचन्द्राभ्यां स बाहू परिघोपमौ ।
पूर्णचन्द्राभवक्त्रं च क्षुरेणापाहरच्छिरः ॥ ११३
तत्पपात ततो वेगात्स्खलोहितपरिष्कृतम् ।
मनःशिलागिरेः शृङ्गं वज्रेणेवावदारितम् ॥११४
सुदक्षिणादवरजं काम्भोजा ददृशुर्हृतम् ।
प्रांशुं कमलपत्राक्षमत्यर्थं प्रियदर्शनम् ।
काञ्चनस्तम्भसदृशं भिन्नं हेमगिरिं यथा ॥ ११५
ततोऽभवत्पुनर्युद्धं घोरमत्यर्थमद्भुतम् ।
नानावस्थाश्च योधानां बभूवुस्तत्र युध्यताम्॥११६
पार्थेषुनिहतैरश्वैः काम्भोजैर्यवनैः शकैः ।
शोणितार्क्तैस्तदा रक्तं सर्वमासीद्दिशां पते ॥ ११७
रथैर्हताश्वसूतैश्च हतारोहैश्च वाजिभिः ।
द्विरदैश्च हतारोहैर्महामात्रैर्हतद्विपैः ॥ ११८
अन्योन्येन महाराज विनाशः पृथिवीक्षिताम् ।
आसीत्क्रुद्धेऽर्जुने कर्णे भीमसेने च दारुणम् ११९
तस्मिन्प्रपक्षे पक्षे च वध्यमाने मदोत्कटः ।
अर्जुनं जयतां श्रेष्ठं त्वरितो द्रौणिरभ्ययात् १२०
विधुन्वानो महच्चापं कार्तस्वरविभूषितम् ।
आददानः शरान्घोरान्स्वरश्मीनिव भास्करः १२१
तयोरासीन्महद्युद्धं धर्मभ्रात्रोरनैष्ठिकम् ।
विस्मापयिषतोर्लोकं यशश्चोत्तममिच्छतोः ॥ १२२
संशप्तकांस्तु कौन्तेयः कुरूंश्चापि वृकोदरः ।
सूतपुत्रस्तु पाञ्चालांस्त्रयोऽभ्यस्त्वरिताः शरैः१२३
एवमेष महाराज विनाशः पृथिवीक्षिताम् ।
युद्धं घोरं तथा त्वासीत्त्रिधाभूते चमूमुखे ॥ १२४

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे एकपञ्चाशोऽध्यायः ॥ ५१ ॥*

* एतदनन्तरं झ. पुस्तके विद्यमाना कथा अस्मिन्पाठे—५७—५८ तमाध्याययोर्वर्तते ।

द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

संशप्तकैर्युध्यमानस्य पार्थस्याश्वत्थाम्नाऽऽह्वानम् ॥ १ ॥ तयोर्युद्धम् ॥ २ ॥

धृतराष्ट्र उवाच ।
कथं संशप्तकैः सार्धमर्जुनस्याभवद्रणः ।
सूतपुत्रस्य पाञ्चालैः कथं युद्धं प्रवर्तितम् ॥ १
अश्वत्थाम्नस्तु यद्युद्धमर्जुनस्य च सञ्जय ।
अन्येषां च मदीयानां पाण्डवैस्तद्ब्रवीहि मे ॥ २
सञ्जय उवाच ।
शृणु राजन्यथावृत्तं संग्रामं ब्रुवतो मम ।
वीराणां शत्रुभिः सार्धं देहपाप्मविनाशनम् ॥ ३
पार्थः संशप्तकबलं प्रविश्यार्णवसन्निभम् ।
व्यक्षोभयदमित्रघ्नो महावात इवार्णवम् ॥ ४
पूर्णचन्द्राभवक्त्राणि स्वक्षिभ्रूदशनानि च ।
शिरांस्युन्मथ्य वीराणां शितैर्भल्लैर्धनञ्जयः ।
संतस्तार क्षितिं क्षिप्रं विनालैर्नलिनैरिव ॥ ५
सुवृत्तानायतान्पुष्टांश्चन्दनागुरुभूषितान् ।
सायुधान्सतलत्रांश्च पञ्चास्योरगसन्निभान् ।
बाहून्क्षुरैरमित्राणां चिच्छेद समरेऽर्जुनः ॥ ६
धुर्यान्धुर्येतरान्सूतान्ध्वजांश्चापानि सायकान् ।
पाणीन्नितान्तनिशितैर्भल्लैश्चिच्छेद पाण्डवः ॥ ७
रथान्द्विपान्हयांश्चैव सारोहानर्जुनो युधि ।
शरैरनेकसाहस्रैर्निन्ये राजन्यमक्षयम् ॥ ८
तं प्रवीराः सुसंरब्धा नर्दमाना इवर्षभाः ।
वासितार्थमिव क्रुद्धमभिद्रुत्य मदोत्कटाः ।
निघ्नन्तमभिजघ्नुस्ते शरैः शृङ्गैरिवर्षभाः ॥ ९
तस्य तेषां च तद्युद्धमभवद्रोमहर्षणम् ।
त्रैलोक्यविजये यद्वद्दैत्यानां सह वज्रिणा ॥ १०
अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतोऽर्जुनः ।
इषुभिर्बहुभिस्तूर्णं विद्ध्वा प्राणाञ्जहार सः ॥ ११
छिन्नत्रिवेणुचक्राक्षान्हतयोधान्ससारथीन् ।
विध्वस्तायुधतूणीरान्समुन्मथितकेतनान् ॥ १२
संछिन्नयोक्ररश्मीषान्विक्त्रिवेणून्विकूबरान् ।
विस्रस्तबन्धुरयुगान्विस्रस्ताक्षप्रमण्डलान् ॥ १३
रथान्विशकलीकुर्वन्महाभ्राणीव मारुतः ॥ १४
विस्रापकं प्रेक्षकाणां द्विषतां भयवर्धनम् ।
महारथसहस्रस्य समं कर्माकरोज्जयः ॥ १५
सिद्धदेवर्षिसङ्घाश्च चारणाश्चापि तुष्टुवुः ॥ १६
देवदुन्दुभयो नेदुः पुष्पवर्षाणि चापतन् ।
केशवार्जुनयोर्मूर्ध्नि प्राह वाक्काशरीरिणी ॥ १७
चन्द्राग्न्यनिलसूर्याणां कान्तिदीप्तिबलद्युतीः ।
यौ सदा बिभ्रतुर्वीराविमौ तौ केशवार्जुनौ ॥ १८
ब्रह्मेशानाविव पुरा वीरावेकरथे स्थितौ ।
सर्वभूतवरौ वीरौ नरनारायणाविमौ ॥ १९
इत्येतन्महदाश्चर्यं दृष्ट्वा श्रुत्वा च भारत ।
अश्वत्थामा सुसंक्रुद्धः कृष्णावभ्यद्रवद्रणे ॥ २०
अथ पाण्डवमस्यन्तममित्रान्तकराञ्छरान् ।
सेषुणा पाणिनाऽऽहूय प्रहसन्द्रौणिरब्रवीत् ॥ २१
यदि मां मन्यसे वीर प्राप्तमर्हमिहातिथिम् ।
ततः सर्वात्मना त्वद्य युद्धातिथ्यं प्रयच्छ मे ॥ २२
एवमाचार्यपुत्रेण समाहूतो युयुत्सया ।
बहुमेनेऽर्जुनोऽऽत्मानमिति चाह जनार्दनम् ॥ २३
संशप्तकाश्च मे वध्या द्रौणिराह्वयते च माम् ।
यदत्रानन्तरं प्राप्तं शंस मे तद्धि माधव ॥ २४
आतिथ्यकर्माभ्युत्थाय दीयतां यदि मन्यसे ।
एवमुक्तोऽवहत्पार्थं कृष्णो द्रोणात्मजान्तिके ॥ २५
शैक्ष्येण विधिनाऽऽहूतं वायुरिन्द्रमिवाध्वरे ।

वासिता पुष्पवती गौस्तदर्थम् ॥ ९ ॥ त्रिवेणु उभयत-काष्ठद्वयसहितो धूर्दण्ड । अक्षश्चक्राधारदण्ड ॥ १२ ॥ योक्राणि बन्धनरज्जव । रश्मय प्रग्रहा । कूबरस्त्रिवेणोरग्रभाग । बन्धुर रथतल्पः युग धूरग्रकाष्ठम् । अक्षप्रमण्डल रथनीडाक्षयो सधानकाष्ठजातम् ॥ १३ ॥ विशकलीकुर्वन् विशेषेण शकली-कुर्वन् ॥ १४ ॥ चन्द्रादीनां कान्त्यादीन् यथासंख्य बिभ्रतु ॥ १८ ॥ अर्हं पूजयितु योग्यम् ॥ २२ ॥ अनन्तर प्रथमम् ॥ २४ ॥ जैत्रेण विधिना इति झ पाठ. ॥ २६ ॥

---

* एतमारभ्य (५७—५८ व्यतिरिक्ता) ६० तमाध्यायपर्यन्ता ७ अध्यायाः एतद्रीत्या १२ ध्यायात्मकात् झ. पुस्तके १५ ध्यायादुपरि वर्तन्ते ।

तमामन्त्र्यैकमनसं केशवो द्रौणिमब्रवीत् ॥ २६
अश्वत्थामन्स्थिरो भूत्वा प्रहराशु सहस्व च ।
निर्वेष्टुं भर्तृपिण्डं हि कालोऽयमुपजीविनाम् ॥ २७
सूक्ष्मो विवादो विप्राणां सूक्ष्मौ क्षात्रौ जयाजयौ ॥
नहि संक्षमसे मोहाद्दिव्यां पार्थस्य सत्क्रियाम् ।
समाप्तिमिच्छन्युध्यस्व स्थिरो भूत्वाऽद्य पाण्डवं २९
इत्युक्तो वासुदेवेन तथेत्युक्त्वा द्विजोत्तमः ।
विव्याध केशवं षष्ट्या नाराचैरर्जुनं त्रिभिः ॥ ३०
तस्यार्जुनः सुसंक्रुद्धस्त्रिभिर्बाणैः शरासनम् ।
चिच्छेदाथान्यदादत्त द्रौणिर्घोरतरं धनुः ॥ ३१
सज्यं कृत्वा निमेषाच्च विव्याधार्जुनकेशवौ ।
त्रिभिः शतैर्वासुदेवं सहस्रेण च पाण्डवम् ॥ ३२
ततः शरसहस्राणि प्रयुतान्यर्बुदानि च ।
ससृजे द्रौणिरायस्तः स्तम्भयामास चार्जुनम् ॥ ३३
इषुधेर्धनुषो ज्यायास्त्वङ्गुलिभ्यश्च मारिष ।
बाह्वोः कराभ्यामुरसो वदनाद्घ्राणनेत्रतः ॥ ३४
कर्णाभ्यां शिरसोऽङ्गेभ्यो लोमवर्मभ्य एव च ।
रथध्वजाभ्यां च शरा निष्पेतुर्ब्रह्मवादिनः ॥ ३५
शरजालेन महता बद्ध्वा माधवपाण्डवौ ।
ननाद मुदितो द्रौणिर्महामेघौघनिःस्वनम् ॥ ३६
'तैः पतद्भिर्महाराज द्रौणिमुक्तैः समन्ततः ।
संछादितौ रथस्थौ तावुभौ कृष्णधनंजयौ ॥ ३७
ततः शरशतैस्तीक्ष्णैर्भारद्वाजः प्रतापवान् ।
निश्चेष्टौ तावुभौ चक्रे रणे माधवपाण्डवौ ॥ ३८
हाहाकृतमभूत्सर्वं जङ्गमं स्थावरं तथा ।
चराचरस्य गोप्तारौ दृष्ट्वा संछादितौ शरैः ॥ ३९
सिद्धचारणसङ्घाश्च संपेतुर्वै समन्ततः ।
अपि स्वस्ति भवेदद्य लोकानामिति चाब्रुवन् ॥ ४०
न मया तादृशो राजन्दृष्टपूर्वः पराक्रमः ।
संजज्ञे यादृशो द्रौणेः कृष्णौ छादयतो रणे ॥ ४१
द्रौणेस्तु धनुषः शब्दं रथानां त्रासनं रणे ।
अशृणों बहुशो राजन्सिंहस्य नदतो यथा ॥ ४२
ज्या चास्य चरतो युद्धे सव्यं दक्षिणमस्यतः ।
विद्युदभ्भोधरस्येव भ्राजमाना व्यदृश्यत ॥ ४३
स तदा क्षिप्रकारी च दृढहस्तश्च पाण्डवः ।
प्रमोहं परमं गत्वा प्रेक्षन्नास्ते धनंजयः ॥ ४४
विक्रमं चरतो युद्धे सव्यं दक्षिणमस्यतः ।
विक्रमं च हृतं मेने आत्मनस्तेन संयुगे ॥ ४५
अथास्य समरे राजन्वपुरासीत्सुदुर्दृशम् ।
द्रौणेस्तत्कुर्वतः कर्म यादृग्रूपं पिनाकिनः ॥ ४६
वर्धमाने ततस्तत्र द्रोणपुत्रे विशांपते ।
हीयमाने च कौन्तेये कृष्णं रोषः समाविशत् ॥ ४७
स रोषाग्निश्वसन्राजन्निर्दहन्निव चक्षुषा ।
द्रौणिं ददर्श संग्रामे फल्गुनं च मुहुर्मुहुः ॥ ४८
ततः कृष्णोऽब्रवीत्क्रुद्धः पार्थं सप्रणयं वचः ॥ ४९
अत्यद्भुतमिदं पार्थ त्वयि पश्यामि संयुगे ।
यत्त्वां विशेषयत्याजौ द्रोणपुत्रोऽद्य भारत ॥ ५०
कच्चित्ते गाण्डिवं हस्ते मुष्टिर्वा न व्यशीर्यत ।
कच्चिद्वीर्यं यथापूर्वं भुजयोर्वा बलं तव ॥ ५१
उदीर्यमाणं हि रणे पश्यामि द्रौणिमाहवे ।
गुरुपुत्र इति ह्येनं मानयन्पाण्डवर्षभ ।
उपेक्षां मा कृथाः पार्थ नायं काल उपेक्षितुम् ॥' ५२
अर्जुन उवाच ।
पश्य माधव दौरात्म्यं गुरुपुत्रस्य मां प्रति ।
वधं प्राप्तौ मन्यते नौ प्रावेश्य शरवेश्मनि ।
एषोऽस्त्रं हन्मि संकल्पं शिक्षया च बलेन च ॥ ५३
'एवमुक्त्वाऽस्य चिच्छेद भल्लैः कर्मारमार्जितैः ।
धनुश्छत्रं पताकां च रथशक्तिं गदां वराम् ॥' ५४
अश्वत्थाम्नः शरानस्ताञ्छित्त्वैकैकं त्रिधा त्रिधा ।
व्यधमद्धरतश्रेष्ठो नीहारमिव मारुतः ॥ ५५
ततः संशप्तकान्भूयः साश्वसूतरथद्विपान् ।
ध्वजपत्तिगणानुग्रैर्बाणैर्विव्याध पाण्डवः ॥ ५६
ये ये ददृशिरे तत्र यद्यद्रूपास्तदा जनाः ।
ते ते तत्र शरैर्व्याप्तं मेनिरेऽऽत्मानमात्मना ॥ ५७
ते गाण्डीवप्रमुक्तास्तु नानारूपाः पतत्रिणः ।
क्रोशे साग्रे स्थिताञ्जघ्नुर्द्विपांश्च पुरुषात्रणे ॥ ५८

आयस्त० यत्नवान् ॥ ३३ ॥ इषुधिप्रभृतिभ्यः शरा पेतुर्लोमभ्योऽपि वर्मभ्योऽपि च पेतुस्तत्र हेतुः ब्रह्मवादिनः ॥ ३५ ॥ योगबलवत इत्यर्थः ॥

भल्लैश्छिन्नाः कराः पेतुः करिणां मदवर्षिणाम्।
यथा वने परशुभिर्निकृत्ताः शाल्मलिद्रुमाः॥ ५९
पश्चात्तु शैलवत्पेतुस्ते गजाः सह सादिभिः।
वज्रिवज्रावमथिता यथैवाद्रिचयास्तथा॥ ६०
गन्धर्वनगराकारान्रथांश्चैव सुकल्पितान्।
विनीतैर्जवनैर्युक्तानास्थितान्युद्धदुर्मदैः॥ ६१
शरैर्विशकलीकुर्वन्नमित्रान्भ्यवीवृषत्।
स्वलंकृतानश्वसादीन्पत्तींश्चाहन्धनंजयः॥ ६२
धनंजययुगान्तार्कः संशप्तकमहार्णवम्।
व्यशोषयत दुःशोषं तीक्ष्णैः शरगभस्तिभिः॥ ६३
पुनर्द्रौणिमहाशैलं नाराचैर्वज्रसन्निभैः।
निर्बिभेद महावेगैस्त्वरन्वज्रीव पर्वतम्॥ ६४
तमाचार्यसुतः क्रुद्धः साश्वयन्तारमाशुगैः।
युयुत्सुरागमद्योद्धुं पार्थस्तानच्छिनच्छरान्॥ ६५
ततः परमसंक्रुद्धः काण्डकोशमवासृजत्।
अश्वत्थामाभिरूपाय गृहानतिथये यथा॥ ६६
अथ संशप्तकांस्त्यक्त्वा पाण्डवो द्रौणिमभ्ययात्।
अपाङ्क्तेयानिव त्यक्त्वा दाता पाङ्क्तेयमर्थिनम् ६७
'स्थिताः संशप्तका राजन्दृष्ट्वा युद्धं महात्मनोः' ६८

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे द्विपञ्चाशोऽध्यायः॥ ५२॥

त्रिपञ्चाशोऽध्यायः॥ ५३॥

अर्जुनेनाश्वत्थामपराजयः॥ १॥

सञ्जय उवाच।
ततः समभवद्युद्धं शुक्राङ्गिरसवर्चसोः।
नक्षत्रमभितो व्योम्नि शुक्राङ्गिरसयोरिव॥ १
संतापयन्तावन्योन्यं दीप्तैः शरगभस्तिभिः।
लोकत्रासकरावास्तां विमार्गस्थौ ग्रहाविव॥ २
ततोऽविध्यद्भुवोर्मध्ये नाराचैरर्जुनो भृशम्।
स तेन बिबभौ द्रौणिरूर्ध्वरश्मिर्यथा रविः॥ ३
अथ कृष्णौ शरशतैरश्वत्थाम्नाऽर्दितौ भृशम्।
स्वरश्मिजालविकचौ युगान्तार्काविवासतुः॥ ४
ततोऽर्जुनः सर्वतोधारमस्त्र-
मवासृजद्वासुदेवेऽभिभूते।
द्रौणायनिश्चाभ्यहनत्पृषत्कै-
र्वज्राग्निवैवस्वतदण्डकल्पैः॥ ५
स केशवं चार्जुनं चातितेजा
विव्याध मर्मस्वतिरौद्रकर्मा।
बाणैः सुमुक्तैरतितीव्रवेगै-
र्यैराहतो मृत्युरपि व्यथेत॥ ६
द्रौणेरिषूनिषुभिः सन्निवार्य
व्यायच्छतस्तद्विगुणैः सुपुङ्खैः।
तं साश्वसूतध्वजमेकवीर-
मावृत्य संशप्तकसैन्यमार्च्छत्॥ ७
धनूंषि बाणानिषुधीर्धनुर्ज्याः
पाणीन्भुजान्पाणिगतं च शस्त्रम्।
छत्राणि केतूंस्तुरगान्रथेषां
वस्त्राणि माल्यान्यथ भूषणानि॥ ८
चर्माणि वर्माणि मनोरमाणि
प्रसह्य चैषां स शिरांसि चैव।
चिच्छेद पार्थो द्विषतां सुमुक्तै-
र्बाणैः स्थितानामपराङ्मुखानाम्॥ ९
सुकल्पिताः स्यन्दनवाजिनागाः
समास्थिताः कृतयत्नैर्नृवीरैः।

महत् शैल शिलासमूहो यस्मिन् त महाशैल पर्वतमिव॥ ६४॥ काण्डकोश बाणनिपङ्गम्॥ ६६॥ द्विपञ्चाशोऽध्यायः॥ ५२॥

नक्षत्रमभित. नक्षत्र लक्षीकृत्य॥ १॥ विमार्गस्थौ वक्रातिचारगौ॥ २॥ कृष्णौ कृष्णार्जुनौ आसतुः दीपयाचक्रतु.॥ ४॥ सर्वतोधारं सर्वतोऽस्त्रधारावर्षक। सर्वतोवारमिति घ ङ पाठ। वज्रकल्पै अमोघै। अग्निकल्पै. दाहके। वैवस्वतदण्डकल्पै प्राणहरै॥ ५॥ व्यायच्छतो यतमानस्य। आर्च्छत् गतवान्॥ ७॥ सुकल्पिता. सुसन्नद्धा॥ १०॥

पार्थेरितैर्बाणशतैर्निरस्ता-
स्तैरेव सार्धं नृवरैर्विनेशुः ॥ १०
पद्मार्कपूर्णेन्दुनिभाननानि
किरीटमाल्याभरणोज्वलानि ।
भल्लार्धचन्द्रक्षुरसंनिकृत्ता-
न्यपातयच्छत्रुशिरांस्यजस्रम् ॥ ११
अथ द्विपैर्दैत्यरिपुद्विपाभै-
र्देवारिकल्पा बलमन्युकल्पैः ।
कलिङ्गवङ्गाङ्गनिषादवीरा
जिघांसवः पाण्डवमभ्यधावन् ॥ १२
तेषां द्विपानां निचकर्त पार्थो
वर्माणि चर्माणि करान्नियन्तॄन् ।
ध्वजाः पताकाश्च ततः प्रपेतु-
र्वज्राहतानीव गिरेः शिरांसि ॥ १३
तेषु प्रभग्नेषु गुरोस्तनूजं
बाणैः किरीटी नवसूर्यवर्णैः ।
प्रच्छादयामास महाभ्रजालै-
र्वायुः समुद्यन्तमिवांशुमन्तम् ॥ १४
ततोऽर्जुनेषूनिषुभिर्निरस्य
द्रौणिः शितैरर्जुनवासुदेवौ ।
प्रच्छादयित्वा दिवि चन्द्रसूर्यौ
ननाद सोऽम्भोद इवातपान्ते ॥ १५
तमर्जुनस्तांश्च पुनस्त्वदीया-
नभ्यर्दितस्तैरभिसृत्य शस्त्रैः ।
बाणान्धकारं सहसैव कृत्वा
विव्याध पार्थो वरहेमपुङ्खैः ॥ १६
नाप्याददत्संदधन्नैव मुञ्च-
न्बाणान्रथेऽदृश्यत सव्यसाची ।
रथांश्च नागांस्तुरगान्पदातीन्
संस्यूतदेहान्ददृशुर्हतांश्च ॥ १७
संधाय नाराचवरान्दशाशु
द्रौणिस्त्वरन्नेकमिवोत्ससर्ज ।
तेषां च पञ्चार्जुनमभ्यविध्य-
न्पञ्चाच्युतं निर्बिभिदुः सुपुङ्खाः ॥ १८
तैराहतौ सर्वमनुष्यमुख्या-
वसृक्स्रवन्तौ धनदेन्द्रकल्पौ ।
समाप्तविद्येन तथाऽभिभूतौ
हतौ रणे ताविति मेनिरेऽन्ये ॥ १९
अथार्जुनं प्राह दशार्हनाथः
प्रमाद्यसे किं जहि योधमेतम् ।
कुर्याद्धि दोषं समुपेक्षितोऽयं
कष्टो भवेद्व्याधिरिवाक्रियावान् ॥ २०
तथेति चोक्त्वाऽच्युतमप्रमादी
द्रौणेः प्रहस्याशु किरीटमाली ।
भुजौ वरौ चन्दनसारदिग्धौ
वक्षः शिरोऽथाप्रतिमौ तथोरू ॥ २१
गाण्डीवमुक्तैः कुपिताहिकल्पै-
र्द्रौणिं शरैः संयति निर्बिभेद ।
छित्त्वा तु रश्मींस्तुरगानविध्य-
त्ते तं रणाद्दूहुरतीव दूरम् ॥ २२
स तैर्हतो वातजवैस्तुरङ्गै-
र्द्रौणिर्दृढं पार्थशराभिभूतः ।
आवृत्य नैव व्यषहत्स योद्धुं
पार्थेन सार्धं मतिमान्विमृश्य ।
जानञ्जयं नियतं वृष्णिवीरे
धनञ्जये चाङ्गिरसां वरिष्ठः ॥ २३
विवेश कर्णस्य बलं तरस्वी
भग्नोत्साहः क्षीणबाणास्त्रयोगः ॥ २४
प्रतीपकामे तु रणादश्वत्थाम्नि हृते हयैः ।
मत्रौषधिक्रियायोगैर्व्याधौ देहादिवाहृते ॥ २५
संशप्तकानभिमुखौ प्रयातौ केशवार्जुनौ ।
वातोद्धूतपताकेन स्यन्दनेनौघनादिना ॥ २६

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

करान् शुण्डा ॥१३॥ त अश्वत्थामानम् । तान् तदन्यान् । तै कृत बाणान्धकार कृत्वा छित्त्वा । कृती छेदने ॥१६॥ सस्यूता अन्योन्य सघट्टवन्त. ॥ १७ ॥ समाप्तविद्येन समग्रधनुर्वेदविदा ॥ १९ ॥ अक्रियावान् प्रतिकाररहित ॥ २० ॥ अविकर्णैः अविकर्णतुल्याग्रै ॥२२॥ अङ्गिरसा अङ्गिरोगोत्राणा मध्ये॥२३॥ ओघनादिना जलौघवन्नादवता ॥२६॥ त्रिपञ्चाशोऽध्याय. ५३॥

चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

अर्जुनेन दण्डदण्डधारयोर्वधः ॥ १ ॥

सञ्जय उवाच ।
अथोत्तरेण पाण्डूनां सेनायां ध्वनिरुत्थितः ।
रथनागाश्वपत्तीनां दण्डधारेण वध्यताम् ॥ १
निवर्तयित्वा तु रथं केशवोऽर्जुनमब्रवीत् ।
वाहयन्नेव तुरगान्गरुडानिलरंहसः ॥ २
मागधोऽसावतिक्रान्तो द्विरदेन प्रमाथिना ।
भगदत्तादनवमः शिक्षया च बलेन च ॥ ३
एनं हत्वा निहन्ताऽसि पुनः संशप्तकानिति ।
वाक्यान्ते प्रापयत्पार्थं दण्डधारगजं प्रति ॥ ४
स मागधानां प्रवरो महाबलोऽ-
शुभग्रहो योधगणैः समन्वितः ।
सपत्नसेनां प्रममाथ दारुणो
भीमं समग्रां बलवानिव ग्रहम् ॥ ५
सुकल्पितं दानवनागसन्निभं
महाभ्रनिर्ह्रादसमस्वनं रणे ।
समास्थितो नागवरं नरेश्वरो
रथाश्वमातङ्गनरप्रमाथिनम् ॥ ६
स नागयन्तॄन्समरे महारथा-
न्सपत्तिसङ्घांस्तुरगान्ससादिनः ।
द्विपांश्च बाणैर्निजघान वीर्यवा-
न्समन्ततो ग्रहिव कालचक्रवत् ॥ ७
नरांस्तु कांस्यायसवर्मभूषणा-
न्निपात्य साश्वानपि पत्तिभिः सह ।
व्यपोथयद्दन्तिवरेण शुष्मिणा
सशब्दवत्स्थूलनलं यथा तथा ॥ ८
अथार्जुनो ज्यातलनेमिनिःस्वने
मृदङ्गभेरीबहुशङ्खनादिते ।
रथाश्वमातङ्गसहस्रनादिते
रथोत्तमेनाभ्यपतद्द्विपोत्तमम् ॥ ९
ततोऽर्जुनं द्वादशभिः शरोत्तमै-
र्जनार्दनं षोडशभिः समार्पयत् ।
स दण्डधारस्तुरगांस्त्रिभिस्त्रिभि-
स्ततो ननाद प्रजहास चासकृत् ॥ १०
ततोऽस्य पार्थः सगुणेषुकार्मुकं
चकर्त भल्लैर्ध्वजमप्यलंकृतम् ।
पुनर्नियन्तॄन्सहपादगोप्तृभि-
स्ततः स चुक्रोध गिरिव्रजेश्वरः ॥ ११
ततोऽर्जुनं भिन्नकटेन दन्तिना
घनाघनेनानिलतुल्यरंहसा ।
अतीव चुक्रोधयिषुर्जनार्दनं
धनंजयं चाभिजघान तोमरैः ॥ १२
अथास्य बाहू द्विपहस्तसन्निभौ
शिरश्च पूर्णेन्दुनिभाननं त्रिभिः ।
क्षुरैः प्रचिच्छेद सहैव पाण्डव-
स्ततो द्विपं बाणशतैः समर्पयत् ॥ १३
स पार्थबाणैस्तपनीयभूषणैः
समावृतः काञ्चनवर्ममृद्द्विपः ।
भृशं चकाशे निशि पर्वतो यथा
दावाग्निना प्रज्वलितौषधिद्रुमः ॥ १४
स वेदनार्तोऽम्बुदनिस्वनो नदं-
श्चरन्भ्रमन्प्रस्खलितान्तरोऽद्रवत् ।
पपात रुग्णः सनियन्तृकस्तथा
यथा गिरिर्वज्रविदारितस्तथा ॥ १५
हिमावदातेन सुवर्णमालिना
हिमाद्रिकूटप्रतिमेन दन्तिना ।

उत्तरेण उत्तरत । वध्यता वध्यमानानाम् ॥ १ ॥ अनवमः अहीन. ॥३॥ स मागधाना प्रवरोऽङ्कुशग्रहे ग्रहेऽप्रसह्यो विकचो यथा ग्रह । सपत्नसेना प्रममाथ दारुणो मही समग्रा विकचो यथा ग्रह। इति झ पाठ। तत्र इत्यर्थ । अङ्कुशग्रहे अङ्कुशधारणे हस्तियुद्धे इत्यर्थ । ग्रहे आदित्यादिग्रहसमूहे युद्धपरिग्रहे च अप्रसह्य । विकचः कचोपलक्षितशिरोरहित केतुरूपी ग्रह इव । विकचो विस्तीर्णो ग्रहो धूमकेतुरूपी उत्पातग्रह ॥ ५ ॥ शुष्मिणा बलवता । स्थूलसुषिर नल तृणविशेषम् ॥ ८ ॥ सगुणेषुकार्मुक मौवीबाणसहित धनु· । नियन्तॄन् नियन्तारम् ॥ ११ ॥ घनाघनो घातुकमत्तदन्तिनोरिति विश्व ॥ १२ ॥ सहैव युगपत् ॥ १३ ॥ स्खलितान्तरः मध्येस्खलैन्नित्यर्थः ॥ १५ ॥

हते रणे भ्रातरि दण्ड आव्रज-
ज्जिघांसुरिन्द्रावरजं धनंजयम् ॥ १६
सतोमरैरर्ककरप्रभैस्त्रिभि-
र्जनार्दनं पञ्चभिरर्जुनं शितैः ।
समर्पयित्वा विननाद चार्दयं-
स्ततोऽस्य बाहू निचकर्त पाण्डवः ॥ १७
क्षुरप्रकृत्तौ विपुलौ सतोमरौ
शुभाङ्गदौ चन्दनरूषितौ भुजौ ।
गजात्पतन्तौ युगपद्विरेजतु-
र्यथोरगौ पर्वतशृङ्गवन्महीम् ॥ १८
अथार्धचन्द्रेण हतं किरीटिना
पपात दण्डस्य शिरः क्षितिं द्विपात् ।
स शोणितार्द्रो निपतन्विरेजे
दिवाकरोऽस्तादिव पश्चिमां दिशम् ॥ १९
अथ द्विपं श्वेतनगाग्रसन्निभं
दिवाकरांशुप्रतिमैः शरोत्तमैः ।
बिभेद पार्थः स पपात नादयन्
हिमाद्रिकूटं कुलिशाहतं यथा ॥ २०
ततोऽपरे तत्प्रतिमा गजोत्तमा
जिगीषवः संयति सव्यसाचिना ।
तथा कृतास्तेऽपि यथैव तौ द्विपौ
ततः प्रभग्नं सुमहद्विपोर्बलम् ॥ २१
गजा रथाश्वाः पुरुषाश्च सङ्गशः
परस्परघ्नाः परिपेतुराहवे ।
परस्परं प्रस्खलिताः समाहता
भृशं च तत्तद्बहुभाषिणो हताः ॥ २२
अथार्जुनं स्वे परिवार्य सैनिकाः
पुरन्दरं देवगणा इवाब्रुवन् ।
अभैष्म यस्मान्मरणादिव प्रजाः
स वीर दिष्ट्या निहतस्त्वया रिपुः ॥ २३
न चेत्परित्रास्यदिमाञ्जनान्भया-
द्विषद्भिरेवं बलिभिः प्रपीडितान् ।
तथाऽभविष्यद्विषतां प्रमोदनं
यथा हतेष्वेष्विह नोऽरिसूदन ॥ २४
इतीव भूयश्च सुहृद्भिरीडिता
निशम्य वाचः सुमनास्तदाऽर्जुनः ।
यथाऽनुरूपं प्रतिपूज्य तं जनं
जगाम संशप्तकसङ्गहा पुनः ॥ २५

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

अर्जुनेन संशप्तकानां वधः ॥ १ ॥

सञ्जय उवाच ।
प्रत्येत्याथ पुनर्जिष्णुर्जित्वा संशप्तकान्बभौ ।
वक्त्रानुवक्त्रगमनादङ्गारक इव ग्रहः ॥ १
पार्थबाणहता राजन्नराश्वरथकुञ्जराः ।
विचेलुर्बभ्रमुर्नेशुः पेतुर्मम्लुश्च भारत ॥ २
धुर्यान्धुर्यैतरान्सूतान्ध्वजांश्चापासिसायकान् ।
पाणीन्पाणिगताञ्शस्त्रान्बाहूनपि शिरांसि च ॥ ३
भल्लैः क्षुरैरर्धचन्द्रैर्वत्सदन्तैश्च पाण्डवः ।
चिच्छेदामित्रवीराणां समरे प्रतियुध्यताम् ॥ ४
तं प्रवीरास्त्वदीयानां नर्दमानाऽभिदुद्रुवुः ।
वासितार्थे युयुत्सन्तो वृषभा वृषभं यथा ।
निपतन्त्यर्जुनं शूराः शतशोऽथ सहस्रशः ॥ ५
तेषां तस्य च तद्युद्धमभवद्रोमहर्षणम् ।
त्रैलोक्यविजये यादृग्दैत्यानां सह वज्रिणा ॥ ६
तमविध्यत्त्रिभिर्बाणैर्दन्दशूकैरिवाहिभिः ।
उग्रायुधस्य तस्याशु शिरः कायादपाहरत् ॥ ७

इन्द्रावरज कृष्णम् ॥ १६ ॥ अस्तात् अस्ताचलात् ॥ १९ ॥ तौ दण्डधारतद्भ्रात्रोर्द्विपौ यथा साध्यक्षौ कृत्तौ छिन्नौ तथा तेपि कृताः ॥ २१ ॥ चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

धुर्यान् श्रेष्ठान् । धुर्यगतानिति पाठे वाहान् ॥ ३ ॥ वासितार्थे स्त्रीनिमित्तम् ॥ ५ ॥ दन्दशूकैः दशनशीलैः । अपाहरदर्जुन इति शेषः ॥ ७ ॥

तेऽर्जुनं सर्वतः क्रुद्धा नानाशस्त्रैरवीवृषन् ।
मरुद्भिः प्रेरिता मेघा हिमवन्तमिवोष्णगे ॥ ८
अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतोऽर्जुनः ।
सम्यगस्तैः शरैः सर्वानहितानहनद्बहून् ॥ ९
छिन्नत्रिवेणुजङ्घेषान्हताश्वान्हतसारथीन् ।
विस्रस्तहस्ततूणीरान्विचक्ररथकेतनान् ॥ १०
संछिन्नरश्मियोक्त्राक्षान्व्यनुकर्षयुगात्रथान् ।
विध्वस्तसर्वसन्नाहान्बाणैश्चक्रेऽर्जुनस्त्वरन् ॥ ११
ते रथास्तत्र विध्वस्ताः परार्ध्या भान्त्यनेकशः ।
धनिनामिव वेश्मानि हतान्यग्न्यनिलाम्बुभिः १२
द्विपाः संभिन्नमर्माणो वज्राशनिसमैः शरैः ।
पेतुर्गिर्यग्रवेश्मानि वज्रवाताग्निभिर्यथा ॥ १३
अनेकैश्च शिलाधौतैर्वज्रानलविषोपमैः ।
शरैर्निजघ्निवान्पार्थो महेन्द्र इव दानवान् ॥ १४
सारोहास्तुरगाः पेतुर्बहवोऽर्जुनताडिताः ।
निर्जिह्वात्राः क्षितौ क्षीणा रुधिरार्द्राः सुदुर्दृशः १५
नराश्वनागा नाराचैः संस्यूताः सव्यसाचिना ।
बभ्रमुश्चस्खलुः पेतुर्नेदुर्मम्लुश्च मारिष ॥ १६
महार्हवर्माभरणा नानारूपाम्बरायुधाः ।
सरथाश्वद्विपा वीरा हताः पार्थेन शेरते ॥ १७
निर्भयाः पुण्यकर्माणो विशिष्टाभिजनश्रुताः ।
गताः शरीरैर्वसुधामूर्जितैः कर्मभिर्दिवम् ॥ १८
अथार्जुनरथं वीरास्त्वदीयाः समभिद्रवन् ।
नानाजनपदाध्यक्षाः सगणा जातमन्यवः ॥ १९
उद्यमना रथाश्वेभैः पत्तयश्च जिघांसवः ।
समभ्यधावन्नस्यन्तो विविधं क्षिप्रमायुधम् ॥ २०
तदायुधमहावर्ष क्षिप्तं योधमहाम्बुदैः ।
व्यधमन्निशितैर्बाणैः क्षिप्रमर्जुनमारुतः ॥ २१
साश्वपत्तिद्विपरथं महाशस्त्रौघसंप्लवम् ।
सहसा संतितीर्षन्तं पार्थं शस्त्रास्त्रसेतुना ॥ २२
अथाब्रवीद्वासुदेवः पार्थ किं क्रीडसेऽनघ ।
संशप्तकान्प्रमथ्यैनांस्ततः कर्णवधे त्वर ॥ २३
तथेत्युक्त्वाऽर्जुनः कृष्णं शिष्टान्संशप्तकांस्तदा ।
क्षपयिष्यंस्तदा बाणैर्दैत्यानिन्द्र इवावधीत् ॥२४
आददत्संदधन्नेषून्दृष्टः कैश्चिद्रणेऽर्जुनः ।
विमुञ्चन्वा शराञ्शीघ्रं दृश्यन्ते वै नरा हताः॥ २५
आश्चर्यमिति गोविन्दो ब्रुवन्नश्वानचोदयत् ।
हंसांशुगौरास्ते सेनां हंसाः सर इवाविशन् ॥ २६
ततः संग्रामभूमिं तां वर्तमाने जनक्षये ।
अवेक्षमाणो गोविन्दः सव्यसाचिनमब्रवीत् ॥२७
एष पार्थ महारौद्रो वर्तते भरतक्षयः ।
पृथिव्यां पार्थिवानां वै दुर्योधनकृते महान् ॥ २८
पश्य भारत चापानि रुक्मपृष्ठानि धन्विनाम् ।
हतानामपविद्धानि कलापानिषुधींस्तथा ॥ २९
जातरूपमयैः पुङ्खैः शरांश्च नतपर्वणः ।
तैलधौतांश्च नाराचान्निर्मुक्तानिव पन्नगान् ॥ ३०
आकीर्णास्तोमरान्वाहांश्छत्रान्हेमविभूषितान् ।
चर्माणि चापविद्धानि रुक्मपृष्ठानि भारत ॥ ३१
सुवर्णविकृतान्प्रासाञ्शक्तीः कनकभूषिताः ।
जाम्बूनदमयैः पट्टैर्बद्धाश्च विपुला गदाः ॥ ३२
जातरूपमयीश्चष्टीः पट्टसान्हेमभूषितान् ।
दण्डैः कनकचित्रैश्च विप्रविद्धान्परश्वधान् ॥ ३३
परिघान्भिण्डिपालांश्च भुशुण्डीः कणपानपि ।
अयस्कुन्तांश्च पतितान्मुसलानि गुरूणि च ॥ ३४
नानाविधानि शस्त्राणि प्रगृह्य जयगृद्धिनः ।
जीवन्त इव दृश्यन्ते गतसत्त्वास्तरस्विनः ॥ ३५
गदाविमथितैर्गात्रैर्मुसलैर्भिन्नमस्तकान् ।
गजवाजिरथैः क्षुण्णान्पश्य योधान्सहस्रशः ॥ ३६
मनुष्यगजवाजीनां शरशक्त्यृष्टितोमरैः ।
निस्त्रिंशैः पट्टसैः प्रासैर्नखरैर्लगुडैरपि ॥ ३७
शरीरैर्बहुधा छिन्नैः शोणितौघपरिप्लुतैः ।
गतासुभिरमित्रघ्न संवृता रणभूमयः ॥ ३८

उष्णगे ग्रीष्मे गते सति प्रावृषीत्यर्थः । उष्णो ग्रीष्मो गतोऽतीतो यत्र स उष्णग कालविशेष इति विग्रहः ॥ ८ ॥ अस्तैः क्षिप्तैः ॥ ९ ॥ अनुकर्षः रथाधस्था दारु ॥ ११ ॥ निर्जिह्वात्रा निर्गताः जिह्वाः अन्त्राणि च येषां ते ॥ १५ ॥ कलापान् अलकारान् ॥ २९ ॥ आकीर्णान् सर्वतोविक्षिप्तान् ॥ ३१ ॥ वाजीना शरीरैरिति संबन्धः । दैर्घ्यमार्षम् ॥ ३७ ॥ पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

बाहुभिश्चन्दनादिग्धैः साङ्गदैः शुभभूषणैः ।
सतलत्रैः सकेयूरैर्भाति भारत मेदिनी ॥ ३९
साङ्गुलित्रैर्भुजाग्रैश्च विप्रविद्धैरलंकृतैः ।
हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनाम् ॥ ४०
बद्धचूडामणिवरैः शिरोभिश्च सकुण्डलैः ।
'निकृत्तैर्वृषभाक्षाणां शरीरैश्चापि सङ्गशः ॥ ४१
गजवाजिमनुष्याणां शरशक्त्यृष्टितोमरैः ।
कबन्धैः शोणितादिग्धैश्छिन्नगात्रशिरोधरैः ।
भूर्भाति भरतश्रेष्ठ शान्ताग्निभिरिवाध्वरे ॥' ४२
रथांश्च बहुधा भग्नान्हेमकिङ्किणिनः शुभान् ।
अश्वांश्च बहुधा पश्य शोणितेन परिप्लुतान् ॥ ४३
अनुकर्षानुपासङ्गान्पताका विविधान्ध्वजान् ।
योधानां च महाशङ्खान्पाण्डुरांश्च प्रकीर्णकान् ।
निरस्तजिह्वान्मातङ्गाञ्शयानान्पर्वतोपमान् ॥ ४४
वैजयन्तीर्विचित्राश्च हतांश्च गजयोधिनः ।
वारणानां परिस्तोमान्संयुक्तानेककम्बलान् ॥ ४५
विपाटितविचित्राश्च रूपचित्राः कुथास्तथा ।
भिन्नाश्च बहुधा घण्टाः पतद्भिश्चूर्णिता गजैः ॥ ४६
वैदूर्यमणिदण्डांश्च पतितांश्चाङ्कुशान्भुवि ।
अश्वानां च युगापीडान्रत्नचित्रानुरश्छदान् ॥ ४७
विद्धाः सादिध्वजाग्रेषु सुवर्णविकृताः कुथाः ।
विचित्रान्मणिचित्रांश्च जातरूपपरिष्कृतान् ॥ ४८
अश्वास्तरपरिस्तोमान्राङ्कवान्पतितान्भुवि ।
चूडामणीन्नरेन्द्राणां विचित्राः काञ्चनस्रजः ।
छत्राणि चापविद्धानि चामरव्यजनानि च ॥ ४९
चन्द्रनक्षत्रभासैश्च वदनैश्चारुकुण्डलैः ।
कृष्णश्मश्रुभिरत्यर्थं वीराणां समलंकृतैः ।
वदनैः पश्य संछन्नां महीं शोणितकर्दमाम् ॥ ५०
सजीवांश्च नरान्पश्य क्रूजमानान्समन्ततः ।
उपास्यमानांश्च बहून्व्यस्तशस्त्रैश्च भूपते ।
ज्ञातिभिश्च जलक्लिन्नान्रोदमानैर्मुहुर्मुहुः ॥ ५१
उत्क्रान्तानपरान्योधांश्छादयित्वा तरस्विनः ।
पुनर्युद्धाय गच्छन्ति जये लुब्धाः प्रमन्यवः ॥ ५२
अपरे तत्रतत्रैव परिधावन्ति मानवाः ।
संनिवृत्ताश्च ते शूरा दृष्ट्वा चैतान्विचेतसः ॥ ५३
जलं त्यक्त्वा प्रधावन्ति क्रोशमानाः परस्परम् ।
जलं पीत्वा मृतान्पश्य पिबतोऽन्यांश्च भारत ॥ ५४
परिष्वज्य प्रियानन्ये बान्धवान्बन्धुवत्सलाः ।
विसंज्ञान्समरे योधांस्तत्रतत्र महारणे ॥ ५५
पश्यापरान्नरश्रेष्ठ संदष्टोष्ठपुटान्पुनः ।
भृकुटीकुटिलैर्वक्त्रैः प्रेक्षमाणान्महारणम् ॥ ५६
एतत्तवैवानुरूपं कर्मार्जुन महाहवे ।
दिवि वा देवराजस्य त्वया यत्कृतमाहवे ॥ ५७

सञ्जय उवाच ।

एवं तां दर्शयन्कृष्णो युद्धभूमिं किरीटिने ।
गच्छन्नेवाशृणोच्छब्दं दुर्योधनबले महत् ॥ ५८
शङ्खदुन्दुभिनिर्घोषं भेरीपणवनिःस्वनम् ।
रथाश्वनरनागानां पादशब्दांश्च दारुणान् ॥ ५९
प्रविश्य तद्बलं कृष्णस्तुरगैर्वातवेगितैः ।
पाण्ड्येनाभ्यर्दितं सैन्यं त्वदीयं वीक्ष्य विस्मितः ६०
स हि नानाविधैर्बाणैरिष्वस्त्रप्रवरो युधि ।
न्यहनद्विषतां पूगान्गतासूनन्तको यथा ॥ ६१
गजवाजिमनुष्याणां शरीराणि शितैः शरैः ।
भित्त्वा प्रहरतां श्रेष्ठो विदेहासूनपातयत् ॥ ६२
शत्रुप्रवीरैरस्त्राणि नानाशस्त्राणि सायकैः ।
छित्त्वा तानवधीच्छत्रून्पाण्ड्यः शक्र इवासुरान् ६३

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

अश्वत्थाम्ना पाण्ड्यवधः ॥ १ ॥

धृतराष्ट्र उवाच ।

प्रोक्तस्त्वया पूर्वमेव प्रवीरो लोकविश्रुतः ।
न त्वस्य कर्म संग्रामे त्वया सञ्जय कीर्तितम् ॥ १
तस्य विस्तरशो ब्रूहि प्रवीरस्याद्य विक्रमम् ।

शिक्षां प्रभावं वीर्यं च प्रमाणं दर्पमेव च ॥ २
सञ्जय उवाच ।
भीष्मद्रोणकृपद्रौणिकर्णार्जुनजनार्दनान् ।
समाप्तविद्यान्धनुषि श्रेष्ठान्यान्सप्त मन्यसे ॥ ३
यो ह्याक्षिपति वीर्येण सर्वानेतान्महारथान् ।
न मेने चात्मना तुल्यं कंचिदेव नरेश्वरम् ॥ ४
तुल्यतां द्रोणभीष्माभ्यामात्मनो यो न मृष्यते ।
वासुदेवार्जुनाभ्यां च न्यूनतां नैच्छतात्मनि ॥ ५
स पाण्ड्योऽर्थपतिश्रेष्ठः सर्वशस्त्रभृतां वरः ।
कर्णस्यानीकमहनत्पाशहस्त इवान्तकः ॥ ६
तदुदीर्णरथाश्वेभं पत्तिप्रवरसंकुलम् ।
कुलालचक्रवद्भ्रान्तं पाण्ड्येनाभ्याहतं बलात् ॥ ७
व्यश्वसूतध्वजरथान्विप्रयुक्तयुगान्रथान् ।
सम्यगस्तैः शरैः पाण्ड्यो वायुर्मेघानिवाक्षिपत् ॥ ८
द्विरदान्प्रवरारोहान्विपताकायुधध्वजान् ।
स पादरक्षानहनद्बाणेनाद्रीनिवाद्रिहा ॥ ९
स शक्तिप्रासतूणीरानश्वारोहान्हयानपि ।
पुलिन्दखसबाह्लीकनिषादान्ध्रककुन्तलान् ॥ १०
दाक्षिणात्यांश्च भोजांश्च शूरान्संग्रामकर्कशान् ।
विशस्त्रकवचान्बाणैः कृत्वा पाण्ड्योऽकरोद्यमून् ॥
चतुरङ्गं बलं बाणैर्निघ्नन्तं पाण्ड्यमाहवे ।
दृष्ट्वा द्रौणिरसंभ्रान्तमसंभ्रान्तस्ततोऽभ्ययात् ॥ १२
आभाष्य चैनं मधुरमभीतं तमभीतवत् ।
प्राह प्रहरतां श्रेष्ठः स्मितपूर्वं समाह्वयत् ॥ १३
राजन्कमलपत्राक्ष प्रधानायुधवाहन ।
वज्रसंहननप्रख्य प्रख्यातबलपौरुष ॥ १४
मुष्टिक्लिष्टाङ्गुलिभ्यां च व्यायताभ्यां महद्धनुः ।
दोर्भ्यां विस्फारयन्भासि महाजलदवद्भृशम् ॥ १५
शरवर्षैर्महावेगैरमित्रानभिवर्षतः ।
मदन्यं नानुपश्यामि प्रतिवीरं तवाहवे ॥ १६
रथद्विरदपत्त्यश्वानेकः प्रमथसे बहून् ।
मृगसङ्घानिवारण्ये विभीर्भीमबलो हरिः ॥ १७
महता रथघोषेण दिवं भूमिं च नादयन् ।
वर्षान्ते सस्यगां सूर्यो भाभिरादीपयन्निव ॥ १८
संस्पृशानः शरैः पूर्णौ तूणी चाशीविषोपमैः ।
मयैवैकेन युध्यस्व त्र्यम्बकेनान्धको यथा ॥ १९
एवमुक्तस्तथेत्युक्त्वा प्रमथ्यैनं स पार्थिवः ।
कर्णिना द्रोणतनयं विव्याध मलयध्वजः ॥ २०
मर्मभेदिभिरत्युग्रैर्बाणैरग्निशिखोपमैः ।
मर्मस्वभ्यहनद्द्रौणिः पाण्ड्यमाचार्यनन्दनः ॥ २१
ततोऽपरान्नवांस्तूर्ण नाराचान्कङ्कवाससः ।
गत्या दशम्या संयुक्तानश्वत्थामाऽप्यवासृजत् २२
तानच्छिनत्तदा पाण्ड्यश्चतुर्भिरपरैः शरैः ।
चतुरोऽभ्याहनच्चाश्वानाशु ते व्यसवोऽभवन् २३
अथ द्रोणसुतस्येषूंस्ताञ्छित्त्वा निशितैः शरैः ।
धनुर्ज्यां विततां पाण्ड्यश्चिच्छेदादित्यतेजसः ॥ २४
दिव्यं धनुरथाधिज्यं कृत्वा द्रौणिरमित्रहा ।
प्रेक्ष्य चाशु रथे युक्तान्नरैरन्यान्हयोत्तमान् ॥ २५
ततः शरसहस्राणि प्रेषयामास वै द्विजः ।
इषुसंबाधमाकाशमकरोद्दिश एव च ॥ २६
ततस्तानस्यतः सर्वान्द्रौणेर्बाणान्महात्मनः ।
जानानोप्यक्षयान्पाण्ड्यो शातयत्पुरुषर्षभः ॥ २७
प्रयुक्तांस्तान्प्रयत्नेन छित्त्वा द्रौणेरिषूनृरिः ।
चक्ररक्षौ रणे तस्य प्राणुदन्निशितैः शरैः ॥ २८
अथ तल्लाघवं दृष्ट्वा मण्डलीकृतकार्मुकः ।
प्रास्यद्द्रोणसुतो बाणान्वृष्टिं पूषानुजो यथा ॥ २९
अष्टावष्टगवान्यूहुः शकटानि यदायुधम् ।
अह्नस्तदष्टभागेन द्रौणिश्चिक्षेप मारिष ॥ ३०
तमन्तकमिव क्रुद्धमन्तकालान्तकोपमम् ।
ये ये ददृशिरे रूपं विसंज्ञाः प्रायशोऽभवन् ॥ ३१

स पाण्ड्यः व्यसूनकरोदिति द्वयो. सबन्ध ॥ १० ॥ अनुस्मृत्य ह्यभीतवत् इति ख पाठः । अनुसृत्य हि भीतवत् इति क.ङ पाठ ॥ १३ ॥ वर्षत मत् मत्त. ॥ १६ ॥ प्रमथसे प्रमथ्नासि ॥ १७ ॥ मलयवत् क्षत्रियो ध्वजो यस्य । मलयध्वज इति प्रवीरस्यैव नामान्तर वा ॥ २० ॥ गत्या दशम्या । उन्मुख्यभिमुखी तिर्यङ् मन्दा गोमूत्रिका ध्रुवा । स्खलिता यमकाक्रान्ता कुष्टेतीषुगतीर्विदुः । दशमीगतिस्तु शिरसा सह दूरपातिनी अतिकृष्टानाम । तया गत्या ॥ २२ ॥ पूषानुज. पर्जन्य ॥ २९ ॥ अष्टवृषभवाह्यानि अष्टौ शकटानि यदायुधसभारं ऊहु वहन्ति तत्सर्वं अह्नोऽष्टमभागेन यामार्धेन क्षीणसि-

आचार्यपुत्रस्तां सेनां बाणवृष्ट्या व्यवीवृषत् ।
पर्जन्य इव घर्मान्ते वृष्ट्या साद्रिद्रुमां महिम् ॥ ३२
द्रौणिपर्जन्यमुक्तां तां बाणवृष्टिं सुदुःसहाम् ।
वायव्यास्त्रेण स क्षिप्रं विद्ध्वा पाण्ड्यानिलोऽनदत् ॥
तस्य नानदतः केतुं चन्दनागुरुरूषितम् ।
मलयप्रतिमं द्रौणिश्छित्त्वाश्वांश्चतुरोऽहनत् ॥ ३४
सूतमेकेषुणा हत्वा महाजलदनिःस्वनम् ।
धनुश्छित्त्वाऽर्धचन्द्रेण तिलशो व्यधमद्रथम् ॥ ३५
अस्त्रैरस्त्राणि संवार्य छित्त्वा सर्वायुधानि च ।
प्राप्तमप्यहितं द्रौणिर्नाहनद्युद्धतृष्णया ॥ ३६

हतेश्वरो दन्तिवरः सुकल्पित-
स्त्वराभिसृष्टः प्रतिशब्दगो बली ।
तमाद्रवद्द्रौणिशराहतस्त्वरन्
जवेन कृत्वा प्रतिहस्तिगर्जितम् ॥ ३७

तं वारणं वारणयुद्धकोविदो
द्विपोत्तमं पर्वतसानुसन्निभम् ।
समभ्यतिष्ठन्मलयध्वजस्त्वर-
न्यथाऽद्रिशृङ्गं हरिरुन्नदंस्तथा ॥ ३८

स तोमरं भास्कररश्मिवर्चसं
बलास्त्रसर्गोत्तमयत्नमन्युभिः ।
ससर्ज शीघ्रं परिपीडयन्गजं
गुरोः सुताय द्रविडेश्वरो नदन् ॥ ३९

मणिप्रवेकोत्तमवज्रहाटकै-
रलंकृतं चांशुकमाल्यमौक्तिकैः ।
हतो मयासीत्यसकृन्मुदा नद-
न्पराभिनद्द्रौणिवराङ्गभूषणम् ॥ ४०

तदर्कचन्द्रग्रहपावकत्विषं
भृशाभिघातात्पतितं विघूर्णितम् ।
महेन्द्रवज्राभिहतं महास्वनं
यथाऽद्रिशृङ्गं धरणीतले तथा ॥ ४१

ततः प्रजज्वाल परेण मन्युना
पादाहतो नागपतिर्यथा तथा ।
समाददे चान्तकदण्डसन्निभा-
न्निषूनमित्रान्तकरांश्चतुर्दश ॥ ४२

द्विपस्य पादाग्रकरान्स पञ्चभि-
र्नृपस्य बाहू च शिरोऽथ च त्रिभिः ।
जघान षड्भिः षडृतूपमत्विषः
स पाण्ड्यराजानुचरान्महारथान् ॥ ४३

सुदीर्घवृत्तौ वरचन्दनोक्षितौ
सुवर्णमुक्तामणिवज्रभूषणौ ।
भुजौ धरायां पतितौ नृपस्य तौ
विचेष्टतुस्ताक्ष्यहताविवोरगौ ॥ ४४

शिरश्च तत्पूर्णशशिप्रभाननं
सरोषताम्रायतनेत्रमुन्नसम् ।
क्षितावपि भ्राजति तत्सकुण्डलं
विशाखयोर्मध्यगतः शशी यथा ॥ ४५

[स तु द्विपः पञ्चभिरुत्तमेषुभिः
कृतः षडंशश्चतुरो नृपत्रिभिः ।
कृतो दशांशः कुशलेन युध्यता
यथा हविस्तद्दश दैवतं तथा ॥ ४६

स पादशो राक्षसभोजनान्बहून्
प्रदाय पाण्ड्योऽश्वमनुष्यकुञ्जरान् ।
स्वधामिवाप्य ज्वलनः पितृप्रिय-
स्ततः प्रशान्तः सलिलप्रवाहतः ॥] ४७

समाप्तविद्यं तु गुरोः सुतं नृपः
समाप्तकर्माणमुपेत्य ते सुतः ।
सुहृद्वृतोऽत्यर्थमपूजयन्मुदा
जिते बलौ विष्णुमिवामरेश्वरः ॥ ४८

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

त्यर्थः ॥ ३० ॥ हतेश्वरो य कश्चित् त पाण्ड्यम् ॥ ३७ ॥ मलयध्वज पाण्ड्यस्त यदृच्छयागत वारणं समभ्यतिष्ठत् ॥ ३८ ॥ बलेन अस्त्रसर्गे य उत्तमो यत्नस्तेन मन्युना च तै । परिपीडयन् अङ्कुशेन कोपयन् ॥ ३९ ॥ द्रौणे वराङ्गभूषण किरीटम् ॥ ४० ॥ इषून् समाददे द्रौणिरिति शेष ॥ ४२ ॥ चतुरः चतुरंश । एव स गजो दशधाभक्तो यथा दशहविष्कायामिष्टौ पिष्टपिण्डो दशधा क्रियते तथेत्यर्थ ॥ ४६ ॥ पाण्ड्योऽश्वादीन् पादश. प्रदाय खण्डयित्वा प्रशान्तः द्रौणिबाणैरिति शेषः । यथा स्वधा प्रेतशरीररूप हवि प्राप्य पितृप्रियो ज्वलन श्मशानाग्नि· जलेन शाम्यति तद्वदित्यर्थ. ॥ ४७ ॥ 'समाप्तविद्य सम्यगाप्तविद्यम् । समाप्तकर्माण कृतकृत्यम् ॥ ४८ ॥ षट्पञ्चाशोऽध्याय· ॥ ५६ ॥

सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

संकुलयुद्धम् ॥ १ ॥

धृतराष्ट्र उवाच ।
पाण्ड्ये हते किमकरोदर्जुनो जयतांवरः ।
एकवीरेण कर्णेन द्राविते च युधिष्ठिरे ॥ १
समाप्तविद्यो बलवान्युक्तो वीरश्च पाण्डवः ।
सर्वभूतेष्वनुज्ञातः शंकरेण महात्मना ॥ २
तस्मान्महद्भयं तीव्रममित्रघ्नाद्धनञ्जयात् ।
स यत्तत्राकरोत्पार्थस्तन्ममाचक्ष्व सञ्जय ॥ ३

सञ्जय उवाच ।
हते पाण्ड्येऽर्जुनं कृष्णस्त्वरन्नाह वचो हितम् ।
हतं पश्य स्वराजानमपयातांश्च पाण्डवान् ॥ ४
कर्ण पश्य महारङ्गे ज्वलन्तमिव पावकम् ।
असौ भीमो महेष्वासः प्रतिवृत्तो रणं प्रति ॥ ५
त इमे नानुवर्तन्ते धृष्टद्युम्नपुरोगमाः ।
पाञ्चालाः सृञ्जयाश्चैव पाण्डवानां चमूमुखम् ॥ ६
'निवृत्तैश्च पुनः पार्थैर्भग्नं शत्रुबलं महत् ।'
कौरवान्द्रवतो ह्येष कर्णो वारयते भृशम् ॥ ७
अन्तकप्रतिमो वेगे शक्रतुल्यपराक्रमः ।
असौ गच्छति कौन्तेय द्रौणिः शस्त्रभृतां वरः ॥ ८
तमेष प्रद्रुतः सङ्ख्ये धृष्टद्युम्नो महारथः ।
अश्वत्थाम्ना हताः सङ्ख्ये सर्वे कौन्तेय सृञ्जयाः ॥ ९
रथाश्वनरनागानां कृतं च कदनं महत् ।
इत्येतत्सर्वमाचष्ट वासुदेवः किरीटिने ॥ १०
एतच्छ्रुत्वा च दृष्ट्वा च भ्रातॄणां व्यसनं महत् ।
वाहयाश्वान्हृषीकेश क्षिप्रमित्याह पाण्डवः ॥ ११
ततः प्रायाद्धृषीकेशो रथेनाप्रतिमो युधि ।
'ततो रेणुः समभवत्पुनस्तत्र महारणे ॥ १२
ततो राजन्महानासीत्संग्रामो रोमहर्षणः ।
सिंहनादरवाश्चात्र प्रादुरासन्समागमे ।
उभयोः सेनयो राजन्मृत्युं कृत्वा निवर्तनम् ॥ १३
ततः पुनः समाजग्मुरभीताः कुरुसृञ्जयाः ।
युधिष्ठिरमुखाः पार्था वैकर्तनमुखा वयम् ॥ १४
ततः प्रववृते युद्धं घोररूपं विशांपते ।
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनम् ॥ १५
तस्मिन्प्रवृत्ते संग्रामे तुमुले रोमहर्षणे ।
संशप्तकेषु वीरेषु किंचिच्छेषेषु भारत ॥ १६
धृष्टद्युम्नो महाराज सहितः सर्वराजभिः ।
कर्णमेवाभिदुद्राव पाण्डवाश्च महारथाः ॥ १७
आगच्छमानांस्तान्दृष्ट्वा संग्रामे विजयैषिणः ।
दधारैको रणे कर्णो जलौघानिव पर्वतः ॥ १८
समासाद्य तु ते कर्णं व्यशीर्यन्त महारथाः ।
यथाऽचलं समासाद्य वार्योघाः सर्वतोदिशम् १९
तयोरासीन्महाराज संग्रामो घोरदर्शनः ।
प्रवृद्धयोर्महाराज्ञे बलिनोर्विजिगीषतोः ॥ २०
धृष्टद्युम्नस्तु राधेयं शरेणानतपर्वणा ।
छादयामास संक्रुद्धस्तिष्ठतिष्ठेति चाब्रवीत् ॥ २१
विजयं तु धनुः श्रेष्ठं विधून्वानो महारथः ।
पार्षतस्य धनुश्छित्त्वा शरांश्चाशीविषोपमान् २२
ववर्ष शरवर्षाणि तोयवर्षानिवाम्बुदः ।
छादयामास संक्रुद्धः पार्षतं नवभिः शरैः ॥ २३
ते हेमविकृतं वर्म भित्त्वा तस्य महात्मनः ।
शोणिताक्ता व्यराजन्त शक्रगोपा इवानघ ॥ २४
तदपास्य धनुश्छिन्नं धृष्टद्युम्नः प्रतापवान् ।
ततोऽन्यद्धनुरादाय सारवद्वारसाधनम् ।
कर्णं विव्याध सप्तत्या शरैः सन्नतपर्वभिः ॥ २५
तथैव राजन्कर्णोऽपि पार्षतं शत्रुतापनम् ।
द्रोणशत्रुं महेष्वासो विव्याध निशितैः शरैः ॥ २६
पुनरन्यं महाराज शरं कनकभूषणम् ।
प्रेषयामास समरे मृत्युदण्डमिवापरम् ॥ २७
तमापतन्तं सहसा घोररूपं विशांपते ।
चिच्छेद शतधा राजन्पार्षतः कृतहस्तवत् ॥ २८
दृष्टवान्पतितं भूमौ शरं कर्णो विशांपते ॥ २९
पार्षतः शरवर्षेण समन्तात्पर्यवारयत् ।

अनुज्ञात त्व अजय्यो भविष्यसीत्यनुगृहीत ॥ २ ॥

सप्तपञ्चाशोऽध्याय. ॥ ५७ ॥

विव्याध चैनं त्वरितो नाराचैः सप्तभिस्तदा ॥३०
तं प्रत्यविध्यद्दशभिः शरैर्हेमविभूषितैः ।
तयोर्युद्धं समभवद्दृष्टिश्रोत्रमनोहरम् ॥ ३१
आसीद्घोरं च चित्रं च प्रेक्षणीयं च सर्वशः ॥ ३२
सर्वेषां तत्र भूतानां रोमहर्षो व्यजायत ।
दृष्ट्वा तत्समरे कर्म कर्णपार्षतयोर्नृप ॥ ३३
एतस्मिन्नन्तरे द्रौणिरभ्ययात्तं महारथम् ।
पार्षतं शत्रुदमनं शत्रुवीर्यासुनाशनम् ॥ ३४
स दृष्ट्वा समरे यान्तमभीतं च महारथम् ।
अभ्यभाषत संक्रुद्धः पार्षतं शत्रुतापनम् ॥ ३५
रथं रथेन संपीड्य पार्षतस्य तु ब्राह्मणः ॥ ३६
तिष्ठतिष्ठेति ब्रह्मघ्न न मे जीवन्विमोक्ष्यसे ।
इत्युक्त्वा सुभृशं वीरः शीघ्रक्रन्निशितैः शरैः ।
छादयामास समरे यतमानो महारथः ॥ ३७
यत्नतः परया शक्त्या धृष्टद्युम्नं महारथम् ।
योधयामास समरे क्रुद्धरूपो विशांपते ॥ ३८
तयोस्तु संनिपाते हि घोररूपो विशांपते ॥ ३९
यथा हि समरे द्रौणिः पार्षतं दृश्य मारिष ।
नातिहृष्टमना ह्यासीन्मन्वानो मृत्युमात्मनः ॥४०
स ज्ञात्वा पितुरत्यन्तवैरिणं तु महाहवे ।
आत्मानं समरे ज्ञात्वाऽशस्त्रवध्यं महाबलः ।
जवेनाभिययौ द्रौणिं कालः कालक्षये यथा ॥४१
द्रौणिस्तु दृष्ट्वा राजेन्द्र धृष्टद्युम्नमवस्थितम् ।
क्रोधेन निःश्वसन्वीरः पार्षदं समभिद्रवत् ॥ ४२
तावन्योन्यं तु दृष्ट्वैव संरम्भं जग्मतुः परम् ।
प्रगृह्य महती चापे शरासनसमन्विते ॥ ४३
अथाब्रवीन्महाराज द्रोणपुत्रः प्रतापवान् ।
धृष्टद्युम्नं समीपस्थं त्वरमाणो विशांपते ॥ ४४
पाञ्चालापशदाद्य त्वां प्रेषयामि यमक्षयम् ।
पापं हि यत्त्वया कर्म कृतं तातं घ्नता रणे ॥४५
अद्य त्वं प्राप्स्यसे तद्वै यथा ह्यकुशलस्तथा ।
अरक्ष्यमाणः पार्थेन यदि तिष्ठसि संयुगे ।
नापक्रामसि वा मोहात्सत्यमेतद्ब्रवीमि ते ॥४६

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

अर्जुनस्य द्रौणिग्रस्तधृष्टद्युम्नरक्षणपूर्वकं द्रौणिं निर्जित्य संशप्तकान्प्रति गमनम् ॥ १ ॥

सञ्जय उवाच ।
एवमुक्तः प्रत्युवाच धृष्टद्युम्नः प्रतापवान् ।
आशिषं तां प्रवक्तव्यां मामको दास्यते तव ॥ १
येनैव ते पितुर्दत्ता यतमानस्य संयुगे ।
एष ते प्रतिवाक्यं वै असिर्दास्यति मामकः ।
येन कृत्तं तव पितुर्यतमानस्य तच्छिरः ॥ २
यदि तावन्मया द्रोणो निहतो ब्राह्मणध्रुवः ।
त्वामिदानीं कथं युद्धे न हनिष्यामि किल्बिषम् ॥३
एवमुक्त्वा महातेजाः सेनापतिररिंदमः ।
सुतीक्ष्णेनाथ भल्लेन द्रौणिं विव्याध पार्षतः ॥ ४
ततो द्रौणिः सुसंक्रुद्धः शरैः संनतपर्वभिः ।
आच्छादयद्दिशो राजन्धृष्टद्युम्नस्य संयुगे ॥ ५
नैवान्तरिक्षं न दिशो नापि योधाः सहस्रशः ।
दृश्यन्ते वै महाराज शरैश्छन्नाः समन्ततः ।
एकः सन्वारयामास प्रेक्षणीयः समन्ततः ॥ ६
तथैव पार्षतो राजन्द्रौणिमाहवशोभिनम् ।
शरैः संछादयामास सूतपुत्रस्य पश्यतः ॥ ७
राधेयोऽपि महाराज पाञ्चालान्सह पाण्डवैः ।
द्रौपदेया युधामन्युमुत्तमौजसमेव च ॥ ८
सात्यकिश्च महाराज योधांश्चान्यान्सहस्रशः ।
एकस्तान्वारयामास प्रेक्षणीयः समन्ततः ॥ ९
धृष्टद्युम्नस्तु समरे द्रौणेश्चिच्छेद कार्मुकम् ।
क्षुरप्रेण सुतीक्ष्णेन पश्यतां सर्वयोधिनाम् ॥ १०
तदपास्य धनुश्छिन्नमन्यदादत्त कार्मुकम् ।

वेगवत्समरे घोरं शरांश्चाशीविषोपमान् ॥ ११
स पार्षतस्य राजेन्द्र धनुः शक्तिं गदां ध्वजम्।
हयान्सूतं रथं चैव निमेषाद्यधमच्छरैः ॥ १२
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः।
खड्गमादत्त विपुलं शतचन्द्रं च भानुमत् ॥ १३
द्रौणिस्तदपि राजेन्द्र भल्लैः क्षिप्रं महारथः।
चिच्छेद समरे वीरः क्षिप्रहस्तो दृढायुधः ॥ १४
रथादनवरूढस्य धन्विनो बाहुशालिनः।
पश्यतां सर्वसैन्यानां तदद्भुतमिवाभवत् ॥ १५
धृष्टद्युम्नं तु विरथं हताश्वरथसारथिम्।
शस्त्रैश्च बहुधा विद्धमस्त्रैश्च शकलीकृतम्।
नातरद्भरतश्रेष्ठ यतमानो महारथः ॥ १६
तस्यान्तमिषुभी राजन्यदा द्रौणिर्न गच्छति।
अथ त्यक्त्वा रथं वीरः पार्षतं त्वरितोऽन्वगात्।
प्रगृह्य विपुलं खड्गं जातरूपपरिष्कृतम् ॥ १७
तस्य संपततो राजन्वपुरासीन्महात्मनः।
गरुडस्येव पततो जिघृक्षोः पन्नगोत्तमम् ॥ १८
एतस्मिन्नेव काले तु केशवः परवीरहा।
अब्रवीद्भरतश्रेष्ठमर्जुनं जयतां वरम् ॥ १९
पश्य द्रौणिं पार्षतस्य यतमानं वधं प्रति।
यत्नं करोति विपुलं हन्याच्चैनं न संशयः ॥ २०
त्रायस्वैनं महाबाहो पार्षतं युद्धदुर्मदम्।
द्रौणेरास्यगतं वीर मृत्योरास्यगतं यथा ॥ २१
एवमुक्त्वा महाराज वासुदेवः प्रतापवान्।
प्रैषयत्तुरगान्यत्र द्रौणिर्वीरो व्यवस्थितः ॥ २२
ते हयाश्चन्द्रसंकाशाः केशवेन प्रचोदिताः।
पिबन्त इव चाकाशं जग्मुद्रौणेर्महारथम् ॥ २३
दृष्ट्वा द्रौणिर्महाराज वासुदेवधनंजयौ।
धृष्टद्युम्नवधे राजंश्चक्रे यत्नं महाबलः ॥ २४
विकृष्यमाणं दृष्ट्वैव धृष्टद्युम्नं जनेश्वर।
शरांश्चिक्षेप वै पार्थो द्रौणिं प्रति महारथः ॥ २५
ते शरा हेमविकृता गाण्डीवप्रेषिता भृशम्।
द्रौणिमासाद्य विविशुर्वल्मीकमिव पन्नगाः ॥ २६
विद्धस्तु तैः शरैर्घोरैद्रोणपुत्रः प्रतापवान्।
उत्सृज्य समरे राजन्पाञ्चालमरिसौजसम् ॥ २७
आरुरोह रथं वीरो धनञ्जयशरार्दितः।
प्रगृह्य च धनुः श्रेष्ठं पार्थं विव्याध सायकैः ॥ २८
एतस्मिन्नन्तरे शूरः सहदेवो जनाधिप।
अपोवाह रथेनाजौ पार्षतं शत्रुतापनम् ॥ २९
अर्जुनोऽपि महाराज द्रौणिं विव्याध पत्रिभिः।
तं द्रोणपुत्रः संरब्धो बाह्वोरुरसि चार्पयत् ॥ ३०
क्रोधितस्तु रणे पार्थो नाराचं कालसंनिभम्।
द्रोणपुत्राय चिक्षेप यमदण्डमिवापरम् ॥ ३१
स ब्राह्मणस्यांसदेशे निपपात महाद्युतेः।
स विह्वलो महाराज शरवेगेन संयुगे।
निषसाद रथोपस्थे वैक्लव्यं परमं ययौ ॥ ३२
तं तु मत्वा हतं वीरं सारथिः शत्रुकर्शनम्।
अपोवाह रणेनाजौ त्वरमाणो रणाजिरात् ॥ ३३
अथोद्धृष्टं महाराज पाञ्चालैर्जितकाशिभिः।
मोक्षितं पार्षतं दृष्ट्वा द्रोणपुत्रं च पीडितम् ॥ ३४
वादित्राणि च दिव्यानि प्रावाद्यन्त सहस्रशः।
सिंहनादश्च संजज्ञे दृष्ट्वा युद्धं तदद्भुतम् ॥ ३५
ततः कर्णो महाराज व्याक्षिपद्विजयं धनुः।
दृष्ट्वार्जुनं रणे क्रुद्धः प्रेक्षते च मुहुर्मुहुः।
द्वैरथं चापि पार्थेन गन्तुकामो महाद्युतिः ॥ ३६
एवं कृत्वाऽब्रवीत्पार्थो वासुदेवं धनञ्जयः।
याहि संशप्तकान्कृष्ण कार्यमेतत्परं मम ॥ ३७
ततः प्रयातो गोविन्दः श्रुत्वा पाण्डवभाषितम्।
रथेनातिपताकेन मनोमारुतरंहसा ॥ ३८
एवमेष क्षयो वृत्तः पृथिव्यां पृथिवीपते।
तावकानां परेषां च राजन्दुर्मन्त्रिते तव ॥ ३९

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
ततः प्रववृते भूयः संग्रामो राजसत्तम ।
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनः ॥ १
धनूंषि बाणान्परिघानसिपट्टसतोमरान् ।
मुसलानि भुशुण्डीश्च शक्तिरिष्टिपरश्वधान् ॥ २
गदाःप्रासाञ्शितान्कुंतान्भिंडिपालान्महाङ्कुशान्
प्रगृह्य क्षिप्रमापेतुः परस्परजिघांसया ॥ ३
बाणज्यातलशब्देन द्यां दिशः प्रदिशो वियत् ।
पृथिवीं नेमिघोषेण नादयन्तोऽभ्ययुः परान् ॥ ४
तेन शब्देन महता संहृष्टाश्चक्रुराहवम् ।
वीरा वीरैर्महाघोरकलहान्तं तितीर्षवः ॥ ५
ज्यातलत्रधनुःशब्दाञ्शस्त्राणां च निपात्यताम् ।
ताडितानां च पतता निनादांश्च पदातिनाम् ॥ ६
बाणशब्दांश्च विविधाञ्शूराणां चाभिगर्जताम् ।
श्रुत्वा गजा भृशं त्रेसुः पेतुर्मम्लुश्च सैनिकाः ॥ ७
तेषां निनदतां चैव शस्त्रवर्षं च मुञ्चताम् ।
बहूनाधिरथिर्वीरः प्रममाथेषुभिः परान् ॥ ८
पञ्च पाञ्चालवीराणां रथान्दश च पञ्च च ।
साश्वसूतध्वजान्कर्णः शरैर्निन्ये यमक्षयम् ॥ ९
योधमुख्या महावीर्याः पाण्डूनां कर्णमाहवे ।
शिक्षितास्तमभिद्रुत्य परिवव्रुः समन्ततः ॥ १०
ततः कर्णो द्विषत्सेनां शरवर्षैर्विलोडयन् ।
विजगाहाण्डजाकीर्णां पद्मिनीमिव यूथपः ॥ ११
द्विषत्सैन्यमवस्कन्द्य राधेयो धनुरुत्तमम् ।
विधुन्वानः शितैर्बाणैः शिरांस्युन्मथ्य पातयत् १२
'हस्तिनः समहामात्रान्साश्वारोहान्हयानपि ।
रथिनोऽप्येकबाणेन भ्रमतश्चावपातयत् ॥' १३
वर्म वा चर्म वाऽश्रित्य निपातमपि देहिनः ।
विषेहुर्नास्य संस्पर्शं द्वितीयस्य पतत्रिणः ॥ १४
वर्मयुक्तेषु देहेषु धनुषोऽस्यञ्शिताञ्शरान् ।
मौर्व्या तलत्रे न्यहनत्कशया वाजिनो यथा ॥ १५
पाण्डुसृञ्जयपाञ्चालाञ्शरगोचरमागतान् ।
ममर्द तरसा कर्णः सिंहो मृगगणानिव ॥ १६
ततः पाञ्चालपुत्रश्च द्रौपदेयाश्च मारिष ।
यमौ च युयुधानश्च त्वरिताः कर्णमभ्ययुः ॥ १७
तेषु व्यायच्छमानेषु कुरुपाञ्चालपाण्डुषु ।
प्रियानसून्रणे त्यक्त्वा योधा जघ्नुः परस्परम् ॥ १८
सुसन्नद्धाः कवचिनः सशिरस्त्राणभूषणाः ।
गदाभिर्मुसलैश्चान्ये परिघैश्च महाबलाः ॥ १९
समभ्यधावन्त भृशं कालदण्डैरिवोद्यतैः ।
नर्दन्तश्चाह्वयन्तश्च प्रवल्गन्तश्च मारिष ॥ २०
ततो निजघ्नुरन्योन्यं पेतुश्चान्योन्यताडिताः ।
वमन्तो रुधिरं गात्रैर्विमस्तिष्ककेक्षणायुधाः ॥ २१
दन्तपूर्णैः सरुधिरैर्वक्त्रैर्दाडिमसन्निभैः ।
जीवन्त इव चाप्येके तस्थुः शस्त्रौघवृंहिताः ॥ २२
परश्वधैश्चाप्यपरे पट्टसैरसिभिस्तथा ।
शक्तिभिर्भिण्डिपालैश्च नखरप्रासतोमरैः ॥ २३
ततक्षुश्चिच्छिदुश्चान्ये बिभिदुश्चिक्षिपुस्तथा ।
संचकर्तुश्च जघ्नुश्च राजन्योधा महारणे ॥ २४
पेतुरन्योन्यनिहता व्यसवो रुधिरोक्षिताः ।
क्षरन्तः स्रसं रक्तं प्रकृत्ताश्चन्दना इव ॥ २५
रथै रथा विनिहता हस्तिभिश्चापि हस्तिनः ।
नरैर्नरा हताः पेतुरश्वाश्वैः सहस्रशः ॥ २६
ध्वजाः शिरांसि च्छत्राणि द्विपहस्ता नृणां भुजाः ।
क्षुरैर्भल्लार्धचन्द्रैश्च छिन्नाः पेतुर्महीतले ॥ २७
'वध्यतां दारुणाः शब्दाः पततां स्तनतामपि ।

द्यां स्वर्गम् । वियदन्तरिक्षम् ॥ ४ ॥ अण्डजैर्जलपक्षिभिः सारसादिभिराकीर्णा व्याप्ताम् ॥ ११ ॥ मौर्व्या मौर्वीच्युतै शरैर्बाणैस्तलत्रे ज्याघातवारणस्थाने न्यहनत् ॥ १५ ॥ व्यायच्छमानेषु यतमानेषु ॥ १८ ॥ परिघैर्हता इति शेष. । समभ्यधावन्तेत्युत्तरेणान्वय ॥ १९ ॥ मस्तिष्क शिरोभागस्थमासपिण्ड. ॥ २१ ॥ परश्वथैस्ततक्षु । पट्टसैरसिभिश्च चिच्छिदु । शक्तिभिर्बिभिदु । भिन्दिपालैश्चिक्षिपुः । नखरै. संचकर्तु । प्रासतोमरैर्जघ्नुः ॥ २३ ॥ चन्दना रक्तचन्दना ॥ २५ ॥

नराश्वेभरथानां हि नराश्वेभरथैस्तथा ॥' २८
नरांश्च नागांश्च रथान्हयान्ममृदुराहवे ॥ २९
अश्वारोहैर्हताः शूराश्छिन्नहस्ताश्च दन्तिनः ।
सपताकाध्वजाः पेतुर्विशीर्णा इव पर्वताः ॥ ३०
पत्तिभिश्च समाप्लुत्य द्विरदाः स्यन्दनास्तथा ।
हताश्च हन्यमानाश्च पतिताश्चैव सर्वशः ॥ ३१
अश्वारोहाः समासाद्य त्वरिताः पत्तिभिर्हताः ।
सादिभिः पत्तिसङ्घाश्च निहता युधि शेरते ॥३२
मृदितानीव पद्मानि म्लाना इव च स्रजः ।
हतानां वदनान्यासन्गात्राणि च महाहवे ॥ ३३
रूपाण्यत्यर्थकान्तानि द्विरदाश्वनृणां नृप ।
समुन्नानीव वस्त्राणि ययुर्दुर्दर्शतां पराम् ॥ ३४

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे एकोनषष्टितमोऽध्यायः ॥ ६९ ॥

षष्टितमोऽध्यायः ॥ ६० ॥

गजयुद्धम् ॥ १ ॥ संकुलयुद्धम् ॥ २ ॥

सञ्जय उवाच ।
हस्तिभिस्तु महामात्रास्तव पुत्रेण चोदिताः ।
धृष्टद्युम्नं द्रुतेत्याशु क्रुद्धाः पार्षतमभ्ययुः ॥ १
प्राच्याश्च दाक्षिणात्याश्च प्रवरा गजयोधिनः ।
अङ्गा वङ्गाश्च पुण्ड्राश्च मागधास्ताम्रलिप्तकाः ॥ २
मेकलाः कोशला मद्रा दशार्णा निषधास्तथा ।
गजयुद्धेषु कुशलाः कलिङ्गैः सह भारत ॥ ३
शरतोमरनाराचैर्वृष्टिमन्त इवाम्बुदाः ।
सिषिचुस्ते ततः सर्वे पाञ्चालबलमाहवे ॥ ४
तानभिद्रवतो नागान्मदवेगसमुद्धतान् ।
विपाठक्षुरनाराचैर्धृष्टद्युम्नो ह्यवीवृषत् ॥ ५
एकैकं दशभिः षड्भिरष्टाभिरपि पार्षतः ।
द्विरदानभिविव्याध क्षिप्रं गिरिनिभाञ्शरैः ॥ ६
प्रच्छाद्यमानं द्विरदैर्मेघैरिव दिवाकरम् ।
पर्ययुः पाण्डुपाञ्चाला नदन्तो ह्यात्तकार्मुकाः ॥७
तान्नागानभिवर्षन्तो ज्यातलत्रविनादिनः ।
वीरनृत्यं प्रनृत्यन्तः शूरतालप्रचोदितैः ।
नकुलः सहदेवश्च द्रौपदेयाः प्रभद्रकाः ॥ ८
सात्यकिश्च शिखण्डी च चेकितानश्च वीर्यवान् ।
समन्तात्सिषिचुर्वीरा मेघास्तोयैरिवाचलान् ॥ ९
ते म्लेच्छैः प्रेषिता नागा नरानश्वान्रथानपि ।
हस्तैराक्षिप्य ममृदुः पद्भिश्चाप्यतिमन्यवः ॥ १०
बिभिदुश्च विषाणाग्रैः समाक्षिप्य च चिक्षिपुः ।
विषाणलग्नाश्चाप्यन्ये परिपेतुर्विभीषणाः ॥ ११
प्रमुखे वर्तमानं तु द्विपमङ्गस्य सात्यकिः ।
नाराचेनोग्रवेगेन भित्त्वा मर्माण्यताडयत् ॥ १२
तस्यावर्जितकायस्य द्विरदादुत्पतिष्यतः ।
नाराचेनाहनद्वक्षः सात्यकिः सोऽपतद्भुवि ॥१३
पुण्ड्रस्यापततो नागं चलन्तमिव पर्वतम् ।
सहदेवः प्रसन्नाग्रैर्नाराचैरहनत्त्रिभिः ॥ १४
विपताकं वियन्तारं विवर्मध्वजजीवितम् ।
तं कृत्वा द्विरदं भूयः सहदेवोऽङ्गमभ्ययात् ॥१५
सहदेवं तु नकुलो वारयित्वाङ्गमार्दयत् ।
नाराचैर्यमदण्डाभैस्त्रिभिर्नागं शतेन तम् ॥ १६
दिवाकरकरप्रख्यानङ्गश्चिक्षेप तोमरान् ।
नकुलाय शतान्यष्टौ त्रिभिरेकैकं तु सोऽच्छिनत् १७
तथार्धचन्द्रेण शिरस्तस्य चिच्छेद पाण्डवः ।
स पपात हतो म्लेच्छस्तेनैव सह दन्तिना ॥ १८
अथाङ्गपुत्रे निहते हस्तिशिक्षाविशारदे ।
अङ्गाः क्रुद्धा महामात्रा नागैर्नकुलमभ्ययुः ॥ १९
चलत्पताकैः सुमुखैर्हेमकक्ष्यातनुच्छदैः ।
मिमर्दिषन्तस्त्वरिताः प्रदीप्तैरिव पर्वतैः ॥ २०
मेकलोत्कलकालिङ्गा निषधास्ताम्रलिप्तकाः ।
शरतोमरवर्षाणि विमुञ्चन्तो जिघांसवः ॥ २१

पद्मानीव वदनानि । स्रजइव गात्राणि ॥ ३३ ॥ समुन्नानि क्षारक्लिन्नानि मलिनानि ॥ ३४ ॥ एकोनषष्टितमोऽध्याय. ॥ ५९ ॥

प्रच्छाद्यमान धृष्टद्युम्नम् ॥ ७ ॥ आवर्जित प्रहारवञ्चनेन रक्षित कायो येन तस्य ॥ १३ ॥ षष्टितमोऽध्यायः ॥ ६० ॥

तैश्छाद्यमानं नकुलं निशाकरमिवाम्बुदैः ।
परिपेतुः सुसंरब्धाः पाण्डुपाञ्चालसात्यकाः ॥२२
ततस्तदभवद्युद्धं रथिनां हस्तिभिः सह ।
सृजतां शरवर्षाणि तोमरांश्च सहस्रशः ॥ २३
नागानां प्रास्फुटन्कुम्भा मर्माणि च नखानि च ।
दन्ताश्चैवातिविद्धानां नाराचैर्हेमभूषणैः ॥ २४
तेषामष्टौ महानागांश्चतुःषष्ट्या सुतेजनैः ।
नाराचैः सहदेवस्तान्पातयामास सादिभिः ॥२५
अञ्जोगतिभिरायम्य प्रयत्नाद्धनुरुत्तमम् ।
नाराचैरहनन्नागान्कुलः कुलनन्दनः ॥ २६
ततः पाञ्चालशैनेयौ द्रौपदेयाः प्रभद्रकाः ।
शिखण्डी च महानागान्सिषिचुः शरवृष्टिभिः २७
ते पाण्डुयोधाम्बुधरैः शत्रुद्विरदपर्वताः ।
बाणवर्षैर्हताः पेतुर्वज्रवर्षैरिवाचलाः ॥ २८
एवं हत्वा तव गजांस्ते पाण्डुरथकुञ्जराः ।
द्रुतं सेनां च वर्षन्तो भिन्नकूलामिवापगाम् ॥२९
तां ते सेनां समालोड्य पाण्डुपुत्रस्य सैनिकाः ।
विक्षोभयित्वा च पुनः कर्णं समभिदुद्रुवुः ॥ ३०

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे षष्टितमोऽध्यायः ॥ ६० ॥

एकषष्टितमोऽध्यायः ॥ ६१ ॥

कृष्णेनार्जुनंप्रति कुरूणां युधिष्ठिरग्रहणोद्यमकथनम् ॥ १ ॥

सञ्जय उवाच ।
तेषां प्रवृत्ते संग्रामे विपुले शोणितोदके ।
रराज लोहितेनोर्वी संसिक्ता बहुधा भृशम् ॥ १
ततो रजसि संशान्ते प्रकाशः सर्वतोऽभवत् ।
एतस्मिन्नन्तरे पार्थं कृष्णो वचनमब्रवीत् ।
दर्शयन्निव कौन्तेयं धर्मराजं युधिष्ठिरम् ॥ २
एष पाण्डव ते भ्राता धार्तराष्ट्रैर्महाबलैः ।
जिघांसुभिर्महेष्वासैः शीघ्रं पार्थोऽनुसार्यते ॥ ३
तमन्वगेव पाञ्चालाश्चेदिमात्स्याश्च भारत ।
अनुयान्ति महात्मानं परीप्सन्तो महाजवाः ॥ ४
एष दुर्योधनः पार्थ गजानीकेन दंशितः ।
राजा सर्वस्य लोकस्य राजानमनुधावति ॥ ५
जिघांसुः पुरुषव्याघ्रं भ्रातृभिः सहितो बली ।
आशीविषसमस्पर्शैः सर्वायुधविशारदैः ॥ ६
नदद्भिः सिंहनादांश्च धमद्भिश्चापि वारिजान् ।
बलवद्भिर्महेष्वासैर्विधून्वानैर्धनूंषि च ॥ ७
एते जिघृक्षवो यान्ति द्विपाश्वरथपत्तयः ।
युधिष्ठिरं धार्तराष्ट्रो रत्नोत्तममिवार्थिनः ॥ ८
पश्य सात्वतभीमाभ्यां निरुद्धा विष्ठिताः पुनः ।
जिहीर्षवोऽमृतं दैत्याः शक्राग्निभ्यामिवाहवे ॥ ९
एते बहुत्वात्त्वरिताः पुनर्गच्छन्ति पाण्डवम् ।
समुद्रमिव वार्योघाः प्रावृट्काले महारथाः ॥ १०
मृत्योर्मुखगतं मन्ये कुन्तीपुत्रं युधिष्ठिरम् ।
हुतमग्नौ च कौन्तेयं दुर्योधनवशं गतम् ॥ ११
यथायुक्तमनीकं हि धार्तराष्ट्रस्य पाण्डव ।
नास्य शक्रोऽपि मुच्येत संप्राप्तो बाणगोचरम् १२
दुर्योधनस्य वीरस्य शरौघाञ्शीघ्रमस्यतः ।
संक्रुद्धस्यान्तकस्येव को वेगं संसहेद्रणे ॥ १३
रसतस्तस्य वीरस्य द्रौणेः शारद्वतस्य च ।
कर्णस्य चेषुवेगो वै पर्वतानपि शातयेत् ॥ १४
कर्णेन च कृतो राजा विमुखोऽद्य तु दृश्यते ॥१५
बलवाँल्लघुहस्तश्च कृती युद्धविशारदः ।
राधेयः पाण्डवश्रेष्ठं शक्तः पीडयितुं रणे ।
सहितो धृतराष्ट्रस्य पुत्रैः शूरैर्महाबलैः ॥ १६
तस्यैभिर्युध्यमानस्य संग्रामे शंसितात्मनः ।
अन्यैरपि च पार्थस्य कृतं कर्म महारथैः ॥ १७
उपवासकृशो राजा भृशं भरतसत्तमः ।
ब्राह्मे बले स्थितो ह्येष न क्षात्रे हि बले विभुः ॥१८

जिहीर्षवो युधिष्ठिरं हर्तुमिच्छन्त ॥ ९ ॥ तस्य युधिष्ठिरस्य कर्म कर्तव्यं पराजयाख्यम् । एभिर्दुर्योधनादिभि कृत निष्पादितम् ॥ १७ ॥ तत्र हेतु । ब्राह्मे बले क्षमायाम् । क्षात्रे बले निष्ठुरत्वे ॥ १८ ॥

कर्णेन चाभियुक्तोऽयं भूपतिः शत्रुतापनः ।
संशयं समनुप्राप्तः पाण्डवो वै युधिष्ठिरः ॥ १९
न जीवति महाराजो मन्ये पार्थ युधिष्ठिरः ।
यद्भीमसेनः सहते सिंहनादममर्षणः ॥ २०
नर्दतां धार्तराष्ट्राणां पुनःपुनरारिंदमः ।
धमतां च महाशङ्खान्संग्रामे जितकाशिनाम् ॥ २१
युधिष्ठिरं पाण्डवेयं हतेति भरतर्षभ ।
संचोदयत्यसौ कर्णो धार्तराष्ट्रान्महाबलान् ॥ २२
स्थूणाकर्णास्त्रजालेन पार्थं पाशुपतेन च ।
प्रच्छादयन्ति राजानमनुयान्ति महारथाः ॥ २३

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे एकषष्टितमोऽध्यायः ॥ ६१ ॥

द्विषष्टितमोऽध्यायः ॥ ६२ ॥

कृष्णेनार्जुनंप्रति युधिष्ठिरस्य कर्णेन पराभवकथनपूर्वक कर्णयुद्धप्रदर्शनम् ॥ १ ॥ तथा भीमसेनयुद्धप्रदर्शनम् ॥ २ ॥

श्रीभगवानुवाच ।
आतुरो मे मतो राजा अविषह्यश्च भारत ।
यथैनमनुवर्तन्ते पञ्चालाः सह पाण्डवैः ॥ १
त्वरमाणास्त्वराकाले सर्वशस्त्रभृतां वराः ।
मज्जन्तमिव पाताले बलिनो ह्युज्जिहीर्षवः ॥ २
न केतुर्दृश्यते राज्ञः कर्णस्य पिहितः शरैः ।
पश्यतोर्यमयोः पार्थ सात्यकेश्च शिखण्डिनः ॥ ३
धृष्टद्युम्नस्य भीमस्य शतानीकस्य वा विभो ।
पाञ्चालानां च सर्वेषां चेदीनां चैव भारत ॥ ४
एष कर्णो रणे पार्थ पाण्डवानामनीकिनीम् ।
शरैर्विध्वंसयामास नलिनीमिव कुञ्जरः ॥ ५
एते द्रवन्ति रथिनस्त्वदीयाः पाण्डुनन्दन ।
पश्य पश्य यथा पार्थ गच्छन्त्येते महारथाः ॥ ६
एते भारत मातङ्गाः कर्णेनाभिहताः शरैः ।
आर्तनादान्विकुर्वाणा विद्रवन्ति दिशो दश ॥ ७
रथानां द्रवतां वृन्दमेतच्चैव समन्ततः ।
द्राव्यमाणं रणे पार्थ कर्णेनामिततेजसा ॥ ८
हस्तिकक्ष्यां रणे पश्य चरन्तीं तत्रतत्र ह ।
रथस्थं सूतपुत्रस्य केतुं केतुमतां वर ॥ ९
असौ धावति राधेयो भीमसेनरथं प्रति ।
किरञ्शरशतान्येव विनिघ्नंस्तव वाहिनीम् ॥ १०
एते नश्यन्ति पाञ्चाला द्राव्यमाणा महात्मना ।
शक्रेणेव यथा दैत्या द्राव्यमाणा महात्मना ॥ ११
एष कर्णो रणे जित्वा पाञ्चालान्पाण्डुसृञ्जयान् ।
दिशो विप्रेक्षते सर्वास्त्वदर्थमिति मे मतिः ॥ १२
एष कर्णो धनुःश्रेष्ठं विधून्वन्बहुशोभते ।
शत्रुं जित्वा यथा शक्रो देवसङ्घैः समावृतः ॥ १३
एते नर्दन्ति कौरव्या दृष्ट्वा कर्णस्य विक्रमम् ।
त्रासयन्तो रणे पाण्डून्सृंजयांश्च समन्ततः ॥ १४
एष सर्वात्मना पाण्डूंस्त्रासयित्वा महारणे ।
अभिभाषति राधेयः सर्वसैन्यानि मानद ॥ १५
अभिद्रवत भद्रं वो द्रुतं द्रवत कौरवाः ।
यथा न जीववान्कश्चिन्मुच्येत युधि सृञ्जयः ॥ १६
तथा कुरुत संयत्ता वयं यास्याम पृष्ठतः ।
एवमुक्त्वा गतो ह्येष पृष्ठतो विकिरञ्छरान् ॥ १७
पश्य कर्णं रणे पार्थ श्वेतच्छत्रविराजितम् ।
उदयं पर्वतं यद्वच्छशाङ्केनाभिशोभितम् ॥ १८
पूर्णचन्द्रनिकाशेन मूर्ध्नि च्छत्रेण भारत ।
ध्रियमाणेन समरे श्रीमच्छतशलाकिना ॥ १९
एष त्वां प्रेक्षते कर्णः सकटाक्षं धनंजय ।
उत्तमं यत्नमास्थाय ध्रुवमेष्यति संयुगे ॥ २०
पश्य ह्येनं महाबाहो विधुन्वानं महद्धनुः ।
शरांश्चाशीविषाकारान्विसृजन्तं महारणे ॥ २१
असौ निवृत्तो राधेयो दृष्ट्वा ते वानरध्वजम् ।
प्रार्थयन्समरं पार्थ त्वया सह परंतप ।
वधाय ह्यात्मनोऽभ्येति पावकं शलभो यथा ॥ २२

हत नाशयतेति कर्णश्चोदयतीति सबन्धः ॥ २२ ॥ स्थूणाकर्णो गन्धर्वः ॥ २३ ॥ एकषष्टितमोऽध्यायः ॥ ६१ ॥

हस्तिकक्ष्यां केतुमिति सबन्धः ॥ ९ ॥ छत्रेणोपलक्षितः ॥ १९ ॥

कर्णमेकाकिनं दृष्ट्वा धार्तराष्ट्रो रणाजिरे ।
त्वां च पार्थाभिसंरब्धं कर्णं प्रति महारथम् ॥ २३
कृतागसं च राधेयं धर्मात्मनि युधिष्ठिरे ।
आत्मानं च कृतार्थं च समीक्ष्य भरतर्षभ ॥ २४
असौ दुर्योधनः क्रुद्धो रथानीकेन भारत ।
रिरक्षिषुः सुसंवृत्तो धार्तराष्ट्रो निवर्तते ॥ २५
सर्वैः सहैभिर्दुष्टात्मा वध्यतां च प्रयत्नतः ।
त्वया यशश्च राज्यं च सुखं चोत्तममिच्छता ॥ २६
अदीनयोर्विश्रुतयोर्युवयोर्योत्स्यमानयोः ।
देवासुरे पार्थ मृधे देवदानवयोरिव ।
पश्यन्तु कौरवाः सर्वे तव पार्थ पराक्रमम् ॥ २७
त्वां च दृष्ट्वातिसंरब्धं कर्णं च भरतर्षभ ।
असौ दुर्योधनः क्रुद्धो नोत्तरं प्रतिपद्यते ॥ २८
आत्मानं च कृतात्मानं समीक्ष्य भरतर्षभ ।
कृतागसं च राधेयं धर्मात्मनि युधिष्ठिरे ॥ २९
प्रतिपद्यस्व कौन्तेय प्राप्तकालमनन्तरम् ।
आर्यां युद्धे मतिं कृत्वा प्रत्येहि रथयूथपम् ॥ ३०
पञ्च ह्येतानि मुख्यानि रथानां रथसत्तम ।
शतान्यायान्ति समरे बलिनां तिग्मतेजसाम् ॥ ३१
पञ्च नागसहस्राणि द्विगुणा वाजिनस्तथा ।
अभिसंहत्य कौन्तेय पदाताः प्रयुतानि च ॥ ३२
अन्योन्यरक्षितं वीर बलं त्वामभिवर्तते ।
द्रोणपुत्रं पुरस्कृत्य तच्छीघ्रं संनिषूदय ॥ ३३
निकृत्यैतद्रथानीकं बलिनं लोकविश्रुतम् ।
सूतपुत्रे महेष्वासे दर्शयात्मानमात्मना ॥ ३४
उत्तमं जवमास्थाय प्रत्येहि भरतर्षभ ।
असौ कर्णः सुसंरब्धः पाञ्चालानभिधावति ॥ ३५
केतुमस्य हि पश्यामि धृष्टद्युम्नरथं प्रति ।
समुपैष्यति पाञ्चालानिति मन्ये परंतप ॥ ३६
आचचक्षे प्रियं पार्थ तवेदं भरतर्षभ ।
राजासौ कुशली श्रीमान्धर्मपुत्रो युधिष्ठिरः ॥ ३७
असौ भीमो महाबाहुः सन्निवृत्तश्चमूमुखे ।
वृतः सृञ्जय सैन्येन शैनेयेन च भारत ॥ ३८

द्रोणपुत्रे महेष्वासे इति क. ट. पाठः ॥ ३४ ॥

वध्यन्त एते समरे कौरवा निशितैः शरैः ।
भीमसेनेन कौन्तेय पाञ्चालैश्च महात्मभिः ॥ ३९
सेना हि धार्तराष्ट्रस्य विमुखा व्यद्रवद्रणात् ।
वेगेन भीमसेनस्य विहता विविधैः शरैः ॥ ४०
विपन्नसस्येव मही रुधिरेण समुक्षिता ।
भारती भरतश्रेष्ठ सेना कृपणदर्शना ॥ ४१
निवृत्तं पश्य कौन्तेय भीमसेनं युधांपतिम् ।
आशीविषमिव क्रुद्धं तस्माद्रवति भारती ॥ ४२
पीतरक्तासितसितास्ताराचन्द्रार्कमण्डिताः ।
पताका विप्रकीर्यन्ते छत्राण्येतानि चार्जुन ॥ ४३
सौवर्णा राजताश्चैव तैजसाश्च पृथग्विधाः ।
केतवोऽभिनिपात्यन्ते हस्त्यश्वं च प्रकीर्यते ॥ ४४
रथेभ्यः प्रपतन्त्येते रथिनो विगतासवः ।
नानावर्णैर्हता बाणैः पाञ्चालैरपलायिभिः ॥ ४५
निर्मनुष्यान्गजानश्वान्रथांश्चैव धनंजय ।
समाद्रवन्ति पाञ्चाला धार्तराष्ट्रांस्तरस्विनः ॥ ४६
विमृद्नन्ति नरव्याघ्रा भीमसेनबलाश्रयात् ।
बलं परेषां दुर्धर्ष त्यक्त्वा प्राणानरिंदम ॥ ४७
एते नर्दन्ति पाञ्चाला ध्मापयन्ति च वारिजान् ।
अभिद्रवन्ति च रणे मृद्नन्तः सायकैः परान् ॥ ४८
पश्य स्वर्गस्य माहात्म्यं पाञ्चाला हि पराक्रमात् ।
धार्तराष्ट्रान्विनिघ्नन्तो विशन्त्येते रथोत्तमान् ॥ ४९
[शस्त्रमाच्छिद्य शत्रूणां सायुधानां निरायुधाः ।
तेनैवैतानमोघास्त्रा निघ्नन्ति च नदन्ति च ॥ ५०
शिरांस्येतानि पात्यन्ते शत्रूणां बाहवोऽपि च ।
रथनागहया वीरा यशस्याः सर्व एव च ॥] ५१
सर्वतश्चाभिपन्नैषा धार्तराष्ट्री महाचमूः ।
त्यक्त्वा प्राणान्महेष्वासैः पाञ्चालैः परिपात्यते ॥
सुहृदश्च पराक्रान्ताः कृपकर्णादयो विभो ।
निवारणे महेष्वासाः पाञ्चालानां परंतप ॥ ५३
अनिवृत्तांश्च भीतांस्तान्धार्तराष्ट्रान्परंतप ।
धृष्टद्युम्नमुखा वीरा घ्नन्ति शत्रून्सहस्रशः ॥ ५४
रथाश्च विविधाः सर्वे निवृत्ते भरतर्षभे ।

द्विषष्टितमोऽध्याय. ॥ ६२ ॥

विवर्णमुखभूयिष्ठा धार्तराष्ट्री महाचमूः ॥ ५५
पश्य भीमेन नाराचैर्भिन्ना नागाः पतन्त्यमी ।
वज्रिवज्रहतानीव शिखराणि धराभृताम् ॥ ५६
भीमसेनस्य निर्विद्धा बाणैः सन्नतपर्वभिः ।
स्वान्यनीकानि मृद्नन्तो द्रवन्त्येते महागजाः ॥ ५७
'एते द्रवन्ति कुरवो भीमसेनभयार्दिताः ।
त्यक्त्वा रथान्गजांश्चैव हयांश्चैव सहस्रशः ॥ ५८
हस्त्यश्वरथपत्तीनां द्रवतां निःस्वनं शृणु ।
भीमसेनस्य निनदं द्रावयानस्य कौरवान् ॥ ५९
अभिजानामि भीमस्य सिंहनादं पुनःपुनः ।'
नदतः पाण्डवेयस्य संग्रामे जितकाशिनः ॥ ६०
एष नैषादिरभ्येति द्विपमुख्येन पाण्डवम् ।
विसृजंस्तोमरान्क्रुद्धो दण्डपाणिरिवान्तकः ॥ ६१
तस्य चैव भुजौ छिन्नौ भीमसेनेन गर्जतः ।
नागश्च ककरप्रख्यैर्नाराचैर्दशभिर्हतः ॥ ६२
हन्तैते पुनरायान्ति नागा ह्यन्ये प्रहारिणः ।
नीलाञ्जनचयप्रख्या महामात्रैरधिष्ठिताः ॥ ६३
शक्तितोमरसंघातैर्विनिघ्नन्तो वृकोदरम् ।
सप्तसप्त च नागस्था वैजयन्त्यश्च सध्वजाः ।
नवत्या निशितैर्बाणैश्छिन्नाः पार्थाग्रजेन ते ॥ ६४
दशभिर्दशभिश्चैको नाराचैर्निहतो गजः ॥ ६५
न चासौ धार्तराष्ट्राणां श्रूयते निनदस्तथा ।
पुरन्दरसमे क्रुद्धे निवृत्ते भरतर्षभे ॥ ६६
अक्षौहिण्यस्तथा तिस्रो धार्तराष्ट्रस्य संगताः ।
क्रुद्धेन भीमसेनेन नरसिंहेन वारिताः ॥ ६७
न शक्नुवन्ति वै पार्थं पार्थिवाः समुदीक्षितुम् ।
मध्यंदिनगतं सूर्यं यथा दुर्बलचक्षुषः ॥ ६८
एते भीमस्य संत्रस्ताः सिंहस्येवेतरे मृगाः ।
शरैः संत्रासिताः सङ्ख्ये न लभन्ते सुखं क्वचित् ६९
राधेयो बहुभिः सार्धमसौ गच्छति वेगितः ।
वर्धयित्वा तु भीरुं तं पार्श्वतो ह्यानयद्धनुः ।
तं पालयन्महाराजं धार्तराष्ट्रं बलान्वितः ॥ ७०
सञ्जय उवाच ।
एतच्छ्रुत्वा महाबाहुर्वासुदेवाद्धनञ्जयः ।
भीमसेनेन तत्कर्म कृतं दृष्ट्वा सुदुष्करम् ।
अर्जुनो व्यधमच्छिष्टान्संशप्तकगणान्बहून् ॥ ७१
ते वध्यमानाः पार्थेन संशप्तकगणाः प्रभो ।
शक्रस्यातिथितां गत्वा विशोका ह्यभवंस्तदा ॥ ७२
नारायणांस्तु गोपालान्व्यधमत्पाण्डुनन्दनः ।
उत्तमं वेगमास्थाय चण्डवायुर्घनानिव ॥ ७३
अन्वकीर्यन्त भीतास्ते तत्रतत्रैव भारत ।
लुलितांश्च ततः शूरानहनत्पुरुषोत्तमः ॥ ७४
पुनश्च पुरुषव्याघ्रः शरैः संनतपर्वभिः ।
जघान धार्तराष्ट्रस्य चतुर्विधबलां चमूम् ॥ ७५

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे द्विषष्टितमोऽध्यायः ॥ ६२ ॥

त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

रणाय राज्ञां द्वन्द्वीभावः ॥ १ ॥ कर्णेन शिखण्डिपराजयः ॥ २ ॥ धृष्टद्युम्नदुःशासनयोर्युद्धम् ॥ ३ ॥

धृतराष्ट्र उवाच ।
निवृत्ते भीमसेने च पाण्डवे च युधिष्ठिरे ।
वध्यमाने बले चापि मामके पाण्डुसृञ्जयैः ॥ १
द्रवमाणे बलौघे च निराक्रन्दे मुहुर्मुहुः ।
'अवशेषं न पश्यामि मम सैन्येषु सञ्जय ॥ २
अहो बत दशां प्राप्तो न हि शक्ष्यामि जीवितुम् ।
जयकाङ्क्षी कथं सूत पुत्राणामनिवर्तिनाम् ॥ ३
कथं जीवामि निहताञ्श्रुत्वा च मम सैनिकान् ।
बहुनाऽद्य किमुक्तेन दैवं तेषां परायणम् ॥' ४
मामकाः किमकुर्वन्त तन्ममाचक्ष्व सञ्जय ॥ ५
सञ्जय उवाच ।
दृष्ट्वा भीमं महाबाहुं तव पुत्रः प्रतापवान् ।
क्रोधरक्तेक्षणो राजन्भीमसेनमभिद्रवत् ॥ ६
'तिष्ठतिष्ठ पृथापुत्र पश्य मेऽद्य पराक्रमम् ।
अद्य त्वां प्रेषयिष्यामि यमस्य सदनं प्रति ।
इत्युक्त्वा प्रययौ कर्णो यत्र भीमो व्यवस्थितः ॥' ७

तावकं तु बलं दृष्ट्वा भीमसेनात्पराङ्मुखम् ।
यत्तेन महता कर्णः पर्यवस्थापयद्बली ॥ ८
व्यवस्थाप्य महाबाहुस्तव पुत्रस्य वाहिनीम् ।
प्रत्युद्ययौ तदा कर्णः पाण्डवान्युद्धदुर्मदान् ॥ ९
प्रत्युद्ययुश्च राधेयं पाण्डवानां महारथाः ।
धुन्वानाः कार्मुकाण्याजौ विक्षिपन्तश्च सायकान् ॥
भीमसेनः शिनेर्नप्ता शिखण्डी जनमेजयः ।
धृष्टद्युम्नश्च बलवान्सर्वे चापि प्रभद्रकाः ॥ ११
पाञ्चालानां नरव्याघ्राः समन्तात्तव वाहिनीम् ।
अभ्यद्रवन्त संक्रुद्धाः समरे जितकाशिनः ॥ १२
तथैव तावका राजन्पाण्डवानामनीकिनीम् ।
अभ्यद्रवन्त त्वरिता जिघांसन्तो महारथान् ॥१३
रथनागाश्वकलिलं पत्तिध्वजसमाकुलम् ।
बभूव पुरुषव्याघ्र सैन्यमद्भुतदर्शनम् ॥ १४
शिखण्डी तु ययौ कर्णं धृष्टद्युम्नः सुतं तव ।
दुःशासनं महाराज महासेनः समभ्ययात् ॥ १५
नकुलो वृषसेनं तु चित्रसेनं युधिष्ठिरः ।
उलूकं समरे राजन्सहदेवः समभ्ययात् ॥ १६
सात्यकिः शकुनिं चापि द्रौपदेयाश्च कौरवान् ।
अर्जुनं च रणे यत्तो द्रोणपुत्रो महारथः ॥ १७
युधामन्युं महेष्वासं गौतमोऽभ्यपतद्रणे ।
कृतवर्मा च बलवानुत्तमौजसमाद्रवत् ॥ १८
भीमसेनः क्रुरून्सर्वान्पुत्रांश्च तव मारिष ।
सहानीकान्महाबाहुरेक एव न्यवारयत् ॥ १९
शिखण्डी तु ततः कर्णं विचरन्तमभीतवत् ।
भीष्महन्ता महाराज वारयामास पत्रिभिः ॥ २०
प्रतिरुद्धस्ततः कर्णो रोषात्प्रस्फुरिताधरः ।
शिखण्डिनं त्रिभिर्बाणैर्भ्रुवोर्मध्येऽभ्यताडयत् २१
धारयंस्तु स तान्बाणाञ्शिखण्डी बहुशोभत ।
राजतः पर्वतो यद्वत्त्रिभिः शृङ्गैः समन्वितः ॥ २२
सोऽतिविद्धो महेष्वासः सूतपुत्रेण संयुगे ।
कर्णं विव्याध समरे नवत्या निशितैः शरैः ॥ २३
तस्य कर्णो हयान्हत्वा सारथिं च त्रिभिः शरैः ।
उन्ममाथ ध्वजं चास्य क्षुरप्रेण महारथः ॥ २४
हताश्वात्तु ततो यानादवप्लुत्य महारथः ।
शक्तिं चिक्षेप कर्णाय संक्रुद्धः शत्रुतापनः ॥ २५
तां छित्त्वा समरे कर्णस्त्रिभिर्भारत सायकैः ।
शिखण्डिनमथाविध्यन्नवभिर्निशितैः शरैः ॥ २६
कर्णचापच्युतान्बाणान्वर्जयंस्तु नरोत्तमः ।
अपयातस्ततस्तूर्णं शिखण्डी भृशविक्षतः ॥ २७
ततः कर्णो महाराज पाण्डुसैन्यान्यशातयत् ।
तूलराशिं समासाद्य यथा वायुर्महाबलः ॥ २८
धृष्टद्युम्नो महाराज तव पुत्रेण पीडितः ।
दुःशासनं त्रिभिर्बाणैः प्रत्यविध्यत्स्तनान्तरे ॥ २९
तस्य दुःशासनो बाहुं सव्यं विव्याध मारिष ।
स तेन रुक्मपुङ्खेन भल्लेन नतपर्वणा ॥ ३०
धृष्टद्युम्नस्तु निर्विद्धः शरं घोरमममर्षणः ।
दुःशासनाय संक्रुद्धः प्रेषयामास भारत ॥ ३१
आपतन्तं महावेगं धृष्टद्युम्नसमीरितम् ।
शरैश्चिच्छेद पुत्रस्ते त्रिभिरेव विशांपते ॥ ३२
अथापरैः षोडशभिर्भल्लैः कनकभूषणैः ।
धृष्टद्युम्नं समासाद्य बाह्वोरुरसि चार्पयत् ॥ ३३
ततः स पार्षतः क्रुद्धो धनुश्चिच्छेद मारिष ।
क्षुरप्रेण सुतीक्ष्णेन तत उच्चुक्रुशुर्जनाः ॥ ३४
अथान्यद्धनुरादाय पुत्रस्ते प्रहसन्निव ।
धृष्टद्युम्नं शरव्रातैः समन्तात्पर्यवारयत् ॥ ३५
तव पुत्रस्य ते दृष्ट्वा विक्रमं सुमहात्मनः ।
व्यस्मयन्त रणे योधाः सिद्धाश्चाप्सरसस्तथा ॥ ३६
धृष्टद्युम्नं तु पश्याम घटमानं महाबलम् ।
दुःशासनेन संरुद्धं सिंहेनेव महागजम् ॥ ३७

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
ततः सरथनागाश्वाः पाञ्चालाः पाण्डुसृञ्जयाः ।
सेनापतिं परीप्सन्तो रुरुधुस्तनयं तव ॥ १
ततः प्रववृते युद्धं तावकानां परैः सह ।
घोरं प्राणभृतां काले भीमरूपं परंतप ॥ २
नकुलो वृषसेनं तु विद्ध्वा पञ्चभिरायसैः ।
पितुः समीपे तिष्ठन्तं त्रिभिरन्यैरविध्यत ॥ ३
नकुलं तु ततः शूरो वृषसेनो हसन्निव ।
नाराचेन सुतीक्ष्णेन विव्याध हृदये भृशम् ॥ ४
सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्शन ।
शत्रुं विव्याध विंशत्या सूतं चैवास्य सप्तभिः ॥ ५
ततः शरसहस्रेण तावुभौ पुरुषर्षभौ ।
अन्योन्यमाच्छादयतां तवाभज्यत वाहिनी ॥ ६
स दृष्ट्वा प्रद्रुतां सेनां धार्तराष्ट्रस्य सूतजः ।
निवारयामास बलादनुपत्य विशांपते ॥ ७
'एतस्मिन्नन्तरे युद्धं कष्टमासीद्विशांपते ।'
निवृत्ते तु ततः सैन्ये नकुलः कौरवान्ययौ ॥ ८
कर्णपुत्रस्तु समरे हित्वा नकुलमेव तु ।
जुगोप चक्रं त्वरितो राधेयस्यैव मारिष ॥ ९
उलूकस्तु रणे क्रुद्धः सहदेवेन मारिष ।
'निवारितः शरशतैः क्रुद्धेन रणमूर्धनि ॥ १०
तस्याश्वांश्चतुरो हत्वा सहदेवः प्रतापवान् ।
सारथिं प्रेषयामास यमस्य सदनं प्रति ॥ ११
उलूकस्तु ततो यानादवप्लुत्य विशांपते ।
त्रिगर्तानां बलं तूर्णं जगाम पितृनन्दनः ॥ १२
सात्यकिः शकुनिं विद्ध्वा विंशत्या निशितैः शरैः ।
ध्वजं चिच्छेद भल्लेन सौबलस्य हसन्निव ॥ १३
सौबलस्तस्य समरे क्रुद्धो राजन्प्रतापवान् ।
विदार्य कवचं भूयो ध्वजं चिच्छेद काञ्चनम् १४
तथैनं निशितैर्बाणैः सात्यकिः प्रत्यविध्यत ।
सारथिं च महाराज त्रिभिरेव समार्पयत् ॥ १५
अथास्य वाहांस्त्वरितः शरैर्निन्ये यमक्षयम् ।
ततोऽवप्लुत्य सहसा शकुनिर्भरतर्षभ ॥ १६
आरुरोह रथं तूर्णमुलूकस्य महात्मनः ।
अपोवाहाथ शीघ्रं स शैनेयाद्युद्धशालिनः ॥ १७
सात्यकिस्तु रणे राजंस्तावकानामनीकिनीम् ।
अभिदुद्राव वेगेन ततोऽनीकमभज्यत ॥ १८
शैनेयशरसंछन्नं तव सैन्यं विशांपते ।
भेजे दश दिशस्तूर्णं न्यपतच्च गतासुवत् ॥ १९
भीमसेनं तव सुतो वारयामास संयुगे ॥ २०
तं तु भीमो मुहूर्तेन व्यश्वसूतरथध्वजम् ।
चक्रे लोकेश्वरं तत्र तेनातुष्यन्त वै जनाः ॥ २१
ततोऽपायान्नृपस्तस्माद्भीमसेनभयार्दितः ।
कुरुसैन्यं ततः सर्वं भीमसेनमुपाद्रवत् ।
तत्र नादो महानासीद्भीमसेनं जिघांसताम् ॥ २२
युधामन्युः कृपं विद्ध्वा धनुरस्याशु चिच्छदे ।
अथान्यद्धनुरादाय कृपः शस्त्रभृतां वरः ।
युधामन्योर्ध्वजं सूतं छत्रं चापातयत्क्षितौ ॥ २३
ततोऽपायाद्रथेनैव युधामन्युर्महारथः ॥ २४
उत्तमौजाश्च हार्दिक्यं भीमं भीमपराक्रमम् ।
छादयामास सहसा मेघो वृष्ट्येव पर्वतम् ॥ २५
तद्युद्धमासीत्सुमहद्घोररूपं परंतप ।
तादृशं न मया युद्धं दृष्टपूर्वं विशांपते ॥ २६
कृतवर्मा ततो राजन्नुत्तमौजसमाहवे ।
हृदि विव्याध सहसा रथोपस्थ उपाविशत् ॥ २७
सारथिस्तमपोवाह रथेन रथिनां वरम् ।
ततस्तु सात्वतो राजन्पाण्डुसैन्यमभिद्रवत् ॥ २८
[दुःशासनः सौबलश्च गजानीकेन पाण्डवम् ।
महता परिवार्यैव क्षुद्रकैरभ्यताडयत् ॥ २९
ततो भीमः शरशतैर्दुर्योधनममर्षणम् ।
विमुखीकृत्य तरसा गजानीकमुपाद्रवत् ॥ ३०
तमापतन्तं सहसा गजानीकं वृकोदरः ।
दृष्ट्वैव सुभृशं क्रुद्धो दिव्यमस्त्रमुदैरयत् ॥ ३१
गजैर्गजानभ्यहनद्वज्रेणेन्द्र इवासुरान् ॥ ३२

ततोऽन्तरिक्षं बाणौघैः शलभैरिव पादपम् ।
छादयामास समरे गजान्निघ्नन्वृकोदरः ॥ ३३
ततः कुञ्जरयूथानि समेतानि सहस्रशः ।
व्यधमत्तरसा भीमो मेघसङ्घानिवानिलः ॥ ३४
सुवर्णजालापिहिता मणिजालैश्च कुञ्जराः ।
रेजुरभ्यधिकं संख्ये विद्युत्वन्त इवाम्बुदाः ॥ ३५
ते वध्यमाना भीमेन गजा राजन्विदुद्रुवुः ।
केचिद्विभिन्नहृदयाः कुञ्जरा न्यपतन्भुवि ॥ ३६
पतितैर्निपतद्भिश्च गजैर्हेमविभूषितैः ।
अशोभत मही तत्र विशीर्णैरिव पर्वतैः ॥ ३७
दीप्ताभै रत्नवद्भिश्च पतितैर्गजयोधिभिः ।
रराज भूमिः पतितैः क्षीणपुण्यैरिव ग्रहैः ॥ ३८
ततो भिन्नकटा नागा भिन्नकुम्भकरास्तथा ।
दुद्रुवुः शतशः संख्ये भीमसेनशराहताः ॥ ३९
केचिद्रुमन्तो रुधिरं भयार्ताः पर्वतोपमाः ।
व्यद्रवञ्छरविद्धाङ्गा धातुचित्रा इवाचलाः ॥४०
महाभुजगसङ्काशौ चन्दनागुरुरूषितौ ।
अपश्यं भीमसेनस्य धनुर्विक्षिपतो भुजौ ॥ ४१
तस्य ज्यातलनिर्घोषं श्रुत्वाशनिसमस्वनम् ।
विमुञ्चन्तः शकृन्मूत्रं गजाः प्रादुद्रुवुर्भृशम् ॥ ४२
भीमसेनस्य तत्कर्म राजन्नेकस्य धीमतः ।
निघ्नतः सर्वभूतानि रुद्रस्येव च निर्बभौ ॥] ४३

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
ततः श्वेताश्वसंयुक्ते नारायणसमाहिते ।
तिष्ठत्रथवरे श्रीमानर्जुनः समपद्यत ॥ १
तद्बलं नृपतिश्रेष्ठ तावकं विजयो रणे ।
व्यक्षोभयदुदीर्णाश्वं महोदधिमिवानिलः ॥ २
दुर्योधनस्तव सुतः प्रमत्ते श्वेतवाहने ।
अभ्येत्य सहसा क्रुद्धः सैन्यार्धेनाभिसंवृतः ॥ ३
पर्यवारयदायान्तं युधिष्ठिरममर्षणम् ।
क्षुरप्राणां त्रिसप्तत्या ततोऽविध्यत पाण्डवम् ॥ ४
अक्रुध्यत भृशं तत्र कुन्तीपुत्रो युधिष्ठिरः ।
स भल्लांस्त्रिंशतस्तूर्णं तव पुत्रे न्यवेशयत् ॥ ५
ततो धावन्त कौरव्या जिघृक्षन्तो युधिष्ठिरम् ॥ ६
दुष्टभावान्पराञ्ज्ञात्वा समवेता महारथाः ।
आजग्मुस्तं परीप्सन्तः कुन्तीपुत्रं युधिष्ठिरम् ॥ ७
'सञ्जय उवाच ।
युधिष्ठिरश्चित्रसेनं शरवर्षैरवाकिरत् ।
चित्रसेनस्तु कौन्तेयं संक्रुद्धः समवारयत् ॥ ८
मुहूर्ताद्विमुखीकृत्य चित्रसेनं स धर्मराट् ।
तावकं सैन्यमभ्यघ्नत्समन्तान्निशितैः शरैः ॥ ९
तावका हि महाबाहो दुर्योधनपुरोगमाः ।
युधिष्ठिरं जिघृक्षन्तः सर्वसैन्यं समाक्षिपन् ॥ १०
दृष्टप्रभावांस्तान्मत्वा समवेतान्महारथान् ।
आजग्मुः संपरीप्सन्तः पाण्डवेयं युधिष्ठिरम् ॥' ११
नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः ।
अक्षौहिण्या परिवृतास्तेऽभ्यधावन्युधिष्ठिरम् ॥ १२
भीमसेनश्च नाराचैर्मृद्नंस्तव महारथान् ।
अभ्यधावदभिप्रेप्सू राजानं शत्रुभिर्वृतम् ॥ १३
तांस्तु सर्वान्महेष्वासान्कर्णो वैकर्तनो वृषा ।
शरवर्षेण महता प्रत्यवारयदागतान् ॥ १४
शरौघान्विसृजन्तस्ते प्रेरयन्तश्च कुञ्जरान् ।
न शेकुर्यत्नवन्तोऽपि राधेयं प्रतिवीक्षितुम् ॥ १५
तांश्च सर्वान्महेष्वासान्सर्वशस्त्रविशारदान् ।
महता शरवर्षेण राधेयः प्रत्यवारयत् ॥ १६
दुर्योधनं च विंशत्या नाराचानां कृती बली ।
अविध्यच्चूर्णमभ्येत्य सहदेवो महीपतिम् ॥ १७
स विद्धः सहदेवेन रराज बलसंनिधौ ।
प्रभिन्न इव मातङ्गो रुधिरेण परिप्लुतः ॥ १८
दृष्ट्वा तव सुतं तत्र गाढविद्धं सुतेजनैः ।

अभ्यधावद्दृढं क्रुद्धो राधेयो रथिनां वरः ॥ १९
दुर्योधनं तथा दृष्ट्वा शीघ्रमस्त्रमुदीर्य सः ।
अवधीत्पाण्डवानीकं पाञ्चालांश्चैव मारिष ॥ २०
ततो यौधिष्ठिरं सैन्यं वध्यमानं महात्मना ।
सहसा प्राद्रवद्राजन्सूतपुत्रशरार्दितम् ॥ २१
विविधा विशिखास्तत्र संपतन्ति परस्परम् ।
भल्लाः पुङ्खसमाश्लिष्टाः सूतपुत्रधनुश्च्युताः ॥ २२
अन्तरिक्षे शरौघाणां पततां च परस्परम् ।
संघर्षेण महाराज पावकः समजायत ॥ २३
ततो दशदिशः कर्णः शलभैरिव यायिभिः ।
अभ्यघ्नंस्तरसा राजञ्शरैः परशरीरगैः ॥ २४
रक्तचन्दनसंदिग्धौ मणिहेमविभूषितौ ।
बाहू व्यत्यक्षिपत्कर्णः परमास्त्रं विदर्शयन् ॥ २५
ततः सर्वा दिशो राजन्सायकैर्विप्रमोहयन् ।
अपीडयद्भृशं कर्णो धर्मराजं युधिष्ठिरम् ॥ २६
ततः क्रुद्धो महाराज धर्मपुत्रो युधिष्ठिरः ।
निशितैरिषुभिः कर्णं पञ्चाशद्भिः समार्पयत् ॥ २७
[बाणान्धकारमभवत्तद्युद्धं घोरदर्शनम् ।
हाहाकारो महानासीत्तावकानां विशांपते ॥ २८
वध्यमाने तदा सैन्ये धर्मपुत्रेण मारिष ।
सायकैर्विविधैस्तीक्ष्णैः कङ्कपत्रैः शिलाशितैः ।
भल्लैरनेकैर्विविधैः शक्त्यृष्टिमुसलैरपि ॥ २९
यत्र यत्र स धर्मात्मा दृष्टिं व्यसर्जयत् ।
तत्र तत्र व्यशीर्यन्त तावका भरतर्षभ ॥ ३०
कर्णोऽपि भृशसंक्रुद्धो धर्मराजं युधिष्ठिरम् ।
नाराचैरर्धचन्द्रैश्च वत्सदन्तैश्च संयुगे ॥ ३१
अमर्षी क्रोधनश्चैव रोषप्रस्फुरिताननः ।
सायकैरप्रमेयात्मा युधिष्ठिरमभिद्रवत् ॥ ३२
युधिष्ठिरश्चापि स तं स्वर्णपुङ्खैः शितैः शरैः ॥] ३३
प्रहसन्निव तं कर्णः कङ्कपत्रैः शिलाशितैः ।
उरस्यविध्यद्राजानं कुन्तीपुत्रं युधिष्ठिरम् ॥ ३४
स पीडितो भृशं तेन धर्मराजो युधिष्ठिरः ।
उपविश्य रथोपस्थे सूतं याहीत्यनोदयत् ॥ ३५
अक्रोशन्त ततः सर्वे धार्तराष्ट्राः सराजकाः ।
गृह्णीध्वमिति राजानमभ्यधावन्त सर्वशः ॥ ३६
ततः शताः सप्तदश केकयानां प्रहारिणाम् ।
पञ्चालैः सहिता राजन्धार्तराष्ट्रान्यवारयन् ॥ ३७
तस्मिन्सुतुमुले युद्धे वर्तमाने जनक्षये ।
दुर्योधनश्च भीमश्च समेयातां महाबलौ ॥ ३८

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

षट्षष्टितमोऽध्यायः ॥ ६६ ॥

कर्णबाणपीडितस्य युधिष्ठिरस्य विश्रमाय स्वशिविरप्रवेश ॥ १ ॥

सञ्जय उवाच ।
कर्णोऽपि शरजालेन केकयानां महारथान् ।
व्यधमत्परमेष्वासानग्रानीके व्यवस्थितान् ॥ १
तेषां प्रयतमानानां राधेयस्य निवारणे ।
रथान्पञ्चशतान्कर्णः प्राहिणोद्यमसादनम् ॥ २
अविषह्यतमं दृष्ट्वा राधेयं युधि योधिनः ।
भीमसेनमुपागच्छन्कर्णबाणप्रपीडिताः ॥ ३
रथानीकं विदार्यैव शरै राजन्ननेकधा ।
कर्ण एकरथेनैव युधिष्ठिरमुपाद्रवत् ॥ ४
सेनानिवेशं गच्छन्तं मार्गणैर्भृशपीडितम् ।
यमयोर्मध्यगं वीरं शनैर्यान्तं विचेतसम् ॥ ५
स समासाद्य राजानं दुर्योधनहितेप्सया ।
सूतपुत्रस्त्रिभिस्तीक्ष्णैर्विव्याध परमेषुभिः ॥ ६
तथैव राजा राधेयं प्रत्यविध्यत्स्तनान्तरे ।
शरैस्त्रिभिश्च यन्तारं चतुर्भिश्चतुरो हयान् ॥ ७
चक्ररक्षौ नृपसुतौ माद्रीपुत्रौ परंतपौ ।
तावप्यधावतां कर्णं राजानं मा वधीदिति ॥ ८
तौ पृथक्शरवर्षाभ्यां राधेयं समवर्षताम् ।

नकुलः सहदेवश्च परमं यत्नमास्थितौ ॥ ९
तथैव तौ प्रत्यविध्यत्सूतपुत्रः प्रतापवान् ।
भल्लाभ्यां शितधाराभ्यां महात्मानावरिन्दमौ १०
दन्तवर्णास्तु राधेयो निजघान मनोजवान् ।
युधिष्ठिरस्य संग्रामे कालवालान्हयोत्तमान् ॥ ११
ततोऽपरेण भल्लेन शिरस्त्राणमपातयत् ।
कौन्तेयस्य महेष्वासः ग्रहसन्निव सूतजः ॥ १२
तथैव नकुलस्यापि हयान्हत्वा महारथः ।
ततोऽपरेण भल्लेन भृशं तीक्ष्णेन भारत ।
धनुश्चिच्छेद वीरस्य माद्रीपुत्रस्य धीमतः ॥ १३
तौ हताश्वौ हतरथौ पाण्डवौ भृशविक्षतौ ।
भ्रातरावारुरुहतुः सहदेवरथं तदा ॥ १४
तौ दृष्ट्वा मातुलस्तत्र विरथौ परवीरहा ।
अभ्यभाषत राधेयं मद्रराजोऽनुकम्पया ॥ १५
मार्गितव्यस्त्वया कर्ण कुन्तीपुत्रो धनंजयः ।
अतस्त्वं धर्मराजेन किमर्थमिह युध्यसे ॥ १६
[क्षीणशस्त्रास्त्रकवचः क्षीणबाणो विबाणधिः ।
श्रान्तसारथिवाहश्च च्छन्नोऽस्त्रैररिभिस्तथा ।
पार्थमासाद्य राधेय उपहास्यो भविष्यसि ॥]१७
तथापि कर्णः संरब्धो युधिष्ठिरमपीडयत् ।
शरैस्तीक्ष्णैर्महावीर्यैर्माद्रीपुत्रौ च पाण्डवौ ॥ १८
ततः शल्यः ग्रहस्येदं कर्णं पुनरुवाच ह ।
रथस्थमतिसंरब्धं युधिष्ठिरवधे स्थितम् ॥ १९
यदर्थं धार्तराष्ट्रेण सततं मानितो भवान् ।
तं पार्थं जहि राधेय किं ते हत्वा युधिष्ठिरम् ।
'हते यस्मिन्ध्रुवं पार्थः सर्वाञ्जेष्यति नो रथान् २०
तस्मिन्हि धार्तराष्ट्रस्य निहते तु ध्रुवो जयः ।
ध्वजोऽसौ दृश्यते तस्य रोचमानोऽग्निमानिव ।
सारो ह्येष महाबाहो किं ते हत्वा युधिष्ठिरम् ॥' २१
शङ्खयोर्ध्मातयोः शब्दः सुमहानेष कृष्णयोः ।
श्रूयते चापघोषश्च प्रावृषीवाम्बुदस्य ह ॥ २२
असौ निघ्नन्रथोदारानर्जुनः शरवृष्टिभिः ।
सर्वा ग्रसति नः सेनां कर्ण पश्यैनमाहवे ॥ २३
पृष्ठरक्षौ च शूरस्य युधामन्यूत्तमौजसौ ॥ २४
उत्तरं चास्य वै शूरश्चक्रं रक्षति सात्यकिः ।
धृष्टद्युम्नस्तथा चास्य चक्रं रक्षति दक्षिणम् ॥ २५
भीमसेनश्च वै राज्ञा धार्तराष्ट्रेण युध्यते ।
यथा न हन्यात्तं भीमः सर्वेषां नोऽद्य पश्यताम् ।
कुरु राधेय वै राजा यथा मुच्येत तत्तथा ॥ २६
पश्यैनं भीमसेनेन ग्रस्तमाहवशोभिना ।
यदि नामाद्य मुच्येत विस्रयः सुमहान्भवेत् ॥ २७
परित्राह्येनमभ्येत्य संशयं परमं गतम् ।
किं नु माद्रीसुतौ हत्वा राजानं वा युधिष्ठिरम् २८
इति शल्यवचः श्रुत्वा राधेयः पृथिवीपते ।
दृष्ट्वा दुर्योधनं चैव भीमग्रस्तं महाहवे ॥ २९
राजगृध्नुर्भृशं चैव शल्यवाक्यप्रचोदितः ।
अजातशत्रुमुत्सृज्य माद्रीपुत्रौ च पाण्डवौ ॥३०
तव पुत्रं परित्रातुमभ्यधावत वीर्यवान् ।
मद्रराजप्रणुदितैरश्वैराकाशगैरिव ॥ ३१
गते कर्णे तु कौन्तेयः पाण्डुपुत्रो युधिष्ठिरः ।
अपायाज्जवनैरश्वैः सहदेवस्य मारिष ॥ ३२
[ताभ्यां स सहितस्तूर्णं व्रीडन्निव नरेश्वरः ।]
प्राप्य सेनानिवेशं स्वं मार्गणैर्भृशविक्षतः ॥ ३३
अवतीर्य रथात्तूर्णमाविशच्छयनं शुभम् ।
अपेतशल्यो राजा तु हृच्छल्येनाभिपीडितः॥३४
सोऽब्रवीद्भ्रातरौ राजा माद्रीपुत्रौ महारथौ ।
गच्छन्त त्वरितौ वीरौ यत्र भीमो व्यवस्थितः॥३५
'ततस्ते पाण्डवाः सर्वे समाभाष्य परस्परम् ।
अनीकं भीमसेनस्य पाण्डवावभ्यगच्छताम् ।'
जीमूत इव नर्दंस्तु युध्यते स वृकोदरः ॥ ३६
ततोऽन्यं रथमास्थाय नकुलो रथपुङ्गवः ।
सहदेवश्च तेजस्वी भ्रातरौ शत्रुकर्शनौ ॥ ३७
तुरगैरग्र्यरंहोभिर्यत्र भीमस्तरस्विनौ ।
अनीकैः सहितौ तत्र भ्रातरौ समवस्थितौ ॥ ३८

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे षट्षष्टितमोऽध्यायः ॥ ६६ ॥

सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

पार्थेनाश्वत्थाम्नि पराजिते कर्णेन भार्गवास्त्रप्रयोगात्पाण्डवसेनापीडनम् ॥ १ ॥

सञ्जय उवाच ।
द्रौणिस्तु रथवंशेन महता परिवारितः ।
अपतत्सहसा राजन्यत्र पार्थो व्यवस्थितः ॥ १
तमापतन्तं सहसा शूरः शौरिसहायवान् ।
दधार समरे पार्थो वेलेव मकरालयम् ॥ २
ततः क्रुद्धो महाराज द्रोणपुत्रः प्रतापवान् ।
अर्जुनं वासुदेवं च च्छादयामास सायकैः ॥ ३
अवच्छन्नौ ततः कृष्णौ दृष्ट्वा तत्र महारथाः ।
विस्मयं परमं गत्वा प्रैक्षन्त कुरवस्तदा ॥ ४
अर्जुनस्तु ततो दिव्यमस्त्रं चक्रे हसन्निव ।
तदस्त्रं वारयामास ब्राह्मणो युधि भारत ॥ ५
यद्यद्धि व्याक्षिपद्युद्धे फल्गुनोऽस्त्रं जिघांसया ।
तत्तदस्त्रैर्महेष्वासो द्रोणपुत्रो जघान ह ॥ ६
अस्त्रयुद्धे महाराज वर्तमाने महाभये ।
अपश्याम रणे द्रौणिं व्यात्ताननमिवान्तकम् ॥ ७
स दिशः प्रदिशश्चैव च्छादयित्वा ह्याजिह्मगैः ।
वासुदेवं त्रिभिर्बाणैरविध्यद्दक्षिणे भुजे ॥ ८
ततोऽर्जुनो रथान्सर्वान्हत्वा तस्य पदानुगान् ।
चकार समरे भूमिं शोणितौघपरिप्लुताम् ।
[सर्वलोकवहां रौद्रां परलोकवहां नदीम् ॥] ९
सरथा रथिनः पेतुः पार्थचापच्युतैः शरैः ॥ १०
[द्रौणेरपहतान्सङ्ख्ये ददृशुः स च तां तथा ।
प्रावर्तयन्महाघोरां नदीं परवहां तदा ॥ ११
तयोस्तु व्याकुले युद्धे द्रौणेः पार्थस्य दारुणे ।
अमर्यादं योधयन्तः पर्यधावन्त पृष्ठतः ॥ १२
रथैर्हताश्वसूतैश्च हतारोहैश्च वाजिभिः ।
द्विरदैश्च हतारोहैर्महामात्रैर्हतद्विपैः ॥ १३
पार्थेन समरे राजन्कृतो घोरो जनक्षयः ।
निहता रथिनः पेतुः पार्थचापच्युतैः शरैः ॥] १४
हयाश्च पर्यधावन्त मुक्तयोक्रास्ततस्ततः ।

तदृष्ट्वा कर्म पार्थस्य द्रौणिराहवशोभिनः ॥ १५
अर्जुनं जयतां श्रेष्ठं त्वरितोऽभ्येत्य वीर्यवान् ।
विधुन्वानो महच्चापं कार्तस्वरविभूषितम् ॥ १६
अवाकिरत्ततो द्रौणिः समन्तान्निशितैः शरैः ।
भूयोऽर्जुनं महाराज द्रौणिरायम्य पत्रिणा ॥ १७
वक्षोदेशे भृशं पार्थं ताडयामास निर्दयम् ।
सोऽतिविद्धो रणे तेन द्रोणपुत्रेण भारत ॥ १८
गाण्डीवधन्वा प्रसभं शरवर्षैरुदारधीः ।
संछाद्य समरे द्रौणिं चिच्छेदास्य च कार्मुकम् ॥ १९
स च्छिन्नधन्वा परिघं वज्रस्पर्शसमं युधि ।
आदाय चिक्षेप तदा द्रोणपुत्रः किरीटिने ॥ २०
तमापन्ततं परिघं जाम्बूनदपरिष्कृतम् ।
चिच्छेद सहसा राजन्प्रहसन्निव पाण्डवः ॥ २१
स पपात तदा भूमौ निकृत्तः पार्थसायकैः ।
विकीर्णः पर्वतो राजन्यथा वज्रेण ताडितः ॥ २२
ततः क्रुद्धो महाराज द्रोणपुत्रो महारथः ।
ऐन्द्रेण चास्त्रवेगेन बीभत्सुं समवाकिरत् ॥ २३

तस्येन्द्रजालाववतं समीक्ष्य
पार्थो राजन्गाण्डिवमाददे सः ।
ऐन्द्रं जालं प्रत्यहरत्तरस्वी
वरास्त्रमादाय महेन्द्रसृष्टम् ॥ २४
विदार्य तज्जालमथेन्द्रमुक्तं
पार्थस्ततो द्रौणिरथं क्षणेन ।
प्रच्छादयामास ततोऽभ्युपेत्य
द्रौणिस्तदा पार्थशराभिभूतः ॥ २५
विगाह्य तां पाण्डवबाणवृष्टिं
शरैः परं नाम ततः प्रकाश्य ।
शतेन कृष्णं सहसाभ्यविध्य-
त्रिभिः शतैरर्जुनं क्षुद्रकाणाम् ॥ २६
ततोऽर्जुनः सायकानां शतेन
गुरोः सुतं मर्मसु निर्बिभेद ।

लोका इति शेष ॥ ११ ॥

अश्वांश्च सूतं च तथा धनुर्ज्या-
मवाकिरत्पश्यतां तावकानाम् ॥ २७
स विद्ध्वा मर्मसु द्रौणिं पाण्डवः परवीरहा ।
सारथिं चास्य भल्लेन रथनीडादपातयत् ॥ २८
स संगृह्य स्वयं वाहान्कृष्णौ प्राच्छदयच्छरैः ।
तत्राद्भुतमपश्याम द्रौणेराशु पराक्रमम् ॥ २९
संयच्छंस्तुरगान्यच्च फल्गुनं चाप्ययोधयत् ।
तदस्य समरे राजन्सर्वभूतान्यपूजयन् ॥ ३०
'तेनास्य समरे योधास्तुष्टुवुः सर्व एव ते ।
यदा निजगृहे पार्थो द्रोणपुत्रेण धन्विना ॥ ३१
तदा प्रहस्य बीभत्सुर्द्रोणपुत्रस्य संयुगे ।
क्षिप्रं रश्मीनथाश्वानां क्षुरप्रैश्चिच्छिदे जयः ॥ ३२
प्राद्रवंस्तुरगास्तस्य शरवेगप्रपीडिताः ।
ततोऽभून्निनदो घोरस्तव सैन्यस्य भारत ॥ ३३
पाण्डवास्तु जयं लब्ध्वा तव सैन्यं समाद्रवन् ।
समन्तान्निशितान्बाणान्विमुञ्चन्तो जयैषिणः ३४
तावकी चतुरङ्गैषा पाण्डवैस्तु महाचमूः ।
पुनःपुनरथो वीरैः प्रभग्ना जितकाशिभिः ॥ ३५
पश्यतां ते महाराज पुत्राणां चित्रयोधिनाम् ।
शकुनेः सौबलेयस्य कर्णस्य च विशांपते ॥ ३६
वार्यमाणा महासेना पुत्रैस्तव जनेश्वर ।
न चातिष्ठत संग्रामे पीड्यमाना समन्ततः ॥ ३७
ततो योधैर्महाराज पलायद्भिः समन्ततः ।
अभवद्व्याकुलं भीतं पुत्राणां ते महद्बलम् ॥ ३८
तिष्ठतिष्ठेति सततं सूतपुत्रस्य जल्पतः ।
नावतिष्ठति सा सेना वध्यमाना महात्मभिः ॥ ३९
अथोत्कुष्टं महाराज पाण्डवैर्जितकाशिभिः ।
धार्तराष्ट्रबलं दृष्ट्वा विद्रुतं वै समन्ततः ॥ ४०
ततो दुर्योधनः कर्णमब्रवीत्प्रणयादिव ।
पश्य कर्ण महासेनां पाण्डवैरर्दितां भृशम् ॥ ४१
त्वयि तिष्ठति संत्रासात्समन्तात्प्रपलायते ।
एतज्ज्ञात्वा महाबाहो कुरु प्राप्तमरिंदम ॥ ४२
सहस्राणि च योधानां त्वामेव पुरुषोत्तम ।
क्रोशन्ते समरे वीर द्राव्यमाणानि पाण्डवैः ॥ ४३

सञ्जय उवाच ।
एतच्छ्रुत्वा तु राधेयो दुर्योधनवचो महत् ।
मद्रराजमिदं वाक्यमब्रवीत्प्रहसन्निव ॥ ४४
पश्य मे भुजयोर्वीर्यमस्त्राणां च जनेश्वर ।
अद्य हन्मि रणे सर्वान्पाञ्चालान्पाण्डुभिः सह ४५
वाहयाश्वान्नरव्याघ्र मद्राधिप न संशयः ।
एवमुक्त्वा महाराज सूतपुत्रः प्रतापवान् ॥ ४६
प्रगृह्य विजयं वीरो धनुःश्रेष्ठं पुरातनम् ।
सज्यं कृत्वा महाराज संमृज्य च पुनःपुनः ॥ ४७
सन्निवार्य च तान्योधान्सत्येन शपथेन च ।
प्रायोजयदमेयात्मा भार्गवास्त्रं महाबलः ॥ ४८
तस्माद्राजन्सहस्राणि प्रयुतान्यर्बुदानि च ।
कोटिशश्च शरास्तीक्ष्णा निरगच्छन्महामृधे ॥ ४९
ज्वलितैस्तैः शरैर्घोरैः कङ्कबर्हिणवाजितैः ।
संछन्ना पाण्डवी सेना न प्राज्ञायत किंचन ॥ ५०
हाहाकारो महानासीत्पाण्डवानां विशांपते ।
पीडितानां बलवता भार्गवास्त्रेण संयुगे ॥ ५१
निपतद्भिर्गजै राजन्नश्वैश्चापि सहस्रशः ।
रथैश्चापि नरव्याघ्र नरैश्चैव समन्ततः ॥ ५२
प्राकम्पत मही राजन्निहतैस्तैः समन्ततः ।
व्याकुलं सर्वमभवत्पाण्डवानां महद्बलम् ॥ ५३
कर्णस्त्वेको युधां श्रेष्ठो विधूम इव पावकः ।
ददृश्यत्रून्नरव्याघ्रः शुशुभे स परंतपः ॥ ५४
ते वध्यमानाः कर्णेन पाञ्चालाश्चेदिभिः सह ।
तत्र तत्र व्यमुह्यन्त वनदाहे यथा द्विपाः ॥ ५५
चुक्रुशुश्च नरव्याघ्र यथाप्राणं नरोत्तमाः ।
तेषां तु क्रोशतां दीनं भीतानां रणमूर्धनि ॥ ५६
धावतां च ततो राजंस्त्रस्तानां च समन्ततः ।
आर्तनादो बभूवात्र भूतानामिव संप्लवे ॥ ५७
वध्यमानांस्तु तान्दृष्ट्वा सूतपुत्रेण मारिष ॥
वित्रेसुः सर्वभूतानि तिर्यग्योनिगतान्यपि ॥ ५८
ते वध्यमानाः समरे सूतपुत्रेण सृञ्जयाः ।
अर्जुनं वासुदेवं च क्रोशन्ति च मुहुर्मुहुः ।
प्रेतराजपुरे यद्वत्प्रेतराजं विचेतसः ॥ ५९
श्रुत्वा तु निनदं तेषां वध्यतां कर्णसायकैः ।

अथाब्रवीद्वासुदेवं कुन्तीपुत्रो धनञ्जयः।
भार्गवास्त्रं महाघोरं दृष्ट्वा तत्र समीरितम् ॥ ६०
पश्य कृष्ण महाबाहो भार्गवास्त्रस्य विक्रमम्।
नैतदस्त्रं हि समरे शक्यं हन्तुं कथंचन ॥ ६१
मूतपुत्रं च संरब्धं पश्य कृष्ण महारणे।
अन्तकप्रतिमं वीर्ये कुर्वाणं कर्म दारुणम् ॥ ६२
अभीक्ष्णं चोदयन्नश्वान्प्रेक्षते मां मुहुर्मुहुः।
नच शक्ष्यामि कर्णस्य संयुगेऽहं पलायितुम् ॥ ६३
जीवन्प्राप्नोति पुरुषः सङ्ख्ये जयपराजयौ।
मृतस्य तु हृषीकेश भङ्ग एव कुतो जयः ॥ ६४
एष कर्णो रणे भाति मध्याह्न इव भास्करः।
निवर्तय रथं कृष्ण जीवन्भद्राणि पश्यति ॥ ६५

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

कर्णबाणव्यथापनोदनाय युधिष्ठिरं शिबिरगतं विज्ञाय शत्रुनिग्रहे भीमनियोजनपूर्वकमर्जुनेन सह श्रीकृष्णस्य तत्समीप प्रति गमनम् ॥ १ ॥

सञ्जय उवाच।
ततो जनार्दनः श्रुत्वा तस्य वाक्यं विशांपते।
रथेनापययौ क्षिप्रं सङ्ग्रामादिति भारत ॥ १
प्रत्यनीकमवस्थाप्य भीमं भीमपराक्रमम्।
अलं विषहितुं ह्येष कुरूणां संप्रपश्यताम् ॥ २
कर्णं च समरे राजन्ग्राहयिष्यञ्श्रमं प्रति।
विश्रमार्थं च कौरव्य पार्थस्य च महात्मनः।
अपयातो रणाद्वीरो राजानं द्रष्टुमेव च ॥ ३
अर्जुनं चाब्रवीत्कृष्णो भृशं राजा परिक्षतः।
तमाश्वास्य कुरुश्रेष्ठ ततः कर्णं हनिष्यसि ॥ ४
ततो धनंजयः श्रुत्वा राजानं शल्यपीडितम्।
याहियाहिति बहुशो वासुदेवमचोदयत्।
राजानं प्रति वार्ष्णेय दूयते मे दृढं मनः ॥ ५
स चोद्यमानः पार्थेन केशिघ्नो वृष्णिनन्दनः।
रथेनापययौ क्षिप्रं सङ्ग्रामाद्घोरदर्शनात् ॥ ६
गच्छन्नेव तु कौन्तेयो धर्मराजदिदृक्षया।
सैन्यमालोकयामास नापश्यत्तत्र चाग्रजम् ॥ ७
युद्धं कृत्वा तु कौन्तेयो द्रोणपुत्रेण भारत।
दुःसहं वज्रिणा सङ्ख्ये पराजित्य गुरोः सुतम् ॥ ८
द्रौणिं पराजित्य ततोग्रधन्वा
कृत्वा महद्दुष्करं शूरकर्म।
आलोकयामास ततः स्वसैन्यं
धनञ्जयः शत्रुभिरप्रधृष्यः ॥ ९
संयुध्यमानान्पृतनामुखस्था-
ञ्शूरः शूरान्हर्षयन्सव्यसाची।
पूर्वापदानैः प्रथितैः प्रशंस-
न्स्थितांश्चकारात्मरथाननीके ॥ १०
अपश्यमानस्तु किरीटमाली
युधिष्ठिरं भ्रातरमाजमीढम्।
उवाच भीमं तरसाभ्युपेत्य
राज्ञः प्रवृत्तिस्त्विह कुत्र चेति ॥ ११
भीमसेन उवाच।
अपयात इतो राजा धर्मपुत्रो युधिष्ठिरः।
कर्णबाणाभितप्ताङ्गो यदि जीवेत्कथंचन ॥ १२
अर्जुन उवाच।
तस्माद्भवाञ्शीघ्रमितः प्रयातु
ज्ञातुं प्रवृत्तिं पुरुषर्षभस्य।
नूनं स विद्धोऽतिभृशं पृषत्कैः
कर्णेन राजा शिबिरं गतोऽसौ ॥ १३
यः संप्रहारैर्युधि संप्रवृत्ते
द्रोणेन विद्धोऽतिभृशं तरस्वी।
तस्थौ स तत्रापि जयप्रतीक्षो
द्रोणेन यावन्न हतः किलासीत् ॥ १४

ततोग्रधन्वा विस्तारितोग्रचाप. ॥ ९ ॥

उवाच त पप्रच्छ ॥ ११ ॥

स संशयं गमितः पाण्डवाग्र्यः
सङ्ख्येऽद्य कर्णेन महानुभावः ।
ज्ञातुं प्रयाह्याशु तमद्य भीम
ह्यास्याम्यहं शत्रुगणान्निरुध्य ॥ १५

भीमसेन उवाच ।
त्वमेव जानीहि महानुभाव
राज्ञः प्रवृत्तिं भरतर्षभस्य ।
अहं हि यद्यर्जुन याम्यमित्रा
वदन्ति मां भीत इति प्रवीराः ॥ १६
ततोऽब्रवीदर्जुनो भीमसेनं
संशप्तकाः प्रत्यनीकस्थिता मे ।
एतानहत्वाद्य मया न शक्य-
मितोपयातुं रिपुसङ्घमध्यात् ॥ १७
अथाब्रवीदर्जुनं भीमसेनः
स्ववीर्यमासाद्य कुरुप्रवीर ।
संशप्तकान्प्रतियोत्स्यामि सङ्ख्ये
सर्वानहं याहि धनञ्जय त्वम् ॥ १८
तद्भीमसेनस्य वचो निशम्य
धनञ्जयो भ्रातुरमित्रमध्ये ।
द्रष्टुं कुरुश्रेष्ठमभिप्रयास्य-
न्प्रोवाच वृष्णिप्रवरं तदानीम् ॥ १९

अर्जुन उवाच ।
'राजानं प्रति वार्ष्णेय दूयते मे दृढं मनः ।'
चोदयाश्वान्हृषीकेश विहायैतद्बलार्णवम् ।
अजातशत्रुं राजानं द्रष्टुमिच्छामि केशव ॥ २०

सञ्जय उवाच ।
'तं रथं चोदयामास बीभत्सोर्वचनाद्धरिः ॥' २१
ततो हयान्सर्वदाशार्हमुख्यः
प्रचोदयन्भीममुवाच चेदम् ।
नैतच्चित्रं तव कर्माद्य भीम
यास्यावहे जहि पार्थारिसङ्घान् ॥ २२
ततो ययौ हृषीकेशो यत्र राजा युधिष्ठिरः ।
शीघ्राच्छीघ्रतरो राजन्वाजिभिर्गरुडोपमैः ॥ २३
प्रत्यनीके त्ववस्थाप्य भीमसेनमरिंदमम् ।
संदिश्य चैनं राजेन्द्र युद्धं प्रति वृकोदरम् ॥ २४
ततस्तु गत्वा पुरुषप्रवीरौ
राजानमासाद्य शयानमेकम् ।
रथादुभौ प्रत्यवरुह्य तस्या-
द्ववन्दतुर्धर्मराजस्य पादौ ॥ २५
'इत्येवमुपसंगृह्य उभौ तु प्राञ्जली स्थितौ ।
शस्त्रक्षतौ महाराज रुधिरेण समुक्षितौ ।
निहत्य वाहिनीं तुभ्यमपयातौ रणाजिरात् ॥' २६
तं दृष्ट्वा पुरुषव्याघ्रं क्षेमिणं पुरुषर्षभम् ।
मुदाभ्यनन्दतां कृष्णावश्विनाविव वासवम् ॥ २७
तावभ्यनन्दद्राजापि विवस्वानश्विनाविव ।
हते महासुरे जम्भे शक्रविष्णू यथा गुरुः ॥ २८
मन्यमानो हतं कर्णं प्रीतः परपुरंजयः ।
'स भूत्वा पुरुषव्याघ्रो राजा तत्र युधिष्ठिरः ।'
हर्षगद्गदया वाचा प्रीतः प्राह परंतपः ॥ २९

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

युधिष्ठिरेण कर्णशरविक्षतस्वात्मनो दिदृक्षया स्वशिबिरमुपागतौ कृष्णार्जुनौ दृष्ट्वा पार्थेन राधेयस्य वधभ्रमेण पार्थस्य प्रशंसनम् ॥ १ ॥

सञ्जय उवाच ।
[अथोपयातौ पृथुलोहिताक्षौ
शराचिताङ्गौ रुधिरप्रदिग्धौ ।
समीक्ष्य सेनाग्रनरप्रवीरौ
युधिष्ठिरो वाक्यमिदं बभाषे ॥] १
ततो युधिष्ठिरो दृष्ट्वा सहितौ केशवार्जुनौ ।

प्रत्यनीके शत्रुसैन्यसमीपे ॥ २४ ॥

अष्टषष्टितमोऽध्याय. ॥ ६८ ॥

हतमाधिरथिं मेने सञ्जये गाण्डीवधन्वना ॥ २
तावभ्यनन्दत्कौन्तेयः साम्ना परमवल्गुना ।
स्मितपूर्वमभित्रघ्नं पूजयन्भरतर्षभ ॥ ३
युधिष्ठिर उवाच ।
स्वागतं देवकीपुत्र स्वागतं ते धनञ्जय ।
प्रियं मे दर्शनं बाढं युवयोर्नरसिंहयोः ॥ ४
अरिष्टयोरक्षतयोः कर्णं हत्वा महारथम् ।
आशीविषसमं युद्धे सर्वशस्त्रविशारदम् ॥ ५
अग्रगं धार्तराष्ट्राणां सर्वेषां शर्म वर्म च ।
रक्षितं वृषसेनेन सुषेणेन च धन्विना ॥ ६
अनुज्ञातं महावीर्यं रामेणास्त्रे सुदुर्जयम् ।
अज्यं सर्वस्य लोकस्य रथिनं लोकविश्रुतम् ॥ ७
त्रातारं धार्तराष्ट्राणां गन्तारं वाहिनीमुखे ।
हन्तारं परसैन्यानाममित्रगणमर्दनम् ॥ ८
दुर्योधनहिते युक्तमस्मदुःखाय चोद्यतम् ।
अप्रधृष्यं महायुद्धे देवैरपि सवासवैः ॥ ९
अनलानिलयोस्तुल्यं तेजसा च बलेन च ।
पातालमिव गम्भीरं सुहृदां नन्दिवर्धनम् ॥ १०
अन्तकं मम मित्राणां हत्वा कर्णं महामृधे ।
दिष्ट्या युवामनुप्राप्तौ हत्वाऽसुरमिवामरौ ॥ ११
तेन युद्धमभीतेन मयाऽद्याप्यच्युतार्जुनौ ।
कृतं घोरं महाबाहू धृष्टद्युम्नस्य पश्यतः ।
अन्तकेनेव क्रुद्धेन प्रजाः सर्वा जिघांसता ॥ १२
तेन केतुश्च मे च्छिन्नो हतौ च पार्ष्णिसारथी ।
हतवाहः कृतश्चास्मि युयुधानस्य पश्यतः ॥ १३
धृष्टद्युम्नस्य यमयोर्वीरस्य च शिखण्डिनः ।
पश्यतां द्रौपदेयानां शतद्रोश्च महात्मनः ॥ १४
एताञ्जित्वा महावीर्यः कर्णः शत्रुगणान्बहून् ।
जितवान्मां महाबाहो यतमानो महारणे ॥ १५
अनुसृत्य च मां युद्धे परुषाण्युक्तवान्बहु ।
तत्र तत्र युधां श्रेष्ठ परिभूय न संशयः ॥ १६
भीमसेनप्रभावात्तु यजीवामि धनञ्जय ।
बहुनात्र किमुक्तेन हते सोढुं समुत्सहे ॥ १७
त्रयोदशाहं वर्षाणि यस्माद्भीतो धनञ्जय ।
न स्म निद्रां लभे रात्रौ न चाहनि सुखं क्वचित् ॥ १८
तस्य द्वेषेण संयुक्तः परिदह्ये धनञ्जय ।
आत्मनो मरणं जानन्वाध्रीणस इव द्विजः ॥ १९
तस्यायमगमत्कालश्चिन्तयानस्य मे चिरम् ।
कथं कर्णो मया शक्यो युद्धे क्षपयितुं भवेत् ॥ २०
जाग्रत्स्वपंश्च कौन्तेय कर्णमेव स्मराम्यहम् ।
पश्यामि तत्रतत्रैव कर्णभूतमिदं जगत् ॥ २१
यत्र यत्र हि गच्छामि कर्णाद्भीतो धनञ्जय ।
तत्र तत्र हि पश्यामि कर्णमेवाग्रतः स्थितम् ॥ २२
सोऽहं तेनैव वीरेण समरेष्वपलायिना ।
सहयः सरथः पार्थ जित्वा जीवन्विसर्जितः ॥ २३
को नु मे जीवितेनार्थो राज्येनार्थो भवेत्पुनः ।
ममैवं विक्षतस्याद्य कर्णेनाहवशोभिना ॥ २४
न प्राप्तपूर्वं यद्भीष्मात्कृपाद्द्रोणाच्च संयुगे ।
तत्प्राप्तमद्य मे युद्धे सूतपुत्रान्महारथात् ॥ २५
स त्वां पृच्छामि कौन्तेय यथा न कुशलस्तथा ।
तन्ममाचक्ष्व कात्स्न्र्येन यथा कर्णो हतस्त्वया २६
शक्रतुल्यबलो युद्धे यमतुल्यः पराक्रमे ।
रामतुल्यस्तथास्त्रेषु स कथं ते निषूदितः ॥ २७
महारथसमाख्यातः सर्वयुद्धविशारदः ।
धनुर्धराणां प्रवरः सर्वेषां वै सदार्जुन ॥ २८
पूजितो धृतराष्ट्रेण सपुत्रेण विशांपते ।
त्वदर्थमेव राधेयः स कथं निहतस्त्वया ॥ २९
धार्तराष्ट्रस्य योद्धारः सर्व एव सदार्जुन ।
तव मृत्युं रणे कर्ण मन्यन्ते पुरुषर्षभ ॥ ३०
स त्वया पुरुषव्याघ्र कथं युद्धे निषूदितः ।
तन्ममाचक्ष्व कौन्तेय यथा कर्णो हतस्त्वया ॥ ३१
सोत्सेधमस्य च शिरः पश्यतां सुहृदां हृतम् ।
त्वया पुरुषशार्दूल सिंहेनेव यथा रुरोः ॥ ३२

अरिष्टयो शुभयो ॥ ५॥ अनुज्ञात अनुगृहीतम् ॥ ७ ॥ अनलानिलयोरिति क्रमात्तेजोबलाभ्याम् ॥ १० ॥ अपसव्य कृतश्चास्मि इति ख घ. पाठ ॥ १३ ॥ नाह त सोढुमुत्सहे इति क. ङ. पाठ. ॥ १७ ॥

कृष्णग्रीवो रक्तशिरा श्वेतपक्षो विहगम । स वै वाध्रीणस प्रोक्तो याज्ञिकै पितृकर्मणीति प्राज्ञ. । वाध्रीणस इव द्विप इति झ पाठ ॥ १९ ॥ यथा न· कुशल तथा इति क. ङ. पाठः ॥ २६ ॥

सर्वा दिशः पर्यपतत्त्वदर्थं
त्वां सूतपुत्रः समरे परीप्सन् ।
दित्सन्नृणां शकटं रत्नपूर्णं
कथं त्वयासौ निहतोऽद्य कर्णः ॥ ३३

त्वया रणे निहतः सूतपुत्रः
कच्चिच्छेते भूमितले दुरात्मा ।
कच्चित्कृतं मे परमं त्वयाद्य
प्रियं रणे सूतपुत्रं निहत्य ॥ ३४

सर्वा दिशः पर्यपतत्त्वदर्थं
मुदान्वितो गर्वितः सूतपुत्रः ।
स शूरमानी समरे समेत्य
कच्चित्त्वया निहतः सूतपुत्रः ॥ ३५

राज्यं परं हस्तिगवाश्वयुक्तं
रथं दित्सुर्यः परेभ्यस्त्वदर्थे ।
त्वया रणे स्पर्धते यः स पापः
कच्चित्त्वया निहतः पापबुद्धिः ॥ ३६

योऽसौ नित्यं शौर्यमदेन मत्तो
विकत्थते संसदि कौरवाणाम् ।
प्रीत्यर्थं वै तात सुयोधनस्य
कच्चित्स पापो निहतस्त्वयाद्य ॥ ३७

कच्चित्समागम्य धनुःप्रमुक्तै-
स्त्वत्प्रेषितैर्लोहमयैर्विहंगैः ।
शेते भिन्नः पांसुषु सूतपुत्रः
कच्चिद्भग्नौ धार्तराष्ट्रस्य बाहू ॥ ३८

योऽसौ सदा श्लाघते राजमध्ये
दुर्योधनं हर्षयन्दर्पयुक्तः ।
हन्ताऽस्मि सर्वानिति पाण्डुपुत्रा-
नहं हन्ता फल्गुनस्येति मोहात् ॥ ३९

कच्चिद्वचोऽस्य वितथं त्वया कृतं
यत्तत्प्रियामवदत्तात कर्णः ।
सभामध्ये रूक्षमनेकरूपं
धिक्पाण्डवानपतिस्त्वं हि कृष्णे ॥ ४०

कच्चिद्भुवं शत्रुरयं महात्मा
ह्यधारयद्बादश यः समास्तु ।
कर्णो व्रतं घोरममित्रसाहो
दुर्योधनस्यार्थनिविष्टबुद्धिः ॥ ४१

पादौ न धावे यावदहं न हन्मि
धनञ्जयं समरेषूग्रवेगम् ।
कच्चिद्रणे फल्गुन तं निहत्य
कच्चिद्व्रतं तस्य भग्नं त्वयाऽद्य ॥ ४२

योऽसौ कृष्णामब्रवीदुष्टबुद्धिः
कर्णः सभायां कुरुवीरमध्ये ।
किं पाण्डवांस्त्वं न जहासि कृष्णे
सुदुर्बलान्पतितान्हीनसत्वान् ॥ ४३

योऽसौ कर्णः प्रत्यजानात्त्वदर्थे
नाहं हत्वा सह कृष्णेन पार्थम् ।
इहोपयातेति स पापबुद्धिः
कच्चिच्छेते शरसंभिन्नगात्रः ॥ ४४

कच्चित्सङ्ग्रामो विदितो वै तवायं
समागमे सृञ्जय कौरवाणाम् ।
येनावस्थामीदृशीं प्रापितोऽहं
कच्चित्त्वया सोऽद्य हतो दुरात्मा ॥ ४५

कच्चित्त्वया तस्य सुमन्दबुद्धे-
र्गाण्डीवमुक्तैर्विशिखैर्ज्वलद्भिः ।
सकुण्डलं भानुमदुत्तमाङ्गं
कायात्प्रकृत्तं युधि सव्यसाचिन् ॥ ४६

यत्तन्मया बाणसमर्पितेन
ध्यातोऽसि कर्णस्य वधाय वीर ।
तन्मे त्वया कच्चिदमोघमद्य
ध्यानं कृतं कर्णनिपातनेन ॥ ४७

यदर्पपूर्णः स सुयोधनोऽस्मा-
न्दिधक्षते कर्णसमाश्रयेण ।
कच्चित्त्वया सोऽद्य समाश्रयोऽस्य
भग्नः पराक्रम्य सुयोधनस्य ॥ ४८

विहङ्गैर्बाणै ॥ ३८ ॥ श्लाघते आत्मानमिति शेष. ॥ ३९ ॥ बाणेन्य. समर्पितेन कर्णबाणैरत्यन्त प्रविद्धेनेत्यर्थः ॥ ४७ ॥

एकोनसप्ततितमोऽध्याय ॥ ६९ ॥

यो नः पुरा षण्ढतिलानवोच-
त्सभामध्ये कौरवाणां समक्षम् ।
स दुर्मतिः कच्चिदुपेत्य सङ्ख्ये
त्वया हतः सूतपुत्रोऽत्यमर्षी ॥ ४९

यः प्राहिणोत्सूतपुत्रो दुरात्मा
कृष्णां जितां सौबलेहानयेति ।
स मन्दबुद्धिर्निहतः प्रसह्य
वैकर्तनस्त्वद्य कच्चिन्महात्मन् ॥ ५०

यः शस्त्रभृच्छ्रेष्ठतमं पृथिव्यां
पितामहं व्याक्षिपदल्पचेताः ।
सङ्ख्यायमानोऽर्धरथः स कच्चि-
त्त्वया हतोऽद्याधिरथिर्महात्मन् ॥ ५१

अमर्षजं निकृतिसमीरणेरितं
हृदि स्थितं ज्वलनमिमं सदा मम ।
हतो मया सोऽद्य समेत्य कर्ण
इति ब्रुवन्प्रशमयसेऽद्य फल्गुन ॥ ५२

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

सप्ततितमोऽध्यायः ॥ ७० ॥

अर्जुनेन स्वयुद्धानुवादपूर्वकं युधिष्ठिरंप्रति कर्णवधप्रतिज्ञानम् ॥ १ ॥

सञ्जय उवाच ।
तद्धर्मशीलस्य वचो निशम्य
राज्ञः क्रुद्धस्यातिरथो महात्मा ।
उवाच दुर्मर्षमदीनसत्वो
युधिष्ठिरं जिष्णुरनन्तवीर्यः ॥ १

द्रोणं हतं पार्थ कर्णो विदित्वा
भिन्नां नावमिवात्यगाधे कुरूणाम् ।
संमुह्यमानान्धार्तराष्ट्रान्विदित्वा
निरुत्साहांश्च विजये परेषाम् ॥ २

सोदर्यवत्त्वरितोऽमितौजा
उत्तारयिष्यन्धृतराष्ट्रस्य पुत्रान् ।
रणे रथेनाधिरथिर्महात्मा
ततो हि मां त्वरितः सोऽभ्यधावत् ॥ ३

संशप्तकैर्युध्यमानस्य मेऽद्य
सेनाग्रयायी कुरुसैन्यस्य राजन् ।
आशीविषाभान्विकिरञ्शरौघा-
न्द्रौणिः पुरस्तात्सहसाध्यतिष्ठत् ॥ ४

स मे दृष्ट्वा शूरतमो ध्वजाग्रं
समादिशद्रथसङ्घाननेकान् ।
तेषामहं पञ्चशतं निहत्य
आसादयं द्रोणपुत्रं नदन्तम् ॥ ५

स द्रोणपुत्रः सदृशं महात्मा
मामप्यरौत्सीत्तदनीकमध्ये ।
किरञ्शरौघान्बहुरूपान्विचित्रा-
न्स्वातीगतः शुक्र इवातिवर्षन् ॥ ६

स मे शरान्सर्वतः कङ्कपत्रा-
नवासृजद्वै पृथिवीप्रकाशान् ।
निवार्य तूर्णं परमाजिमध्ये
ततोऽपि मां बाणगणैः समार्पयत् ॥ ७

आकर्षणं वापि विकृष्य मुक्तं
न दृश्यते तस्य महारथस्य ।
न सन्दधानः कुत आददानो
न व्याक्षिपन्न विकर्षन्विमुञ्चन् ॥ ८

सव्येन वा यदि वा दक्षिणेन
न ज्ञायते कतरेणास्यतीति ।
आचार्यवत्समरे पर्यवर्त-
न्महच्चित्रं दर्शयन्सर्वतः स्म ॥ ९

दृष्टीविषं चासुहरं परेषां
सर्वा दिशः पूरयानं शरौघैः ।
अलातचक्रप्रतिमं महात्मनः
सदा नतं कार्मुकं ब्रह्मबन्धोः ॥ १०

ततोऽपरान्बाणगणाननेका-
नाकर्णपूर्णायतविप्रमुक्तान् ।

ससर्ज शीघ्रास्त्रबलेन वीर-
स्तोयं यथा प्रावृषि कालमेघः ॥ ११
आविध्यन्मां पञ्चभिर्द्रोणपुत्रः
शितैः शरैः पञ्चभिर्वासुदेवम् ।
अभ्यघ्नं बाणैस्तमहं सुधारै-
र्निमेषमात्रेण सुवर्णपुङ्खैः ॥ १२
स निर्विद्धो विरथो द्रोणपुत्रो
रथानीकं चाधिरथेर्विवेश ।
मयाभिभूतान्स्वरथप्रवर्हा-
नस्त्रं च पश्यन्नुधिरप्रदिग्धम् ॥ १३
ततोऽभिभूतं युधि वीक्ष्य सैन्यं
विध्वस्तयोधं द्रुतनागयूथम् ।
पञ्चाशता रथमुख्यैः समेतः
कर्णस्त्वरन्नभ्यपतत्प्रमाथी ॥ १४
तान्सूदयित्वाऽहमपास्य कर्णं
द्रष्टुं भवन्तं त्वरयोपयातः ।
सर्वे पाञ्चाला ह्युद्विजन्ते स्म कर्णं
दृष्ट्वा गावः केसरिणं यथैव ॥ १५
मृत्योरास्यं व्यात्तमिवाभिपद्य
प्रभद्रकाः कर्णमासाद्य सर्वे ।
यास्यामि तांस्तारयिष्यन्बलौघा-
द्दिष्ट्या भवान्स्वस्तिमान्पार्थ दृष्टः ॥ १६
हनिष्येऽहं भारत सूतपुत्र-
मस्मिन्सङ्ग्रामे यदि दृश्यतेऽद्य ।
आयाहि पश्याद्य युयुत्समानौ
मां सूतपुत्रं च धृतौ रणाय ॥ १७
महाझषस्येव मुखं प्रपन्नाः
प्रभद्रकाः कर्णमुखं प्रपन्नाः ।
षट्साहस्रा भारत राजपुत्राः
स्वर्गाय लोकाय रणे निमग्नाः ॥ १८
तानद्य यास्यामि रणाद्विमोक्तुं
सर्वात्मना सूतपुत्रं च हन्तुम् ॥ १९
अथ प्रवीरेण महानुभाव
द्विषत्सैन्यं निर्दहन्विस्तरेण ।
समेत्याहं सूतपुत्रेण सङ्ख्ये
वज्रीव वृत्रेण नरेन्द्रमुख्य ॥ २०
एवं गते किंच मयाऽद्य शक्यं
कार्यं कर्तुं निग्रहे सूतजस्य ।
तथैव राज्ञश्च सुयोधनस्य
ये चापि मां योद्धुकामाः समेताः ॥ २१
कर्णं न चेदद्य निहन्मि राज-
न्सबान्धवं युध्यमानं प्रसह्य ।
प्रतिश्रुत्याऽकुर्वतां या गतिर्वै
कष्टां यायां तामहं राजसिंह ॥ २२
आमन्त्रये त्वां ब्रूहि रणे जयं मे
पुरा भीमं धार्तराष्ट्रा ग्रसन्ति ।
सौतिं हनिष्यामि नरेन्द्रसिंह
सैन्यं तथा शत्रुगणांश्च सर्वान् ॥ २३

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे सप्ततितमोऽध्यायः ॥ ७० ॥

एकसप्ततितमोऽध्यायः ॥ ७१ ॥

कर्णस्यामारणज्ञानाद्दुष्टेन युधिष्ठिरेण अर्जुनंप्रति गर्हणपूर्वकं कृष्णकरे गाण्डीवदानचोदना ॥ १ ॥

सञ्जय उवाच ।
वैकर्तनं कुशलिनं निशम्य
क्रुद्धः पार्थः फल्गुनस्यामितौजाः ।
धनञ्जयं वाक्यमुवाच राजा
युधिष्ठिरः कर्णशराभितप्तः ॥ १
इमां च वसतिं हित्वा भयात्कर्णेन फल्गुन ।
अहं च भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ॥ २
वासुदेवेन सहिता वयं कर्णेन निर्जिताः ।
पुनरेव वनं गत्वा तपश्चर्यां च कुर्महे ।
अथवा धार्तराष्ट्राणां परिचर्यां चरामहे ॥ ३
इत्येवमुक्त्वा बीभत्सुं रोषात्संरक्तलोचनः ।
अब्रवीत्पुनरेवात्र धर्मराजो युधिष्ठिरः ॥ ४

इदं यदि द्वैतवने तु सूक्तं
कर्णे नियोद्धुं न सहे नृपेति ।
वयं ततः प्राप्तकालं यथाव-
त्कृत्वाऽभ्युपेक्षाम तथैव राज्यम् ॥ ५
मयि प्रतिश्रुत्य वधं हि तस्य
बलस्य चार्धस्य तथैव युद्धे ।
आनीय मां शत्रुमध्ये स कस्मा-
त्समुन्नाम्य स्थण्डिले प्रत्यपिंष्ठाः ॥ ६
अन्वास्य सत्येन यदात्थ पार्थ
सत्यं शपन्वासुदेवेन सार्धम् ।
तन्नः सत्यमफलं ह्यकार्षीः
फलस्य काले चाच्छिन्नः पुष्पवृक्षम् ॥ ७
प्रच्छादितस्त्वं बालिश दुर्यशोभि-
रनर्थवाक्योऽस्यर्जुन नैव साधुः ।
त्यक्त्वा भीमं सर्वभीमेषु भीमं
संयोजितस्त्वं सूतपुत्रं निहन्तुम् ॥ ८
यत्तद्वृथा वागुवाचान्तरिक्षे
सप्ताह्नि जाते त्वयि मन्दबुद्धौ ।
अपापीयान्वासवात्कुन्तिजातो
बहून्संग्रामानयमेव जेता ॥ ९
अयं जेता पाण्डवो देवसङ्घान्
सर्वाणि भूतान्यपि चोत्तमौजाः ।
अयं जेता मद्रकलिङ्गजाता-
न्दैत्यांश्च रक्षांसि समागतानि ॥ १०
भूमिं च सर्वां निखिलेन जेता
कुरूंश्च जेता स्वगणांश्च जेता ।
अस्मात्परो नो भविता धनुर्धरो
नैष्यन्न भूतः कश्चिदेनं विजेता ॥ ११
इच्छन्नयं सर्वभूतानि कुर्या-
द्वशी वशे सर्वसमाप्तविद्यः ।
कान्त्या शशाङ्कस्य जवेन वायोः
स्थैर्येण मेरोः क्षमया पृथिव्याः ॥ १२
अग्नेश्च तापे धनदस्य लक्ष्म्या
शौर्येण शक्रस्य जयेन विष्णोः ।
तुल्यो महात्मा तव कुन्ति पुत्रो
जातोऽदितेर्विष्णुरिवामितौजाः ॥ १३
स्वेषां जयाय द्विषतां वधाय
जातो महात्मा तव नन्दिकर्ता ।
इत्यन्तरिक्षे शतशृङ्गमूर्ध्नि
तपस्विनां शृण्वतां वागुवाच ॥ १४
एवंविधस्त्वं न च भूतस्तथाद्य
देवाश्च नूनमनृतं वदन्ति ॥ १५
तथा परेषामृषिसत्तमानां
श्रुत्वा गिरः पूजयतां सदा त्वाम् ।
न सन्नतिं यामि सुयोधनस्य
न त्वां जानाम्याधिरथेर्भयार्तम् ॥ १६
त्वष्ट्रा कृतं वाहमकूजनाक्षं
शुभं समास्थाय कपिध्वजं तम् ।
खड्गं गृहीत्वा हेमचित्रावनद्धं
धनुर्वरं गाण्डिवं तालमात्रम् ।
त्वं वासुदेवेनोह्यमानः कथं नु
कर्णाद्भीतो व्यपयातोऽसि पार्थ ॥ १७
पूर्वं यदुक्तं हि सुयोधनेन
न फल्गुनः प्रमुखे स्थास्यतीति ।
कर्णस्य युद्धे हि महाबलस्य
मौर्ख्यात्तु तन्नावबुद्धं मयाऽसीत् ॥ १८
तेनाद्य तप्ये भृशमप्रमेयं
यन्मित्रवर्गो नरकं प्रविष्टः ।
तदैव वाच्योऽस्मि ननु त्वयाऽहं
न योत्स्येऽहं सूतपुत्रं कथंचित् ॥ १९
ततो नाहं सृञ्जयान्केकयांश्च
समानयेयं सुहृदो रणाय ॥ २०
एवं गते किं च मयाऽद्य शक्यं
कार्यं कर्तुं निग्रहे सूतजस्य ।
तथैव राज्ञश्च सुयोधनस्य
ये वापि मां योद्धुकामाः समेताः ॥ २१
धिगस्तु मज्जीवितमद्य कृष्ण
योऽहं वशं सूतपुत्रस्य यातः ।

मध्ये कुरूणां ससुयोधनानां
ये चाप्यन्ये योद्धुकामाः समेताः ॥ २२
एकः स मे भीमसेनोऽद्य नाथो
येनाभिपन्नोऽस्मि रणे महाभये ।
विमोच्य मां चापि रुषान्वितस्ततः
शरेण तीक्ष्णेन विभेद कर्णम् ॥ २३
त्यक्त्वा प्राणान्समरे भीमसेन-
श्चके युद्धं कुरुमुख्यैः समेतैः ।
गदाग्रहस्तो रुधिरोक्षिताङ्ग-
श्चरन्रणे काल इवान्तकाले ॥ २४
असौ हि भीमस्य महानिनादो
मुहुर्मुहुः श्रूयते धार्तराष्ट्रैः ।
यदि स्म जीवेत्समरे निहन्ता
महारथानां प्रवरो नरोत्तमः ॥ २५
तवाभिमन्युस्तनयोऽद्य पार्थ
न चास्मि गन्ता समरे पराभवम् ।
अथापि जीवेत्समरे घटोत्कच-
स्तथाऽपि नाहं समरे पराङ्मुखः ॥ २६
भीमस्य पुत्रः समराग्रयायी
महास्त्रविच्चापि तवानुरूपः ।
यं तं स्मासाद्य रिपोर्बलं नो
निमीलिताक्षं भयविप्लुतं भवेत् ॥ २७
चकार योऽसौ निशि युद्धमेक-
स्त्यक्त्वा रणं यस्य भयाद्रवन्ते ॥ २८
स चेत्समासाद्य महानुभावः
कर्णं रणे बाणगणैः प्रमोह्य ।
धैर्ये स्थितेनापि च सूतजेन
शक्त्या हतो वासवदत्तया तया ॥ २९
ममैव भाग्यानि पुरा कृतानि
पापानि नूनं फलवन्ति युद्धे ।
तृणं च कृत्वा समरे भवन्तं
ततोऽहमेवं निकृतो दुरात्मना ।
वैकर्तनेनैव तथा कृतोऽहं
यथा ह्यशक्तः क्रियते स्ववान्धवः ॥ ३०
आपद्गतं यश्च नरो विमोक्षये-
त्स बान्धवः स्नेहयुतः सुहृच्च ।
एवं पुराणा ऋषयो वदन्ति
धर्मः सदा सद्भिरनुष्ठितश्च ॥ ३१
खड्गं बिभ्रज्जातरूपत्सरुं च
धनुर्वेदं गाण्डिवं तालमात्रम् ।
स केशवेनोह्यमानः कथं नु
कर्णात्पार्थस्त्वमपैतुं समैषीः ॥ ३२
स गाण्डीवं केशवाय प्रदाय
यन्ता भवेस्त्वं यदि केशवस्य ।
ततस्तरेत्केशवः कर्णमुग्रं
मरुत्सखो वृत्रमिवाप्तवज्रः ॥ ३३
मासेऽपतिष्यो यदि पञ्चमे त्वं
न वा गर्भो यद्यभवः पृथायाः ।
मत्तः श्रेयान्राजपुत्रोऽभविष्य-
न्न ते यशः फल्गुन इत्यपेयात् ॥ ३४

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे एकसप्ततितमोऽध्यायः ॥ ७१ ॥

द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

युधिष्ठिरवधोद्यतमर्जुनंप्रति कृष्णेन तत्कारणप्रश्ने तेन तन्निवेदनम् ॥ १ ॥ कृष्णेन वधप्रतिनिधित्वेन युधिष्ठिराधिक्षेप-विधानम् ॥ २ ॥

सञ्जय उवाच ।
युधिष्ठिरेणैवमुक्तः कौन्तेयः श्वेतवाहनः ।
असिं जग्राह संक्रुद्धो जिघांसुर्भरतर्षभम् ॥ १
तस्य कोपं समाज्ञाय चित्तज्ञः केशवस्तदा ।
उवाच किमिदं खड्गं गृह्णास्यर्जुन शंस मे ॥ २
नेह पश्यामि योद्धव्यं त्वया किंचिद्धनञ्जय ।

नेहागता धार्तराष्ट्राः सर्वे भीमेन वारिताः ॥ ३
उपागतोऽसि कौन्तेय राजा द्रष्टव्य इत्यसौ ।
स राजा भवता दृष्टः कुशली च युधिष्ठिरः ॥ ४
तं दृष्ट्वा नृपशार्दूलं शार्दूलसमविक्रमम् ।
हर्षकाले च संप्राप्ते कस्मात्त्वां मन्युराविशत् ॥ ५
न तं पश्यामि कौन्तेय यस्ते वध्यो भवेदिह ।
प्रहर्तुमिच्छसे कस्मात्किं वा ते चित्तविभ्रमः ॥६
कस्माद्भवान्महाखड्गं परिगृह्यात्यकारणात् । ७
तत्त्वां पृच्छामि कौन्तेय किमिदं ते चिकीर्षितम् ।
परामृशसि यत्क्रुद्धः खड्गमद्भुतविक्रम ॥ ८
एवमुक्तः कटाक्षेण प्रेक्षमाणो युधिष्ठिरम् ।
अर्जुनः प्राह गोविन्दं क्रुद्धः सर्प इव श्वसन् ॥ ९
अन्यस्मै देहि गाण्डीवमिति मां यः प्रचोदयेत् ।
भिन्द्यामहं तस्य शिर इत्युपांशु व्रतं मम ।
युधिष्ठिरेण तेनाहमुक्तश्चास्मि जनार्दन ॥ १०
यदुक्तोऽहमदीनार्थं राज्ञाऽनेन यशस्विना ।
समक्षं तव गोविन्द न तत्क्षन्तुमिहोत्सहे ॥ ११
तस्मादेनं वधिष्यामि राजानं धर्मचारिणम् ।
प्रतिज्ञां पालयिष्यामि हत्वैनं नरसत्तमम् ॥ १२
एतदर्थं मया खड्गो गृहीतो यदुनन्दन ।
सोऽहं युधिष्ठिरं हत्वा सत्यस्यानृण्यतां गतः ।
विशोको विज्वरश्चापि भविष्यामि जनार्दन ॥१३
किं वा त्वं मन्यसे प्राप्तमस्मिन्कार्य उपस्थिते ।
त्वमस्य जगतस्तात वेत्थ सर्वं गतागतम् ॥ १४
'जातस्त्वत्तो हि धर्मश्चाधर्मश्चेति परा श्रुतिः ।'
तत्तथा प्रकरिष्यामि यथा मां वक्ष्यते भवान् १५
सञ्जय उवाच ।
धिग्धिगित्येव गोविन्दः पार्थमुक्त्वाब्रवीत्पुनः१६
कृष्ण उवाच ।
इदानीं पार्थ जानामि न वृद्धाः सेवितास्त्वया ।
अकाले पुरुषव्याघ्र संरम्भं यद्भवानगात् ॥ १७
न हि धर्मविभागज्ञैरेवं कार्यं धनञ्जय ।
यथा त्वं पाण्डवाद्येह धर्मभीरुरपण्डितः ॥ १८
योऽकार्याणां क्रियायाश्च संयोगं नावबुध्यते ।
कार्याणामक्रियायाश्च स पार्थ पुरुषाधमः ॥ १९
अनुसृत्य तु ये धर्मं कवयः समुपस्थिताः ।
समासविस्तरविदां न तेषां वेत्सि निश्चयम् ॥ २०
अनिश्चयज्ञो हि नरः कार्याकार्यविनिश्चये ।
एवं स मुह्यत्यवशो यथा त्वं पार्थ मुह्यसि ॥ २१
न हि कार्यमकार्यं वा सुखं ज्ञातुं कथंचन ।
श्रुतेन ज्ञायते सर्वं तच्च त्वं नावबुध्यसे ॥ २२
अविज्ञानादिह भवान्सत्यं रक्षति धर्मवित् ।
प्राणिनां त्वं वधं पार्थ धार्मिको नावबुध्यसे ॥२३
प्राणिनां हि वधात्तात वृथा धर्मो मतो मम ।
अनृतं तु भवेद्वाच्यं न तु हिंसा कदाचन ॥ २४
स कथं भ्रातरं ज्येष्ठं राजानं धर्मकोविदम् ।
हन्याद्भवान्नरश्रेष्ठ प्राकृतोऽन्यः पुमानिव ॥ २५
अयुध्यमानस्य गुरोस्तथाऽशत्रोश्च मानद ।
पराङ्मुखस्य द्रवतः शरणं चापि गच्छतः ॥ २६
कृताञ्जलेः प्रपन्नस्य प्रमत्तस्य तथैव च ।
न वधः पूज्यते सद्भिस्तच्च सर्वं गुरौ तव ॥ २७
त्वया चैतद्व्रतं पार्थ बालेनेव कृतं पुरा ।
तस्मादधर्मसंयुक्तं मौर्ख्यादेव व्यवस्यसि ॥ २८
स्वगुरुं पार्थ कस्मात्त्वं हन्तुकामोऽभिधावसि ।
असंप्रधार्य धर्माणां गतिं सूक्ष्मां दुरत्ययाम् ॥२९
इदं धर्मरहस्यं च तव वक्ष्यामि पाण्डव ।
यद्ब्रूयात्तव भीष्मो वा राजा वापि युधिष्ठिरः ॥३०
विदुरो वा पुनः क्षत्ता गान्धारी वा यशस्विनी ।
कुन्ती वा भरतश्रेष्ठ द्रौपदी वा यशस्विनी ।
तत्ते वक्ष्यामि तत्त्वेन निबोधैतद्धनञ्जय ॥ ३१
सत्यस्य वचनं साधु न सत्याद्विद्यते परम् ।
सुदुर्विदं हि तत्त्वेन तत्सत्यमिति मे सतिः ॥३२
भवेत्सत्यमवक्तव्यं वक्तव्यमनृतं भवेत् ।
यत्रानृतं भवेत्सत्यं सत्यं चाप्यनृतं भवेत् ॥ ३३
विवाहकाले रतिसंप्रयोगे
प्राणात्यये सर्वधनापहारे ।

सुख अनधीत्येत्यर्थः । श्रुतेन शास्त्रेण ॥ २२ ॥ अशत्रोः अशातनीयस्य अवध्यस्य ॥ २६ ॥

विप्रस्य चार्थे ह्यनृतं वदेत
पञ्चानृतान्याहुरपातकानि ॥ ३४
सर्वस्वस्यापहारे तु वक्तव्यमनृतं भवेत् ।
तत्रानृतं भवेत्सत्यं सत्यं चाप्यनृतं भवेत् ॥ ३५
तादृशो हन्यते बालो यस्य सत्यमनिश्चितम् ।
सत्यानृते विनिश्चित्य ततो भवति धर्मवित् ॥३६
किमाश्चर्यं कृतप्रज्ञः पुरुषोऽपि सुदारुणः ।
सुमहत्प्राप्नुयात्पुण्यं बलाकोऽन्धवधादिव ॥ ३७
किमाश्चर्यं पुनर्मूढो धर्मकामो ह्यपण्डितः ।
सुमहत्प्राप्नुयात्पापमापगास्विव कौशिकः ॥ ३८
अर्जुन उवाच ।
आचक्ष्व भगवन्नेतद्यथा विन्दाम्यहं तथा ।
बलाकस्यानुसंबद्धं नदीनां कौशिकस्य च ॥ ३९
वासुदेव उवाच ।
मृगव्याधोऽभवत्कश्चिद्बलाको नाम भारत ।
यात्रार्थं पुत्रदाराणां मृगान्हन्ति न कामतः ॥४०
वृद्धौ च मातापितरौ बिभर्त्यन्यांश्च संश्रितान् ।
स्वधर्मनिरतो नित्यं संविभज्यानसूयकः ॥ ४१
स कदाचिन्मृगग्रेप्सुर्नान्वविन्दन्मृगं क्वचित् ।
अथापश्यत्स पीवानं श्वापदं घ्राणचक्षुषम् ॥४२
अदृष्टपूर्वमपि तत्सत्त्वं तेन हतं तदा ।
अन्धे हते ततो व्योम्नः पुष्पवर्षं पपात च ॥ ४३
अप्सरोगीतवादित्रैर्नादितं च मनोरमम् ।
विमानमगमत्स्वर्गान्मृगव्याधनिनीषया ॥ ४४
तद्भूतं सर्वभूतानामभावाय किलार्जुन ।
तपस्तप्त्वा वरं प्राप्तं कृतमन्धं स्वयंभुवा ॥ ४५
तद्भत्वा सर्वभूतानामभावकृतनिश्चयम् ।
बलाकोऽगात्स्वर्गलोकमेवं धर्मः सुदुर्विदः ॥ ४६
कौशिकोऽप्यभवद्विप्रस्तपस्वीनो बहुश्रुतः ।
नदीनां संगमे ग्रामाददूरे स किलावसत् ॥ ४७
सत्यं मया सदा वाच्यमिति तस्याभवद्व्रतम् ।
सत्यवादीति विख्यातः स तदासीद्धनंजय ॥४८
अथ दस्युभयात्केचित्तदा तद्वनमाविशन् ।
तत्रापि दस्यवः क्रुद्धास्तानमार्गन्त यत्नतः ॥ ४९
अथ कौशिकमभ्येत्य प्रोचुस्ते सत्यवादिनम् ।
कतरेण पथा याता भगवन्निति वै जनाः ।
सत्येन पृष्टः प्रब्रूहि यदि तद्वेत्थ शंस नः ॥५०
श्रीकृष्ण उवाच ।
सत्यस्य त्वविभागज्ञः सत्यं तेभ्यः शशंस ह ।
बहुवृक्षलतागुल्ममेतद्गहनमाश्रिताः ।
इति तान्व्यापयामास तेभ्यस्तत्त्वं स कौशिकः ॥
ततस्ते तान्समासाद्य क्रूरा जघ्नुरिति श्रुतिः ।
ततोऽधर्मेण महता वाग्दुरुक्तेन कौशिकः ॥ ५२
गतः सुकष्टं निरयं धर्मसूक्ष्मेष्वतत्त्ववित् ।
दृष्टपूर्वश्रुतो मूढो धर्माणामविशारदः ॥ ५३
वृद्धानपृच्छन्सन्देहानन्धः श्वभ्रमिवर्च्छति ॥ ५४
तत्र ते लक्षणोद्देशः कश्चिदेव भविष्यति ।
दुष्करं प्रतिसंख्यानं कात्स्न्र्येनात्र व्यवस्थितिः ५५
सत्यं धर्म इति ह्येके वदन्ति बहवो जनाः ।
न च पार्थाभ्यसूयामि नैतत्सर्वत्र शिष्यते ॥५६
श्रुतिस्तु धार्या इत्येके वदन्ति बहवो जनाः ।
न त्वेतत्प्रत्यसूयामि तत्र सर्वं विधीयते ॥ ५७
यत्स्यादहिंसासंयुक्तं स धर्म इति निश्चयः ।
अहिंसार्थाय हिंस्राणां धर्मप्रवचनं कृतम् ।
धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः ॥ ५८
प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम् ।
यस्मात्प्रभवसंयुक्तः स धर्म इति निश्चयः ॥ ५९
येऽन्यायेन जिगीषन्तो धर्मं पृच्छन्ति मानवाः ।
अकूजनेन चेन्मोक्षो नात्र कूजेत्कथंचन ॥ ६०
अवश्यं कूजितव्ये ह शङ्केरन्वाप्यकूजनात् ।
येऽन्यायेन जिहीर्षन्तो धर्मं पृच्छन्ति कस्यचित् ।
श्रेयस्तत्रानृतं वक्तुं सत्यादिति विनिश्चितम् ॥ ६१
प्राणात्यये विवाहे वा सर्वजात्या महाभये ।
सर्वस्वस्य च लोपे वा वक्तव्यमनृतं भवेत् ॥ ६२

तपस्विनं तपस्विनामिन श्रेष्ठ. ॥ ४७ ॥ यथा चाल्पश्रुतो मूढो धर्माणामविभागवित् । वृद्धानपृष्ट्वा सन्देह मदच्छ्वभ्रमिहार्हति । इति ड पाठ ॥ ५२ ॥ तत्र ते लक्षणोद्देशात्कश्चिदत्र भविष्यति इति

क. ड. पाठ । दुष्कर परम ज्ञान तर्केणानुव्यवस्यति इति ड पाठ । दुष्कर प्रतिसख्यान कात्स्न्र्येनास्य व्यवस्यति इति क घ ड पाठ । श्रुतेर्धर्म इति ह्येके इति ड. पाठ ॥ ५७ ॥ प्राणात्यये विवाहे वा

अधर्मं हि न पश्यन्ति मृषोद्यं तत्र पण्डिताः।
सर्वथाऽभिवदेत्तत्तु नानृतं स्याद्विचक्षणः॥ ६३
यः स्तेनैः सह संबन्धो मुच्यते शपथादपि।
भवेत्तत्रानृतं श्रेयः सत्यादिति विचारितम्॥ ६४
न च तेभ्यो धनं देयं सत्यादिति कथंचन।
पापेभ्योऽपि धनं दत्तं दातारमपि पीडयेत्।
तस्माद्धर्मार्थमनृतमुक्त्वा नानृतवाग्भवेत्॥ ६५
एष ते लक्षणोद्देशो मयोदिष्टो यथाविधि।
एतज्ज्ञात्वा ब्रूहि पार्थ यदि वध्यो युधिष्ठिरः॥ ६६

अर्जुन उवाच।

यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयान्महायशाः॥ ६७
सुहृद्ब्रूयाद्यथाऽस्माकं तथोक्तं वचनं त्वया।
भवान्मातृसमोऽस्माकं भवान्पितृसमोऽपि च।
गतिश्च परमा कृष्ण त्वमेव च परायणम्॥ ६८
न हि ते त्रिषु लोकेषु विद्यतेऽविदितं क्वचित्।
तस्माद्भवान्परं धर्मं वेद सर्वं यथातथम्॥ ६९
अवध्यं पाण्डवं मन्ये धर्मराजं युधिष्ठिरम्।
अधर्मयुक्ते संयोगे ब्रूहि किंचिदनुग्रहम्॥ ७०
इदं चापरमत्रैव ब्रूहि तत्त्वं विवक्षितम्॥ ७१

जानासि दाशार्ह मम व्रतं तु
यो मां ब्रूयात्कश्चन मानुषेषु।
अन्यस्मै त्वं गाण्डिवं देहि पार्थ
यो मत्तोऽस्त्रे वीर्यतो वा विशिष्टः॥ ७२
हन्यामहं केशव तं प्रसह्य
भीमो हन्यात्त्वूवरकेति चोक्तः।
तन्मां राजा ह्युक्तवांस्ते समक्षं
धनुर्देहीत्यसकृद्वृष्णिवीरे॥ ७३
तं हन्यां चेत्केशव जीवलोके
स्थाता नाहं कालमप्यल्पमात्रम्।
ध्यात्वा नूनं ह्येनसा चापि मुक्तो
वधं राज्ञो भ्रष्टवीर्यो विचेताः॥ ७४
यथा प्रतिज्ञा मम लोकबुद्धौ
भवेत्सत्या धर्मभृतां वरिष्ठ।
यथा जीवेत्पाण्डवोऽहं च कृष्ण
तथा बुद्धिं दातुमप्यर्हसि त्वम्॥ ७५

वासुदेव उवाच।

राजा श्रान्तो विक्षतो दुःखितश्च
कर्णेन सङ्ख्ये निशितैर्वाणसङ्घैः।
यश्चानिशं सूतपुत्रेण वीर
शरैर्भृशं ताडितो युध्यमानः॥ ७६
अतस्त्वमेतेन सरोषमुक्तो
दुःखान्वितेनेदमयुक्तरूपम्।
अकोपितो ह्येष यदि स्म सङ्ख्ये
कर्णं न हन्यादिति चाब्रवीत्सः॥ ७७
जानाति तं पाण्डव एष चापि
पापं लोके कर्णमसह्यमन्यैः।
ततस्त्वमुक्तो भृशरोषितेन
राज्ञा समक्षं परुषाणि पार्थ॥ ७८
नित्योद्युक्ते सततं चाप्रसह्ये
कर्णे द्यूतं ह्यद्य रणे निबद्धम्।
तस्मिन्हते कुरवो निर्जिताः स्यु-
रेवं बुद्धिः पार्थिवे धर्मपुत्रे॥ ७९
ततो वधं नार्हति धर्मपुत्र-
स्त्वया प्रतिज्ञाऽर्जुन पालनीया।
जीवन्नयं येन मृतो भवेद्धि
तन्मे निबोधेह तवानुरूपम्॥ ८०
यदा मानं लभते माननार्हः
स्तदा स वै जीवति जीवलोके।

सर्वज्ञातिवधाल्पये। नर्मण्यभिप्रवृत्ते वा न च प्रोक्त मृषा भवेत् इति झ. ङ. पाठः॥ ६२॥ अधर्म नात्र पश्यन्ति धर्मतत्त्वार्थदर्शिन इति ङ पाठ॰॥ ६३॥ य॰ स्तेनै सह सबन्धान्मुच्यते शपथैरपि। श्रेयस्तत्रानृत वक्तु तत्सत्यमविचारितम्। इति ङ. पाठ॥ ६४॥ शक्ये सति कथञ्चन इति ङ. पाठ॥ ६५॥ अनुग्रह अवधेन प्रतिज्ञारक्षणम्॥ ७०॥ त हन्यामिति स्थाता न न स्थास्ये। एनसा मुक्तोपि कृतप्रायश्चित्तोऽपि न स्थास्ये इत्यर्थ। किं कृत्वा राज्ञे वध ध्यात्वा॥ ७४॥ समक्ष आवयोरिति शेषः॥ ७८॥ कर्णे पणीकृते। द्यूत युद्धरूपम्॥ ७९॥

यदाऽवमानं लभते महान्तं
तदा जीवन्मृत इत्युच्यते सः ॥ ८१
संमानितः पार्थिवोऽयं सदैव
त्वया च भीमेन तथा यमाभ्याम् ।
वृद्धैश्च लोके पुरुषैश्च शूरै-
स्तस्यापमानं कलया प्रयुङ्क्ष्व ॥ ८२
त्वमित्यत्रभवन्तं हि ब्रूहि पार्थं युधिष्ठिरम् ।
त्वमित्युक्तो हि निहतो गुरुर्भवति भारत ॥ ८३
एवमाचर कौन्तेय धर्मराजे युधिष्ठिरे ।
अधर्मयुक्तं संयोगं कुरुष्वैनं कुरूद्वह ॥ ८४
अथर्वाङ्गिरसी ह्येषा श्रुतीनामुत्तमा श्रुतिः ।
अविचार्यैव कार्येषा श्रेयस्कामैर्नरैः सदा ॥ ८५
अवधेन वधः प्रोक्तो यद्गुरुस्त्वमिति प्रभुः ।
तद्ब्रूहि त्वं यन्मयोक्तं धर्मराजस्य धर्मवित् ॥ ८६
यदा ह्ययं पाण्डव धर्मराज-
स्त्वत्तोऽयुक्तं लप्स्यते चैव साधु ।
ततोऽस्य पादावभिवाद्य पश्चा-
च्छ्रेयो ब्रूयात्सान्त्वयुक्तं हितं च ॥ ८७
भ्राता प्राज्ञस्तव कोपं न जातु
कुर्याद्राजा धर्ममार्गानुसारी ।
मुक्तोऽनृताद्भ्रातृवधाच्च पापा-
द्धृष्टः कर्ण त्वं जहि पार्थ पश्चात् ॥ ८८

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

युधिष्ठिराधिक्षेपादात्मवधोद्यतं पार्थं प्रति कृष्णेन तत्प्रतिनिधितया आत्मप्रशासनचोदना ॥ १ ॥ अर्जुनेनात्मप्रशंसनानन्तरं युधिष्ठिरक्षमापनम् ॥ २ ॥

सञ्जय उवाच ।
इत्येवमुक्तस्तु जनार्दनेन
पार्थः प्रशस्याथ सुहृद्वचस्तत् ।
ततोऽब्रवीद्दर्जुनो धर्मराज-
मनुक्तपूर्वं परुषं प्रसह्य ॥ १
मा त्वं राजन्व्याहरस्वाद्य पापं
त्वं तिष्ठसि क्रोशमात्रे व्यपेत्य ।
भीमस्तु मामर्हति गर्हणाय
यो युध्यते सर्वलोकप्रवीरैः ॥ २
काले हि शत्रून्परिपीड्य वीरो
हत्वा प्रवीरान्वसुधाधिपानाम् ।
रथप्रधानोत्तमनागमुख्या
युधिप्रवीरा निहताश्च शूराः ॥ ३
सुदुष्करं कर्म करोति भीमः
कर्तुं यथा नार्हति कश्चिदन्यः ।
रथादवस्कन्द्य गदां परामृशं-
स्तथा रणे हन्ति तथैव वारणान् ॥ ४
स कुञ्जराणामधिकं सहस्रं
हत्वा नदंस्तुमुलं सिंहनादम् ।
काम्बोजवानायुजपार्वतीया-
नीहामृगाभान्विनिहत्य वाजिनः ॥ ५
महारथान्द्विरदाञ्शैलकल्पा-
न्सहेत यः कुञ्जरान्वध्यमानान् ।
असौ भीमो धार्तराष्ट्रेषु मग्नः
स मामुपालब्धुमरिंदमोऽर्हति ॥ ६
वरासिना चाथ नराश्वकुञ्जरां-
स्तथा रथाङ्गैर्धनुषा च हन्त्यरीन् ।
प्रमृद्य पद्भ्यामहितांस्तु हन्ति
पुनश्च दोर्भ्यां शतमन्युविक्रमः ॥ ७
महाबलो वैश्रवणान्तकोपमः
प्रसह्य हर्ता द्विषतां यशांसि ।

अत्रभवन्त मान्य त्वमिति ब्रूहि ॥ ८३ ॥ एव पूज्यावमानरूप सयोग आत्मनानुष्ठित कुरुष्व ॥ ८४ ॥ यत् गुरुस्त्वमिति प्रोक्तस्तत् अवधेन शस्त्रपातनमन्तरेणैव वध वधकर भवतीत्यर्थः ॥ ८६ ॥ द्विसप्ततितमोऽध्याय ॥ ७२ ॥

स भीमसेनोऽर्हति गर्हणाय
न त्वं नित्यं रक्ष्यमाणः सुहृद्भिः ॥ ८
कलिङ्गवङ्गाङ्गनिषादमागधा-
न्सदा महाशैलबलाहकोपमान् ।
निहन्ति यः शत्रुगणाननेकशः
स मां हि वक्तुं प्रभवत्यनागसम् ॥ ९
संयुक्तमास्थाय रथं हि काले
धनुर्विधून्वञ्छरपूर्णमुष्टिः ।
सृजेच्च यो बाणसङ्घान्परेषु
महाबलो मेघ इवाम्बुधाराः ॥ १०
शतान्यष्टौ वारणानामदर्शय-
द्विशातितैः कुम्भघटाग्रहस्तैः ।
यो भीमसेनो निहतारिसङ्घः
स मामुपालब्धुमरिन्दमोऽर्हति ॥ ११
रथाश्च नागाश्च हयाश्च राज-
न्भीमेनाजौ निहताः सङ्घशोऽद्य ।
राजानश्च बहवो महाबलाः
स मामुपालब्धुमरिन्दमोऽर्हति ॥ १२
धृतराष्ट्रपुत्रा बलिनश्च येन
महाबला निहताः प्रायशो वै ।
शूरो युद्धे ह्यप्रतिवार्यवीर्यः
स मामुपालब्धुमरिन्दमोऽर्हति ॥ १३
प्रतापयंस्तद्बलमुग्ररूपं
योऽसौ रणे धार्तराष्ट्रस्य वीरः ।
एकः सहेताप्रतिसह्यपौरुष-
स्तेनास्मि वाच्यो न त्वया वै कदाचित् १४
महारथा यत्र यत्रैव युद्धे
भिन्दन्ति सैन्यं तव कामतोऽद्य ।
तत्रैव तत्रैव रणे महात्मा
दृढं भीमः परसङ्घानमृद्नात् ॥ १५
तेनास्मि वाच्यो न त्वया हं कदाचि-
न्मा मा वोचः क्रूरमिहाद्य पार्थ ।
नास्मद्विधो वै भवता तु वाच्यो
यथा भवान्सर्वलोकस्य वाच्यः ॥ १६

एवं हि मा ते ब्रुवतो नरेन्द्र
कथं न दीर्येच्छतधाऽद्य जिह्वा ।
अहो बतेदं सुनृशंसरूपं
कामादवोचस्त्वमिहाद्य यद्वै ॥ १७
बलं न वाधिष्ठितं सत्तमानां
यत्क्षत्रियाणां बहुलं वदन्ति ।
त्वं चाबलो भारत निष्ठुरोऽसि
त्वमेव मां वेत्सि यथाविधोऽहम् ॥ १८
नकुलेन राजन्गजवाजियोधा
हताश्च वीराः सहसा समेत्य ।
त्यक्त्वा प्राणान्समरे युद्धकाङ्क्षी
स मामुपालब्धुमरिन्दमोऽर्हति ॥ १९
कृतं कर्म सहदेवेन दुष्करं
यो युध्यते परसैन्यावमर्दी ।
न चाब्रवीत्किंचिदिहागतो बली
पश्यान्तरं तस्य चैवात्मनश्च ॥ २०
धृष्टद्युम्नः सात्यकिर्द्रौपदेया
युधामन्युश्चोत्तमौजाः शिखण्डी ।
एतेऽद्य युधि संप्रपीडिता-
स्ते मामुपालब्धुमर्हन्ति न त्वम् ॥ २१
त्वन्मूलमस्माभिरिदं हि वैरं
प्राप्तं तथा व्यसनं चातिघोरम् ।
द्यूतप्रमत्तेन कृतं त्वयाऽसकृ-
त्कस्मादुपालब्धुमिहार्हसि त्वम् ॥ २२
त्वमेव राजन्सततं प्रमत्त-
स्त्वमेव मूढो भारतानामसाधुः ।
त्वां प्राप्य राज्यं च विनष्टमेत-
त्प्राप्ता महत्पाण्डवाश्चापि दास्यम् ॥ २३
त्वत्तः कृतोऽस्मद्वनवासदुःखं
राज्यस्य नाशो ह्यभिमन्योश्च घोरः ।
आत्मानमेवं सुनृशंसरूपं
ज्ञात्वा किमर्थं गर्हसे माद्य वीर ॥ २४
लज्जस्व राजन्यदि तेऽस्ति लज्जा
तूष्णींभूतः पश्य सर्वं कृतघ्नः ।

भीमो नित्यं समरस्य कर्ता
दर्पस्य भेत्ता पुनरेव नित्यम् ॥ २५
स्वयं ह्यशक्तेन नरेन्द्र युद्धे
नरेण कार्या सततं क्षमैव ।
बलं हि वाचि द्विजसत्तमानां
क्षात्रं द्विजा बाहुबलं वदन्ति ॥ २६
त्वं वाग्बलो भारत निष्ठुरोऽसि
त्वमेव मां वेत्सि यथाविधोऽहम् ।
घटामि नित्यं तव कर्तुमिष्टं
दारैः सुतैर्जीवितेनात्मना च ॥ २७
एवंच मां वाक्छलाकैर्हिनत्सि
त्वत्तः सुखं न वयं विद्म किंचित् ।
मा मामवंस्था द्रौपदीतल्पसंस्थो
महारथान्प्रतिहन्मि त्वदर्थे ॥ २८
सर्वातिशङ्की भवसि प्रमत्त-
स्त्वत्तः सुखं नाभिजानामि किंचित् ।
प्रोक्तः स्वयं सत्यसन्धेन मृत्यु-
स्तव प्रियार्थं नरदेव युद्धे ॥ २९
शिखण्डिनाम्ना प्रधने तवार्थे
मयाभिगुप्तेन हतश्च भीष्मः ।
द्रोणो हतो यः सततोपकारी
धृष्टद्युम्नेन स्यन्दनाद्विप्रकृष्टः ॥ ३०
द्रौणिश्च रुद्रः सगणो महात्मा
तथापि ते वै वचनं नृशंसवत् ।
दुःखं प्रियं ते नरदेव कर्तुं
यस्य प्रियं ते न करोम्यहं वै ॥ ३१
न मुच्यते वै दिवि चेह यः पुमा-
न्यस्ते मदन्योऽप्रियमारभेत ।
न चाभिनन्दामि तथाहि राज्यं
यतस्त्वमक्षेषु दृढं प्रसक्तः ॥ ३२
स्वयं कृतं पापमनार्यजुष्ट-
मस्माभिराजौ व्यसनं तितीर्षसि ।
अक्षेषु दोषा बहवो विधर्म्याः
श्रुतास्त्वया सहदेवोऽब्रवीद्यान् ॥ ३३
तान्नेच्छसि त्यक्तुमनार्यजुष्टा-
न्घोरे स्म सर्वे निरये त्वयाऽस्ताः ।
त्वं देविता त्वत्कृते राज्यनाश-
स्त्वत्संभवं व्यसनं नो नरेन्द्र ॥ ३४
मास्मान्क्रूरैर्वाक्प्रतोदैस्तुदस्त्वं
भूयो राजन्कोपयस्वल्पबुद्ध्या ॥ ३५

सञ्जय उवाच ।

एता वाचः परुषाः सव्यसाची
स्थिरप्रतिज्ञः श्रावयित्वा नरेन्द्रम् ।
विनिःश्वसञ्ज्येष्ठमनिष्टमुक्त्वा
ततस्तु कोशादसिमुद्धबर्ह ॥ ३६
तमाह कृष्णः किमिदं पुनर्भवा-
न्विकोशमाकाशनिभं करोत्यसिम् ।
ब्रूहि सत्यं पुनरुत्तरं सखे
वचः प्रवक्ष्यामि तवार्थसिद्धये ॥ ३७
इतीव पृष्टः पुरुषोत्तमेन
सुदुःखितः केशवमाह पार्थः ।
अहं हनिष्ये स्वशरीरमेत-
त्प्रसह्य येनाहितमुक्तवान्गुरुम् ॥ ३८
निशम्य तत्पार्थवचोऽब्रवीदिदं
जनार्दनो धर्मभृतां वरिष्ठः ।
ब्रूहि पार्थ स्वगुणानिहात्मन-
स्ततो हतात्मा भवसीति निश्चयः ॥ ३९
तथा तु कृष्णस्य वचो निशम्य
ततोऽर्जुनः प्राह धनुः प्रगृह्य ।
युधिष्ठिरं धर्मभृतां वरिष्ठं
शृणुष्व राजन्निति दुर्वचः स्वयम् ॥ ४०

अर्जुन उवाच ।

न मादृशोऽन्यो नरदेव विद्यते
धनुर्धरो देवमृते पिनाकिनम् ।
अहं हि तेनानुमतो महात्मना
क्षणेन हन्यां सचराचरं जगत् ॥ ४१
मया हि राजन्सदिगीश्वरा दिशो
विजित्य सर्वा भवतः कृता वशे ।

सत्यसन्धेन भीष्मेण ॥ २९ ॥

त्रिसप्ततितमोऽध्याय ॥ ७३ ॥

स राजसूयश्च समाप्तदक्षिणः
सभा च दिव्या भवतो ममौजसा ॥ ४२
पाणी पृषत्कालिखितावमौ पुन-
र्धनुश्च सव्ये विततं सबाणम् ।
पादौ च मे लक्षणतः प्रशस्तौ
न मादृशं युद्धगतं जयन्ति ॥ ४३
हता उदीच्या निहताः प्रतीच्याः
प्राच्या निरस्ता दाक्षिणात्या विशस्ताः ।
संशप्तकानां किंचिदेवावशिष्टं
सर्वस्य लोकस्य हतं मयाऽर्धम् ॥ ४४
शेते मया निहता शत्रुसेना
छिन्नैर्गात्रैर्भूमितले स्खलन्ती ।
अनस्त्रज्ञान्नैव निहन्मि चास्त्रै-
स्तस्मान्न भस्मैव करोमि लोकान् ॥ ४५
जैत्रं रथं भीममास्थाय कृष्ण
यावच्छीघ्रं सूतपुत्रं निहन्तुम् ।
राजा भवत्वद्य सुनिर्वृतोऽयं
कर्णं रणे नाशयितास्मि बाणैः ॥ ४६
इत्येवमुक्त्वा पुनराह पार्थो
युधिष्ठिरं धर्मभृतां वरिष्ठम् ।
अद्यापुत्रा सूतमाता भवित्री
कुन्ती वाथो वा मया तेन वापि ।
सत्यं वदाम्यद्य न कर्णमाजौ
शरैरहत्वा कवचं विमोक्ष्ये ॥ ४७

सञ्जय उवाच ।

इत्येवमुक्त्वा पुनरेव पार्थो
युधिष्ठिरं धर्मभृतां वरिष्ठम् ।
विमुच्य शस्त्राणि धनुर्विसृज्य
कोशे च खड्गं विनिधाय तूर्णम् ॥ ४८
स व्रीडया नम्रशिराः किरीटी
युधिष्ठिरं प्राञ्जलिरभ्युवाच ।
प्रसीद राजन्क्षम यन्मयोक्तं
काले भवान्वेत्स्यति तन्नमस्ते ॥ ४९
ततस्तु पादावुपगृह्य पार्थः
समुत्थितो दीप्ततेजाः किरीटी ।
प्रसाद्य राजानममित्रसाहं
स्थितोऽब्रवीच्चैनमभिप्रतप्तम् ॥ ५०
याम्येष भीमं समराद्विमोक्तुं
सर्वात्मना सूतपुत्रं च हन्तुम् ।
भवत्प्रियार्थं मम जीवितं हि
ब्रवीमि सत्यं तदवेहि राजन् ॥ ५१
नेदं चिरात्क्षिप्रमिदं भविष्य-
दावर्ततेऽसावभियामि चैनम् ।
अद्याप्यपुत्रा तेन हतेन राधा
कुन्ती मया वा तदिदं विद्धि राजन् ॥ ५२

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

अर्जुनकृतावमानाद्गतं यियासोर्युधिष्ठिरस्य कृष्णेन परिसान्त्वनम् ॥ १ ॥

सञ्जय उवाच ।

एतच्छ्रुत्वा पाण्डवो धर्मराजो
भ्रातुर्वाक्यं परुषं फल्गुनस्य ।
उत्थाय तस्माच्छयनादुवाच
पार्थं ततो दुःखपरीतचेताः ॥ १
कृतं मया पार्थ न साधुकर्म
येन प्राप्तं व्यसनं वः सुघोरम् ।
तस्माच्छिरश्छिन्धि ममैतदद्य
कुलान्तकस्याधमपूरुषस्य ॥ २
पापस्य पाप्मोपहतस्य वीर
विमूढबुद्धेरलसस्य भीरोः ।
वृद्धावमन्तुः परुषस्य चैव
किं ते चिरं मामनुसृत्य रूक्षम् ॥ ३

गच्छाम्यहं वनमद्यैव पापः
सुखं भवान्वर्ततां मद्विहीनः ।
योग्यो राजा भीमसेनो महात्मा
क्लीबस्य किं वा मम राज्यकृत्यम् ॥ ४
न चापि शक्तः परुषाणि सोढुं
पुनस्त्वेमानि रुषान्वितस्य ।
भीमोऽस्तु राजा मम जीवितेन
न कार्यमद्यावमतस्य वीर ॥ ५
इत्येवमुक्त्वा सहसोत्पपात
रुषान्वितस्तच्छयनं विहाय ।
इयेष निर्गन्तुमथो वनाय
तं वासुदेवः प्रणतोऽभ्युवाच ॥ ६
न राजन्विदितं तत्ते यथा गाण्डीवधन्वनः ।
प्रतिज्ञा सत्यसन्धस्य गाण्डीवं प्रति विश्रुता ॥७
ब्रूयाद्य एनं गाण्डीवं देह्यन्यस्मै त्वमित्युत ।
वध्योऽस्य स पुमाँल्लोके त्वया चोक्तोयमीदृशम् ८
ततः सत्यां प्रतिज्ञां तां पार्थेन प्रतिरक्षता ।
मच्छन्दादवमानोऽयं कृतस्तव महीपते ॥ ९
गुरूणामवमानो हि वध इत्यभिधीयते ।
तस्मात्क्षम महाबाहो मम पार्थस्य चोभयोः॥ १०
व्यतिक्रममिमं राजन्सत्यसंरक्षणं प्रति ।
शरणं त्वां महाराज प्रतिपन्नावुभावपि ॥ ११
क्षन्तुमर्हसि मे राजन्प्रणतस्याभियाचतः ।
राधेयस्याद्य पापस्य भूमिः पास्यति शोणितम्॥१२
सत्यं ते प्रतिजानामि हतं विद्ध्यद्य सूतजम् ।
यस्येच्छसि वधं तस्य गतमेवाद्य जीवितम् ॥ १३
इति कृष्णवचः श्रुत्वा धर्मराजो युधिष्ठिरः ।
ससंभ्रमं हृषीकेशमुत्थाप्य प्रणतं तदा ।
कृताञ्जलिमुवाचेदं वाक्यं यत्समनन्तरम् ॥ १४
एवमेव यथात्थ त्वमस्त्येषोऽतिक्रमो मम ।
अनुनीतोऽसि गोविन्द तारितश्चास्मि माधव॥१५
मोचिता व्यसनाद्घोराद्वयमद्य त्वयाच्युत ।
भवन्तं नावमासाद्य ह्यावां व्यसनसागरात् ।
घोरादद्य समुत्तीर्णावुभावज्ञानमोहितौ ॥ १६
त्वद्बुद्धिप्लवमासाद्य दुःखशोकार्णवाद्वयम् ।
समुत्तीर्णाः सहामात्याः सनाथाः स्म त्वयाच्युत॥

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

अर्जुनेन स्ववमानितस्य युधिष्ठिरस्य प्रसादनम् ॥ १ ॥ अर्जुनेन युधिष्ठिराग्रे कर्णवधप्रतिज्ञानम् ॥ २ ॥

सञ्जय उवाच ।
इति स्म कृष्णवचनात्प्रत्युच्चार्य युधिष्ठिरम् ।
बभूव विमनाः पार्थः किंचित्कृत्वेव पातकम्॥ १
ततोऽब्रवीद्वासुदेवः प्रहसन्निव पाण्डवम् ।
कथं नाम भवेदेतद्यदि त्वं पार्थ धर्मजम् ॥ २
असिना तीक्ष्णधारेण हन्या धर्मे व्यवस्थितम् ।
त्वमित्युक्त्वाथ राजानमेवं कश्मलमाविशः॥ ३
हत्वा तु नृपतिं पार्थ करिष्यसि किमुत्तरम् ।
एवं हि दुर्विदो धर्मो मन्दप्रज्ञैर्विशेषतः ॥ ४
स भवान्धर्मभीरुत्वाद्भुवं यायान्महत्तमः ।
नरकं घोररूपं च भ्रातुर्ज्येष्ठस्य वै वधात् ॥ ५
स त्वं धर्मभृतां श्रेष्ठं राजानं धर्मसंहितम् ।
प्रसादय कुरुश्रेष्ठमेतदत्र मतं मम ॥ ६
प्रसाद्य भक्त्या राजानं प्रीते चैव युधिष्ठिरे ।
प्रयावस्त्वरितौ योद्धुं सूतपुत्ररथं प्रति ॥ ७
हत्वा तु समरे कर्णं त्वमद्य निशितैः शरैः ।
विपुलां प्रीतिमाधत्स्व धर्मपुत्रस्य मानद ॥ ८
एतदत्र महाबाहो प्राप्तकालं मतं मम ।
एवं कृते कृतं चैव तव कार्यं भविष्यति ॥ ९
सञ्जय उवाच ।
ततोऽर्जुनो महाराज लज्जया वै समन्वितः ।
धर्मराजस्य चरणौ प्रपद्य शिरसा नतः ॥ १०
उवाच भरतश्रेष्ठं प्रसीदेति पुनःपुनः ।
क्षमस्व राजन्यत्प्रोक्तस्त्वं मया धर्मभीरुणा॥ ११

पादयोः पतितं दृष्ट्वा धर्मराजो युधिष्ठिरः ।
धनंजयमभिप्रेक्ष्य रुदन्तं भरतर्षभम् ॥ १२
उत्थाप्य भ्रातरं राजा धर्मराजो धनञ्जयम् ।
समाश्लिष्य च सस्नेहं प्ररुरोद महीपतिः ॥ १३
रुदित्वा सुचिरं कालं भ्रातरौ सुमहाद्युती ।
कृतशौचौ महाराज प्रीतिमन्तौ बभूवतुः ॥ १४
तत आश्लिष्य तं प्रेम्णा मूर्ध्नि चाघ्राय पाण्डवः ।
प्रीत्या परमया युक्तो विस्मयंश्च पुनःपुनः ।
अब्रवीत्तं महेष्वासं धर्मराजो धनंजयम् ॥ १५
कर्णेन मे महाबाहो सर्वसैन्यस्य पश्यतः ।
कवचं च ध्वजं चैव धनुः शक्तिर्हयाः शराः ।
शरैः कृत्ता महेष्वास यतमानस्य संयुगे ॥ १६
सोऽहं दृष्ट्वा रणे तस्य कर्म कर्णस्य फल्गुन ।
व्यवसीदामि दुःखेन न तु मे जीवितं प्रियम् ॥ १७
न चेदद्य हि तं वीरं निहनिष्यसि संयुगे ।
प्राणानेव परित्यक्ष्ये जीवितार्थो हि को मम ॥ १८
एवमुक्तः प्रत्युवाच विजयो भरतर्षभ ॥ १९
सत्येन ते शपे राजंस्त्वत्पादेन तथैव च ।
भीमेन च नरश्रेष्ठ यमाभ्यां च महीपते ॥ २०
'अहमेनं नरश्रेष्ठ सामात्यं च महीपते ।'
यथाद्य समरे कर्णं हनिष्यामि हतोपि वा ।
महीतले पतिष्यामि सत्येनायुधमालभे ॥ २१
एवमाभाष्य राजानमब्रवीन्माधवं वचः ।
अद्य कर्णं रणे कृष्ण सूदयिष्ये न संशयः ।
त्वमनुध्याहि भद्रं ते वधं तस्य दुरात्मनः ॥ २२
एवमुक्तोऽब्रवीत्पार्थं केशवो राजसत्तम ।
शक्तोऽसि भरतश्रेष्ठ यत्नं कर्तुं यदात्थ माम् ॥ २३
एष चापि हि मे कामो नित्यमेव महारथ ।
कथं भवान्रणे कर्णं निहन्यादिति सत्तम ॥ २४
एवमुक्तस्ततो राजन्पार्थो वचनमब्रवीत् ।
हन्यते द्वैरथे भूयो युज्यन्तां वै रथोत्तमे ॥ २५
उपावृत्ताश्च तुरगाः शिक्षिताश्चाश्वसादिभिः ।
रथोपकरणैः सर्वैः सत्वरं यातु मे रथः ॥ २६
एवमुक्तो महाराज फल्गुनेन महात्मना ।
उवाच दारुकं कृष्णः कुरु सर्वं यदब्रवीत् ।
अर्जुनो भारतश्रेष्ठः श्रेष्ठः सर्वधनुष्मताम् ॥ २७
आज्ञप्तस्त्वथ कृष्णेन दारुको राजसत्तम ।
योजयामास च रथं वैयाघ्रं शत्रुतापनम् ।
सज्जं निवेदयामास पाण्डवस्य महात्मनः ॥ २८
युक्तं तु रथमास्थाय दारुकेण महात्मना ।
उपस्थितं रथं दृष्ट्वा पद्मनाभो रणान्तकृत् ।
भूयश्चोवाच मतिमान्माधवो धर्मनन्दनम् ॥ २९
युधिष्ठिरेमं वीभत्सुं त्वं सान्त्वयितुमर्हसि ।
अनुज्ञातुं च कर्णस्य वधायाद्य दुरात्मनः ॥ ३०
श्रुत्वा ह्यावां महासंख्ये त्वां कर्णशरपीडितम् ।
प्रवृत्तिं ज्ञातुमायाताविहावां पाण्डुनन्दन ॥ ३१
दिष्ट्यासि राजन्विरुजो दिष्ट्या न ग्रहणं गतः ।
परिसान्त्वय वीभत्सुं जयमाशाधि चानघ ॥ ३२
युधिष्ठिर उवाच ।
एह्येहि पार्थ वीभत्सो मां परिष्वज पाण्डव ।
वक्तव्यमुक्तोस्म्यहितं त्वया क्षान्तं च तन्मया ३३
अहं त्वामनुजानामि जहि कर्णं धनञ्जय ।
मन्युं च मा कृथाः पार्थ यन्मयोक्तोऽसि दारुणं ३४
सञ्जय उवाच ।
ततो धनञ्जयो राजञ्शिरसा प्रणतस्तदा ।
पादौ जग्राह पाणिभ्यां भ्रातुर्ज्येष्ठस्य मारिष ३५
तमुत्थाप्य ततो राजा परिष्वज्य च पीडितम् ।
मूर्ध्न्युपाघ्राय चैवैनमिदं पुनरुवाच ह ॥ ३६
धनञ्जय महाबाहो मानितोऽस्मि दृढं त्वया ।
माहात्म्यं विजयं चैवं भूयः प्राप्नुहि शाश्वतम् ३७
अर्जुन उवाच ।
अद्य तं पापकर्माणं सानुबन्धं रणे शरैः ।
नयाम्यन्तं समासाद्य राधेयं बलगर्वितम् ॥ ३८
येन त्वं पीडितो बाणैर्दृढमायम्य कार्मुकम् ।
तस्याद्य कर्मणः कर्णः फलमाप्स्यति दारुणम् ॥ ३९
अद्य त्वामुपयास्यामि कर्णं हत्वा महीपते ।
सभाजये त्वामाक्रन्दादिति सत्यं ब्रवीमि ते ॥ ४०
नाहत्वा विनिवर्तिष्ये कर्णमद्य रणाजिरात् ।
इति सत्येन ते पादौ स्पृशामि जगतीपते ॥ ४१

सञ्जय उवाच ।
इति ब्रुवाणं सुमनाः किरीटिनं
युधिष्ठिरः प्राह वचो बृहत्तरम् ।
यशोऽक्षयं जीवितमीप्सितं ते
जयं सदा वीर्यमरिक्षयं तदा ॥ ४२

प्रयाहि वृद्धिं च दिशन्तु देवता
यथाहमिच्छामि तवास्तु तत्तथा ।
प्रयाहि शीघ्रं जहि कर्णमाहवे
पुरन्दरो वृत्रमिवात्मवृद्धये ॥ ४३

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

कर्णेन योद्धुंनिर्गच्छतोऽर्जुनस्य शुभनिमित्तप्रादुर्भावः ॥ १ ॥ श्रीकृष्णेनार्जुनस्य प्रोत्साहनम् ॥ २ ॥

सञ्जय उवाच ।
प्रसाद्य धर्मराजानं प्रहृष्टेनान्तरात्मना ।
संपूज्य देवताः सर्वा ब्राह्मणान्स्वस्ति वाच्य च ।
सुमङ्गलं स्वस्त्ययनमारुरोह रथोत्तमम् ॥ १
तस्य राजा महाप्राज्ञो धर्मराजो युधिष्ठिरः ।
आशिषोऽयुङ्क परमाः युक्तं कर्णरथं प्रति ॥ २
तमायान्तं महेष्वासं दृष्ट्वा भूतानि भारत ।
निहतं मेनिरे कर्णं पाण्डवेन महात्मना ॥ ३
बभूवुर्विमलाः सर्वा दिशो राजन्समन्ततः ।
चाषाश्च शतपत्राश्च क्रौञ्चाश्चैव जनेश्वर ।
प्रदक्षिणमकुर्वन्त तदा वै पाण्डुनन्दनम् ॥ ४
बहवः पक्षिणो राजन्पुन्नामानः शुभाः शिवाः ।
त्वरयन्तोऽर्जुनं युद्धे हृष्टरूपा ववाशिरे ॥ ५
कङ्का गृध्रा बकाः श्येना वायसाश्च विशांपते ।
अग्रतस्तस्य गच्छन्ति भक्ष्यहेतोर्भयानकाः ॥ ६
निमित्तानि च धन्यानि पाण्डवस्य शशंसिरे ।
विनाशमरिसैन्यानां कर्णस्य च वधं तथा ॥ ७
प्रयातस्याथ पार्थस्य महान्स्वेदो व्यजायत ।
चिन्ता च विपुला जज्ञे कथं चेदं भविष्यति ॥ ८
विषण्णं तु ततो ज्ञात्वा सव्यसाचिनमच्युतः ।
संचोदयति तेजस्वी मधुहा वानरध्वजम् ॥ ९
ततो गाण्डीवधन्वानमब्रवीन्मधुसूदनः ।
दृष्ट्वा पार्थं तथायान्तं चिन्तापरिगतं तदा ॥ १०
गाण्डीवधन्वन्संग्रामे ये त्वया धनुषा जिताः ।
न तेषां मानुषो जेता त्वदन्य इह विद्यते ॥ ११

एते हि बहवः शूराः शक्रतुल्यपराक्रमाः ।
त्वां प्राप्य समरे शूरं प्रयाताः परमां गतिम् ॥ १२
को हि द्रोणं च भीष्मं च भगदत्तं च मारिष ।
विन्दानुविन्दावावन्त्यौ कांभोजं च सुदक्षिणम् १३
श्रुतायुं चाश्रुतायुं च शतायुं च महारथम् ।
प्रत्युद्गम्य भवेत्क्षेमी यो न स्याच्चद्विधः प्रभुः ॥१४
तव ह्यस्त्राणि दिव्यानि लाघवं बलमेव च ।
असंमोहश्च युद्धेषु विज्ञानस्य च संनतिः ।
वेधः पातश्च लक्ष्येषु योगश्चैव तथार्जुन ॥ १५
भवान्देवान्सगन्धर्वान्हन्यात्सर्वांश्च राक्षसान् ।
पृथिव्यां तु रणे पार्थ न योद्धा त्वत्समः पुमान् १६
धनुर्गृह्णन्ति ये केचित्क्षत्रिया युद्धदुर्मदाः ।
आत्मनस्तु समं तेषां न पश्यामि शृणोमि च ॥१७
ब्रह्मणा हि प्रजाः सृष्टा गाण्डीवं च महद्धनुः ।
येन त्वं युध्यसे पार्थ तस्मान्नास्ति त्वया समः ॥ १८
अवश्यं तु मया वाच्यं यत्पथ्यं तव पाण्डव ।
मावमंस्था महाबाहो कर्णमाहवशोभिनम् ॥ १९
कर्णो हि बलवान्दक्षः कृतास्त्रश्च महारथः ।
कृती च चित्रयोधी च देशकालस्य कोविदः ॥ २०
बहुनात्र किमुक्तेन संक्षेपाच्छृणु पाण्डव ।
त्वत्समं त्वद्विशिष्टं वा कर्णं मन्ये महारथम् ।
परमं यत्नमास्थाय त्वया वध्यो महाहवे ॥ २१
तेजसा वह्निसदृशो वायुवेगसमो जवे ।
अन्तकप्रतिमः क्रोधे सिंहसंहननो बली ॥ २२

अष्टरत्निर्महाबाहुर्व्यूढोरस्कः सुदुर्जयः।
अभिमानी च शूरश्च प्रवीरः प्रियदर्शनः॥ २३
सर्वयोधगुणैर्युक्तो मित्राणामभयंकरः।
सततं पाण्डवद्वेषी धार्तराष्ट्रहिते रतः॥ २४
सर्वैरवध्यो राधेयो देवैरपि सवासवैः।
ऋते त्वामिति मे बुद्धिस्तदद्य जहि सूतजम्॥ २५
देवैरपि हि संयत्तैर्विभ्रद्भिर्मांसशोणितम्।
अशक्यः स रथो जेतुं सर्वैरपि युयुत्सुभिः॥ २६
दुरात्मानं पापवृत्तं नृशंसं
दुष्टप्रज्ञं पाण्डवेयेषु नित्यम्।
हीनस्वार्थं पाण्डवेयैर्विरोधे
हत्वा कर्णं निश्चितार्थो भवाद्य॥ २७
तं सूतपुत्रं रथिनां वरिष्ठं
निष्कालिकं कालवशं नयाद्य।
तं सूतपुत्रं रथिनां वरिष्ठं
हत्वा प्रीतिं धर्मराजे कुरुष्व॥ २८
जानामि ते पार्थ वीर्यं यथाव-
दुर्वारणीयं च सुरासुरैश्च।
सदावजानाति हि पाण्डुपुत्रा-
नसौ दर्पात्सूतपुत्रो दुरात्मा॥ २९
आत्मानं मन्यते वीरं येन पापः सुयोधनः।
तमद्य मूलं पापानां जहि सौतिं धनञ्जय॥ ३०
खड्गजिह्वं धनुरास्यं शरदंष्ट्रं तरस्विनम्।
दृप्तं पुरुषशार्दूलं जहि कर्णं धनञ्जय॥ ३१
अहं त्वामनुजानामि वीर्येण च बलेन च।
जहि कर्णं रणे शूरं मातङ्गमिव केसरी॥ ३२
यस्य वीर्येण वीर्यं ते धार्तराष्ट्रोऽवमन्यते।
तमद्य पार्थ संग्रामे कर्णं वैकर्तनं जहि॥ ३३

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे षट्सप्ततितमोऽध्यायः॥ ७६॥

सप्तसप्ततितमोऽध्यायः॥ ७७॥

कृष्णेनार्जुनंप्रति भीष्मादियुद्धनिधनप्रकारानुवादपूर्वकं तेषां वधे तस्यैव मुख्यकारणत्वकथनम्॥ १॥ बाल्यात्प्रभृति दुर्योधनापनयानुस्मारणपूर्वकं सर्वत्र कर्णस्यैव मूलतया महापराधित्वद्योतनेन तस्यावश्यं हननविधानम्॥ २॥

सञ्जय उवाच।
ततः पुनरमेयात्मा केशवोऽर्जुनमब्रवीत्।
कृतसंकल्पमायान्तं वधे कर्णस्य भारत॥ १
अद्य सप्तदशाहानि वर्तमानस्य नित्यशः।
विनाशस्यातिघोरस्य नरवारणवाजिनाम्॥ २
भूत्वा हि विपुला सेना तावकानां परैः सह।
अन्योन्यं समरं प्राप्य किंचिच्छेषा विशांपते॥ ३
भूत्वा वै कौरवाः पार्थ प्रभूतगजवाजिनः।
त्वां वै शत्रुं समासाद्य विनष्टा रणमूर्धनि॥ ४
एते ते पृथिवीपालाः सञ्जयाश्च समागताः।
त्वां समासाद्य दुर्धर्षं पाण्डवाश्च व्यवस्थिताः॥ ५
पाञ्चालैः पाण्डवैर्मात्स्यैः कारूशैश्चेदिभिः सह।
'मगधैः पारिजातैश्च दाक्षिणात्यैः सकेरलैः।'
त्वया गुप्तैरमित्रघ्नैः कृतः शत्रुगणक्षयः॥ ६
को हि शक्तो रणे जेतुं कौरवांस्तात संयुगे।
अन्यत्र पाण्डवाद्युद्धे श्वेताश्वाद्वानरध्वजात्॥ ७
शक्तस्त्वं हि रणे जेतुं ससुरासुरमानुषान्।
त्रींल्लोकान्समरे युक्तान्किं पुनः कौरवं बलम्॥ ८
भगदत्तं च राजानं कोऽन्यः शक्तस्त्वया विना।
जेतुं पुरुषशार्दूल योऽपि स्याद्वासवोपमः॥ ९
तथेमां विपुलां सेनां गुप्तां पार्थ त्वयाऽनघ।
न शेकुः पार्थिवाः सर्वे चक्षुर्भिरपि वीक्षितुम्॥ १०
तथैव सततं पार्थ रक्षिताभ्यां त्वया रणे।
धृष्टद्युम्नशिखण्डिभ्यां द्रोणभीष्मौ निपातितौ ११
को हि शक्तो रणे पार्थ भारतानां महारथौ।
भीष्मद्रोणौ युधा जेतुं शक्रतुल्यपराक्रमौ॥ १२

रत्निस्त्वेकविंशत्यङ्गुलः। अष्टाना रत्नीना अष्टषष्ट्यधिकं शत अङ्गुलानि च भवन्ति॥ २३॥ निष्कालिक निर्गत. कालयिता जेतास्येति तम्॥ २८॥ षट्सप्ततितमोऽध्याय.॥ ७६॥

को हि शान्तनवं भीष्मं द्रोणं वैकर्तनं कृपम् ।
द्रौणिं च सौमदत्तिं च कृतवर्माणमेव च ॥ १३
सैन्धवं मद्रराजं च राजानं च सुयोधनम् ।
वीरान्कृतास्त्रान्समरे सर्वानेवानिवर्तिनः ॥ १४
अक्षौहिणीपतीनुग्रान्संहतान्युद्धदुर्मदान् ।
त्वामृते पुरुषव्याघ्र जेतुं शक्तः पुमानिह ॥ १५
श्रेण्यश्च बहुलाः क्षीणाः प्रदीर्णाश्वरथद्विपाः ।
नानाजनपदाश्चोग्राः क्षत्रियाणाममर्षिणाम् ॥ १६
गणाश्च दासमीयानां वसातीनां च भारत ।
प्राच्यानां वाटधानानां भोजानां चाभिमानिनाम्
उदीर्णाश्वगजा सेना सर्वक्षत्रस्य भारत ।
त्वां समासाद्य निधनं गता भीमं च भारत ॥ १८
उग्राश्च भीमकर्माणस्तुषारा यवनाः खशाः ।
दार्वाभिसारा दरदाः शका माठरतङ्कणाः ॥ १९
आन्ध्रकाश्च पुलिन्दाश्च किराताश्चोग्रविक्रमाः ।
म्लेच्छाश्च पर्वतीयाश्च सागरानूपवासिनः ॥ २०
संरम्भिणो युद्धशौण्डा बलिनो दण्डपाणयः॥२१
एते सुयोधनस्यार्थे संरब्धाः कुरुभिः सह ।
न शक्या युधि निर्जेतुं त्वदन्येन परंतप ॥ २२
धार्तराष्ट्रमुदग्रं हि व्यूढं दृष्ट्वा महद्बलम् ।
यदि त्वं न भवेत्त्राता प्रतीयात्को नु मानवः ॥ २३
तत्सागरमिवोद्भूतं रजसा संवृतं बलम् ।
विदार्य पाण्डवैः क्रुद्धैस्त्वया गुप्तैर्हतं विभो ॥ २४
मागधानामधिपतिर्जयत्सेनो महाबलः ।
अद्य सप्तैव चाहानि हतः सङ्ख्येऽभिमन्युना ॥२५
ततो दशसहस्राणि गजानां भीमकर्मणाम् ।
जघान गदया भीमस्तस्य राज्ञः परिच्छदम् ॥ २६
तथान्येऽभिहता नागा रथाश्च शतशो बलात् ।
तदेवं समरे पार्थ वर्तमाने महाभये ॥ २७
भीमसेनं समासाद्य त्वां च पाण्डव कौरवाः ।
सवाजिरथमातङ्गा मृत्युलोकमितो गताः ॥ २८
तथा सेनामुखे तत्र निहते पार्थ पाण्डवैः ।
भीष्मः प्रासृजदुग्राणि शरजालानि मारिष ॥ २९
सचेदिकाशिपाञ्चालान्करूशान्मात्स्यकेकयान् ।
शरैः प्रच्छाद्य निधनमनयत्परमास्त्रवित् ॥ ३०
तस्य चापच्युतैर्बाणैः परदेहविदारणैः ।
पूर्णमाकाशमभवद्बुक्मपुङ्खैरजिह्मगैः ॥ ३१
हन्याद्रथसहस्राणि एकैकेनैव मुष्टिना ।
लक्षं नरद्विपान्हत्वा समेतान्समहाबलान् ॥ ३२
गत्या दशम्या ते गत्वा जघ्नुर्वाजिरथद्विपान् ।
हित्वा नवगतीर्दुष्टाः स बाणानाहवेऽत्यजत् ॥ ३३
दिनानि दश भीष्मेण निघ्नता तावकं बलम् ।
शून्याः कृता रथोपस्था हताश्च गजवाजिनः ॥ ३४
'दशमेऽहनि संप्राप्ते कृत्वा घोरं पराक्रमम् ।'
दर्शयित्वाऽऽत्मनो रूपं रुद्रोपेन्द्रसमं युधि ॥ ३५
पाण्डवानामनीकानि प्रविगाह्य विशांपते ।
विनिघ्नन्पृथिवीपालांश्चेदिपाञ्चालकेकयान् ॥ ३६
अहनत्पाण्डवीं सेनां रथाश्वगजसंकुलाम् ।
मज्जन्तमप्लवे मन्दमुज्जिहीर्षुः सुयोधनम् ॥ ३७
तथा चरन्तं समरे तपन्तमिव भास्करम् ।
पदातिकोटिसाहस्राः प्रवरायुधपाणयः ॥ ३८
न शेकुः सृञ्जया द्रष्टुं तथैवान्ये महीक्षितः ।
विचरन्तं तथा तं तु संग्रामे जितकाशिनम् ॥ ३९
सर्वोद्यमेन महता पाण्डवान्समभिद्रवत् ।
स तु विद्राव्य समरे पाण्डवान्सृञ्जयानपि ।
एक एव रणे भीष्म एकवीरत्वमागतः ॥ ४०
तं शिखण्डी समासाद्य त्वया गुप्तो महाव्रतम् ।
जघान पुरुषव्याघ्रं शरैः सन्नतपर्वभिः ॥ ४१
स एष पतितः शेते शरतल्पे पितामहः ।
त्वां प्राप्य पुरुषव्याघ्र वृत्रः प्राप्येव वासवम् ॥४२
द्रोणः पञ्चदिनान्युग्रो विधम्य रिपुवाहिनीम् ।
कृत्वा व्यूहमभेद्यं च पातयित्वा महारथान् ॥४३
जयद्रथस्य समरे कृत्वा रक्षां महारथः ।
अन्तकप्रतिमश्चोग्रो रात्रियुद्धेऽदहत्प्रजाः ॥ ४४
दग्ध्वा योधाञ्छरैर्वीरो भारद्वाजः प्रतापवान् ।
धृष्टद्युम्नं समासाद्य स गतः परमां गतिम् ॥ ४५

यदि त्र त्राता न भवेत्तर्हि तद्धार्तराष्ट्रं बल कोनु प्रतीयाद्रच्छेदिति सबन्ध ॥ २३ ॥

यदि वाऽद्य भवान्युद्धे सूतपुत्रमुखान्रथान्।
नावारयिष्यः संग्रामे न स्म द्रोणो व्यनङ्क्ष्यत ४६
भवता तु बलं सर्वं धार्तराष्ट्रस्य वारितम्।
ततो द्रोणो हतो युद्धे पार्षतेन धनञ्जय ॥ ४७
कश्च शक्तो रणे कर्तुं त्वदन्यः पुरुषब्रुवः।
यादृशं ते कृतं पार्थ जयद्रथवधं प्रति ॥ ४८
निवार्य सेनां महतीं हत्वा शूरांश्च पार्थिवान्।
निहतः सैन्धवो राजा त्वयाऽस्त्रबलतेजसा ॥ ४९
आश्चर्यं सिन्धुराजस्य वधं जानन्ति पार्थिवाः।
अनाश्चर्यं हि तत्त्वत्तस्त्वं हि पार्थ महारथः ॥ ५०
त्वां हि प्राप्य रणे क्षत्रमेकाहादिति भारत।
नश्यमानमहं युक्तं मन्येयमिति मे मतिः ॥ ५१
सेयं पार्थ चमूर्घोरा धार्तराष्ट्रस्य संयुगे।
हतसर्वस्वभूयिष्ठा भीष्मद्रोणौ हतौ तथा ॥ ५२
शीर्णप्रवरयोधाढ्या हतवाजिरथद्विपा।
हीना सूर्येन्दुनक्षत्रैर्द्यौरिवाभाति भारती ॥ ५३
विध्वस्ता हि रणे पार्थ सेनेयं भीमविक्रम।
आसुरीव महासेना देवराजपराक्रमैः ॥ ५४
तेषां हतावशिष्टास्तु सन्ति पञ्च महारथाः।
द्रौणिश्च कृतवर्मा च कर्णो मद्राधिपः कृपः ॥ ५५
तांस्त्वमद्य नरव्याघ्र हत्वा पञ्च महारथान्।
हतामित्रः प्रयच्छोर्वीं राज्ञे सद्वीपपत्तनाम् ॥ ५६
साकाशजलपातालां सपर्वतमहावनाम्।
प्रयच्छामितवीर्याय पार्थायाद्य वसुन्धराम् ॥ ५७
एतां पुरा विष्णुरिव हत्वा दैतेयदानवान्।
प्रयच्छ मेदिनीं राज्ञे शक्रायैव हरिर्यथा ॥ ५८
अद्य मोदन्तु पाञ्चाला निहतेष्वरिषु त्वया।
विष्णुना निहतेष्वेव दानवेयेषु देवताः ॥ ५९
यदि वा द्विपदां श्रेष्ठं द्रोणं मानयतो गुरुम्।
अश्वत्थाम्नि कृपा तेऽस्ति कृपे वाचार्यगौरवात् ६०
अत्यन्तापचितान्बन्धून्मानयन्मातृबान्धवान्।
कृतवर्माणमासाद्य न नेष्यसि यमक्षयम् ॥ ६१
भ्रातरं मातुरासाद्य शल्यं मद्रजनाधिपम्।
यदि त्वमरविन्दाक्ष दयावान्न जिघांससि ॥ ६२
एतत्ते सुकृतं कर्म नात्र किंचन विद्यते।
वयमप्यनुजानीमो नात्र दोषोऽस्ति कश्चन ॥ ६३
इमं पापमतिं क्षुद्रमत्यन्तं पाण्डवान्प्रति।
कर्णमद्य नरश्रेष्ठ जहि पार्थ शितैः शरैः ॥ ६४
दहने यत्सपुत्राया निशि मातुस्त्वानघ।
द्यूतार्थे यच्च युष्मासु प्रावर्तत सुयोधनः।
तस्य सर्वस्य दुष्टात्मा कर्णो वै मूलमित्युत ॥ ६५
प्रोत्साहयति दुष्टात्मा धार्तराष्ट्रं सुदुर्मतिम्।
समितौ गदते कर्णस्तमद्य जहि भारत ॥ ६६
यश्च युष्मासु पापं वै धार्तराष्ट्रः प्रयुक्तवान्।
तस्य सर्वस्य दुर्बुद्धिः कर्णो मूलमिहार्जुन ॥ ६७
कर्णं हि मन्यते त्राणं नित्यमेव सुयोधनः।
ततो मामपि संरब्धो निग्रहीतुं पराक्रमात् ॥ ६८
स्थिता बुद्धिर्नरेन्द्राणां धार्तराष्ट्रस्य चोभयोः।
कर्णः पार्थान्रणे सर्वान्नाशयिष्यति सायकैः ॥ ६९
कर्णमाश्रित्य कौन्तेय धार्तराष्ट्रस्य विग्रहः।
रुचितो भवता सार्धं जानतोऽपि बलं तव ॥ ७०
कर्णो जल्पति वै नित्यमहं पार्थान्समागतान्।
वासुदेवं च दाशार्हं विजेष्यामि महारणे।
समितौ वल्गते कर्णस्तमद्य जहि फल्गुन ॥ ७१
यच्च युष्मासु पापं वै धार्तराष्ट्रः प्रतापवान्।
सभायां कृतवान्नित्यं कर्णमाश्रित्य वै पुरा ॥ ७२
यच्च तं धार्तराष्ट्राणां पङ्क्तिः शूरैर्महारथैः।
पश्यतां संवृतं शूरं सौभद्रमपराजितम् ॥ ७३
द्रोणद्रौणिकृपान्वीरान्कम्पयानं महेषुभिः।
विधमन्तमनीकानि प्रमथन्तं महारथान् ॥ ७४
मनुष्यवाजिमातङ्गान्प्रेषयन्तं यमक्षयम्।
शरैः सौभद्रमायान्तं दहन्तमरिवाहिनीम् ॥ ७५
निर्मनुष्याश्च मातङ्गा विरथाश्च महारथाः।
प्रद्रवन्ति स्म समरे दिशो भीताऽभिमन्यवे ॥ ७६
विगतासूंश्च तुरगान्पत्तीन्व्यायुधजीवितान्।
कुर्वन्तमृषभस्कन्धं कुरुवृष्णियशस्करम्।

त्वाहीति। क्षणेन सर्वं भस्मीकर्तुं समर्थं त्वा प्राप्य एकाहान्नश्यमान क्षत्र युक्त बलवत्तर मन्येय जानीयाम्। क्षणेन नाश्यमपि पूर्णैकाहपर्यन्त स्थायित्वादिति भावः ॥ ५१ ॥

तन्मे दहति गात्राणि सखे सत्येन ते शपे ॥ ७७
यत्तदासीत्सुदुष्टात्मा कर्णो विनिहतः प्रभुः ।
न शक्तो ह्यभिमन्योस्तु कर्णः स्थातुं रणाग्रतः ७८
सौभद्रशरनिर्भिन्नो विसंज्ञः शोणितोक्षितः ।
निश्वसन्क्रोधसंदीप्तो विमुखः सायकार्दितः॥ ७९
तस्थौ स विह्वलः सङ्ख्ये प्रहारजनितच्छविः ।
अपयानकृतोत्साहो निरुत्साहश्च भारत ॥ ८०
दुर्योधनं रणे दृष्ट्वा लज्जमानो मुहुर्मुहुः ।
नापयासीत्ततः पार्थ सोऽभिमन्योर्महारणे॥ ८१
दृष्ट्वा द्रोणं वधोपायमभिमन्योश्च पृष्टवान् ।
श्रुत्वा द्रोणवचः क्रूरं ततश्चिच्छेद कार्मुकम्॥ ८२
ततश्छिन्नायुधं तेन दृष्ट्वा पञ्च महारथाः ।
स चैव निकृतिप्राज्ञः प्राहिणोच्छरवृष्टिभिः॥ ८३
प्रहसन्स तु दुष्टात्मा कर्णो राजा च कौरवः ।
यच्च कर्णोऽब्रवीत्कृष्णां सभायां परुषं वचः ।
प्रमुखे पाण्डवेयानां कुरूणां चैव पश्यताम्॥८४
विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः ।
पतिमन्यं पृथुश्रोणि वृणीष्व मृदुभाषिणि॥ ८५
एषा त्वं धृतराष्ट्रस्य दासीभूता निवेशनम् ।
प्रविशारालपक्ष्माक्षि न सन्ति पतयस्तव ॥ ८६
न पाण्डवाः प्रभवन्ति तव कृष्णे कथंचन ।
दासभार्या च पाञ्चालि स्वयं दासी च शोभने॥८७
अद्य दुर्योधनो राजा पृथिव्यां नृपतिः स्मृतः ।
सर्वे चास्य महिषाला योगक्षेममुपासते ॥ ८८
पश्येदानीं यदा भद्रे निविष्टाः पाण्डवाः समम् ।
अन्योन्यं समुदीक्षन्ते धार्तराष्ट्रस्य तेजसा ॥ ८९
व्यक्तं षण्डतिला ह्येते नरके च निमज्जिताः ।
प्रेष्यवच्चापि राजानमुपस्थास्यन्ति कौरवम्॥ ९०
उक्तवान्स च पापात्मा तथा परमदुर्मतिः ।
पापः पापवचः कर्णः पश्यतस्ते धनञ्जय ॥ ९१
अस्य पापस्य तद्वाक्यं सुवर्णविकृताः शराः ।
शमयन्ति शिलाधौता नाशयन्तोऽस्य जीवितम्॥
अद्य कर्णं रणे ग्रस्तं पश्यन्तु कुरवस्त्वया ।
स्वर्गावतरणे यत्नं स्वर्गद्वारगतं यथा ॥ ९२
अद्य ते समरे वीर्यं पश्यन्तु कुरुयोधिनः ।
सूतपुत्रे हते पार्थ जानन्तु त्वां महारथम् ॥ ९४
अद्य काकबला गृध्रा वायसा जम्बुकास्तथा ।
विप्रकर्षन्तु गात्राणि सूतपुत्रस्य मारिष ॥ ९५
अद्याधिरथिराक्षिप्तो निहतश्च त्वया रणे ।
कुरूणां शोकमाधत्तां पाण्डवानां मुदं तदा॥ ९६
अद्य त्वां प्रतिमर्दन्तु पाञ्चालाः पाण्डवैः सह ।
यथा वृत्रवधे वृत्ते देवाः सर्वे शतक्रतुम् ॥ ९७
अद्य कर्णं रणे हत्वा प्राप्य चैवोत्तमं यशः ।
विशोको विज्वरः पार्थ भव बन्धुपुरस्कृतः॥ ९८
नरसिंहवपुः कृत्वा यथा शस्तो महासुरः ।
हिरण्यकशिपुर्दैत्यो विष्णुना प्रभविष्णुना ॥ ९९
तथा त्वमपि राधेयं घोरां कृत्वा महातनुम् ।
जहि युद्धे महाबाहो त्रायस्व च भयात्स्वकान् १००
कर्ण हाहाकृतं दीनं विषण्णं त्वच्छरार्दितम् ।
प्रपतन्तं महीं कर्ण पश्यन्तु वसुधाधिपाः॥१०१
तं च स्वशोणिते मग्नं शयानं पतितं भुवि ।
अपविद्धायुधं कर्णमद्य पश्यन्तु बान्धवाः॥१०२
तच्चैवाद्य महत्कर्म गाण्डीवप्रेषितैः शरैः ।
रथोपस्थे विशीर्येत ताराराज इवाम्बरात्॥ १०३
आशु चाद्य शरास्तस्य संपतन्तो महाजवैः ।
त्वच्छरैः संनिकृत्ताग्रा विशीर्यन्ते महीतले॥ १०४
त्वया चाद्य हते तस्य विक्रमे भरतर्षभ ।
विमुखाः सर्वराजानो भवन्तु गतजीविताः॥१०५
तथा चाधिरथौ याते प्रयान्तु कुरवो दिशः ।
मन्वानास्तं रथश्रेष्ठं सर्वलोकेषु धन्विनाम्॥ १०६
स वै चाद्य भयात्त्यक्त्वा धार्तराष्ट्रो महाचमूम् ।
दुर्योधनो भयोद्विग्नो द्रवतु स्वं निवेशनम्॥ १०७
तथा चाद्य हतं श्रुत्वा धृतराष्ट्रो जनेश्वरः ।
क्षणेन निपतेद्भूमौ विसंज्ञो वै महीपतिः॥ १०८
अद्य जानन्तु ते पार्थ विक्रमं सर्वयोधिनः ।
यदुवाच सभामध्ये परुषं भारत त्वयि ॥ १०९
यानि चान्यानि दुष्टात्मा पापानि कृतवांस्त्वयि ।
तान्यद्य भरतश्रेष्ठ नाशयन्तु शरास्तव ॥ ११०

शान्तिं कुरु परिक्लेशा कृष्णायाः शत्रुतापन ।
हत्वा शत्रुं रणे श्लाघ्यं गर्जन्तमतिपौरुषम् ॥ १११
अद्य चाधिरथिर्विद्धस्तव बाणैः समन्ततः ।
मन्यतां त्वां नरव्याघ्र प्रवरं सर्वधन्विनाम्॥ ११२
गाण्डीवप्रसृतान्बाणानद्य गात्रस्पृशः शरान् ।
यातु कर्णो रणे पार्थ श्वाविच्छललतो यथा ॥११३
तं कथं कर्णमासाद्य विद्रवेयुर्महारथाः ।
यस्त्वेकः सर्वपाञ्चालानहन्यहनि नाशयन् ।
कालवच्चरते वीर पाञ्चालानां रथव्रजे ॥ ११४
तमप्यासाद्य समरे मित्रार्थे मित्रवत्सल ।
तथा ज्वलन्तमस्त्रैश्च शूरं सर्वधनुष्मताम् ।
निर्दहन्तं समारूढं दुर्धर्षं द्रोणमञ्जसा ॥ ११५
ते नित्यमुदिता जेतुं युधि शत्रुमरिन्दमाः ।
न चेदाधिरथेर्भीताः पाञ्चालाः स्युः पराङ्मुखाः॥
तेषामापततां शूरः पाञ्चालानां तरस्विनाम् ।
आदत्तासूञ्शरैः कर्णः पतङ्गानामिवानलः॥११७
एते द्रवन्ति पाञ्चाला द्राव्यन्ते योधिभिर्ध्रुवम् ।
कर्णेन भरतश्रेष्ठ पश्यपश्य तथाकृतान् ॥ ११८
तान्समारोहतः शूरान्मित्रार्थे त्यक्तजीवितान् ।
निस्तारय महाबाहो कर्णास्त्रात्पावकोपमात्॥११९
अस्त्रं हि रामात्कर्णेन भार्गवादधिसत्तमात् ।
यदवाप्तं तदा घोरं तस्य रूपमुदीर्यते ॥ १२०
तापनं सर्वसैन्यस्य घोररूपं भयानकम् ।
यमाश्रित्य महासेना ज्वलते स्वेन तेजसा॥ १२१
एते चरन्ति संग्रामे कर्णचापच्युताः शराः ।
प्रभया इह शत्रूणां घातयन्तो जनान्प्रभो॥ १२२
एते भ्रमन्ति पाञ्चाला उत्क्रमन्ति च मारिष ।
कर्णास्त्रं समरे प्राप्य दुर्निवार्यं महात्मभिः॥ १२३
एष भीमो दृढक्रोधो वृतः पार्थ समन्ततः ।
सृञ्जयैर्योऽजयत्कर्णं पीड्यते निशितैः शरैः॥१२४
पाञ्चालान्सृञ्जयांश्चैव पाण्डवांश्चैव भारत ।
उपेक्षितो दहेत्कर्णो रोगो देहमिवान्तकः॥ १२५
नान्यं त्वत्तो हि पश्यामि योधं यौधिष्ठिरे बले ।
यः समासाद्य राधेयं स्वस्तिमानाव्रजेद्गृहान्॥१२६
तमद्य निशितैर्बाणैर्निहत्य भरतर्षभ ।
यथा प्रतिज्ञां त्वं पार्थ तीर्त्वा कीर्तिमवाप्स्यसि ॥
त्वं हि शक्तो रणे कर्णं विजेतुं सह पार्थिवैः ।
नान्यो युधि युधां श्रेष्ठ सत्यमेतद्ब्रवीमि ते॥ १२८
एतत्कृत्वा महत्कर्म हत्वा कर्णं महारथम् ।
कृतार्थः सफलः पार्थ सुखी भव नरोत्तम॥ १२९

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

अर्जुनेन कृष्णाग्रे कर्णवधानन्तरभाव्यर्थानुवर्णनपूर्वकं तद्वधप्रतिज्ञा ॥ १ ॥

सञ्जय उवाच ।
स केशवस्य बीभत्सुः श्रुत्वा भारत भाषितम् ।
विशोकः संप्रहृष्टश्च क्षणेन समपद्यत ॥ १
ततो ज्यामभिमृज्याशु व्याक्षिपद्गाण्डिवं धनुः ।
दध्रे कर्णविनाशाय केशवं चाभ्यभाषत ॥ २
त्वया नाथेन गोविन्द ध्रुव एव जयो मम ।
प्रसन्नो यस्य भगवान्भूतभव्यभविष्यकृत् ॥ ३
त्वत्सहायो ह्यहं कृष्ण त्रींल्लोकान्वै समागतान् ।
प्रापयेयं परं लोकं किमु कर्णं महाहवे ॥ ४
पश्यामि द्रवतीं सेनां पाञ्चालानां जनार्दन ।
पश्यामि कर्णं समरे विचरन्तमभीतवत् ॥ ५
भार्गवास्त्रं च पश्यामि ज्वलन्तं कृष्ण सर्वशः ।
सृष्टं कर्णेन वार्ष्णेय शक्रेणेव महाशनिम् ॥ ६
अनेन खलु संग्रामे यत्तु कृष्ण मया कृतम् ।
कथयिष्यन्ति भूतानि यावद्भूमिर्धरिष्यति ॥ ७
अद्य कृष्ण विकर्णा मे कर्णं नेष्यन्ति मृत्यवे ।
गाण्डीवमुक्ताः क्षिण्वन्तो मम हस्तप्रचोदिताः॥८
अद्य राजा धृतराष्ट्रः स्वां बुद्धिमवमंस्यते ।

परिक्लेशा परिक्लेशानाम् ॥१११॥ सप्तसप्ततितमोऽध्याय ॥७७॥

ज्वलन्तम् । पुंस्त्वमार्षम् ॥ ६ ॥

दुर्योधनमराज्यार्हं यया राज्येऽभ्यषेचयत् ॥ ९
अद्य राज्यात्सुखाच्चैव श्रियो राष्ट्रात्तथा पुरात् ।
पुत्रेभ्यश्च महाबाहो धृतराष्ट्रो विमोक्ष्यति ॥ १०
गुणवन्तं हि यो हित्वा निर्गुणं कुरुते प्रभुम् ।
स शोचति चिरं कृष्ण क्षिप्रमेवागते क्षये ॥ ११
यथा च पुरुषः कश्चिच्छित्त्वा चाम्रवणं महत् ।
पलाशसेचने बुद्धिं कृत्वा शोचति मन्दधीः ॥ १२
दृष्ट्वा पुष्पं पले गृध्नुः फलं दृष्ट्वाऽनुशोचति ।
तथेदं धृतराष्ट्रस्य पुष्पलुब्धस्य मानद ।
फलं दृष्ट्वा भृशं दुःखं भविष्यति जनार्दन ॥ १३
सूतपुत्रे हते त्वद्य निराशो भविता प्रभुः ॥ १४
अद्य दुर्योधनो राज्याज्जीविताच्च निराशकः ।
भविष्यति हते कर्णे कृष्ण सत्यं ब्रवीमि ते ॥ १५
अद्य दृष्ट्वा मया कर्णं शरैर्विशकलीकृतम् ।
स्मरतां तव वाक्यानि शमं प्रति जनेश्वरः ॥ १६
अद्यासौ सौबलः कृष्ण ग्लहाञ्जानातु वै शरान् ।
दुरोदरं च गाण्डीवं मण्डलं च रथं मम ॥ १७
अद्य कुन्तीसुतस्याहं दृढं राज्ञः प्रजागरम् ।
व्यपनेष्यामि गोविन्द हत्वा कर्णं शितैः शरैः ॥ १८
अद्य कुन्तीसुतो राजा हते सूतसुते मया ।
सुप्रहृष्टमनाः प्रीतश्चिरं सुखमवाप्स्यति ॥ १९
अद्य चाहमनाधृष्यं केशवाप्रतिमं शरम् ।
उत्सक्ष्यामीह यः कर्णं जीविताद्भ्रंशयिष्यति ॥ २०
यस्य चैतद्व्रतं मह्यं वधे किल दुरात्मनः ।
पादौ न धावये तावद्यावद्धन्यां न फल्गुनम् ॥ २१
मृषा कृत्वा व्रतं तस्य पापस्य मधुसूदन ।
पातयिष्ये रथात्काये शरैः सन्नतपर्वभिः ॥ २२
योसौ रणे नरं नान्यं पृथिव्यामनुमन्यते ।
तस्याद्य सूतपुत्रस्य भूमिः पास्यति शोणितम् ॥ २३
अपतिर्ह्यसि कृष्णेति सूतपुत्रो यदब्रवीत् ।
धृतराष्ट्रमते कर्णः श्लाघमानः स्वकान्गुणान् ॥ २४
अनृतं तत्करिष्यन्ति मामका निशिताः शराः ।
आशीविषा इव क्रुद्धास्तस्य पास्यन्ति शोणितम् २५
मया हस्तवता मुक्ता नाराचा वैद्युतत्विषः ।
गाण्डीवसृष्टा दास्यन्ति कर्णस्य परमां गतिम् ॥ २६
अद्य तप्स्यति राधेयः पाञ्चालीं यत्तदब्रवीत् ।
सभामध्ये वचः क्रूरं कुत्सयन्पाण्डवान्प्रति ॥ २७
एते षण्डतिलाः कृष्णे निर्वीर्या हतविक्रमाः ।
अहं वः पाण्डवेयेभ्यो भयात्त्रास्येति चाब्रवीत् ।
हन्ताऽहं पाण्डवान्सर्वान्सपुत्रानिह भारत ॥ २८
अनृतं तत्करिष्यन्ति मामका निशिताः शराः ।
हते वैकर्तने कर्णे सूतपुत्रे दुरात्मनि ॥ २९
यस्य वीर्यं समाश्रित्य धार्तराष्ट्रो बृहन्मनाः ।
तमद्य कर्णं हन्तास्मि समरे मधुसूदन ॥ ३०
अद्य कर्णे हते कृष्ण धार्तराष्ट्राः सराजकाः ।
विद्रवन्ति दिशो भीताः सिंहं दृष्ट्वा मृगा इव ॥ ३१
अद्य दुर्योधनो राजा पृथिवीं नान्ववेक्षते ।
हते कर्णे मया सङ्ख्ये सपुत्रे ससुहृज्जने ॥ ३२
अद्य कर्णं हतं दृष्ट्वा धार्तराष्ट्रोऽत्यमर्षणः ।
जानातु मां रणे कृष्ण प्रवरं सर्वधन्विनाम् ॥ ३३
सपुत्रपौत्रः सामात्यः ससुहृच्च निराशिषः ।
पित्र्ये राज्ये निराशश्च धार्तराष्ट्रो निराश्रयः ३४
अद्य राजा धर्मपुत्रो हतामित्रो भविष्यति ।
अद्य दुर्योधनो दीप्तां श्रियं राज्यं च हास्यति ॥ ३५
हते वैकर्तने कर्णे भीष्मे द्रोणे च संयुगे ।
कातरं तद्बलं कृष्ण प्रविष्टं भोक्ष्यते तु यत् ॥ ३६
अद्यप्रभृति राजानं धर्मपुत्रं युधिष्ठिरम् ।
अनुमोदन्तु सुहृदो ज्ञातयश्च ब्राह्मणाः ॥ ३७
अद्य तं निहतं श्रुत्वा कर्णं वैकर्तनं मया ।
करोतु पटहोन्मिश्रं देवतास्थानपूजनम् ॥ ३८
अद्य कृष्ण हते कर्णे कुरुतां चिरसंभृतम् ।
याजनं वै महाबाहो देवतानां यथाविधि ॥ ३९
अद्य त्वम्बा च कृष्णा च त्वरमाणे परस्परम् ।
सस्वजेतां हृषीकेश संपूर्णेऽस्मिन्मनोरथे ॥ ४०
अद्य त्वं पाण्डवो ज्येष्ठस्तथाऽऽर्यश्च वृकोदरः ।
उदीक्षेतां हते कर्णे कृष्ण सौम्येन चक्षुषा ॥ ४१

स्मरता स्मरतु ॥ १६ ॥ मण्डलं द्यूते शारीस्थापनपट्टम् । दुरोदरं पाशम् ॥ १७ ॥ अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

अभिवाद्य गुरूनद्य कनिष्ठैश्चाभिवादितः।
सस्वजानो ह्यहं दोर्भ्यां प्राप्स्यामि विपुलं यशः ४२
अद्य कर्णे हते कृष्ण प्रशंसन्तोऽर्जुनं सुराः।
त्रिदिवं यान्तु संहृष्टाः संगताश्च तपोधनाः॥ ४३
अद्य लोकास्त्रयः कृष्ण जानन्तु मम पौरुषम्।
दृष्ट्वा कर्णं हतं युद्धे द्वैरथे सव्यसाचिना॥ ४४
अद्याहमनृणः कृष्ण भविष्यामि धनुष्मताम्।
रथस्य च शराणां च धनुषो गाण्डिवस्य च॥ ४५
मोक्ष्याम्यद्य महद्दुःखं त्रयोदशसमार्जितम्।
हत्वा कर्णं रणे कृष्ण शम्बरं मघवानिव॥ ४६
अद्य कर्णे हते युद्धे सोमकानां महारथाः।
कृतकार्याः प्रमोदन्तां मित्रकार्येप्सवो युधि॥ ४७
न जाने च कथं प्रीतिः शैनेयस्याद्य माधव।
अहं हत्वा रणे कर्णं पुत्रांश्चास्य जयाधिकान्।
प्रीतिं दास्यामि भीमस्य सात्यकेर्यमयोस्तथा ४८
धृष्टद्युम्नस्य वीरस्य तथैव च शिखण्डिनः।
अद्यानृण्यं गमिष्यामि हत्वा कर्णं महाहवे।
धर्मराजस्य संश्रुत्य वार्ष्णेयशपथं मिथः॥ ४९
अद्य पश्यन्तु सङ्ग्रामे धनञ्जयममर्षणम्।
युध्यन्तं कौरवैः सार्धं घातयन्तं च सूतजम्॥ ५०
भवत्समक्षं वक्ष्यामि पुनरेवात्मसंस्तवम्।
इत्यप्यमित्रप्रवरमद्याहं हन्मि सूतजम्॥ ५१
धनुर्वेदे मत्समः को नु लोके
पराक्रमे वा मम कोऽस्ति तुल्यः।
को वाऽप्यन्यो मत्समोऽस्ति क्षमायां
ममानृशंस्ये सदृशोऽस्ति कोऽन्यः॥ ५२
अहं धनुष्मान्ससुरासुरांश्च
सर्वाणि भूतानि च संगतानि।
स्वबाहुवीर्याद्भयये पराभवं
मत्पौरुषं विद्धि परं परेभ्यः॥ ५३
शरार्चिषा गाण्डिवेनाहमेकः
सर्वान्कुरून्वाहिकांश्चाभिपन्नः।
हिमात्यये कक्षगतो यथाऽग्निः
स निर्दहेयं सहसा प्रगृह्य॥ ५४
पाणी पृषत्कालिखितौ ममैतौ
धनुश्च सज्ये विततं सबाणम्।
पादौ चेमौ सुरथौ सध्वजौ च
न मादृशं युद्धगतं भजन्ति॥ ५५

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे अष्टसप्ततितमोऽध्यायः॥ ७८॥

एकोनाशीतितमोऽध्यायः॥ ७९॥

द्वन्द्वयुद्धम्॥ १॥

[धृतराष्ट्र उवाच।
समागमे पाण्डवसृञ्जयानां
महाभये मामकानामगाधे।
धनंजये तात रणाय याते
कर्णेन तद्युद्धमथोऽत्र कीदृक्॥] १

सञ्जय उवाच।
तेषामनीकानि महाध्वजानि
रणे समृद्धानि सुसंगतानि।
भेरीनिनादोन्मुखराण्यगर्ज-
न्मेघा इव प्रावृषि मारुतास्ताः॥ २
महागजाभ्राकुलमस्त्रतोयं
वादित्रनेमीतलशब्दवच्च।
हिरण्यचित्रायुधविद्युतं च
शरासिनाराचमहास्त्रधारम्॥ ३
तद्भीमवेगं रुधिरौघवाहि
खड्गाकुलं क्षत्रियजीवघाति।
अनार्तवं क्रूरमनिष्टवर्षं
बभूव संरम्भकरं प्रजानाम्॥ ४
एकं रथं संपरिवार्य मृत्युं
नयन्त्यनेके च रथाः समेताः।
एकस्तथैकं रथिनं रथाभ्यां-
स्तथा रथश्चापि रथाननेकान्॥ ५
रथं समूतं सहयं च कंचि-
त्कश्चिद्रथी मृत्युवशं निनाय।

निनाय चाप्येकगजेन कश्चि-
द्रथान्वहून्मृत्युवशे तथाश्वान् ॥ ६
रथान्समृतान्सहयान्गजांश्च
सर्वानरीन्मृत्युवशं शरौघैः ।
निन्ये हयांश्चैव तथा ससादी-
न्पदातिसङ्घांश्च तथैव पार्थः ॥ ७
कृपः शिखण्डी च रणे समेतौ
दुर्योधनं सात्यकिरभ्यगच्छत् ।
श्रुतश्रवा द्रोणपुत्रेण सार्धं
युधामन्युश्चित्रसेनेन सार्धम् ॥ ८
कर्णस्य पुत्रं तु रथी सुषेणं
समागतं सृञ्जयश्चोत्तमौजाः ।
गान्धारराजं सहदेवोऽक्षधूर्तं
महर्षभं सिंह इवाभ्यधावत् ॥ ९
शतानीको नाकुलिः कर्णपुत्रं
युवा युवानं वृषसेनं शरौघैः ।
समार्पयत्कर्णपुत्रश्च शूरः
पाञ्चालेयं शरवर्षैरनेकैः ॥ १०
रथर्षभः कृतवर्माणमार्च्छ-
न्माद्रीपुत्रो नकुलश्चित्रयोधी ।
पाञ्चालानामधिपो याज्ञसेनिः
सेनापतिः कर्णमार्च्छत्ससैन्यम् ॥ ११
दुःशासनो भारत भारतं तु
व्यात्ताननं क्रूरमिवान्तकाभम् ।
भीमं रणे शस्त्रभृतां वरिष्ठं
भीमं समार्च्छत्तमसह्यवेगम् ॥ १२
कर्णात्मजं तत्र जघान वीर-
स्तथाच्छिनच्चोत्तमौजाः प्रसह्य ।
तस्योत्तमाङ्गं निपपात भूमौ
निनादयद्द्यां निनदेन खं च ॥ १३
सुषेणशीर्षं पतितं पृथिव्यां
विलोक्य कर्णोऽथ तदार्तरूपः ।
क्रोधाद्ययांस्तस्य रथं ध्वजं च
बाणैः सुधारैर्निशितैरकृन्तत् ॥ १४
स तूत्तमौजा निशितैः पृषत्कै-
र्विव्याध खड्गेन च भास्करेण ।
पार्ष्णिग्रहांश्चैव कृपस्य हत्वा
शिखण्डिवाहं स ततोऽध्यरोहत् ॥ १५
कृपं तु दृष्ट्वा विरथं रथस्थो
नैच्छच्छरैस्ताडयितुं शिखण्डी ।
तं द्रौणिरावार्य रथं कृपस्य
समुज्जहे पङ्गुगतां यथा गाम् ॥ १६
हिरण्यवर्मा निशितैः पृषत्कै-
स्तवात्मजानामनिलात्मजो वै ।
अतापयत्सैन्यमतीव भीमः
काले शुचौ मध्यगतो यथार्कः ॥ १७

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

अशीतितमोऽध्यायः ॥ ८० ॥

भीमसेनविशोकयोः संवादः ॥ १ ॥

सञ्जय उवाच ।
अथ त्विदानीं तुमुले विमर्दे
द्विषद्भिरेको बहुभिः समावृतः ।
महारणे सारथिमित्युवाच
भीमश्चमूं वाहय धार्तराष्ट्रीम् ।
त्वं सारथे याहि जवेन वाहै-
र्नयाम्येतान्धार्तराष्ट्रान्यमाय ॥ १
संचोदितो भीमसेनेन चैवं
स सारथिः पुत्रबलं त्वदीयम् ।
प्रायात्ततः सत्वरमुग्रवेगो
यतो भीमस्तद्बलं गन्तुमैच्छत् ॥ २

पाञ्चालेय पाञ्चालीतनय नाकुलिम् ॥ १० ॥

एकोनाशीतितमोऽध्याय ॥ ७९ ॥

ततोऽपरे नागरथाश्वपत्तिभिः
प्रत्युद्ययुस्तं कुरवः समन्तात्।
भीमस्य वाहाम्युदारवेगं
समन्ततो बाणगणैर्निजघ्नुः॥ ३

ततः शरानापततो महात्मा
चिच्छेद बाणैस्तपनीयपुङ्खैः।
ते वै निपेतुस्तपनीयपुङ्खा
द्विधा त्रिधा भीमशरैर्निकृत्ताः॥ ४

ततो राजन्नागरथाश्वयूनां
भीमाहतानां वरराजमध्ये।
घोरो निनादः सुमहानभूत्तदा
वज्राहतानामिव पर्वतानाम्॥ ५

ते वध्यमानाश्च नरेन्द्रमुख्या
निर्भिद्यन्तो भीमशरप्रवेकैः।
भीमं समन्तात्समरेऽभ्यरोहन्
वृक्षं शकुन्ता इव पुष्पहेतोः॥ ६

ततोऽभियाते तव सैन्ये स भीमः
प्रादुश्चक्रे वेगमनन्तवेगः।
यथाऽन्तकाले क्षपयन्दिधक्षु-
र्भूतान्तकृत्काल इवात्तदण्डः॥ ७

तस्यातिवेगस्य रणेऽतिवेगं
नाशक्नुवन्धारयितुं त्वदीयाः।
व्यात्ताननस्यापततो यथैव
कालस्य काले हरतः प्रजा वै॥ ८

ततो बलं भारत भारतानां
प्रद्द्यमानं समरे महात्मना।
भीतं दिशोऽकीर्यत भीमनुन्नं
महानिलेनाभ्रगणा यथैव॥ ९

ततो धीमान्सारथिमब्रवीद्बली
स भीमसेनः पुनरेव हृष्टः॥ १०
सूताभिजानीहि परान्स्वकान्वा
रथान्ध्वजांश्चापततः समेतान्।
युध्यन्ह्यहं नाभिजानामि किंचि-
न्मा सैन्यं स्वं छादयिष्ये प्रमत्तः॥ ११

अरीन्विशोकान्हि निरीक्ष्य सर्वतो
महांश्च मन्युः पुनरेति मां भृशम्।
राजातुरो नागमद्यत्किरीटी
बहूनि दुःखान्यभिचिन्तयामि॥ १२

एतद्दुःखं धारये धर्मराजो
यन्मां हित्वा यातवाञ्शत्रुमध्ये।
नैनं जीवं नाभिजानाम्यजीवं
वीभत्सुं वा तन्ममाद्यातिदुःखम्॥ १३

सोऽहं द्विषत्सैन्यमुदग्रकल्पं
विनाशयिष्ये परमप्रतीतः।
एतन्निहत्याजिमध्ये समेतं
प्रीतो भविष्यामि सह त्वयाद्य॥ १४

सर्वास्तूणान्सायकानामवेक्ष्य
किं शिष्टं स्यात्सायकानां रथे मे।
का वा जातिः किं प्रमाणं च तेषां
ज्ञात्वा व्यक्तं तत्समाचक्ष्व सूत।
'कति वा सहस्राणि कति वा शतानि
ह्याचक्ष्व मे सारथे क्षिप्रमेव॥ १५

विशोक उवाच।
सर्वं विदित्वैवमहं वदामि
तवार्थसिद्धिप्रदमद्य वीर।
कैकेयकाम्भोजसुराष्ट्रबाह्लिका
म्लेच्छाश्च सुह्माः परतङ्गणाश्च॥ १६

मद्राश्च वङ्गा मगधाः कुणिन्दा
आनर्तकावर्तकाः पार्वतीयाः।
सर्वे गृहीतप्रवरायुधास्त्वां
संवेष्य संवेष्य ततो विनेदुः॥ १७

रथे तवास्मिन्निशिताः सुपीता-
स्ततो भल्ला द्वादश वै सहस्राः।'
षण्मार्गणानामयुतानि वीर
क्षुराश्च भल्लाश्च तथायुताख्याः॥ १८

नाराचानां द्वे सहस्रे च वीर
त्रीण्येव च प्रदराणां स्म पार्थ।

प्रदरा बाणविशेषाः॥ १९॥

अस्त्यायुधं पाण्डवेयावशिष्टं
न यद्वहेच्छकटं षड्वीयम् ॥ १९
एतद्विद्वन्मुञ्च सहस्रशोऽपि
गदासिवाहुद्रविणं च तेऽस्ति ।
प्रासाश्च मुद्गराः शक्तयस्तोमराश्च
मा भैषीस्त्वं संक्षयादायुधानाम् ॥ २०
भीमसेन उवाच ।
'अद्यैव नूनं कथयन्तु सिद्धां
मम प्रतिज्ञां सर्वलोके विशोक ।
न मोक्ष्यते समरे भीमसेन
एकः शत्रून्समरे वाप्यजैषीत् ।
आशंसितानामिदमेकमस्तु
तन्मे देवाः सकलं साधयन्तु ॥' २१
सूताद्य मद्बाहुयुतैः समस्ता-
न्समाहनद्भिः पार्थिवानाशुवेगैः ।
च्छन्नं बाणैराहवं घोररूपं
नष्टादित्यं मृत्युलोकेन तुल्यम् ॥ २२
अद्यैतद्वै विदितं पार्थिवानां
भविष्यति ह्याकुमारं च सूत ।
निमग्नो वा समरे भीमसेन
एकः कुरून्वा समरे व्यजैषीत् ॥ २३
सर्वे सङ्घे कुरवो निष्पतन्तु
मां वा लोकाः कीर्तयन्त्वाकुमारम् ।
सर्वानेकस्तानहं पातयिष्ये
ते वा सर्वे भीमसेनं तुदन्तु ॥ २४
आशास्तारः कर्म चाप्युत्तमं ये
तन्मे देवाः सफलं साधयन्तु ।
आयातीह केशवसारथी रथी
शक्रस्तूर्णं यज्ञ इवोपहूतः ॥ २५
ईक्षस्वैतां भारतीं दीर्यमाणा-
मेते कस्माद्विद्रवन्ते नरेन्द्राः ।
व्यक्तं धीमान्सव्यसाची नराग्र्यः
सैन्यं ह्येतच्छादयत्याशु बाणैः ॥ २६
पश्य ध्वजांश्च द्रवतो विशोक
नागान्हयान्पत्तिसङ्घांश्च सङ्घे ।
रथान्विकीर्णाञ्शरशक्तिताडिता-
न्पश्यस्वैतान्रथिनश्चैव सूत ॥ २७
आपूर्यते कौरवी चाप्यभीक्ष्णं
सेना ह्यसौ सुभृशं हन्यमाना ।
धनंजयस्याशनितुल्यवेगै-
र्ग्रस्ता शरैः काञ्चनवर्हजालैः ॥ २८
एते द्रवन्ति स्म रथाश्वनागाः
पदातिसङ्घानतिमर्दयन्तः ।
संमुह्यमानाः कौरवाः सर्व एव
द्रवन्ति नागा इव दाहभीताः ॥ २९
हाहाकृताश्चैव रणे विशोक
मुञ्चन्ति नादान्विपुलान्गजेन्द्राः ॥ ३०
विशोक उवाच ।
किं भीम नैनं त्वमिहाशृणोषि
विस्फारितं गाण्डिवस्यातिघोरम् ।
क्रुद्धेन पार्थेन विकृष्यतोऽद्य
कच्चिन्नेमौ तव कर्णौ विनष्टौ ॥ ३१
सर्वे कामाः पाण्डव ते समृद्धाः
कपिर्ह्यसौ दृश्यते हस्तिसैन्ये ।
नीलाद्भनाद्विद्युतमुच्चरन्तीं
तथा पश्य विस्फुरन्तीं धनुर्ज्याम् ॥ ३२
कपिर्ह्यसौ वीक्षते सर्वतो वै
ध्वजाग्रमारुह्य धनञ्जयस्य ।
वित्रासयन्रिपुसङ्घान्विमर्दे
विभेम्यस्मादात्मनैवाभिवीक्ष्य ॥ ३३
विभ्राजते चातिमात्रं किरीटं
विचित्रमेतच्च धनञ्जयस्य ।
दिवाकराभो मणिरेष दिव्यो
विभ्राजते चैव किरीटसंस्थः ॥ ३४
पार्श्वे भीमं पाण्डुराभ्रप्रकाशं
पश्यस्व शङ्खं देवदत्तं सुघोषम् ।
अभीषुहस्तस्य जनार्दनस्य
विगाहमानस्य चमूं परेषाम् ॥ ३५
रविप्रभं वज्रनाभं क्षुरान्तं
पार्श्वे स्थितं पश्य जनार्दनस्य ।

चक्रं यशोवर्धनं केशवस्य
सदार्चितं यदुभिः पश्य वीर ॥ ३६
महाद्विपानां सरलद्रुमोपमाः
करा निकृत्ताः प्रपतन्त्यमी क्षुरैः।
किरीटिना तेन पुनः ससादिनः
शरैर्निकृत्ताः कुलिशैरिवाद्रयः ॥ ३७
तथैव कृष्णस्य च पाञ्चजन्यं
महार्हमेतं द्विजराजवर्णम्।
कौन्तेय पश्योरसि कौस्तुभं च
जाज्वल्यमानं विजयां स्रजं च ॥ ३८
ध्रुवं रथाग्र्यः समुपैति पार्थो
विद्रावयन्सैन्यमिदं परेषाम्।
सिताभ्रवर्णैरसितप्रयुक्तै-
र्हयैर्महार्हैं रथिनां वरिष्ठः ॥ ३९
रथान्हयान्पत्तिगणांश्च सायकै-
र्विदारितान्पश्य पतन्त्यमी यथा।
तवानुजेनामरराजतेजसा
महावनानीव सुपर्णवायुना ॥ ४०
चतुःशतान्पश्य रथानिमान्हतान्
सवाजिसूतान्समरे किरीटिना।
महेषुभिः सप्तशतानि दन्तिनां
पदातिसादींश्च रथाननेकशः ॥ ४१
अयं समभ्येति तवान्तिकं बली
निघ्नन्कुरूंश्चित्र इव ग्रहोऽर्जुनः।
समृद्धकामोऽसि हतास्तवाहिता
बलं तवायुश्च चिराय वर्धताम् ॥ ४२

भीमसेन उवाच।

ददानि ते ग्रामवरांश्चतुर्दश
प्रियाख्याने सारथे सुप्रसन्नः।
दासीशतं चापि रथांश्च विंशतिं
यदर्जुनं वेदयसे विशोक ॥ ४३

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे अशीतितमोऽध्यायः ॥ ८० ॥

एकाशीतितमोऽध्यायः ॥ ८१ ॥

पार्थपराक्रमः ॥ १ ॥ भीमेन दुर्योधनचोदितस्य शकुनेः पराजयः ॥ २ ॥

सञ्जय उवाच।
श्रुत्वा तु रथनिर्घोषं सिंहनादं च संयुगे।
अर्जुनः प्राह गोविन्दं शीघ्रं वाहय वाजिनः ॥ १
अर्जुनस्य वचः श्रुत्वा गोविन्दोऽर्जुनमब्रवीत्।
एष गच्छामि सुक्षिप्रं यत्र भीमो व्यवस्थितः ॥ २
तं यान्तमश्वा हिमशङ्खवर्णाः
सुवर्णमुक्तामणिजालनद्धाः।
जम्भं जिघांसुं प्रगृहीतवज्रं
हया यथा तत्र यथा वहंस्तदा ॥ ३
रथाश्वमातङ्गपदातिसङ्घा
बाणस्वनैर्नेमिखुरस्वनैश्च।
संनादयन्तो वसुधां दिशश्च
क्रुद्धा नृसिंहा जयमभ्युदीयुः ॥ ४
तेषां च पार्थस्य च मारिषासी-
द्देहासुपापक्षपणं सुयुद्धम्।
त्रैलोक्यहेतोरसुरैर्यथासी-
द्देवस्य विष्णोर्जयतां वरस्य ॥ ५
तैरस्तमुच्चावचमायुधं त-
देकः प्रचिच्छेद किरीटमाली।
क्षुरार्धचन्द्रैर्निशितैश्च भल्लैः
शिरांसि तेषां बहुधा च बाहून् ॥ ६
छत्राणि वालव्यजनानि केतू-
नश्वान्रथान्पत्तिगणान्द्विपांश्च।
ते पेतुरुर्व्यां बहुधा विकृत्ता
वातप्रणुन्नानि यथा वनानि ॥ ७

असितप्रयुक्तै कृष्णप्रयुक्तै. ॥ ३९ ॥

अशीतितमोऽध्याय. ॥ ८० ॥

सुवर्णजालावनता महागजाः
सवैजयन्तीध्वजयोधकल्पिताः ।
सुवर्णपुङ्खैरिषुभिः समाचिता-
श्चकाशिरे प्रज्वलिता यथाचलाः ॥ ८
विदार्य नागाश्वरथान्धनञ्जयः
शरोत्तमैर्वासववज्रसन्निभैः ।
द्रुतं ययौ कर्णजिघांसया तथा
यथा मरुत्वान्बलभेदने पुरा ॥ ९
ततः स पुरुषव्याघ्रस्तव सैन्यमरिंदमः ।
प्रविवेश महाबाहुर्मकरः सागरं यथा ॥ १०
तं हृष्टास्तावका राजन्रथपत्तिसमन्विताः ।
गजाश्वसादिबहुलाः पाण्डवं समुपाद्रवन् ॥ ११
तेषामापततां पार्थमारावः सुमहानभूत् ।
सागरस्येव क्षुब्धस्य यथा स्यात्सलिलस्वनः ॥१२
ते तु तं पुरुषव्याघ्रं व्याघ्रा इव महारथाः ।
अभ्यद्रवन्त संग्रामे त्यक्त्वा प्राणकृतं भयम् ॥ १३
तेषामापततां तत्र शरवर्षाणि मुञ्चताम् ।
अर्जुनो व्यधमत्सैन्यं महावातो घनानिव ॥ १४
तेऽर्जुनं सहिता भूत्वा रथवंशैः प्रहारिणः ।
अभियाय महेष्वासा विव्यधुर्निशितैः शरैः ॥१५
ततोऽर्जुनः सहस्राणि रथवारणवाजिनाम् ।
प्रेषयामास विशिखैर्यमस्य सदनं प्रति ॥ १६
ते वध्यमानाः समरे पार्थचापच्युतैः शरैः ।
तत्रतत्र स्म लीयन्ते भये जाते महारथाः ॥ १७
तेषां चतुःशतान्वीरान्यतमानान्महारथान् ।
अर्जुनो निशितैर्बाणैरनयद्यमसादनम् ॥ १८
ते वध्यमानाः समरे नानालिङ्गैः शितैः शरैः ।
अर्जुनं समभित्यज्य दुद्रुवुर्वै दिशो दश ॥ १९
तेषां शब्दो महानासीद्रवतां वाहिनीमुखे ।
मेघौघस्येव भद्रं ते गिरिमासाद्य दीर्यतः ॥ २०
तां तु सेनां भृशं विद्ध्वा द्रावयित्वाऽर्जुनः शरैः ।
प्रायादभिमुखः पार्थः सूतानीकं हि मारिष ॥ २१
तस्य शब्दो महानासीत्परानभिमुखस्य वै ।
गरुडस्येव पततः पन्नगार्थे यथा पुरा ॥ २२
तं तु शब्दमभिश्रुत्य भीमसेनो महाबलः ।
बभूव परमप्रीतः पार्थदर्शनलालसः ॥ २३
श्रुत्वैव पार्थमायान्तं भीमसेनः प्रतापवान् ।
त्यक्त्वा प्राणान्महाराज सेनां तव ममर्द ह ॥२४
स वायुवीर्यप्रतिमो वायुवेगसमो जवे ।
वायुवच्चचरद्भीमो वायुपुत्रः प्रतापवान् ॥ २५
तेनार्द्यमाना राजेन्द्र सेना तव विशांपते ।
व्यभ्रश्यत महाराज भिन्ना नौरिव सागरे ॥२६
तां तु सेनां तदा भीमो दर्शयन्पाणिलाघवम् ।
शरैरवचकर्तोग्रैः प्रेषयिष्यन्यमक्षयम् ॥ २७
तत्र भारत भीमस्य बलं दृष्ट्वातिमानुषम् ।
व्यत्रस्यन्त रणे योधाः कालस्येव युगक्षये ॥ २८
तथाऽर्दितान्भीमबलान्भीमसेनेन भारत ।
दृष्ट्वा दुर्योधनो राजा इदं वचनमब्रवीत् ॥ २९
सैनिकांश्च महेष्वासान्योधांश्च भरतर्षभ ।
समादिशन्रणे सर्वान्हत भीममिति स्म ह ॥ ३०
तस्मिन्हते हतं मन्ये पाण्डुसैन्यमशेषतः ॥ ३१
प्रतिगृह्य च तामाज्ञां तव पुत्रस्य पार्थिवाः ।
भीमं प्रच्छादयामासुः शरवर्षैः समन्ततः ॥ ३२
गजाश्च बहुला राजन्नराश्च जयगृद्धिनः ।
रथे स्थिताश्च राजेन्द्र परिवव्रुर्वृकोदरम् ॥ ३३
स तैः परिवृतः शूरैः शूरो राजन्समन्ततः ।
शुशुभे भरतश्रेष्ठो नक्षत्रैरिव चन्द्रमाः ॥ ३४
परिवेषी यथा सोमः परिपूर्णो विराजते ।
स रराज तथा सङ्ख्ये दर्शनीयो नरोत्तमः ।
निर्विशेषो महाराज विजयेनैव संयुगे ॥ ३५
तस्य ते पार्थिवाः सर्वे शरवृष्टिं समासृजन् ।
क्रोधरक्तेक्षणाः शूरा हन्तुकामा वृकोदरम् ॥ ३६
तां विदार्य महासेनां शरैः सन्नतपर्वभिः ।
निश्चक्राम रणाद्भीमो मत्स्यो जालादिवांभसि ३७
हत्वा दशसहस्राणि गजानामनिवर्तिनाम् ।
नृणां शतसहस्रे द्वे द्वे शते चैव भारत ॥ ३८
पञ्च चाश्वसहस्राणि रथानां शतमेव च ।
हत्वा प्रास्यन्दयद्भीमो नदीं शोणितवाहिनीम् ३९

शोणितोदां रथावर्तां हस्तिग्राहसमाकुलाम्।
नरमीनाश्वनक्रान्तां केशशैवलशाद्वलाम्॥ ४०
संछिन्नभुजनागेन्द्रां बहुरत्नापहारिणीम्।
ऊरुग्राहां मज्जपङ्कां शीर्षोपलसमावृताम्॥ ४१
धनुःकाशां शरावापां गदापरिघकेतनाम्।
हंसछत्रध्वजोपेतामुष्णीषवरफेनिलाम्॥ ४२
हारपद्माकरां चैव भूमिरेणूर्मिमालिनीम्।
आर्यवृत्तवतीं सङ्ख्ये सुतरां भीरुदुस्तराम्॥ ४३
योधग्राहवतीं सङ्ख्ये वहन्तीं पितृसादनम्।
क्षणेन पुरुषव्याघ्रः प्रावर्तयत निम्नगाम्॥ ४४
यथा वैतरणीमुग्रां दुस्तरामकृतात्मभिः।
तथा दुस्तरणीं घोरां भीरूणां भयवर्धनीम्॥ ४५
यतोयतः पाण्डवेयः प्रविष्टो रथसत्तमः।
ततस्ततः प्रापतन्वै योधाः शतसहस्रशः॥ ४६
एवं दृष्ट्वा कृतं कर्म भीमसेनेन संयुगे।
दुर्योधनो महाराज शकुनिं वाक्यमब्रवीत्॥ ४७
जहि मातुल संग्रामे भीमसेनं महाबलम्।
असिञ्जिते जितं मन्ये पाण्डवेयं महाबलम्॥ ४८
ततः प्रायान्महाराज सौबलेयः प्रतापवान्।
रणाय महते युक्तो भ्रातृभिः परिवारितः॥ ४९
स समासाद्य संग्रामे भीमं भीमपराक्रमम्।
वारयामास तं वीरो वेलेव मकरालयम्॥ ५०
संन्यवर्तत तं भीमो वार्यमाणः शितैः शरैः।
शकुनिस्तस्य राजेन्द्र वामपार्श्वे स्तनान्तरे।
प्रेषयामास नाराचान्रुक्मपुङ्खाञ्शिलाशितान्॥ ५१
वर्म भित्त्वा तु ते घोराः पाण्डवस्य महात्मनः।
न्यमज्जन्त महाराज कङ्कबर्हिणवाससः॥ ५२
सोऽतिविद्धो रणे भीमः शरं रुक्मविभूषितम्।
प्रेषयामास स रुषा सौबलं प्रति भारत॥ ५३
तमायान्तं शरं घोरं शकुनिः शत्रुतापनः।
चिच्छेद सप्तधा राजन्कृतहस्तो महाबलः॥ ५४
तस्मिन्निपतिते भूमौ भीमः क्रुद्धो विशांपते।
धनुश्चिच्छेद भल्लेन सौबलस्य हसन्निव॥ ५५
तदपास्य धनुश्छिन्नं सौबलेयः प्रतापवान्।
अन्यदादाय वेगेन धनुर्भल्लांश्च षोडश।
तैस्तस्य तु महाराज भल्लैः सन्नतपर्वभिः॥ ५६
द्वाभ्यां स सारथिं ह्यार्च्छद्भीमं सप्तभिरेव च।
ध्वजमेकेन चिच्छेद द्वाभ्यां छत्रं विशांपते।
चतुर्भिश्चतुरो वाहान्विव्याध सुबलात्मजः॥ ५७
ततः क्रुद्धो महाराज भीमसेनः प्रतापवान्।
शक्तिं चिक्षेप समरे रुक्मदण्डामयस्मयीम्॥ ५८
सा भीमभुजनिर्मुक्ता नागजिह्वेव चञ्चला।
निपपात रणे तूर्णं सौबलस्य महात्मनः॥ ५९
ततस्तामेव संगृह्य शक्तिं कनकभूषणाम्।
भीमसेनाय चिक्षेप क्रुद्धरूपो विशांपते॥ ६०
सा निर्भिद्य भुजं सव्यं पाण्डवस्य महात्मनः।
निपपात तदा भूमौ यथा विद्युन्नभश्च्युता॥ ६१
अथोत्कुष्टं महाराज धार्तराष्ट्रैः समन्ततः।
न तु तं ममृषे भीमः सिंहनादं तरस्विनाम्॥ ६२
अन्यद्गृह्य धनुः सज्यं त्वरमाणो महाबलः।
मुहूर्तादिव राजेन्द्र च्छादयामास सायकैः।
सौबलस्य बलं सङ्ख्ये त्यक्त्वा नादं महाबलः॥ ६३
तस्याश्वांश्चतुरो हत्वा सूतं चैव विशांपते।
ध्वजं चिच्छेद भल्लेन त्वरमाणः पराक्रमी॥ ६४
हताश्वं रथमुत्सृज्य त्वरमाणो नरोत्तमः।
तस्थौ विस्फारयंश्चापं क्रोधरक्तेक्षणः श्वसन्॥ ६५
शरैश्च बहुधा राजन्भीममार्च्छत्समन्ततः॥ ६६
प्रतिहत्य तु वेगेन भीमसेनः प्रतापवान्।
धनुश्चिच्छेद संक्रुद्धो विव्याध च शितैः शरैः॥ ६७
सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्शनः।
निपपात तदा भूमौ किंचित्प्राणो नराधिपः॥ ६८
ततस्तं विह्वलं ज्ञात्वा पुत्रस्तव विशांपते।
अपोवाह रथेनाजौ भीमसेनस्य पश्यतः॥ ६९
शकुनिं विह्वलं दृष्ट्वा धार्तराष्ट्राः पराङ्मुखाः।
प्रदुद्रुवुर्दिशो भीता भीमसेनभयात्प्रभो॥ ७०
सौबले निर्जिते राजन्भीमसेनेन धन्विना।
भयेन महताऽऽविष्टः पुत्रो दुर्योधनस्तव।
अपायाज्जवनैरश्वैः सापेक्षो मातुलं प्रति॥ ७१

पराङ्मुखं तु राजानं दृष्ट्वा सैन्यानि भारत ।
विप्रजग्मुः समुत्सृज्य द्वैरथानि समन्ततः ॥ ७२
तान्दृष्ट्वा विद्रुतान्सर्वान्धार्तराष्ट्रान्पराङ्मुखान् ।
जवेनाभ्यापतद्भीमः किरञ्शरशतान्बहून् ॥ ७३
ते वध्यमाना भीमेन धार्तराष्ट्राः पराङ्मुखाः ।
कर्णमासाद्य समरे स्थिता राजन्समन्ततः ॥ ७४
स हि तेषां महावीर्यो द्वीपोऽभूत्सुमहाबलः ।
भिन्ननौका यथा राजन्द्वीपमासाद्य निर्वृताः ॥ ७५
भवन्ति पुरुषव्याघ्र नाविकाः कालपर्यये ।
तथा कर्णं समासाद्य तावकाः पुरुषर्षभ ॥ ७६
समाश्वस्ताः स्थिता राजन्संप्रहृष्टाः परस्परम् ।
समाजग्मुश्च युद्धाय मृत्युं कृत्वा निवर्तनम् ॥ ७७

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे एकाशीतितमोऽध्यायः ॥ ८१ ॥

द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

कर्णपराक्रमवर्णनम् ॥ १ ॥

धृतराष्ट्र उवाच ।
ततो भग्नेषु सैन्येषु भीमसेनेन संयुगे ।
दुर्योधनोऽब्रवीत्किं नु सौबलो वाऽपि संजय ॥ १
कर्णो वा जयतां श्रेष्ठो योधा वा मामका युधि ।
कृपो वा कृतवर्मा वा द्रौणिर्दुःशासनोऽपि वा ॥
अत्यद्भुतमहं मन्ये पाण्डवेयस्य विक्रमम् ।
यदेकः समरे सर्वान्योधयामास मामकान् ॥ ३
यथाप्रतिज्ञं योधानां राधेयः कृतवानपि ।
कुरूणामथ सर्वेषां कर्णः शत्रुनिषूदनः ।
शर्म वर्म प्रतिष्ठा च जीविताशा च सञ्जय ॥ ४
तद्भग्नं स्वबलं दृष्ट्वा कौन्तेयेनामितौजसा ।
धनुर्धराणां प्रवरः कर्णः किमकरोद्युधि ॥ ५
पुत्रा वा मम दुर्धर्षा राजानो वा महारथाः ।
एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि सञ्जय ॥ ६
सञ्जय उवाच ।
अपराह्णे महाराज सूतपुत्रः प्रतापवान् ।
जघान सोमकान्सर्वान्भीमसेनस्य पश्यतः ॥ ७
भीमोऽप्यतिबलं सैन्यं धार्तराष्ट्रं व्यपोथयत् ॥ ८
द्राव्यमाणं बलं दृष्ट्वा भीमसेनेन धीमता ।
यन्तारमब्रवीत्कर्णः पाञ्चालानेव मां वह ॥ ९
मद्रराजस्ततः शल्यः श्वेतानश्वान्महाजवान् ।
प्राहिणोच्चेदिपाञ्चालान्करूशांश्च महाबलः ॥ १०
प्रविश्य च महत्सैन्यं शल्यः परबलार्दनः ।
न्ययच्छत्तुरगान्हृष्टो यत्रयत्र च ते रथाः ॥ ११
तं रथं मेघसङ्काशं वैयाघ्रपरिवारणम् ।
संदृश्य पाण्डुपञ्चालास्त्रस्ता ह्यासन्विशांपते ॥ १२
ततो रथस्य निनदः प्रादुरासीन्महारणे ।
पर्जन्यसमनिर्घोषः पर्वतस्येव दीर्यतः ॥ १३
ततः शरशतैस्तीक्ष्णैः कर्ण आकर्णनिःसृतैः ।
जघान पाण्डवबलं शतशोऽथ सहस्रशः ॥ १४
तं तथा समरे कर्म कुर्वाणमपराजितम् ।
परिवव्रुर्महेष्वासाः पाण्डवानां महारथाः ॥ १५
तं शिखण्डी च भीमश्च धृष्टद्युम्नश्च पार्षतः ।
नकुलः सहदेवश्च द्रौपदेयाश्च सात्यकिः ॥ १६
परिवव्रुर्जिघांसन्तो राधेयं शरवृष्टिभिः ।
सात्यकिस्तु तदा कर्णं विंशत्या निशितैः शरैः १७
अताडयद्रणे शूरो जत्रुदेशे नरोत्तमः ।
शिखण्डी पञ्चविंशत्या धृष्टद्युम्नश्च सप्तभिः ॥ १८
द्रौपदेयाश्चतुःषष्ट्या सहदेवश्च सप्तभिः ।
नकुलश्च शतेनाजौ कर्णं विव्याध सायकैः ॥ १९
भीमसेनस्तु राधेयं नवत्या नतपर्वणाम् ।
विव्याध समरे क्रुद्धो जत्रुदेशे महाबलः ॥ २०
अथ प्रहस्याधिरथिर्व्याक्षिपद्धनुरुत्तमम् ।
मुमोच निशितान्बाणान्पीडयन्सुमहाबलः ॥ २१
तान्प्रत्यविध्यद्राधेयः पञ्चभिः पञ्चभिः शरैः ।
सात्यकेस्तु धनुश्छित्त्वा ध्वजं च भरतर्षभ ॥ २२
तं तथा नवभिर्बाणैराजघान स्तनान्तरे ।
भीमसेनं ततः क्रुद्धो विव्याध त्रिंशता शरैः २३

सहदेवस्य भल्लेन ध्वजं चिच्छेद मारिष ।
सारथिं च त्रिभिर्बाणैराजघान परंतपः ॥ २४
विरथान्द्रौपदेयांश्च चकार भरतर्षभ ।
अक्ष्णोर्निमेषमात्रेण तदद्भुतमिवाभवत् ॥ २५
विमुखीकृत्य तान्सर्वाञ्शरैः सन्नतपर्वभिः ।
पाञ्चालानहनच्छ्रांश्चेदीनां च महारथान् ॥२६
ते वध्यमानाः समरे चेदिमत्स्या विशांपते ।
कर्णमेकमभिद्रुत्य शरसङ्घैः समार्पयन् ॥ २७
ताञ्जघान शितैर्बाणैः सूतपुत्रो महारथः ।
ते वध्यमानाः समरे चेदिमात्स्या विशांपते ।
प्राद्रवन्त रणे भीताः सिंहत्रस्ता मृगा इव ॥ २८
एतदत्यद्भुतं कर्म दृष्टवानस्मि भारत ।
यदेकः समरे शूरान्सूतपुत्रः प्रतापवान् ॥ २९
यतमानान्परं शक्त्या योधयानांश्च धन्विनः ।
पाण्डवेयान्महाराज शरैर्वारितवान्रणे ॥ ३०
तत्र भारत कर्णस्य लाघवेन महात्मनः ।
तुतुषुर्देवताः सर्वाः सिद्धाश्च सह चारणैः ॥ ३१
अपूजयन्महेष्वासा धार्तराष्ट्रा नरोत्तमम् ।
कर्णं रथवरश्रेष्ठं श्रेष्ठं सर्वधनुष्मताम् ॥ ३२
ततः कर्णो महाराज ददाह रिपुवाहिनीम् ।
कक्षमिद्धो यथा वह्निर्निदाघे ज्वलितो महान् ॥३३
ते वध्यमानाः कर्णेन पाण्डवेयास्ततस्ततः ।
प्राद्रवन्त रणे भीताः कर्णं दृष्ट्वा महारथम् ॥ ३४
तत्राक्रन्दो महानासीत्पाञ्चालानां महारणे ।
वध्यतां सायकैस्तीक्ष्णैः कर्णचापवरच्युतैः ॥ ३५
तेन शब्देन वित्रस्ता पाण्डवानां महाचमूः ।
कर्णमेकं रणे योधं मेनिरे तत्र शात्रवाः ॥ ३६
तत्राद्भुतं पुनश्चक्रे राधेयः शत्रुकर्शनः ।
यदेनं पाण्डवाः सर्वे न शेकुरभिवीक्षितुम् ॥ ३७
जलौघः पर्वतश्रेष्ठं यथासाद्य प्रभिद्यते ।
तथा तत्पाण्डवं सैन्यं कर्णमासाद्य दीर्यते ॥ ३८
कर्णोऽपि समरे राजन्विधूमोऽग्निरिव ज्वलन् ।
दहंस्तस्थौ महाबाहुः पाण्डवानां महाचमूम् ॥३९
शिरांसि च महाराज कर्णश्चैव सकुण्डलान् ।
बाहूंश्च वीरो वीराणां चिच्छेद लघु चेषुभिः ॥४०
हस्तिदन्तत्सरून्खड्गान्ध्वजाञ्शक्तीर्हयान्गजान् ।
रथांश्च विविधान्राजन्पताका व्यजनानि च ॥४१
अक्षं च युगयोक्त्राणि चक्राणि विविधानि च ।
चिच्छेद बहुधा कर्णो योधव्रतमनुष्ठितः ॥ ४२
तत्र भारत कर्णेन निहतैर्गजवाजिभिः ।
अगम्यरूपा पृथिवी मांसशोणितकर्दमा ॥ ४३
विषमं च समं चैव हतैरश्वपदातिभिः ।
रथैश्च कुञ्जरैश्चैव न प्राज्ञायत किंचन ॥ ४४
नापि स्वे न परे योधाः प्राज्ञायन्त परस्परम् ।
घोरे शरान्धकारे तु कर्णास्त्रे च विजृम्भिते ॥४५
राधेयचापनिर्मुक्तैः शरैः काञ्चनभूषणैः ।
संछादिता महाराज पाण्डवानां महारथाः ॥ ४६
ते पाण्डवेयाः समरे राधेयेन पुनःपुनः ।
अभज्यन्त महाराज यतमाना महारथाः ॥ ४७
मृगसङ्घान्यथा क्रुद्धः सिंहो द्रावयते वने ।
पञ्चालानां रथश्रेष्ठान्द्रावयञ्शात्रवांस्तथा ॥ ४८
कर्णस्तु समरे योधांस्त्रासयन्सुमहायशाः ।
कालयामास तत्सैन्यं यथा पशुगणान्वृकः ॥४९
दृष्ट्वा तु पाण्डवीं सेनां धार्तराष्ट्राः पराङ्मुखीम् ।
तत्राजग्मुर्महेष्वासा रुदन्तो भैरवान्रवान् ॥ ५०
दुर्योधनो हि राजेन्द्र मुदा परमया युतः ।
वादयामास संहृष्टो नानावाद्यानि सर्वशः ॥ ५१
पाञ्चालाश्च महेष्वासा भग्नास्तत्र नरोत्तमाः ।
न्यवर्तन्त तदा शूरा मृत्युं कृत्वा निवर्तनम् ॥५२
तान्निवृत्तान्रणे शूरान्राधेयः शत्रुतापनः ।
अनेकशो महाराज बभञ्ज पुरुषर्षभः ॥ ५३
तत्र भारत कर्णेन पाञ्चाला विंशती रथाः ।
निहताः सायकैः क्रोधाच्चेदयश्च परंशताः ॥ ५४
कृत्वा शून्यान्रथोपस्थान्वाजिपृष्ठांश्च भारत ।
निर्मनुष्यान्गजस्कन्धान्पादातांश्चैव विद्रुतान् ५५
आदित्य इव मध्याह्ने दुर्निरीक्ष्यः परंतपः ।
कालान्तकवपुः शूरः सूतपुत्रोऽभ्यराजत ॥ ५६
एवमेतन्महाराज नरवाजिरथद्विपान् ।
हत्वा तस्थौ महेष्वासः कर्णोऽरिगणसूदनः ॥ ५७

यथा भूतगणान्हत्वा कालस्तिष्ठेन्महाबलः ।
तथा स सोमकान्हत्वा तस्थावेको महारथः ॥ ५८
तत्राद्भुतमपश्याम पाञ्चालानां पराक्रमम् ।
वध्यमानाऽपि यत्कर्णं नाजहू रणमूर्धनि ॥ ५९
राजा दुःशासनश्चैव कृपः शारद्वतस्तथा ।
अश्वत्थामा कृतवर्मा शकुनिश्च महाबलः ।
न्यहनन्पाण्डवीं सेनां शतशोऽथ सहस्रशः ॥ ६०
कर्णपुत्रौ तु राजेन्द्र भ्रातरौ सत्यविक्रमौ ।
निजघ्नाते बलं क्रुद्धौ पाण्डवानामितस्ततः ॥ ६१
तत्र युद्धं महच्चासीत्क्रूरं विशसनं महत् ॥ ६२
तथैव पाण्डवाः शूरा धृष्टद्युम्नशिखण्डिनौ ।
द्रौपदेयाश्च संक्रुद्धा अभ्यघ्नंस्तावकं बलम् ॥ ६३
एवमेष क्षयो वृत्तः पाण्डवानां ततस्ततः ।
तावकानामपि रणे भीमं प्राप्य महाबलम् ॥ ६४

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

पार्थचोदनया कृष्णेन कर्णसमीपंप्रति रथप्रापणम् ॥ १ ॥ शल्येन कर्णप्रोत्साहनम् ॥ २ ॥ कर्णेन पार्थप्रशंसनपूर्वकं तद्वधप्रतिज्ञा ॥ ३ ॥ सङ्कुलयुद्धम् ॥ ४ ॥

सञ्जय उवाच ।
हत्वा तु फल्गुनः सेनां कौरवाणां पृथक्पृथक् ।
सूतपुत्रस्य संरम्भं दृष्ट्वा चैव महारणे ॥ १
शोणितोदां नदीं कृत्वा मांसमज्जास्थिपङ्किलाम् ।
मनुष्यशीर्षपाषाणां हस्त्यश्वकृतरोधसम् ॥ २
शूरास्थिचयसंकीर्णां काकगृध्रानुनादिताम् ।
छत्रहंसप्लवोपेतां वीरवृक्षापहारिणीम् ॥ ३
हारपद्माकरवतीमुष्णीषवरफेनिलाम् ।
धनुःशरध्वजोपेतां नरक्षुद्रकपालिनीम् ॥ ४
चर्मवर्मभ्रमोपेतां रथोडुपसमाकुलाम् ।
जयैषिणां च सुतरां भीरूणां च सुदुस्तराम् ॥ ५
नदीं प्रावर्तयित्वा च बीभत्सुः परवीरहा ।
वासुदेवमिदं वाक्यमब्रवीत्पुरुषर्षभः ॥ ६
अर्जुन उवाच ।
एष केतू रणे कृष्ण सूतपुत्रस्य दृश्यते ।
भीमसेनादयश्चैते योधयन्ति महारथम् ॥ ७
एते द्रवन्ति पाञ्चालाः कर्णत्रस्ता जनार्दन ।
एष दुर्योधनो राजा श्वेतच्छत्रेण धार्यते ॥ ८
कर्णेन भग्नान्पाञ्चालान्द्रावयन्बहु शोभते ।
कृपश्च कृतवर्मा च द्रौणिश्चैव महारथः ॥ ९
एते रक्षन्ति राजानं सूतपुत्रेण रक्षिताः ।
अवध्यमानास्तेऽस्माभिर्योधयिष्यन्ति सोमकान् ॥
एष शल्यो रथोपस्थे रश्मिसंग्राहकोविदः ।
सूतपुत्ररथं कृष्ण वाहयन्बहु शोभते ॥ ११
तत्र मे बुद्धिरुत्पन्ना वाहयात्र रथं मम ।
नाहत्वा समरे कर्णं निवर्तिष्ये कथंचन ॥ १२
मा स्म कर्णो रणे पार्थान्सृञ्जयांश्च महारथान् ।
निःशेषान्समरे कुर्यात्पश्यतां नो जनार्दन ॥ १३
सञ्जय उवाच ।
ततः प्रायाज्जवेनाशु केशवस्तव वाहिनीम् ।
कर्णं प्रति महेष्वासं द्वैरथे सव्यसाचिनः ॥ १४
स प्रयातो रथेनाशु कृष्णो राजन्महाहवे ।
आश्वासयन्रणे चाशु पाण्डुसैन्यानि सर्वशः ॥ १५
रथघोषस्ततस्तस्य पाण्डवस्य बभूव ह ।
वासवास्त्रनिपातेन पर्वतेष्विव मारिष ॥ १६
महता रथघोषेण पाण्डवः सत्यविक्रमः ।
अभ्ययादप्रमेयात्मा निर्जयंस्तव वाहिनीम् ॥ १७
तमायान्तं समीक्ष्यैव श्वेताश्वं कृष्णसारथिम् ।
मद्रराजोऽब्रवीत्कर्णं केतुं दृष्ट्वा महात्मनः ॥ १८
अयं स रथ आयाति श्वेताश्वः कृष्णसारथिः ।
निघ्नन्मित्रान्समरे यं कर्ण परिपृच्छसि ॥ १९
एष तिष्ठति कौन्तेयः संस्पृशन्गाण्डिवं धनुः ।
तं हनिष्यसि चेदद्य तन्नः श्रेयो भविष्यति ॥ २०
धनुर्ज्या चन्द्रताराङ्का पताकाकिङ्किणीयुता ।

पश्य कर्णार्जुनस्यैषा सौदामन्यम्बरे यथा ॥ २१
एष ध्वजाग्रे पार्थस्य प्रेक्षमाणः समन्ततः।
दृश्यते वानरो भीमो वीक्षतां भयवर्धनः ॥ २२
एतच्चक्रं गदा शङ्खः शार्ङ्गं कृष्णस्य च प्रभो।
दृश्यते पाण्डवरथे वाहयानस्य वाजिनः ॥ २३
एतत्क्रूजति गाण्डीवं विसृष्टं सव्यसाचिना।
एते हस्तवता मुक्ता घ्नन्त्यमित्राञ्शिताः शराः२४
विशालायततताम्राक्षैः पूर्णचन्द्रनिभाननैः।
एषा भूः कीर्यते राज्ञां शिरोभिरपलायिनाम् २५
एते परिघसंकाशाः पुण्यगन्धानुलेपनाः।
उद्धता रणशूराणां पात्यन्ते सायुधा भुजाः॥२६
निरस्तजिह्वा नेत्रान्ता वाजिनः सह सादिभिः।
पतिताः पात्यमानाश्च क्षितौ क्षीणा विशेरते ॥ २७
एते पर्वतशृङ्गाणां तुल्या हैमवता गजाः।
संछिन्नकुम्भाः पार्थेन प्रपतन्त्यद्रयो यथा ॥ २८
गन्धर्वनगराकारा रथा हतनरेश्वराः।
विमानादिव पुण्यान्ते स्वर्गिणो निपतन्त्यमी २९
व्याकुलीकृतमत्यर्थं पश्य सैन्यं किरीटिना।
नानामृगसहस्राणां यूथं केसरिणा यथा ॥ ३०
त्वामभिप्रेप्सुरायाति कर्ण निघ्नन्वरान्रथान्।
असज्जमानो राधेय तं याहि प्रति भारत ॥ ३१
एषा विदीर्यते सेना धार्तराष्ट्री समन्ततः।
अर्जुनस्य भयात्पूर्णं निघ्नतः शत्रवान्बहून् ॥ ३२
वर्जयन्सर्वसैन्यानि त्वरते हि धनञ्जयः।
त्वदर्थमिति मन्येऽहं यथास्योदीर्यते वपुः ॥ ३३
न ह्यवस्थास्यते पार्थो युयुत्सुः केनचित्सह।
त्वामृते क्रोधदीप्तो हि पीड्यमाने वृकोदरे ॥ ३४
विरथं धर्मराजं तु दृष्ट्वा सुदृढविक्षतम्।
शिखण्डिनं सात्यकिं च धृष्टद्युम्नं च पार्षतम्॥३५
द्रौपदेयान्युधामन्युमुत्तमौजसमेव च।
नकुलं सहदेवं च वशगांस्ते समीक्ष्य तु ॥ ३६
सहसैकरथः पार्थस्त्वामभ्येति परंतपः।
क्रोधरक्तेक्षणः क्रुद्धो जिघांसुः सर्वपार्थिवान्॥३७
त्वरितोऽभिपतत्यस्मांस्त्यक्त्वा सैन्यान्यसंशयम्।
त्वं कर्ण प्रतियाह्येनं नास्त्यन्यो हि धनुर्धरः ३८
न तं पश्यामि लोकेऽस्मिंस्त्वत्तो ह्यन्यं धनुर्धरम्।
अर्जुनं समरे क्रुद्धं यो वेलामिव वारयेत् ॥ ३९
न चास्य रक्षां पश्यामि पार्श्वतो न च पृष्ठतः।
एक एवाभियाति त्वां पश्य साफल्यमात्मनः ४०
त्वं हि कृष्णौ रणे शक्तो योद्धुमेतौ परंतपौ।
तवैव भारो राधेय प्रत्युद्याहि धनञ्जयम् ॥ ४१
समानो ह्यसि भीष्मेण द्रोणद्रौणिकृपेण च।
सव्यसाचिनमायान्तं निवारय महारणे ॥ ४२
लेलिहानं यथा सर्पं गर्जन्तमृषभं यथा।
वनस्थितं यथा व्याघ्रं जहि कर्ण धनञ्जयम्॥४३
एते द्रवन्ति समराद्भिरपेक्षा नराधिपाः।
अर्जुनस्य भयत्रस्ता धार्तराष्ट्रा महाबलाः ॥ ४४
द्रवतामथ तेषां तु नान्योऽस्ति युधि मानवः।
भयहा यो भवेद्वीरस्त्वामृते सूतनन्दन ॥ ४५
एते त्वां कुरवः सर्वे द्वीपमासाद्य संयुगे।
धिष्ठिताः पुरुषव्याघ्र त्वत्तः शरणकाङ्क्षिणः॥ ४६
वैदेहाम्बष्ठकाम्भोजास्तथा नग्नजितस्त्वया।
गान्धाराश्च यया धृत्या जिताः सङ्ख्ये सुदुर्जयाः।
तां धृतिं कुरु राधेय ततः प्रत्येहि पाण्डवम्॥ ४७
वासुदेवं च वार्ष्णेयं श्रीयमाणं किरीटिना।
प्रत्युद्याहि महाबाहो पौरुषे महति स्थितः॥ ४८
कर्ण उवाच।
प्रकृतिस्थोऽसि मे शल्य इदानीं संमतस्तथा।
प्रतिभासि महाबाहो अभीतश्च धनञ्जयात्॥ ४९
पश्य बाह्वोर्बलं मेऽद्य शिक्षितस्य च पश्य मे-न
एकोऽद्य निहनिष्यामि पाण्डवानां महाचमूम्॥
कृष्णौ च पुरुषव्याघ्र ततः सत्यं ब्रवीमि ते।
नाहत्वा युधि तौ वीरौ व्यपयास्ये कथञ्चन॥ ५१
शिश्ये वा निहतस्ताभ्यामनित्यो हि रणे जयः।
कृतार्थोऽद्य भविष्यामि हत्वा वाप्यथ वा हतः५२
शल्य उवाच।
अजय्यमेनं प्रवदन्ति युद्धे
महारथाः कर्ण रथप्रवीरम्।
एकाकिनं किमु कृष्णाभिगुप्तं
विजेतुमेनं क इहोत्सहेत ॥ ५३

कर्ण उवाच ।
नैतादृशो जातु बभूव लोके
रथोत्तमो यावदुपश्रुतं नः ।
तमीदृशं प्रतियोत्स्यामि पार्थं
महाहवे पश्य च पौरुषं मे ॥ ५४
रणे चरत्येष रथप्रवीरः
सितैर्हयैः कौरवराजपुत्रः ।
स वाऽद्य मां नेष्यति कृच्छ्रमेत-
त्कर्णोऽस्यान्तेऽप्यत्र भवेत्समर्थः ॥ ५५
अस्येदिनौ राजपुत्रस्य हस्ता-
ववेपमानौ जातकिणौ बृहन्तौ ।
दृढायुधः कृतिमान्क्षिप्रहस्तो
न पाण्डवेयेन समोऽस्ति योधः ॥ ५६
गृह्णात्यनेकानपि कङ्कपत्रा-
नेकं यथा तान्प्रतियोज्य चाशु ।
ते क्रोशमात्रे निपतन्त्यमोघाः
कस्तेन योधोऽस्ति समः पृथिव्याम् ॥५७
अतोषयत्खाण्डवे यो हुताशं
कृष्णद्वितीयोऽतिरथस्तरस्वी ।
लेभे चक्रं यत्र कृष्णो महात्मा
धनुर्गाण्डीवं पाण्डवः सव्यसाची ॥ ५८
श्वेताश्वयुक्तं च सुघोषमुग्रं
रथं महाबाहुरदीनसत्वः ।
महेषुधी चाक्षये दिव्यरूपे
शस्त्राणि दिव्यानि च हव्यवाहात् ॥५९
यस्त्विन्द्रलोके निजघान दैत्या-
नसङ्ख्येयान्कालकेयांश्च सर्वान् ।
लेभे शङ्खं देवदत्तं स तत्र
को नाम तेनाभ्यधिकः पृथिव्याम् ॥ ६०
महादेवं तोषयामास योऽस्त्रैः
साक्षात्सुयुद्धेन महानुभावः ।
लेभे ततः पाशुपतं सुघोरं
त्रैलोक्यसंहारकरं महास्त्रम् ॥ ६१
पृथक्पृथग्लोकपालाः समेता
ददुर्महास्त्राण्यप्रमेयाणि सङ्ख्ये ।
यैस्ताञ्जघानाशु रणे नृसिंहः
सकालकेयानसुरान्समेतान् ॥ ६२
तथा विराटस्य पुरे समेता-
न्सर्वानस्मानेकरथेन जित्वा ।
जहार तद्गोधनमाजिमध्ये
वस्त्राणि चादत्त महारथेभ्यः ॥ ६३
तमीदृशं वीर्यगुणोपपन्नं
कृष्णद्वितीयं परमं नृपाणाम् ।
तमाह्वयन्साहसमुत्तमं वै
जाने स्वयं सर्वलोकस्य शल्य ॥ ६४
अनन्तवीर्येण च केशवेन
नारायणेनाप्रतिमेन गुप्तः ।
वर्षायुतैर्यस्य गुणा न शक्या
वक्तुं समेतैरपि सर्वलोकैः ॥ ६५
महात्मनः शङ्खचक्रासिपाणे-
र्विष्णोर्जिष्णोर्वसुदेवात्मजस्य ।
भयं न मे जायते साध्वसं च
दृष्ट्वा कृष्णावेकरथे समेतौ ॥ ६६
अतीवायं धनुषि राजपुत्रे-
ष्वतीवान्यान्केशवश्चक्रयुद्धे ।
एवंविधौ पाण्डववासुदेवौ
चलेत्स्वदेशाद्धिमवान्न कृष्णौ ॥ ६७
उभौ हि शूरौ बलिनौ दृढायुधौ
महारथौ संहननोपपन्नौ ।
एतौ वीरौ नरवीरौ समेतौ
स्थानाच्युतौ देवकुमाररूपौ ॥ ६८
अग्न्यादित्याविन्द्रबृहस्पती वा
यमान्तकौ वा शशिपूषणौ वा ।
भगांशमित्रावरुणावश्विनौ वा
मरुद्गणौ वा वसवः समेताः ।
व्यस्ताः समस्ताश्च युधा न शक्ता
जेतुं प्रसह्यार्जुनं चाच्युतं च ॥ ६९
एतौ हि तावर्जुनवासुदेवौ
कोऽन्यः प्रतीयान्मद्रते तु शल्य ॥ ७०

सर्वेषां वृष्णिवीराणां कृष्णे लक्ष्मीः प्रतिष्ठिता।
सर्वेषां पाण्डुपुत्राणां जयः पार्थे प्रतिष्ठितः ॥ ७१
तावुभौ पुरुषव्याघ्रौ समाने स्यन्दने स्थितौ।
मामेकमभियोद्धारौ सुजातं वत शल्य मे ॥ ७२
नैतच्चिरं क्षिप्रमिमं रथं मे
प्रवर्तयैतावभियामि चैवम्।
अस्मिन्मुहूर्ते निहतौ पश्य कृष्णौ
ताभ्यां हतं वा युधि मां रिपुभ्याम् ॥ ७३
एवं ब्रुवाणः सहसा महारथ-
स्त्वभ्यद्रवत्पाण्डवं सूतपुत्रः ॥ ७४
अभ्येत्य पुत्रेण तवाभिनन्दिताः
समेत्य चोक्ताः कुरुवीरसत्तमाः।
कृपश्च भोजश्च महारथावुभौ
तथैव गान्धारपतिः सहानुजः।
गुरोः सुतस्तस्य तवात्मजास्तथा
पदातिसङ्घा द्विरदास्तथा तदा ॥ ७५
निरुध्यताभिद्रवताच्युतार्जुनौ
श्रमेण संयोजयताशु सर्वशः।
यथा भवद्भिर्भृशविक्षतावुभौ
सुखेन हन्यान्मम वाहिनीपतिः ॥ ७६
तथेति चोक्त्वा त्वरिताः स्म तेऽर्जुनं
जिघांसवो वीरतराः समाययुः।
शरैश्च जघ्नुर्युधि तं महारथा
धनञ्जयं कर्णनिदेशकारिणः।
नदीनदं भूरिजलो महार्णवो
यथा तथा तान्समरेऽर्जुनोऽग्रसत् ॥ ७७
न संदधानो न तथा शरोत्तमान्
प्रमुञ्चमानो रिपुभिः प्रदृश्यते।
धनञ्जयास्तैः स्म शरैर्विदारिता
हता निपेतुर्नरवाजिकुञ्जराः ॥ ७८
शरार्चिषं गाण्डिवचारुमण्डलं
युगान्तसूर्यप्रतिमानतेजसम्।
न कौरवाः शेकुरुदीक्षितुं जयं
यथा रविं व्याधितचक्षुषो जनाः ॥ ७९
शरोत्तमान्संग्रहितान्महारथै
श्चिच्छेद पार्थः प्रहसञ्छरौघैः।
भूयश्च तानहनद्बाणसङ्घान्
गाण्डीवधन्वायतपूर्णमण्डलम् ॥ ८०
यथोग्ररश्मिः शुचिशुक्रमध्यगः
सुखं विवस्वान्हरते जलौघान्।
तथार्जुनो बाणगणान्निरस्य
ददाह सेनां तव पार्थिवेन्द्र ॥ ८१
तमभ्यधावद्विसृजन्कृपः शरां-
स्तथैव भोजस्तव चात्मजः स्वयम्।
महारथो द्रोणसुतश्च सायकै-
रवाकिरंस्त्रोयधरा यथाऽचलम् ॥ ८२
जिघांसुभिस्तान्कुशलैः शरोत्तमान्
महात्मभिः संग्रहितान्प्रयत्नतः।
शरैः प्रचिच्छेद स पाण्डवस्त्वरन्
परान्विनिर्भिद्य च तांस्त्रिभिस्त्रिभिः ॥ ८३
स गाण्डिवव्यायतपूर्णमण्डल-
स्तपत्रिपूर्नर्जुनभास्करो बभौ।
शरोग्ररश्मिः शुचिशुक्रमध्यगो
यथैव सूर्यः परिवेषवांस्तथा ॥ ८४
अथाग्र्यबाणैर्दशभिर्धनञ्जयं
पराभिनद्द्रोणसुतोऽच्युतं त्रिभिः।
चतुर्भिरश्वांश्चतुरः कपिं ततः
शरैश्च नाराचवरैरवाकिरत् ॥ ८५
तथा ततः प्रस्फुरदस्य कार्मुकं
त्रिभिः शरैर्यन्तृशिरश्चकर्त ह।
हयांश्चतुर्भिश्चतुरस्त्रिभिर्ध्वजं
धनञ्जयो द्रौणिरथादपातयत् ॥ ८६
स रोषपूर्णो ह्यतिवज्रहाटकै-
रलंकृतं तक्षकभोगवर्चसम्।
स तद्बधे कार्मुकमन्यदाददे
यथा महाहिप्रवरं तथैव च ॥ ८७
स्वमायुधं चापि विकीर्य भूतले
धनुश्च कृत्वा सगुणं गुणाधिकः।

शुचिशुक्रयोः आषाढज्येष्ठयोर्मध्ये गतः ॥ ८१ ॥

समानयंस्तावजितौ नरोत्तमौ
शरोत्तमैर्द्रौणिरविध्यदन्तिकात् ॥ ८८
कृपश्च भोजश्च तवात्मजश्च ते
शरैरनेकैर्युधि पाण्डवर्षभम् ।
महारथाः संयुगमूर्धनि स्थिता-
स्तमोनुदं वारिधरा इवापतन् ॥ ८९
कृपस्य पार्थः सशरं शरासनं
हयान्ध्वजान्सारथिमेव पत्रिभिः ।
[समार्पयद्बाहुसहस्रविक्रम-
स्तथा यथा वज्रधरः पुरा बलेः ॥ ९०
स पार्थबाणैर्विनिपातितायुधो
ध्वजावमर्दे च कृते महाहवे ।
कृतः कृपो बाणसहस्रयन्त्रितो
यथापगेयः प्रथमं किरीटिना ॥] ९१
शरैः प्रचिच्छेद तवात्मजस्य
ध्वजं धनुश्च प्रचकर्त नर्दतः ।
जघान चाश्वान्कृतवर्मणः शुभान्
ध्वजं च चिच्छेद तवात्मजस्य ह ॥ ९२
सवाजिसूतेष्वसनान्सकेतना-
ञ्जघान नागाश्वरथांश्च स त्वरन् ।
ततः प्रकीर्णं सुमहद्बलं तव
प्रपीडितं सवितुरिवौजसा भृशम् ॥ ९३
ततोऽर्जुनस्याशु रथेन केशव-
श्चकार शत्रूनपसव्यमातुरान् ।
ततः प्रयातं त्वरितं धनञ्जयं
शतक्रतुं वृत्रनिजघ्नुषं यथा ।
समन्वधावन्पुनरुत्थितैर्ध्वजै
रथैः सुयुक्तैरपरे युयुत्सवः ॥ ९४
अथाभिसृत्य प्रतिवार्य चाहितान्
धनञ्जयस्यानुचरान्महारथाः ।
शिखण्डिशैनेययमाः शितैः शरै-
र्विदारयन्तो व्यनदन्सुभैरवम् ॥ ९५
ततोऽभिजघ्नुः कुपिताः परस्परं
शरैस्तदाऽऽजोगतिभिः सुतेजनैः ।
कुरुप्रवीराः सह सृञ्जयैर्यथा
सुरारयो देवपतिं यथा तथा ॥ ९६
जयेप्सवः स्वर्गमनाय चोत्सुकाः
पतन्ति नागाश्वरथाः परंतप ।
तथैव सर्वे बहवश्च विव्यधुः
शरैः सुमुक्तैरितरेतरं पृथक् ॥ ९७
शरान्धकारे तु महात्मभिः कृते
महामृधे योधवरैः परस्परम् ।
चतुर्दिशो वै विदिशश्च पार्थिव
प्रभा च सूर्यस्य तमोवृताऽभवत् ॥ ९८

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

चतुरशीतितमोऽध्यायः ॥ ८४ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
राजन्कुरूणां प्रवरैर्बलैर्भीममभिद्रुतम् ।
मज्जन्तमिव कौन्तेयमुज्जिहीर्षुर्धनञ्जयः ॥ १
विमृद्य सूतपुत्रस्य सेनां भारत सायकैः ।
प्राहिणोन्मृत्युलोकाय परवीरान्धनञ्जयः ॥ २
ततोऽस्याम्बरमाश्रित्य शरजालानि भागशः ।
अदृश्यन्त तथान्ये च निजघ्नुस्तव वाहिनीम् ॥ ३
स पक्षिसङ्घाचरितमाकाशं पूरयञ्शरैः ।
धनञ्जयो महाबाहुः कुरूणामन्तकोऽभवत् ॥ ४
ततो भल्लैः क्षुरप्रैश्च नाराचैर्विमलैरपि ।
गात्राणि प्राच्छिनत्पार्थः शिरांसि च चकर्त ह ॥ ५
छिन्नगात्रैर्विकवचैर्विशिरस्कैः समन्ततः ।

तथार्जुनस्याधिरथेन केशव इति ख. ट. पाठः । अथार्जुनस्याधिरथेश्च केशव इति क. ङ. पाठ ॥९४॥त्र्यशीतितमोऽध्यायः॥८३॥

पातितैश्च पतद्भिश्च योधैरासीत्समावृता ॥ ६
धनञ्जयशराभ्यस्तैः स्यन्दनाश्वरथद्विपैः ।
संछिन्नभिन्नविध्वस्तैर्व्यङ्गाङ्गावयवैः स्तृता ।
गतसत्वैः ससत्वैश्च संवृताऽऽसीद्वसुन्धरा ॥ ७
सुदुर्गमा सुविषमा घोराऽत्यर्थं सुदुर्दृशा ।
रणभूमिरभूद्राजन्महावैतरणी यथा ॥ ८
ईषाचक्राक्षभङ्गैश्च व्यश्वैः साश्वैश्च युध्यताम् ।
सम्पूर्तैर्हतसूतैश्च रथैः स्तीर्णाऽभवन्मही ॥ ९
सुवर्णवर्मसन्नाहैर्योधैः कनकमालिभिः ।
आस्थिताः क्षत्रवर्माणो भद्रा नित्यमदा द्विपाः १०
क्रुद्धाः क्रूरैर्महामात्रैः प्रेषितार्जुनमभ्ययुः ।
चतुःशता रथवरा हताः पेतुः किरीटिना ॥ ११
पर्यस्तानीव शृङ्गाणि ससत्वानि महागिरेः ।
धनञ्जयशराभ्यस्तैः स्तीर्णा भूर्वरवारणैः ॥ १२
समन्ताज्जलदप्रख्यान्वारणान्मदवर्षिणः ।
अभिपेदेऽर्जुनरथो घनान्भिन्दन्निवांशुमान् ॥ १३
हतैर्गजमनुष्याश्वैर्भिन्नैश्च बहुधा रथैः ।
विशस्त्रयत्नकवचैर्युद्धशौण्डैर्गतासुभिः ।
अपविद्धायुधैर्मार्गैः स्तीर्णोऽभूत्फल्गुनेन वै ॥ १४
विस्फारितं च गाण्डीवमल्यासीद्भैरवस्वनम् ।
सुघोषं वज्रनिष्पेषं स्तनयन्निव तोयदः ॥ १५
ततः प्रादीर्यत चमूर्धनञ्जयशराहता ।
महावातसमाविद्धा महानौरिव सागरे ॥ १६
नानारूपाः प्राणहराः शरा गाण्डीवचोदिताः ।
अलातोल्काशनिप्रख्यास्तव सैन्यं विनिर्दहन् १७
महागिरौ वेणुवनं निशि प्रज्वलितं यथा ।
तथा तव महासैन्यं प्रास्फुरच्छरपीडितम् ॥ १८
तद्विनष्टं सुविध्वस्तं तव सैन्यं किरीटिना ।
हतमविहतं बाणैः सर्वतः प्रद्रुतं दिशः ॥ १९
सश्वापदा मृगगणा दावाग्नित्रासिता यथा ।
कुरवः पर्यवर्तन्त निर्दग्धाः सव्यसाचिना ॥ २०
उत्सृज्य च महाबाहुं भीमसेनं तथा रणे ।
बलं कुरूणामुद्विग्नं सर्वमासीत्पराङ्मुखम् ॥ २१
ततः कुरुषु भग्नेषु बीभत्सुरपराजितः ।
भीमसेनं समासाद्य मुहूर्तं सोऽभ्यवर्तत ॥ २२
समागम्य च भीमेन मन्त्रयित्वा च फल्गुनः ।
विशल्यमरुजं चास्मै कथयित्वा युधिष्ठिरम् ॥ २३
भीमसेनाभ्यनुज्ञातस्ततः प्रायाद्धनञ्जयः ।
नादयन्रथघोषेण पृथिवीं द्यां च भारत ॥ २४
ततः परिवृतो वीरैर्दशभिः शत्रुतापनः ।
दुःशासनादवरजैस्तव पुत्रैर्धनञ्जयः ॥ २५
ते तमभ्यर्दयन्बाणैरुल्काभिरिव कुञ्जरम् ।
आततेष्वसना वीरा नृत्यन्त इव भारत ॥ २६
अपसव्यांस्तु तांश्चक्रे रथेन मधुसूदनः ।
नियुक्तान्हि स तान्मेने यमायाशु किरीटिना ॥ २७
तथान्ये प्राणदन्मूढाः पराङ्मुखमिवार्जुनम् ॥ २८
तेषां नानदतां केतून्श्वांश्चापानि सारथीन् ।
नाराचैरर्धचन्द्रैश्च क्षिप्रं पार्थो न्यकृन्तत ॥ २९
अथान्यैर्दशभिर्भल्लैः शिरांस्येषामपातयत् ।
रोषसंरक्तनेत्राणि संदष्टौष्ठानि भूतले ॥ ३०
तेषां वक्त्राणि विबभुर्ज्योम्नि तारागणा इव ॥ ३१
तांस्तु भल्लैर्महावेगैर्दशभिर्दश कौरवान् ।
रुक्माङ्गदान्नुक्मपुङ्खैर्हत्वा प्रायादमित्रहा ॥ ३२

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे चतुरशीतितमोऽध्यायः ॥ ८४ ॥

पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
तमायान्तं महावेगैरश्वैः कपिवरध्वजम् ।
युद्धायाभ्यद्रवन्वीराः कुरूणां नवती रथाः ॥ १
कृत्वा संशप्तका घोरं शपथं पारलौकिकम् *

विनिर्दहन्नित्यत्राऽऽभाव आर्षः ॥ १७ ॥

चतुरशीतितमोऽध्यायः ॥ ८४ ॥

* अत्रार्जुनकृत दशधृतराष्ट्रपुत्रहनन विचारणीयम् ।

परिवव्रुर्नरव्याघ्रा नरव्याघ्रं रणेऽर्जुनम् ॥ २
कृष्णः श्वेतान्महावेगानश्वान्काञ्चनभूषणान् ।
मुक्ताजालप्रतिच्छन्नान्प्रैषीत्कर्णरथं प्रति ॥ ३
प्रेक्ष्य कर्णरथं यान्तमरिघ्नं तं धनञ्जयम् ।
बाणवर्षैरभिघ्नन्तः संशप्तकगणा ययुः ॥ ४
त्वरमाणांस्तु तान्सर्वान्समूतेष्वसनध्वजान् ।
जघान नवतिं वीरानर्जुनो निशितैः शरैः ॥ ५
तेऽपतन्त हता बाणैर्नानारूपैः किरीटिना ।
विमानेभ्यः सुकृतिनः स्वर्गात्पुण्यक्षये यथा ॥ ६
ततः सरथनागाश्वाः कुरवः कुरुसत्तमम् ।
निर्भया भरतश्रेष्ठमभ्यवर्तन्त फल्गुनम् ॥ ७
तदायस्तमनुष्याश्वमुदीर्णवरवारणम् ।
पुत्राणां ते महासैन्यं समरौत्सीद्धनञ्जयम् ॥ ८
शक्त्यृष्टितोमरप्रासैर्गदानिस्त्रिंशसायकैः ।
प्राच्छादयन्महेष्वासाः कुरवः कुरुनन्दनम् ॥ ९
तामन्तरिक्षे विततां शस्त्रवृष्टिं समन्ततः ।
व्यधमत्पाण्डवो बाणैस्तमः सूर्य इवांशुभिः ॥ १०
ततो म्लेच्छाः स्थिता मत्तैस्त्रयोदशशतैर्गजैः ।
पार्श्वतो व्यहनन्पार्थं तव पुत्रस्य शासनात् ॥ ११
कर्णिनालीकनाराचैस्तोमरप्रासशक्तिभिः ।
कर्पणैर्भिण्डिपालैश्च रथस्थं पार्थमार्दयन् ॥ १२
तां शस्त्रवृष्टिमतुलां द्विपस्थैः प्रेषितां प्रभुः ।
चिच्छेद निशितैर्भल्लैरर्धचन्द्रैश्च फल्गुनः ॥ १३
अथ तान्द्विरदान्सर्वान्नानालिङ्गैः शरोत्तमैः ।
सपताकध्वजारोहान्गिरीन्वज्रैरिवाभिनत् ॥ १४
ते हेमपुङ्खैरिषुभिरर्दिता हेममालिनः ।
हताः पेतुर्महानागाः साग्निज्वाला इवाद्रयः ॥ १५
ततो गाण्डीवनिर्घोषो महानासीद्दिशांपते ।
स्तनतां क्रूजतां चैव मनुष्यगजवाजिनाम् ॥ १६
कुञ्जराश्च हता राजन्दुद्रुवुस्ते समन्ततः ।
अश्वाश्च पर्यधावन्त हतारोहा दिशो दश ॥ १७
रथा हीना महाराज रथिभिर्वाजिभिस्तथा ।
गन्धर्वनगराकारा दृश्यन्ते स्म सहस्रशः ॥ १८
अश्वारोहा महाराज धावमाना इतस्ततः ।
तत्रतत्रैव दृश्यन्ते निहताः पार्थसायकैः ॥ १९
तस्मिन्क्षणे पाण्डवस्य बाह्वोर्बलमदृश्यत ।
यत्सादिनो वारणांश्च रथांश्चैकोऽजयद्युधि ॥ २०
असंयुक्ताश्च ते राजन्परिवृत्ता रणं प्रति ।
नरा नागा रथाश्चैव नदन्तोऽर्जुनमभ्ययुः ॥ २१
ततस्त्वयङ्केण महता बलेन भरतर्षभ ।
दृष्ट्वा परिवृतं राजन्भीमसेनः किरीटिनम् ॥ २२
हतावशेषानुत्सृज्य त्वदीयान्कतिचिद्रथान् ।
जवेनाभ्यद्रवद्भीमो धनञ्जयरथं प्रति ॥ २३
ततस्तत्प्राद्रवत्सैन्यं हतभूयिष्ठमातुरम् ।
दृष्ट्वाऽर्जुनं तदा भीममागतं भ्रातरं प्रति ॥ २४
हतावशिष्टांस्तुरगानर्जुनेन महाबलः ।
भीमो व्यधमदश्रान्तो गदापाणिर्महाहवे ॥ २५
'गदापाणिं तदा दृष्ट्वा भीमं भारत भारताः ।
मेनिरे तमनुप्राप्तं दण्डपाणिमिवान्तकम् ॥' २६
कालरात्रिमिवात्युग्रां नरनागाश्वभोजनाम् ।
प्राकाराट्टपुरद्वारदारणीमतिदारुणाम् ॥ २७
गदां तुरगनाशाय त्वरन्भीमो व्यवासृजत् ।
सा जघान बहूनश्वानश्वारोहांश्च मारिष ॥ २८
कांस्यायसतनुत्रांश्च नरानश्वांश्च पाण्डवः ।
पोथयामास गदया सशब्दं तेऽपतन्हताः ॥ २९
दन्तैर्दशन्तो वसुधां शेरते क्षतजोक्षिताः ।
भग्नमूर्धास्थिचरणाः क्रव्यादगणभोजनाः ॥ ३०
असृङ्मांसवसाभिश्च तृप्तिमभ्यागता गदा ।
अस्थीन्यप्यश्नती तस्थौ कालरात्रीव दुर्दृशा ॥ ३१
सहस्राणि दशाश्वानां हत्वा पत्तींश्च भूयसः ।
भीमोऽभ्यधावत्संक्रुद्धो गदापाणिरितस्ततः ॥ ३२
गदापाणिं ततो भीमं दृष्ट्वा भारत तावकाः ।
मेनिरे समनुप्राप्तं कालदण्डोद्यतं यमम् ॥ ३३
स मत्त इव मातङ्गः संक्रुद्धः पाण्डुनन्दनः ।
प्रविवेश गजानीकं मकरः सागरं यथा ॥ ३४
विगाह्य च गजानीकं प्रगृह्य महतीं गदाम् ।
क्षणेन भीमः संक्रुद्धस्तन्निन्ये यमसादनम् ॥ ३५
गजान्सकङ्कटान्मत्तान्सारोहान्सपताकिनः ।

मुसलैर्भिन्दिपालैश्च इति झ. पाठ ॥ १२ ॥

पञ्चाशीतितमोऽध्याय. ॥ ८५ ॥

पततः समपश्याम सपक्षान्पर्वतानिव ॥ ३६
हत्वा तु तद्वजानीकं भीमसेनो महाबलः ।
पुनः स्वरथमास्थाय पृष्ठतोऽर्जुनमभ्ययात् ॥ ३७
ततः पराङ्मुखीभूतं निरुत्साहं बलं तव ।
तदानीं तु महाराज प्रायशः शस्त्रवेष्टितम् ॥ ३८
विलम्बमानं तत्सैन्यमप्रगल्भमवस्थितम् ।
दृष्ट्वा प्राच्छादयद्बाणैरर्जुनः शस्त्रवृष्टिभिः ॥ ३९
नराश्वरथमातङ्गा युधि गाण्डीवधन्वना ।
शरव्रातैश्चिता रेजुः कदम्बा इव केसरैः ॥ ४०
ततः कुरूणामभवदार्तनादो महान्नृप ।
नराश्वनागासुहरान्दृष्ट्वा बाणान्किरीटिनः ॥ ४१
हाहाकृतं भृशं त्रस्तं लीयमानं परस्परम् ।
अलातचक्रवत्सैन्यं तदा बभ्राम तावकम् ॥ ४२
ततोऽर्जुनशरध्वस्तं कुरूणां सुमहद्बलम् ।
न ह्यत्रासीदनिर्भिन्नो रथः सादी हयो गजः ॥ ४३
आदीप्तमिव तत्सैन्यं शरैश्छिन्नतनुच्छदम् ।
आसीत्स्वशोणितक्लिन्नं रौद्रं नष्टं विशांपते ॥ ४४
तत्सैन्यं हतभूयिष्ठमाहतं निशितैः शरैः ।
न जहौ समरं प्राप्य फल्गुनं शत्रुतापनम् ॥ ४५
तत्राद्भुतमपश्याम कौरवाणां पराक्रमम् ।
वध्यमानोऽपि यत्पार्थं न जहौ भरतर्षभ ॥ ४६
तं दृष्ट्वा विक्रमं तस्य कुरवः सव्यसाचिनः ।
निराशाः समपद्यन्त सर्वे कर्णस्य जीविते ॥ ४७
अविषह्यं तु पार्थस्य शरसंस्पर्शमाहवे ।
मत्वा न्यवर्तन्कुरवो जिता गाण्डीवधन्वना ॥ ४८
ते हित्वा समरे पार्थं वध्यमानाश्च सायकैः ।
प्रदुद्रुवुर्दिशो भीताश्चुक्रुशुश्चापि सूतजम् ॥ ४९
तान्विद्रावयते पार्थः किरञ्शरशतान्बहून् ।
हर्षयन्पाण्डवीं सेनां राजानं च युधिष्ठिरम् ॥ ५०
पुत्रास्तव महाराज जग्मुः कर्णरथं प्रति ।
अगाधे मज्जतां तेषां द्वीपः कर्णोऽभवत्तदा ॥ ५१
कुरवो हि महाराज निर्विषाः पन्नगा इव ।
कर्णमेवोपलीयन्त भयाद्गाण्डीवधन्वनः ॥ ५२
यथा सर्वाणि भूतानि मृत्योर्भीतानि मारिष ।
उपलीयन्ति सत्रासाद्धर्मं लोकपरायणम् ॥ ५३
तथा कर्णं महेष्वासं पुत्रास्तव नराधिप ।
उपालीयन्त सत्रासात्पाण्डवस्य महात्मनः ॥ ५४
ताञ्शोणितपरिक्लिन्नान्विषमस्थाञ्शरातुरान् ।
मा भैष्टेत्यब्रवीत्कर्णो भीतानाविष्टचेतसः ॥ ५५
संभग्नं हि बलं दृष्ट्वा बलात्पार्थेन तावकम् ।
धनुर्विस्फारयन्कर्णस्तस्थौ शत्रुजिघांसया ॥ ५६
तान्प्रद्रुतान्कुरून्दृष्ट्वा कर्णः शस्त्रभृतां वरः ।
संचिन्तयित्वा पार्थस्य वधे दध्रे मनः श्वसन् ॥ ५७
विस्फार्य सुमहच्चापं ततश्चाधिरथिर्वृषः ।
पाञ्चालान्पुनराधावत्पश्यतः सव्यसाचिनः ॥ ५८
ततः क्षणेन क्षितिपाः क्षतजप्रतिमेक्षणाः ।
शरौघैश्छादयामासुर्महामेघा इवाचलम् ॥ ५९
ततः शरसहस्राणि कर्णमुक्तानि मारिष ।
पाञ्चालानां हरत्प्राणांस्तमांसीव तमोनुदः ॥ ६०
महदासीत्तदा युद्धं पाञ्चालानां महामते ।
वध्यतां सूतपुत्रेण मित्रार्थे मित्रगृद्धिना ॥ ६१

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

षडशीतितमोऽध्यायः ॥ ८६ ॥

संकुलयुद्धम् ॥ १ ॥ भीमदुःशासनयोः समागमः संवादश्च ॥ २ ॥

सञ्जय उवाच ।
ततः कर्णः कुरुषु प्रद्रुतेषु
वरूथिना श्वेतहयेन राजन् ।
पाञ्चालपुत्रान्व्यधमत्सूतपुत्रो
महेषुभिर्वात इवाभ्रसङ्घान् ॥ १

सूतं रथादञ्जलिकैर्निपात्य
जघान चाश्वाञ्जनमेजयस्य ।
शतानीकं सुतसोमं च भल्लै-
रवाकिरद्धनुषी चाप्यकृन्तत् ॥ २
धृष्टद्युम्नं निर्विभेदाथ षड्भि-
र्जघानाश्वान्दक्षिणांस्तस्य सङ्ख्ये ।
हत्वा चाश्वान्सात्यकेः सूतपुत्रः
कैकेयपुत्रं न्यवधीद्विशोकम् ॥ ३
तमभ्यधावन्निहते कुमारे
सेनापतिः कैकयो मित्रवर्मा ।
शरैर्विधुन्वन्भृशमुग्रवेगैः
कर्णात्मजं चाप्यहनत्सुदेवम् ॥ ४
तस्यार्धचन्द्रैस्त्रिभिरुच्चकर्त
प्रहस्य बाहू च शिरश्च कर्णः ।
स स्यन्दनाद्गामगमद्गतासुः
परश्वधैः साल इवावरुग्णः ॥ ५
हताश्वमञ्जोगतिभिः सुषेणः
शिनिप्रवीरं निशितैः पृषत्कैः ।
प्रच्छाद्य नृत्यन्निव कर्णपुत्रः
शैनेयबाणाभिहतः पपात ॥ ६
पुत्रे हते क्रोधपरीतचेताः
कर्णः शिनीनां प्रवरं जिघांसुः ।
हतोऽसि हे सात्यक इत्युदीर्य
व्यवासृजद्बाणममित्रसाहम् ॥ ७
तमस्य चिच्छेद शरं शिखण्डी
त्रिभिस्त्रिभिश्च प्रतुतोद कर्णम् ।
शिखण्डिनः कार्मुकं च ध्वजं च
च्छित्त्वा क्षुराभ्यां न्यहनत्सुजातः ॥ ८
शिखण्डिनं षड्भिरविध्यदुग्रो
धार्ष्टद्युम्नेः स शिरश्चोच्चकर्त ।
ततोऽभिनत्सुतसोमं क्षुरेण
सुसंशितेनाधिरथिर्महात्मा ॥ ९
अथाक्रन्दे तुमुले वर्तमाने
धार्ष्टद्युम्ने निहते तत्र कृष्णः ।
अपाश्वाल्यं क्रियते याहि पार्थ
कर्णं जहीत्यब्रवीद्राजसिंह ॥ १०
ततः प्रहस्याशु नरप्रवीरो
रथं रथेनाधिरथेर्जगाम ।
भये तेषां त्राणमिच्छन्सुबाहु-
रभ्याहतानां रथयूथपेन ॥ ११
ततोऽपरे भारत दुष्प्रकम्प्याः
पाञ्चालानां रथसङ्घाः समेताः ।
प्रतिश्रिता ह्यन्तरिक्षे ग्रहाभा
धनुःप्रवीरास्तु रथप्रवीराः ॥ १२
विस्फार्य गाण्डीवमथोग्रघोषं
ज्यया समाहत्य तले भृशं च ।
बाणान्धकारं सहसैव कृत्वा
जघान नागाश्वरथध्वजांश्च ॥ १३
[प्रतिश्रुतः प्राचरदन्तरिक्षे
गुहा गिरीणामपतन्वयांसि ।
यन्मण्डलज्येन विजृम्भमाणो
रौद्रे मुहूर्तेऽभ्यपतत्किरीटी ॥] १४
तं भीमसेनोऽनुययौ रथेन
पृष्ठे रक्षन्पाण्डवमेकवीरः ।
तौ राजपुत्रौ त्वरितौ रथाभ्यां
कर्णाय यातावरिभिर्विषक्तौ ॥ १५
तत्रान्तरे सुमहान्सूतपुत्र-
श्चक्रे युद्धं सोमकान्संप्रमथ्य ।
रथाश्वमातङ्गगणाञ्जघान
प्रच्छादयामास शरैर्दिशश्च ॥ १६
तमुत्तमौजा जनमेजयश्च
क्रुद्धौ युधामन्युशिखण्डिनौ च ।
कर्णं बिभेदुः सहिताः पृषत्कैः
सन्नर्दमानाः सह पार्षतेन ॥ १७
ते पञ्च पाञ्चालरथाः समेता
वैकर्तनं कर्णमभिद्रवन्तः ।
तस्माद्रथाच्यावयितुं न शेकु-
र्धैर्यात्कृतात्मानमिवेन्द्रियार्थाः ॥ १८

प्रतिश्रुत प्रतिस्खन ॥ १४ ॥

षडशीतितमोऽध्याय. ॥ ८६ ॥

तेषां धनूंषि ध्वजवाजिसूतां-
स्तूर्णं पताकाश्च निकृत्य बाणैः।
तान्पाञ्चालानभ्यहनत्पृषत्कैः
कर्णस्ततः सिंह इवोन्ननाद ॥ १९
तस्यास्यतस्तानभिनिघ्नतश्च
ज्याबाणहस्तस्य धनुःस्वनेन।
साद्रिद्रुमा स्यात्पृथिवी विशीर्णे-
त्यतीव मत्वा जनता व्यषीदत् ॥ २०
स शक्रचापप्रतिमेन धन्वना
भृशायतेनाधिरथिः शरान्सृजन्।
बभौ रणे दीप्तमरीचिमण्डलो
यथांशुमाली परिवेषवांस्तथा ॥ २१
शिखण्डिनं द्वादशभिः पराभिन-
च्छितैः शरैः षड्भिरथोत्तमौजसम्।
त्रिभिर्युधामन्युमविध्यदाशुगै-
स्त्रिभिस्त्रिभिः सोमकपार्षतात्मजौ ॥ २२
पराजिताः पञ्च महारथास्तु ते
महाहवे सूतसुतेन मारिष।
निरुद्यमास्तस्थुरमित्रनन्दना
यथेन्द्रियार्थात्मवता पराजिताः ॥ २३
निमज्जतस्तानथ कर्णसागरे
विपन्ननावो वणिजो यथार्णवे।
उदध्रिरे नौभिरिवार्णवाद्रथैः
सुकल्पितैर्द्रौपदिजाः स्वमातुलान् ॥ २४
ततः शिनीनामृषभः शितैः शरै-
र्निकृत्य कर्णप्रहितानिषून्बहून्।
विदार्य कर्णं निशितैरयस्मयै-
स्तवात्मजं ज्येष्ठमविध्यदष्टभिः ॥ २५
कृपोऽथ भोजश्च तवात्मजस्तथा
स्वयं च कर्णो निशितैरताडयत्।
स तैश्चतुर्भिर्युयुधे यदूत्तमो
दिगीश्वरैर्दैत्यपतिर्यथा तथा ॥ २६
समाततेनेष्वसनेन कूजता
महास्वनेनाशनिपातदीधितिः।
बभूव दुर्धर्षतरः स सात्यकिः
शरन्नभोमध्यगतो यथा रविः ॥ २७
पुनः समास्थाय रथान्सुदंशिताः
शिनिप्रवीरं जुगुपुः परंतपाः।
समेत्य पाञ्चालमहारथा रणे
मरुद्गणाः शक्रमिवारिनिग्रहे ॥ २८
ततोऽभवद्युद्धमतीव दारुणं
तवाहितानां तव सैनिकैः सह।
रथाश्वमातङ्गविनाशनं तथा
यथा सुराणामसुरैः पुराऽभवत् ॥ २९
रथा द्विपा वाजिपदातयस्तथा
भ्रमन्ति नानाविधशस्त्रवेष्टिताः।
परस्परेणाभिहताश्च चस्खलु-
र्विनेदुरार्ता व्यसवोऽपतंस्तथा ॥ ३०
तथागतं भीममभीस्तवात्मजः
ससार राजावरजः किरञ्शरैः।
तमभ्यधावत्त्वरितो वृकोदरो
महारुरुं सिंह इवाभिपेदिवान् ॥ ३१
ततस्तयोर्युद्धमतीव दारुणं
प्रदीव्यतोः प्राणदुरोदरं द्वयोः।
परस्परेणाभिनिविष्टरोषयो-
रुदग्रयोः शम्बरशक्रयोर्यथा ॥ ३२
शरैः शरीरार्तिकरैः सुतेजनै-
र्निजघ्नतुस्तावितरेतरं भृशम्।
सकृत्प्रभिन्नाविव वासितान्तरे
महागजौ दोर्भिरदीनघातिनौ ॥ ३३
आलोक्य तौ चैव परस्परं ततः
समं च शूरौ च ससारथी तदा।
भीमोऽब्रवीद्याहि दुःशासनाय
दुःशासनो याहि वृकोदराय ॥ ३४
तयो रथौ सारथिसंप्रचोदितौ
समं रथौ तौ सहसा समीयतुः।
नानायुधच्छत्रपताकिकाध्वजौ
दिवीव पूर्वं बलशक्रयो रणे ॥ ३५

भीम उवाच ।
दिष्ट्याऽसि दुःशासन अद्य दृष्टः
क्षणं प्रतीच्छे सहवृद्धि मूलम् ।
चिरोदितं यन्मया ते सभायां
कृष्णाभिमर्शेन गृहाण मत्तः ॥ ३६
स एवमुक्तस्तु ततो महात्मा
दुःशासनो वाक्यमुवाच वीरः ।
सर्वं स्मरन्नेव विसंस्मरामि
उदीर्यमाणं शृणु भीमसेन ॥ ३७
स्मरामि चात्मप्रभवं चिराय
यज्ञातुषे वेश्मनि राज्यहानि ।
विश्वासहीना मृगयां चरन्तो
वसन्ति सर्वत्र निराकृतास्तु ॥ ३८
महाभयं राज्यहानि स्मरन्त-
स्तथोपभोगाच्च सुखाच्च हीनाः ।
वनेष्वटन्तो गिरिगह्वराणि
पाञ्चालराजस्य पुरं प्रविष्टाः ॥ ३९
मायां यूयं कामपि संप्रविष्टा
यतो वृतः कृष्णया फल्गुनो वः ।
संभूय पापैस्तदनार्यवृत्तं
कृतं तदा मातृकृतानुरूपम् ॥ ४०
एका वृता पञ्चभिः साभिपन्ना
ह्यलज्जमानैश्च परस्परस्य ।
स्मरे सभायां सुबलात्मजेन
दासीकृता यत्सह कृष्णया च ॥ ४१
सञ्जय उवाच ।
इत्येवमुक्तस्तु तवात्मजेन
पाण्डोः सुतः कोपवशं जगाम ।
तवात्मजस्याथ वृकोदरो भृशं
धनुः क्षुराभ्यां ध्वजमेव चाच्छिनत् ।
ललाटमप्यस्य विभेद पत्रिणा
शिरश्च कायात्प्रजहार सारथेः ॥ ४२
स राजपुत्रोऽन्यदवाप्य कार्मुकं
वृकोदरं द्वादशभिः पराभिनत् ।
स्वयं नियच्छंस्तुरगानजिह्मगैः
शरैश्च भीमं पुनरप्यवीवृषत् ॥ ४३

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे षडशीतितमोऽध्यायः ॥ ८६ ॥

सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

भीमेन राज्ञां समक्षं दुःशासनवक्षसो रक्तपानम् ॥ १ ॥

सञ्जय उवाच ।
स राजपुत्रेण समार्च्छदुग्र-
दुःशासनेन निकृतो निकृत्या ॥ १
तत्राकरोद्दुष्करं राजपुत्रो
दुःशासनः कुरुवीरो महात्मा ।
यद्भीमसेनं प्रतियोधयद्रणे
जम्भो यथा शक्रमुदारवीर्यम् ॥ २
धनुश्छित्त्वा भीमसेनस्य सङ्ख्ये
षड्भिः शरैः सारथिमभ्यविध्यत् ।
ततोऽविध्यत्त्रिंशता भीमसेनं
वरेषुभिर्वन्यमिव द्विपेन्द्रम् ॥ ३
स कार्मुकं गृह्य तु भारसाधनं
भीमस्तदा राजपुत्रं ह्यविध्यत् ।
पञ्चाशतैर्बाणगणैः स्तनान्तरे
तोत्रैर्यथा तीव्रवेगं द्विपेन्द्रम् ॥ ४
ततस्तु राजन्विरथं महात्मा
दुःशासनो भीमसेनं चकार ।
निहत्य सङ्ख्ये चतुरोऽस्य वाहा-
ञ्छित्त्वा रथेषां पुनरेव चाक्षिपत् ॥ ५
ततः क्षितिस्थो ह्यवरुह्य याना-
द्वृकोदरो गदया तस्य वाहान् ।

यमक्षयं प्रेषयित्वा महात्मा
रथं समाकर्षत राजसूनोः ॥ ६
तस्मादवप्लुत्य रथात्ससर्ज
दुःशासनस्तोमरमुग्रवेगम् ।
स तेन विद्धो ह्युरसि ह्यप्रमेयो
गदां तस्मै विससर्जाप्रमेयाम् ॥ ७
ततः क्रोधाद्भीमसेनः कृतानि
सर्वाणि दुःखान्यनुसंस्मरन्वै ।
संस्मृत्य संस्मृत्य तथा प्रतिज्ञा-
मुग्रामसौ राजपुत्रो व्यषीदत् ॥ ८
संचिन्तितं रोषमतीव वेगा-
त्रयोदशाब्दं पुरुषप्रवीरः ।
प्रगृह्य वज्राशनितुल्यवेगां
गदां करेणाथ वृकोदरो रुषा ॥ ९
निपातयित्वा पृथिवीतले भृशं
स ताडयामास वृकोदरो बली ।
अतीव संताडितभिन्नगात्रो
दुःशासनो वै निपपात भूमौ ॥ १०
आक्रम्य कण्ठे युधि राजपुत्रं
संरक्तनेत्रो ह्यब्रवीद्भार्तराष्ट्रम् ।
तद्ब्रूहि किं त्वं परिमार्गमाणो
ह्यस्मान्पराभूय इहागतः पुनः ॥ ११
दिदीपयंस्तद्भृशदीपितं मे
चिरार्जितं रोषमतिप्रदीप्तम् ।
मधु प्रपास्ये तव कोष्टभाजना-
दित्यब्रवीद्भीमसेनस्तरस्वी ॥ १२
दुःशासनं कण्ठदेशे प्रमृद्नं-
स्ततः क्रूरं भीमसेनश्चकार ।
तं व्यंसयित्वा सहसा ससार
बलादसौ धार्तराष्ट्रस्तरस्वी ॥ १३
भीमोऽभिदुद्राव सुतं त्वदीयं
सपत्नतां दर्शयन्धार्तराष्ट्रे ।
मृगं मुहुः सिंहशिशुर्यथा वने
तथाश्वभिद्रुत्य महाबलं बली ॥ १४
निगृह्य चैनं परमेण कर्मणा
उत्क्षिप्य चोत्क्षिप्य च तूर्णमेनम् ।
भूमौ तदा निष्पिपेषाथ वीर
असिं विकोशं विमलं चकार ॥ १५
तं पातयित्वा तु वृकोदरोऽथ
जगर्ज हर्षेण विनादयन्दिशः ।
नादेन तेनाखिलपार्श्ववर्तिनो
मूर्च्छाकुलाः पतितास्त्वाजमीढ ॥ १६
दुःशासनं तत्र समीक्ष्य राज-
न्भीमो महाबाहुरचिन्त्यकर्मा ।
स्मृत्वा च केशग्रहणं च देव्या
वस्त्रापहारं च रजस्वलायाः ॥ १७
अनागसो भर्तृपराङ्मुखाया
दुःखानि दत्तान्यपि विप्रचिन्त्य ।
जज्वाल कोपादथ भीमसेन
आज्यप्रसिक्तो हि यथा हुताशः ॥ १८
तत्राह कर्णं च सुयोधनं च
कृपं द्रौणिं कृतवर्माणमेव ।
निहन्मि दुःशासनमद्य पापं
संरक्ष्यतामद्य समस्तयोधाः ॥ १९
इत्येवमुक्त्वा सहसाभ्यधाव-
न्निहन्तुकामोऽतिबलस्तरस्वी ।
तथा तु विक्रम्य रणे वृकोदरो
महागजं केसरिको यथैव ।
निगृह्य दुःशासनमेकवीरः
सुयोधनस्याधिरथेः समक्षम् ॥ २०
असिं समुद्यम्य सितं सुधारं
कण्ठे पदाक्रम्य च वेपमानम् ।
उवाच तद्वैरिति यद्ब्रुवाणो
हृष्टोऽवदः कर्णसुयोधनाभ्याम् ॥ २१
ये राजसूयावभृथे पवित्रा
जाताः कचा याज्ञसेन्या दुरात्मन् ।
ते पाणिना कतरेणावकृष्टा-
स्तद्ब्रूहि त्वां पृच्छति भीमसेनः ॥ २२

श्रुत्वा तु तद्भीमवचः सुघोरं
दुःशासनो भीमसेनं निरीक्ष्य ।
जज्वाल भीमं स तदा रुषेन
संशृण्वतां कौरवसोमकानाम् ।
उक्तस्तदाजौ स तथा सरोषं
जगाद भीमं परिवृत्तनेत्रः ॥ २३
अयं करिकराकारः पीनस्तनविमर्दनः ।
गोसहस्रप्रदाता च क्षत्रियान्तकरः करः ॥ २४
अनेन याज्ञसेन्या मे भीम केशा विकर्षिताः ।
पश्यतां कुरुमुख्यानां युष्माकं च सभासदाम् २५
एवं त्वसौ राजसुतं निशम्य
ब्रुवन्तमाजौ विनिपीड्य वक्षः ।
भीमो बलात्तं प्रतिगृह्य दोर्भ्यां-
मुच्चैर्ननादाथ समस्तयोधान् ॥ २६
उवाच यस्यास्ति बलं स रक्ष-
त्वसौ भवेदद्य निरस्तबाहुः ।
दुःशासनं जीवितं प्रोत्सृजन्त-
माक्षिप्य योधांस्तरसा महाबलः ॥ २७
एवं क्रुद्धो भीमसेनः करेण
उत्पाटयामास भुजं महात्मा ।
दुःशासनं तेन स वीरमध्ये
जघान वज्राशनिसंनिभेन ॥ २८
कण्ठे समाक्रम्य च वेपमानं
कृत्वाऽनु रूपं परमं सुघोरम् ।
कालान्तकाभ्यां सदृशं तदानीं
विदार्य वक्षश्च महारथस्य ॥ २९
दुःशासनस्य रिपुशासनस्य
उद्धृत्य वक्षः पतितस्य भूमौ ।
ततोऽपिबच्छोणितमस्य कोष्ण-
मास्याद्य चास्याद्य च वीक्षमाणः ॥ ३०
क्रुद्धः प्रहृष्टो निजगाद वाक्यं
स्तन्यस्य मातुः पयसोऽमृतस्य ।
माध्वीकजस्येव रसस्य तस्य
मधोश्च पानाद्यवकस्य पानात् ॥ ३१
पयोदधिभ्यां मथिताच्च मुख्या-
त्तथेक्षुसारस्य मनोहरस्य ।
सर्वेभ्य एवाभ्यधिको रसोऽस्य
मतो ममाद्याहितलोहितस्य ॥ ३२
एवं ब्रुवाणं पुनरुत्थितं त-
मास्फोट्य वल्गन्तमतिप्रहृष्टम् ।
ये भीमसेनं ददृशुस्तदानीं
प्रायेण तेऽपि व्यथिता निपेतुः ॥ ३३
ये चापि नासन्पतिता मनुष्या-
स्तेषां करेभ्यः पतितं तु शस्त्रम् ।
भयाच्च संचुक्रुशुरस्वरैस्तदा
निमीलिताक्षा मुमुहुश्च तत्र ॥ ३४
ये तत्र भीमं रुधिरं पिबन्तं
दुःशासनस्य ददृशुः प्रपन्नाः ।
नायं मनुष्यस्त्विति भाषमाणाः
सर्वेऽपलायन्त भयाभिपन्नाः ॥ ३५

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

अष्टाशीतितमोऽध्यायः ॥ ८८ ॥

दुःशासनवधक्रोधादात्मानमभिद्रुतवतां तदनुजानां भीमेन वधः ॥ १ ॥ दुःशासनादिनिधनाद्भिन्नतः कर्णस्य शल्येन प्रोत्साहनम् ॥ २ ॥ सकुलयुद्धम् ॥ ३ ॥

सञ्जय उवाच ।
स पीत्वा रुधिरं तस्य चरणौ गृह्य भारत ।
इत्युच्चैर्वचनं प्राह प्रतिनृत्यन्वृकोदरः ॥ १
एष ते रुधिरं तीव्रं पिबामि पुरुषादवत् ।
वदेदानीं सुसंरब्धः पुनर्गौरिति गौरिति ॥ २
ये चास्मान्प्रतिनृत्यन्ति तदा गौरिति गौरिति ।

बोधानाक्षिप्य उवाचेत्यन्वयः ॥ २७ ॥ अहितस्य शत्रोः दुःशासनस्य लोहितस्य रक्तस्य ॥ ३२ ॥ सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

तान्वयं प्रतिनृत्यामः पुनर्गौरिति गौरिति ॥ ३
प्रमाणकोट्यां शयने कालकूटकभोजनम् ।
दंशनं चाहिभिस्तीक्ष्णैर्दाहं जतुगृहे च यत् ॥ ४
द्यूते च दोषभूयस्त्वमरण्ये वसतिश्च या ।
इष्वस्त्राणि च सङ्ग्रामे अनिलानिलवेश्मसु ॥ ५
दुःखान्येवाभिजानीमो न सुखानि कदाचन ।
धृतराष्ट्रस्य दौरात्म्यात्सपुत्रस्य वयं सदा ॥ ६
इत्युच्चैर्वचनं प्रोच्य जयं प्राप्य वृकोदरः ।
पुनरेव महाराज तव सैन्यमभिद्रवत् ॥ ७
रक्तार्द्रपाणिस्तु ततो महात्मा
गदापाणिः काल इवान्तकाले ।
विभीषयंस्तव पुत्रस्य सैन्य-
मितस्ततो धावति वाहिनीं ते ॥ ८
ततः क्षणाद्भारत शून्यमासी-
दायोधनं घोरतरं कुरूणाम् ।
यत्राजिमध्ये प्रापिवद्भीमसेनो
दुःशासनस्य रुधिरं क्रोधदीप्तः ॥ ९
स हत्वा समरे राजन्राजपुत्रं महाबलम् ।
पूर्णकामो मदोद्ग्रः सिंहो रुरुमिवोत्कटः ॥ १०
रुधिरार्द्रो महाराज व्यशोभत परंतपः ।
सपुष्पः किंशुक इव रक्तरक्ततरो बभौ ॥ ११
रुधिराक्तो घोरवेषः क्रुद्धो राजन्वचोऽब्रवीत् ।
ब्रूहीदानीं पापमते नृशंस पतितो ह्यसि ॥ १२
दुःशासने यादृशं संश्रुतं न-
स्तदवाप्तं पाण्डवैः सर्वमेव ।
अत्रैवमाप्स्याम्यपरं द्वितीयं
दुर्योधनं यज्ञपशुं विशस्य ॥ १३
शिरो मृदित्वाऽस्य पुनश्च शान्तिं
यास्याम्यहं कौरवाणां समक्षम् ।
या साऽपतिः सा सपतिर्हि जाता
यास्ताः सपत्योऽपतयस्तु जाताः ॥ १४
पश्यन्तु चित्रं विविधं हि लोके
ये वै तिलाः षण्डतिला बभूवुः ।
ते चेत्संसिद्धा निधनं गताः परे
किं चित्ररूपं बत जीवलोके ॥ १५
एतावदुक्त्वा वचनं प्रहृष्टः
प्राक्रोशदुच्चै रुधिरार्द्रवक्त्रः ।
ननर्त चैवातिबलो महात्मा
वृत्रं निहत्येव सहस्रनेत्रः ॥ १६
दृष्ट्वा तु नृत्यन्तमुदग्रवीर्यं
कालं यथा त्वन्तकाले प्रजानाम् ।
महद्भयं चाधिरथिं विवेश
जये निराशाश्च सुतास्त्वदीयाः ॥ १७
दुःशासने तु निहते पुत्रास्तव महारथाः ।
महत्क्रोधविषं वीरा धारयन्तो महाबलाः ।
ते तु राजन्महावीर्या भीमं प्राच्छादयञ्छरैः ॥ १८
निषङ्गी कवची खड्गी दण्डधारो धनुर्धरः ।
अलम्बुर्जलसन्धश्च वातवेगसुवर्चसौ ॥ १९
एते समेत्य सहिता भ्रातृव्यसनकर्शिताः ।
भीमसेनं महाबाहुं पीडयामासुरञ्जसा ॥ २०
स वध्यमानो विशिखैः समन्तात्तैर्महारथैः ।
भीमः क्रोधाभिरक्ताक्षः क्रुद्धः काल इवाबभौ ॥ २१
ततः परिवृतो राजन्नवभिः शत्रुतापनैः ।
दुःशासनाद्वरजैः पुत्रैस्तव वृकोदरः ॥ २२
तांस्तु भल्लैर्महावेगैर्नवभिर्नव भारत ।
रुक्माङ्गदाङ्गुक्मपुङ्खैः पार्थो निन्ये यमक्षयम् ॥ २३
हतेषु तव पुत्रेषु बलं तद्विप्रदुद्रुवे ।
पश्यतः सूतपुत्रस्य पाण्डवस्य भयार्दितम् ॥ २४
ततः कर्णं महाराज प्रविवेश महद्भयम् ।
दृष्ट्वा भीमस्य विक्रान्तमन्तकस्य प्रजास्विव ॥ २५
तस्य त्वाकारभावज्ञः शल्यः समितिशोभनः ।
उवाच वचनं कर्णं प्राप्तकालं हितं तदा ॥ २६
मा व्यथां कुरु राधेय नैवं त्वय्युपपद्यते ॥ २७
एते द्रवन्ति राजानो भीमसेनभयार्दिताः ।
दुर्योधनश्च संमूढो भ्रातृव्यसनकर्शितः ॥ २८
दुःशासनस्य रुधिरे पीयमाने महात्मना ।
व्यापन्नचेताः सहसा शोकोपहतचेतनः ॥ २९
उपासते त्वामेते हि परिवार्य महारथाः ।
कृपप्रभृतयः कर्ण हतशेषाः सहोदराः ॥ ३०
पाण्डवा लब्धलक्षाश्च धनञ्जयपुरोगमाः ।

त्वामेवाभिमुखाः शूरा युद्धाय समुपस्थिताः ॥ ३१
स त्वं पुरुषशार्दूल पौरुषे महति स्थितः ।
क्षत्रधर्मं पुरस्कृत्य प्रत्युद्याहि धनञ्जयम् ॥ ३२
भारो हि धार्तराष्ट्रेण त्वयि सर्वः समाहितः ।
तमुद्वह महाबाहो यथाशक्ति यथाबलम् ॥ ३३
जये स्याद्विपुला कीर्तिर्ध्रुवः स्वर्गः पराजये ।
वृषसेनश्च राधेय संक्रुद्धस्तनयस्तव ।
त्वयि मोहं समापन्ने पाण्डवानभिधावति ॥ ३४
सञ्जय उवाच ।
एतच्छ्रुत्वा तु वचनं शल्यस्यामिततेजसः ।
हृदि मानुष्यकं भावं कृत्वा युद्धाय सुस्थिरम् ॥ ३५
ततः क्रुद्धो वृषसेनोऽभ्यधाव-
द्भीमं समायान्तममित्रसाहम् ।
बाणैः किरन्तं प्रतियाति चोग्रं
व्यात्ताननं कालमिवापतन्तम् ॥ ३६
तमभ्यधावन्नकुलः प्रवीर-
मारादमित्रं प्रतुदन्पृषत्कैः ।
कर्णस्य पुत्रं समरे प्रहृष्टं
जिष्णुर्जिघांसुर्मघवेव जम्भम् ॥ ३७
ततो ध्वजं स्फाटिकहेमचित्रं
चिच्छेद धैर्यान्नकुलः क्षुरेण ।
कर्णात्मजस्येष्वसनं च चित्रं
भल्लेन जाम्बूनदचित्रनद्धम् ॥ ३८
अथान्यदादाय धनुः स शीघ्रं
कर्णात्मजः पाण्डवमभ्यविध्यत् ।
दिव्यैरस्त्रैरभ्यवर्षत्तदैनं
कर्णस्य पुत्रो नकुलं कृतास्त्रम् ॥ ३९
ततः क्रुद्धो नकुलः कर्णपुत्रं
शरैर्महोल्काभिरिवाभ्यपीडयत् ।
स कर्णपुत्रो नकुलस्य राज-
न्सर्वानस्त्रान्वारयदुत्तमास्त्रैः ॥ ४०
आसीत्सुघोरं भरतप्रवीर
युद्धं तदा कर्णजपाण्डवाभ्याम् ॥ ४१
वनायुजान्सुकुमारान्सुशुभ्रा-
नलंकृताञ्जातरूपेण चित्रान् ।
जघान चाश्वान्नकुलस्य वीरो
रणाजिरे सूतपुत्रस्य पुत्रः ॥ ४२
ततो हताश्वादवरुह्य याना-
च्चर्माऽऽददे रुचिरं बर्हिचित्रम् ।
आकाशसंकाशमसिं प्रगृह्य
प्रकाशमानः खगवच्चचार ॥ ४३
ततोऽस्य पक्षाननयद्यमाय
द्विसाहस्रान्नकुलः क्षिप्रकारी ।
ते प्रापतन्नसिना वै विशस्ता
यथाऽश्वमेधे पशवः शमित्रा ॥ ४४
ततस्ततो विजिता युद्धशौण्डा
नानादेश्याः सुहृदः सत्यसन्धाः ।
एकेन शीघ्रं नकुलेन नुन्नाः
सारेप्सुनेवोत्तमचन्दनस्य ॥ ४५
भूमौ चरन्तं नकुलं रथौघाः
समन्ततः सायकैः प्रत्यगृह्णन् ।
स तुद्यमानो नकुलो विहङ्गै-
श्चचार सङ्ख्ये द्विषतो विनिघ्नन् ॥ ४६
तं कर्णपुत्रोऽपि चरन्तमाजौ
नराश्वमातङ्गरथप्रवीरान् ।
निघ्नन्तमष्टादशभिः पृषत्कै-
र्विव्याध वीरः स चुकोप विद्धः ॥ ४७
ततोऽभ्यधावत्समरे जिघांसुः
कर्णात्मजं पाण्डुसुतो नृवीरम् ।
तस्येषुभिर्व्यधमत्सूतपुत्रो
महारणे वर्म सहस्रभारम् ॥ ४८
तस्याथ कांस्यं सुशितं सुपीत-
मसिप्रवीरं गुरुभारसाहम् ।
द्विषच्छरीरापहरं सुघोर-
माधून्वतः सर्पमिवात्तकोशम् ॥ ४९
क्षिप्रं शरैः षड्भिरमित्रसाह-
श्चकर्त खड्गं निशितैः सुधारैः ।
पुनश्च पार्थं निशितैः पृषत्कैः
स्तनान्तरे क्षिप्रमिवाप्यविध्यत् ॥ ५०

स भीमसेनस्य रथं च गत्वा
ववर्ष वै शरवर्षं सुघोरम् ॥ ५१
नकुलमथ विदित्वा छिन्नबाणासनासिं
विरथमरिभिरार्तं कर्णपुत्रास्त्रमग्नम् ।
पवनचलपताका ह्लादिनो वल्गिताश्वाः
परपुरुषनियुक्ताः स्वै रथैः शीघ्रमीयुः॥५२
द्रुपदसुतवरिष्ठाः पञ्च शैनेयषष्ठा
द्रुपददुहितृपुत्राः पञ्च चामित्रसाहाः ।
द्विरदरथनराश्वान्सूदयन्तस्त्वदीयान्
भगवत इव रुद्राः सङ्ख्यया हेतिमन्तः॥५३
अथ तव रथमुख्यास्तान्प्रतीयुस्त्वरन्तः
कृपहृदिकसुतौ च द्रौणिदुर्योधनौ च ।
शकुनिशुकवृकाश्च क्राथदेवावृधौ च
द्विरदजलदघोषैः स्यन्दनैः कार्मुकैश्च ॥५४
अथ तव रथवर्यास्तान्दृशैकप्रवीरा-
निषुभिरशनिकल्पैस्ताडयन्तो न्यरुन्धन् ।
नवजलदसवर्णैर्हस्तिभिस्तान्स्म वन्यु-
र्गिरिशिखरनिकाशैर्भीमवेगैः कुणिन्दाः॥

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे अष्टाशीतितमोऽध्यायः ॥ ८८ ॥

एकोननवतितमोऽध्यायः ॥ ८९ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
सुकल्पिता हैमवता मदोत्कटा
रणाभिकामैः कृतिभिः समास्थिताः ।
सुवर्णजालैर्विंतता बभुर्गजा-
स्तथा यथा खे जलदाः सविद्युतः ॥ १
कुणिन्दपुत्रो दशभिर्महाहयैः
कृपं ससूताश्वमपीडयद्भृशम् ।
ततः शरद्वत्सुतसायकैर्हतः
सहैव नागेन पपात भूतले ॥ २
कुणिन्दपुत्रावरजस्तु तोमरै-
र्दिवाकरांशुप्रतिमैरयस्मयैः ।
जघान भोजस्य हयानथापतन्
क्षणाद्विशस्ताः कृतवर्मणे हयाः ॥ ३
अथापरे द्रौणिहता महाद्विपा-
स्त्रयः ससर्वायुधयोधकेतनाः ।
निपेतुरुर्व्यां व्यसवो विचेतना-
स्तथा यथा वज्रहता महाचलाः ॥ ४
कुणिन्दराजावरजादनन्तरः
स्तनान्तरे पत्रिवरैरताडयत् ।
तवात्मजं तस्य तवात्मजः शरैः
शितैः शरीरं व्यहनद्विपं च तम् ॥ ५
स नागराजः सह राजसूनुना
पपात रक्तं बहु सर्वतः क्षरन् ।
महेन्द्रवज्राग्रहतोऽम्बुदागमे
यथा जलं गैरिकपर्वतस्तथा ॥ ६
कुणिन्दपुत्रप्रहितोऽपरो द्विपः
क्राथं ससूताश्वरथं व्यपोथयत् ।
ततोऽपतत्क्राथशराभिघातितः
सहेश्वरो वज्रहतो यथा गिरिः ॥ ७
रथी द्विपस्थेन हतोऽपतच्छरैः
क्राथाधिपः पर्वतजेन दुर्जयः ।
सवाजिसूतेष्वसनध्वजस्तथा
यथा महावातहतो महाद्रुमः ॥ ८
वृको द्विपस्थं गिरिराजवासिनं
भृशं शरैर्द्वादशभिः पराभिनत् ।
ततो वृकं साश्वरथं महाद्विपो
द्रुतं चतुर्भिश्चरणैर्व्यपोथयत् ॥ ९
स पोथितो नागवरेण वीर्यवा-
न्पराभिनद्द्वादशभिः शिलीमुखैः ।

वृकेण बाणाभिहतोऽपतत्क्षितौ
सवारणो बभ्रुसुतेन सार्धम् ॥ १०
कुणिन्दराजस्य सुतोऽपरस्तदा
स चापि शूरः सहसा समर्पितः ।
पपात बाणैः सुबलस्य सूनुना
विषाणपुच्छापरगात्रपातिना ॥ ११
गजेन वाहाञ्शकुनेः कुणिन्दजो
निनाय वैवस्वतमन्दिरं रणे ।
रथं च संक्षुभ्य ननाद नर्दत-
स्ततोऽस्य गान्धारपतिः शिरोऽहरत् ॥ १२
ततः कुणिन्देषु गतेषु तेषु
प्रहृष्टरूपास्तव ते महारथाः ।
भृशं प्रदध्मुर्लवणाम्बुसंभवा-
न्वरांश्च बाणासनपाणयोऽभ्ययुः ॥ १३
तथाऽभवद्युद्धमतीव दारुणं
पुनः कुरूणां सह पाण्डुसृञ्जयैः ।
शरासिशक्त्यृष्टिगदापरश्वधै-
र्नराश्वनागासुहरं भृशाकुलम् ॥ १४
रथाश्वमातङ्गपदातयस्ततः
परस्परं विप्रहताः क्षितौ पतन् ।
यथा सविद्युत्तटितो जलप्रदाः
समुत्थितैर्दिग्भ्य इवोग्रमारुतैः ॥ १५
ततः शतानीकहता महागजा
हया रथाः पत्तिगणाश्च तावकाः ।
सुपर्णवातप्रहता यथोरगा-
स्तथा गता गां विवशा विचूर्णिताः ॥ १६
ततोऽभ्यविध्यद्बहुभिः शितैः शरैः
स विन्दपुत्रो नकुलात्मजं रणे ।
ततोऽस्य कोपाद्विचकर्त नाकुलिः
शिरः क्षुरेणाम्बुजसन्निभाननम् ॥ १७
ततः शतानीकमविध्यदायसै-
स्त्रिभिः शरैः कर्णसुतोऽर्जुनं त्रिभिः ।
त्रिभिश्च भीमं नकुलं च सप्तभि-
र्जनार्दनं द्वादशभिश्च सायकैः ॥ १८
तदस्य कर्मातिमनुष्यकर्मणः
समीक्ष्य हृष्टाः कुरवोऽभ्यपूजयन् ।
पराक्रमज्ञास्तु धनञ्जयस्य ये
हतोऽयमग्नाविति ते तु मेनिरे ॥ १९

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे एकोननवतितमोऽध्यायः ॥ ८९ ॥

नवतितमोऽध्यायः ॥ ९० ॥

अर्जुनेन कर्णसूनोर्वृषसेनस्य वधः ॥ १ ॥

सञ्जय उवाच ।
ततः किरीटी परवीरघाती
हताश्वमालोक्य नरप्रवीरः ।
माद्रीसुतं नकुलं लोकमध्ये
समीक्ष्य कृष्णं भृशविक्षतं च ।
समभ्यधावद्वृषसेनमाहवे
स सूतजस्य प्रमुखे स्थितस्तदा ॥ १
तमापतन्तं नरवीरमुग्रं
महाहवे बाणसहस्रधारिणम् ।
अभ्यापतत्कर्णसुतो महारथं
यथा महेन्द्रं नमुचिः पुरा तथा ॥ २
तौ तत्र शूरौ रथकुञ्जरौ रणे
परस्परस्याभिमुखौ महारथौ ।
ससर्जतुः शरसङ्घाननेका-
न्संभ्रान्तरूपौ सुभृशं तदानीम् ॥ ३
ततो द्रुतं चैकशरेण पार्थं
शितेन विद्ध्वा युधि कर्णपुत्रः ।
ननाद नादं सुमहानुभावो
विद्ध्वेव शक्रं नमुचिः स वीरः ॥ ४
पुनः स पार्थं वृषसेन उग्रै-
र्बाणैरविध्यद्भुजमूले तु सव्ये ।

तथैव कृष्णं नवभिः समार्दय-
त्पुनश्च पार्थं दशभिर्जघान ॥ ५
पूर्वं यथा वृषसेनप्रयुक्तै-
रभ्याहतः श्वेतहयः शरैस्तैः ।
संरम्भमीषद्गमितो वधाय
कर्णात्मजस्याथ मनः प्रदध्रे ॥ ६
ततः किरीटी रणमूर्ध्नि कोपात्
कृत्वा त्रिशाखां भ्रुकुटिं ललाटे ।
मुमोच तूर्णं विशिखान्महात्मा
वधे धृतः कर्णसुतस्य सङ्ख्ये ।
आरक्तनेत्रोऽन्तकशत्रुहन्ता
उवाच कर्णं भृशमुत्स्मयंस्तदा ॥ ७
दुर्योधनं द्रौणिमुखांश्च सर्वा-
नहं रणे वृषसेनं तमुग्रम् ।
सम्पश्यतः कर्ण तवाद्य सङ्ख्ये
नयामि लोकं निशितैः पृषत्कैः ॥ ८
ऊनं च तावद्धि जना वदन्ति
सर्वैर्भवद्भिर्मम सूनुर्हतोऽसौ ।
एको रथो मद्विहीनस्तरस्वी
अहं हनिष्ये भवतां समक्षम् ॥ ९
संरक्ष्यतां रथसंस्थाः सुतोऽय-
महं हनिष्ये वृषसेनमुग्रम् ।
पश्चाद्वधिष्ये त्वामपि सम्प्रमूढ-
महं हनिष्येऽर्जुन आजिमध्ये ॥ १०
तमद्य मूलं कलहस्य सङ्ख्ये
दुर्योधनापाश्रय जातदर्पम् ।
त्वामद्य हन्ताऽस्मि रणे प्रसह्य
अस्यैव हन्ता युधि भीमसेनः ।
दुर्योधनस्याधमपूरुषस्य
यस्यानयादेष महान्क्षयोऽभवत् ॥ ११
स एवमुक्त्वा विनिमृज्य चापं
लक्ष्यं हि कृत्वा वृषसेनमाजौ ।
ससर्ज बाणान्विशिखान्महात्मा
वधाय राजन्कर्णसुतस्य सङ्ख्ये ॥ १२
विव्याध चैनं दशभिः पृषत्कै-
र्मर्मस्वशङ्कं ग्रहसन्किरीटी ।
चिच्छेद चास्येष्वसनं भुजौ च
क्षुरैश्चतुर्भिर्निशितैः शिरश्च ॥ १३
स पार्थबाणाभिहतः पपात
रथाद्विबाहुर्विशिरा धरायाम् ।
सुपुष्पितो वज्रहतोऽतिमात्रो
भग्नो यथा साल इवावकृत्तः ॥ १४
तं पार्थबाणाभिहतं पतन्तं
सम्प्रेक्ष्य कर्णः सुतमाशुकारी ।
रथं रथेनाशु जगाम रोषा-
त्किरीटिनः पुत्रवधाभितप्तः ॥ १५

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे नवतितमोऽध्यायः ॥ ९० ॥

ऊनमिति । अभिमन्यु साधनैरिति शेष । साधनैरून वदन्ती- | त्यन्वयः ॥ ९ ॥ नवतितमोऽध्यायः ॥ ९० ॥

---

* एतदनन्तरं झ. पुस्तके एकोऽध्यायोऽधिको दृश्यते ।

सञ्जय उवाच ।
तमायान्तमभिप्रेक्ष्य वेलोद्वृत्तमिवार्णवम् ।
गर्जन्तं सुमहाकायं दुर्निवारं सुरैरपि ।
अर्जुनं प्राह दाशार्हः प्रहस्य पुरुषर्षभः ॥ १
अयं सरथ आयाति श्वेताश्वः शल्यसारथिः ।
येन ते सह योद्धव्यं स्थिरो भव धनञ्जय ॥ २
पश्य चैनं समायुक्तं रथं कर्णस्य पाण्डव ।
श्वेतवाजिसमायुक्तं युक्तं राधासुतेन च ॥ ३
नानापताकाकलिलं किङ्किणीजालमालिनम् ।
उद्यमानमिवाकाशे विमानं पाण्डुरैर्हयैः ॥ ४
ध्वजं च पश्य कर्णस्य नागकक्षं महात्मनः ।
आखण्डलधनुःप्रख्यमुल्लिखन्तमिवाम्बरम् ॥ ५
पश्य कर्णं समायान्तं धार्तराष्ट्रप्रियैषिणम् ।
शरधारा विमुञ्चन्तं धारासारमिवाम्बुदम् ॥ ६
एष मद्रेश्वरो राजा रथाग्रे पर्यवस्थितः ।
नियच्छति हयानस्य राधेयस्यामितौजसः ॥ ७
शृणु दुन्दुभिनिर्घोषं शङ्खशब्दं च दारुणम् ।
सिंहनादांश्च विविधाञ्शृणु पाण्डव सर्वतः ॥ ८

एकनवतितमोऽध्यायः ॥ ९१ ॥

रणाय कर्णार्जुनयोः समागम. ॥ १ ॥ तदवलोकनाय दिवि देवगन्धर्वादीनां समागमः ॥ २ ॥ देवासुरादीनां कर्णार्जुनसमाश्रयणेन द्वैधीभावः ॥ ३ ॥

सञ्जय उवाच ।
वृषसेनं हतं दृष्ट्वा क्रोधामर्षसमन्वितः ।
पुत्रशोकोद्भवं वारि नेत्राभ्यां समवासृजत् ॥ १
रथेन कर्णस्तेजस्वी जगामाभिमुखो रिपुम् ।
युद्धायामर्षताम्राक्षः समाहूय धनञ्जयम् ॥ २
तौ रथौ सूर्यसङ्काशौ वैयाघ्रपरिवारितौ ।
समेतौ ददृशुस्तत्र द्याविवार्कौ समुद्गतौ ॥ ३
श्वेताश्वौ पुरुषादित्यावास्थितावरिमर्दनौ ।
शुशुभाते महात्मानौ चन्द्रादित्यौ यथा दिवि ।
'रथौ चतुर्भिर्जलदैर्भगमित्राविवाम्बरे ॥' ४
तौ दृष्ट्वा विस्मयं जग्मुः सर्वसैन्यानि मारिष ।
त्रैलोक्यविजये यत्ताविन्द्रवैरोचनाविव ॥ ५
रथज्यातलनिर्ह्रादैर्बाणशब्दैस्तथैव च ।
तौ रथावभ्यधावन्त क्षत्रियाः सर्व एव हि ॥ ६
ध्वजावालोक्य वीराणां विस्मयः समपद्यत ।
हस्तिकक्ष्यां च कर्णस्य वानरं च किरीटिनः ॥ ७

तौ रथौ संप्रसक्तौ तु दृष्ट्वा भारत पार्थिवाः ।
सिंहनादरवांश्चक्रुः साधुवादांश्च पुष्कलान् ॥ ८
श्रुत्वा तयोर्द्वैरथं च तत्र योधाः सहस्रशः ।
चक्रुर्बाहुस्वनांश्चैव तथा बाणरवं महत् ॥ ९
आजघ्नुः कुरवस्तत्र वादित्राणि समन्ततः ।
राधेयमभितो दध्मुः शङ्खाञ्शतसहस्रशः ॥ १०
तथैव पाण्डवाः सर्वे हर्षयन्तो धनञ्जयम् ।
तूर्यशङ्खनिनादेन दिशः सर्वा व्यनादयन् ॥ ११
क्ष्वेलितास्फोटितोत्कुष्टैस्तुमुलं सर्वतोऽभवत् ।
बाहुशब्दैश्च शूराणां कर्णार्जुनसमागमे ॥ १२
तौ दृष्ट्वा पुरुषव्याघ्रौ रथस्थौ रथिनां वरौ ।
प्रगृहीतमहाचापौ शरशक्तिध्वजायुतौ ॥ १३
वर्मिणौ बद्धनिस्त्रिंशौ श्वेताश्वौ शङ्खशोभितौ ।
तूणीरवरसंपन्नौ द्वावप्येतौ सुदर्शनौ ॥ १४
रक्तचन्दनदिग्धाङ्गौ समदौ गोवृषाविव ।
चापविद्युद्गुणोपेतौ शस्त्रसंपत्तियोधिनौ ॥ १५

अन्तर्धाय महाशब्दान्कर्णेनामिततेजसा ।
दोधूयमानस्य भृशं धनुषः शृणु निःस्वनम् ॥ ९
एते दीर्यन्ति सगणाः पाञ्चालानां महारथाः ।
दृष्ट्वा केसरिणं क्रुद्धं मृगा इव महावने ॥ १०
सर्वयत्नेन कौन्तेय हन्तुमर्हसि सूतजम् ।
न हि कर्णशरानन्यः सोढुमुत्सहते नरः ॥ ११
सदेवासुरगन्धर्वांस्त्रींल्लोकान्सचराचरान् ।
त्वं हि जेतुं रणे शक्तस्तथैव विदितं मम ॥ १२
भीममुग्रं महात्मानं त्र्यक्षं शर्वं कपर्दिनम् ।
न शक्ता द्रष्टुमीशानं किं पुनर्योधितुं प्रभुम् ॥ १३
त्वया साक्षान्महादेवः सर्वभूतशिवः शिवः ।
युद्धेनाराधितः स्थाणुर्देवाश्च वरदास्तव ॥ १४
तस्य पार्थ प्रसादेन देवदेवस्य शूलिनः ।
जहि कर्णं महाबाहो नमुचिं वृत्रहा यथा ॥ १५
श्रेयस्तेऽस्तु सदा पार्थ युद्धे जयमवाप्नुहि ॥ १६
अर्जुन उवाच ।
ध्रुव एव जयः कृष्ण मम नास्त्यत्र संशयः ।
सर्वलोकगुरुर्यस्त्वं तुष्टोऽसि मधुसूदन ॥ १७
चोदयाश्वान्हृषीकेश रथं मम महारथ ।
नाहत्वा समरे कर्णं निवर्तिष्यति फल्गुनः ॥ १८
अद्य कर्णं हतं पश्य मच्छरैः शकलीकृतम् ।
मां वा द्रक्ष्यसि गोविन्द कर्णेन निहतं शरैः ॥ १९
उपस्थितमिदं घोरं युद्धं त्रैलोक्यमोहनम् ।
यज्ञनाः कथयिष्यन्ति यावद्भूमिर्धरिष्यति ॥ २०
एवं ब्रुवंस्तदा पार्थः कृष्णमक्लिष्टकारिणम् ।
प्रत्युद्ययौ रथेनाशु गजं प्रतिगजो यथा ॥ २१
पुनरप्याह तेजस्वी पार्थः कृष्णमरिंदम ।
चोदयाश्वान्हृषीकेश कालोऽयमतिवर्तते ॥ २२
एवमुक्तस्तदा तेन पाण्डवेन महात्मना ।
जयेन सम्पूज्य स पाण्डवं तदा
प्रचोदयामास हयान्मनोजवान् ॥ २३
स पाण्डुपुत्रस्य रथो मनोजवः
क्षणेन कर्णस्य रथाग्रगोऽभवत् ॥ २४

इति कर्णपर्वणि अध्याय. ॥ श्री ॥

चामरव्यजनोपेतौ श्वेतच्छत्रोपशोभितौ ।
कृष्णशल्यरथोपेतौ तुल्यरूपौ महारथौ ॥ १६
सिंहस्कन्धौ दीर्घभुजौ रक्ताक्षौ हेममालिनौ ।
सिंहस्कन्धप्रतीकाशौ व्यूढोरस्कौ महाबलौ ।
अन्योन्यवधमिच्छन्तावन्योन्यजयकाङ्क्षिणौ ॥ १७
अन्योन्यमभिधावन्तौ गोष्ठे गोवृषभाविव ।
प्रभिन्नाविव मातङ्गौ सुसंरब्धाविवाचलौ ॥ १८
आशीविषशिशुप्रख्यौ यमकालान्तकोपमौ ।
इन्द्रवृत्रावि क्रुद्धौ सूर्यचन्द्रसमप्रभौ ॥ १९
महाग्रहाविव क्रुद्धौ युगान्ताय समुत्थितौ ।
देवगर्भौ देवसमौ देवतुल्यौ च रूपतः ॥ २०
यदृच्छया समायातौ सूर्याचन्द्रमसौ यथा ।
बलिनौ समरे दृप्तौ नानाशस्त्रधरौ युधि ॥ २१
तौ दृष्ट्वा पुरुषव्याघ्रौ शार्दूलाविव धिष्ठितौ ।
बभूव परमो हर्षस्तावकानां विशांपते ॥ २२
संशयः सर्वभूतानां विजये समपद्यत ।
समेतौ पुरुषव्याघ्रौ प्रेक्ष्य कर्णधनञ्जयौ ॥ २३
उभौ वरायुधधरावुभौ रणकृतश्रमौ ।
उभौ च बाहुशब्देन नादयन्तौ नभस्तलम् ॥ २४
उभौ विश्रुतकर्माणौ पौरुषेण बलेन च ।
उभौ च सदृशौ युद्धे शम्बरामरराजयोः ॥ २५
कार्तवीर्यसमौ चोभावुभौ दाशरथेः समौ ।
विष्णुवीर्यसमौ चोभावुभौ भवसमौ युधि ॥ २६
उभौ श्वेतहयौ राजन्रथप्रवरवाहिनौ ।
सारथिप्रवरौ चापि उभौ मद्रजनार्दनौ ॥ २७
ततो दृष्ट्वा महाराज राजमानौ महारथौ ।
सिद्धचारणसङ्घानां विस्मयः समपद्यत ॥ २८
धार्तराष्ट्रास्ततस्तूर्णं सबला भरतर्षभ ।
परिवव्रुर्महात्मानं कर्णमाहवशोभिनम् ॥ २९
तथैव पाण्डवा हृष्टा धृष्टद्युम्नपुरोगमाः ।
यमौ च चेकितानश्च प्रहृष्टाश्च प्रभद्रकाः ॥ ३०
नानादेश्याश्च ये शूराः शिष्टा युद्धाभिनन्दिनः ।
ते सर्वे सहिता हृष्टाः परिवव्रुर्धनञ्जयम् ॥ ३१
रिरक्षिषन्तः शत्रुघ्नाः पत्त्यश्वरथकुञ्जराः ।
धनञ्जयस्य विजये धृताः कर्णवधेऽपि च ॥ ३२
तथैव तावकाः सर्वे यत्ताः सेनाग्रहारिणः ।
दुर्योधनमुखा राजन्कर्ण जुगुपुराहवे ॥ ३३
तावकानां रणे कर्णो ग्लहो ह्यासीद्विशांपते ।
तथैव पाण्डवेयानां ग्लहः पार्थोऽभवत्तदा ॥ ३४
तयोस्तु सभ्यास्तत्रासन्प्रेक्षकाश्चाभवन्युधि ।
तत्रैषां ग्लहमानानां ध्रुवौ जयपराजयौ ॥ ३५
ताभ्यां द्यूतं समासक्तं विजयायेतराय वा ।
अस्माकं पाण्डवानां च स्थितानां रणमूर्धनि ॥ ३६
तौ तु स्थितौ महाराज समरे युद्धशालिनौ ।
अन्योन्यं प्रतिसंरब्धावन्योन्यवधकाङ्क्षिणौ ॥ ३७
तावुभौ प्रजिहीर्षन्ताविन्द्रवृत्राविव प्रभो ।
भीमरूपधरावास्तां महाधूमाविव ग्रहौ ॥ ३८
ततोऽन्तरिक्षे संजज्ञे विवादो भरतर्षभ ।
मिथो भेदाश्च भूतानामासन्कर्णार्जुनान्तरे ॥ ३९
व्याश्रयन्त द्विधा भिन्नाः सर्वे लोकास्तु मारिष ।
देवदानवगन्धर्वाः पिशाचोरगराक्षसाः ।
प्रतिपक्षग्रहं चक्रुः कर्णार्जुनसमागमे ॥ ४०
द्यौरासीत्कर्णपक्षेऽत्र सनक्षत्रा विशांपते ।
भूर्विशाला पार्थमाता पुत्रस्य जयकाङ्क्षिणी ॥ ४१
सागराश्चैव गिरयः सरितश्च नरोत्तम ।
महीजा जलजाश्चैव व्याश्रयन्त किरीटिनम् ॥ ४२
असुरा यातुधानाश्च गुह्यकाश्च परंतप ।
कर्णः समभवद्यत्र खेचराणि वयांसि च ॥ ४३
रत्नानि निधयः सर्वे वेदाश्चाख्यानपञ्चमाः ।
सोपवेदोपनिषदो व्याश्रयन्त किरीटिनम् ॥ ४४
वासुकिश्चित्रसेनश्च तक्षकश्चोपतक्षकः ।
महीवियज्जलचराः काद्रवेयाश्च सान्वयाः ।
विषवन्तो महानागा वेगिनश्चार्जुनेऽभवन् ॥ ४५
ऐरावताः सौरभेया वैशालेयाश्च भोगिनः ।
एतेऽभवन्नर्जुनस्य पापाः सर्पाश्च कर्णतः ॥ ४६
ईहामृगा व्यालमृगा मङ्गला मृगपक्षिणः ।
मङ्गलाः पशवश्चैव सिंहव्याघ्रास्तथैव च ।
पार्थस्य विजये राजन्सर्व एव समाश्रिताः ॥ ४७
वसवो मरुतः साध्या रुद्रा देवाश्विनावपि ।
अग्नी रुद्रश्च सोमश्च पन्नगाश्च दिशो दश ।

कर्णतः समपद्यन्त श्वसृगालवयांसि च ॥ ४८
वसवश्च महेन्द्रेण मरुतश्च सहाग्निना ।
धनञ्जयस्य ते वर्गा आदित्याः कर्णतोऽभवन् ॥४९
देवताः पितृभिः सार्धमृषिभिश्च परन्तप ।
तुम्बुरुप्रमुखाः सर्वे गन्धर्वा भरतर्षभ ।
यमौ वैश्रवणश्चैव वरुणश्च यतोऽर्जुनः ॥ ५०
देवर्षिब्रह्मर्षिगणाः सर्वे च खचराश्च ये ।
प्रालेयाः सहमौनेयाः शुभाश्चाप्सरसां गणाः ॥५१
सहाप्सरोभिः शुभ्राभिर्देवदूताश्च गुह्यकाः ।
किरीटिनं संश्रिताः स्म पुण्यगन्धा मनोरमाः ॥५२
अमनोज्ञाश्च ये गन्धास्ते सर्वे कर्णमाश्रिताः ।
विपरीतान्यनिष्टानि भवन्ति विनशिष्यताम् ॥५३
ये त्वन्तकाले पुरुषं विपरीतमुपाश्रितम् ।
प्रविशन्ति नरं क्षिप्रं मृत्युकालेऽभ्युपागते ।
ते भावाः सहिताः कर्णं प्रविष्टाः सूतनन्दनम् ॥५४
ओजस्तेजश्च सिद्धिश्च प्रहर्षः सत्यविक्रमौ ।
मनस्तुष्टिर्जयश्चापि तथाऽऽनन्दो नृपोत्तम ॥ ५५
ईदृशानि नरव्याघ्र तस्मिन्संग्रामसागरे ।
निमित्तानि च शुभ्राणि विविशुर्जिष्णुमाहवे ॥५६
ऋषयो ब्राह्मणैः सार्धमभजन्त किरीटिनम् ॥ ५७
ततो देवगणैः सार्धं सिद्धाश्च सह चारणैः ।
द्विधा भूता महाराज व्याश्रयन्त नरोत्तमौ ॥ ५८
विमानानि विचित्राणि गुणवन्ति च सर्वशः ।
समारुह्य समाजग्मुर्द्वैरथं कर्णपार्थयोः ।
अन्तरिक्षे महाराज देवगन्धर्वराक्षसाः ॥ ५९
एवं सर्वेषु भूतेषु द्विधा भूतेषु भारत ।
आशंसमानेषु जयं राधेयस्यार्जुनस्य च ।
विमानायुतसंबाधमाकाशमभवत्तदा ॥ ६०
ईहामृगव्यालमृगैर्द्विपाश्वरथपङ्क्तिभिः ।
ऊह्यमानाः परे मेघैर्वायुना च मनीषिणः ।
दिदृक्षवः समाजग्मुः कर्णार्जुनसमागमम् ॥ ६१
देवदानवगन्धर्वा नागयक्षपतत्रिणः ।
महर्षयो देवगणाः पितरश्च स्वधाभुजः ॥ ६२
तपोविद्यौषधीसिद्धा नानारूपाम्बरत्विषः ।
अन्तरिक्षे महाराज विवदन्तोऽवतस्थिरे ॥ ६३
ब्रह्मा ब्रह्मर्षिभिः सार्धं प्रजापतिभिरेव च ।
आस्थितो यानमाकाशे दिव्यं तेजः समागताः ६४
ततः प्रजापतिस्तूर्णमाजगाम महामते ।
द्वैरथं युधि तं द्रष्टुं कर्णपाण्डवयोस्तदा ॥ ६५

विजित्य कर्णः स्विदिमां वसुंधरा-
मथार्जुनः स्वित्प्रतिपद्यतेऽखिलाम् ।
इतीश्वरस्यापि बभूव संशयः
प्रजापतेः प्रेक्ष्य तयोर्महद्बलम् ॥ ६६

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे एकनवतितमोऽध्यायः ॥ ९१ ॥

द्विनवतितमोऽध्यायः ॥ ९२ ॥

कर्णार्जुनसमाश्रयात् लोकक्षयभीरुणा प्रजापतिना ब्रह्माणं प्रति उभयो साम्येन जयप्रार्थना ॥ १ ॥ इन्द्रेण सकारण-निरूपणमर्जुनस्यैव जये प्रार्थिते ब्रह्मेशानाभ्यां तदङ्गीकारे देवैर्हर्षात्पुष्पवर्षणम् ॥ २ ॥

सञ्जय उवाच ।
प्रजापतिस्तु तं दृष्ट्वा देवभागं समागतम् ।
अब्रवीत्तु ततो राजन्पश्यतो वै स्वयंभुवः ॥ १
उभावतिरथौ शूरावुभौ दृढपराक्रमौ ।
उभौ स्म दृशकर्माणौ वज्रिचक्रायुधोपमौ ॥ २
अहो बत महद्युद्धं कर्णार्जुनसमागमे ।
भविष्यति महाघोरं वृत्रवासवयोरिव ॥ ३
प्रजापतिरथोक्त्वैवं स्वयंभुवमचोदयत् ।
समोऽस्तु विजयः काममुभयोर्नरसिंहयोः ॥ ४
कर्णार्जुनविवादेन मा नश्येदखिलं जगत् ।
स्वयंभो ब्रूहि तद्वाक्यं समोऽस्तु विजयोऽनयोः ॥५
एवमुक्तस्तु भगवाञ्जये ताभ्यामनिश्चिते ।
इत्यब्रवीन्महाराज महाब्रह्मा प्रजापतिम् ॥ ६
द्वावप्येतौ हि कृतिनौ द्वावप्यतिबलोत्कटौ ।

भविष्यत्यनयोर्युद्धं त्रैलोक्यस्य भयावहम् ॥ ७
ततः प्रजापतिं तत्र सहस्राक्षोऽभ्यचोदयत् ।
विजयो ध्रुव एवास्तु पाण्डवस्य महात्मनः ॥ ८
मनस्वी बलवाञ्शूरः कृतविद्यस्तपोधनः ।
बिभर्ति च महातेजा धनुर्वेदमशेषतः ॥ ९
पार्थः सर्वगुणोपेतो देवकार्यमिदं यतः ।
क्लिश्यन्ते पाण्डवा नित्यं वनवासादिभिर्भृशं ॥१०
संपन्नस्तपसा चैव पर्याप्तः पुरुषर्षभः ।
अतिक्रामेच्च माहात्म्यादिष्टमप्यविचारयन् ॥११
अतिक्रमे च लोकानामभावो नियतो भवेत् ।
नावस्थानं च पश्यामि क्रुद्धयोः कृष्णयोः क्वचित् ॥
स्रष्टारौ जगतश्चैतौ ततश्च पुरुषर्षभौ ।
नरनारायणावेतौ पुराणावृषिसत्तमौ ॥ १३
अनियम्यौ नियन्तारौ जगतः पुरुषर्षभौ ।
[नैतयोस्तु समः कश्चिद्दिवि वा मानुषेषु वा ॥ १४
अनुगम्यास्त्रयो लोकाः सह देवर्षिचारणैः ।
सर्वदेवगणाश्चापि सर्वभूतानि यानि च ।
अनयोस्तु प्रभावेन वर्तते निखिलं जगत् ॥] १५
कामं तु सुकृताँल्लोकानाप्नोतु पुरुषर्षभः ।
कर्णो वैकर्तनः शूरो विजयस्त्वस्तु कृष्णयोः ॥ १६
वसूनां समलोकत्वं मरुतां वासमाप्नुयात् ।
सहितो द्रोणभीष्माभ्यां नाकपृष्ठे महीयताम् ॥१७
'क्लेशितो हि वने पार्थो दिर्घकालं पितामह ।
तस्मादेष जयेद्युद्धे तपसाऽभ्यधिकोऽर्जुनः ॥ १८
पूर्वं भगवता प्रोक्तः कृष्णयोर्विजयो ध्रुवः ।
तत्तथास्तु नमस्तेऽस्तु प्रभो ब्रूहि पितामह ॥ १९
तत्सहस्राक्षवचनं निशम्य भगवान्प्रभुः ।
नोवाच तज्जयं तुल्यं तयोः कर्णकिरीटिनोः ॥ २०
तस्मादाशां गतः शक्रस्तूष्णींभूते पितामहे ।
विजयः पाण्डवेयस्य कर्णस्य च वधो भवेत् ॥ २१
ब्रह्मेशानौ ततो वाक्यमूचतुर्भुवनेश्वरम् ।
विजयो ध्रुव एवास्तु पाण्डवस्य महात्मनः ॥ २२
मनस्वी जयतां शूरः कृतविद्यस्तपोधनः ।
बिभर्ति च महातेजा धनुर्वेदमशेषतः ॥ २३
अतिक्रामेच्च माहात्म्यादिष्टमप्यविचारयन् ।
अतिक्रमे च लोकानामभावो नियतो भवेत् ॥ २४
न च विद्म ह्यवस्थानं क्रुद्धयोः कृष्णयोः क्वचित् ।
स्रष्टारौ जगतश्चैव सतश्च पुरुषर्षभौ ॥ २५
कामं तु सुकृताँल्लोकान्प्राप्नोत्वेष परंतपः ।
कर्णो वैकर्तनः शूरो विजयस्तु नरे ध्रुवः ॥ २६
तथोक्ते देवदेवाभ्यां सहस्राक्षोऽब्रवीद्वचः ।
आमन्त्र्य सर्वभूतानि ब्रह्मेशानानुशासनात् ॥ २७
श्रुतं भवद्भिर्यत्प्रोक्तं भगवद्भ्यां जगद्धितम् ।
तत्तथा व्येतु ते रोगः शमाप्नुत विमन्यवः ॥ २८
इति श्रुत्वेन्द्रवचनं सर्वभूतानि मारिष ।
विस्मितान्यभवन्राजन्पूजयांचक्रिरे तदा ।
नोचुस्तदा जयं तुल्यं तयोः पुरुषसिंहयोः ॥ २९
व्यसृजंश्च सुगन्धीनि पुष्पवर्षाणि हर्षिताः ।
नानारूपाणि विबुधा देवतूर्याण्यवादयन् ॥ ३०
दिदृक्षवश्चाप्रतिमं द्वैरथं नरसिंहयोः ।
विस्मयोत्फुल्लनयना नान्या बुबुधिरे क्रियाः ॥ ३१

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे द्विनवतितमोऽध्यायः ॥ ९२ ॥

त्रिनवतितमोऽध्यायः ॥ ९३ ॥

शल्यकर्णयोः सँलापः ॥ १ ॥ कृष्णार्जुनयोः सँलाप. ॥ २ ॥ अर्जुनेन कृष्णंप्रति स्वसामर्थ्यकथनम् ॥ ३ ॥

सञ्जय उवाच ।
रथौ तयोः श्वेतहयौ दिव्यौ युक्तौ महास्त्रनौ ।
समास्थितौ लोकवीरौ शङ्खान्दध्मुः पृथक्पृथक् ।
वासुदेवार्जुनौ वीरौ कर्णशल्यौ च भारत ॥ १
तद्भीरुसंत्रासकरं युद्धं समभवत्तदा ।
अन्योन्यस्पर्धिनोरुग्रं शक्रशम्बरयोरिव ॥ २

तयोर्ध्वजौ हि विमलौ शुशुभाते रथे स्थितौ ।
राहुकेतू यथाऽऽकाशे उदितौ जगतः क्षये ॥ ३
कर्णस्याशीविषनिभा रत्नसारमयी दृढा ।
पुरन्दरधनुःप्रख्या हस्तिकक्ष्या विराजते ॥ ४
कपिश्रेष्ठस्तु पार्थस्य व्यादितास्य इवान्तकः ।
दंष्ट्राभिर्भीषयन्भाभिर्दुर्निरीक्ष्यो रविर्यथा ॥ ५
युद्धाभिलाषुको भूत्वा ध्वजो गाण्डीवधन्वनः ।
कर्णध्वजमुपातिष्ठत्स्वस्थानाद्वेगवान्कपिः ॥ ६
उत्पत्य च महावेगः कक्ष्यामभ्याहनत्तदा ।
नखैश्च दशनैश्चैव गरुडः पन्नगं यथा ॥ ७
सा किङ्किणीकाभरणा कालपाशोपमा तदा ।
अभ्यद्रवत्सुसंरब्धा हस्तिकक्ष्याऽथ तं कपिम् ॥ ८
तयोर्घोरतरे युद्धे द्वैरथे द्यूत आहिते ।
प्राकुर्वतां ध्वजौ युद्धं पूर्वं पूर्वतरं तदा ॥ ९
हया हयानभ्यहेषन्स्पर्धमानाः परस्परम् ।
अविध्यत्पुण्डरीकाक्षः शल्यं नयनसायकैः ।
शल्यश्च पुण्डरीकाक्षं तथैवाभिसमैक्षत ॥ १०
तत्राजयद्वासुदेवः शल्यं नयनसायकैः ।
कर्णं चाप्यजयद्दृष्ट्या कुन्तीपुत्रो धनञ्जयः ॥ ११
अथाब्रवीत्सूतपुत्रः शल्यमाभाष्य सस्मितम् ॥ १२
यदि पार्थो रणे हन्यादद्य मामिह कर्हिचित् ।
किं करिष्यसि सङ्ग्रामे शल्य सत्यमथोच्यताम् १३
शल्य उवाच ।
यदि कर्ण रणे हन्यादद्य त्वां श्वेतवाहनः ।
उभावेकरथेनाहं हन्यां माधवपाण्डवौ ॥ १४
सञ्जय उवाच ।
एवमेव तु गोविन्दमर्जुनः प्रत्यभाषत ।
तं प्रहस्याब्रवीत्कृष्णः पार्थं परमिदं वचः ॥ १५
पतेद्दिवाकरः स्थानाच्छीर्येद्भूमिरनेकधा ।
शैत्यमग्निरियान्न त्वां हन्यात्कर्णो धनञ्जय ॥ १६
यदि चैतत्कथंचित्स्याल्लोकपर्यसनं भवेत् ।
हन्यां कर्णं तथा शल्यं बाहुभ्यामेव संयुगे ॥ १७
इति कृष्णवचः श्रुत्वा प्रहसन्कपिकेतनः ।
अर्जुनः प्रत्युवाचेदं कृष्णमक्लिष्टकारिणम् ॥ १८
मम तावदपर्याप्तौ कर्णशल्यौ जनार्दन ।
सपताकध्वजं कर्णं सशल्यरथवाजिनम् ॥ १९
सच्छत्रकवचं चैव सशक्तिशरकार्मुकम् ।
द्रष्टाऽस्यद्य रणे कृष्ण शरैश्छिन्नमनेकधा ॥ २०
अद्यैव सरथं साश्वं सशक्तिकवचायुधम् ।
संचूर्णितमिवारण्ये वृक्षं पश्याद्य दन्तिना ॥ २१
अद्य राधेयभार्याणां वैधव्यं समुपस्थितम् ।
ध्रुवं स्वप्नेष्वनिष्टानि ताभिर्दृष्टानि माधव ॥ २२
द्रष्टासि ध्रुवमद्यैव विधवाः कर्णयोषितः ।
न हि मे शाम्यते मन्युर्यदनेन पुरा कृतम् ॥ २३
कृष्णां सभागतां दृष्ट्वा मूढेनादीर्घदर्शिना ।
असांस्तथाऽवहसता क्षिपता च पुनःपुनः ॥ २४
अद्य द्रष्टासि गोविन्द कर्णमुन्मथितं मया ।
वारणेनेव मत्तेन पुष्पितं जगतीरुहम् ॥ २५
अद्य ता मधुरा वाचः श्रोतासि मधुसूदन ।
दिष्ट्या जयसि वार्ष्णेय इति कर्णे निपातिते ॥ २६
अद्याभिमन्युजननीं प्रहृष्टः सांत्वयिष्यसि ।
कुन्तीं पितृष्वसारं च प्रहृष्टः सन् जनार्दन ॥ २७
अद्य बाष्पमुखीं कृष्णां सान्त्वयिष्यसि माधव ।
वरस्त्रीभिश्चामृतकल्पाभिर्धर्मराजं च पाण्डवम् ॥ २८

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे त्रिनवतितमोऽध्यायः ॥ ९३ ॥

चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

कर्णार्जुनयोर्युद्धारम्भः ॥ १ ॥ द्रौणिना दुर्योधनाय हिताख्यानम् ॥ २ ॥ तेन तदनादृत्य रणाय सेनानियोजनम् ॥ ३ ॥

सञ्जय उवाच ।
तद्देवनागासुरसिद्धयक्षै-
र्गन्धर्वरक्षोप्सरसां च सङ्घैः ।
ब्रह्मर्षिराजर्षिसुपर्णजुष्टं
बभौ वियद्विस्मयनीयरूपम् ॥ १

कुद्धोऽभिलषित गत्वा इति ख. ट पाठ. ॥६॥ द्यूत आह्वये इति ख. ट. पाठ ॥ ९ ॥ त्रिनवतितमोऽध्याय. ॥ ९३ ॥

नानद्यमानं निनदैर्मनोज्ञै-
वादित्रगीतस्तुतिनृत्यहासैः।
सर्वेऽन्तरिक्षं ददृशुर्मनुष्याः
खस्थाश्च तद्विस्मयनीयरूपम् ॥ २
ततः प्रहृष्टाः कुरुपाण्डुयोधा
वादित्रशङ्खस्वनसिंहनादैः।
विनादयन्तो वसुधां दिशश्च
स्वनेन सर्वान्द्विषतो निजघ्नुः ॥ ३
नराश्वमातङ्गरथैः समाकुलं
शरासिशक्त्यृष्टिनिपातदुःसहम्।
अभीरुजुष्टं हतदेहसंकुलं
रणाजिरं लोहितमावभौ तदा ॥ ४
[बभूव युद्धं कुरुपाण्डवानां
यथा सुराणामसुरैः सहाभवत्।]
तथा प्रवृत्ते तुमुले सुदारुणे
धनञ्जयश्चाधिरथिश्च सायकैः।
दिशश्च सैन्यं च शितैरजिह्मगैः
परस्परं प्रावृणुतां सुदंशितौ ॥ ५
ततस्त्वदीयाश्च परे च सायकैः
कृतेऽन्धकारे ददृशुर्न किंचन।
भयातुरा एकरथौ समाश्रयं-
स्ततोऽभवच्चाद्भुतमेव सर्वतः ॥ ६
ततोऽस्त्रमस्त्रेण परस्परं तौ
विधूय वाताविव पूर्वपश्चिमौ।
घनान्धकारे विततेतमोनुदौ
यथोदितौ तद्वदतीव रेजतुः ॥ ७
न चाभिसर्तव्यमिति प्रचोदिताः
परे त्वदीयाश्च तथाऽवतस्थिरे।
महारथौ तौ परिवार्य सर्वतः
सुरासुराः शम्बरवासवाविव ॥ ८
मृदङ्गभेरीपणवानकस्वनै-
र्निनादिते वाहनशङ्खनिस्वनैः।
तौ सिंहनादैर्वभतुर्नरोत्तमौ
पतङ्गचन्द्राविव दुःसहावुभौ ॥ ९
महाधनुर्मण्डलमध्यगावुभौ
सुवर्चसौ बाणसहस्रदीधिती।
दिधक्षमाणौ सचराचरं जग-
द्युगान्तसूर्याविव दुःसहौ रणे ॥ १०
उभावजेयावहितान्तकावुभा-
वुभौ जिघांसू कृतिनौ परस्परम्।
महाहवे वीतभयौ समीयतु-
र्महेन्द्रजम्भाविव कर्णपाण्डवौ ॥ ११
ततो महास्त्राणि महाधनुर्धरौ
विमुञ्चमानाविषुभिर्भयानकैः।
नराश्वनागानमितान्निजघ्नतुः
परस्परं चापि महारथौ नृप ॥ १२
ततो विसस्रुः पुनरर्दिता नरा
नरोत्तमाभ्यां कुरुपाण्डवाश्रयाः।
सनागपत्त्यश्वरथा दिशो द्रुता-
स्तथा यथा सिंहहता वनौकसः ॥ १३
ततस्तु दुर्योधनभोजसौबलाः
कृपो गुरोश्चापि सुतो महाहवे।
महारथाः पञ्च धनञ्जयाच्युतौ
शरैः शरीरार्तिकरैरताडयन् ॥ १४
धनूंषि तेषामिषुधीन्ध्वजान्हया-
न्रथांश्च सूतांश्च धनञ्जयः शरैः।
समं प्रमथ्याशु परान्समन्ततः
शरोत्तमैर्द्वादशभिश्च सूतजम् ॥ १५
अथाभ्यधावंस्त्वरिताः शतं रथाः
शतं गजाश्चार्जुनमाततायिनः।
शकास्तुषारा यवनाश्च सादिनः
सहैव काम्भोजवरैर्जिघांसवः ॥ १६
वरायुधान्पाणिगतैः शरैः सह
क्षुरैर्न्यकृन्तत्प्रपतच्छिरांसि च।

एकौ मुख्यौ रथौ रथिनौ कर्णार्जुनौ ॥ ६ ॥ तमोनुदौ सूर्य-चन्द्रौ ॥ ७ ॥ नच अभिसर्तव्य नापयातव्यमिति नियमेन प्रचोदिता. प्रेरिता. ॥ ८ ॥

हयांश्च नागांश्च रथांश्च युध्यतो
धनञ्जयः शत्रुगणान्क्षितौ क्षिणोत् ॥१७
ततोऽन्तरिक्षे सुरतूर्यनिःस्वनाः
ससाधुवादा हृषितैः समीरिताः ।
निपेतुरप्युत्तमपुष्पवृष्टयः
सुरूपगन्धाः पवनेरिताः शुभाः ॥ १८
तदद्भुतं देवमनुष्यसाक्षिकं
समीक्ष्य भूतानि विसिस्मियुस्तदा ।
तवात्मजः सूतसुतश्च न व्यथां
न विस्मयं जग्मतुरेकनिश्चयौ ॥ १९
अथाब्रवीद्द्रोणसुतस्तवात्मजं
करं करेण प्रतिपीड्य सान्त्वयन् ।
प्रसीद दुर्योधन शाम्य पाण्डवै-
रलं विरोधेन धिगस्तु विग्रहम् ॥ २०
हतो गुरुर्ब्रह्मसमो महास्त्रवि-
त्तथैव भीष्मप्रमुखा महारथाः ।
अहं त्ववध्यो मम चापि मातुलः
प्रशाधि राज्यं सह पाण्डवैश्चिरम् ॥ २१
धनञ्जयः स्थास्यति वारितो मया
जनार्दनो नैव विरोधमिच्छति ।
युधिष्ठिरो भूतहिते रतः सदा
वृकोदरस्तद्वशगस्तथा यमौ ॥ २२
त्वया तु पार्थैश्च कृते च संविदे
प्रजाः शिवं प्राप्नुयुरिच्छया तव ।
व्रजन्तु शेषाः स्वपुराणि पार्थिवा
निवृत्तवैराश्च भवन्तु सैनिकाः ।
न चेद्वचः श्रोष्यसि मे नराधिप
ध्रुवं हि तप्तोऽसि हतोऽरिभिर्युधि ॥ २३
वृद्धं पितरमालोक्य गान्धारीं च यशस्विनीम् ।
कृपालुर्धर्मराजो हि याचितः शममेष्यति ॥ २४
यथोचितं च वै राज्यमनुज्ञास्यति ते प्रभुः ।
विपश्चित्सुमतिर्वीरः सर्वशास्त्रार्थतत्त्ववित् ॥ २५
वैरं नेष्यति धर्मात्मा स्वजने नास्त्यतिक्रमः ।
न विग्रहमतिः कृष्णा स्वजने प्रतिनन्दति ॥ २६

ध्रुव हि तप्तासि इति क. ख ङ. पाठः ॥ २३ ॥

भीमसेनार्जुनौ चोभौ माद्रीपुत्रौ च पाण्डवौ ।
वासुदेवमते चैव पाण्डवस्य च धीमतः ।
स्थास्यन्ति पुरुषव्याघ्रास्तयोर्वचनगौरवात् ॥ २७
रक्ष दुर्योधनात्मानमात्मा सर्वस्य भाजनम् ।
जीवने यत्नमातिष्ठ जीवन्भद्राणि पश्यति ॥ २८
राज्यं श्रीश्चैव भद्रं ते जीवमाने च कल्पते ।
मृतस्य तु खलु कौरव्य नैव राज्यं कुतः सुखम् ॥२९
लोकवृत्तमिदं वृत्तं प्रवृत्तं पश्य भारत ।
शाम्य त्वं पाण्डवैः सार्धं शेषं रक्ष कुलस्य च ॥ ३०
मा भूत्स कालः कौरव्य यदाऽहमहितं वचः ।
ब्रूयां कामं महाबाहो माऽवमंस्था वचो मम ॥ ३१
धर्मिष्ठमिदमत्यर्थं राज्ञश्चैव कुलस्य च ।
एतद्धि परमं श्रेयः कुरुवंशस्य वृद्धये ।
प्रयाहि तं च गान्धारे कुलस्य च सुखावहम् ॥ ३२
पथ्यमायतिसंयुक्तं कर्णोऽप्यर्जुनमाहवे ।
न जेष्यति नरव्याघ्र इति मे निश्चिता मतिः ॥ ३३
रोचतां ते नरश्रेष्ठ ममैतद्वचनं शुभम् ।
अतोऽन्यथा हि राजेन्द्र विनाशः सुमहान्भवेत् ३४
इदं च दृष्टं जगता सह त्वया
कृतं यदेकेन किरीटमालिना ।
यथा न कुर्याद्बलभिन्न चान्तको
न च प्रचेता भगवान्न यक्षराट् ॥ ३५
अतोऽपि भूयान्स्वगुणैर्धनञ्जयो
न चातिवर्तिष्यति मे वचोऽखिलम् ।
तवानुयात्रां च सदा करिष्यति
प्रसीद राजेन्द्र शमं त्वमाप्नुहि ॥ ३६
ममाभिमानः परमः सदा त्वयि
ब्रवीम्यतस्त्वां परमाच्च सौहृदात् ।
निवारयिष्यामि च कर्णमाहवे
महान्हि मेऽस्ति प्रणयोऽथ सूतजे ॥ ३७
वदन्ति मैत्रीं सहजां विचक्षणा-
स्तथैव साम्ना च धनेन चार्जिताम् ।
प्रतापतश्चोपनतां चतुर्विधां
तदस्ति सर्वं तव पाण्डवेषु ॥ ३८

निसर्गतस्ते तव वीर बान्धवाः
पुनश्च साम्ना हितमाप्नुयुः प्रभो।
त्वयि प्रसन्ने यदि मित्रतां गते
हितं कृतं स्याज्जगतस्त्वयाऽतुलम् ॥ ३९
इतीदमुक्तः सुहृदा वचो हितं
विचिन्त्य निःश्वस्य च दुर्मनाऽब्रवीत्।
यथा भवानाह सखे तथैव त-
न्ममापि विज्ञापयतो वचः शृणु ॥ ४०
निहत्य दुःशासनमुक्तवान्बहु
प्रहस्य शार्दूलवदेष दुर्मतिः।
वृकोदरस्तद्धृदये मम स्थितं
न तत्परोक्षं भवतः कृतः शमः ॥ ४१
न चापि कर्णं प्रसहेद्रणेऽर्जुनो
महागिरिं मेरुमिवोग्रमारुतः।
न चाश्वसिष्यन्ति पृथात्मजा मयि
प्रसह्य वैरं बहुशो विचिन्त्य ॥ ४२
न चापि कर्णं गुरुपुत्र संयुगा-
दुपारमेत्यर्हसि वीर भाषितुम्।
श्रमेण युक्तो महताद्य फल्गुन-
स्तमेष कर्णः प्रसभं हनिष्यति ॥ ४३
'वसुंधरायाः परिवर्तनं भवे-
द्व्रजेच्च शोषं मकरालयोऽर्णवः।
प्लवेयुरप्यद्रिवरा महाम्बुधौ
न चार्जुनो जेष्यति कर्णमाहवे ॥ ४४
अपां पृथिव्या नभसो नभस्वतः
सुतिग्मदीप्तेश्च हिरण्यरेतसः।
अभाव एषामपि सर्वतो भवे-
न्न चार्जुनो जेष्यति कर्णमाहवे ॥' ४५
तमेवमुक्त्वाऽप्यनुनीय चासकृ-
त्तवात्मजः स्वाननुशास्ति सैनिकान्।
द्रुतं द्रुताभिद्रवताहितानिमा-
नहीनसत्वाः किमु जोषमासते ॥ ४६

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

रणे कर्णस्यार्जुनसाम्यमसहमानेन भीमेन सकोपं पार्थप्रोत्साहनम् ॥ १ ॥

सञ्जय उवाच।
तौ शङ्खभेरीनिनदे समृद्धे
समीयतुः श्वेतहयौ नराग्र्यौ।
वैकर्तनः सूतपुत्रोऽर्जुनश्च
दुर्मन्त्रिते ते ससुतस्य राजन् ॥ १
'आशीविषावग्निमिवोत्सृजन्तौ
तथा मुखाभ्यामभिनिःश्वसन्तौ।
यशस्विनौ जज्वलतुर्मृधे तदा
घृतावसिक्ताविव हव्यवाहौ ॥' २
यथा गजौ हैमवतौ प्रभिन्नौ
प्रवृद्धदन्ताविव वासितार्थे।
तथा समाजग्मतुरुग्रवीर्यौ
धनञ्जयश्चाधिरथिश्च वीरौ ॥ ३
बलाहकेनेव महाबलाहको
यदृच्छया वा गिरिणा यथा गिरिः।
तथा धनुर्ज्यातलनेमिनिःस्वनौ
समीयतुस्ताविषुवर्षवर्षिणौ ॥ ४
शरास्त्रशक्त्यृष्टिगदासिसर्पौ
रोषानिलोद्धूतमहोर्मिमालौ।
यथाऽचलौ द्वौ चलतस्तथा तौ
यथाऽर्णवौ चाशु चतुर्युगान्ते ॥' ५
प्रवृद्धशृङ्गद्रुमवीरुदोषधी
प्रवृद्धनानाविधनिर्झरौघौ।

दुःशासनमुक्तवान्वच इति झ पाठ तत्र वचो दुर्योधनस्य हतस्य शिरः पदा ताडयिष्यामीत्येवरूपम् ॥ ४१ ॥

चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

यथाऽचलौ वा चलितौ महाजलै-
स्तथा महास्त्रैरितरेतरं हतः ॥ ६
स सन्निपातो रथयोर्महानभू-
त्सुरेशवैरोचनयोर्यथा पुरा ।
शरैर्विनुन्नाश्वनियन्तृदेहयोः
सुदुःसहास्त्रैः परिभिन्नदेहयोः ॥ ७
प्रभूतपद्मोत्पलमत्स्यकच्छपौ
महाह्रदौ पक्षिगणानुनादितौ ।
सुसन्निकृष्टावनिलोद्धतौ यथा
तथा रथौ तौ ध्वजिनौ समीयतुः ॥ ८
उभौ महेन्द्रस्य समानविक्रमा-
वुभौ महेन्द्रप्रतिमौ महारथौ ।
महेन्द्रवज्रप्रतिमैश्च सायकै-
र्महेन्द्रवृत्राविव संप्रजघ्नतुः ॥ ९
सनागपत्त्यश्वरथे उभे बले
विचित्रवर्माभरणाम्बरायुधे ।
चकम्पतुश्चोन्ननदतुश्च विस्मया-
द्वरा वियच्चार्जुनकर्णसंगमे ॥ १०
भुजाः सवस्त्राङ्गुलयः समुच्छ्रिताः
ससिंहनादैर्हृषितैर्दिदृक्षुभिः ।
यदाऽर्जुनं मत्त इव द्विपो द्विपं
समभ्ययादाधिरथिर्जिघांसया ॥ ११
उदक्रोशन्सोमकास्तत्र पार्थ
त्वरस्व याह्यर्जुन भिन्धि कर्णम् ।
छिन्ध्यस्य मूर्धानमलं चिरेण
श्रद्धां च राज्याद्धृतराष्ट्रसूनोः ॥ १२
तथाऽस्माकं बहवस्तत्र योधाः
कर्णं तथा याहि याहीत्यवोचन् ।
जह्यर्जुनं कर्ण ततः सुदीनाः
पुनर्वनं यान्त्वचिराय पार्थाः ॥ १३
कर्णोऽथ पूर्वं दशभिः पृषत्कै-
र्गाण्डीवधन्वानमविध्यदाशु ।
जघान तं चापि ततः किरीटी
शरैस्तदाष्टादशभिः सुमुक्तैः ॥ १४
पुनश्च कर्णस्त्वरितोऽपि पार्थं
रथेषुभिस्तं दशभिर्जघान ।
तं चापि पार्थो दशभिः शिताग्रैः
कक्ष्यान्तरे तीक्ष्णमुखैरविध्यत् ॥ १५
कर्णस्ततो भारत सांपराये
घोरेऽतिवेलं रणसंविमर्दी ।
जघान पार्थं नवभिः शिताग्रैः
कक्ष्यान्तरे नागमिव प्रभिन्नम् ॥ १६
ततोऽपराभ्यां युधि सूतपुत्रो
द्वाभ्यां क्षुराभ्यां हरिमाशुकारी ।
समाजघान त्वरया महात्मा
यथा सुरेन्द्रं नमुचिः प्रसह्य ॥ १७
तं पाण्डवः पञ्चभिरायसाग्रै-
राकर्णपूर्णैर्निजघान कर्णम् ।
ते शोणितं तस्य पपुस्तदानीं
कालस्य दूता इव पार्थबाणाः ॥ १८
कर्णोऽपि पार्थं सह वासुदेवं
समाचिनोद्धारत वत्सदन्तैः ।
परस्परं तौ विशिखैः प्रमुक्तै-
स्ततक्षतुः सूतपुत्रोऽर्जुनश्च ॥ १९
परस्परं छिद्रदिदृक्षया च
सुभीममभ्याययतुः प्ररुष्टौ ॥ २०
ततोऽस्त्रमाग्नेयममित्रतापनं
मुमोच कर्णाय सुरेश्वरात्मजः ।
धनञ्जयात्संयुगमूर्ध्नि निःसृतं
तदा प्रजज्वाल तदस्त्रमुत्तमम् ॥ २१
समीक्ष्य कर्णो ज्वलनास्त्रमुद्यतं
स वारुणं तत्प्रशमार्थमाहवे ।
समुत्सृजत्सूतपुत्रः प्रतापवान्
स तेन वह्निं शमयांचकार ॥ २२
वलाहकास्त्रेण दिशस्तरस्वी
चकार सर्वास्तिमिरेण संवृताः ।
अपावहन्मेघगणांस्ततस्तान्
समीरणास्त्रेण समीरितेन ॥ २३

हत जघ्नतुरित्यर्थ. ॥ ६ ॥ सुदु सहान्यै. परिशोणितोदकै- इति क. ट. पाठः ॥ ७ ॥

ततः सोऽस्त्रं दयितं देवराज्ञः
प्रादुश्चक्रे वज्रममित्रतापनः।
गाण्डीवज्यां विसृशंश्चातिमन्यु-
र्धनञ्जयः शत्रुसङ्घप्रमाथी ॥ २४
नाराचनालीकवराहकर्णा
गाण्डीवतः प्रादुरासन्सुतीक्ष्णाः।
सहस्रशो वज्रसमानवेगा-
स्ते सर्वतः पर्यधावन्त घोराः ॥ २५
पार्थेषवः कर्णरथं विलग्ना
अधोमुखाः पक्षिगणा दिनान्ते।
निशानिकेतार्थमिवाशु वृक्षं
जग्राह तान्सूतपुत्रः पृषत्कैः ॥ २६
क्षिप्तांस्तथा पाण्डवबाणसङ्घा-
नमृष्यमाणस्य धनञ्जयस्य।
रणाजिरे त्वन्तकतुल्यकर्मा
वैकर्तनो रोषपरीतचेताः ॥ २७
ज्योतिष्प्रभां यद्वदुपागतः स-
न्दिवाकरो नाशयते क्षणेन।
पार्थस्य तान्बाणगणान्समग्रा-
न्व्यनाशयद्युध्यत एव कर्णः ॥ २८
रोषात्प्रदीप्तः सुमहाविमर्दे
भीमस्ततोऽक्रुध्यददीनसत्वः।
पाणिं स्वपाणौ स विनिष्पिष्य रोषा-
दमर्षितो वाक्यमुवाच पार्थम् ॥ २९
त्वां सूतपुत्रो नु कथं किरीटि-
न्रथेषुभिर्हन्ति शिताग्रधारैः।
धृत्या हि भूतानि ययाऽजयस्त्वं
ग्रासं ददत्खाण्डवे पावकाय ॥ ३०
धृत्या तया सूतपुत्रं जहि त्व-
महं वैनं गदया पोथयिष्ये।
समेत्य पार्थं सुनृशंसवादी
जीवन्नायं यास्यति कालपक्वः ॥ ३१

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

षण्णवतितमोऽध्यायः ॥ ९६ ॥

कर्णे युधि वर्धमाने कृष्णेनार्जुनप्रोत्साहनम् ॥ १ ॥ ततोऽर्जुनेन स्वसामर्थ्यप्रकाशनम् ॥ २ ॥

सञ्जय उवाच।
अथाब्रवीच्चक्रधरोऽपि पार्थं
दृष्ट्वा रथेषून्प्रतिहन्यमानान्।
अमूमुषत्पश्यत एव तेऽद्य
ह्यस्त्राणि कर्णोऽस्त्रगणैः किरीटिन् ॥ १
स पार्थ किं मुह्यसि वेत्सि चैव ता-
न्दृष्ट्वा समेतान्नदतः कुरूंस्त्वम्।
कर्णं पुरस्कृत्य विदुर्हि सर्वे
तवास्त्रमस्त्रैर्विनिहन्यमानम् ॥ २
यया धृत्या तामसं जघ्निवांस्त्वं
तत्संयुगे तामसांश्चातिघोरान्।
दम्भोद्भवं चासुरमाहवे त्वं
दर्पोत्सिक्तं वीर्यवन्तं किरीटिन्।
तया धृत्या त्वं जहि कर्णमद्य
पार्थाहवे त्यक्तुमस्त्रं समर्थः ॥ ३
अनेन चाशु क्षुरनेमिनाद्य
मया विसृष्टेन सुदर्शनेन।
छिन्ध्यस्य मूर्धानमरेः प्रसह्य
वज्रेण शक्रो नमुचेरिवारेः ॥ ४
किरातरूपी भगवान्यया च
त्वया महात्मा परितोषितोऽभूत्।
स तां पुनर्वीर धृतिं गृहीत्वा
सहानुबन्धं जहि सूतपुत्रम् ॥ ५
ततो महीं सागरमेखलां त्वं
सपत्तनां ग्रामवतीं समृद्धाम्।

मा जीवन यास्यति सूतपुत्र इति क. पाठ ॥ ३१ ॥

पञ्चनवतितमोऽध्याय ॥ ९५ ॥

प्रयच्छ राज्ञे निहतारिसङ्घां
यशश्च पार्थातुलमाप्नुहि त्वम् ॥ ६
कर्णं पुरस्कृत्य नदन्ति सर्वे
तवास्त्रमग्र्यं प्रतिहत्य वीराः ।
कुरु प्रयत्नं भरतप्रवीर
द्रवन्त्यमी संजयाः सोमकाश्च ।
दृष्ट्वाथ कर्णं समरे प्रहृष्टं
त्वां चापि दृष्ट्वा परिहीयमानम् ॥ ७

सञ्जय उवाच ।

संचोदितो भीमजनार्दनाभ्यां
स्मृत्वा तदात्मानमवेत्य सर्वम् ।
इहात्मनश्चागमने विदित्वा
प्रयोजनं केशवमित्युवाच ॥ ८
प्रादुष्करोम्येष महास्त्रमुग्रं
शिवाय लोकस्य वधाय सौतेः ।
तन्मेऽनुजानातु भवान्सुराश्च
ब्रह्मा शिवो ब्रह्मविदश्च सर्वे ॥ ९
इति श्लोक्त्वा पाण्डवः सव्यसाची
नमस्कृत्वा ब्रह्मणे सोऽमितात्मा ।
अनुत्तमं ब्राह्ममसह्यमस्त्रं
प्रादुश्चक्रे मनसा यद्विधेयम् ॥ १०
ततो दिशश्च प्रदिशश्च सर्वाः
समावृणोत्सायकैर्भूरितेजाः ।
गाण्डीवमुक्तैर्भुजगैरिवोग्रै-
र्दिवाकरांशुप्रतिमैर्ज्वलद्भिः ॥ ११
सृष्टास्तु बाणा भरतर्षभेण
शतं शतं भीममुखाः सुतीक्ष्णाः ।
प्राच्छादयन्कर्णरथं क्षणेन
युगान्तकालार्ककरप्रकाशाः ॥ १२
वैकर्तनेनाशु तदाजिमध्ये
सहस्रशो बाणगणा विसृष्टाः ।
ते चाक्षयाः पाण्डवमभ्युपेयुः
पर्जन्यसृष्टा इव वारिधाराः ॥ १३
ततः स कृष्णं च किरीटिनं च
वृकोदरं चाप्रतिमप्रभावः ।
त्रिभिस्त्रिभिर्भीमबलो निहत्य
ननाद घोरं महता स्वनेन ॥ १४
ततः स बाणाभिहतः किरीटी
भीमं तथा प्रेक्ष्य जनार्दनं च ।
अमृष्यमाणः पुनरेव पार्थः
शरान्दशाष्टौ समुमुद्ववर्ष ॥ १५
स केतुमेकेन शरेण विद्ध्वा
शल्यं चतुर्भिस्त्रिभिरेव कर्णम् ।
ततः सुमुक्तैर्दशभिर्जघान
सेनापतिं काञ्चनवर्मनद्धम् ॥ १६
स राजपुत्रो विशिरा विबाहु-
र्विवाजिसूतो विधनुर्विकेतुः ।
अथो रथाग्रादपतत्प्ररुग्णः
परश्वधैः साल इवावकृत्तः ॥ १७
पुनश्च कर्णं त्रिभिरष्टभिश्च
द्वाभ्यां चतुर्भिर्दशभिश्च विद्ध्वा ।
चतुश्शतं द्विरदानां निपात्य
रथाञ्जघानाष्टरथान्किरीटी ।
सहस्रमश्वांश्च पुनश्च सादी-
नष्टौ सहस्राणि च पत्तिवीरान् ॥ १८
दृष्ट्वा तु मुख्यावतिविध्यमानौ
वरेषुभिः शूरवरावरिघ्नौ ।
कर्णं च पार्थं च नियम्य वाहा-
न्सर्वे वरिष्ठाश्च ततोऽवतस्थुः ॥ १९
प्रच्छादयामास ततः पृषत्कैः
सघोषमाच्छिद्य च गाण्डिवज्याम् ।
अस्मिन्क्षणे फल्गुनं सूतपुत्रः
समाचिनोत्क्षुद्रकाणां शतेन ॥ २०
निर्मुक्तसर्पप्रतिमैश्च तीक्ष्णै-
स्तैलप्रधौतैः खगपत्रवाजैः ।
षष्ट्या बिभेदाशु च वासुदेवं
तदन्तरे प्राहरन्सोमकाश्च ॥ २१
ततो नवज्यां सुदृढां किरीटी
स्ववाहुविक्षेपसहां प्रगृह्य ।

समादधे गाण्डिवे क्षिप्रकारी
निमेषमात्रेण महाधनुष्मान् ॥ २२
ज्याछेदनं ज्याविधानं च तस्य
नैवाववुध्यत्सूतपुत्रो लघुत्वात् ।
पार्थस्य सङ्घे द्विषतां निहन्तु-
स्तदद्भुतं तत्र बभूव राजन् ॥ २३
पार्थोऽपि तां ज्यामवधाय तूर्णं
शरासनज्यामाधिरथेर्विहत्य ।
सुसंरब्धः कर्णशरैः क्षताङ्गो
रणे योधांस्तावकान्प्रत्यगृह्णात् ॥ २४
नैवापतत्पक्षिगणोऽन्तरिक्षे
पार्थेन चास्त्रेण कृतेऽन्धकारे ॥ २५
शल्यं तु पार्थो दशभिर्निमेषा-
द्भृशं तनुत्रे ग्रहसन्नविध्यत् ।
ततः कर्णं द्वादशभिः पृषत्कै-
र्विद्ध्वा पुनः सप्तभिरप्यविध्यत् ॥ २६
स पार्थबाणासनवेगनुन्नै-
र्दृढाहतः पत्त्रिभिरुग्रवेगैः ।
विभिन्नगात्रः क्षतजोक्षिताङ्गः
कर्णो बभौ रुद्र इवान्तकाले ॥ २७
ततस्त्रिभिस्तं त्रिदशाधिपोपमं
शरैर्विभेदाधिरथिर्धनञ्जयम् ।
शरांश्च पञ्च ज्वलनानिवोरगा-
न्प्रवेशयामास जिघांसुरच्युते ॥ २८
सुवर्णचित्रं पुरुषोत्तमस्य
वर्माथ भित्त्वाभ्यपतन्सुपुङ्खाः ।
वेगेन गां ते विविशुश्च राज-
न्ज्ञात्वा कर्णोऽभिमुखाः प्रतीयुः ॥ २९
तान्पञ्चभल्लैर्दशभिः सुमुक्तै-
स्त्रिधात्रिधैकैकमथोच्चकर्त ।
धनञ्जयस्ते न्यपतन्पृथिव्यां
यथाऽहयस्तार्क्ष्यमुखेन कृत्ताः ॥ ३०
ततः प्रजज्वाल किरीटमाली
क्रोधेन कक्षं प्रदहन्निवाग्निः ।
स कर्णमाकर्णविकृष्टसृष्टैः
शरैः शरीरान्तकरैर्ज्वलद्भिः ।
मर्मस्वविध्यत्स चचाल दुःखा-
द्धैर्यात्तु तस्यावतिमात्रधैर्यः ॥ ३१
प्रादुश्चकाराथ शरान्महात्मा
देहं विचिन्वन्निव सूतजस्य ।
शरास्तु ते काञ्चनचित्रपुङ्खाः
संपेतुरुर्व्यां शतशो महान्तः ॥ ३२
ततः शरौघैः प्रदिशो दिशश्च
रविप्रभाः कर्णरथश्च राजन् ।
अदृश्य आसीत्कुपिते धनञ्जये
तुषारनीहारवृतो गिरिर्यथा ॥ ३३
सचक्ररक्षा अपि पृष्ठगोपाः
कर्णस्य ये चापि पुरःसराश्च ।
भीता द्रवन्ति स्म निहन्यमाना
मेहुषुभिः पार्थकरप्रणुन्नैः ॥ ३४
ततोऽर्जुनो वै भरतप्रवीरो
महानुभावः समरे निहन्ता ।
सुयोधनेनानुमतान्विनिघ्न-
न्समुच्छ्रितान्सरथान्सारभूतान् ॥ ३५
गाण्डीवधन्वा द्विगुणं सहस्रं
कुरुप्रवीरानृषभः कुरूणाम् ।
क्षणेन सर्वान्सरथान्समूता-
न्निनाय राजन्क्षयमेकवीरः ॥ ३६
अथो पलायन्त विहाय कर्णं
तवात्मजा ये कुरवश्च शिष्टाः ।
एतानवाकीर्य शरक्षतांश्च
विलप्यमानांस्तनयान्विमृद्नन् ॥ ३७
सर्वे प्रणेशुः कुरवो विभग्नाः
पार्थेषुभिः संपरितप्यमानाः ।
सुयोधनेनाथ पुनर्वरिष्ठाः
प्रचोदिताः कर्णरथानुयाने ॥ ३८
भोः क्षत्रियाः शूरतमास्तु सर्वे
क्षत्रे च धर्मे निरताः स्थ यूयम् ।
न युक्तरूपं भवतां समीपा-
त्पलायनं कर्णमतिप्रहाय ॥ ३९

तवात्मजेनापि तथोच्यमाना
नैवावतिष्ठन्त भयाद्विवर्णाः ।
क्षणेन नष्टाः प्रदिशो दिशश्च
सर्वे ततः प्रेक्ष्य दिशो विशून्याः ॥ ४०

भयावदीर्णैः कुरुभिर्विहीनः
पार्थेषुभिः संपरितप्यमानः ।
न विव्यधे भारत तत्र कर्णः
प्रतीपमेवार्जुनमभ्यधावत् ॥ ४१

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे षण्णवतितमोऽध्यायः ॥ ९६ ॥

सप्तनवतितमोऽध्यायः ॥ ९७ ॥

रणे हीयमानेन कर्णेनार्जुनस्य शिरो लक्षीकृत्य नागास्त्रप्रयोगः ॥ १ ॥ कृष्णेन पार्थरथे पादनिपीडनेन धरण्यां किंचिन्निमज्जिते तदस्त्रेण शिरोवर्जं पार्थकिरीटमात्रापहारः ॥ २ ॥ कर्णस्य रथचक्रे विप्रशापात् धरण्यां निमग्ने तदुद्धिधीर्षया तेन पार्थंप्रति मुहूर्तमयुद्धप्रार्थनम् ॥ ३ ॥

सञ्जय उवाच ।
ततोऽपयाताः शरपातमात्र-
मवस्थिता वै कुरवो नरेन्द्र ।
विद्युत्प्रकाशं ददृशुः समन्ता-
द्धनञ्जयास्त्रं समुदीर्यमाणम् ॥ १
ततोऽग्रसत्सूतपुत्रोऽर्जुनस्य
वियद्गतं घोरतरं शरैस्तत् ।
क्रुद्धेन पार्थेन शरं विसृष्टं
वधाय कर्णस्य महाविमर्दे ॥ २
[उदीर्यमाणं स्म कुरून्दहन्तं
सुवर्णपुङ्खैर्विशिखैर्ममर्द ।
कर्णस्त्वमोघेष्वसनं दृढज्यं
विस्फारयित्वा विसृजञ्छरौघान् ॥] ३
रामादुपात्तेन महामहिम्ना
ह्याथर्वणेनारिविनाशनेन ।
तदर्जुनास्त्रं व्यधमद्दहन्तं
पार्थं च बाणैर्निशितैरविध्यत् ॥ ४
ततो विमर्दः सुमहान्बभूव
तत्रार्जुनस्याधिरथेश्च राजन् ।
अन्योन्यमासादयतोः पृषत्कै-
र्विषाणघातैर्द्विपयोरिवाजौ ॥ ५
ततोऽस्त्रसंघातसमावृतं तदा
बभूव राजंस्तुमुलं रणाजिरम् ।
यत्कर्णपार्थौ शरवृष्टिसङ्घै-
र्निरन्तरं चक्रतुरम्बरं तदा ॥ ६

[ततो जालं बाणमयं महान्तं
सर्वेऽद्राक्षुः कुरवः सोमकाश्च ।
नान्यं च भूतं ददृशुस्तदा ते
बाणान्धकारे तुमुलेऽथ किंचित् ॥ ७
तौ सन्दधानावनिशं च राजन्
समस्यन्तौ चापि शराननेकान् ।
सन्दर्शयेतां युधि मार्गान्विचित्रा-
न्धनुर्धरौ तौ विविधैः कृतास्त्रैः ॥ ८
तयोरेवं युध्यतोराजिमध्ये
सूतात्मजोऽभूदधिकः कदाचित् ।
पार्थः कदाचित्त्वधिकः किरीटी
वीर्यास्त्रमायाबलपौरुषेण ॥ ९
दृष्ट्वा तयोस्तं युधि संप्रहारं
परस्परस्यान्तरमीक्षमाणयोः ।
घोरं तयोर्दुर्विषहं रणेऽन्यै-
र्योधाः सर्वे विस्मयमभ्यगच्छन् ॥ १०
ततो भूतान्यन्तरिक्षस्थितानि
तौ कर्णपार्थौ प्रशशंसुर्नरेन्द्र ।
भोः कर्ण साध्वर्जुन साधु चेति
वियत्सु वाणी श्रूयते सर्वतोपि ॥ ११
तस्मिन्विमर्दे रथवाजिनागै-
स्तदाऽभिघातैर्दलिते हि भूतले ।
ततस्तु पातालतले शयानो
नागोऽश्वसेनः कृतवैरोऽर्जुनेन ॥ १२

राजंस्तदा खाण्डवदाहमुक्तो
विवेश कोपाद्वसुधातले यः ।
अथोत्पपातोर्ध्वगतिर्जवेन
सन्दृश्य कर्णार्जुनयोर्विमर्दम् ॥ १३
अयं हि कालोस्य दुरात्मनो वै
पार्थस्य वैरप्रतियातनाय ।
सञ्चिन्त्य तूर्णं प्रविवेश चैव
कर्णस्य राजन्शररूपधारी ॥ १४
ततोस्त्रसङ्घातसमाकुलं तदा
बभूव जन्यं विततांशुजालम् ।
तत्कर्णपार्थौ शरसङ्घवृष्टिभि-
र्निरन्तरं चक्रतुरंबरं तदा ॥ १५
तद्बाणजालैकमयं महान्तं
सर्वेऽत्रसन्कुरवः सोमकाश्च ।
नान्यत्किञ्चिद्दद्दशुः सम्पतद्भि
बाणान्धकारे तुमुलेऽतिमात्रम् ॥ १६
ततस्तौ पुरुषव्याघ्रौ सर्वलोकधनुर्धरौ ।
त्यक्तप्राणौ रणे वीरौ युद्धश्रममुपागतौ ॥ १७
समुत्क्षेपैर्वीक्षमाणौ सिक्तौ चन्दनवारिणा ।
सवालव्यजनैर्दिव्यैर्दिविस्थैरप्सरोगणैः ।
शक्रसूर्यकराभ्यां प्रमार्जितमुखावुभौ ॥ १८
कर्णोऽथ पार्थं न विशेषयद्यदा
भृशं च पार्थेन शराभितप्तः ।
ततस्तु वीरः शरविक्षताङ्गो
दध्रे मनो ह्येकशयस्य तस्य ॥] १९
ततो रिपुघ्नं समधत्त कर्णः
सुसंचितं सर्पमुखं ज्वलन्तम् ।
रौद्रं शरं सन्नतमुग्रधौतं
पार्थार्थमित्येव चिराभिगुप्तम् ॥ २०
सदार्चितं चन्दनचूर्णशायितं
सुवर्णतूणीरशयं महार्चिषम् ।
आकर्णपूर्णं विचकर्ष कर्णो
विमोक्तुकामः शरमुग्रवेगम् ॥ २१
प्रदीप्तमैरावतवंशसंभवं
शिरो जिहीर्षुर्युधि सव्यसाचिनः ।
ततः प्रजज्वाल दिशो नभश्च
उल्काश्च घोराः शतशः प्रपेतुः ॥ २२
तस्मिंस्तु नागे धनुषि प्रयुक्ते
हाहाकृता लोकपालाः सशक्राः ॥ २३
स सूतपुत्रस्तमपाङ्गदेशे
अवाङ्मुखं संधयति स्म रोषात् ।
न तं स्म जानाति महानुभाव-
मपाङ्गदेशेऽभिनिविष्टमाजौ ॥ २४
[न चापि तं बुबुधे सूतपुत्रो
बाणे प्रविष्टं योगबलेन नागम् ।
दशशतनयनोऽहिं दृश्य बाणे प्रविष्टं
निहत इति सुतो मे स्रस्तगात्रो बभूव ।
जलजकुसुमयोनिः श्रेष्ठभावो जितात्मा
त्रिदशपतिमवोचन्मा व्यथिष्ठा जये श्रीः॥]
ततोऽब्रवीन्मद्रराजो महात्मा
दृष्ट्वा कर्णं प्रहितेषुं तमुग्रम् ।
ग्रीवायतः कर्ण न संहितोऽयं
समीक्ष्य संधत्स्व शरं परघ्नम् ॥ २६
अथाब्रवीत्क्रोधसंरक्तनेत्रो
मद्राधिपं सूतपुत्रो मनस्वी ।
न संधत्ते द्विः शरं शल्य कर्णो
न मादृशा जिह्मयुद्धा भवन्ति ॥ २७
इतीदमुक्त्वा विससर्ज तं शरं
प्रयत्नतो वर्षगणाभिपूजितम् ।
हतोसि रे फल्गुन इत्यधिक्षिप-
न्नुवाच चोच्चैर्गिरमूर्जितां वृषः ॥ २८
स सायकः कर्णभुजप्रसृष्टो
हुताशनार्कप्रतिमः सुघोरः ।
गुणच्युतः कर्णधनुःप्रमुक्तो
वियद्गतः प्राज्वलदन्तरिक्षे ॥ २९
तमापतन्तं ज्वलितं निरीक्ष्य
वियद्गतं वृष्णिकुलप्रवीरः ।

बाणजालैकमय दृष्ट्वेति शेष. ॥ १६ ॥ पदा विनिष्पिष्य रथोत्तम स प्रावेशयत्पृथिवी किंचिदेव । क्षिति गता जानु-

रथस्य चक्रं सहसा निपीड्य
पञ्चाङ्गुलं मज्जयति स्म वीरः ॥ ३०
ततोऽन्तरिक्षे सुमहान्निनादः
संपूजनार्थं मधुसूदनस्य ।
[दिव्याश्च वाचः सहसा बभूवु-
र्दिव्यानि पुष्पाण्यथ सिंहनादाः ।
तस्मिंस्तथा वै धरणीं निमग्ने
रथे प्रयत्नान्मधुसूदनस्य ॥] ३१
ततः किरीटं बहुरत्नचित्रं
जघान नागोऽर्जुनमूर्धतो बलात् ।
गिरेः सुजाताङ्कुरपुष्पितद्रुमं
महेन्द्रवज्रं शिखरं यथोत्तमम् ॥ ३२
ततः किरीटं तपनीयचित्रं
पार्थोत्तमाङ्गादहरत्तरस्वी ।
तद्धेमजालावनतं सुघोरं
संप्रज्वलत्तन्निपपात भूमौ ॥ ३३
ततोऽर्जुनस्योत्तमगात्रभूषणं
सुवर्णमुक्तामणिवज्रचित्रितम् ।
धरावियद्द्यौसलिलेषु विश्रुतं
बलं निसर्गोत्तममन्युभिः सदा ॥ ३४
शरेण मूर्ध्नि प्रजहार सूतजो
दिवाकरेन्दुज्वलनग्रहत्विषम् ।
सुवर्णमुक्तामणिवज्रभूषणं
पुरन्दरार्थं तपसा प्रयत्नतः ॥ ३५
स्वयं कृतं यद्विधिना स्वयंभुवा
महार्हरूपं द्विषतां भयंकरम् ।
निजघ्नते देवरिपून्सुरेश्वरः
स्वयं ददौ यद्धि मुदाऽर्जुनाय ॥ ३६
हरिप्रचेतोहरिवित्तगोतृभिः
पिनाकपाशाशनिदण्डधारिभिः ।
सुरोत्तमैरप्यविषह्यमर्दितुं
प्रसह्य नागेन जहार तद्वृषा ॥ ३७
तदुत्तमेषून्मथितं विषाहिना
प्रदीप्तमर्चिष्मदतीव सुन्दरम् ।
पपात पार्थस्य किरीटमुत्तमं
दिवाकरोस्तादिव पर्वताज्वलन् ॥ ३८
महीवियद्द्यौसलिलानि वायुना
प्रसह्य रुग्णानि विघूर्णितानि वा ।
इतीव शब्दं भुवनेषु तत्तथा
जना व्यवस्यन्ति दिशश्च विह्वलाः ॥ ३९
विना किरीटं शुशुभे स पार्थः
श्यामो युवा शैल इव त्रिशृङ्गैः ॥ ४०
ततः समुद्वध्य सितेन वाससा
स्वमूर्धजानव्यथितस्तदाऽर्जुनः ।

भित्तेऽथ वाह्वं हेमच्छन्नाश्चन्द्रमरीचिवर्णां. इतं झ पाठ ॥ ३० ॥

एतदारभ्य गरुडस्य वक्त्र इत्यन्तानां चतुर्णां श्लोकानां स्थाने अधोदृश्यमाना एकादश श्लोका झ. पुस्तके विद्यन्ते

[विना किरीटं शुशुभे स पार्थः
श्यामो युवा नील इवोच्चशृङ्गः ।
ततः समुद्वध्य सितेन वाससा
स्वमूर्धजानव्यथितस्तदाऽर्जुनः ।
विभासितः सूर्यमरीचिना दृढं
शिरोगतेनोदयपर्वतो यथा ॥ १ ॥
गोकर्णा सुमुखी कृतेन इषुणा गोपुत्रसंप्रेषिता
गोशब्दात्मजभूषणं सुविहितं सुव्यक्तगोऽसुप्रभं ।
दृष्ट्वा गोगतकं जहार मुकुटं गोशब्दगोपूरि वै
गोकर्णासनमर्दनश्च न ययावप्राप्य मृत्योर्वशं २
स सायकः कर्णभुजप्रसृष्टो
हुताशनार्कप्रतिमो महार्हः ।

गोकर्णा मुकुट जहारेत्यन्वय । अर्जुनस्य मुकुटहरणमपि महत्कर्मेति सूचयन्मुकुट विशिनष्टि । गवि चक्षुषि कर्णो यस्या सा गोकर्णा चक्षु श्रवा. सर्पिणी अर्जुनेन खाण्डवे निहता सती इह निमित्तभूता तस्य मुकुटमेव जहार हृतवती नतु शिरः । कथ हताया हननिमित्तत्वमत आह । सुमुखी कृतेन इषुणा गोपुत्रसप्रेषिता । सविरविवक्षितत्वान्न भवति । शोभन पुत्र-जीवनकर मुख यस्या सा सुमुखी । सा हि पुत्र निगीर्य दह्यमानात् खाण्डवादुत्पतन्ती शिरोदेशे अर्जुनेन च्छिन्ना सती स्वय मृता पुत्र च रक्षितवतीत्यादिपर्वण्युपाख्यायते । कृतेन स्वय निर्मितेन पुत्रेण त्रातेन इषुणा इषुभाव गतेन । आत्मा वै पुत्रनामासीति श्रुतेरिष्वाकारपुत्ररूपेण सपन्ना सती । गोमतो रश्मिमतोऽर्कस्य पुत्रेण कर्णेन प्रेषिता । इषुणेतीत्थभावे तृतीया । गोपुत्रेति मतुल्लोप आर्ष । किकृत्वा मुकुट जहारेत्यत आह । सुव्यक्तगोऽसुप्रभ गोगतक दृष्ट्वा सुव्यक्ता अतिशयेनाविर्भूता

बभौ सुसंपूर्णमरीचिनेन्दुना
शिरोगतेनोदयपर्वतो यथा ॥ ४१
स चापि राधेयभुजप्रमुक्तो
हुताशनार्कप्रतिमद्युतिर्महान् ।
महोरगः कृतवैरोऽर्जुनेन
किरीटमाहृत्य समुत्पपात ॥ ४२
तमुत्पतन्तं द्विपदां वरिष्ठो
दृष्ट्वा वचः पार्थमुवाच कृष्णः ।
महोरगं पाण्डव पश्यपश्य
प्रयोजितं त्वन्निधनार्थमुग्रम् ॥ ४३
स एवमुक्तो मधुसूदनेन
गाण्डीवधन्वा हरिमुग्रवाचा ।
उवाच को न्वेष ममाद्य नागः
क्षयाय नागाद्गरुडस्य वक्त्रम् ॥ ४४
कृष्ण उवाच ।
योऽसौ त्वया खाण्डवे चित्रभानुं
संतर्पयाणेन धनुर्धरेण ।
वियद्गतो जननीगुप्तदेहो
मत्वैकरूपं निहताऽस्य माता ॥ ४५
स एष तद्वैरमनुस्मरन्वै
त्वां प्रार्थयत्यात्मवधाय नूनम् ।

महोरगः कृतवैरोऽर्जुनेन
किरीटमाहृत्य ततो व्यतीयात् ॥ ३ ॥
तं चापि दग्ध्वा तपनीयचित्रं
किरीटमाकृष्य तदर्जुनस्य ।
इयेष गन्तुं पुनरेव तूणं
दृष्ट्वा च कर्णेन ततोऽब्रवीत्तम् ॥ ४ ॥
मुक्तस्त्वयाऽहं त्वसमीक्ष्य कर्ण
शिरो हृतं यन्न मयाऽर्जुनस्य ।
समीक्ष्य मां मुञ्च रणे त्वमाशु
हन्ताऽस्मि शत्रुं तव चात्मनश्च ॥ ५ ॥
स एवमुक्तो युधि सूतपुत्र-
स्तमब्रवीत्को भवानुग्ररूपः ।
नागोऽब्रवीद्विद्धि कृतागसं मां
पार्थेन मातुर्वधजातवैरम् ॥ ६ ॥
यदि स्वयं वज्रधरोऽस्य गोप्ता
तथापि याता पितृराजवेश्मनि ।
कर्ण उवाच ।
न नाग कर्णोऽद्य रणे परस्य
बलं समास्थाय जयं बुभूषेत् ॥ ७ ॥
न संदध्यां द्विः शरं चैव नाग
यद्यर्जुनानां शतमेव हन्याः ।
तमाह कर्णः पुनरेव नागं
तदाऽजिमध्ये रविसूनुसत्तमः ॥ ८ ॥
व्यालास्त्रसर्गोत्तमयत्नमन्युभि-
र्हन्ताऽस्मि पार्थं सुसुखी व्रज त्वम् ।
इत्येवमुक्तो युधि नागराजः
कर्णेन रोषादसहंस्तस्य वाक्यम् ॥ ९ ॥
स्वयं प्रायात्पार्थवधाय राजन्
कृत्वा स्वरूपं विजिघांसुरुग्रः ।
ततः कृष्णः पार्थमुवाच सङ्ख्ये
महोरगं कृतवैरं जहि त्वम् ॥ १० ॥
स एवमुक्तो मधुसूदनेन
गाण्डीवधन्वा रिपुवीर्यसाहः ।
उवाच को ह्येष ममाद्य नागः
स्वयं य आयाद्गरुडस्य वक्त्रम् ॥ ११ ॥

गावो रश्मयस्तेज इति यावत् । सुव्यक्तैर्गोभिरसुभिश्च प्रकर्षेण भासमान निरतिशयतेजोबलमर्जुनम् । गोगतक गोशब्देन हयरश्मीना प्रदेशो लक्ष्यते । तत्र गत विद्यमान क शिरो यस्य तम् । अर्जुनस्य ग्रीवादेश कर्णेन लक्षीकृत विज्ञाय भगवता स्वभारेणाश्वेषु जानुभ्यामवनी गमितेषु रश्मिभिः समसूत्रदेशेऽर्जुनस्य शिरो दृष्ट्वापि वेगातिशयात्स्वय नीचीभवितुमशक्ता सती तद्देशस्थ मुकुट जहारेत्यर्थ । गोशब्दात्मजभूषण सुविहितमिति । गौ पृथिवी तया शब्द्यते गोशब्दा अदिति । इय वा अदितिरिति पृथिव्या अदितेर्निर्देशात् । तस्या आत्मजस्येन्द्रस्य भूषण सुविहित वेधसेति शेष. । तथाचात्रैवोक्तम् । पुरदरार्थ तपसा प्रयत्नत. स्वय कृत यद्विधिना स्वयमुवेति । कीदृश मुकुटम् । वै निश्चित प्रसिद्ध वा । गोशब्दगोपूरि गोभिः रश्मिभि· शब्द्यते रश्मिमानिति कथ्यत इति सूर्यस्तस्येव भुवनगर्भव्यापिनो गाव: किरणास्तैर्भुवनं पूरयितु शीलमस्य तत्तया । सूर्यसमप्रभमित्यर्थ । ननु चेतनाधिष्ठितो बाणः पुनरेत्यार्जुन कुतो न हतवानित्यत आह । गोकर्णासनमर्दनश्च न यथावप्राप्य मृत्योर्वशमिति । गोकर्ण सर्प पुनरर्जुन हन्तुमिच्छन्तमसनेन बाणक्षेपेण मर्दयति य स तथाभूतोऽर्जुनश्च तमेव सर्पमनवाप्य मृत्योर्वश न ययौ । सर्पस्य पुनरागमन वधश्चात्रैव कीर्त्यते । गौर्नादिले बलीवर्दे क्रतुभेदर्षिभेदयो । स्त्री तु स्याद्दिशि भारत्या भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमस्विति कोश. ॥ २ ॥

नभश्च्युतां प्रज्वलितामिवोल्कां
पश्यैनमायान्तममित्रसाह ॥ ४६

सञ्जय उवाच ।

ततः स जिष्णुः परिवृत्य रोषा-
च्चिच्छेद षड्भिर्निशितैः सुधारैः ।
नागं वियत्तिर्यगिवोत्पततं
स च्छिन्नगात्रो निपपात भूमौ ॥ ४७

[गते च तस्मिन्भुजगे किरीटिना
स्वयं विभुः पार्थिव भूतलादथ ।
समुज्जहाराशु पुनः पतन्तं
रथं भुजाभ्यां पुरुषोत्तमस्ततः ॥] ४८

तस्मिन्मुहूर्ते दशभिः पृषत्कैः
शिलाशितैर्बर्हिणबर्हवाजितैः ।
विव्याध कर्णः पुरुषप्रवीरो
धनञ्जयं तिर्यगवेक्षमाणः ॥ ४९

ततोऽर्जुनो द्वादशभिः सुमुक्तै-
र्वराहकर्णैर्निशितैः समर्प्य ।
नाराचमाशीविषतुल्यवेग-
माकर्णपूर्णायतमुत्ससर्ज ॥ ५०

स चित्रवर्मेषुवरो विदार्य
प्राणान्निरस्यन्निव साधुमुक्तः ।
कर्णस्य पीत्वा रुधिरं विवेश
वसुंधरां शोणितदिग्धवाजः ॥ ५१

ततो वृषो बाणनिपातकोपितो
महोरगो दण्डविघट्टितो यथा ।
तदाऽऽशुकारी व्यसृजच्छरोत्तमान्
महाविषः सर्प इवोत्तमं विषम् ॥ ५२

जनार्दनं द्वादशभिः पराभिन-
न्नवैर्नवत्या च शरैस्तथाऽर्जुनम् ।
शरेण घोरेण पुनश्च पाण्डवं
विदार्य कर्णो व्यनदज्जहास च ॥ ५३

तमस्य हर्षं ममृषे न पाण्डवो
बिभेद मर्माणि ततोऽस्य मर्मवित् ।
परःशतैः पत्रिभिरिन्द्रविक्रम-
स्तथा यथेन्द्रो बलमोजसा रणे ॥ ५४

ततः शराणां नवतिं तदाऽर्जुनः
ससर्ज कर्णेऽन्तकदण्डसंनिभाम् ।
तैः पत्रिभिर्विद्धतनुः स विव्यथे
तथा यथा वज्रविदारितोऽचलः ॥ ५५

मणिप्रवेकोत्तमवज्रहाटकै-
रलंकृतं चास्य वराङ्गभूषणम् ।
प्रविद्धमुर्व्यां निपपात पत्रिभि-
र्धनञ्जयेनोत्तमकुण्डलेपि च ॥ ५६

महाधनं शिल्पिवरैः प्रयत्नतः
कृतं यदस्योत्तमवर्म भास्वरम् ।
सुदीर्घकालेन ततोऽस्य पाण्डवः
क्षणेन बाणैर्बहुधा व्यशातयत् ॥ ५७

'तस्येषुभिः खण्डितकुण्डलोऽन्तः
परिक्षतश्चाभ्यधिकं तदानीम् ।
स लोहिताङ्गश्रवणश्चकाशे
सलोहिताङ्गश्रवणो यथा दिवि ॥' ५८

स तं विवर्माणमथोत्तमेषुभिः
शितैश्चतुर्भिः कुपितः पराभिनत् ।
स विव्यथेऽत्यर्थमरिप्रताडितो
यथाऽऽतुरः पित्तकफानिलज्वरैः ॥ ५९

महाधनुर्मण्डलनिःसृतैः शितैः
क्रियाप्रयत्नप्रहितैर्बलेन च ।
ततक्ष कर्णं बहुभिः शरोत्तमै-
र्बिभेद मर्मस्वपि चार्जुनस्त्वरन् ॥ ६०

दृढाहतः पत्रिभिरुग्रवेगैः
पार्थेन कर्णो विविधैः शिताग्रैः ।
बभौ गिरिर्गैरिकधातुरक्तः
क्षरन्प्रपातैरिव रक्तमम्भः ॥ ६१

[ततोऽर्जुनः कर्णमवक्रगैर्नवैः
सुवर्णपुङ्खैः सुदृढैरयस्मयैः ।

गते गमिते । विभु. समर्थ. ॥ ४८ ॥ बर्हिणाना बर्हा एव वाजा. पक्षा. सजाता येषा तैर्बर्हिणबर्हवाजितै. ॥ ४९ ॥

यमाग्निदण्डप्रतिमैः स्तनान्तरे
पराभिनत्क्रौञ्चमिवाद्रिमग्निजः ॥ ६२
ततः शरावापमपास्य सूतजो
धनुश्च तच्छक्रशरासनोपमम् ।
ततो रथस्थः स मुमोह च स्खलन्
प्रशीर्णमुष्टिः सुभृशाहतः प्रभो ॥ ६३
न चार्जुनस्तं व्यसने तदेषिवा-
न्निहन्तुमार्यः पुरुषव्रते स्थितः ।
ततस्तमिन्द्रावरजः सुसंभ्रमा-
दुवाच किं पाण्डव हे प्रमाद्यसे ॥ ६४
नैवाहितानां सततं विपश्चितः
क्षणं प्रतीक्षन्त्यपि दुर्बलीयसाम् ।
विशेषतोऽरीन्व्यसनेषु पण्डितो
निहत्य धर्मं च यशश्च विन्दते ॥ ६५
तदेकवीरं तव चाहितं सदा
त्वरस्व कर्णं सहसाऽभिमर्दितुम् ।
पुरा समर्थः समुपैति सूतजो
भिन्धि त्वमेनं नमुचिं यथा हरिः ॥ ६६
ततस्तदेवेत्यभिपूज्य सत्वरं
जनार्दनं कर्णमविध्यदर्जुनः ।
शरोत्तमैः सर्वकुरूत्तमस्त्वरं-
स्तथा यथा शम्बरहा पुरा बलिम् ॥] ६७
साश्वं तु कर्णं सरथं किरीटी
समाचिनोद्भारत वत्सदन्तैः ।
प्रच्छादयामास दिशश्च बाणैः
सर्वप्रयत्नात्तपनीयपुङ्खैः ॥ ६८
सवत्सदन्तैः पृथुपीनवक्षाः
समाचितः सोऽधिरथिर्विभाति ।
सुपुष्पिताशोकपलाशशाल्मलि-
र्यथाऽचलश्चन्दनकाननायुतः ॥ ६९
शरैः शरीरे बहुभिः समर्पितै-
र्विभाति कर्णः समरे विशांपते ।
महीरुहैराचितसानुकन्दरो
यथा गिरीन्द्रः स्फुटकर्णिकारवान् ॥ ७०
स बाणसङ्घान्बहुधा व्यवासृजन्
विभाति कर्णः शरजालरश्मिवान् ।
स लोहितो रक्तगभस्तिमण्डलो
दिवाकरोऽस्ताभिमुखो यथा तथा ॥ ७१
बाह्वन्तरादाधिरथेर्विमुक्तान्
बाणान्महाहीनिव दीप्यमानान् ।
व्यध्वंसयन्नर्जुनबाहुमुक्ताः
शराः समासाद्य दिशः शिताग्राः ॥ ७२
[ततः स कर्णः समवाप्य धैर्यं
बाणान्विमुञ्चन्कुपिताहिकल्पान् ।
विव्याध पार्थं दशभिः पृषत्कैः
कृष्णं च षड्भिः कुपिताहिकल्पैः ॥ ७३
ततः किरीटी भृशमुग्रनिःस्वनं
महाशरं सर्पविषानलोपमम् ।
अयस्मयं रौद्रमहास्त्रसंभृतं
महाहवे क्षेतुमना महामतिः ॥] ७४
कालो ह्यदृश्यो नृप विप्रशापा-
न्निदर्शयन्कर्णवधं ब्रुवाणः ।
भूमिस्तु चक्रं ग्रसतीत्यवोच-
त्कर्णस्य तस्मिन्वधकाल आगते ॥ ७५
न चास्य घोरं प्रतिभाति चास्त्रं
यद्भार्गवोऽस्मै प्रददौ महात्मा ।
चक्रं च वामं ग्रसते भूमिरस्य
प्राप्ते तस्मिन्वधकाले नृवीर ॥ ७६
ततो रथो घूर्णितवान्नरेन्द्र
शापात्तदा ब्राह्मणसत्तमस्य ।
प्राप्तं वधं शंसति चाप्यथास्त्रं
प्रणश्यमानं द्विजमुख्यशापात् ॥ ७७
[ततश्चक्रमपतत्तस्य भूमौ
स विह्वलः समरे सूतपुत्रः ।
सवेदिकश्चैत्य इवातिमात्रः
सुपुष्पितो भूमितले निमग्नः ॥] ७८
मग्ने रथे ब्राह्मणशापमूढो
ह्यस्त्रं च तं मोघमिषुं च सर्पम् ।

अग्निज कार्तिकेय. ॥ ६२ ॥ ईषिवान् मनसि कृतवान् ॥ ६४ ॥ चैत्य. सवेदिको ग्रामसूचको महाद्रुम. ॥ ७८ ॥

अमृष्यमाणो व्यसनानि तानि
हस्तौ विधुन्वन्विजगर्ह धर्मम् ॥ ७९
धर्मप्रधानं किल पाति धर्म
इत्यब्रुवन्धर्मविदः सदैव ।
वयं च धर्मे प्रयताम नित्यं
चर्तुं यथाशक्ति यथाश्रुतं च ।
स चापि निघ्नाति न पाति भक्तान्
मन्ये न नित्यं परिपाति धर्मः ॥ ८०
एवं ब्रुवन्प्रस्खलिताश्वमूतो
विचाल्यमानोऽर्जुनबाणपातैः ।
मर्माभिघाताच्छिथिलः क्रियासु
पुनः पुनर्धर्ममसौ जगर्ह ॥ ८१
ततः शरैर्भीमतरैरविध्यत्त्रिभिराहवे ।
हस्ते कृष्णं तथा पार्थमभ्यविध्यच्च सप्तभिः ॥ ८२
ततोऽर्जुनः सप्तदश तिग्मवेगानजिह्मगान् ।
इन्द्राशनिसमान्घोरानसृजत्पावकोपमान् ॥ ८३
निर्भिद्य ते भीमवेगा ह्यपतन्पृथिवीतले ।
कम्पितात्मा ततः कर्णः शक्त्या चेष्टामदर्शयत् ८४
बलेनाथ स संस्तभ्य ब्रह्मास्त्रं समुदैरयत् ।
ऐन्द्रं ततोऽर्जुनश्चापि तं दृष्ट्वाऽभ्युपमन्त्रयत् ॥ ८५
गाण्डीवं ज्यां च बाणांश्च सोऽनुमन्त्र्य परंतपः ।
व्यसृजच्छरवर्षाणि वर्षाणीव पुरंदरः ॥ ८६
ततस्तेजोमयाः बाणा रथात्पार्थस्य निःसृताः ।
प्रादुरासन्महावीर्याः कर्णस्य रथमन्तिकात् ।
स कर्णोऽप्रसदस्त्रास्त्रं कुर्वन्मोक्षं महारथः ॥ ८७
ततोऽब्रवीद्वृष्णिवीरस्तस्मिन्नस्त्रे विनाशिते ।
विसृजास्त्रं परं पार्थ राधेयो ग्रसते शरान् ॥ ८८
ततो ब्रह्मास्त्रमत्युग्रं संमन्त्र्य समयोजयत् ।
छादयित्वा ततो बाणैः कर्णं प्रत्यस्यदर्जुनः ॥ ८९
ततः कर्णः शितैर्बाणैर्ज्यां चिच्छेद सुतेजनैः ।
[द्वितीयां च तृतीयां च चतुर्थीं पञ्चमीं तथा ९०
षष्ठीमथास्य चिच्छेद सप्तमीं च तथाऽष्टमीम् ।
नवमीं दशमीं चास्य तथा चैकादशीं वृषः ।
ज्याशतं शतसंधानः स कर्णो नावबुध्यते ॥] ९१
ततो ज्यां विनिधायान्यामभिमन्त्र्य च पाण्डवः ।
शरैरवाकिरत्कर्णं दीप्यमानैरिवाहिभिः ॥ ९२
तस्य ज्याच्छेदनं कर्णो ज्यावधानं च संयुगे ।
नान्वबुध्यत शीघ्रत्वात्तदद्भुतमिवाभवत् ॥ ९३
अस्त्रैरस्त्राणि संवार्य प्रनिघ्नन्सव्यसाचिनः ।
चक्रे चाप्यधिकं पार्थात्स्ववीर्यमतिदर्शयन् ॥ ९४
ततः कर्णोऽर्जुनं दृष्ट्वा स्वास्त्रेण च पीडितम् ।
अभ्यसेत्यब्रवीत्पार्थमातिष्ठास्त्रं व्रजेति च ॥ ९५
ततोऽग्निसदृशं घोरं शरं सर्पविषोपमम् ।
अश्मसारमयं दिव्यमभिमन्त्र्य परंतपः ।
रौद्रमस्त्रं समाधाय क्षेतुकामः किरीटिने ॥ ९६
ततोऽग्रसन्मही चक्रं राधेयस्य तदा नृप ॥ ९७
[ततोऽवतीर्य राधेयो रथादाशु समुद्यतः ।
चक्रं भुजाभ्यामालम्ब्य समुत्क्षेतुमियेष सः ॥ ९८
सप्तद्वीपा वसुमती सशैलवनकानना ।
गीर्णचक्रा समुत्क्षिप्ता कर्णेन चतुरङ्गुलम् ॥] ९९
ग्रस्तचक्रस्तु राधेयः क्रोधादश्रूण्यवर्तयत् ।
अर्जुनं वीक्ष्य संरब्धमिदं वचनमब्रवीत् ॥ १००
भोभो पार्थ महेष्वास मुहूर्तं परिपालय ।
यावच्चक्रमिदं ग्रस्तमुद्धरामि महीतलात् ॥ १०१
सव्यं चक्रं महीग्रस्तं दृष्ट्वा दैवादिदं मम ।
पार्थ कापुरुषाचीर्णमभिसन्धि विसर्जय ॥ १०२
न त्वं कापुरुषाचीर्णं मार्गमास्थातुमर्हसि ।
ख्यातस्त्वमसि कौन्तेय विशिष्टो रणकर्मसु ।
विशिष्टतरमेव त्वं कर्तुमर्हसि पाण्डव ॥ १०३
प्रकीर्णकेशे विमुखे ब्राह्मणेऽथ कृताञ्जलौ ।
शरणागते न्यस्तशस्त्रे याचमाने तथाऽर्जुन ॥ १०४
अबाणे भ्रष्टकवचे भ्रष्टभग्नायुधे तथा ।
न विमुञ्चन्ति शस्त्राणि शूराः साधुव्रते स्थिताः ॥
त्वं च शूरतमो लोके साधुवृत्तश्च पाण्डव ।

प्रत्यस्यत्प्रतिप्राक्षिपत् ॥ ८९ ॥ अभ्यस पुनः पुनः अस्त्र आतिष्ठ व्रज प्रेरयेत्यब्रवीदिति योजना । ततः कृष्णोऽर्जुन दृष्ट्वा कर्णास्त्रेण च पीडितम् इति झ पाठ ॥ ९५ ॥ क्षेप्तुकाम किरीटवान् इति झ. पाठः ॥ ९६ ॥ सप्तनवतितमोऽध्यायः ॥ ९७ ॥

अभिज्ञो युद्धधर्माणां तस्मात्क्षम मुहूर्तकम् ॥ १०६
दिव्यास्त्रविदमेयात्मा कार्तवीर्यसमो युधि ।
यावच्चक्रमिदं ग्रस्तमुद्धरामि महाभुज ॥ १०७
न मां रथस्थो भूमिष्ठं विकलं हन्तुमर्हसि ।
न वासुदेवाच्चत्तो वा पाण्डवेय बिभेम्यहम् ॥१०८
त्वं हि क्षत्रियदायादो महाकुलविवर्धनः ।
अतस्त्वां ब्रवीम्येष मुहूर्तं क्षम पाण्डव ॥ १०९

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे सप्तनवतितमोऽध्यायः ॥ ९७ ॥

अष्टनवतितमोऽध्यायः ॥ ९८ ॥

पार्थाय धर्मानुवादकं कर्णप्रति कृष्णेन तत्कृतदुष्कृतानुस्मारणपूर्वकं मर्मोद्घाटनम् ॥ १ ॥ कर्णेन स्ववाणाहतिनिर्विण्णेऽर्जुने तदन्तरे रथादवरुह्य तच्चक्रोद्धरणोद्यम. ॥ २ ॥ तदन्तरे कृष्णचोदनया पार्थेन कर्णशिरश्छेद ॥ ३ ॥

सञ्जय उवाच ।
अथाब्रवीद्वासुदेवो महात्मा
राधेय दिष्ट्या स्मरसीह धर्मम् ।
'धर्मे हि बद्धा सततं हि पार्था-
स्तेभ्यस्ततो वृद्धिमसौ ददाति ॥ १
धर्मादपेताः परिपन्थिनस्ते
तस्माद्धता वै कुरवो विनाशम् ।'
प्रायेण नीचा व्यसनेषु मग्ना
निन्दन्ति दैवं न तु दुष्कृतं स्वम् ॥ २
कृष्णां सभां कर्ण यदेकवस्त्रा-
मानीतवांस्त्वं च सुयोधनश्च ।
दुःशासनः शकुनिः सौबलश्च
धर्मस्तदा ते रुचितो न कस्मात् ॥ ३
यदा सभायां राजानमनक्षज्ञं युधिष्ठिरम् ।
आनीय जितवन्तो वै क ते धर्मस्तदा गतः ॥ ४
वनवासे व्यतीते च कर्ण वर्षे त्रयोदशे ।
न प्रयच्छसि यद्राज्यं क ते धर्मस्तदा गतः ॥ ५
यद्भीमसेनं सर्पैश्च विषयुक्तैश्च भोजनैः ।
आचरत्वन्मते राजा क ते धर्मस्तदा गतः ॥ ६
यद्वारणावते पार्थान्सुप्ताञ्जतुगृहे तदा ।
हन्तुकामास्तदा यूयं क ते धर्मस्तदा गतः ॥ ७
यदा रजस्वलां कृष्णां दुःशासनवशे स्थिताम् ।
सभायां प्राहसः कर्ण क ते धर्मस्तदा गतः ॥ ८
यदनार्यैः पुरा कृष्णां क्लिश्यमानामनागसम् ।
उपप्रेक्षसि राधेय क ते धर्मस्तदा गतः ॥ ९
विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः ।
पतिमन्यं वृणीष्वेति वदंस्त्वं गजगामिनीम् ।
उपप्रेक्षसि राधेय क ते धर्मस्तदा गतः ॥ १०
राज्यलुब्धः पुनः कर्ण समाह्वयसि पाण्डवान् ।
यदा शकुनिमाश्रित्य क ते धर्मस्तदा गतः ॥११
यदाऽभिमन्युं बहवो युद्धे जघ्नुर्महारथाः ।
परिवार्य रणे बालं क ते धर्मस्तदा गतः ॥ १२
[यद्येष धर्मस्तत्र न विद्यते हि
किं सर्वथा तालुविशोषणेन ।
अद्येह धर्म्याणि विधत्स्व सूत
तथापि जीवन्न विमोक्ष्यसे हि ॥ १३
नलो ह्यक्षैर्निर्जितः पुष्करेण
पुनर्यशो राज्यमवाप वीर्यात् ।
प्राप्तास्तथा पाण्डवा बाहुवीर्या-
त्सर्वैः समेताः परिवृत्तलोभाः ॥ १४
निहत्य शत्रून्समरे प्रबुद्धा-
न्ससोमका राज्यमवाप्नुयुस्ते ।
तथा गता धार्तराष्ट्रा विनाशं
धर्माभिगुप्तैः सततं नृसिंहैः ॥] १५
सञ्जय उवाच ।
एवमुक्तस्तदा कर्णो वासुदेवेन भारत ।
लज्जयावनतो भूत्वा नोत्तरं किंचिदुक्तवान् ॥१६
क्रोधात्प्रस्फुरमाणौष्ठो धनुरुद्यम्य भारत
योधयामास वै पार्थं महावेगपराक्रमः ॥ १७
ततोऽब्रवीद्वासुदेवः फल्गुनं पुरुषर्षभम् ।

दिव्यास्त्रेणैव निर्भिद्य पातयस्व महाबल ॥ १८
एवमुक्तस्तु देवेन क्रोधमागात्तदाऽर्जुनः ।
मन्युमभ्याविशद्घोरं स्मृत्वा तत्तु धनञ्जयः ॥ १९
तस्य क्रुद्धस्य सर्वेभ्यः स्रोतोभ्यस्तेजसोऽर्चिषः ।
प्रादुरासंस्तदा राजंस्तदद्भुतमिवाभवत् ॥ २०
तत्समीक्ष्य ततः कर्णो ब्रह्मास्त्रेण धनञ्जयम् ।
अभ्यवर्षत्पुनर्यत्नमकरोद्रथसर्जने ॥ २१
ब्रह्मास्त्रेणैव तं पार्थो ववर्ष शरवृष्टिभिः ।
तदस्त्रमस्त्रेणावार्य प्रजहार च पाण्डवः ॥ २२
ततोऽन्यदस्त्रं कौन्तेयो दयितं जातवेदसः ।
मुमोच कर्णमुद्दिश्य तत्प्रजज्वाल तेजसा ॥ २३
वारुणेन ततः कर्णः शमयामास पावकम् ।
जीमूतैश्च दिशः सर्वाश्चक्रे तिमिरदुर्दिनाः ॥ २४
पाण्डवेयस्त्वसंभ्रान्तो वायव्यास्त्रेण वीर्यवान् ।
अपोवाह तदाऽभ्राणि राधेयस्य प्रपश्यतः ॥ २५
[ततः शरं महाघोरं ज्वलन्तमिव पावकम् ।
आददे पाण्डुपुत्रस्य सूतपुत्रो जिघांसया ॥ २६
योज्यमाने ततस्तस्मिन्बाणे धनुषि पूजिते ।
चचाल पृथिवी राजन्सशैलवनकानना ॥ २७
ववौ सशर्करो वायुर्दिशश्च रजसा वृताः ।
हाहाकारश्च संजज्ञे सुराणां दिवि भारत ॥ २८
तमिषुं सन्धितं दृष्ट्वा सूतपुत्रेण मारिष ।
विषादं परमं जग्मुः पाण्डवा दीनचेतसः ॥ २९
स सायकः कर्णभुजप्रमुक्तः
शक्राशनिप्रख्यरुचिः शिताग्रः ।
भुजान्तरं प्राप्य धनञ्जयस्य
विवेश वल्मीकमिवोरगोत्तमः ॥ ३०
स गाढविद्धः समरे महात्मा
विधूर्णमानः श्लथहस्तगाण्डिवः ।
चचाल बीभत्सुरमित्रमर्दनः
क्षितेः प्रकम्पे च यथाऽचलोत्तमः ॥ ३१
तदन्तरं प्राप्य वृषो महारथो
रथाङ्गमुर्वीगतमुज्जिहीर्षुः ।
रथादवप्लुत्य निगृह्य दोर्भ्यां
शशाक दैवान्न महाबलोऽपि ॥ ३२
ततः किरीटी प्रतिलभ्य संज्ञां
जग्राह बाणं यमदण्डकल्पम् ।
ततोऽर्जुनः प्राञ्जलिकं महात्मा
ततोऽब्रवीद्वासुदेवोऽपि पार्थम् ॥ ३३
छिन्ध्यस्य मूर्धानमरेः शरेण
न यावदारोहति वै रथं वृषः ।
तथैव संपूज्य स तद्वचः प्रभो-
स्ततः शरं प्रज्वलितं प्रगृह्य ।
जघान कक्षाममलार्कवर्णो
महारथे रथचक्रे विमग्ने ॥ ३४
तं हस्तिकक्षाप्रवरं सुकेतुं
सुवर्णमुक्तामणिवज्रजुष्टम् ।
कलाप्रकृष्टोत्तमशिल्पियत्नैः
कृतं सुरूपं तपनीयचित्रम् ॥ ३५
जयास्पदं तव सैन्यस्य नित्य-
ममित्रवित्रासनमीड्यरूपम् ।
विख्यातमादित्यसुतस्य लोके
त्विषा समं पावकभानुचन्द्रैः ॥ ३६
ततः क्षुरप्रेण सुसंशितेन
सुवर्णपुङ्खेन हुताग्निवर्चसा ।
श्रिया ज्वलन्तं ध्वजमुन्ममाथ
महारथस्याधिरथेः किरीटी ॥ ३७
यशश्च दर्पश्च तथा प्रियाणि
सर्वाणि कार्याणि च तेन केतुना ।
साकं कुरूणां हृदयानि चापतन्
बभूव हाहेति च निःस्वनो महान् ॥ ३८
दृष्ट्वा ध्वजं पातितमाशुकारिणा
कुरुप्रवीरेण निकृत्तमाहवे ।
नाशंसिरे सूतपुत्रस्य सर्वे
जयं तदा भारत ये त्वदीयाः ॥ ३९
अथ त्वरन्कर्णवधाय पार्थो
महेन्द्रवज्रानलदण्डसन्निभम् ।
आदत्त चाथाञ्जलिकं निषङ्गा-
त्सहस्ररश्मेरिव रश्मिमुत्तमम् ॥ ४०

मर्मच्छिदं शोणितमांसदिग्धं
वैश्वानरार्कप्रतिमं महार्हम् ।
नराश्वनागासुहरं व्यरत्निं
षड्वाजमज्झोगतिमुग्रवेगम् ॥ ४१
सहस्रनेत्राशनितुल्यवीर्यं
कालानलं व्यात्तमिवातिघोरम् ।
पिनाकनारायणचक्रसन्निभं
भयंकरं प्राणभृतां विनाशनम् ॥ ४२
जग्राह पार्थः स शरं प्रहृष्टो
यो देवसङ्घैरपि दुर्निवार्यः ।
संपूजितो यः सततं महात्मा
देवासुरान्यो विजयेन्महेषुः ॥ ४३
तं वै प्रमृष्टं प्रसमीक्ष्य युद्धे
चचाल सर्वं सचराचरं जगत् ।
कृत्स्नं जगत्स्वस्त्यृषयोऽभिचक्रु-
स्तमुद्यतं प्रेक्ष्य महाहवेषुम् ॥ ४४
ततस्तु तं वै शरमप्रमेयं
गाण्डीवधन्वा धनुषि व्ययोजयत् ।
युक्त्वा महास्त्रेण परेण चापं
विकृष्य गाण्डीवमुवाच सत्वरम् ॥ ४५
अयं महास्त्रप्रहितो महाशरः
शरीरहृच्चासुहरश्च दुर्हृदः ।
तपोऽस्ति तप्तं गुरवश्च तोषिता
मया यदीष्टं सुहुतं यदि श्रुतम् ॥ ४६
अनेन सत्येन निहन्त्वयं शरः
सुसंहितः कर्णमरिं ममोर्जितम् ।
इत्यूचिवांस्तं प्रमुमोच बाणं
धनञ्जयः कर्णवधाय घोरम् ॥ ४७
कृत्या ह्यथर्वाङ्गिरसी प्रचोदिता
यथा तथा त्वं जहि शात्रवं मम ।
ब्रुवन्किरीटी तमतिप्रहृष्टो-
ऽसृजद्देवानां जयहेतुं महेषुम् ॥ ४८
जिघांसुरर्केन्दुसमप्रभावः
कर्णं वशी पाण्डवः क्षिप्रकारी ।
ततो विमुक्तो बलिना महेषुः
प्रज्वालयामास नभो दिशश्च ॥ ४९
सैन्यान्यनेकानि च विप्रमोह्य
गाण्डीवमुक्तेन ततो महात्मा ।
तेनार्जुनस्तन्महनीयमस्य
शिरोऽहरत्सूतपुत्रस्य राजन् ॥ ५०
शरोत्तमेनाञ्जलिकेन राजं-
स्तदा महास्त्रप्रतिमन्त्रितेन ।
पार्थोऽपराह्णे शिर उच्चकर्त
वैकर्तनस्याथ महेन्द्रसूनुः ।
छिन्नं पपाताञ्जलिकेन तूर्णं
कायश्च पश्चाद्धरणीं जगाम ॥ ५१
तदुद्यतादित्यसमानतेजसं
शरन्नभोमध्यगभास्करोपमम् ।
वराङ्गमुर्व्यामपतच्चमूमुखे
दिवाकरोऽस्तादिव रक्तमण्डलः ॥ ५२
ततोऽस्य देहं सततं सुखैधितं
सुरूपमत्यर्थसुखं सुगन्धि च ।
परेण कृच्छ्रेण शिरः समत्यज-
द्गृहं महर्धीन्निवसन्निवेश्वरः ॥ ५३
शरैर्विभिन्नं व्यसु तत्सुवर्चसः
पपात कर्णस्य शरीरमुच्छ्रितम् ।
स्रवद्व्रणं गैरिकतोयविस्रवं
गिरेर्यथा वज्रहतं महाशिरः ॥ ५४
देहाच्च कर्णस्य निपातितस्य
तेजः सूर्यं खं वितत्याविवेश ।
तदद्भुतं सर्वमनुष्ययोधाः
संदृष्टवन्तो निहते स्म कर्णे ॥ ५५
ततः शङ्खान्पाण्डवा दध्मुरुच्चै-
र्दृष्ट्वा कर्णं पातितं फल्गुनेन ।
तथैव कृष्णश्च धनञ्जयश्च
हृष्टौ यमौ दध्मतुर्वारिजातौ ॥ ५६
तं सोमकाः प्रेक्ष्य हतं शयानं
सैन्यैः सार्धं सिंहनादान्प्रचक्रुः ।

तूर्याणि संजघ्नुरतीव हृष्टा
वासांसि चैवादुधुवुर्भुजांश्च ॥ ५७
संवर्धयन्तश्च नरेन्द्र योधाः
पार्थं समाजग्मुरतीव हृष्टाः ।
बलान्विताश्चापरे ह्यप्यनृत्य-
न्नन्योन्यमाश्लिष्य नदन्त ऊचुः ॥ ५८
दृष्ट्वा तु कर्णं भुवि वा विपन्नं
कृत्तं रथात्सायकैरर्जुनस्य ।
महानिलेनाद्रिमिवाप्रविद्धं
यज्ञावसानेऽग्निमिव प्रशान्तम् ॥ ५९
तदाननं सूर्यसुतस्य राज-
न्विभ्राजते पद्ममिवावनालम् ।
रराज कर्णस्य शिरो निकृत्त-
मस्तंगतं भास्करस्येव बिम्बम् ॥ ६०
शरैराचितसर्वाङ्गः शोणितौघपरिप्लुतः ।
रराज देहः कर्णस्य स्वरश्मिभिरिवांशुमान् ॥ ६१
प्रताप्य सेनामामित्रीं दीप्तैः शरगभस्तिभिः ।
बलिनार्जुनकालेन नीतोऽस्तं कर्णभास्करः ॥ ६२
अस्तं गच्छन्यथाऽऽदित्यः प्रभामादाय गच्छति ।
तथा जीवितमादाय कर्णस्येषुर्जगाम सः ॥ ६३
अपराह्णेऽपराह्णस्य सूतपुत्रस्य मारिष ।
छिन्नमञ्जलिकेनाजौ सोत्सेधमपतच्छिरः ॥ ६४
उपर्युपरि सैन्यानां विनिघ्नन्तिरराजनान् ।
शिरः कर्णस्य सोऽत्सेधमिषुः सोप्यहरद्भुतम् ॥ ६५
कर्णं तु शूरं पतितं पृथिव्यां
शराचितं शोणितदिग्धगात्रम् ।
दृष्ट्वा शयानं भुवि मद्रराज-
श्छिन्नध्वजेनाथ ययौ रथेन ॥ ६६
हते कर्णे कुरवः प्राद्रवन्त
भयार्दिता गाढविद्धाश्च सङ्ख्ये ।
अवेक्षमाणा मुहुरर्जुनस्य
ध्वजं महान्तं वपुषा ज्वलन्तम् ॥ ६७
तच्छिरो भरतश्रेष्ठ शोभयामास मेदिनीम् ।
यदृच्छयेव पतितं मण्डलं चण्डदीधितेः ॥ ६८
तं दृष्ट्वा समरविमर्द(बद्ध)लब्धनिद्रं
दष्टोष्ठं रुधिरपरीतकातराक्षम् ।
राधेयं रथवरपृष्ठसंनिषण्णं
हीनांशुर्दिवसकरो मुहूर्तमासीत् ॥ ६९
निःशब्दतूर्यं हतयोधमुख्यं
प्रशान्तदर्पं धृतराष्ट्रसैन्यम् ।
न शोभते सूर्यसुतेन हीनं
वृन्दं ग्रहाणामिव चन्द्रहीनम् ॥ ७०
सहस्रनेत्रप्रतिमानकर्मणः
सहस्रपत्रप्रतिमाननं शुभम् ।
सहस्ररश्मिर्दिवसक्षये यथा
तथाऽपतत्कर्णशिरो वसुन्धराम् ॥ ७१
व्यूढोरस्कं कमलवदनं तप्तहेमावभासं
कर्णं दृष्ट्वा भुवि निपतितं पार्थबाणाभितप्तम् ।
पांसुग्रस्तं मलिनमसकृत्पुत्रमन्वीक्षमाणो
मन्दंमन्दं व्रजति सविता मन्दिरं मन्दरश्मिः ॥

॥ इति श्रीमन्महाभारते कर्णपर्वणि सप्तदशदिवसयुद्धे अष्टनवतितमोऽध्यायः ॥ ९८ ॥

एकोनशततमोऽध्यायः ॥ ९९ ॥

शल्येन कर्णमरणाद्याकुलमनसो दुर्योधनस्य समाश्वासनम् ॥ १ ॥ तथा तंप्रति रणाङ्गणवर्णनम् ॥ २ ॥ देवगन्धर्वादीनां स्वस्वस्थानगमनम् ॥ ३ ॥

सञ्जय उवाच ।
कर्णं तु शूरं पतितं पृथिव्यां
शराचितं शोणितदिग्धगात्रम् ।
यदृच्छया सूर्यमिवावनिं गतं
दिदृक्षवः संपरिवार्य तस्थुः ॥ १

अपराह्णे दिवसस्य पश्चिमे भागे । अपरं चरमम् अह मरणदिन यस्य ॥ ६४ ॥ अष्टनवतितमोऽध्याय. ॥ ९८ ॥

प्रहृष्टवित्रस्तविषण्णविस्मिता-
स्तथाऽपरे शोकसमन्विताऽभवन् ।
परे त्वदीयाश्च रणे विशांपते
यथायथेष्टं पृतना तंथा गता ॥ २
प्रविद्धवर्माभरणायुधाम्बरं
धनञ्जयेन प्रहतं महारथम् ।
निशाम्य कर्णं कुरवः प्रदुद्रुवु-
र्हतर्षभं केसरिणेव गोकुलम् ॥ ३
कृत्वा विमर्दं भृशमर्जुनेन
कर्णं हतं केसरिणेव नागम् ।
दृष्ट्वा शयानं युधि मद्रराज-
श्छिन्नध्वजेनापययौ रथेन ॥ ४
कर्णे हते पार्थभयात्प्रदुद्रुवु-
र्वैकर्तने धार्तराष्ट्राः सशल्याः ।
अवेक्षमाणा मुहुरर्जुनस्य
केतुं महान्तं यशसा ज्वलन्तम् ॥ ५
शल्यस्तु कर्णार्जुनयोर्विमर्दे
बलानि दृष्ट्वा मृदितध्वजानि ।
ययौ स तेनैव रथेन तूर्णं
हेलीकृतः सृञ्जयसोमकैश्च ॥ ६
निपातितस्यन्दनवाजिनागं
बलं च दृष्ट्वा हतसूतपुत्रम् ।
भीमस्तु भीमेन तदा स्वरेण
समुन्नदद्रोदसी कम्पयंश्च । ७
आस्फोटयन्नुत्पति वल्गते च
हते कर्णे त्रासयन्धार्तराष्ट्रान् ।
तदा राजन्सृञ्जयाः सोमकाश्च
शङ्खान्दध्मुः सस्वजुश्चापि सर्वे ॥ ८
परस्परं क्षत्रिया हृष्टरूपाः
सूतात्मजे वै निहते तदानीम् ।
दुर्योधनोऽश्रुप्रतिपूर्णनेत्रो
दीनो मुहुर्निश्वसन्नार्तरूपः ॥ ९
मद्राधिपश्चापि विमूढचेता-
स्तूर्णं ध्वजेनापहृतेन तेन ।
रथेन दुर्योधनमेत्य तूर्णं
पश्यन्मुदुःखात्तमुवाच राजन् ॥ १०
विशीर्णनागाश्वरथप्रवीरं
बलं त्वदीयं यमराष्ट्रकल्पम् ।
अन्योन्यमासाद्य हतैः शयानै-
र्नराश्वनागैर्गिरिकूटकल्पैः ॥ ११
नैतादृशं भारत युद्धमासी-
द्यथा हि कर्णार्जुनयोर्बभूव ।
ग्रस्तौ हि कर्णेन समेत्य कृष्णा-
वन्ये हि सर्वे तव शात्रवेयाः ॥ १२
दैवं तु यत्तत्स्ववशे प्रवृत्तं
तत्पाण्डवान्पाति निहन्ति चास्मान् ।
तवार्थसिद्ध्यर्थकरा हि सर्वे
प्रसह्य वीरा निहता द्विषद्भिः ॥ १३
कुबेरवैवस्वतवासवानां
तुल्यप्रभावा वरुणस्य चापि ।
वीर्येण शौर्येण पराक्रमेण
तैश्चापि युक्ता विमलैर्गुणौघैः ॥ १४
अवध्यकल्पा निहता नरेन्द्रा-
स्तवार्थकामा युधि पाण्डवेयैः ।
तन्मा शुचो भारत दिष्टमेत-
त्पर्यायसिद्धिर्न तु नित्यसिद्धिः ॥ १५
एतद्वचो मद्रपतेर्निशम्य
स्वं चाविनीतं मनसा विचिन्त्य ।
दुर्योधनोऽश्रुप्रतिपूर्णनेत्रो
मुहुर्मुहुर्निश्वसन्नार्तरूपः ॥ १६
*तँध्यानमूकं कृपणं भृशार्त-
मार्तायनिर्दीनमुवाच राजन् ।

प्रहृष्टाः अर्जुनादयः । वित्रस्ता भीरव । विषण्णाः शत्रवः । विस्मिता प्रेक्षका. ॥ २ ॥

* अत्र झ पाठे ६१ श्लोका अधिका दृश्यन्ते

[धृष्टराष्ट्र उवाच ।
तस्मिन्तु कर्णार्जुनयोर्विमर्दे
दग्धस्य रौद्रेऽहनि विद्रुतस्य ।
बभूव रूपं कुरुसृञ्जयानां
बलस्य बाणोन्मथितस्य कीदृक् ॥ १

पश्येदमुग्रैर्नरवाजिनागै-
रायोधनं वीर हतैः सुपूर्णम् ॥ १७
महीधराभैः पतितैश्च नागैः
सकृत्प्रयत्नैः शरभिन्नगात्रैः ।

सञ्जय उवाच ।
शृणु राजन्नवहितो यथा वृत्तो महाक्षयः ।
घोरो मनुष्यदेहानामाजौ च गजवाजिनाम् ॥ २
यत्र कर्णे हते पार्थः सिंहनादमथाकरोत् ।
तदा तव सुतान्राजन्नाविवेश महद्भयम् ॥ ३
न संधातुमनीकानि न चैवाशु पराक्रमे ।
आसीद्बुद्धिर्हते कर्णे तव योधस्य कर्हिचित् ॥ ४
वणिजो नावि भिन्नायामगाधे विप्लवे यथा ।
अपारे पारमिच्छन्तो हते द्वीपे किरीटिना ॥ ५
सूतपुत्रे हते राजन्वित्रस्ताः शस्त्रविक्षताः ।
अनाथा नाथमिच्छन्तो मृगाः सिंहैरिवार्दिताः ॥ ६
भग्नशृङ्गा वृषभ यद्वद्भग्नदंष्ट्रा इवोरगाः ।
प्रत्यपायाम सायाह्ने निर्जिताः सव्यसाचिना ॥ ७
हतप्रवीरा विध्वस्ता निकृत्ता निशितैः शरैः ।
सूतपुत्रे हते राजन्पुत्रास्ते दुद्रुवुर्भयात् ॥ ८
विस्रस्तयन्त्रकवचाः कांदिग्भूता विचेतसः ।
अन्योन्यमवमृद्नन्तो वीक्षमाणा भयार्दिताः ॥ ९
मामेव नूनं वीभत्सुर्मामेव च वृकोदरः ।
अभियातीति मन्वानाः पेतुर्मम्लुश्च संभ्रमात् ॥ १०
हयानन्ये गजानन्ये रथानन्ये महारथाः ।
आरुह्य जवसंपन्नाः पदातीन्प्रजहुर्भयात् ॥ ११
कुञ्जरैः स्यन्दनाः क्षुण्णाः सादिनश्च महारथैः ।
पदातिसङ्घाश्चाश्वौघैः पलायद्भिर्भयार्दितैः ॥ १२
व्यालतस्करसंकीर्णे सार्थहीना यथा वने ।
सूतपुत्रे हते राजंस्तव योधास्तथाऽभवन् ॥ १३
हतारोहा यथा नागाश्छिन्नहस्ता यथा नराः ।
सर्वे पार्थमयं लोकं संपश्यन्तो भयार्दिताः ॥ १४
संप्रेक्ष्य द्रवतः सर्वान्भीमसेनभयार्दितान् ।
दुर्योधनोऽथ स्वं सूतं हाहाकृत्वेदमब्रवीत् ॥ १५
नातिक्रमेच्च मां पार्थो धनुष्पाणिमवस्थितम् ।
जघने सर्वसैन्यानां शनैरश्वान्प्रचोदय ॥ १६
युध्यमानं हि कौन्तेयं हनिष्यामि न संशयः ।
नोत्सहेन्मामतिक्रान्तुं वेलामिव महोदधिः ॥ १७
अद्यार्जुनं सगोविन्दं मानिनं च वृकोदरम् ।
अन्याञ्शिष्टांस्तथा शत्रून्कर्णस्यानृण्यमाप्नुयाम् ॥ १८
तच्छ्रुत्वा कुरुराजस्य शूरार्यसदृशं वचः ।
सूतो हेमपरिच्छन्नाञ्शनैरश्वानचोदयत् ॥ १९
रथाश्वनागहीनास्तु पादातास्तव मारिष ।
पञ्चविंशतिसाहस्रा युद्धायैव व्यवस्थिताः ॥ २०
तान्भीमसेनः संक्रुद्धो धृष्टद्युम्नश्च पार्षतः ।
बलेन चतुरङ्गेण संवृत्याजघ्नतुः शरैः ॥ २१
प्रत्ययुध्यन्त समरे भीमसेनं सपार्षतम् ।
पार्थपार्षतयोश्चान्ये जगृहुस्तत्र नामनी ॥ २२
अक्रुध्यत रणे भीमस्तैस्तदा पर्यवस्थितैः ।
सोऽवतीर्य रथात्तूर्णं गदापाणिरयुध्यत ॥ २३
न तान्रथस्थो भूमिष्ठान्धर्मापेक्षी वृकोदरः ।
योधयामास कौन्तेयो भुजवीर्यव्यपाश्रयः ॥ २४
जातरूपपरिच्छन्नां प्रगृह्य महतीं गदाम् ।
अवधीत्तावकान्सर्वान्दण्डपाणिरिवान्तकः ॥ २५
पदातिनोऽपि संत्यक्त्वा प्रियं जीवितमात्मनः ।
भीममभ्यद्रवन्सङ्घे पतङ्गा ज्वलनं यथा ॥ २६
आसाद्य भीमसेनं तु संरब्धा युद्धदुर्मदाः ।
विनेशुः सहसा दृष्ट्वा भूतग्रामा इवान्तकम् ॥ २७
श्येनवद्विचरन्भीमो गदाहस्तो महाबलः ।
पञ्चविंशतिसाहस्रांस्तावकानवपोथयत् ॥ २८
हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः ।
धृष्टद्युम्नं पुरस्कृत्य तस्थौ तत्र महाबलः ॥ २९
धनञ्जयो रथानीकमभ्यवर्तत वीर्यवान् ।
माद्रीपुत्रौ तु शकुनिं सात्यकिश्च महारथः ।
जवेनाभ्यपतन्हृष्टा घ्नन्तो दौर्योधनं बलम् ॥ ३०
तस्याश्वसादीन्सुबहूंस्ते निहत्य शितैः शरैः ।
समभ्यधावंस्त्वरितास्तत्र युद्धमभून्महत् ॥ ३१
धनञ्जयोऽपि चाभ्येत्य रथानीकं तव प्रभो ।
विश्रुतं त्रिषु लोकेषु गाण्डीवं विक्षिपन्धनुः ॥ ३२
कृष्णसारथिमायान्तं दृष्ट्वा श्वेतहयं रथम् ।
अर्जुनं चापि योद्धारं त्वदीयाः प्राद्रवन्भयात् ॥ ३३
विप्रहीणरथाश्चैव शरैश्च परिकर्शिताः ।
पञ्चविंशतिसाहस्राः कालमार्छन्पदातयः ॥ ३४
हत्वा तान्पुरुषव्याघ्रः पाञ्चालानां महारथः ।
पुत्रः पाञ्चालराजस्य धृष्टद्युम्नो महामनाः ॥ ३५
भीमसेनं पुरस्कृत्य नचिरात्प्रत्यदृश्यत ।
महाधनुर्धरः श्रीमानमित्रगणतापनः ॥ ३६

प्रविद्धलङ्गिश्च गतासुभिश्च
प्रध्वस्तवर्मायुधसर्वयोधैः ॥ १८
वज्रापविद्धैरिव चाचलौघै-
र्विभिन्नपाषाणमृगद्रुमौघैः ।
प्रविद्धघण्टाङ्कुशतोमरध्वजैः
सहेमजालै रुधिरौघसंप्लवैः ॥ १९
शरावनुन्नैः पतितैस्तुरङ्गै-
स्तनद्भिरार्तैः क्षतजं वमद्भिः ।
दीनैस्रसद्भिः परिवृत्तनेत्रै-
र्मही पतद्भिः कृपणा बभूव ॥ २०
तथाऽपविद्धैर्गजवाजियूथै-
र्मन्दासुभिश्चापि गतासुभिश्च ।
रथैश्च नागैस्तुरगैश्च नुन्नै-
र्मही महावैतरणीव भाति ॥ २१
गजैर्निकृत्तापरहस्तगात्रै-
रुद्वेपमानैः पतितैः पृथिव्याम् ।

पारावतसवर्णाश्वं कोविदारमयध्वजम् ।
धृष्टद्युम्नं रणे दृष्ट्वा त्वदीयाः प्राद्रवन्भयात् ॥ ३७
गान्धारराजं शीघ्रास्त्रमनुसृत्य यशस्विनौ ।
नचिरात्प्रत्यदृश्येतां माद्रीपुत्रौ ससात्यकी ॥ ३८
चेकितानः शिखण्डी च द्रौपदेयाश्च मारिष ।
हत्वा त्वदीयं सुमहत्सैन्यं शङ्खांस्तथाऽधमन् ॥ ३९
ते सर्वे तावकान्प्रेक्ष्य द्रवतोऽपि पराङ्मुखान् ।
अभ्यवर्तन्त संरब्धान्वृषाञ्जित्वा यथा वृषाः ॥ ४०
सेनावशेषं तं दृष्ट्वा तव सैन्यस्य पाण्डवः ।
व्यवस्थितः सव्यसाची चुक्रोध बलवान्नृप ॥ ४१
धनञ्जयो रथानीकमभ्यवर्तत वीर्यवान् ।
विश्रुतं त्रिषु लोकेषु व्याक्षिपद्गाण्डिवं धनुः ॥ ४२
तत एनाञ्शरव्रातैः सहसा समवाकिरत् ।
तमसा संवृतेनाथ न स्म किंचिद्व्यदृश्यत ॥ ४३
अन्धकारीकृते लोके रजोभूते महीतले ।
योधाः सर्वे महाराज तावकाः प्राद्रवन्भयात् ॥ ४४
संभज्यमाने सैन्ये तु कुरुराजो विशांपते ।
परानभिमुखांश्चैव सुतस्ते समुपाद्रवत् ॥ ४५
ततो दुर्योधनः सर्वानाजुहावाथ पाण्डवान् ।
युद्धाय भरतश्रेष्ठ देवानिव पुरा बलिः ॥ ४६
त एनमभिगर्जन्तः सहिताः समुपाद्रवन् ।
नानाशस्त्रभृतः क्रुद्धा भर्त्सयन्तो मुहुर्मुहुः ॥ ४७
दुर्योधनोऽप्यसंभ्रान्तस्तान्रणे निशितैः शरैः ।
तत्रावधीत्ततः क्रुद्धः शतशोऽथ सहस्रशः ॥ ४८
तत्सैन्यं पाण्डवेयानां योधयामास सर्वतः ॥ ४९
तत्राद्भुतमपश्याम तव पुत्रस्य पौरुषम् ।
यदेकः सहितान्सर्वान्रणेऽयुध्यत पाण्डवान् ।
ततोऽपश्यन्महात्मा स स्वसैन्यं भृशदुःखितम् ॥५०

ततोऽवस्थाप्य राजेन्द्र कृतबुद्धिस्तवात्मजः ।
हर्षयन्निव तान्योधानिदं वचनमब्रवीत् ॥ ५१
न तं देशं प्रपश्यामि यत्र याता भयार्दिताः ।
गतानां यत्र वै मोक्षः पाण्डवार्कि गतेन वः ॥ ५२
अल्पं च बलमेतेषां कृष्णौ च भृशविक्षतौ ।
अद्य सर्वान्हनिष्यामि ध्रुवो हि विजयो भवेत् ॥ ५३
विप्रयातांस्तु वो भिन्नान्पाण्डवाः कृतकिल्बिषान् ।
अनुसृत्य वधिष्यन्ति श्रेयान्नः समरे वधः ॥ ५४
सुखं सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम् ।
मृतो दुःखं न जानीते प्रेत्य चानन्त्यमश्नुते ॥ ५५
शृणुध्वं क्षत्रियाः सर्वे यावन्तः स्थ समागताः ।
यदा शूरं च भीरुं च मारयत्यन्तको यमः ॥ ५६
को न मूढो न युध्येत मादृशः क्षत्रियव्रतः ।
द्विषतो भीमसेनस्य क्रुद्धस्य वशमेष्यथ ॥ ५७
पितामहैराचरितं न धर्मं हातुमर्हथ ।
न ह्यधर्मोऽस्ति पापीयान्क्षत्रियस्य पलायनात् ॥ ५८
न युद्धधर्माच्छ्रेयो हि पन्थाः स्वर्गस्य कौरवाः ।
अचिरेण हता लोकान्सद्यो योधाः समश्नुत ॥ ५९
सञ्जय उवाच ।
एवं ब्रुवति पुत्रे ते सैनिका भृशविक्षताः ।
अनवेक्ष्यैव तद्वाक्यं प्राद्रवन्सर्वतो दिशः ॥ ६०

अध्यायः ॥ ७ ॥

सञ्जय उवाच ।
दृष्ट्वा तु सैन्यं परिवृत्यमानं
पुत्रेण ते मद्रपतिस्तदानीम् ।
संत्रस्तरूपः परिमूढचेता
दुर्योधनं वाक्यमिदं बभाषे ॥] १

रथर्षभैर्नागवराश्वयोधैः
पदातिभिश्चाभिमुखैः परैर्हतैः ॥ २२
विशीर्णवर्माभरणाम्बरायुधै-
र्युता प्रशान्तैरिव पावकैर्महो ।
शरप्रहाराभिहतैर्महाबलै-
रवेक्षमाणैः पतितैः समन्ततः ॥ २३
प्रनष्टसंज्ञैः पुनराश्वसद्भि-
र्मही बभौ कुम्भगतैरिवाग्निभिः ।
रत्नैश्च्युतैर्भूरतिदीप्तिमद्भि-
र्नक्तं ग्रहैर्द्यौर्विमलैर्विभाति ॥ २४
शरास्तु कर्णार्जुनबाहुमुक्ता
विदार्य नागांश्च मनुष्यदेहान् ।
प्राणान्निरस्याशु महीं प्रतीयु-
र्महोरगा वासमिवाभिनम्राः ॥ २५
हतैर्मनुष्यैश्च गजैश्च सङ्ख्ये
शरावभिन्नै रुधिरप्रदिग्धैः ।
धनञ्जयस्याधिरथेश्च मार्गे
हतैरगम्या वसुधाऽतिदुर्गा ॥ २६
रथैर्महेषून्मथितैः सुकल्पितैः
सनागयोधाश्ववरायुधध्वजैः ।
विशीर्णयोक्त्रैर्विनिकीर्णबन्धनै-
र्निकृत्तचक्राक्षयुगत्रिवेणुभिः ॥ २७
विमुक्तयोक्त्रैश्च रथैरुपस्करैः
कृताभिषङ्गैर्विनिबद्धकूबरैः ।
प्रभग्ननीडैर्मणिहेमभूषितै-
र्वृता मही द्यौरिव शारदैर्घनैः ॥ २८
निकृष्यमाणा जवनैस्तुरङ्गमै-
र्हतेश्वरा राजरथाः सुकल्पिताः ।
मनुष्यमातङ्गरथाश्वसादिषु
द्रुतं व्रजन्तो बहुधा विघूर्णिताः ॥ २९
सहेमपृष्ठाः सपरश्वधायुधाः
शिताश्च शूला मुसलाः समुद्गराः ।
चित्राश्च खड्गा विमलाश्च कोशा
गजाश्च जाम्बूनदपट्टनद्धाः ॥ ३०
चापानि जाम्बूनदभूषितानि
शराश्च कार्तस्वरचित्रपुङ्खाः ।
ऋष्यश्च पीता विमलाश्च कोशाः
प्रासाश्च दण्डाः कनकप्रभासाः ॥ ३१
शुभ्राणि वालव्यजनानि शङ्खा-
श्छिन्नावरुद्धा विरुचः स्रजश्च ।
कुथाः पताकाम्बरवेष्टनानि
किरीटमाला मकुटाश्च शुभ्राः ॥ ३२
प्रकीर्णका विप्रतिकीर्णकाश्च
प्रधानमुख्यास्तरलाश्च हाराः ।
आपीडकेयूरवराङ्गदानि
ग्रैवेयनिष्काः ससुवर्णसूत्राः ॥ ३३
मण्युत्तमा वज्रसुवर्णयुक्ता
रत्नानि चोच्चावचमङ्गलानि ।
गात्राणि चाभान्ति सुखोचितानि
शिरांसि चेन्दुप्रतिमाननानि ॥ ३४
देहांश्च भोगांश्च परिच्छदांश्च
त्यक्त्वा मनोज्ञा निहताः सुखानि ।
स्वधर्मनिष्ठां महतीमवाप्य
प्राप्ताश्च लोकान्यशसा गतास्ते ॥ ३५
निवर्त दुर्योधन यान्तु सैनिका
व्रजस्व राजञ्छिबिराणि मानद ।
दिवाकरोऽप्येष विलम्बते प्रभो
पुनस्त्वमेवात्र नरेन्द्र कारणम् ॥ ३६

सञ्जय उवाच ।

एतावदुक्त्वा विरराम शल्यो
दुर्योधनं चैव निवर्तयित्वा ।
युद्धाय राजन्विनिविष्टबुद्धि-
र्हा कर्ण हा कर्ण इति ब्रुवाणम् ॥ ३७
तं द्रोणपुत्रप्रमुखा नरेन्द्राः
सर्वे समाश्वास्य ततः प्रजग्मुः ।
निरीक्षमाणा ध्वजमर्जुनस्य
रथं च दिव्यं यशसा ज्वलन्तम् ॥ ३८

नराश्वमातङ्गशरीरजेन
रक्तेन सिक्तां रुधिरेण भूमिम्।
रक्ताम्बरस्रक्तपनीययोगा-
न्नारीं प्रकाशामिव सर्वरम्याम्॥ ३९
प्रच्छन्नरूपां रुधिरेण राज-
न्रौद्रे मुहूर्तेऽतिविराजमाने।
नैवावतस्थुः कुरवः समीक्ष्य
प्रव्राजिता नरदेवा यथाऽक्षैः॥ ४०
वधेन कर्णस्य सुदुःखितास्ते
हा कर्ण हा कर्ण इति ब्रुवाणाः।
द्रुतं प्रजग्मुः शिबिराणि राज-
न्दिवाकरं रक्तमवेक्षमाणाः॥ ४१
गाण्डीवमुक्तैस्तु सुवर्णपुङ्खैः
शिलाशितैः शोणितदिग्धवाजैः।
शरैश्चिताङ्गोऽपि रराज कर्णो
हतोऽपि दीप्तांशुरिवांशुजालैः॥ ४२
कर्णस्य देहं रुधिराम्बुसिक्तं
पुत्रानुकम्पी भगवान्विवस्वान्।
स्पृष्ट्वा कराग्रैः क्षतजानुरूपैः
स्नातुं तदाऽगादपरं समुद्रम्॥ ४३
इतीव संचिन्त्य सुरर्षभाश्च
संप्रस्थितास्ते तु यथानिकेतम्।
संचिन्त्य सर्वा जनता विमस्तु-
र्यथासुखं खे च महीतले च॥ ४४
तदद्भुतं प्राणभृतां भयंकरं
निशाम्य युद्धं कुरुवीरमुख्ययोः।
समाचितौ कर्णशरैः परंतपौ
तथैव संरेजतुरच्युतार्जुनौ॥ ४५
तमो निहत्याभ्युदितौ यथाऽमलौ
शशाङ्कसूर्याविव रश्मिमालिनौ।
विहाय तान्बाणगणान्महाबलौ
सुहृद्धृतावप्रतिमानविक्रमौ॥ ४६
सुखप्रविष्टौ सुखदौ विरेजतुः
सदस्यचिन्त्याविव विष्णुवासवौ।
सदेवगन्धर्वमनुष्यचारणै-
र्महर्षिभिर्यक्षमहोरगैरपि।
जयाभिवृद्ध्या परयाऽभिपूजितौ
निहत्य कर्णं परमाहवे तदा॥ ४७
यथानुरूपं प्रतिपूज्य तानथ
प्रशस्यमानावतुलैश्च कर्मभिः।
ननन्दतुश्चैव सुहृद्भिरावृतौ
बलं निहत्येव सुरेशकेशवौ॥ ४८

॥ इति श्रीमन्महाभारते कर्णपर्वणि एकोनशततमोऽध्यायः॥ ९९॥

शततमोऽध्यायः॥ १००॥

कर्णवधानन्तरं कृष्णार्जुनयोर्युधिष्ठिरसमीपगमनम्॥ १॥

सञ्जय उवाच।
शरसंकृत्तवर्माणं रुधिरोक्षितवक्षसम्।
गतासुमपि राधेयं नैव लक्ष्मीर्विमुञ्चति॥ १
तप्तजाम्बूनदनिभं बालार्कसदृशद्युतिम्।
जीवन्तमिव तं शूरं सर्वभूतानि मेनिरे॥ २
हतस्यापि महाराज सूतपुत्रस्य संयुगे।
वित्रेसुः सर्वतो योधाः सिंहस्येवेतरे मृगाः॥ ३
हतोऽपि पुरुषव्याघ्रो व्याहरन्निव लक्ष्यते।
नाभवद्विकृतिः काचिन्मृतस्यापि महात्मनः॥ ४
चारुवेषधरं राजंश्चारुमौलिशिरोधरम्।
तन्मुखं सूतपुत्रस्य पूर्णचन्द्रसमद्युति॥ ५
कनकोत्तमसंकाशो ज्वलन्निव विभावसुः।
स शान्तः पुरुषव्याघ्रः पार्थसायकवारिणा॥ ६
यथाऽग्निर्ज्वलनो दीप्तो जलमासाद्य शाम्यति।

कर्णाग्निः समरे तद्वत्पार्थमेघेन शामितः ॥ ७
आहृत्य स यशो दीप्तं सुयुद्धेनात्मनो भुवि ।
सपुत्रः समरे कर्णः प्रशान्तः पार्थतेजसा ॥ ८
प्रताप्य पाण्डवान्सर्वान्पाञ्चालानस्त्रतेजसा ।
नानाभरणवान्राजंस्तप्तजाम्बूनदप्रभः ॥ ९
वर्षित्वा शरवर्षाणि प्रताप्य रिपुवाहिनीम् ।
श्रीमानिव सहस्रांशुर्ज्वलन्सर्वान्प्रताप्य च ।
हतो वैकर्तनः कर्णः पादपोऽङ्कुरवानिव ॥ १०
ददानीत्येव यः प्रादान्न नास्तीत्यर्थितोऽवदत् ।
सद्यः सदा सत्पुरुषः स हतो द्वैरथे वृषा ॥ ११
यस्य ब्राह्मणसात्सर्वं वित्तमासीन्महात्मनः ।
नादेयं ब्राह्मणेष्वासीद्यस्य स्वमपि जीवितम् ॥१२
स दातृणां प्रियो राजन्दाता चैव मनोरथान् ।
स पार्थास्त्रविनिर्दग्धो गतः परमिकां गतिम् ॥१३
यमाश्रित्याकरोद्वैरं सुतस्ते स गतो दिवम् ।
आदाय तव पुत्राणां जयाशां शर्म वर्म च ॥१४
हते च कर्णे सरितो न सस्रु-
र्जगाम चास्तं कलुषो दिवाकरः ।
श्वेतो ग्रहश्च ज्वलितार्कवर्णो
यमस्य पुत्रोऽभ्युदितः स तिर्यक् ॥ १५
नभश्चचालाथ ननाद चोर्वी
ववुश्च वाताः परुषाश्च घोराः ।
दिशो बभूवुर्ज्वलिताः सधूमा
महार्णवाः सस्वनुश्चुक्षुभुश्च ॥ १६
सकाननाश्चाद्रिवराश्चकम्पिरे
प्रविव्यथुर्भूतगणाश्च मारिष ।
बृहस्पतिः संपरिवार्य रोहिणीं
बभूव चन्द्रार्कसमो विशांपते ॥ १७
हते कर्णे न दिशो विप्रचाराः
सचन्द्रार्का द्यौर्विचचाल भूमिः ।
पपात चोल्का ज्वलनप्रभा च
निशाचरा हृष्टतरा बभूवुः ॥ १८

शशिप्रकाशाननमर्जुनो यदा
जहार कर्णस्य शिरः शरेण ।
ततोऽन्तरिक्षे सहसैव शब्दो
बभूव हाहेति सुरैर्विमुक्तः ॥ १९
सदेवगन्धर्वमनुष्यपूजितं
निहत्य कर्णं रिपुमाहवेऽर्जुनः ।
रराज राजन्परमेण तेजसा
यथा पुरा वृत्रवधे शतक्रतुः ॥ २०
पताकिना भीमनिनादकेतुना
रथेन शङ्खस्फटिकावभासिना ।
महेन्द्रवाहप्रतिमेन तावुभौ
महेन्द्रवीर्यप्रतिमानपौरुषौ ॥ २१
सुवर्णमुक्तामणिवज्रविद्रुमै-
रलंकृतेनाप्रतिमेन रंहसा ।
नरोत्तमौ यादवपाण्डुनन्दनौ
दिवाकरौ दीप्तहुताशनाविव ।
रणाजिरे वीतभयौ विरेजतुः
समानयोगाविव विष्णुवासवौ ॥ २२
ततो धनुर्ज्यातलनेमिनिस्वनैः
प्रसह्य कृत्वा च रिपून्गतप्रभान् ।
स साधयित्वा च रिपूञ्शरौघैः
कपिध्वजः पक्षिवरध्वजश्च ।
प्रदध्मतुः शङ्खवरौ सुघोषौ
मनांस्यरीणामुपतापयन्तौ ॥ २३
सुवर्णजालावततौ महास्वनौ
हिमावदातौ परिगृह्य पाणिभिः ।
चुचुम्बतुः शङ्खवरौ नृणां वरौ
विघोषयन्तौ विजयं जगत्त्रये ॥ २४
पाञ्चजन्यस्य निर्घोषो देवदत्तस्य चोभयोः ।
पृथिवीमन्तरिक्षं च दिशश्च समपूरयत् ॥ २५
वित्रस्ताश्चाभवन्सर्वे कुरवो राजसत्तम ।
शूरयोः शङ्खशब्देन माधवस्यार्जुनस्य च ॥ २६

सदा स्त्रीणा प्रिय इति झ. पाठः ॥ १३ ॥०

शततमोऽध्याय. ॥ १०० ॥

तौ शङ्खशब्देन निनादयन्तौ
वनानि शैलान्सरितो गुहाश्च ।
वित्रासयन्तौ तव पुत्रसेनां
युधिष्ठिरं नन्दयितुं प्रयातौ ॥ २७
ततः प्रजग्मुः कुरवो जवेन
श्रुत्वैव शङ्खस्वनमीर्यमाणम् ।
विहाय मद्राधिपतिं पतिं च
दुर्योधनं भारत भारतानाम् ॥ २८
ततो रथेनाम्बुदवृन्दनादिना
शरघ्नहर्म्यदिवाकरत्विषा ।
धनञ्जयस्याधिरथेश्च विस्मिताः
प्रशंसमानाः प्रययुस्तदाऽर्जुनम् ॥ २९
महाहवे तं बहुशोभमानं
धनञ्जयं योधगणैः समेताः ।
तावन्वमोदंश्च जनाः प्रकामं
प्रभाकरावभ्युदितौ यथैव ॥ ३०

॥ इति श्रीमन्महाभारते कर्णपर्वणि शततमोऽध्यायः ॥ १०० ॥

एकाधिकशततमोऽध्यायः ॥ १०१ ॥

कर्णवधानन्तरमर्जुनेन युधिष्ठिराभिवादनम् ॥ १ ॥ तेन कृष्णार्जुनप्रशंसनम् ॥ २ ॥ कृष्णयुधिष्ठिरसंवादः ॥ ३ ॥

सञ्जय उवाच ।
हते वैकर्तने कर्णे कुरवो भयपीडिताः ।
वीक्षमाणा दिशः सर्वाः पलायन्त सहस्रशः ॥ १
रावणं निहतं दृष्ट्वा राक्षसा राघवेण वा ।
दिशो भीता द्रवन्त्येव तावका भयपीडिताः ॥ २
ततो महारवं चक्रुर्योधा राजन्समन्ततः ।
वार्यमाणा भृशोद्विग्नास्तव पुत्रेण भारत ॥ ३
तेषां तु मतमाज्ञाय पुत्रस्ते भरतर्षभ ।
अवहारं ततश्चक्रे शल्यस्यानुमतेन च ॥ ४
कृतवर्मा रणे तूर्णं वृतो भारत तावकैः ।
नारायणावशिष्टैश्च शिबिरायैव दुद्रुवे ॥ ५
अश्वत्थामा ततः शूरो विनिश्वस्य मुहुर्मुहुः ।
पाण्डवानां जयं दृष्ट्वा शिबिरायैव दुद्रुवे ॥ ६
कृपः शारद्वतो राजन्नागानीकेन भारत ।
महता मेघकल्पेन शिबिरायैव दुद्रुवे ॥ ७
गान्धाराणां सहस्रेण शकुनिः परिवारितः ।
सुशर्मा च ययौ राजन्वीक्षमाणो भयार्दितः ॥ ८
दुर्योधनोऽपि स ययौ हृतसर्वस्व आतुरः ।
ज्ञातिशोकसमापन्नश्चिन्तयित्वा मुहुर्मुहुः ॥ ९
छिन्नध्वजेन शल्यस्तु रथेन रथिनां वरः ।
प्रययौ शिबिरायैव वीक्षमाणो दिशो दश ॥ १०
ततोऽपरे सुबहुशो भारतानां महारथाः ।
व्यद्रवन्त दिशो भीता भयविह्वलचेतसः ॥ ११
अश्रुपूर्णा भयोद्विग्ना वेपमाना भयातुराः ।
कुरवः प्राद्रवन्सर्वे दृष्ट्वा कर्णं निपातितम् ॥ १२
प्रशंसन्तोऽर्जुनं केचित्केचित्कर्णं महारथाः ।
प्राद्रवन्त रणे भीताः कुरवः कुरुसत्तम ॥ १३
तेषां योधसहस्राणां तावकानां महामृधे ।
नासीत्तत्र पुमान्कश्चिद्यस्तु युद्धे मनो दधे ॥ १४
कर्णे हते महाराज निराशाः कुरवोऽभवन् ।
जीवनेषु च राज्येषु दारेषु च धनेषु च ॥ १५
तान्समानीय पुत्रस्ते यत्नेन महता विभो ।
निवेशाय मनो दध्रे दुःखशोकसमन्वितः ॥ १६
तस्याज्ञां शिरसा दीनाः प्रतिगृह्य विशांपते ।
विषण्णमनसो भीत्या न्यविशन्त महारथाः ॥ १७
चिन्तयन्तो वधं घोरं सूतपुत्रस्य संयुगे ।
अर्जुनस्य जयं युद्धे चिन्तयानाः पुनःपुनः ॥ १८
पाण्डवाश्च महेष्वासा न्यविशन्त परंतपाः ।
प्रहृष्टमनसः सर्वे जित्वा शत्रुं महारथाः ॥ १९
ततो युधिष्ठिरं तत्र निविष्टं वै मुदान्वितम् ।
समेत्य सर्वे पाञ्चाला वर्धयन्तो यथाविधि ॥ २०
अर्जुनस्तु रथात्तूर्णमवरुह्य महायशाः ।

धर्मराजस्य चरणौ पीडयामास हृष्टवत् ॥ २१
तमुत्थाप्य महाराज धर्मपुत्रः प्रतापवान् ।
सस्वजे भरतश्रेष्ठमुपजिघ्रन्मुपस्पृशन् ॥ २२
नकुलः सहदेवश्च पाण्डवश्च वृकोदरः ।
अभिवाद्य महाराजमस्वजन्त स्म फल्गुनम् ॥ २३
धृष्टद्युम्नः शिखण्डी च पाण्डवानां च ये रथाः ।
वर्धयन्ते स्म राजानं निहते सूतनन्दने ॥ २४
ततः कृष्णो महाराज सात्यकिश्चापि सात्वतः ।
वर्धयन्ते स्म राजानं निहते सूतनन्दने ॥ २५
वासुदेवश्च कौन्तेयं प्रणयादिदमब्रवीत् ।
अद्य राजन्हताः सर्वे धार्तराष्ट्राः सराजकाः ।
हते वैकर्तने कर्णे रथानां प्रवरे रथे ॥ २६
यदि लोकास्त्रयः सर्वे योधयेयुः सवासवाः ।
तथापि दुर्जयः सूतस्तव कोपात्तु सूदितः ॥ २७
एवमुक्तः प्रत्युवाच धर्मराजो जनार्दनम् ॥ २८
तव प्रसादाद्गोविन्द हतः कर्णो महायशाः ।
पाण्डवाश्च जयं प्राप्ता नाशिताश्चापि शत्रवः ॥ २९
त्वं हि शक्तो भयात्त्रातुं यस्य कस्यचिदाहवे ।
त्वमस्य जगतो गोप्ता पाण्डवानां च सर्वदा ॥ ३०
त्वां समासाद्य शक्रोऽपि मोदते दिवि नित्यशः ।
त्वं पाता पाण्डुपुत्राणां यथैव जगतस्तथा ॥ ३१
अनाथ्यों जयस्तेषां भक्तिर्येषां त्वयि प्रभो ॥ ३२
त्वया नाथेन गोविन्द नाथवन्तो वयं युधि ।
यथेन्द्रेण पुरा देवास्त्वया चापि जनार्दन ॥ ३३
स्वप्स्याम्यद्य सुखं कृष्ण निद्रां लप्स्ये त्वहं क्षपाम् ।
विगतं हि भयं मेऽद्य त्वत्प्रसादान्न संशयः ॥ ३४
एवमुक्तस्तु पार्थेन केशवः प्राह पाण्डवम् ।
निमित्तमात्रं हि वयं तवाप्यस्मिन्मुदागमे ॥ ३५
यस्य ते भ्रातरः शूरा भीमसेनादयो नृप ।
संबन्धिनश्चेन्द्रवीर्याः पार्षतप्रमुखास्तथा ॥ ३६
अर्हते च भवान्नित्यं प्रियं नित्यं च मद्धितम् ।
प्रियो हि मे त्वमेतेन वचनेन नरोत्तम ॥ ३७
इत्युक्तो धर्मराजस्तु स्वरथं हेमभूषितम् ।
दन्तवर्णैर्हयैर्युक्तं कालवालैर्महीपतिः ॥ ३८
आस्थाय पुरुषव्याघ्रः स्वबलेनापि संवृतः ।
प्रययौ बहुवृत्तान्तं द्रष्टुमायोधनं प्रति ॥ ३९
संभाषमाणौ तौ वीर उभौ माधवपाण्डवौ ॥ ४०
स ददर्श रणे कर्णं शयानं पुरुषर्षभम् ।
गाण्डीवमुक्तैर्विशिखैः सर्वतः संनिपीडितम् ॥ ४१
सपुत्रं निहतं दृष्ट्वा कर्णं राजा युधिष्ठिरः ।
प्रशशंस नरव्याघ्रावुभौ माधवपाण्डवौ ॥ ४२
अद्य राजाऽस्मि सर्वस्यां पृथिव्यां मधुसूदन ।
दिष्ट्या जयसि गोविन्द दिष्ट्या शत्रुर्निपातितः ४३
एवं सुबहुशो राजन्प्रशशंस जनार्दनम् ।
अर्जुनं च कुरुश्रेष्ठो धर्मराजो युधिष्ठिरः ॥ ४४
दृष्ट्वा च निहतं कर्णं सपुत्रं पार्थसायकैः ।
पुनर्जातमिवात्मानं मेने कुरुकुलोद्वहः ॥ ४५
समेत्य च कुरुश्रेष्ठं कुन्तीपुत्रं युधिष्ठिरम् ।
वर्धयन्ति स्म राजानो हर्षयुक्ता महारथाः ॥ ४६
सञ्जय उवाच ।
एवमेष क्षयो वृत्तः सुमहान्रोमहर्षणः ।
तव दुर्मन्त्रिते राजन्दिष्ट्या त्वमनुशोचसि ॥ ४७
वैशंपायन उवाच ।
श्रुत्वैतदप्रियं राजा धृतराष्ट्रो महीपतिः ।
पपात भूमौ निश्चेष्टः कौरव्यः परमासनात् ।
तथा सत्यव्रता देवी गान्धारी दिव्यदर्शना ॥ ४८
ततस्तूर्णं तु विदुरस्तं नृपं सञ्जयस्तथा ।
पर्याश्वासयतां चैतावुभावेव तु भूमिपम् ॥ ४९
तथैवाश्वासयामासुर्गान्धारीं कुरुयोषितः ॥ ५०
स दैवं परमं मेने भवितव्यं च भारत ।
ताभ्यामाश्वासितो राजा तूष्णीमास्ते विशांपते ५१
एवमाख्याय राज्ञे च सञ्जयो राजसत्तम ।
जगाम शिबिरं भूयो हते कर्णे महात्मनि ॥ ५२
स दृष्ट्वा निहतं शल्यं राजानं च सुयोधनम् ।
शकुनिं सुबहून्राजन्सैनिकांश्च सहस्रशः ॥ ५३
तथैव पाण्डवीं सेनां निहतां प्रेक्ष्य सञ्जयः ।
सौप्तिके द्रौणिना राजन्हतवाजिनरद्विपाम् ॥ ५४

स हि दृष्ट्वा हतान्सर्वान्समन्ताद्युधि सञ्जयः।
प्रयातो हास्तिनपुरं शोकार्तो भयविह्वलः॥ ५५
हतेषु पुनरेतेषु प्रभूतगजवाजिषु।
योधैश्च तैर्महाराज नानादेशसमुद्भवैः॥ ५६
कुरुक्षेत्रं तु तत्सर्वं शून्यमासीद्विशांपते।
निहतैः पाण्डवेयैश्च धार्तराष्ट्रैश्च संयुगे॥ ५७
यथाहि विषयं वृत्तं धार्तराष्ट्रस्य संजयः।
निवेदयति तत्सर्वं यथावृत्तं यथाविधि॥ ५८
एवं महायुद्धमिदं महात्मनो
धनञ्जयस्याधिरथेश्च यः पठेत्।
स सम्यगिष्टस्य मखस्य यत्फलं
तदाप्नुयाद्यः शृणुयाच्च नित्यशः॥ ५९
मखो हि विष्णुर्भगवान्सनातनो
वहन्ति यं चाप्यनिलेन्दुभानवः।
अतोऽनमूयुः शृणुयात्पठेच्च यः
स सर्वलोकांश्च जयेत्सुखी भवेत्॥ ६०

॥ इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि एकाधिकशततमोऽध्यायः॥ १०१॥

॥ कर्णपर्व समाप्तम्॥ ८॥

अतः परं शल्यपर्व भविष्यति।
तस्यायमाद्यः श्लोकः॥

जनमेजय उवाच।

एवं निपातिते कर्णे समरे सव्यसाचिना।
अल्पावशिष्टाः कुरवः किमकुर्वत वै द्विज॥ १

इदं कर्णपर्व कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च मुंबय्यां.
निर्णयसागरमुद्रायन्त्रे मुद्रापितम्। शकाब्दाः १८२९ सन १९०७.

SRIMANMAHABHARATAM

A NEW EDITION

MAINLY BASED ON

THE SOUTH INDIAN TEXTS,

With footnotes and Readings.

SHALYAPARVA IX.



EDITED BY

R. KRISHNACHARYA & T. R. VYASACHARYA,

Proprietors, Madhva Vilas Book Depot, Kumbakonam.



PRINTED AT THE

Javaji Dadaji's "Nirnaya-sagar" Press,

BOMBAY.

1907.

(*Registered according to the Act XXV of 1867.*)

[All rights reserved by the publisher.]

॥ श्रीः ॥

श्रीमन्महाभारतम् ।

सटिप्पणम् ।



शल्यपर्व ९.

एतच्च

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च

अनेकेषां विदुषां साहाय्येन दाक्षिणात्यबहुकोशानुसारेण

संशोध्य


मुंबापुर्यां

जावजी दादाजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८२९ प्लवंगनामसंवत्सरे ।

इदं पुस्तकं १८६७ संख्याकराजनियमस्य २५ संख्याकविभागानुसारतो लेखारूढ

कृत्वास्य सर्वेऽधिकारा प्रसिद्धिकर्त्रा स्वाधीना रक्षिताः ।


कौरव सेना
पांडव सेना
युद्धम
शल्य.
धर्मराज

श्रीः ।

श्रीमन्महाभारतम् ।



शल्यपर्व ९ ।

(अथ शल्यवधपर्व ॥ १ ॥)

प्रथमोऽध्यायः ॥ १ ॥

दुर्योधनेन शल्यस्य सैनापत्येऽभिषेचनपूर्वकं पुनर्युद्धाय निर्याणम् ॥ १ ॥ सञ्जयाच्छल्यदुर्योधनादिवधश्रवणेन मूर्च्छितस्य धृतराष्ट्रस्य विदुरेण समाश्वासनम् ॥ २ ॥

॥ श्रीवेदव्यासाय नमः ॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं (व्यासं) चैव ततो जयमुदीरयेत् ॥ १

जनमेजय उवाच ।

एवं निपातिते कर्णे समरे सव्यसाचिना ।
अल्पावशिष्टाः कुरवः किमकुर्वत वै द्विज ॥ १
विदीर्यमाणं च बलं दृष्ट्वा राजा सुयोधनः ।
पाण्डवैः प्राप्तकालं च किं प्रापद्यत कौरवः ॥ २
एतदिच्छाम्यहं श्रोतुं तदाचक्ष्व द्विजोत्तम ।
न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत् ॥ ३

वैशंपायन उवाच ।

ततः कर्णे हते राजन्धार्तराष्ट्रः सुयोधनः ।
भृशं शोकार्णवे मग्नो निराशः सर्वतोऽभवत् ॥ ४
हा कर्ण हा कर्ण इति शोचमानो मुहुर्मुहुः ।
कृच्छ्रात्स्वशिबिरं प्रायाद्धतशिष्टैर्नृपैः सह ॥ ५
स समाश्वास्यमानोऽपि हेतुभिः शास्त्रनिश्चितैः ।
राजन्विभूतिमिच्छद्भिः सूतपुत्रमनुस्मरन् ॥ ६
स दैवं बलवन्मत्वा प्रभाते विमले सति ।
सङ्ग्रामे निश्चयं कृत्वा पुनर्युद्धाय निर्ययौ ॥ ७
शल्यं सेनापतिं कृत्वा विधिवद्राजसत्तमम् ।
रणाय निर्ययौ राजा हतशिष्टैर्नृपैः सह ॥ ८
ततः सुतुमुलं युद्धं कुरुपाण्डवसेनयोः ।
बभूव भरतश्रेष्ठ देवासुररणोपमम् ॥ ९
ततः शल्यो महाराज कृत्वा कदनमाहवे ।
पाण्डुसैन्येऽथ मध्याह्ने धर्मराजेन पातितः ॥ १०
ततो दुर्योधनो राजा हतबन्धू रणाजिरात् ।
अपसृत्य ह्रदं घोरं विवेश रिपुजाद्भयात् ॥ ११
अथापराह्णे तस्याह्नः परिवार्य महारथैः ।
ह्रदादाहूय युद्धाय भीमसेनेन पातितः ॥ १२
तस्मिंस्तु निहते वीरे महेष्वासास्त्रयो रणे ।
कृतवर्मा कृपो द्रौणिर्जघ्नुः पाण्डवसैनिकान् ॥ १३
ततः पूर्वाह्णसमये शिबिरादेत्य सञ्जयः ।
प्रविवेश पुरीं दीनो दुःखशोकसमन्वितः ॥ १४
स प्रविश्य पुरीं सूतो भुजावुच्छ्रित्य दुःखितः ।
वेपमानस्ततो राज्ञः प्रविवेश निवेशनम् ॥ १५
धावतश्चाप्यपश्यत्स तत्रत्यान्पुरुषर्षभान् ।
नष्टचित्तानिवोन्मत्ताञ्शोकेन भृशदुःखितान् १६
दृष्ट्वैव च नराञ्शीघ्रं व्याजहारातिदुःखितः ।
अहो बत विपन्नोऽस्मि निधनेन महात्मनः ॥ १७
अहो सुबलवान्कालो गतिश्च परमा तथा ।
शुक्रतुल्यबलाः सर्वे यत्राहन्यन्त पार्थिवाः ॥ १८

अपराह्णे अपरार्धे ॥ १२ ॥

तं दृष्ट्वैव पुरे राजञ्जनः सर्वः स सञ्जयम् ।
प्ररुरोद भयोद्विग्नो हा राजन्निति सुस्वरम् ॥ १९
आकुमारं नरव्याघ्र तत्पुरं वै समन्ततः ।
आर्तनादं महच्चक्रे श्रुत्वा विनिहतं नृपम् ॥ २०
तथा स विह्वलः सूतः प्रविश्य नृपतिक्षयम् ।
ददर्श नृपतिश्रेष्ठं प्रज्ञाचक्षुषमीश्वरम् ॥ २१
दृष्ट्वा चासीनमनघं समन्तात्परिवारितम् ।
स्नुषाभिर्भरतश्रेष्ठ गान्धार्या विदुरेण च ।
तथाऽन्यैश्च सुहृद्भिश्च ज्ञातिभिश्च हितैषिभिः॥२२
तमेव चार्थं ध्यायन्तं कर्णस्य निधनं प्रति ।
रुदन्नेवाब्रवीद्वाक्यं राजानं जनमेजय ॥ २३
नातिहृष्टमनाः सूतो बाष्पसंदिग्धया गिरा ।
सञ्जयोऽहं नरव्याघ्र नमस्ते भरतर्षभ ॥ २४
मद्राधिपो हतः शल्यः शकुनिः सौबलस्तथा ।
उलूकः पुरुषव्याघ्र कैतव्यो दृढविक्रमः ॥ २५
संशप्तका हताः सर्वे काम्भोजाश्च शकैः सह ।
म्लेच्छाश्च पार्वतीयाश्च यवनाश्च निपातिताः॥२६
प्राच्या हता महाराज दाक्षिणात्याश्च सर्वशः ।
उदीच्याश्च हताः सर्वे प्रतीच्याश्च नरोत्तमाः ।
राजानो राजपुत्राश्च सर्वे विनिहता नृप ॥ २७
कर्णपुत्रो हतः शूरः सत्यसेनो महाबलः ॥ २८
दुर्योधनो हतो राजा यथोक्तं पाण्डवेन ह ।
भग्नसक्थो महाराज शेते पांसुषु रूषितः ॥ २९
धृष्टद्युम्नो हतो राजञ्शिखण्डी चापराजितः ।
उत्तमौजा युधामन्युस्तथा सर्वे प्रभद्रकाः ॥ ३०
पाञ्चालश्च नरव्याघ्र चेदयश्च निषूदिताः ।
तव पुत्रा हताः सर्वे द्रौपदेयाश्च भारत ॥ ३१
नरा विनिहताः सर्वे गजाश्च विनिपातिताः ।
रथिनश्च नरव्याघ्र हयाश्च निहता युधि ॥ ३२
निःशेषं शिबिरं राजंस्तावकानां कृतं प्रभो ।
पाण्डवानां च शूराणां समासाद्य परस्परम्॥३३
प्रायः स्त्रीशेषमभवज्जगत्कालेन मोहितम् ।
सप्त पाण्डवतः शिष्टा धार्तराष्ट्रास्त्रयो रथाः॥३४
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः ।
कृपश्च कृतवर्मा च द्रौणिश्च जयतां वरः ॥ ३५
एते शेषा महाराज रथिनो नृपसत्तम ।
अक्षौहिणीनामष्टानां दशानां च न संशयः॥३६
एते शेषा महाराज सर्वेऽन्ये निधनं गताः ।
कालेन निहतं सर्वं जगद्वै भरतर्षभ ।
दुर्योधनं वै पुरतः कृत्वा सर्वे नरा हताः ॥ ३७
वैशंपायन उवाच ।
एतच्छ्रुत्वा वचः क्रूरं धृतराष्ट्रो जनेश्वरः ।
निपपात स राजेन्द्रो गतसत्वो महीतले ॥ ३८
तस्मिन्निपतिते वीरे विदुरोऽपि महायशाः ।
निपपात महाराज शोकव्यसनकर्शितः ॥ ३९
गान्धारी च महाभागा सर्वाश्च कुरुयोषितः ।
पतिताः सहसा भूमौ श्रुत्वा घोरतरं वचः ॥४०
निःसंज्ञं पतितं भूमौ तदाऽऽसीद्राजमण्डलम् ।
विलापमुक्तोपहतं चित्रं न्यस्तं पटे यथा ॥ ४१
कृच्छ्रेण तु ततो राजा धृतराष्ट्रो महीपतिः ।
शनैरलभत प्राणान्पुत्रव्यसनकर्शितः ॥ ४२
लब्ध्वा तु स नृपः प्राणान्वेपमानः सुदुःखितः ।
निरीक्ष्य च दिशः सर्वाः क्षत्तारं वाक्यमब्रवीत् ४३
विद्धि क्षत्तर्महाप्राज्ञ त्वं गतिर्भरतर्षभ ।
ममानाथस्य सुभृशं पुत्रैर्हीनस्य सर्वशः ।
एवमुक्त्वा ततो भूयो विसंज्ञो निपपात ह ॥ ४४
तं तथा पतितं दृष्ट्वा बान्धवा येऽस्य केचन ।
शीतैस्ते सिषिचुस्तोयैर्विव्यजुर्व्यजनैरपि ॥ ४५
स तु दीर्घेण कालेन प्रत्याश्वस्तो नराधिपः ।
तूष्णीमासीन्महीपालः पुत्रव्यसनकर्शितः ॥ ४६
निःश्वसञ्जिह्मग इव कुम्भक्षिप्तोऽभवन्नृपः ॥ ४७
सञ्जयोऽप्यरुदत्तत्र दृष्ट्वा राजानमातुरम् ।
तथा सर्वाः स्त्रियश्चैव गान्धारी च यशस्विनी ॥ ४८
ततो दीर्घेण कालेन विदुरं वाक्यमब्रवीत् ।
धृतराष्ट्रो नरश्रेष्ठ मुह्यमानो मुहुर्मुहुः ॥ ४९
गच्छन्तु योषितः सर्वा गान्धारी च यशस्विनी ।

विलापयुक्तोपहत इति ङ. पाठः । विलापयुक्त सुमहत् इति घ पाठः ॥ ४१ ॥ प्रथमोऽध्याय ॥ १ ॥

तथेमे सुहृदः सर्वे मुह्यते मे मनो भृशम् ॥ ५०
एवमुक्तस्ततः क्षत्ता ताः स्त्रियो भरतर्षभ ।
विसर्जयामास शनैर्मुह्यमानः पुनःपुनः ॥ ५१
निश्चक्रमुस्ततः सर्वाः स्त्रियो भरतसत्तम ।
सुहृदश्च तथा सर्वे दृष्ट्वा राजानमातुरम् ॥ ५२
ततो नरपतिस्तत्र लब्ध्वा संज्ञां परंतपः ।
गतिर्मे को भवेदद्य इति चिन्तासमाकुलः ।
अपृच्छत्सञ्जयं तत्र रोदमानं भृशातुरम् ॥ ५३
प्राञ्जलिं सञ्जयं दृष्ट्वा रोदमानं मुहुर्मुहुः ।
ज्ञातीन्स्त्रियोऽथ निर्याप्य प्रविश्य विदुरः पुनः ५४
राजानं शोचमानस्तु तं शोचन्तं मुहुर्मुहुः ।
समाश्वासयत क्षत्ता वचसा मधुरेण च ॥ ५५

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ॥ २ ॥

धृतराष्ट्रेण सञ्जयस्य पुरतो दुर्योधनवचनानुस्मरणेन विलापः ॥ १ ॥

वैशंपायन उवाच ।
विसृष्टास्त्वथ नारीषु धृतराष्ट्रोऽम्बिकासुतः ।
विललाप महाराज दुःखाद्दुःखतरं गतः ॥ १
सधूममिव निःश्वस्य करौ धुन्वन्पुनःपुनः ।
बहु संचिन्तयित्वा तु सञ्जयं वाक्यमब्रवीत् ॥ २
धृतराष्ट्र उवाच ।
अहो बत महद्दुःखं यदहं पाण्डवान्रणे ।
क्षेमिणश्चाव्ययांश्चैव त्वत्तः सूत शृणोमि वै ॥ ३
वज्रसारमयं नूनं हृदयं सुदृढं मम ।
यच्छ्रुत्वा निहतान्पुत्रान्दीर्यते न सहस्रधा ॥ ४
चिन्तयित्वा वचस्तेषां बालक्रीडां च सञ्जय ।
अद्य चैव हताञ्श्रुत्वा दीर्यते मे भृशं मनः ॥ ५
अन्धत्वाद्यदि पुत्राणां न मे रूपनिदर्शनम् ।
पुत्रस्नेहकृता प्रीतिर्नित्यमेतेषु धारिता ॥ ६
बालभावमतिक्रम्य यौवनस्थांश्च तानहम् ।
श्रियं प्राप्तांश्च ताञ्श्रुत्वा हृष्ट आसं तदाऽनघ ॥ ७
तानद्य निहताञ्श्रुत्वा हतैश्वर्यान्हतौजसः ।
न लभेयं क्वचिच्छान्तिं पुत्राधिभिरभिप्लुतः ॥ ८
एह्येहि वत्स राजेन्द्र ममानाथस्य पुत्रक ।
त्वया हीनो महाबाहो कां नु यास्याम्यहं गतिम् ९
कथं त्वं पृथिवीपालांस्त्यक्त्वा तात समागतान् ।
शेषे विनिहतो भूमौ प्राकृतः कुनृपो यथा ॥ १०
गतिर्भूत्वा महाराज ज्ञातीनां सुहृदां तथा ।
अन्धं वृद्धं च मां वीर विहाय क्व नु यास्यसि ॥ ११
सा कृपा सा च ते प्रीतिः सा च राजसु मानिता ।
कथं त्वं निहतः पार्थैः संयुगेष्वपराजितः ॥ १२
को नु मामुत्थितः काले तातेति वक्ष्यति ।
महाराजेति सततं लोकनाथेति चासकृत् ॥ १३
परिष्वज्य च कं कण्ठे स्नेहेन क्लिन्नलोचनः ।
अनुशास्ताऽस्मि कौरव्य तत्साधु वद मे वचः ॥ १४
ननु नामाहमश्रौषं वचनं तव पुत्रक ।
भूयसी मम पृथ्वीयं तात पार्थस्य नो तथा ॥ १५
भगदत्तः कृपः शल्य आवन्त्योऽथ जयद्रथः ।
भूरिश्रवाः सोमदत्तो महाराजश्च बाह्लिकः ॥ १६
अश्वत्थामा च भोजश्च मागधश्च महाबलः ।
बृहद्बलश्च क्राथश्च शकुनिश्चापि सौबलः ॥ १७
म्लेच्छाश्च शतसाहस्राः शकाश्च यवनैः सह ।
सुदक्षिणश्च काम्भोजस्त्रिगर्ताधिपतिस्तथा ॥ १८
भीष्मः पितामहश्चैव भारद्वाजोऽथ गौतमः ।
श्रुतायुश्चाश्रुतायुश्च शतायुश्चापि वीर्यवान् ॥ १९
जलसन्धोऽथार्ष्यशृङ्गी राक्षसश्चाप्यलायुधः ।
अलम्बुसो वीरबाहुः सुबाहुश्च महारथः ॥ २०

सधूममिव अत्युष्णमित्यर्थः ॥ २ ॥ परिष्वज्य च मा कण्ठे स्नेहेन क्लिन्नलोचनः । अनुशाधीति कौरव्य तत्साधु वद मे वचः इति झ. पाठः ॥ १४ ॥

एते चान्ये च बहवो राजानो राजसत्तम ।
मदर्थे प्रहरिष्यन्ति प्राणांस्त्यक्त्वा धनानि च॥२१
तेषां मध्ये स्थितो युद्धे भ्रातृभिः परिवारितः ।
योधयिष्याम्यहं पार्थान्पाञ्चालांश्चैव सर्वशः॥२२
चेदींश्च नृपशार्दूल द्रौपदेयांश्च संयुगे ।
सात्यकिं कुन्तिभोजं च राक्षसं च घटोत्कचम् २३
एकोऽप्येषां महाराज समर्थः संनिवारणे ।
समरे पाण्डवेयानां संक्रुद्धो ह्यभिधावताम् ॥२४
किं पुनः सहिता वीराः कृतवैराश्च पाण्डवैः ।
अथवा सर्व एवैते पाण्डवस्यानुयायिभिः ॥ २५
योत्स्यन्ते सह राजेन्द्र हनिष्यन्ति च तान्मृधे ।
कर्ण एको मया सार्धं निहनिष्यति पाण्डवान्॥२६
ते वै नृपतयो वीराः स्थास्यन्ति मम शासने ॥ २७
यश्च तेषां प्रणेता वै वासुदेवो महाबलः ।
न स संनह्यते राजन्निति मामब्रवीद्वचः ॥ २८
एवं च वदतः सूत बहुशो मम सन्निधौ ।
युक्तितो ह्यनुपश्यामि निहतान्पाण्डवान्रणे॥ २९
तेषां मध्ये स्थिता यत्र हन्यन्ते मम पुत्रकाः ।
व्यायच्छमानाः समरे किमन्यद्भागधेयतः॥ ३०
भीष्मश्च निहतो यत्र लोकनाथः प्रतापवान् ।
शिखण्डिनं समासाद्य मृगेन्द्र इव जम्बुकम्॥३१
द्रोणश्च ब्राह्मणो यत्र सर्वशस्त्रास्त्रपारगः ।
निहतः पाण्डवैः सङ्ख्ये किमन्यद्भागधेयतः॥ ३२
कर्णश्च निहतः सङ्ख्ये दिव्यास्त्रज्ञो महाबलः ।
भूरिश्रवा हतो यत्र सोमदत्तश्च संयुगे ।
बाह्लिकश्च महाराज किमन्यद्भागधेयतः॥ ३३
भगदत्तो हतो यत्र गजयुद्धविशारदः ।
जयद्रथश्च निहतः किमन्यद्भागधेयतः॥ ३४
सुदक्षिणो हतो यत्र जलसन्धश्च पौरवः ।
श्रुतायुश्चाच्युतायुश्च किमन्यद्भागधेयतः॥ ३५
महाबलस्तथा पाण्ड्यः सर्वशस्त्रभृतां वरः ।
निहतः पाण्डवैः सङ्ख्ये किमन्यद्भागधेयतः॥३६
बृहद्बलो हतो यत्र मागधश्च महाबलः ।
उग्रायुधश्च विक्रान्तः प्रतिमानं धनुष्मताम्॥ ३७

प्रतिमान केतुभूत. ॥ ३७ ॥

आवन्त्यो निहतो यत्र त्रैगर्तश्च जनाधिपः ।
संशप्तकाश्च निहताः किमन्यद्भागधेयतः ॥ ३८
अलम्बुसस्तथा राजन्राक्षसश्चाप्यलायुधः ।
आर्ष्यशृङ्गिश्च निहतः किमन्यद्भागधेयतः॥ ३९
नारायणा हता यत्र गोपाला युद्धदुर्मदाः ।
म्लेच्छाश्च बहुसाहस्राः किमन्यद्भागधेयतः॥४०
शकुनिः सौबलो यत्र कैतव्यश्च महाबलः ।
निहतः सबलो वीरः किमन्यद्भागधेयतः॥ ४१
एते चान्ये च बहवः कृतास्त्रा युद्धदुर्मदाः ।
राजानो राजपुत्राश्च शूराः परिघबाहवः ।
निहता बहवो यत्र किमन्यद्भागधेयतः॥ ४२
यत्र शूरा महेष्वासाः कृतास्त्रा युद्धदुर्मदाः ।
बहवो निहताः सूत महेन्द्रसमविक्रमाः॥ ४३
नानादेशसमावृत्ताः क्षत्रिया यत्र सञ्जय ।
निहताः समरे सर्वे किमन्यद्भागधेयतः॥ ४४
पुत्राश्च मे विनिहताः पौत्राश्चैव महाबलाः ।
वयस्या भ्रातरश्चैव किमन्यद्भागधेयतः॥ ४५
भागधेयसमायुक्तो ध्रुवमुत्पद्यते नरः ।
यस्तु भाग्यसमायुक्तः स शुभं प्राप्नुयान्नरः॥ ४६
अहं वियुक्तस्तैर्भाग्यैः पुत्रैश्चैवेह सञ्जय ।
कथमद्य भविष्यामि वृद्धः शत्रुवशं गतः॥ ४७
नान्यदत्र परं मन्ये वनवासादृते प्रभो ।
सोऽहं वनं गमिष्यामि निर्बन्धुर्ज्ञातिसंक्षये॥४८
न हि मेऽन्यद्भवेच्छ्रेयो वनाभ्युपगमादृते ।
इमामवस्थां प्राप्तस्य लूनपक्षस्य सञ्जय॥ ४९
दुर्योधनो हतो यत्र शल्यश्च निहतो युधि ।
दुःशासनो विविंशश्च विकर्णश्च महाबलः॥ ५०
कथं हि भीमसेनस्य श्रोष्येऽहं शब्दमुत्तमम् ।
एकेन समरे येन हतं पुत्रशतं मम॥ ५१
असकृद्वदतस्तस्य दुर्योधनवधेन च ।
दुःखशोकाभिसंतप्तो न श्रोष्ये परुषा गिरः॥ ५२
वैशंपायन उवाच ।
एवं स शोकसंतप्तः पार्थिवो हतबान्धवः ।
मुहुर्मुहुर्मुह्यमानः पुत्राधिभिरभिप्लुतः॥ ५३

विलप्य सुचिरं कालं धृतराष्ट्रोऽम्बिकासुतः ।
दीर्घमुष्णं स निःश्वस्य चिन्तयित्वा पराभवम् ॥५४
दुःखेन महता राजन्संतप्तो भरतर्षभः ।
पुनर्गावल्गणिं सूतं पर्यपृच्छद्यथातथम् ॥ ५५
धृतराष्ट्र उवाच ।
भीष्मद्रोणौ हतौ श्रुत्वा सूतपुत्रं च पातितम् ।
सेनापतिं प्रणेतारं कमकुर्वत मामकाः ॥ ५६
यं यं सेनाप्रणेतारं युधि कुर्वन्ति मामकाः ।
अचिरेणैव कालेन तं तं निघ्नन्ति पाण्डवाः ॥५७
रणमूर्ध्नि हतो भीष्मः पश्यतां वः किरीटिना ।
एवमेव हतो द्रोणः सर्वेषामेव पश्यताम् ॥ ५८
एवमेव हतः कर्णः सूतपुत्रः प्रतापवान् ।
सराजकानां सर्वेषां पश्यतां वः किरीटिना ॥ ५९
पूर्वमेवाहमुक्तो वै विदुरेण महात्मना ।
दुर्योधनापराधेन प्रजेयं विनशिष्यति ॥ ६०
केचिन्न सम्यक्पश्यन्ति मूढाः सम्यगवेक्ष्य च ।
तदिदं मम मूढस्य तथाभूतं वचः स्म तत् ॥ ६१
यदब्रवीत्स धर्मात्मा विदुरो दीर्घदर्शिवान् ।
तत्तथा समनुप्राप्तं वचनं सत्यवादिनः ॥ ६२
दैवोपहतचित्तेन यन्मयाऽनुष्ठितं पुरा ।
अनयस्य फलं तस्य ब्रूहि गावल्गणे पुनः ॥ ६३
को वा मुखमनीकानामासीत्कर्णे निपातिते ।
अर्जुनं वासुदेवं च को वा प्रत्युद्ययौ रथी ॥ ६४
केऽरक्षन्दक्षिणं चक्रं मद्रराजस्य संयुगे ।
वामं च योद्धुकामस्य के वा वीरस्य पृष्ठतः ॥ ६५
कथं च वः समेतानां मद्रराजो महारथः ।
निहतः पाण्डवैः सङ्ख्ये पुत्रो वा मम सञ्जय ॥ ६६
ब्रूहि सर्वं यथातत्त्वं भरतानां महाक्षयम् ।
यथा च निहतः सङ्ख्ये पुत्रो दुर्योधनो मम ॥६७
पाञ्चालाश्च यथा सर्वे निहताः सपदानुगाः ।
धृष्टद्युम्नः शिखण्डी च द्रौपद्याः पञ्च चात्मजाः ॥
पाण्डवाश्च यथा मुक्तास्तथौभौ माधवौ युधि ।
कृपश्च कृतवर्मा च भारद्वाजस्य चात्मजः ॥ ६९
यद्यथा यादृशं चैव युद्धं वृत्तं च सांप्रतम् ।
अखिलं श्रोतुमिच्छामि कुशलो ह्यसि सञ्जय ॥७०

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

केचित्सम्यक्प्रपश्यन्ति मूढास्तु न तथा परे इति ख. पाठः । सम्यगवेक्ष्य निपुण विभाव्यापि मूढास्तथाभूत तद्वचः केचिन्न पश्यन्तीति सम्बन्धः । तथाभूतं यथार्थम् ॥ ६१ ॥ द्वितीयोऽध्यायः ॥ २ ॥

---

* एतदनन्तर झ. पाठे एकोऽध्यायोऽधिको दृश्यते ।

प्रक्षिप्तोऽध्यायः ॥

पार्थेन निहते कर्णे पाण्डवभयात्पलायमानां सेनां निवर्त्य दुर्योधनस्य पुनर्युद्धोद्यमः ॥ १ ॥

[सञ्जय उवाच ।
शृणु राजन्नवहितो यथावृत्तो महान्क्षयः ।
कुरूणां पाण्डवानां च समासाद्य परस्परम् ॥ १
निहते सूतपुत्रे तु पाण्डवेन महात्मना ।
विद्रुतेषु च सैन्येषु समानीतेषु चासकृत् ॥ २
घोरे मनुष्यदेहानामाजौ नरवरक्षये ।
यत्तत्कर्णे हते पार्थः सिंहनादमथाकरोत् ॥ ३
तदा तव सुतान्राजन्प्राविशत्सुमहद्भयम् ॥ ४
न सन्धातुमनीकानि न चैवाथ पराक्रमे ।
आसीद्बुद्धिर्हते कर्णे तव योधस्य कस्यचित् ॥ ५
वणिजो नावि भिन्नायामगाधे विप्लवा इव ।
अपारे पारमिच्छन्तो हते द्वीपे किरीटिना ॥ ६
सूतपुत्रे हते राजन्वित्रस्ताः शरविक्षताः ।
अनाथा नाथमिच्छन्तो मृगाः सिंहार्दिता इव ॥ ७
भग्नशृङ्गा इव वृषा शीर्णदंष्ट्रा इवोरगाः ।
प्रत्युपायाम सायाह्ने निर्जिताः सव्यसाचिना ॥ ८
हतप्रवीरा विध्वस्ता निकृत्ता निशितैः शरैः ।
सूतपुत्रे हते राजन्पुत्रास्ते प्राद्रवंस्ततः ॥ ९
विध्वस्तकवचाः सर्वे कांदिशीका विचेतसः ।
अन्योन्यमभिनिघ्नन्तो वीक्षमाणा भयाद्दिशः ॥ १०
मामेव नूनं बीभत्सुर्मामेव च वृकोदरः ।
अभियातीति मन्वानाः पेतुर्मम्लुश्च भारत ॥ ११

अश्वानन्ये गजानन्ये रथानन्ये महारथाः ।
आरुह्य जवसंपन्नाः पादातान्प्रजहुर्भयात् ॥ १२
कुञ्जरैः स्यन्दना भग्नाः सादिनश्च महारथैः ।
पदातिसङ्घाश्चाश्वौघैः पलायद्भिर्भृशं हताः ॥ १३
व्यालतस्करसंकीर्णे सार्थहीना यथा वने ।
तथा त्वदीया निहते सूतपुत्रे तदाऽभवन् ॥ १४
हतारोहास्तथा नागाश्छिन्नहस्तास्तथाऽपरे ।
सर्वे पार्थमयं लोकमपश्यन्वै भयार्दिताः ॥ १५
तान्प्रेक्ष्य द्रवतः सर्वान्भीमसेनभयार्दितान् ।
दुर्योधनोऽथ स्वं सूतं हाहाकृत्वैवमब्रवीत् ॥ १६
नातिक्रमिष्यते पार्थो धनुष्पाणिमवस्थितम् ।
जघने युध्यमानं मां तूर्णमश्वान्प्रचोदय ॥ १७
समरे युध्यमानं हि कौन्तेयो मां धनञ्जयः ।
नोत्सहेताप्यतिक्रान्तुं वेलामिव महार्णवः ॥ १८
अद्यार्जुनं सगोविन्दं मानिनं च वृकोदरम् ।
निहत्य शिष्टाञ्शत्रूंश्च कर्णस्यानृण्यमाप्नुयाम् ॥ १९
तच्छ्रुत्वा कुरुराजस्य शूरार्यसदृशं वचः ।
सूतो हेमपरिच्छन्नाञ्शनैरश्वानचोदयत् ॥ २०
गजाश्वरथहीनास्तु पादाताश्चैव मारिष ।
पञ्चविंशतिसाहस्राः प्राद्रवञ्शनकैरिव ॥ २१
तान्भीमसेनः संक्रुद्धो धृष्टद्युम्नश्च पार्षतः ।
बलेन चतुरङ्गेण परिक्षिप्याहनच्छरैः ॥ २२
प्रत्ययुध्यंस्तु ते सर्वे भीमसेनं सपार्षतम् ।
पार्थपार्षतयोश्चान्ये जगृहुस्तत्र नामनी ॥ २३
अक्रुध्यत रणे भीमस्तैर्मृधे प्रत्यवस्थितैः ।
सोऽवतीर्य रथात्तूर्णं गदापाणिरयुध्यत ॥ २४
न तान्रथस्थो भूमिष्ठान्धर्मापेक्षी वृकोदरः ।
योधयामास कौन्तेयो भुजवीर्यमुपाश्रितः ॥ २५
जातरूपपरिच्छन्नां प्रगृह्य महतीं गदाम् ।
न्यवधीत्तावकान्सर्वान्दण्डपाणिरिवान्तकः ॥ २६
पदातयो हि संरब्धास्त्यक्तजीवितबान्धवाः ।
भीममभ्यद्रवन्सङ्ख्ये पतङ्गा इव पावकम् ॥ २७
आसाद्य भीमसेनं ते संरब्धा युद्धदुर्मदाः ।
विनेदुः सहसा दृष्ट्वा भूतग्रामा इवान्तकम् ॥ २८
श्येनवद्व्यचरद्भीमः खड्गेन गदया तथा ।
पञ्चविंशतिसाहस्रांस्तावकानां व्यपोथयत् ॥ २९
हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः ।
धृष्टद्युम्नं पुरस्कृत्य पुनस्तस्थौ महाबलः ॥ ३०
धनञ्जयो रथानीकमन्वपद्यत वीर्यवान् ॥ ३१
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महाबलः ।
जवेनाभ्यपतन्हृष्टा घ्नन्तो दौर्योधनं बलम् ॥ ३२
तस्याश्ववाहान्सुबहूंस्ते निहत्य शितैः शरैः ।
तमन्वधावंस्त्वरितास्तत्र युद्धमवर्तत ॥ ३३

ततो धनञ्जयो राजन्रथानीकमगाहत ।
विश्रुतं त्रिषु लोकेषु गाण्डीवं व्याक्षिपन्धनुः ॥ ३४
कृष्णसारथिमायान्तं दृष्ट्वा श्वेतहयं रथम् ।
अर्जुनं चापि योद्धारं त्वदीयाः प्राद्रवन्भयात् ॥ ३५
विप्रहीनरथाश्वाश्च शरैश्च परिवारिताः ।
पञ्चविंशतिसाहस्राः पार्थमार्च्छन्पदातयः ॥ ३६
हत्वा तत्पुरुषानीकं पाञ्चालानां महारथः ।
भीमसेनं पुरस्कृत्य न चिरात्प्रत्यदृश्यत ॥ ३७
महाधनुर्धरः श्रीमानमित्रगणमर्दनः ।
पुत्रः पाञ्चालराजस्य धृष्टद्युम्नो महायशाः ॥ ३८
पारावतसवर्णाश्वं कोविदारवरध्वजम् ।
धृष्टद्युम्नं रणे दृष्ट्वा त्वदीयाः प्राद्रवन्भयात् ॥ ३९
गान्धारराजं शीघ्रास्त्रमनुसृत्य यशस्विनौ ।
अचिरात्प्रत्यदृश्येतां माद्रीपुत्रौ ससात्यकी ॥ ४०
चेकितानः शिखण्डी च द्रौपदेयाश्च मारिष ।
हत्वा त्वदीयं सुमहत्सैन्यं शङ्खानथाधमन् ॥ ४१
ते सर्वे तावकान्प्रेक्ष्य द्रवतो वै पराङ्मुखान् ।
अभ्यधावन्त निघ्नन्तो वृषाञ्जित्वा वृषा इव ॥ ४२
सेनावशेषं तं दृष्ट्वा तव पुत्रस्य पाण्डवः ।
अवस्थितं सव्यसाची चुक्रोध बलवन्नृप ॥ ४३
तत एनं शरैः राजन्सहसा समवाकिरत् ।
रजसा चोद्धतेनाथ न स्म किंचन दृश्यते ॥ ४४
अन्धकारीकृते लोके शरीभूते महीतले ।
दिशः सर्वा महाराज तावकाः प्राद्रवन्भयात् ॥ ४५
भज्यमानेषु सर्वेषु कुरुराजो विशांपते ।
परेषामात्मनश्चैव सैन्ये ते समुपाद्रवत् ॥ ४६
ततो दुर्योधनः सर्वानाजुहावाथ पाण्डवान् ।
युद्धाय भरतश्रेष्ठ देवानिव पुरा बलिः ॥ ४७
त एनमभिगर्जन्तं सहिताः समुपाद्रवन् ।
नानाशस्त्रसृजः क्रुद्धा भर्त्सयन्तो मुहुर्मुहुः ॥ ४८
दुर्योधनोऽप्यसंभ्रान्तस्तानरीन्व्यधमच्छरैः ॥ ४९
तत्राद्भुतमपश्याम तव पुत्रस्य पौरुषम् ।
यदेनं पाण्डवाः सर्वे न शेकुरतिवर्तितुम् ॥ ५०
नातिदूरापयातं च कृतबुद्धिं पलायने ।
दुर्योधनः स्वकं सैन्यमपश्यद्भृशविक्षतम् ॥ ५१
ततोऽवस्थाप्य राजेन्द्र कृतबुद्धिस्तवात्मजः ।
हर्षयन्निव तान्योधांस्ततो वचनमब्रवीत् ॥ ५२
न तं देशं प्रपश्यामि पृथिव्यां पर्वतेषु च ।
यत्र यातान्न वो हन्युः पाण्डवाः किं सूतेन वः ॥ ५३
स्वल्पं चैव बलं तेषां कृष्णौ च भृशविक्षतौ ।
यदि सर्वेऽत्र तिष्ठामो ध्रुवं नो विजयो भवेत् ॥ ५४
विप्रयातांस्तु वो भिन्नान्पाण्डवाः कृतकिल्बिषान् ।
अनुसृत्य हनिष्यन्ति श्रेयो नः समरे वधः ॥ ५५

तृतीयोऽध्यायः ॥ ३ ॥

कृपेण कर्णवधदुःखितं दुर्योधनं प्रति स्वपरपक्षयोर्दौर्बल्यप्राबल्याभिधानपूर्वकमुपायं प्रदर्श्य संधिविधानम् ॥ १ ॥

सञ्जय उवाच ।
शृणु राजन्नवहितो यथावृत्तो महान्क्षयः ।
कुरूणां पाण्डवानां च समासाद्य परस्परम् ॥ १
निहते सूतपुत्रे च फल्गुनेन महात्मना ।
विद्रुतेषु च सैन्येषु समानीतेषु चासकृत् ॥ २
विमुखे तव पुत्रे च शोकोपहतचेतसि ।
भृशोद्विग्नेषु सैन्येषु दृष्ट्वा पार्थस्य विक्रमम् ॥ ३
ध्यायमानेषु योधेषु दुःखं प्राप्तेषु भारत ।
बलानां मथ्यमानानां श्रुत्वा निनदमुत्तमम् ॥ ४
अभिज्ञानं नरेन्द्राणां विकृतं प्रेक्ष्य संयुगे ।
पतितानवनीपालान्ध्वजांश्चैव महात्मनाम् ।
रणे विनिहतान्नागान्दृष्ट्वा पत्तींश्च भारत ॥ ५
आयोधनं महाघोरं रुद्रस्याक्रीडसंनिभम् ।
अप्रख्यातिं गतानां तु राज्ञां शतसहस्रशः ॥ ६
कृपाविष्टः कृपो दृष्ट्वा वयःशीलसमन्वितः ।
अब्रवीत्तत्र तेजस्वी सोऽभिसृत्य जनाधिपम् ।
दुर्योधनमनुक्रोशाद्वाक्यं वाक्यविशारदः ॥ ७
दुर्योधन निबोधेदं यत्त्वां वक्ष्यामि कौरव ।
श्रुत्वा कुरु महाराज यदि ते रोचतेऽनघ ॥ ८
न युद्धधर्माच्छ्रेयान्वै पन्था राजेन्द्र विद्यते ।
यं समाश्रित्य युध्यन्ते क्षत्रियाः क्षत्रियर्षभ ॥ ९
पुत्रो भ्राता पिता चैव स्वस्रीयो मातुलस्तथा ।
संबन्धिबान्धवाश्चैव योद्धव्याः क्षत्रजीविनः ॥ १०
वधे चैव परो धर्मस्तथाऽधर्मः पलायने ।
ते स्म घोरां समापन्ना जीविकां जीवितार्थिनः ।
तदत्र प्रतिवक्ष्यामि किंचिदेव हितं वचः ॥ ११
हते भीष्मे च द्रोणे च कर्णे चैव महारथे ।
जयद्रथे च निहते तव भ्रातृषु चानघ ।
लक्ष्मणे तव पुत्रे च किं शेषं पर्युपास्महे ॥ १२
येषु भारं समासज्य राज्ये मतिमकुर्महि ।
ते संत्यज्य तनूर्याताः शूरा ब्रह्मविदां गतिम् ॥ १३
वयं त्विह विनाभूता गुणवद्भिर्महारथैः ।
कृपणं वर्तयिष्यामः पातयित्वा नृपान्बहून् ॥ १४
सर्वैरथ च जीवद्भिर्वीभत्सुरपराजितः ।
कृष्णनेत्रो महाबाहुर्देवैरपि दुरासदः ॥ १५
इन्द्रकार्मुकवज्राभमिन्द्रकेतुमिवोच्छ्रितम् ।
वानरं केतुमासाद्य संचचाल महाचमूः ॥ १६
सिंहनादेन भीमस्य पाञ्चजन्यस्वनेन च ।
गाण्डीवस्य च निर्घोषात्संमुह्यन्ते मनांसि नः ॥ १७
स्फुरन्तीव महाविद्युन्मुष्णन्ती नयनप्रभाम् ।
अलातमिव चाविद्धं गाण्डीवं समदृश्यत ॥ १८
जाम्बूनदविचित्रं च धूयमानं महद्धनुः ।
दृश्यते दिक्षु सर्वासु विद्युदभ्रघनेष्विव ॥ १९
उह्यमानश्च कृष्णेन वायुनेव बलाहकः ।
तावकं तद्बलं राजन्नर्जुनोऽस्त्रविशारदः ।
गहनं शिशिरापाये ददाहाग्निरिवोल्बणः ॥ २०

शेषास्त्वां पर्युपास्महे इति ड. पाठः ॥ १२ ॥ कृष्णो नेत्रं नेता यस्य स तथा ॥ १५ ॥

सुखः साङ्ग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम् ।
मृतो दुःखं न जानीते प्रेत्य चानन्त्यमश्नुते ॥ ५६
शृण्वन्तु क्षत्रियाः सर्वे यावन्तोऽत्र समागताः ।
द्विषतो भीमसेनस्य वक्ष्यमेष्यथ विद्रुता ॥ ५७
पितामहैराचरितं न धर्मं हातुमर्हथ ।
नान्यत्कर्मास्ति पापीयः क्षत्रियस्य पलायनात् ॥ ५८
न युद्धधर्माच्छ्रेयान्हि पन्थाः स्वर्गस्य कौरवाः ।
सुचिरेणार्जितांल्लोकान्सद्यो युद्धात्समश्नुते ॥ ५९
तस्य तद्वचनं राज्ञः पूजयित्वा महारथाः ।
पुनरेवाभ्यवर्तन्त क्षत्रियाः पाण्डवान्प्रति ।
पराजयममृष्यन्तः कृतचित्ताश्च विक्रमे ॥ ६०
ततः प्रववृते युद्धं पुनरेव सुदारुणम् ।
तावकानां परेषां च देवासुररणोपमम् ॥ ६१
युधिष्ठिरपुरोगांश्च सर्वसैन्येन पाण्डवान् ।
अन्वधावन्महाराज पुत्रो दुर्योधनस्तव ॥] ६२

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अध्यायः ॥

गाहमानमनीकानि महेन्द्रसदृशप्रभम् ।
विक्षोभयन्तं सेनां वै त्रासयन्तं च पार्थिवान् ।
धनञ्जयमपश्याम नलिनीमिव कुञ्जरम् ॥ २१
त्रासयन्तं तथा योधान्धनुर्घोषेण पाण्डवम् ।
भूय एनमपश्याम सिंहं मृगगणानिव ॥ २२
सर्वलोकमहेष्वासौ वृषभौ सर्वधन्विनाम् ।
आमुक्तकवचौ कृष्णौ लोकमध्ये विरेजतुः ॥ २३
अद्य सप्तदशाहानि वर्तमानस्य भारत ।
सङ्ग्रामस्यातिघोरस्य युध्यतां चाभितो युधि ॥ २४
वायुनेव विधूतानि तव सैन्यानि गच्छता ।
शरदम्भोदजालानि विशीर्यन्ते समन्ततः ॥ २५
तां नावमिव पर्यस्तां मज्जमानां महार्णवे ।
तव सेनां महाराज सव्यसाची व्यकम्पयत् ॥ २६
क्वनु ते सूतपुत्रोऽभूत्क्वनु द्रोणः सहात्मजः ।
अहं क्व च क्व चात्मा ते हार्दिक्यश्च तथा क्वनु ॥ २७
दुःशासनश्च ते भ्राता भ्रातृभिः सहितः क्वनु २८
वाणगोचरसंप्राप्तं युध्यमानं जयद्रथम् ।
संबन्धिनस्ते भ्रातॄंश्च सहायान्मातुलांस्तथा ।
सर्वान्विक्रम्य मिषतो लोकमाक्रम्य मूर्धनि ॥ २९
जयद्रथो हतो राजन्किनु शेषमुपास्महे ।
को वेह स पुमानस्ति यो विजेष्यति पाण्डवम् ॥ ३०
तस्य चास्त्राणि दिव्यानि विदितानि महात्मनः ।
गाण्डीवस्य च निर्घोषो धैर्याणि हरते हि नः ॥ ३१
नष्टचन्द्रा यथा रात्रिः सेनेयं हतनायका ।
नागभग्नद्रुमा शुष्का नदीव प्रतिभाति मे ॥ ३२
ध्वजिन्यां हतनेतायां यथेष्टं श्वेतवाहनः ।
चरिष्यति महाराजः कक्षेष्वग्निरिव ज्वलन् ॥ ३३
सात्यकेश्चैव यो वेगो भीमसेनस्य चोभयोः ।
दारयेत गिरीन्सर्वाञ्शोषयेच्चैव सागरान् ॥ ३४
उवाच वाक्यं यद्भीमः सभामध्ये विशांपते ।
कृतं तत्सफलं सर्वं भूयश्चैव करिष्यति ॥ ३५
प्रमुखस्थे तदा कर्णे बलं पाण्डवरक्षितम् ।
दुरासदं तदा गुप्तं व्यूढं गाण्डीवधन्वना ॥ ३६
युष्माभिस्तानि चीर्णानि यान्यसाधूनि साधुषु ।
अकारणकृतान्येव तेषां वः फलमागतम् ॥ ३७
आत्मनोऽर्थे त्वया लोको यत्नतः सर्व आहृतः ।
स ते संशयितस्तात आत्मा च भरतर्षभ ॥ ३८
रक्ष दुर्योधनात्मानमात्मा सर्वस्य भाजनम् ।
भिन्ने हि भाजने तात दिशो गच्छति तद्धृतम् ॥ ३९
हीयमानेन वै सन्धिः पर्येष्टव्यः समेन वा ।
विग्रहो वर्धमानेन नीतिरेषा बृहस्पतेः ॥ ४०
ते वयं पाण्डुपुत्रेभ्यो हीनाः स्म बलशक्तितः ।
अत्र ते पाण्डवैः सार्धं सन्धिं मन्ये क्षमं प्रभो ॥ ४१
न जानीते हि यः श्रेयः श्रेयसश्चावमन्यते ।
स क्षिप्रं भ्रश्यते राज्यान्न च श्रेयोऽनुविन्दति ॥ ४२
प्रणिपत्य हि राजानं राज्यं यदि लभेमहि ।
श्रेयः स्यान्न तु मौढ्येन राजन्गन्तुं पराभवम् ॥ ४३
वैचित्रवीर्यवचनात्कृपाशीलो युधिष्ठिरः ।
विनियुञ्जीत राज्ये त्वां गोविन्दवचनेन च ॥ ४४
'अजातशत्रुः कौरव्यो गुरुशुश्रूषणे रतः ।
धृतराष्ट्रस्य वचनं नावमंस्यति धार्मिकः ॥ ४५
कुर्वन्ति भ्रातरश्चास्य वचनं नात्र संशयः ॥' ४६
यद्ब्रूयाद्धि हृषीकेशो राजानमपराजितम् ।
अर्जुनो भीमसेनश्च सर्वे कुर्युरसंशयम् ॥ ४७
नातिक्रमिष्यते कृष्णो वचनं पाण्डवस्य तु ।
धृतराष्ट्रस्य मन्येऽहं नापि कृष्णस्य पाण्डवः ॥ ४८
एतत्क्षममहं मन्ये तव पार्थैरविग्रहम् ।
न त्वां ब्रवीमि कार्पण्यान्न प्राणपरिरक्षणात् ॥ ४९
पथ्यं राजन्ब्रवीमि त्वां तत्परासुः स्मरिष्यसि ॥ ५०
इति वृद्धो विलप्यैतत्कृपः शारद्वतो वचः ।
दीर्घमुष्णं च निःश्वस्य शुशोच च मुमोह च ॥ ५१

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

वर्तमानस्य सङ्ग्रामस्य अभितो वध्यता वध्यमानाना च अद्य सप्तदशाहानि जातानीत्यन्वय. । जातानीति शेष ॥ २४ ॥ अर्जुन भीमसेन च इति झ पाठ । असशय गतवैरमित्यर्थः ॥ ४७ ॥ वचन कौरवस्य तु इति झ. पाठः ॥ ४८ ॥ तृतीयोऽध्याय ॥ ३ ॥

चतुर्थोऽध्यायः ॥ ४ ॥

दुर्योधनेन कृपंप्रति कारणकथनपूर्वक सन्ध्यनङ्गीकरणम् ॥ १ ॥

सञ्जय उवाच ।
एवमुक्तस्ततो राजा गौतमेन तपस्विना ।
निःश्वस्य दीर्घमुष्णं च तूष्णीमासीद्विशांपते ॥ १
ततो मुहूर्तं स ध्यात्वा तव पुत्रो महामनाः ।
कृपं शारद्वतं वाक्यमित्युवाच परंतपः ॥ २
यत्किंचित्सुहृदा वाच्यं तत्सर्वं श्रावितो ह्यहम् ।
कृतं च भवता सर्वं प्राणान्संत्यज्य युध्यता ॥ ३
गाहमानमनीकानि युध्यमानं महारथैः ।
पाण्डवैरतितेजोभिर्लोकस्त्वामनुदृष्टवान् ॥ ४
सुहृदा यदिदं वाक्यं भवता श्रावितो ह्यहम् ।
न मां प्रीणाति तत्सर्वं मुमूर्षोरिव भेषजम् ॥ ५
हेतुकारणसंयुक्तं हितं वचनमुत्तमम् ।
उच्यमानं महाबाहो न मे विप्राय्य रोचते ॥ ६
राज्याद्विनिकृतोऽस्माभिःकथं सोस्मासु विश्वसेत् ७
अक्षद्यूते च नृपतिर्जितोऽस्माभिर्महाधनः ।
स कथं मम वाक्यानि श्रद्दध्याद्धूय एव तु ॥ ८
तथा दूत्येन संप्राप्तः कृष्णः पार्थहिते रतः ।
प्रलब्धश्च हृषीकेशस्तच्च कर्माविचारितम् ।
स च मे वचनं ब्रह्मन्कथमेवाभिमन्यते ॥ ९
विललाप च यत्कृष्णा सभामध्ये समेयुषी ।
न तन्मर्षयते कृष्णो न राज्यहरणं तथा ॥ १०
एकप्राणावुभौ कृष्णावन्योन्यमभिसंश्रितौ ।
पुरा यच्छ्रुतमेवासीदद्य पश्यामि तत्प्रभो ॥ ११
स्वस्रीयं निहतं दृष्ट्वा दुःखं स्वपिति केशवः ।
कृतागसो वयं तस्य हितं मे स कथं चरेत् ॥१२
अभिमन्योर्विनाशेन न शर्म लभतेऽर्जुनः ।
स कथं मद्धिते यत्नं प्रकरिष्यति याचितः ॥ १३
मध्यमः पाण्डवस्तीक्ष्णो भीमसेनो महाबलः ।
प्रतिज्ञातं च तेनोग्रं भज्येतापि न संनमेत् ॥ १४
उभौ तौ बद्धनिस्त्रिंशावुभौ चाबद्धकङ्कटौ ।
कृतवैरावुभौ वीरौ यमावपि यमोपमौ ॥ १५
धृष्टद्युम्नः शिखण्डी च कृतवैरौ मया सह ।
तौ कथं मद्धिते यत्नं कुर्यातां द्विजसत्तम ॥ १६
दुःशासनेन यत्कृष्णा एकवस्त्रा रजस्वला ।
परिक्लिष्टा सभामध्ये सर्वलोकस्य पश्यतः ॥ १७
तथा विवसनां दीनां स्मरन्त्यद्यापि पाण्डवाः ।
न निवारयितुं शक्याः संग्रामात्ते परंतपाः ॥ १८
यदा च द्रौपदी क्लिष्टा मद्धिनाशाय दुःखिता ।
उग्रं तेपे तपः कृष्णा भर्तृणामर्थसिद्धये ।
स्थण्डिले नित्यदा शेते यावद्वैरस्य यातनम् ॥१९
निक्षिप्य मानं दर्पं च वासुदेवसहोदरा ।
कृष्णायाः प्रेष्यवद्भूत्वा शुश्रूषां कुरुते सदा ॥ २०
इति सर्वं समुन्नद्धं न निर्वाति कथंचन ।
अभिमन्योर्विनाशेन स सन्धेयः कथं मया ॥ २१
कथं च राजा भुक्त्वेमां पृथिवीं सागराम्बराम् ।
पाण्डवानां प्रसादेन भोक्ष्ये राज्यमहं कथम् ॥ २२
उपर्युपरि राज्ञां वै ज्वलित्वा भास्करो यथा ।
युधिष्ठिरं कथं पश्चादनुयास्यामि दासवत् ॥ २३
कथं भुक्त्वा स्वयं भोगान्दत्त्वा दायांश्च पुष्कलान् ।
कृपणं वर्तयिष्यामि कृपणैः सह जीविकाम् ॥ २४
नाभ्यसूयामि ते वाक्यमुक्तं स्निग्धं हितं त्वया २५
न तु सन्धिमहं मन्ये प्राप्तकालं कथंचन ।
सुनीतमनुपश्यामि सुयुद्धेन परंतप ॥ २६
नायं क्लीबायितुं कालः संयोद्धुं काल एव नः ॥ २७
इष्टं मे बहुभिर्यज्ञैर्दत्ता विप्रेषु दक्षिणाः ।
प्राप्ताः कामाः श्रुता वेदाः शत्रूणां मूर्ध्नि च स्थितम्
भृत्या मे सुभृतास्तात दीनश्चाभ्युद्धृतो जनः ।
नोत्सहेऽद्य द्विजश्रेष्ठ पाण्डवान्वक्तुमीदृशम् ॥ २९
जितानि परराष्ट्राणि स्वराष्ट्रमनुपालितम् ।
भुक्ताश्च विविधा भोगास्त्रिवर्गः सेवितो मया ॥३०

पुरा यच्छान्तमेवासीत् इति क. पाठ । पुरा यः शन्तमो नासीदद्य पश्यामि त कथम् इति ड. पाठः ॥ ११ ॥

उरश्छद. कङ्कटक इत्यमरः ॥ १५ ॥

पितॄणां गतमानृण्यं क्षत्रधर्मस्य चोभयोः ।
न ध्रुवं सुखमस्तीह कुतो राष्ट्रं कुतो यशः ।
इह कीर्तिर्विचेतव्या सा च युद्धेन नान्यथा ॥ ३१
वृथा च यत्क्षत्रियस्य निधनं तद्विगर्हितम् ।
अधर्मः सुमहानेष यच्छय्यामरणं गृहे ॥ ३२
अरण्ये यो विमुच्येत संग्रामे वा तनुं नृपः ।
क्रतूनाहृत्य महतो महिमानं स गच्छति ॥ ३३
कृपणं विलपन्नार्तो जरयाऽभिपरिप्लुतः ।
म्रियते रुदतां मध्ये ज्ञातीनां न स पूरुषः ॥ ३४
त्यक्त्वा तु विविधान्भोगान्प्राप्तानां परमां गतिम् ।
अपीदानीं सुयुद्धेन गच्छेयं यत्सलोकताम् ॥ ३५
शूराणामार्यवृत्तानां संग्रामेष्वनिवर्तिनाम् ।
धीमतां सत्यसन्धानां सर्वेषां क्रतुयाजिनाम् ।
शस्त्रावभृथपूतानां ध्रुवो वासस्त्रिविष्टपे ॥ ३६
मुदा नूनं प्रपश्यन्ति युद्धे ह्यप्सरसां गणाः ॥ ३७
पश्यन्ति नूनं पितरः पूजितान्सुरसंसदि ।
अप्सरोभिः परिवृतान्मोदमानांस्त्रिविष्टपे ॥ ३८
पन्थानममरैर्यान्तं शूरैश्चैवानिवर्तिभिः ।
अपि तत्संगतं मार्गं वयमध्यारुहेमहि ॥ ३९
पितामहेन वृद्धेन तथाऽऽचार्येण धीमता ।
जयद्रथेन कर्णेन तथा दुःशासनेन च ॥ ४०
घटमाना मदर्थेऽस्मिन्हताः शूरा जनाधिपाः ।
शेरते लोहितात्काङ्गाः पृथिव्यां शरविक्षताः ॥ ४१
उत्तमास्त्रविदः शूरा यथोक्तक्रतुयाजिनः ।
त्यक्त्वा प्राणान्यथान्यायमिन्द्रसद्मसु धिष्ठिताः ॥
तैः स्वयं रचितो मार्गो दुर्गमो हि पुनर्भवेत् ।
संपतद्भिर्महावेगैरितो यास्यामि सद्गतिम् ॥ ४३
ये मदर्थे हताः शूरास्तेषां कृतमनुस्मरन् ।
ऋणं तत्प्रतियुञ्जानो न राज्ये मन आदधे ॥ ४४
पातयित्वा वयस्यांश्च भ्रातॄनथ पितामहान् ।
जीवितं यदि रक्षेयं लोको मां गर्हयेद्ध्रुवम् ॥ ४५
कीदृशं च भवेद्राज्यं मम हीनस्य बन्धुभिः ।
सखिभिश्च विशेषेण प्रणिपत्य च पाण्डवम् ॥ ४६
सोऽहमेतादृशं कृत्वा जगतोऽस्य पराभवम् ।
सुयुद्धेन हतः स्वर्गं प्राप्स्यामि न तदन्यथा ॥ ४७

सञ्जय उवाच ।

एवं दुर्योधनेनोक्ते सर्वे संपूज्य तद्वचः ।
साधुसाध्विति राजानं क्षत्रियाः संबभाषिरे ॥ ४८
पराजयमशोचन्तः कृतचित्ताश्च विक्रमे ।
सर्वे सुनिश्चिता योद्धुमुदग्रमनसोऽभवन् ॥ ४९
ततो वाहान्समाश्वास्य सर्वे युद्धाभिनन्दिनः ।
ऊने द्वियोजने गत्वा प्रत्यतिष्ठन्त कौरवाः ॥ ५०
आकाशे विडुमे पुण्ये प्रस्थे हिमवतः शुभे ।
अरुणां सरस्वतीं प्राप्य पपुः सस्रुश्च तेजलम् ॥ ५१
तव पुत्रकृतोत्साहाः पर्यवर्तन्त ते ततः ।
पर्यवस्थाप्य चात्मानमन्योन्येन पुनस्तदा ।
सर्वे राजन्यवर्तन्त क्षत्रियाः कालचोदिताः ॥ ५२

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ॥ ५ ॥

दुर्योधनेन सैनापत्यविधानप्रार्थनायां अश्वत्थाम्ना शल्यस्य सेनापतित्वविधानम् ॥ १ ॥ दुर्योधनेन शल्यंप्रति सैनापत्यस्वीकारप्रार्थना ॥ २ ॥

सञ्जय उवाच ।

अथ हैमवते प्रस्थे स्थित्वा युद्धाभिनन्दिनः ।
सर्व एव महायोधास्तत्रतत्र समागताः ॥ १
शल्यश्च चित्रसेनश्च शकुनिश्च महारथः ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ॥ २
सुषेणोऽरिष्टसेनश्च धृतसेनश्च वीर्यवान् ।

विप्रवन्मरणं गृहे इति क. पाठः । विष्मूत्रमरण गृहे इति ङ. पाठः ॥ ३२ ॥ चतुर्थोऽध्याय· ॥ ४ ॥

प्रस्थे शिखरे ॥ १ ॥

जयत्सेनश्च राजानस्ते रात्रिमुषितास्ततः ॥ ३
रणे कर्णे हते वीरे त्रासिता जितकाशिभिः ।
नालभञ्शर्म ते पुत्रा हिमवन्तमृते गिरिम् ॥ ४
तेऽब्रुवन्सहितास्तत्र राजानं शल्यसन्निधौ ।
कृतयत्ना रणे राजन्संपूज्य विधिवत्तदा ॥ ५
कृत्वा सेनाप्रणेतारं परांस्त्वं योद्धुमर्हसि ।
येनाभिगुप्ताः संग्रामे जयेमासुहृदो वयम् ॥ ६
ततो दुर्योधनः स्थित्वा रथे रथवरोत्तमम् ।
सर्वयुद्धविभावज्ञमन्तकप्रतिमं युधि ॥ ७
खड्गं प्रच्छन्नशिरसं कम्बुग्रीवं प्रियंवदम् ।
व्याकोचपद्मपत्राक्षं व्याघ्रास्यं मेरुगौरवम् ॥ ८
स्थाणोर्वृषस्य सदृशं स्कन्धनेत्रगतिस्वरैः ।
पुष्टश्लिष्टायतभुजं सुविस्तीर्णवरोरसम् ॥ ९
बले जवे च सदृशमरुणानुजवातयोः ।
आदित्यस्यार्चिषा तुल्यं बुद्ध्या चोशनसा समं १०
कान्तिरूपमुखैश्वर्यैस्त्रिभिश्चन्द्रमसा समम् ।
काञ्चनोपलसंघातैः सदृशं श्लिष्टसन्धिकम् ॥ ११
सुवृत्तोरुकटीजङ्घं सुपादं सङ्गुलीनखम् ।
स्मृत्वा स्मृत्वैव तु गुणान्धात्रा यत्नाद्विनिर्मितं १२
सर्वलक्षणसंपन्नं निपुणं श्रुतिसागरम् ।
जेतारं तरसाऽरीणामजेयमरिभिर्बलात् ॥ १३
'प्रयोगबलसंहारप्रायश्चित्तं सुमङ्गलम् ।
प्रयोगविनियोगौ च स्मृतिं यस्य गुणान्विदुः' १४
दंशाङ्गं यश्चतुष्पादमिष्वस्त्रं वेद तत्त्वतः ।
साङ्गांस्तु चतुरो वेदान्सम्यगाख्यानपञ्चमान् १५
आराध्य त्र्यम्बकं यत्नाद्व्रतैरुग्रैर्महातपाः ।
अयोनिजायामुत्पन्नो द्रोणेनायोनिजेन यः ॥ १६
तमप्रतिमकर्माणं रूपेणाप्रतिमं भुवि ।
पारगं सर्वविद्यानां गुणार्णवमनिन्दितम् ।
तमभ्येत्यात्मजस्तुभ्यमश्वत्थामानमब्रवीत् ॥ १७
गुरुपुत्राद्य सर्वेषामस्माकं परमा गतिः ।
भवांस्तस्मान्नियोगात्ते कोऽस्तु सेनापतिर्मम ।
यं पुरस्कृत्य सहिता युधि जेष्याम पाण्डवान् ॥ १८
द्रौणिरुवाच ।
अयं कुलेन रूपेण तेजसा यशसा श्रिया ।
सर्वैर्गुणैः समुदितः शल्यो नोऽस्तु चमूपतिः॥१९
भागिनेयान्निजांस्त्यक्त्वा कृतज्ञोऽस्मानुपागतः ।
महासेनो महाबाहुर्महासेन इवापरः ॥ २०
एनं सेनापतिं कृत्वा नृपतिं नृपसत्तम ।
शक्यः प्राप्तुं जयोऽस्माभिर्देवैः स्कन्दमिवाजितम् ॥
तथोक्ते द्रोणपुत्रेण सर्व एव नराधिपाः ।
परिवार्य स्थिताः शल्यं जयशब्दांश्च चक्रिरे ॥ २२
युद्धाय च मतिं चक्रुरावेशं च परं ययुः ॥ २३
ततो दुर्योधनः शल्यं भूमौ स्थित्वा रथे स्थितम् ।
उवाच प्राञ्जलिर्भूत्वा द्रोणभीष्मसमं रणे ॥ २४
अयं स कालः संप्राप्तो मित्राणां मित्रवत्सल ।
यत्र मित्रममित्रं वा परीक्षन्ते बुधा जनाः ॥ २५
स भवानस्तु नः शूरः प्रणेता वाहिनीमुखे ।
रणं याते च भवति पाण्डवा मन्दचेतसः ।
भविष्यन्ति सहामात्याः पाञ्चालाश्च निरुद्यमाः ॥
दुर्योधनवचः श्रुत्वा शल्यो मद्राधिपस्तदा ।
उवाच वाक्यं वाक्यज्ञो राजानं राजसन्निधौ ॥ २७
यत्र मां मन्यसे राजन्कुरुराज करोमि तत् ।
त्वत्प्रियार्थं हि मे सर्वं प्राणा राज्यं धनानि च॥२८
दुर्योधन उवाच ।
सैनापत्येन वरये त्वामहं मातुलातुलम् ।
सोऽस्मान्पाहि युधां श्रेष्ठ स्कन्दो देवानिवाहवे २९
अभिषिच्यस्व राजेन्द्र देवानामिव पावकिः ।
जहि शत्रूरणे वीर महेन्द्रो दानवानिव ॥ ३०

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

ततस्तत्र ॥ ३ ॥ खड्ग शोभनाङ्गम् ॥ ८ ॥ स्थाणोः संबन्धिनो वृषस्य ॥ ९ ॥ तुभ्य तव ॥ १७ ॥ महासेनइव कार्तिकेयइव ॥ २० ॥ पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ॥ ६ ॥

दुर्योधनेन शल्यस्य सैनापत्येऽभिषेचनम् ॥ १ ॥ कृष्णेन युधिष्ठिरप्रति शल्यवधविधानम् ॥ २ ॥

सञ्जय उवाच ।
एतच्छ्रुत्वा वचो राज्ञो मद्रराजः प्रतापवान् ।
दुर्योधनं तदा राजन्वाक्यमेतदुवाच ह ॥ १
दुर्योधन महाबाहो शृणु वाक्यविदां वर ।
यावेतौ मन्यसे कृष्णौ रथस्थौ रथिनांवरौ ।
न मे तुल्यावुभावेतौ बाहुवीर्ये कथंचन ॥ २
उद्यतां पृथिवीं सर्वां ससुरासुरमानवाम् ।
योधयेयं रणमुखे संक्रुद्धः किमु पाण्डवान् ॥ ३
विजेष्यामि रणे पार्थान्सोमकांश्च समागतान् ।
अहं सेनाप्रणेता ते भविष्यामि न संशयः ॥ ४
तं च व्यूहं विधास्यामि न क(त)रिष्यन्ति यं परे ।
इति सत्यं ब्रवीम्येष दुर्योधन न संशयः ॥ ५
'अद्यैवाहं रणे सर्वान्पाञ्चालान्सह पाण्डवैः ।
निहनिष्यामि वा राजन्स्वर्गं यास्यामि वा हतः ॥६
अद्य पश्यन्तु मां लोका विचरन्तमभीतवत् ॥ ७
अद्य पाण्डुसुताः सर्वे वासुदेवः ससात्यकिः ।
पाञ्चालाश्चेदयश्चैव द्रौपदेयाश्च सर्वशः ।
धृष्टद्युम्नः शिखण्डी च सर्वे चापि प्रभद्रकाः ॥ ८
विक्रमं मम पश्यन्तु धनुषश्च महद्बलम् ।
लाघवं चास्त्रवीर्यं च भुजयोश्च बलं युधि ॥ ९
अद्य पश्यन्तु मे पार्थाः सिद्धाश्च सह चारणैः ।
यादृशं मे बलं बाह्वोः संपदस्त्रेषु या च मे ॥ १०
अद्य मे विक्रमं दृष्ट्वा पाण्डवानां महारथाः ।
प्रतीकारपरा भूत्वा चेष्टन्ते विविधाः क्रियाः ११
अद्य सैन्यानि पाण्डूनां द्रावयिष्ये समन्ततः १२
द्रोणभीष्मावति विभो सूतपुत्रं च संयुगे ।
विचरिष्ये रणमुखे प्रियार्थं तव कौरव ॥ १३
सञ्जय उवाच ।'
एवमुक्तस्ततो राजा मद्राधिपतिमञ्जसा ।
अभ्यषिञ्चत सेनाया मध्ये भरतसत्तम ।
विधिना शास्त्रदृष्टेन क्लिष्टरूपो विशांपते ॥ १४
अभिषिक्ते ततस्तस्मिन्सिंहनादो महानभूत् ।
तव सैन्येऽभ्यवाद्यन्त वादित्राणि च भारत ॥१५
हृष्टाश्चासंस्तथा योधा मद्रकाश्च महारथाः ।
तुष्टुवुश्चैव राजानं शल्यमाहवशोभिनम् ॥ १६
जय राजंश्चिरं जीव जहि शत्रून्समागतान् ।
तव बाहुबलं प्राप्य धार्तराष्ट्रो महाबलः ।
निखिलां पृथिवीं सर्वां प्रशास्तु निहतद्विषम् १७
त्वं हि शक्तो रणे जेतुं ससुरासुरमानवान् ।
मर्त्यधर्माण इह तु किमु सृञ्जयसोमकान् ॥ १८
एवं संपूज्यमानस्तु मद्राणामधिपो बली ।
हर्षं प्राप तदा वीरो दुरापमकृतात्मभिः ॥ १९
सञ्जय उवाच ।
अभिषिक्ते तथा शल्ये तव सैन्येषु मानद ।
न कर्णव्यसनं किंचिन्मेनिरे तत्र भारत ॥ २०
हृष्टाः सुमनसश्चैव बभूवुस्तत्र सैनिकाः ।
मेनिरे निहतान्पार्थान्मद्रराजवशंगतान् ॥ २१
प्रहर्षं प्राप्य सेना तु तावकी भरतर्षभ ।
तां रात्रिं सुखिता सुप्ता हर्षचित्ता च साभवत् ॥२२
सैन्यस्य तव तं शब्दं श्रुत्वा राजा युधिष्ठिरः ।
वार्ष्णेयमब्रवीद्वाक्यं सर्वक्षत्रस्य पश्यतः ॥ २३
मद्रराजः कृतः शल्यो धार्तराष्ट्रेण माधव ।
सेनापतिर्महेष्वासः सर्वसैन्येषु पूजितः ॥ २४
एतज्ज्ञात्वा यथाभूतं कुरु माधव यत्क्षमम् ।
भवान्नेता च गोप्ता च विधत्स्व यदनन्तरम् ॥ २५
तमब्रवीन्महाराज वासुदेवो जनाधिपम् ।
आर्तायनिमहं जाने यथातत्त्वेन भारत ॥ २६
वीर्यवांश्च महातेजा महात्मा च विशेषतः ।
कृती च चित्रयोधी च संयुक्तो लाघवेन च ॥२७
यादृग्भीष्मस्तथा द्रोणो यादृक्कर्णश्च संयुगे ।
तादृशस्तद्विशिष्टो वा मद्रराजो मतो मम ॥ २८
युध्यमानस्य तस्याहं चिन्तयानश्च भारत ।

क्लिष्टरूपः पराजयनिश्चयात् ॥ १४ ॥ मर्त्यधर्माण. मर्त्यधर्मेण. ॥ १८ ॥ षष्ठोऽध्याय. ॥ ६ ॥

योद्धारं नाधिगच्छामि तुल्यरूपं जनाधिप ॥ २९
शिखण्ड्यर्जुनभीमानां सात्वतस्य च भारत ।
धृष्टद्युम्नस्य च तथा बलेनाभ्यधिको रणे ॥ ३०
मद्रराजो महाराजः सिंहद्विरदविक्रमः ।
विचरिष्यत्यभीः काले कालः क्रुद्धः प्रजास्विव ३१
तस्याद्य न प्रपश्यामि प्रतियोद्धारमाहवे ।
त्वामृते पुरुषव्याघ्र शार्दूलसमविक्रमम् ॥ ३२
स त्वमेको हि लोकेऽस्मिन्नान्यस्त्वत्तः पुमान्भवेत् ।
मद्रराजं रणे क्रुद्धं यो हन्यात्कुरुनन्दन ॥ ३३
अहन्यहनि युध्यन्तं क्षोभयन्तं बलं तव ।
तस्माज्जहि रणे शल्यं मघवानिव शम्बरम् ॥ ३४
सौतेः पश्चादसौ वीरो धार्तराष्ट्रेण सत्कृतः ।
तवैव हि जयो नूनं हते मद्रेश्वरे युधि ।
तस्मिन्हते हतं सर्वं धार्तराष्ट्रबलं महत् ॥ ३५
एतच्छ्रुत्वा महाराज वचनं मम सांप्रतम् ।
प्रत्युद्याहि रणे पार्थ मद्रराजं महारथम् ॥ ३६
जहि चैनं महाबाहो वासवो नमुचिं यथा ॥ ३७
न चैवात्र दया कार्या मातुलोऽयं ममेति वै ।
क्षत्रधर्मं पुरस्कृत्य जहि मद्रजनेश्वरम् ॥ ३८
द्रोणभीष्मार्णवं तीर्त्वा कर्णपातालसंभवम् ।
मा निमज्जस्व सगणः शल्यमासाद्य गोष्पदम् ३९
यच्च ते तपसो वीर्यं यच्च क्षात्रं बलं तव ।
तद्दर्शय रणे सर्वं जहि चैनं महारथम् ॥ ४०
सञ्जय उवाच ।
एतावदुक्त्वा वचनं केशवः परवीरहा ।
जगाम शिबिरं सायं पूज्यमानोऽथ पाण्डवैः॥४१
केशवे तु तदा याते धर्मपुत्रो युधिष्ठिरः ।
विसृज्य सर्वान्भ्रातॄंश्च पाञ्चालानथ सोमकान् ।
सुष्वाप रजनीं तां तु विशल्य इव कुञ्जरः ॥ ४२
ते च सर्वे महेष्वासाः पाञ्चालाः पाण्डवास्तथा ।
कर्णस्य निधने हृष्टाः सुषुपुस्तां निशां तदा ॥४३
गतज्वरं महेष्वासं तीर्णपारं महारथम् ।
बभूव पाण्डवेयानां सैन्यं च मुदितं निशि ।
सूतपुत्रस्य निधनाज्जयं लब्ध्वा च मारिष ॥ ४४

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः ॥ ७ ॥

उभयसैन्यानां व्यूहरचनापूर्वकं द्वन्द्वीभूय युद्धाय निर्गमनम् ॥ १ ॥

सञ्जय उवाच ।
व्यतीतायां रजन्यां तु राजा दुर्योधनस्तदा ।
अब्रवीत्तावकान्सर्वान्सन्नह्यन्तां महारथाः ॥ १
राज्ञश्च मतमाज्ञाय समनह्यत सा चमूः ।
अयोजयन्रथांस्तूर्णं पर्यधावंस्तथा परे ॥ २
अकल्प्यन्त च मातङ्गाः समनह्यन्त पत्तयः ।
हयानास्तरणोपेतांश्चक्रुरन्ये सहस्रशः ॥ ३
वादित्राणां च निनदः प्रादुरासीद्विशांपते ।
योधानां सैन्यमुख्यानामन्योन्यं प्रतिगर्जताम्॥४
ततो बलानि सर्वाणि हतशिष्टानि भारत ।
संनद्धानि व्यदृश्यन्त मृत्युं कृत्वा निवर्तनम्॥५
शल्यं सेनापतिं कृत्वा मद्रराजं महारथाः ।
प्रविभज्य बलं सर्वमनीकेषु व्यवस्थिताः ॥ ६
ततः सर्वे समागम्य पुत्रेण तव सैनिकाः ।
कृपश्च कृतवर्मा च द्रौणिः शल्योऽथ सौबलः ।
अन्ये च पार्थिवाः शेषाः समयं चक्रुरादृताः॥७
'अद्याचार्यसुतो द्रौणिर्नैको युध्येत शत्रुभिः ।'
न न एकेन योद्धव्यं कथंचिदपि पाण्डवैः ॥ ८
यो ह्येकः पाण्डवैर्युध्येद्यो वा युध्यन्तमुत्सृजेत् ।
स पञ्चभिर्भवेद्युक्तः पातकैश्चोपपातकैः ।
अन्योन्यं परिरक्षद्भिर्योद्धव्यं सहितैश्च नः ॥ ९
एवं ते समयं कृत्वा सर्वे तत्र महारथाः ।
मद्रराजं पुरस्कृत्य तूर्णमभ्यद्रवन्परान् ॥ १०
तथैव पाण्डवा राजन्व्यूह्य सैन्यं महारणे ।

अभ्ययुः कौरवान्युद्धे योत्स्यमानाः समन्ततः ११
ततो बलं समभवत्क्षुब्धार्णवसमस्वनम् ।
समुद्धूतार्णवाकारमुदीर्णरथकुञ्जरम् ॥ १२
धृतराष्ट्र उवाच ।
द्रोणस्य चैव भीष्मस्य राधेयस्य च मे श्रुतम् ।
पातनं शंस मे भूयः शल्यस्याथ सुतस्य मे ॥ १३
कथं रणे हतः शल्यो धर्मराजेन सञ्जय ।
भीमेन च महाबाहुः पुत्रो दुर्योधनो मम ॥ १४
सञ्जय उवाच ।
क्षयं मनुष्यदेहानां तथा नागाश्वसंक्षयम् ।
शृणु राजन्स्थिरो भूत्वा संग्रामं शंसतो मम ॥ १५
आशा बलवती राजन्पुत्राणां तेऽभवत्तदा ॥ १६
हते द्रोणे च भीष्मे च सूतपुत्रे च पातिते ।
शल्यः पार्थान्रणे सर्वान्निहनिष्यति मारिष ॥ १७
तामाशां हृदये कृत्वा समाश्वस्य च भारत ।
मद्रराजं च समरे समाश्रित्य महारथम् ।
नाथवन्तं तदाऽऽत्मानममन्यत सुतस्तव ॥ १८
यदा कर्णे हते पार्थाः सिंहनादं प्रचक्रिरे ।
तदा राजन्धार्तराष्ट्रान्प्रविवेश महद्भयम् ॥ १९
तान्समाश्वास्य तु तदा मद्रराजः प्रतापवान् ।
व्यूह्य व्यूहं महाराज सर्वतोभद्रमृद्धिमत् ॥ २०
प्रत्युद्ययौ रणे पार्थान्मद्रराजः प्रतापवान् ।
विधून्वन्कार्मुकं चित्रं भारसं वेगवत्तरम् ।
रथप्रवरमास्थाय सैन्धवाश्वं महारथः ॥ २१
तस्य सूतो महाराज रथस्थोऽशोभयद्रथम् ।
स तेन संवृतो वीरो रथेनामित्रकर्शनः ।
तस्थौ शूरो महाराज पुत्राणां ते भयप्रणुत् ॥ २२
प्रयाणे मद्रराजोऽभून्मुखं व्यूहस्य दंशितः ।
मद्रकैः सहितो वीरैः कर्णपुत्रैश्च दुर्जयैः ॥ २३
सव्येऽभूत्कृतवर्मा च त्रिगर्तैः परिवारितः ।
गौतमो दक्षिणे पार्श्वे शकैश्च यवनैः सह ॥ २४
अश्वत्थामा पृष्ठतोऽभूत्काम्भोजैः परिवारितः ।
दुर्योधनोऽभवन्मध्ये रक्षितः कुरुपुङ्गवैः ॥ २५

हयानीकेन महता सौबलश्चापि संवृतः ।
प्रययौ सर्वसैन्येन कैतव्यश्च महारथः ॥ २६
पाण्डवाश्च महेष्वासा व्यूह्य सैन्यमरिंदमाः ।
त्रिधाभूता महाराज तव सैन्यमुपाद्रवन् ॥ २७
धृष्टद्युम्नः शिखण्डी च सात्यकिश्च महारथः ।
शल्यस्य वाहिनीं हन्तुमभिदुद्रुवुराहवे ॥ २८
ततो युधिष्ठिरो राजा स्वेनानीकेन संवृतः ।
शल्यमेवाभिदुद्राव जिघांसुर्भरतर्षभः ॥ २९
हार्दिक्यं च महेष्वासमर्जुनः शत्रुपूगहा ।
संशप्तकगणांश्चैव वेगितोऽभिविदुद्रुवे ॥ ३०
गौतमं भीमसेनो वै सोमकाश्च महारथाः ।
अभ्यद्रवन्त राजेन्द्र जिघांसन्तः परान्युधि ॥ ३१
माद्रीपुत्रौ तु शकुनिमुलूकं च महारथम् ।
ससैन्यौ सहसैन्यौ तावुपतस्थतुराहवे ॥ ३२
तथैवायुतशो योधास्तावकाः पाण्डवान्रणे ।
अभ्यवर्तन्त संक्रुद्धा विविधायुधपाणयः ॥ ३३
धृतराष्ट्र उवाच ।
हते भीष्मे महेष्वासे द्रोणे कर्णे जयद्रथे ।
कुरुष्वल्पावशिष्टेषु पाण्डवेषु च संयुगे ॥ ३४
संरब्धेषु च पार्थेषु पराक्रान्तेषु सञ्जय ।
मामकानां परेषां च किं शिष्टमभवद्बलम् ॥ ३५
सञ्जय उवाच ।
यथा वयं परे राजन्युद्धाय समुपस्थिताः ।
यावच्चासीद्बलं शिष्टं सङ्ग्रामे तन्निबोध मे ॥ ३६
एकादश सहस्राणि रथानां भरतर्षभ ।
दश दन्तिसहस्राणि सप्त चैव शतानि च ॥ ३७
पूर्णे शतसहस्रे द्वे हयानां तत्र भारत ।
पत्तिकोट्यस्तथा तिस्रो बलमेतत्तवाभवत् ॥ ३८
रथानां षट्सहस्राणि षट्सहस्राश्च कुञ्जराः ।
दश चाश्वसहस्राणि पत्तिकोटी च भारत ॥ ३९
एतद्बलं पाण्डवानामभवच्छेषमाहवे ।
एत एव समाजग्मुर्युद्धाय भरतर्षभ ॥ ४०
एवं विभज्य राजेन्द्र मद्रराजमते स्थिताः ।

पत्तिकोटी इति द्विवचनम् ॥ ३९ ॥

सप्तमोऽध्याय ॥ ७ ॥

पाण्डवान्प्रत्युदीयाम जयगृद्धाः प्रमन्यवः ॥ ४१
तथैव पाण्डवाः शूराः समरे जितकाशिनः ।
उपयाता नरव्याघ्राः पाञ्चालाश्च यशस्विनः ४२
एवमेते बलौघेन परस्परवधैषिणः ।
उपयाता नरव्याघ्राः पूर्वां सन्ध्यां प्रति प्रभो ॥४३
ततः प्रववृते युद्धं घोररूपं भयानकम् ।
तावकानां परेषां च निघ्नतामितरेतरम् ॥ ४४

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ॥ ८ ॥

अष्टादशदिवसयुद्धारम्भः ॥ १ ॥ संकुलयुद्धम् ॥ २ ॥

सञ्जय उवाच ।
ततः प्रववृते युद्धं कुरूणां भयवर्धनम् ।
सृञ्जयैः सह राजेन्द्र घोरं देवासुरोपमम् ॥ १
नरा रथा गजौघाश्च वाजिनश्च सहस्रशः ।
वाजिनश्च पराक्रान्ताः समाजग्मुः परस्परम् ॥ २
गजानां भीमरूपाणां द्रवतां निःस्वनो महान् ।
अश्रूयत यथा काले जलदानां नभस्तले ॥ ३
नागैरभ्याहताः केचित्सरथा रथिनोऽपतन् ।
व्यद्रवन्त रणे भीता द्राव्यमाणा मदोत्कटैः ॥ ४
हयौघान्पादरक्षांश्च रथिनस्तत्र शिक्षिताः ।
शरैः संप्रेषयामासुः परलोकाय भारत ॥ ५
सादिनः शिक्षिता राजन्परिवार्य महारथान् ।
विचरन्तो रणेऽभ्यघ्नन्प्रासशक्त्यृष्टिभिस्तथा ॥ ६
धन्विनः पुरुषाः केचित्परिवार्य महारथान् ।
एकं बहव आसाद्य प्रैषयन्यमसादनम् ॥ ७
नागान्रथवरांश्चान्ये परिवार्य महारथाः ।
सोत्तरा युधि निर्जघ्नुर्द्रवमाणं महारथम् ॥ ८
तथा च रथिनं क्रुद्धं विकिरन्तं शरान्बहून् ।
नागा जघ्नुर्महाराज परिवार्य समन्ततः ॥ ९
नागा नागमभिद्रुत्य रथी च रथिनं रणे ।
शक्तितोमरनाराचैर्निजघ्नुस्तत्र भारत ॥ १०
पादातानवमृद्नन्तो रथवारणवाजिनः ।
रणमध्ये व्यदृश्यन्त कुर्वन्तो महदाकुलम् ॥ ११
हयाश्च पर्यधावन्त चामरैरुपशोभिताः ।
हंसा हिमवतः प्रस्थे पिबन्त इव मेदिनीम् ॥१२
तेषां तु वाजिनां भूमिः खुरैश्चित्रा विशांपते ।
अशोभत यथा नारी करजैः क्षतविक्षता ॥ १३
वाजिनां खुरशब्देन रथनेमिस्वनेन च ।
पत्तीनां चापि शब्देन नागानां बृंहितेन च ॥१४
वादित्राणां च घोषेण शङ्खानां निनदेन च ।
अभवन्नादिता भूमिर्निर्घातैरिव भारत ॥ १५
धनुषां कूजमानानां शस्त्रौघानां च पात्यताम् ।
कवचानां प्रभाभिश्च न प्राज्ञायत किंचन ॥ १६
बहवो बाहवश्छिन्ना नागराजकरोपमाः ।
उद्वेष्टन्ते विचेष्टन्ते वेगं कुर्वन्ति दारुणम् ॥ १७
शिरसां च महाराज पततां धरणीतले ।
च्युतानामिव तालेभ्यः फलानां श्रूयते स्वनः ॥१८
शिरोभिः पतितैर्भाति रुधिरार्द्रैर्वसुंधरा ।
तपनीयनिभैः काले नलिनैरिव भारत ॥ १९
उद्वृत्तनयनैस्तैस्तु गतसत्वैः सुविक्षतैः ।
व्यभ्राजत मही राजन्पुण्डरीकैरिवावृता ॥ २०
बाहुभिश्चन्दनादिग्धैः सकेयूरैर्महाधनैः ।
पतितैर्भाति राजेन्द्र महाशक्रध्वजैरिव ॥ २१
ऊरुभिश्च नरेन्द्राणां विनिकृत्तैर्महाहवे ।
हस्तिहस्तोपमैर्जज्ञे संवृतं तद्रणाङ्गणम् ॥ २२
कबन्धशतसंकीर्णं छत्रचामरसंकुलम् ।
सेनावनं तच्छुशुभे वनं पुष्पाचितं यथा ॥ २३
तत्र योधा महाराज विचरन्तो ह्यभीतवत् ।
दृश्यन्ते रुधिराक्ताङ्गाः पुष्पिता इव किंशुकाः ॥२४
मातङ्गाश्चाप्यदृश्यन्त शरतोमरपीडिताः ।
पतन्तस्तत्र तत्रैव छिन्नाभ्रसदृशा रणे ॥ २५
गजानीकं महाराज वध्यमानं महात्मभिः ।

व्यदीर्यत दिशः सर्वा वातनुन्ना घना इव ॥ २६
ते गजा घनसंकाशाः पेतुरुर्व्यां समन्ततः ।
वज्रनुन्ना इव बभुः पर्वता युगसंक्षये ॥ २७
हयानां सादिभिः सार्धं पतितानां महीतले ।
राशयः स्म प्रदृश्यन्ते गिरिमात्रास्ततस्ततः ॥ २८
संजज्ञे रणभूमौ तु परलोकवहा नदी ।
शोणितोदा रथावर्ता ध्वजवृक्षास्थिशर्करा ॥ २९
भुजनक्रा धनुःस्रोता हस्तिशैला हयोपला ।
मेदोमज्जाकर्दमिनी छत्रहंसा गदोडुपा ॥ ३०
कवचोष्णीषसंछन्ना पताकारुचिरद्रुमा ।
चक्रचक्रावलीजुष्टा त्रिवेणूरगसंवृता ॥ ३१
शूराणां हर्षजननी भीरूणां भयवर्धनी ।
प्रावर्तत नदी रौद्रा कुरुसृञ्जयसंगमे । ३२
तां नदीं परलोकाय वहन्तीमतिभैरवाम् ।
तेरुर्वाहननौभिस्ते शूराः परिघबाहवः ॥ ३३
वर्तमाने तदा युद्धे निर्मर्यादे विशांपते ।
चतुरङ्गक्षये घोरे युद्धे देवासुरोपमे ॥ ३४
व्याक्रोशन्बान्धवानन्ये तत्र तत्र परंतप ।
क्रोशद्भिर्दयितैरन्ये भयार्ता न निवर्तिरे ॥ ३५
निर्मर्यादे तथा युद्धे वर्तमाने भयानके ।
अर्जुनो भीमसेनश्च मोहयांचक्रतुः परान् ॥ ३६
सा वध्यमाना महती सेना तव नराधिप ।
अमुह्यत्तत्र तत्रैव योषिन्मदवशादिव ॥ ३७
मोहयित्वा च तां सेनां भीमसेनधनंजयौ ।
दध्मतुर्वारिजौ तत्र सिंहनादांश्च चक्रतुः ॥ ३८
श्रुत्वैव तु महाशब्दं धृष्टद्युम्नशिखण्डिनौ ।
धर्मराजं पुरस्कृत्य मद्रराजमभिद्रुतौ ॥ ३९
तत्राश्चर्यमपश्याम घोररूपं महद्भयम् ।
शल्येन संगताः शूरा यदयुध्यन्त भागशः ॥ ४०
माद्रीपुत्रौ तु रभसौ कृतास्त्रौ युद्धदुर्मदौ ।
अभ्ययातां त्वरायुक्तौ जिगीषन्तौ बलं तव ॥ ४१
ततोऽभ्यावर्तत बलं तावकं भरतर्षभ ।
शरैः प्रणुन्नं बहुधा पाण्डवैर्जितकाशिभिः ॥ ४२
वध्यमाना चमूः सा तु पुत्राणां प्रेक्षतां तव ।
भेजे दश दिशो राजन्प्रणुन्ना शरवृष्टिभिः ॥ ४३
हाहाकारो महाञ्ज्ञे योधानां तत्र भारत ।
तिष्ठतिष्ठेति चाप्यासीद्रावितानां महात्मनाम् ४४
क्षत्रियाणां तथाऽन्योन्यं संयुगे जयमिच्छताम् ।
प्राद्रवन्नेव संभग्नाः पाण्डवैस्तव सैनिकाः ॥ ४५
त्यक्त्वा युद्धे प्रियान्पुत्रान्भ्रातॄनथ पितामहान् ।
मातुलान्भागिनेयांश्च वयस्यानपि भारत ॥ ४६
हयान्द्विपांस्त्वरयन्तो योधा जग्मुः समन्ततः ।
आत्मत्राणकृतोत्साहास्तावका भरतर्षभ ॥ ४७

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः ॥ ९ ॥

नकुलेन कर्णपुत्राणां त्रयाणां मारणम् ॥ १ ॥

सञ्जय उवाच ।
तत्प्रभग्नं बलं दृष्ट्वा मद्रराजः प्रतापवान् ।
उवाच सारथिं तूर्णं चोदयाश्वान्महाजवान् ॥ १
एष तिष्ठति वै राजा पाण्डुपुत्रो युधिष्ठिरः ।
छत्रेण ध्रियमाणेन पाण्डुरेण विराजता ॥ २
अत्र मां प्रापय क्षिप्रं पश्य मे सारथे बलम् ।
न समर्था हि मे पार्थाः स्थातुमद्य पुरो युधि ॥ ३
एवमुक्तस्ततः प्रायान्मद्रराजस्य सारथिः ।
यत्र राजा सत्यसन्धो धर्मपुत्रो युधिष्ठिरः ॥ ४
आपतन्तं च सहसा पाण्डवानां महद्बलम् ।
दधारैको रणे शल्यो वेलोद्वृत्तमिवार्णवम् ॥ ५
पाण्डवानां बलौघस्तु शल्यमासाद्य मारिष ।
व्यतिष्ठत तदा युद्धे सिन्धोर्वेग इवाचलम् ॥ ६
मद्रराजं तु समरे दृष्ट्वा युद्धाय धिष्ठितम् ।

न निवर्तिरे न निवर्तिता. ॥ ३५ ॥

अष्टमोऽध्यायः ॥ ८ ॥

कुरवः सव्यवर्तन्त मृत्युं कृत्वा निवर्तनम् ॥ ७
तेषु राजन्निवृत्तेषु व्यूढानीकेषु सर्वशः ।
प्रावर्तत महारौद्रः सङ्ग्रामः शोणितोदकः ॥ ८
समार्च्छच्चित्रसेनं तु नकुलो युद्धदुर्मदः ।
तौ परस्परमासाद्य चित्रकार्मुकधारिणौ ॥ ९
मेघाविव यथोद्वृत्तौ दक्षिणोत्तरवर्षिणौ ।
शरतोयैः सिषिचतुस्तौ परस्परमाहवे ॥ १०
नान्तरं तत्र पश्यामः पाण्डवस्येतरस्य च ।
उभौ कृतास्त्रौ बलिनौ रथचर्याविशारदौ ।
परस्परवधे यत्तौ छिद्रान्वेषणतत्परौ ॥ ११
चित्रसेनस्तु भल्लेन पीतेन निशितेन च ।
नकुलस्य महाराज मुष्टिदेशेऽच्छिनद्धनुः ॥ १२
अथैनं छिन्नधन्वानं रुक्मपुङ्खैः शिलाशितैः ।
त्रिभिः शरैरसंभ्रान्तो ललाटे वै समार्पयत् ॥ १३
हयांश्चास्य शरैस्तीक्ष्णैः प्रेषयामास मृत्यवे ।
तथा ध्वजं सारथिं च त्रिभिस्त्रिभिरपातयत् ॥ १४
स शत्रुभुजनिर्मुक्तैर्ललाटस्थैस्त्रिभिः शरैः ।
नकुलः शुशुभे राजंस्त्रिशृङ्ग इव पर्वतः ॥ १५
स च्छिन्नधन्वा विरथः खड्गमादाय चर्म च ।
रथादवातरद्वीरः शैलाग्रादिव केसरी ॥ १६
पद्भ्यामापततस्तस्य शरवृष्टिं समासृजत् ।
नकुलोऽप्यग्रसत्तां वै चर्मणा लघुविक्रमः ॥ १७
चित्रसेनरथं प्राप्य चित्रयोधी जितश्रमः ।
आरुरोह महाबाहुः सर्वसैन्यस्य पश्यतः ॥ १८
सकुण्डलं समुकुटं सुनसं स्वायतेक्षणम् ।
चित्रसेनशिरः कायादपाहरत पाण्डवः ॥ १९
स पपात रथात्तस्मादिवाकरसमद्युतिः ॥ २०
चित्रसेनशिरस्तत्तु दृष्ट्वा तत्र महारथाः ।
साधुवादस्वनांश्चक्रुः सिंहनादांश्च पुष्कलान् ॥ २१
विशस्तं भ्रातरं दृष्ट्वा कर्णपुत्रौ महारथौ ।
सुशर्मा सत्यसेनश्च मुञ्चन्तौ विविधाञ्शरान् ॥ २२
ततोऽभ्यधावतां तूर्णं पाण्डवं रथिनां वरम् ।
जिघांसन्तौ यथा नागं व्याघ्रौ राजन्महावने ॥ २३
तावभ्येत्य महाबाहू द्वावप्यतिमहारथौ ।
शरौघान्सम्यगस्यन्तौ जीमूतौ सलिलं यथा ॥ २४
स शरैः सर्वतो विद्धः प्रहृष्ट इव पाण्डवः ।
अन्यत्कार्मुकमादाय रथमारुह्य वेगवान् ।
अतिष्ठत रणे वीरः क्रुद्धरूप इवान्तकः ॥ २५
तस्य तौ भ्रातरौ राजञ्शरैः सन्नतपर्वभिः ।
रथं विशकलीकर्तुं समारब्धौ विशांपते ॥ २६
ततः प्रहस्य नकुलश्चतुर्भिश्चतुरो रणे ।
जघान निशितैर्बाणैः सत्यसेनस्य वाजिनः ॥ २७
ततः सन्धाय नाराचं रुक्मपुङ्खं शिलाशितम् ।
धनुश्चिच्छेद राजेन्द्र सत्यसेनस्य पाण्डवः ॥ २८
अथान्यं रथमास्थाय धनुरादाय चापरम् ।
सत्यसेनः सुशर्मा च पाण्डवं पर्यधावताम् ॥ २९
अविध्यत्तावसंभ्रान्तौ माद्रीपुत्रः प्रतापवान् ।
द्वाभ्यां द्वाभ्यां महाराज शराभ्यां रणमूर्धनि ३०
सुशर्मा तु ततः क्रुद्धः पाण्डवस्य महद्धनुः ।
चिच्छेद प्रहसन्युद्धे क्षुरप्रेण महारथः ॥ ३१
अथान्यद्धनुरादाय नकुलः क्रोधमूर्च्छितः ।
सुशर्माणं पञ्चभिर्विद्ध्वा ध्वजमेकेन चिच्छेद ॥ ३२
सत्यसेनस्य स धनुर्हस्तावापं च मारिष ।
चिच्छेद तरसा युद्धे तत उच्चुक्रुशुर्जनाः ॥ ३३
अथान्यद्धनुरादाय वेगघ्नं भारसाधनम् ।
शरैः संछादयामास समन्तात्पाण्डुनन्दनम् ॥ ३४
सन्निवार्य तु तान्बाणान्नकुलः परवीरहा ।
सत्यसेनसुशर्माणौ द्वाभ्यां द्वाभ्यामविध्यत ॥ ३५
तावेनं प्रत्यविध्येतां पृथक्पृथगजिह्मगैः ।
सारथिं चास्य राजेन्द्र शितैर्विव्यधतुः शरैः ॥ ३६
सत्यसेनो रथेषां तु नकुलस्य धनुस्तथा ।
पृथक् शराभ्यां चिच्छेद कृतहस्तः प्रतापवान् ॥ ३७
स रथेऽतिरथस्तिष्ठन्रथशक्तिं परामृशत् ॥ ३८
स्वर्णदण्डामकुण्ठाग्रां तैलधौतां सुनिर्मलाम् ।
लेलिहानामिव विभो नागकन्यां महाविषाम् ॥ ३९
समुद्यम्य च चिक्षेप सत्यसेनस्य संयुगे ॥ ४०
सा तस्य हृदयं गत्वा बिभेद शतधा नृप ।
स पपात रथाद्भूमिं गतसत्वोऽल्पचेतनः ॥ ४१

चित्रसेन· कर्णपुत्रः ॥ ९ ॥
शल्य० ३

नवमोऽध्याय· ॥ ९ ॥

भ्रातरं निहतं दृष्ट्वा सुशर्मा क्रोधमूर्च्छितः ।
अभ्यवर्षच्छरैस्तूर्णं पादातं पाण्डुनन्दनम् ॥ ४२
चतुर्भिश्चतुरो वाहान्ध्वजं छित्त्वा च पञ्चभिः ।
त्रिभिर्वै सारथिं हत्वा कर्णपुत्रो ननाद ह ॥ ४३
नकुलं विरथं दृष्ट्वा द्रौपदेयो महारथम् ।
सुतसोमोऽभिदुद्राव परीप्सन्पितरं रणे ॥ ४४
ततोऽधिरुह्य नकुलः सुतसोमस्य तं रथम् ।
शुशुभे भरतश्रेष्ठो गिरिस्थ इव केसरी ॥ ४५
अन्यत्कार्मुकमादाय सुशर्माणमयोधयत् ॥ ४६
तत्र तौ शरवर्षाभ्यां समासाद्य परस्परम् ।
परस्परवधे यत्नं चक्रतुः सुमहारथौ ॥ ४७
सुशर्मा तु ततः क्रुद्धः पाण्डवं विंशतिभिः शरैः ।
सुतसोमं तु विंशत्या बाह्वोरुरसि चार्पयत् ॥ ४८
ततः क्रुद्धो महाराज नकुलः परवीरहा ।
शरैस्तस्य दिशः सर्वाश्छादयामास वीर्यवान् ४९
ततो गृहीत्वा तीक्ष्णाग्रमर्धचन्द्रं सुतेजनम् ।
आकर्णपूर्णं चिक्षेप कर्णपुत्राय संयुगे ॥ ५०
तस्य तेन शिरः कायाज्जहार नृपसत्तम ।
पश्यतां सर्वसैन्यानां तदद्भुतमिवाभवत् ॥ ५१
स हतः प्रापतद्राजन्नकुलेन महात्मना ।
नदीवेगादिवारुग्णस्तीरजः पादपो महान् ॥ ५२
कर्णपुत्रवधं दृष्ट्वा नकुलस्य च विक्रमम् ।
प्रदुद्राव भयात्सेना तावकी भरतर्षभ ॥ ५३
तां तु सेनां महाराज मद्रराजः प्रतापवान् ।
अपालयद्रणे शूरः सेनापतिररिंदमः ॥ ५४
विभीस्तस्थौ महाराज व्यवस्थाप्य च वाहिनीम् ।
सिंहनादं भृशं कृत्वा धनुःशब्दं च दारुणम् ॥ ५५
तावकाः समरे राजन्नक्षिता दृढधन्वना ।
प्रत्युद्ययुश्च तांस्ते तु समन्ताद्विगतव्यथाः ॥ ५६
मद्रराजं महेष्वासं परिवार्य समन्ततः ।
स्थिता राजन्महासेना योद्धुकामा समन्ततः ॥ ५७
सात्यकिर्भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ।
युधिष्ठिरं पुरस्कृत्य ह्रीनिषेवमरिंदमम् ॥ ५८
परिवार्य रणे वीराः सिंहनादं प्रचक्रिरे ।
बाणशङ्खरवांस्तीव्रान्भेर्यश्चैवाथ विविधा दधुः ॥ ५९
तथैव तावकाः सर्वे मद्राधिपतिमञ्जसा ।
परिवार्य सुसंरब्धाः पुनर्युद्धमरोचयन् ॥ ६०
ततः प्रववृते युद्धं भीरूणां भयवर्धनम् ।
तावकानां परेषां च मृत्युं कृत्वा निवर्तनम् ॥ ६१
यथा देवासुरं युद्धं पूर्वमासीद्विशांपते ।
अभीतानां तथाऽऽसीत्तद्यमराष्ट्रविवर्धनम् ॥ ६२
ततः कपिध्वजो राजन्हत्वा संशप्तकान्रणे ।
अभ्यद्रवत तां सेनां कौरवीं पाण्डुनन्दनः ॥ ६३
तथैव पाण्डवाः सर्वे धृष्टद्युम्नपुरोगमाः ।
अभ्यधावन्त तां सेनां विसृजन्तः शिताञ्शरान् ६४
पाण्डवैरवकीर्णानां संमोहः समजायत ।
न च जज्ञुस्त्वनीकानि दिशो वा विदिशस्तथा ६५
आपूर्यमाणा निशितैः शरैः पाण्डवचोदितैः ।
हतप्रवीरा विध्वस्ता वार्यमाणा समन्ततः ।
कौरव्यवध्यत चमूः पाण्डुपुत्रैर्महारथैः ॥ ६६
तथैव पाण्डवं सैन्यं शरै राजन्समन्ततः ।
रणेऽहन्यत पुत्रैस्ते शतशोऽथ सहस्रशः ॥ ६७
ते सेने भृशसंतप्ते वध्यमाने परस्परम् ।
व्याकुले समपद्येतां वर्षासु सरिताविव ॥ ६८
आविवेश ततस्तीव्रं तावकानां महद्भयम् ।
पाण्डवानां च राजेन्द्र तथाभूते महाहवे ॥ ६९

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ॥ १० ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
तस्मिन्विलुलिते सैन्ये वध्यमाने परस्परम् ।
द्रवमाणेषु योधेषु विद्रवत्सु च दन्तिषु ॥ १
क्रूजतां स्तनतां चैव पदातीनां महाहवे ।

निहतेषु महाराज हयेषु बहुधा तदा ॥ २
प्रक्षये दारुणे घोरे संहारे सर्वदेहिनाम् ।
नानाशस्त्रसमावापे व्यतिषक्तरथद्विपे ॥ ३
हर्षणे युद्धशौण्डानां भीरूणां भयवर्धने ।
गाहमानेषु योधेषु परस्परवधैषिषु ॥ ४
प्राणादाने महाघोरे वर्तमाने दुरोदरे ।
संग्रामे घोररूपे तु यमराष्ट्रविवर्धने ॥ ५
पाण्डवास्तावकं सैन्यं व्यधमन्निशितैः शरैः ।
तथैव तावका योधा जघ्नुः पाण्डवसैनिकान् ॥ ६
तस्मिंस्तथा वर्तमाने युद्धे भीरुभयावहे ।
पूर्वाह्णे चापि संप्राप्ते भास्करोदयनं प्रति ॥ ७
लब्धलक्षाः परे राजन्रक्षितास्तु महात्मना ।
अयोधयंस्तव बलं मृत्युं कृत्वा निवर्तनम् ॥ ८
बलिभिः पाण्डवैर्दक्षैर्लब्धलक्षैः प्रहारिभिः ।
कौरव्यसीदत्पृतना मृगीवाग्निभयाकुला ॥ ९
तां दृष्ट्वा सीदतीं सेनां पङ्के गामिव दुर्बलाम् ।
उज्जिहीर्षुस्तदा शल्यः प्रायात्पाण्डुसुतान्प्रति ॥ १०
मद्रराजः सुसंक्रुद्धो गृहीत्वा धनुरुत्तमम् ।
अभ्यद्रवत संग्रामे पाण्डवानाततायिनः ॥ ११
पाण्डवा अपि भूपाल समरे जितकाशिनः ।
मद्रराजं समासाद्य विभिदुर्निशितैः शरैः ॥ १२
ततः शरशतैस्तीक्ष्णैर्मद्रराजो महारथः ।
अर्दयामास तां सेनां धर्मराजस्य पश्यतः ॥ १३
प्रादुरासन्निमित्तानि नानारूपाण्यनेकशः ।
चचाल शब्दं कुर्वाणा मही चापि सपर्वता ॥ १४
[सदण्डशूला दीप्ताग्रा दीर्यमाणाः समन्ततः ।]
उल्का भूमिं दिवः पेतुराहत्य रविमण्डलम् ॥ १५
मृगाश्च महिषाश्चापि पक्षिणश्च विशांपते ।
अपसव्यं तदा चक्रुः सेनां ते बहुशो नृप ॥ १६
[भृगुसूनुधरापुत्रौ शशिजेन समन्वितौ ।
चरमं पाण्डुपुत्राणां पुरस्तात्सर्वभूभुजाम् ॥ १७
शस्त्राग्रेष्वभवज्ज्वाला नेत्राण्याहत्य वर्षती ।
शिरःस्वलीयन्त भृशं काकोलूकाश्च केतुषु] ॥ १८
ततस्तद्युद्धमत्युग्रमभवत्सहचारिणाम् ।
तथा सर्वाण्यनीकानि सन्निपत्य जनाधिप ॥ १९
अभ्यद्रवत्कौरवो राजा पाण्डवानामनीकिनीम् ।
शल्यस्तु शरवर्षेण वर्षन्निव सहस्रदृक् ॥ २०
अभ्यवर्षत धर्मात्मा कुन्तीपुत्रं युधिष्ठिरम् ।
भीमसेनं शरैश्चापि रुक्मपुङ्खैः शिलाशितैः ॥ २१
द्रौपदेयांस्तथा सर्वान्माद्रीपुत्रौ च पाण्डवौ ।
धृष्टद्युम्नं च शैनेयं शिखण्डिनमथापि च ॥ २२
एकैकं दशभिर्बाणैर्विव्याध स महाबलः ।
ततोऽसृजद्बाणवर्षं घर्मान्ते मघवानिव ॥ २३
ततः प्रभद्रका राजन्सोमकाश्च सहस्रशः ।
पतिताः पात्यमानाश्च दृश्यन्ते शल्यसायकैः ॥ २४
अमराणामिव व्राताः शलभानामिव व्रजाः ।
ह्रादिन्य इव मेघेभ्यः शल्यस्य न्यपतञ्शराः ॥ २५
द्विरदास्तुरगाश्चार्ताः पत्तयो रथिनस्तथा ।
शल्यस्य बाणैरपतन्बभ्रमुर्व्यनदंस्तथा ॥ २६
आविष्ट इव मद्रेशो मन्युना पौरुषेण च ।
प्राच्छादयदरीन्सङ्ख्ये कालसृष्ट इवान्तकः ।
विनर्दमानो मद्रेशो मेघह्रादो महाबलः ॥ २७
सा वध्यमाना शल्येन पाण्डवानामनीकिनी ।
अजातशत्रुं कौन्तेयमभ्यधावद्युधिष्ठिरम् ॥ २८
तां संमर्द्य शतैः सङ्ख्ये लघुहस्तः शितैः शरैः ।
बाणवर्षेण महता युधिष्ठिरमताडयत् ॥ २९
तमापतन्तं जात्यश्वैः क्रुद्धो राजा युधिष्ठिरः ।
अवारयच्छरैस्तीक्ष्णैर्महाद्विपमिवाङ्कुशैः ॥ ३०
तस्य शल्यः शरं घोरं मुमोचाशीविषोपमम् ।
सोऽभ्यविध्यन्महात्मानं वेगेनाभ्यपतच्च गाम् ॥ ३१
ततो वृकोदरः क्रुद्धः शल्यं विव्याध सप्तभिः ।
पञ्चभिः सहदेवस्तु नकुलो दशभिः शरैः ॥ ३२
द्रौपदेयाश्च शत्रुघ्नं शूरमार्तायनिं शरैः ।
अभ्यवर्षन्महाराज मेघा इव महीधरम् ॥ ३३

भृग्विति । सर्वभूभुजा कृत्स्नपृथ्वीपतीना पाण्डुपुत्राणा पाण्डवानां चरम विलोमगणनया प्रथम युधिष्ठिरमभिलक्ष्य शुक्रभौमबुधाः सप्तमस्थाने बलवहा. आसन् । एतच्च सर्वभूभुजामिति फलस्य जनकमित्यर्थं ॥ १७ ॥ आहत्य स्पृष्ट्वा । वर्षती भुवि पतन्ती ॥ १८ ॥

ततो दृष्ट्वा वार्यमाणं शल्यं पार्थैः समन्ततः ।
कृतवर्मा कृपश्चैव संक्रुद्धावभ्यधावताम् ॥ ३४
उलूकश्च महावीर्यः शकुनिश्चापि सौबलः ।
समागम्याथ शनकैरश्वत्थामा महाबलः ।
तव पुत्राश्च कार्त्स्न्येन जुगुपुः शल्यमाहवे ॥ ३५
भीमसेनं त्रिभिर्विद्ध्वा कृतवर्मा शिलीमुखैः ।
बाणवर्षेण महता क्रुद्धरूपमवारयत् ।
धृष्टद्युम्नं ततः क्रुद्धो बाणवर्षैरपीडयत् ॥ ३६
द्रौपदेयांश्च शकुनिर्यमौ च द्रौणिरभ्ययात् ॥ ३७
दुर्योधनो युधांश्रेष्ठ आहवे केशवार्जुनौ ।
समभ्ययादुग्रतेजाः शरैश्चाप्यहनद्बली ॥ ३८
एवं द्वन्द्वशतान्यासंस्त्वदीयानां परैः सह ।
घोररूपाणि चित्राणि तत्रतत्र विशांपते ॥ ३९
ऋक्षवर्णाञ्जघानाश्वान्भोजो भीमस्य संयुगे ।
सोऽवतीर्य रथोपस्थाद्धताश्वात्पाण्डुनन्दनः ।
कालो दण्डमिवोद्यम्य गदापाणिरयुध्यत ॥ ४०
प्रमुखे सहदेवस्य जघानाश्वान्स मद्रराट् ।
ततः शल्यस्य तनयं सहदेवोऽसिनावधीत् ॥ ४१
गौतमः पुनराचार्यो धृष्टद्युम्नमयोधयत् ।
असंभ्रान्तमसंभ्रान्तो यत्नवान्यत्नवत्तरम् ॥ ४२
द्रौपदेयांस्तथा वीरानेकैकं दशभिः शरैः ।
अविद्ध्यदाचार्यसुतो नातिक्रुद्धो हसन्निव ॥ ४३
[पुनश्च भीमसेनस्य जघानाश्वांस्तथाऽऽहवे ।
सोऽवतीर्य रथात्तूर्णं हताश्वः पाण्डुनन्दनः ॥ ४४
कालो दण्डमिवोद्यम्य गदां क्रुद्धो महाबलः ।
पोथयामास तुरगान्रथं च कृतवर्मणः ।
कृतवर्मा त्ववप्लुत्य रथात्तस्मादपाक्रमत् ॥] ४५
शल्योऽपि राजन्संक्रुद्धो निघ्नन्सोमकपाण्डवान् ।
पुनरेव शितैर्बाणैर्युधिष्ठिरमपीडयत् ॥ ४६
तस्य भीमो रणे क्रुद्धः संदश्य दशनच्छदम् ।
विनाशायाभिसंधाय गदामादाय वीर्यवान् ॥ ४७
यमदण्डप्रतीकाशां कालरात्रिमिवोद्यताम् ।
गजवाजिमनुष्याणां देहान्तकरणीमति ॥ ४८
हेमपट्टपरिक्षिप्तामुल्कां प्रज्वलितामिव ।
शैक्यां व्यालीमिवात्युग्रां वज्रकल्पामयोमयीम् ४९
चन्दनागुरुपङ्काक्तां प्रमदामीप्सितामिव ।
वसामेदोपदिग्धाङ्गीं जिह्वां वैवस्वतीमिव ॥ ५०
पटुघण्टाशतरवां वासवीमशनीमिव ।
निर्मुक्ताशीविषाकारां पृक्तां गजमदैरपि ॥ ५१
त्रासनीं सर्वभूतानां स्वसैन्यपरिहर्षिणीम् ।
मनुष्यलोके विख्यातां गिरिशृङ्गविदारणीम् ॥५२
यया कैलासभवने महेश्वरसखं बली ।
आह्वयामास कौन्तेयः संक्रुद्धमलकाधिपम् ॥ ५३
यया मायामयान्दृप्तान्सुबहून्धनदालये ।
जघान गुह्यकान्क्रुद्धो मन्दारार्थे महाबलः ।
निवार्यमाणो बहुभिर्द्रौपद्याः प्रियमास्थितः ॥५४
तां वज्रमणिरत्नौघकल्माषां वज्रगौरवाम् ।
समुद्यम्य महाबाहुः शल्यमभ्यपतद्रणे ॥ ५५
गदया युद्धकुशलस्तया दारुणनादया ।
पोथयामास शल्यस्य चतुरोऽश्वान्महाजवान् ॥५६
ततः शल्यो रणे क्रुद्धः पीने वक्षसि तोमरम् ।
निचखान नदन्वीरो वर्म भित्त्वा च सोऽभ्ययात् ५७
वृकोदरस्त्वसंभ्रान्तस्तमेवोद्धृत्य तोमरम् ।
यन्तारं मद्रराजस्य निर्बिभेद तदा हृदि ॥ ५८
स भिन्नवर्मा रुधिरं वमन्वित्रस्तमानसः ।
पपाताभिमुखो भीमं मद्रराजस्त्वपाक्रमत् ॥ ५९
कृतप्रतिकृतं दृष्ट्वा शल्यो विस्मितमानसः ।
गदामाश्रित्य धर्मात्मा प्रत्यमित्रमवैक्षत ॥ ६०
ततः सुमनसः पार्था भीमसेनमपूजयन् ।
ते दृष्ट्वा कर्म संग्रामे घोरमक्लिष्टकर्मणः ॥ ६१

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे दशमोऽध्यायः ॥ १० ॥

परिक्षिप्ता परिच्छन्नाम् ॥ ४९ ॥ वासवीमैन्द्रीम् । रासनीमिति पाठे शब्दवतीम् ॥ ५१ ॥ महेश्वरसख कुबेरम् ॥ ५३ ॥

दशमोऽध्याय ॥ १० ॥

एकादशोऽध्यायः ॥ ११ ॥

शल्यभीमयोर्गदायुद्धम् ॥ १ ॥

सञ्जय उवाच।
पतितं प्रेक्ष्य यन्तारं शल्यः शैक्यायसीं गदाम्।
आदाय तरसा राजंस्तस्थौ गिरिरिवाचलः ॥ १
तं दीप्तमिव कालाग्निं पाशहस्तमिवान्तकम्।
सशृङ्गमिव कैलासं सवज्रमिव वासवम् ॥ २
सशूलमिव हर्यक्षं सचक्रमिव चक्रिणम्।
सशक्तिमिव सेनान्यं वने मत्तमिव द्विपम्।
जवेनाभ्यपतद्भीमः प्रगृह्य महतीं गदाम् ॥ ३
ततः शङ्खप्रणादश्च तूर्याणां च सहस्रशः।
सिंहनादश्च संजज्ञे शूराणां हर्षवर्धनः ॥ ४
प्रैक्षन्त सर्वतस्तौ हि योधा मत्ताविव द्विपौ।
तावकाश्चापरे चैव साधुसाध्वित्यपूजयन् ॥ ५
न हि मद्राधिपादन्यो रामाद्वा यदुनन्दनात्।
सोढुमुत्सहते वेगं भीमसेनस्य संयुगे ॥ ६
तथा मद्राधिपस्यापि गदावेगं महात्मनः।
सोढुमुत्सहते नान्यः पुमान्युधि वृकोदरात् ॥ ७
तौ वृषाविव नर्दन्तौ मण्डलानि विचेरतुः।
आवर्तितौ गदाहस्तौ मद्रराजवृकोदरौ ॥ ८
मण्डलावर्तमार्गेषु गदाविहरणेषु च।
निर्विशेषमभूद्युद्धं तयोः पुरुषसिंहयोः ॥ ९
तप्तहेममयैः शुभ्रैर्बभूव भयवर्धिनी।
अग्निज्वालैरिवाबद्धा पट्टैः शल्यस्य सा गदा ॥१०
तथैव चरतो मार्गान्मण्डलेषु महात्मनः।
विद्युदभ्रप्रतीकाशा भीमस्य शुशुभे गदा ॥ ११
ताडिता मद्रराजेन भीमस्य गदया गदा।
दह्यमानेव खे राजन्साऽसृजत्पावकार्चिषः ॥ १२
तथा भीमेन शल्यस्य ताडिता गदया गदा।
अङ्गारवर्षं मुमुचे तदद्भुतमिवाभवत् ॥ १३
दन्तैरिव महानागौ शृङ्गैरिव महर्षभौ।
तौ विरेजतुरन्योन्यं गदाग्राभ्यां परिक्षतौ ॥ १४
तौ गदाभिहतैर्गात्रैः क्षणेन रुधिरोक्षितौ।
प्रेक्षणीयतरावास्तां पुष्पिताविव किंशुकौ ॥ १५
गदया मद्रराजस्य सव्यदक्षिणमाहतः।
भीमसेनो महाबाहुर्न चचालाचलो यथा ॥ १६
तथा भीमगदावेगैस्ताड्यमानो मुहुर्मुहुः।
शल्यो न विव्यथे राजन्दन्तिनेव महागिरिः ॥१७
शुश्रुवे दिक्षु सर्वासु तयोः पुरुषसिंहयोः।
गदानिपातसंह्रादो वज्रयोरिव निःस्वनः ॥ १८
निवृत्य तु महावीर्यौ समुच्छ्रितमहागदौ।
पुनरन्तरमार्गस्थौ मण्डलानि विचेरतुः ॥ १९
अथाभ्येत्य पदान्यष्टौ सन्निपातोऽभवत्तयोः।
उद्यम्य लोहदण्डाभ्यामतिमानुषकर्मणोः ॥ २०
पोथयन्तौ तदाऽन्योन्यं मण्डलानि विचेरतुः।
क्रियाविशेषं कृतिनौ दर्शयामासतुस्तदा ॥ २१
अभ्युद्यतगदौ वीरौ सशृङ्गाविव पर्वतौ।
तावाजघ्नतुरन्योन्यं मण्डलानि विचेरतुः ॥ २२
क्रियाविशेषकृतिनौ रणभूमितलेऽचलौ।
तौ परस्परसंरम्भाद्गदाभ्यां सुभृशाहतौ ॥ २३
युगपत्पेततुर्वीरावुभाविन्द्रबली इव।
उभयोः सेनयोर्योधास्तदा हाहाकृताभवन् ॥ २४
भृशं मर्मस्वभिहतावुभावास्तां सुविह्वलौ ॥ २५
ततः स्वरथमारोप्य मद्राणामृषभं रणे।
अपोवाह कृपः शल्यं तूर्णमायोधनादथ ॥ २६
क्षीबवद्विह्वलत्वात्तु निमेषात्पुनरुत्थितः।
भीमसेनो गदापाणिः समाद्रवत मद्रपम् ॥ २७
ततस्तु तावकाः शूरा नानाशस्त्रसमायुताः।
नानावादित्रशब्देन पाण्डुसेनामयोधयन् ॥ २८
भुजावुच्छ्रित्य शस्त्रं च शब्देन महता ततः।
अभ्यद्रवन्महाराज दुर्योधनपुरोगमाः ॥ २९
तदनीकमभिप्रेक्ष्य ततस्ते पाण्डुनन्दनाः।
प्रययुः सिंहनादेन दुर्योधनवधेप्सया ॥ ३०
तेषामापततां तूर्णं पुत्रस्ते भरतर्षभ।

हर्यक्ष रुद्रम् ॥ ३ ॥ शुभ्रैर्दीप्तिमद्भिः ॥ १० ॥

एकादशोऽध्यायः ॥ ११ ॥

प्रासेन चेकितानं वै विव्याध हृदये भृशम् ॥३१
स पपात रथोपस्थे तव पुत्रेण पातितः ।
रुधिरौघपरिक्लिन्नः प्रविश्य विपुलं तमः ॥ ३२
चेकितानं हतं दृष्ट्वा पाण्डवेया महारथाः ।
असक्तमभ्यवर्षन्त शरवर्षाणि भागशः ॥ ३३
तावकानामनीकेषु पाण्डवा जितकाशिनः ।
व्यचरन्त महाराज प्रेक्षणीयाः समन्ततः ॥ ३४
कृपश्च कृतवर्मा च सौबलश्च महारथः ।
अयोधयन्धर्मराजं मद्रराजपुरस्कृताः ॥ ३५
भारद्वाजस्य हन्तारं भूरिवीर्यपराक्रमम् ।
दुर्योधनो महाराज धृष्टद्युम्नमयोधयत् ॥ ३६
त्रिसाहस्रास्तथा राजंस्तव पुत्रेण चोदिताः ।
अयोधयन्त विजयं जैगर्तानां महारथाः ॥ ३७
विजये धृतसंकल्पाः समरे त्यक्तजीविताः ।
प्राविशंस्तावका राजन्हंसा इव महत्सरः ॥ ३८
ततो युद्धमभूद्घोरं परस्परवधैषिणाम् ।
अन्योन्यवधसंयुक्तमन्योन्यप्रीतिवर्धनम् ॥ ३९
तस्मिन्प्रवृत्ते संग्रामे राजन्वीरवरक्षये ।
अनिलेनेरितं घोरमुत्तस्थौ पार्थिवं रजः ॥ ४०
श्रवणान्नामधेयानां पार्थिवानां च कीर्तनात् ।
परस्परं विजानीमस्तदायुध्यन्नभीतवत् ॥ ४१
तद्रजः पुरुषव्याघ्र शोणितेन प्रशामितम् ।
दिशश्च विमला जातास्तस्मिन्रजसि नाशिते ॥ ४२
तथा प्रवृत्ते संग्रामे घोररूपे भयानके ।
तावकानां परेषां च नासीत्कश्चित्पराङ्मुखः ॥ ४३
ब्रह्मलोकपरा भूत्वा प्रार्थयन्तो जयं युधि ।
सुयुद्धेन पराक्रान्ता नराः स्वर्गमभीप्सवः ॥ ४४
भर्तृपिण्डविमोक्षार्थं भर्तृकार्यविनिश्चिताः ।
स्वर्गसंसक्तमनसो योधा युयुधिरे तदा ॥ ४५
नानारूपाणि शस्त्राणि विसृजन्तो महारथाः ।
अन्योन्यमभिगर्जन्तः प्रहरन्तः परस्परम् ॥ ४६
हत विध्यत गृह्णीत प्रहरध्वं निकृन्तत ।
इति स्म वाचः श्रूयन्ते तव तेषां च वै बले ॥ ४७
ततः शल्यो महाराज धर्मपुत्रं युधिष्ठिरम् ।
विव्याध निशितैर्बाणैर्हन्तुकामो महारथम् ॥ ४८
तस्य पार्थो महाराज नाराचान्वै चतुर्दश ।
मर्माण्युद्दिश्य मर्मज्ञो निचखान हसन्निव ॥ ४९
आवार्य पाण्डवं बाणैर्हन्तुकामो महाबलः ।
विव्याध समरे क्रुद्धो बहुभिः कङ्कपत्रिभिः ॥ ५०
अथ मद्रो महाराज शरेणानतपर्वणा ।
युधिष्ठिरं समाजघ्ने सर्वसैन्यस्य पश्यतः ॥ ५१
धर्मराजोऽपि संक्रुद्धो मद्रराजं महाबलः ।
विव्याध निशितैर्बाणैः कङ्कबर्हिणवाजितैः ॥ ५२
चन्द्रसेनं च सप्तत्या सूतं च नवभिः शरैः ।
द्रुमसेनं चतुःषष्ट्या निजघान महारथः ॥ ५३
चक्ररक्षे हते शल्यः पाण्डवेन महात्मना ।
निजघान ततो राजंश्चेदीन्वै पञ्चविंशतिम् ॥ ५४
सात्यकिं पञ्चविंशत्या भीमसेनं च पञ्चभिः ।
माद्रीपुत्रौ शतेनाजौ विव्याध निशितैः शरैः ॥ ५५
एवं विचरतस्तस्य संग्रामे राजसत्तम ।
संप्रैषयच्छितान्पार्थः शरानाशीविषोपमान् ॥ ५६
ध्वजाग्रं चास्य समरे कुन्तीपुत्रो युधिष्ठिरः ।
प्रमुखे वर्तमानस्य भल्लेनापाहरद्रथात् ॥ ५७
पाण्डुपुत्रेण वै तस्य केतुं छिन्नं महात्मना ।
निपतन्तमपश्याम गिरिशृङ्गमिवाहतम् ॥ ५८
ध्वजं निपतितं दृष्ट्वा पाण्डवं च व्यवस्थितम् ।
संक्रुद्धो मद्रराजोऽभूच्छरवर्षं मुमोच ह ॥ ५९
शल्यः सायकवर्षेण पर्जन्य इव वृष्टिमान् ।
अभ्यवर्षदमेयात्मा क्षत्रियान्क्षत्रियर्षभः ॥ ६०
सात्यकिं भीमसेनं च माद्रीपुत्रौ च पाण्डवौ ।
एकैकं पञ्चभिर्विद्ध्वा युधिष्ठिरमपीडयत् ॥ ६१
ततो बाणमयं जालं विततं पाण्डवोरसि ।
अपश्याम महाराज मेघजालमिवोद्गतम् ॥ ६२
तस्य शल्यो रणे क्रुद्धः शरैः सन्नतपर्वभिः ।
दिशः संछादयामास प्रदिशश्च महारथः ॥ ६३
ततो युधिष्ठिरो राजा बाणजालेन पीडितः ।
बभूव हतविक्रान्तो जम्भो वृत्रहणा यथा ॥ ६४

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ॥ १२ ॥

शल्यपराक्रमवर्णनम् ॥ १ ॥

सञ्जय उवाच ।
पीडिते धर्मराजे तु मद्रराजेन मारिष ।
सात्यकिर्भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ।
परिवार्य रथैः शल्यं पीडयामासुराहवे ॥ १
तमेकं बहुभिर्दृष्ट्वा पीड्यमानं महारथैः ।
साधुवादो महाञ्जज्ञे सिद्धाश्चासन्प्रहर्षिताः ॥ २
आश्चर्यमित्यभाषन्त मुनयश्चापि संगताः ॥ ३
भीमसेनो रणे शल्यं शल्यभूतं पराक्रमे ।
एकेन विद्ध्वा बाणेन पुनर्विव्याध सप्तभिः ॥ ४
सात्यकिश्च शतेनैनं धर्मपुत्रपरीप्सया ।
मद्रेश्वरमवाकीर्य सिंहनादमथानदत् ॥ ५
नकुलः पञ्चभिश्चैनं सहदेवश्च पञ्चभिः ।
विद्ध्वा तं तु पुनस्तूर्णं ततो विव्याध सप्तभिः ॥ ६
स तु शूरो रणे यत्तः पीडितस्तैर्महारथैः ।
विकृष्य कार्मुकं घोरं भारसहं वेगवत्तरम् ॥ ७
सात्यकिं पञ्चविंशत्या शल्यो विव्याध मारिष ।
भीमसेनं तु सप्तत्या नकुलं सप्तभिस्तथा ॥ ८
ततः स विशिखं चापं सहदेवस्य धन्विनः ।
छित्त्वा भल्लेन समरे विव्याधैनं त्रिसप्तभिः ॥ ९
सहदेवस्तु समरे मातुलं भूरिवर्चसम् ।
सज्यमन्यद्धनुः कृत्वा पञ्चभिः समताडयत् ।
शरैराशीविषाकारैर्ज्वलज्ज्वलनसन्निभैः ॥ १०
सारथिं चास्य समरे शरेणानतपर्वणा ।
विव्याध भृशसंक्रुद्धस्तं वै भूयस्त्रिभिः शरैः ॥ ११
भीमसेनस्तु सप्तत्या सात्यकिर्नवभिः शरैः ।
धर्मराजस्तथा षष्ट्या गात्रे शल्यं समार्पयत् ॥ १२
ततः शल्यो महाराज निर्विद्धस्तैर्महारथैः ।
सुस्राव रुधिरं गात्रैर्गैरिकं पर्वतो यथा ॥ १३
तांश्च सर्वान्महेष्वासान्पञ्चभिः पञ्चभिः शरैः ।
विव्याध तरसा राजंस्तदद्भुतमिवाभवत् ॥ १४
ततोऽपरेण भल्लेन धर्मपुत्रस्य मारिष ।
धनुश्चिच्छेद समरे सज्यं स सुमहारथः ॥ १५
अथान्यद्धनुरादाय धर्मपुत्रो युधिष्ठिरः ।
साश्वसूतध्वजरथं शल्यं प्राच्छादयच्छरैः ॥ १६
स च्छाद्यमानः समरे धर्मपुत्रस्य सायकैः ।
युधिष्ठिरमथाविध्यदशभिर्निशितैः शरैः ॥ १७
सात्यकिस्तु ततः क्रुद्धो धर्मपुत्रे शरार्दिते ।
मद्राणामधिपं शूरं शरैर्विव्याध पञ्चभिः ॥ १८
स सात्यकेः प्रचिच्छेद क्षुरप्रेण महद्धनुः ।
भीमसेनमुखांस्तांश्च त्रिभिस्त्रिभिरताडयत् ॥ १९
तस्य क्रुद्धो महाराज सात्यकिः सत्यविक्रमः ।
तोमरं प्रेषयामास स्वर्णदण्डं महारणे ॥ २०
भीमसेनोऽथ नाराचं ज्वलन्तमिव पन्नगम् ।
नकुलः समरे शक्तिं सहदेवो गदां शुभाम् ।
धर्मराजः शतघ्नीं च जिघांसुः शल्यमाहवे ॥ २१
तानापतत एवाशु पञ्चानां वै भुजच्युतान् ।
वारयामास समरे शस्त्रसङ्घैः स मद्रराट् ॥ २२
सात्यकिप्रहितं शल्यो भल्लैश्चिच्छेद तोमरम् ।
प्रहितं भीमसेनेन शरं कनकभूषणम् ॥ २३
द्विधा चिच्छेद समरे कृतहस्तः प्रतापवान् ।
नकुलप्रेषितां शक्तिं हेमदण्डां भयावहाम् ॥ २४
गदां च सहदेवेन शरौघैः समवारयत् ।
शराभ्यां च शतघ्नीं तां राज्ञश्चिच्छेद भारत ॥ २५
पश्यतां पाण्डुपुत्राणां सिंहनादं ननाद च ।
नामृष्यत्तत्र शैनेयः शत्रोर्विजयमाहवे ॥ २६
अथान्यद्धनुरादाय सात्यकिः क्रोधमूर्च्छितः ।
द्वाभ्यां मद्रेश्वरं विद्ध्वा सारथिं च त्रिभिः शरैः ॥ २७
ततः शल्यो रणे राजन्सर्वांस्तान्दशभिः शरैः ।
विव्याध भृशसंक्रुद्धस्तोत्रैरिव महाद्विपान् ॥ २८
ते वार्यमाणाः समरे मद्रराज्ञा महारथाः ।
न शेकुः संमुखे स्थातुं तस्य शत्रुनिषूदनाः ॥ २९
ततो दुर्योधनो राजा दृष्ट्वा शल्यस्य विक्रमम् ।

सहदेवेन प्रेषितामिति पूर्वस्मात्सबध्यते ॥ २५ ॥ सारथिं च विव्याधेत्युत्तरस्मादपकृष्यते ॥ २७ ॥

निहतान्पाण्डवान्मेने पाञ्चालानथ सृञ्जयान् ३०
'तथाविधं महाराज मद्रराजस्य विक्रमम् ।
असह्यं मानवैर्युद्धे तद्बभूव नरर्षभ ॥' ३१
ततो राजन्महाबाहुर्भीमसेनः प्रतापवान् ।
संत्यज्य मनसा प्राणान्मद्राधिपमयोधयत् ॥ ३२
नकुलः सहदेवश्च सात्यकिश्च महारथः ।
परिवार्य तदा शल्यं समन्ताद्व्यकिरञ्शरैः ॥ ३३
स चतुर्भिर्महेष्वासैः पाण्डवानां महारथः ।
वृतस्तान्योधयामास मद्रराजः प्रतापवान् ॥ ३४
तस्य धर्मसुतो राजन्क्षुरप्रेण महाहवे ।
चक्ररक्षं जघानाशु मद्रराजस्य पार्थिवः ॥ ३५
तस्मिंस्तु निहते शूरे चक्ररक्षे महारथे ।
मद्रराजोऽपि बलवान्सैनिकानावृणोच्छरैः ॥ ३६
समावृतांस्ततस्तांस्तु राजन्वीक्ष्य स्वसैनिकान् ।
चिन्तयामास समरे धर्मपुत्रो युधिष्ठिरः ॥ ३७
कथं नु न भवेत्सत्यं तन्माधववचो महत् ।
अपि क्रुद्धो रणे राजन्क्षपयेत बलं मम ॥ ३८
'अहं मद्भ्रातरश्चैव सात्यकिश्च महारथः ।
पाञ्चालाः सृञ्जयाश्चैव न शक्ताः स हि मद्रपम् ३९
निहनिष्यति चैवाद्य मातुलोऽस्मान्महाबलः ।
गोविन्दवचनं सत्यं कथं भवति किन्त्विदम् ॥४०
ततः सरथनागाश्वा पाण्डवाः पाण्डुपूर्वज ।
मद्रराजं समासेदुः पीडयन्तः समन्ततः ॥ ४१
नानाशस्त्रौघबहुलां शस्त्रवृष्टिं समुद्यताम् ।
व्यधमत्समरे राजा महाभ्राणीव मारुतः ॥ ४२
ततः कनकपुङ्खां तां शल्यक्षिप्तां वियद्गताम् ।
शरवृष्टिमपश्याम शलभानामिवायतिम् ॥ ४३
ते शरा मद्रराजेन प्रेषिता रणमूर्धनि ।
संपतन्तः स्म दृश्यन्ते शलभानां व्रजा इव ॥ ४४
मद्रराजधनुर्मुक्तैः शरैः कनकभूषणैः ।
निरन्तरमिवाकाशं संबभूव जनाधिप ॥ ४५
न पाण्डवानां नास्माकं तत्र किंचिद्व्यदृश्यत ।
बाणान्धकारे महति कृते तत्र महाहवे ॥ ४६
मद्रराजेन बलिना लाघवाच्छरवृष्टिभिः ।
चाल्यमानं तु तं दृष्ट्वा पाण्डवानां बलार्णवम् ।
विस्मयं परमं जग्मुर्देवगन्धर्वदानवाः ॥ ४७
स तु तान्सर्वतो यत्ताञ्शरैः संछाद्य मारिष ।
धर्मराजमवच्छाद्य सिंहवत्क्रूरनदन्मुहुः ॥ ४८
ते च्छन्नाः समरे तेन पाण्डवानां महारथाः ।
नाशक्नुवंस्तदा युद्धे प्रत्युद्यातुं महारथम् ॥ ४९
धर्मराजपुरोगास्तु भीमसेनमुखा रथाः ।
निजघ्नुः समरे शूरं शल्यमाहवशोभिनम् ॥ ५०

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः ॥ १३ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
अर्जुनो द्रौणिना विद्धो युद्धे बहुभिरायसैः ।
तस्य चानुचरैः शूरैस्त्रिगर्तानां महारथैः ॥ १
द्रौणिं विव्याध समरे त्रिभिरेव शिलीमुखैः ।
तथेतरान्महेष्वासान्द्वाभ्यां द्वाभ्यां धनञ्जयः ।
भूयश्चैव महाराज शरवर्षैरवाकिरत् ॥ २
शरकण्टकितास्ते तु तावका भरतर्षभ ।
न जहुः पार्थमासाद्य ताड्यमानाः शितैः शरैः ॥ ३
अर्जुनं रथवंशेन द्रोणपुत्रपुरोगमाः ।
परिवार्य मुदा युक्ता योधयन्तश्चकाशिरे ॥ ४
तैस्तु क्षिप्ताः शरा राजन्कार्तस्वरविभूषिताः ।
अर्जुनस्य रथोपस्थं पूरयामासुरञ्जसा ॥ ५
तथा कृष्णौ महेष्वासौ वृषभौ सर्वधन्विनाम् ।
विव्यधुश्च शरैर्घोरैः प्रहृष्टा युद्धदुर्मदाः ॥ ६

कथन्नु समरे शक्य—नहि क्रुद्धो रणे इति झ. पाठ ॥ ३८ ॥

द्वादशोऽध्यायः ॥ १२ ॥

कूबरं रथचक्राणि ईषा योक्राणि वा विभो।
युगं चैवानुकर्षं च शरभूतमभूत्तदा ॥ ७
नैतादृशं दृष्टपूर्वं राजन्नेव च नः श्रुतम्।
यादृशं तत्र पार्थस्य तावकाः संप्रचक्रिरे ॥ ८
स रथः सर्वतो भाति चित्रपुङ्खैः शितैः शरैः।
उल्काशतैः संप्रदीप्तं विमानमिव भूतले ॥ ९
ततोऽर्जुनो महाराज शरैः सन्नतपर्वभिः।
अवाकिरत्तां पृतनां मेघो वृष्ट्येव पर्वतम् ॥ १०
ते वध्यमानाः समरे पार्थनामाङ्कितैः शरैः।
पार्थभूतममन्यन्त प्रेक्षमाणास्तथाविधम् ॥ ११
कोपोद्धूतशरज्वालो धनुःशब्दानिलो महान्।
सैन्येन्धनं ददाहाशु तावकं पार्थपावकः ॥ १२
चक्राणां पततां चापि युगानां च धरातले।
तूणीराणां पताकानां ध्वजानां च रथैः सह ॥ १३
ईषाणामनुकर्षाणां त्रिवेणूनां च भारत।
अक्षाणामथ योक्राणां प्रतोदानां च राशयः ॥ १४
शिरसां पततां चापि कुण्डलोष्णीषधारिणाम्।
भुजानां च महाभाग स्कन्धानां च समन्ततः ॥ १५
छत्राणां व्यजनैः सार्धं मकुटानां च राशयः।
समदृश्यन्त पार्थस्य रथमार्गेषु भारत ॥ १६
अगम्यरूपा पृथिवी मांसशोणितकर्दमा।
भीरूणां त्रासजननी शूराणां हर्षवर्धिनी।
बभूव भरतश्रेष्ठ रुद्रस्याक्रीडनं यथा ॥ १७
हत्वा तु समरे पार्थः सहस्रे द्वे परंतपः।
रथानां सवरूथानां विधूमोऽग्निरिव ज्वलन् ॥ १८
यथा हि भगवानग्निर्जगद्दग्ध्वा चराचरम्।
विधूमो दृश्यते राजंस्तथा पार्थो धनञ्जयः ॥ १९
द्रौणिस्तु समरे दृष्ट्वा पाण्डवस्य पराक्रमम्।
रथेनातिपताकेन पाण्डवं प्रत्यवारयत् ॥ २०
तावुभौ पुरुषव्याघ्रौ श्वेताश्वौ धन्विनां वरौ।
समीयतुस्तदाऽन्योन्यं परस्परवधैषिणौ ॥ २१
तयोरासीन्महाराज बाणवर्षं सुदारुणम्।
जीमूतयोर्यथा वृष्टिस्तप्यन्ते भरतर्षभ ॥ २२
अन्योन्यस्पर्धिनौ तौ तु शरैः सन्नतपर्वभिः।
ततक्षतुस्तदाऽन्योन्यं शृङ्गाभ्यां वृषभाविव ॥ २३
तयोर्युद्धं महाराज चिरं समभिवाभवत्।
शस्त्राणां संगमश्चैव घोरस्तत्राभवत्पुनः ॥ २४
ततोऽर्जुनं द्वादशभी रुक्मपुङ्खैः सुतेजनैः।
वासुदेवं च दशभिर्द्रौणिर्विव्याध भारत ॥ २५
ततः प्रहस्य बीभत्सुर्व्यक्षिपद्गाण्डिवं धनुः।
मानयित्वा मुहूर्तं तु गुरुपुत्रं महाहवे ॥ २६
व्यश्वसूतरथं चक्रे सव्यसाची परंतपः।
मृदुपूर्वं ततश्चैनं पुनःपुनरताडयत् ॥ २७
हताश्वे तु रथे तिष्ठन्द्रोणपुत्रस्त्वयस्मयम्।
मुसलं पाण्डुपुत्राय चिक्षेप परिघोपमम् ॥ २८
तमापतन्तं सहसा हेमपट्टविभूषितम्।
चिच्छेद सप्तधा वीरः पार्थः शत्रुनिबर्हणः ॥ २९
स च्छिन्नं मुसलं दृष्ट्वा द्रौणिः परमकोपनः।
आददे परिघं घोरं नगेन्द्रशिखरोपमम्।
चिक्षेप चैव पार्थाय द्रौणिर्युद्धविशारदः ॥ ३०
तमन्तकमिव क्रुद्धं परिघं प्रेक्ष्य पाण्डवः।
अर्जुनस्त्वरितो जघ्ने पञ्चभिः सायकोत्तमैः ॥ ३१
स च्छिन्नः पतितो भूमौ पार्थबाणैर्महाहवे।
दारयन्पृथिवीन्द्राणां मनः शब्देन भारत ॥ ३२
ततोऽपरैस्त्रिभिर्भल्लैर्द्रौणिं विव्याध पाण्डवः ॥ ३३
सोऽतिविद्धो बलवता पार्थेन सुमहात्मना।
नाकम्पत तदा द्रौणिः पौरुषेषु व्यवस्थितः ॥ ३४
सुरथं च ततो राजन्भारद्वाजो महारथम्।
अवाकिरच्छरव्रातैः सर्वक्षत्रस्य पश्यतः ॥ ३५
ततस्तु सुरथोऽप्याजौ पाञ्चालानां महारथः।
रथेन मेघघोषेण द्रौणिमेवाभ्यधावत ॥ ३६
विकर्षन्वै धनुःश्रेष्ठं सर्वभारसहं दृढम्।
ज्वलनाशीविषनिभैः शरैश्चैनमवाकिरत् ॥ ३७
सुरथं तं ततः क्रुद्धमापतन्तं महारथम्।
चुकोप समरे द्रौणिर्दण्डाहत इवोरगः ॥ ३८
त्रिशिखां भ्रुकुटीं कृत्वा सृक्किणी परिसंलिहन्।
उद्वीक्ष्य सुरथं रोषाद्धनुर्ज्यामवमृज्य च।
मुमोच तीक्ष्णं नाराचं यमदण्डोपमद्युतिम् ॥ ३९
स तस्य हृदयं भित्त्वा प्रविवेशातिवेगितः।
शक्राशनिरिवोत्सृष्टो विदार्य धरणीतलम् ॥ ४०

ततः स पतितो भूमौ नाराचेन समाहतः ।
वज्रेण च यथा शृङ्गं पर्वतस्येव दीर्यतः ॥ ४१
तस्मिन्विनिहते वीरे द्रोणपुत्रः प्रतापवान् ।
आरुरोह रथं तूर्णं तमेव रथिनां वरः ॥ ४२
ततः सञ्जो महाराज द्रौणिराहवदुर्मदः ।
अर्जुनं योधयामास संशप्तकवृतो रणे ॥ ४३
तत्र युद्धं महच्चासीदर्जुनस्य परैः सह ।
मध्यंदिनगते सूर्ये यमराष्ट्रविवर्धनम् ॥ ४४
तत्राश्चर्यमपश्याम दृष्ट्वा तेषां पराक्रमम् ।
यदेको युगपद्वीरान्समयोधयदर्जुनः ॥ ४५
विमर्दः सुमहानासीदर्जुनस्य परैः सह ।
शतक्रतोर्यथापूर्वं महत्या दैत्यसेनया ॥ ४६

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः ॥ १४ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
दुर्योधनो महाराज धृष्टद्युम्नश्च पार्षतः ।
चक्रतुः सुमहद्युद्धं शरशक्तिसमाकुलम् ॥ १
ततो राजन्समापेतुः शरधाराः सहस्रशः ।
अम्बुदानां यथा काले जलधाराः समन्ततः ॥२
राजा च पार्षतं विद्ध्वा शरैः पञ्चभिराशुगैः ।
द्रोणहन्तारमुग्रेषुं पुनर्विव्याध सप्तभिः ॥ ३
धृष्टद्युम्नस्तु समरे बलवान्दृढविक्रमः ।
सप्तत्या विशिखानां वै दुर्योधनमपीडयत् ॥ ४
पीडितं वीक्ष्य राजानं सोदर्यो भरतर्षभ ।
महत्या सेनया सार्धं परिवव्रुः स पार्षतम् ॥ ५
स तैः परिवृतः शूरः सर्वतोऽतिरथैर्भृशम् ।
व्यचरत्समरे राजन्दर्शयन्नस्त्रलाघवम् ॥ ६
शिखण्डी कृतवर्माणं गौतमं च महारथम् ॥
प्रभद्रकैः समायुक्तो योधयामास धन्विनौ ॥ ७
तत्रापि सुमहद्युद्धं घोररूपं विशांपते ।
प्राणान्संत्यजतां युद्धे प्राणद्यूताभिदेवने ॥ ८
शल्यः सायकवर्षाणि विमुञ्चन्सर्वतोदिशम् ।
पाण्डवान्पीडयामास ससात्यकिवृकोदरान् ॥ ९
तथा तौ तु यमौ युद्धे यमतुल्यपराक्रमौ ।
योधयामास राजेन्द्र वीर्येणास्त्रबलेन च ॥ १०
शल्यसायकनुन्नानां पाण्डवानां महामृधे ।
त्रातारं नाध्यगच्छन्त केचित्तत्र महारथाः ॥ ११
ततस्तु नकुलः शूरो धर्मराजे प्रपीडिते ।
अभिदुद्राव वेगेन मातुलं माद्रिनन्दनः ॥ १२
संछाद्य समरे वीरं नकुलः परवीरहा ।
विव्याध चैनं दशभिः स्मयमानः स्तनान्तरे ॥ १३
सर्वपारसवैर्बाणैः कर्मारपरिमार्जितैः ।
स्वर्णपुङ्खैः शिलाधौतैर्धनुर्यत्रप्रचोदितैः ॥ १४
शल्यस्तु पीडितस्तेन स्वस्रीयेण हि मातुलः ।
नकुलं पीडयामास पत्रिभिर्नतपर्वभिः ॥ १५
ततो युधिष्ठिरो राजा भीमसेनोऽथ सात्यकिः ।
सहदेवश्च माद्रेयो मद्रराजमुपाद्रवन् ॥ १६
तानापतत एवाशु पूरयाणान्रथस्वनैः ।
दिशश्च विदिशश्चैव कम्पयानांश्च मेदिनीम् ।
प्रतिजग्राह समरे सेनापतिरमित्रजित् ॥ १७
युधिष्ठिरं त्रिभिर्विद्ध्वा भीमसेनं च पञ्चभिः ।
सात्यकिं च शतेनाजौ सहदेवं त्रिभिः शरैः ॥ १८
ततस्तु सशरं चापं नकुलस्य महात्मनः ।
मद्रेश्वरः क्षुरप्रेण मध्ये चिच्छेद मारिष ॥ १९
तदपास्य धनुश्छिन्नं ततः शल्यस्य सायकैः ।
अथान्यद्धनुरादाय माद्रीपुत्रो महारथः ।
मद्रराजरथं तूर्णं पूरयामास पत्रिभिः ॥ २०
युधिष्ठिरस्तु मद्रेशं सहदेवश्च मारिष ।
दशभिर्दशभिर्बाणैरुरस्येनमविध्यताम् ॥ २१
भीमसेनस्तु तं षष्ट्या सात्यकिर्दशभिः शरैः ।
मद्रराजमभिद्रुत्य जघ्नतुः कङ्कपत्रिभिः ॥ २२
मद्रराजस्ततः क्रुद्धः सात्यकिं नवभिः शरैः ।

विव्याध भूयः सप्तत्या शराणां नतपर्वणाम् २३
अथास्य सशरं चापं मुष्टौ चिच्छेद मारिष ।
हयांश्च चतुरः सङ्ख्ये प्रेषयामास मृत्यवे ॥ २४
विरथं सात्यकिं कृत्वा मद्रराजो महारथः ।
विंशिखानां शतेनैनमाजघान समन्ततः ॥ २५
माद्रीपुत्रं च संरब्धो भीमसेनं च पाण्डवम् ।
युधिष्ठिरं च कौरव्य विव्याध दशभिः शरैः ॥२६
तत्राद्भुतमपश्याम मद्रराजस्य पौरुषम् ।
यदेनं सहिताः पार्था नाभ्यवर्तन्त संयुगे ॥ २७
अथान्यं रथमास्थाय सात्यकिः सत्यविक्रमः ।
पीडितान्पाण्डवान्दृष्ट्वा मद्रराजवशं गतान् ।
अभिदुद्राव वेगेन मद्राणामधिपं बलात् ॥ २८
आपतन्तं रथं तस्य शल्यः समितिशोभनः ।
प्रत्युद्ययौ रथेनैव मत्तो मत्तमिव द्विपम् ॥ २९
स सन्निपातस्तुमुलो बभूवाद्भुतदर्शनः ।
सात्यकेश्चैव शूरस्य मद्राणामधिपस्य च ।
यादृशो वै पुरा वृत्तः शम्बरामरराजयोः ॥ ३०
सात्यकिः प्रेक्ष्य समरे मद्रराजमवस्थितम् ।
विव्याध दशभिर्बाणैस्तिष्ठतिष्ठेति चाब्रवीत् ॥ ३१
मद्रराजस्तु सुभृशं विद्धस्तेन महात्मना ।
सात्यकिं प्रतिविव्याध चित्रपुङ्खैः शितैः शरैः ३२
ततः पार्था महेष्वासाः सात्वताऽभिसृतं नृपम् ।
अभ्यवर्तन्रथैस्तूर्णं मातुलं वधकाङ्क्षया ॥ ३३
तत आसीत्परामर्दस्तुमुलः शोणितोदकः ।
शूराणां युध्यमानानां सिंहानामिव नर्दताम् ३४
तेषामासीन्महाराज व्यधिक्षेपः परस्परम् ।
सिंहानामामिषेप्सूनां कूजतामिव संयुगे ॥ ३५
तेषां बाणसहस्रौघैराकीर्णा वसुधाऽभवत् ।
अन्तरिक्षं च सहसा बाणभूतमभूत्तदा ॥ ३६
शरान्धकारं सहसा कृतं तेन समन्ततः ।
अभ्रच्छायेव संजज्ञे शरैर्मुक्तैर्महात्मभिः ॥ ३७
तत्र राजञ्शरैर्मुक्तैर्निर्मुक्तैरिव पन्नगैः ।
स्वर्णपुङ्खैः प्रकाशद्भिर्व्यरोचन्त दिशस्तदा ॥ ३८
तत्राद्भुतं परं चक्रे शल्यः शत्रुनिबर्हणः ।
यदेकः समरे शूरो योधयामास वै बहून् ॥ ३९
मद्रराजभुजोत्सृष्टैः कङ्कबर्हिणवाजितैः ।
संपतद्भिः शरैर्घोरैरवाकीर्यत मेदिनी ॥ ४०
तत्र शल्यरथं राजन्विचरन्तं महाहवे ।
अपश्याम यथापूर्वं शक्रस्यासुरसंक्षये ॥ ४१

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः ॥ १५ ॥

शल्ययुधिष्ठिरयोर्युद्धम् ॥ १ ॥

सञ्जय उवाच ।
ततः सेना तव विभो मद्रराजपुरस्कृता ।
पुनरभ्यद्रवत्पार्थान्वेगेन महता रणे ॥ १
पीडितास्तावकाः सर्वे प्रधावन्तो रणोत्कटाः ।
क्षणेन चैव पार्थांस्ते बहुत्वात्समलोडयन् ॥ २
ते वध्यमानाः समरे पाण्डवा नावतस्थिरे ।
क्षणेनैव महाराज पश्यतोः कृष्णपार्थयोः ॥ ३
ततो धनञ्जयः क्रुद्धः कृपं सह पदानुगैः ।
अवाकिरच्छरौघेण कृतवर्माणमेव च ॥ ४
शकुनिं सहदेवस्तु सहसैन्यमवाकिरत् ।
नकुलः पार्श्वतः स्थित्वा मद्रराजमयोधयत् ॥ ५
द्रौपदेया नरेन्द्राश्च भूयिष्ठान्समवारयन् ।
द्रोणपुत्रं च पाञ्चाल्यः शिखण्डी समवारयत् ॥ ६
भीमसेनस्तु राजानं गदापाणिरवारयत् ।
शल्यं तु सह सैन्येन कुन्तीपुत्रो युधिष्ठिरः ॥ ७
ततः समभवद्युद्धं संसक्तं तत्रतत्र ह ।
तावकानां परेषां च संग्रामेष्वनिवर्तिनाम् ॥ ८
तत्र पश्यामहे कर्म शल्यस्यातिमहद्रणे ।
यदेकः सर्वसैन्यानि पाण्डवानामयोधयत् ॥ ९
व्यदृश्यत तदा शल्यो युधिष्ठिरसमीपतः ।

क्रूरश्चन्द्रमसोऽभ्याशे शनैश्चर इव ग्रहः ॥ १०
पीडयित्वा तु राजानं शरैराशीविषोपमैः ।
अभ्यधावत्पुनर्भीमं शरवर्षैरवाकिरत् ॥ ११
तस्य तल्लाघवं दृष्ट्वा तथैव च कृतास्त्रताम् ।
अपूजयन्ननीकानि परेषां तावकानि च ॥ १२
पीड्यमानास्तु शल्येन पाण्डवा भृशविक्षताः ।
प्राद्रवन्त रणं हित्वा क्रोशमाने युधिष्ठिरे ॥ १३
वध्यमानेष्वनीकेषु मद्रराजेन पाण्डवः ।
अमर्षवशमापन्नो धर्मराजो युधिष्ठिरः ॥ १४
ततः पौरुषमास्थाय मद्रराजमताडयत् ।
जयो वाऽस्तु वधो वेति कृतबुद्धिर्महारथः ॥ १५
समाहूयाब्रवीत्सर्वान्भ्रातॄन्कृष्णं च पाण्डवः ॥ १६
भीष्मो द्रोणश्च कर्णश्च ये चान्ये पृथिवीक्षितः ।
कौरवार्थे पराक्रान्ताः संग्रामे निधनं गताः ।
यथाभागं यथोत्साहं भवन्तः कृतपौरुषाः ॥ १७
भागोऽवशिष्ट एकोऽयं मम शल्यो महारथः ।
सोऽहमद्य युधा जेतुमाशंसे मद्रकाधिपम् ॥ १८
तत्र यन्मानसं मह्यं तत्सर्वं निगदामि वः ।
चक्ररक्षाविमौ वीरौ मम माद्रवतीसुतौ ॥ १९
अजेयौ वासवेनापि समरे शूरसंमतौ ।
साध्विमौ मातुलं युद्धे क्षत्रधर्मपुरस्कृतौ ॥ २०
मदर्थे प्रतियुध्येतां मानार्हौ सत्यसंगरौ ।
मां वा शल्यो रणे हन्ता तं वाऽहं भद्रमस्तु वः ।
इति सत्यामिमां वाणीं लोकवीरा निबोधत ॥ २१
योत्स्येऽहं मातुलेनाद्य क्षात्रधर्मेण पार्थिवाः ।
स्वमंशमभिसंधाय विजयायेतराय वा ॥ २२
तस्य मेऽप्यधिकं शस्त्रं सर्वोपकरणानि च ।
संयुज्यन्तां रथे क्षिप्रं शास्त्रवद्रथयोजकैः ॥ २३
शैनेयो दक्षिणं चक्रं धृष्टद्युम्नस्तथोत्तरम् ।
पृष्ठगोपो भवत्वद्य मम पार्थो धनञ्जयः ॥ २४
पुरःसरो ममाद्यास्तु भीमः शस्त्रभृतां वरः ।
एवमभ्यधिकः शल्याद्धविष्यामि महामृधे ॥ २५
एवमुक्तास्तथा चक्रुस्तदा राज्ञः प्रियैषिणः ॥ २६
ततः प्रहर्षः सैन्यानां पुनरासीत्तदा मृधे ।
पाञ्चालानां सोमकानां मात्स्यानां च विशेषतः ॥
प्रतिज्ञातं च संग्रामे धर्मराजस्य पूजयन् ।
ततः शङ्खांश्च भेरीश्च शतशश्चैव पुष्करान् ।
अवादयन्त पाञ्चालाः सिंहनादांश्च नेदिरे ॥ २८
तेऽभ्यधावन्त संरब्धा मद्रराजं तरस्विनम् ।
महता हर्षजेनाथ नादेन कुरुपुङ्गवाः ॥ २९
ह्रादेन गजघण्टानां शङ्खानां निनदेन च ।
तूर्यशब्देन महता नादयन्तश्च मेदिनीम् ॥ ३०
तान्प्रत्यगृह्णात्पुत्रस्ते मद्रराजश्च वीर्यवान् ।
महामेघानिव बहून्शैलावस्तोदयावुभौ ॥ ३१
शल्यस्तु समरश्लाघी धर्मराजमरिंदमम् ।
ववर्ष शरवर्षेण शम्बरं मघवा इव ॥ ३२
तथैव कुरुराजोऽपि प्रगृह्य रुचिरं धनुः ।
द्रोणोपदेशान्विविधान्दर्शयानो महामनाः ।
ववर्ष शरवर्षाणि चित्रं लघु च सुष्ठु च ॥ ३३
न चास्य विवरं कश्चिद्ददर्श चरतो रणे ॥ ३४
तावुभौ विविधैर्बाणैस्ततक्षाते परस्परम् ।
शार्दूलावामिषप्रेप्सू पराक्रान्ताविवाहवे ॥ ३५
भीमस्तु तव पुत्रेण युद्धशौण्डेन सङ्गतः ॥ ३६
पाञ्चाल्यः सात्यकिश्चैव माद्रीपुत्रौ च पाण्डवौ ।
शकुनिप्रमुखान्वीरान्प्रत्यगृह्णन्समन्ततः ॥ ३७
तदासीत्तुमुलं युद्धं पुनरेव जयैषिणाम् ।
तावकानां परेषां च राजन्दुर्मन्त्रिते तव ॥ ३८
दुर्योधनस्तु भीमस्य शरेणानतपर्वणा ।
चिच्छेदादिश्य सङ्ग्रामे ध्वजं हेमपरिष्कृतम् ॥ ३९
स किङ्किणीकजालेन महता चारुदर्शनः ।
पपात रुचिरः सिंहो भीमसेनस्य पश्यतः ॥ ४०
पुनश्चास्य धनुश्चित्रं गजराजकरोपमम् ।
क्षुरेण शितधारेण प्रचकर्त नराधिपः ॥ ४१
स च्छिन्नधन्वा तेजस्वी रथशक्त्या सुतं तव ।
बिभेदोरसि विक्रम्य स रथोपस्थ आविशत् ॥ ४२
तस्मिन्मोहमनुप्राप्ते पुनरेव वृकोदरः ।
यन्तुरेव शिरः कायात्क्षुरप्रेणाहरत्तदा ॥ ४३
हतसूता हयास्तस्य रथमादाय भारत ।

रथशक्त्या रथस्थया शक्त्या ॥ ४२ ॥

व्यद्रवन्त दिशो राजन्हाहाकारस्तदाऽभवत् ॥ ४४
तमभ्यधावंस्त्राणार्थं द्रोणपुत्रो महारथः ।
कृपश्च कृतवर्मा च पुत्रं ते हि परीप्सवः ॥ ४५
तस्मिन्विलुलिते सैन्ये त्रस्तांस्तस्य पदानुगान् ।
गाण्डीवधन्वा विस्फार्य धनुस्तानहनच्छरैः ॥ ४६
युधिष्ठिरस्तु मद्रेशमभ्यधावद्मर्षितः ।
स्वयं सन्नोदयन्नश्वान्दन्तवर्णान्मनोजवान् ॥ ४७
तत्राश्चर्यमपश्याम कुन्तीपुत्रे युधिष्ठिरे ।
पुरा भूत्वा मृदुर्दान्तो यत्तदा दारुणोऽभवत् ४८
विवृताक्षश्च कौन्तेयो वेपमानश्च मन्युना ।
चिच्छेद योधान्निशितैः शरैः शतसहस्रशः ॥ ४९
यांयां प्रत्युद्ययौ सेनां तांतां ज्येष्ठः स पाण्डवः ।
शरैरपातयद्राजन्गिरीन्वज्रैरिवोत्तमैः ॥ ५०
साश्वसूतध्वजरथान्रथिनः पातयन्बहून् ।
अक्रीडदेको बलवान्पवनस्तोयदानिव ॥ ५१
साश्वारोहांश्च तुरगान्पत्तींश्चैव सहस्रधा ।
व्यपोथयत सङ्ग्रामे क्रुद्धो रुद्रः पशूनिव ॥ ५२
शून्यमायोधनं कृत्वा शरवर्षैः समन्ततः ।
अभ्यद्रवत मद्रेशं तिष्ठतिष्ठेति चाब्रवीत् ॥ ५३
तस्य तच्चरितं दृष्ट्वा संग्रामे भीमकर्मणः ।
वित्रेसुस्तावकाः सर्वे शल्यस्त्वेनं समभ्ययात् ॥ ५४
ततस्तौ भृशसंक्रुद्धौ प्रध्माय सलिलोद्भवौ ।
समाहूय तदाऽन्योन्यं भर्त्सयन्तौ समीयतुः ॥ ५५
शल्यस्तु शरवर्षेण पीडयामास पाण्डवम् ।
मद्रराजं तु कौन्तेयः शरवर्षैरवाकिरत् ॥ ५६
अदृश्येतां तदा राजन्कङ्कपत्रिभिराचितौ ।
उद्भिन्नरुधिरौ शूरौ मद्रराजयुधिष्ठिरौ ।
पुष्पिताविव रेजाते वने शाल्मलिकिंशुकौ ॥ ५७
दीव्यमानौ महात्मानौ प्राणद्यूतेन दुर्मदौ ।
दृष्ट्वा सर्वाणि सैन्यानि नाध्यवस्यंस्तयोर्जयम् ५८
हत्वा मद्राधिपं पार्थो भोक्ष्यतेऽद्य वसुंधराम् ।
शल्यो वा पाण्डवं हत्वा दद्यादुर्योधनाय गाम् ५९
इतीव निश्चयो नाभूद्योधानां तत्र भारत ।
प्रदक्षिणमभूत्सर्वं धर्मराजस्य युध्यतः ॥ ६०
ततः शरशतं शल्यो मुमोचाशु युधिष्ठिरे ।
धनुश्चास्य शिताग्रेण बाणेन निरकृन्तत ॥ ६१
सोऽन्यत्कार्मुकमादाय शल्यं शरशतैस्त्रिभिः ।
अविध्यत्कार्मुकं चास्य क्षुरेण निरकृन्तत ॥ ६२
अथास्य निजघानाश्वांश्चतुरो नतपर्वभिः ।
द्वाभ्यामतिशिताग्राभ्यामुभौ तत्पार्ष्णिसारथी ६३
ततोऽस्य दीप्यमानेन पीतेन निशितेन च ।
प्रमुखे वर्तमानस्य भल्लेनापाहरद्ध्वजम् ॥ ६४
ततः प्रभग्नं तत्सैन्यं दौर्योधनमरिंदम ॥ ६५
ततो मद्राधिपं द्रौणिरभ्यधावत्तथा कृतम् ।
आरोप्य चैनं स्वरथं त्वरमाणः प्रदुद्रुवे ॥ ६६
मुहूर्तमिव तौ गत्वा नर्दमाने युधिष्ठिरे ।
गत्वा ततो मद्रपतिरन्यं स्यन्दनमास्थितः ॥ ६७
विधिवत्कल्पितं शुभ्रं महाम्बुदनिनादिनम् ।
सज्जयच्चोपकरणं द्विषतां रोमहर्षणम् ॥ ६८
तथान्यद्धनुरादाय बलवान्वेगवत्तरम् ।
युधिष्ठिरं मद्रपतिर्भिन्त्वा सिंह इवानदत् ॥ ६९
ततः स शरवर्षेण पर्जन्य इव वृष्टिमान् ।
अभ्यवर्षदमेयात्मा क्षत्रियान्क्षत्रियर्षभः ॥ ७०
सात्यकिं दशभिर्विद्ध्वा भीमसेनं त्रिभिः शरैः ।
सहदेवं त्रिभिर्विद्ध्वा युधिष्ठिरमपीडयत् ॥ ७१
तांस्तानन्यान्महेष्वासान्साश्वान्सरथकूबरान् ।
अर्दयामास विशिखैरुल्काभिरिव कुञ्जरान् ॥ ७२
कुञ्जरान्कुञ्जरारोहानश्वानश्वप्रयायिनः ।
रथांश्च रथिभिः सार्धं जघान रथिनां वरः ॥ ७३
बाहूंश्चिच्छेद तरसा सायुधान्केतनानि च ।
चकार च महीं योधैः स्तीर्णां वेदीं कुशैरिव ७४
तथा तमरिसैन्यानि घ्नन्तं मृत्युमिवान्तकम् ।
परिवव्रुर्भृशं क्रुद्धाः पाण्डुपाञ्चालसोमकाः ॥ ७५

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे पञ्चदशोऽध्यायः ॥ १५ ॥

या यामभ्यगमत्सेना ता ता सद्यो व्यनीनशत् । न्यपातयत कौन्तेयो गिरीन्वज्र इवोत्तमान् । इति क. ख. पाठः ॥ ५० ॥

मुहूर्तमिव तान्हत्वा नर्दमाने युधिष्ठिरे इति क ख पाठः ॥ ६७ ॥ पञ्चदशोऽध्याय ॥ १५ ॥

षोडशोऽध्यायः ॥ १६ ॥

युधिष्ठिरेण शल्यशल्यानुजयोर्वधः ॥ १ ॥

सञ्जय उवाच ।

तं भीमसेनश्च शिनेश्च नप्ता
माद्र्याश्च पुत्रौ पुरुषप्रवीरौ ।
समागतं भीमबलेन राज्ञा
पर्यापुरन्योन्यमथाह्वयन्त ॥ १

ततस्तु शूराः समरे नरेन्द्र
नरेश्वरं प्राप्य युधां वरिष्ठम् ।
आवार्य चैनं समरे नृवीरा
जघ्नुः शितैः पत्त्रिभिरुग्रवेगैः ॥ २

संरक्षितो भीमसेनेन राजा
माद्रीसुताभ्यामथ माधवेन ।
मद्राधिपं पत्त्रिभिरुग्रवेगैः
स्तनान्तरे धर्मसुतो निजघ्ने ॥ ३

ततो रणे तावकानां रथौघाः
समीक्ष्य मद्राधिपतिं शरार्तम् ।
पर्यावव्रुः प्रवराः सर्वयोधा
दुर्योधनस्यानुमते पुरस्तात् ॥ ४

ततो द्रुतं मद्रजनाधिपो रणे
युधिष्ठिरं सप्तभिरभ्यविध्यत् ।
तं चापि पार्थो नवभिः पृषत्कै-
र्विव्याध राजंस्तुमुले महात्मा ॥ ५

आकर्णपूर्णायतसंप्रयुक्तैः
शरैस्तदा संयति तैलधौतैः ।
अन्योन्यमाच्छादयतां महारथौ
मद्राधिपश्चापि युधिष्ठिरश्च ॥ ६

ततस्तु तूर्णं समरे महारथौ
परस्परस्यान्तरमीक्षमाणौ ।
शरैर्भृशं विव्यधतुर्नृपोत्तमौ
महबलौ शत्रुभिरप्रधृष्यौ ॥ ७

तयोर्धनुर्ज्यातलनिःस्वनो महा-
न्महेन्द्रवज्राशनितुल्यनिःस्वनः ।
परस्परं बाणगणैर्महात्मनोः
प्रवर्षतोर्मद्रपपाण्डवीरयोः ॥ ८

तौ चेरतुर्व्याघ्रशिशुप्रकाशौ
महावनेष्वामिषगृद्धिनाविव ।
विषाणिनौ नागवराविवोभौ
ततक्षतुः संयति जातदर्पौ ॥ ९

ततस्तु मद्राधिपतिर्महात्मा
युधिष्ठिरं भीमबलं प्रसह्य ।
विव्याध वीरं हृदयेऽतिवेगं
शरेण सूर्याग्निसमप्रभेण ॥ १०

ततोऽतिविद्धोऽथ युधिष्ठिरोऽपि
सुसंप्रयुक्तेन शरेण राजन् ।
जघान मद्राधिपतिं महात्मा
मुदं च लेभे वृषभः कुरूणाम् ॥ ११

ततो मुहूर्तादिव पार्थिवेन्द्रो
लब्ध्वा संज्ञां क्रोधसंरक्तनेत्रः ।
शरेण पार्थं त्वरितो जघान
सहस्रनेत्रप्रतिमप्रभावः ॥ १२

त्वरंस्ततो धर्मसुतो महात्मा
शल्यस्य कोपान्नवभिः पृषत्कैः ।
भित्त्वा ह्युरस्तपनीयं च वर्म
जघान षड्भिस्त्वपरैः पृषत्कैः ॥ १३

ततस्तु मद्राधिपतिः प्रकृष्टं
धनुर्विकृष्य व्यसृजत्पृषत्कान् ।
द्वाभ्यां शराभ्यां च तथैव राज्ञ-
श्चिच्छेद चापं कुरुपुङ्गवस्य ॥ १४

नवं ततोऽन्यत्समरे प्रगृह्य
राजा धनुर्घोरतरं महात्मा ।
शल्यं तु विव्याध शरैः समन्ता-
द्यथा महेन्द्रो नमुचिं शिताग्रैः ॥ १५

ततस्तु शल्यो नवभिः पृषत्कै-
र्भीमस्य राज्ञश्च युधिष्ठिरस्य ।

निकृत्य रौक्मे पटुवर्मणी तयो-
र्विदारयामास भुजौ महात्मा ॥ १६
ततोऽपरेण ज्वलनार्कतेजसा
क्षुरेण राज्ञो धनुरुन्ममाथ ।
कृपश्च तस्यैव जघान सूतं
षड्भिः शरैः सोऽभिमुखः पपात ॥ १७
मद्राधिपश्चापि युधिष्ठिरस्य
शरैश्चतुर्भिर्निजघान वाहान् ।
वाहांश्च हत्वा व्यकरोन्महात्मा
योधक्षयं धर्मसुतस्य राज्ञः ॥ १८
'यदद्भुतं कर्म न शक्यमन्यैः
सुदुःसहं तत्कृतवन्तमेकम् ।
शल्यो नरेन्द्रः सविषण्णभावा-
द्विचिन्तयामास मृदङ्गकेतुः ॥ १९
किमेतदिन्द्रावरजस्य वाक्यं
मोघं भवत्यद्य विधेर्बलेन ।
जहीति शल्यं ह्यवदत्तदाऽऽजौ
न लोकनाथस्य वचोऽन्यथा स्यात् ॥' २०
तथा कृते राजनि भीमसेनो
मद्राधिपस्याथ ततो महात्मा ।
छित्त्वा धनुर्वेगवता शरेण
द्वाभ्यामविध्यत्सुभृशं नरेन्द्रम् ॥ २१
तथापरेणास्य जहार यन्तुः
कायाच्छिरः संहननीयमध्यात् ।
जघान चाश्वांश्चतुरः सुशीघ्रं
तथा भृशं कुपितो भीमसेनः ॥ २२
तमग्रणीः सर्वधनुर्धराणा-
मेकं चरन्तं समरेऽतिवेगम् ।
भीमः शतेन व्यकिरच्छराणां
माद्रीपुत्रः सहदेवस्तथैव ॥ २३
तैः सायकैर्मोहितं वीक्ष्य शल्यं
भीमः शरैरस्य चकर्त वर्म ।
स भीमसेनेन निकृत्तवर्मा
मद्राधिपश्चर्म सहस्रतारम् ॥ २४

प्रगृह्य खड्गं च रथान्महात्मा
प्रस्कन्द्य कुन्तीसुतमभ्यधावत् ।
छित्त्वा रथेषां नकुलस्य सोऽथ
युधिष्ठिरं भीमबलोऽभ्यधावत् ॥ २५
तं चापि राजानमथोत्पतन्तं
क्रुद्धं यथैवान्तकमापतन्तम् ।
धृष्टद्युम्नो द्रौपदेयाः शिखण्डी
शिनेश्च नप्ता सहसा परीयुः ॥ २६
अथास्य चर्माप्रतिमं न्यकृन्त-
द्भीमो महात्मा नवभिः पृषत्कैः ।
खड्गं च भल्लैर्निचकर्त मुष्टौ
नदन्प्रहृष्टस्तव सैन्यमध्ये ॥ २७
तत्कर्म भीमस्य समीक्ष्य हृष्टा-
स्ते पाण्डवानां प्रवरा रथौघाः ।
नादं च चक्रुर्भृशमुत्सयन्तः
शङ्खांश्च दध्मुः शशिसन्निकाशान् ॥ २८
तेनाथ शब्देन विभीषणेन
तथाऽभितप्तं बलमप्रधृष्यम् ।
स्वेदाभिभूतं रुधिरोक्षिताङ्गं
विसंज्ञकल्पं च तदा विषण्णम् ॥ २९
स मद्रराजः सहसा विकीर्णो
भीमाग्रगैः पाण्डवयोधमुख्यैः ।
युधिष्ठिरस्याभिमुखं जवेन
सिंहो यथा मृगहेतोः प्रयातः ॥ ३०
स धर्मराजो निहताश्वसूतः
क्रोधेन दीप्तो ज्वलनप्रकाशः ।
दृष्ट्वा च मद्राधिपतिं स्म तूर्णं
समभ्यधावत्तमरिं बलेन ॥ ३१
गोविन्दवाक्यं त्वरितं विचिन्त्य
दध्रे मतिं शल्यविनाशनाय ।
स धर्मराजो निहताश्वसूतो
रथे तिष्ठञ्शक्तिमथान्वकर्षत् ॥ ३२
तच्चापि शल्यस्य निशाम्य कर्म
तमात्मनो भागमथावशिष्टम् ।

सहननीयो दृढसन्धिको मध्यो यस्य तस्मात्कायात् ॥ २२ ॥

कृत्वा मनः शल्यवधे महात्मा
यथोक्तमिन्द्रावरजस्य चक्रे ॥ ३३
स धर्मराजो मणिहेमदण्डां
जग्राह शक्तिं कनकप्रकाशाम् ।
नेत्रे च दीप्ते सहसा विवृत्य
मद्राधिपं क्रुद्धमना निरैक्षत् ॥ ३४
निरीक्षितो धर्मसुतेन राज्ञा
पूतात्मना निर्हृतकल्मषेण ।
आसीन्न यद्भस्मसान्मद्रराज-
स्तदद्भुतं मे प्रतिभाति राजन् ॥ ३५
ततस्तु शक्तिं रुचिरोग्रदण्डां
मणिप्रवेकोज्वलितां प्रदीप्ताम् ।
चिक्षेप वेगात्सुभृशं महात्मा
मद्राधिपाय प्रवरः कुरूणाम् ॥ ३६
दीप्तामथैनां प्रहितां बलेन
सविस्फुलिङ्गां सहसापतन्तीम् ।
प्रैक्षन्त सर्वे कुरवः समेता
दिवो युगान्ते महतीमिवोल्काम् ॥ ३७
तां कालरात्रीमिव पाशहस्तां
यमस्य धात्रीमिव चोग्ररूपाम् ।
स ब्रह्मदण्डप्रतिमाममोघां
ससर्ज यत्तो युधि धर्मराजः ॥ ३८
गन्धस्रगग्र्यासनपानभोजनै-
रभ्यर्चितां पाण्डुसुतैः प्रयत्नात् ।
सांवर्तकाग्निप्रतिमां ज्वलन्तीं
कृत्यामथर्वाङ्गिरसीमिवोग्राम् ॥ ३९
ईशानहेतोः प्रतिनिर्मितां तां
त्वष्ट्रा रिपूणामसुदेहभक्ष्याम् ।
भूम्यन्तरिक्षद्युजलाश्रयाणि
प्रसह्य भूतानि निहन्तुमीशाम् ॥ ४०
घण्टापताकां मणिवज्रभूषां
वैदूर्यचित्रां तपनीयदण्डाम् ।
स्रष्ट्रा प्रयत्नान्नियमेन कृत्सां
ब्रह्मद्विषामन्तकरीममोघाम् ॥ ४१
बलप्रयत्नादनिरोधवेगां
मन्त्रैश्च घोरैरपि पूरयित्वा ।
ससर्ज मार्गेण च तां खगानां
वधाय मद्राधिपतेस्तदानीम् ॥ ४२
हतो ह्यसावित्यभिगर्जमानो
रुद्रोऽन्धकायान्तकरं यथेषुम् ।
प्रसार्य बाहुं सुदृढं सुपाणिं
क्रोधेन नृत्यन्निव धर्मराजः ॥ ४३
'स्फुरत्प्रभामण्डलिनोंशुजालै-
र्धर्मात्मनो मद्रविनाशकाले ।
पुरत्रयप्रोत्सरणे पुरस्ता-
न्माहेश्वरं रूपमभूत्तदानीम् ॥ ४४
आवर्तनाकुञ्चितबाहुदण्डः
सन्ध्याविहारी तनुवृत्तमध्यः ।
विशालवक्षा भगवान्हरो यथा
सुदुर्निरीक्ष्योऽभवदर्जुनाग्रजः ॥' ४५
तां सर्वशक्त्या प्रहितां सुशक्तिं
युधिष्ठिरेणाप्रतिवार्यवीर्याम् ।
प्रतिग्रहायाभिननन्द शल्यः
सम्यग्घुतामग्निरिवाज्यधाराम् ॥ ४६
सा तस्य वर्माभिविदार्य शुभ्र-
मुरो विशालं च तथैव भित्त्वा ।
विवेश गां तोयमिवाप्रसक्ता
यशो विशालं नृपतेर्हरन्ती ॥ ४७
नासाक्षिकर्णास्यविनिःसृतेन
प्रस्यन्दता च व्रणसंभवेन ।
संसिक्तगात्रो रुधिरेण सोऽभू-
त्क्रौञ्चो यथा स्कन्दहतो महाद्रिः ॥ ४८
प्रसार्य बाहू च रथाद्गतो गां
संछिन्नवर्मा कुरुनन्दनेन ।
महेन्द्रवाहप्रतिमो महात्मा
वज्राहतं शृङ्गमिवाचलस्य ॥ ४९
ततो निपतितः सोऽभूदिन्द्रध्वज इवोच्छ्रितः ।
बाहू प्रसार्याभिमुखो धर्मराजस्य मद्रराट् ।

तोयमिव सुप्रवेशाङ्गाम् । अप्रसक्ता अप्रतिहता । नृपते. शल्यस्य ॥ ४७ ॥

स तथा भिन्नसर्वाङ्गो रुधिरेण समुक्षितः ॥ ५०
प्रत्युद्गत इव प्रेम्णा भूम्या स नरपुङ्गवः ।
प्रियया कान्तया कान्तः पतमान इवोरसि ॥ ५१
चिरं भुक्त्वा वसुमतीं प्रियां कान्तामिव प्रभुः ।
सर्वैरङ्गैः समाश्लिष्य प्रसुप्त इव चाभवत् ॥ ५२
धर्म्ये धर्मात्मना युद्धे निहतो धर्मसूनुना ।
सम्यक्स्फीत इवोत्सृष्टः प्रशान्तोऽग्निरिवाध्वरे ५३
शक्त्या विभिन्नहृदयं विप्रविद्धायुधध्वजम् ।
संशान्तमपि मद्रेशं लक्ष्मीर्नैव विमुञ्चति ॥ ५४
ततो युधिष्ठिरश्चापमादायेन्द्रधनुष्प्रभम् ।
व्यधमद्द्विषतः सङ्ख्ये खगराडिव पन्नगान् ।
देहान्सुनिशितैर्भल्लै रिपूणां नाशयन्क्षणात् ॥ ५५
ततः पार्थस्य बाणौघैरावृताः सैनिकास्तव ।
निमीलिताक्षाः क्षिण्वन्ति भृशमन्योन्यकर्शिताः ।
क्षरन्तो रुधिरं देहैर्विशस्त्रायुधजीविताः ॥ ५६
ततः शल्ये निपतिते मद्रराजानुजो युवा ।
भ्रातुस्तुल्यो गुणैः सर्वै रथी पाण्डवमभ्ययात् ५७
विव्याध च नरश्रेष्ठो नाराचैर्बहुभिस्त्वरन् ।
हतस्यापचितिं भ्रातुश्चिकीर्षुर्युद्धदुर्मदः ॥ ५८
तं विव्याधाशुगैः षड्भिर्धर्मराजस्त्वरन्निव ।
कार्मुकं चास्य चिच्छेद क्षुराभ्यां ध्वजमेव च ॥ ५९
ततोऽस्य दीप्यमानेन सुदृढेन शितेन च ।
प्रमुखे वर्तमानस्य भल्लेनापाहरच्छिरः ॥ ६०
सकुण्डलं तद्ददृशे पतमानं शिरो रथात् ।
पुण्यक्षयमनुप्राप्य पतन्स्वर्गादिव च्युतः ॥ ६१
तस्यापकृत्तशीर्षं तु शरीरं पतितं रथात् ।
रुधिरेणावसिक्ताङ्गं दृष्ट्वा सैन्यमभज्यत ॥ ६२
विचित्रकवचे तस्मिन्हते मद्रनृपानुजे ।
हाहाकारं प्रकुर्वाणाः कुरवोऽभिप्रदुद्रुवुः ॥ ६३
शल्यानुजं हतं दृष्ट्वा तावकास्त्यक्तजीविताः ।
वित्रेसुः पाण्डवभयात्प्रविध्वस्तास्तदा भृशम् ॥६४
तांस्तथा भज्यमानांस्तु कौरवान्भरतर्षभ ।
शिनेर्नप्ताऽकिरन्बाणैरभ्यवर्तत सात्यकिः ॥ ६५
तमायान्तं महेष्वासं दुष्प्रसह्यं दुरासदम् ।
हार्दिक्यस्त्वरितो राजन्प्रत्यगृह्णादभीतवत् ॥ ६६
तौ समेतौ महात्मानौ वार्ष्णेयौ वरवाजिनौ ।
हार्दिक्यः सात्यकिश्चैव सिंहाविव बलोत्कटौ ॥६७
इषुभिर्विमलाभासैश्छादयन्तौ परस्परम् ।
अर्चिर्भिरिव सूर्यस्य दिवाकरसमप्रभौ ॥ ६८
चापमार्गबलोद्धूतान्मार्गणान्वृष्णिसिंहयोः ।
आकाशगानपश्याम पतङ्गानिव शीघ्रगान् ॥ ६९
सात्यकिं दशभिर्विद्ध्वा हयांश्चास्य त्रिभिः शरैः ।
चापमेकेन चिच्छेद हार्दिक्यो नतपर्वणा ॥ ७०
तन्निकृत्तं धनुःश्रेष्ठमपास्य शिनिपुङ्गवः ।
अन्यदादत्त वेगेन धनुर्जलदनिःस्वनम् ॥ ७१
तदादाय धनुःश्रेष्ठं वरिष्ठः सर्वधन्विनाम् ।
हार्दिक्यं दशभिर्बाणैः प्रत्यविध्यत्स्तनान्तरे ॥ ७२
ततो युगं रथेषां च च्छित्त्वा भल्लैः सुसंयतैः ।
अश्वांस्तस्यावधीत्तूर्णमुभौ च पार्ष्णिसारथी ॥ ७३
हार्दिक्यं विरथं दृष्ट्वा कृपः शारद्वतः प्रभो ।
अपोवाह ततः क्षिप्रं रथमारोप्य वीर्यवान् ॥ ७४
मद्रराजे हते राजन्विरथे कृतवर्मणि ।
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम् ॥ ७५
स्वे परे नान्वबुध्यन्त सैन्येन रजसा वृते ।
बलं तु हतभूयिष्ठं त्रस्तमासीत्पराङ्मुखम् ॥ ७६
ततो मुहूर्तात्तेऽपश्यन्रजो भौमं समुत्थितम् ।
विविधैः शोणितस्रावैः प्रशान्तं पुरुषर्षभ ॥ ७७
ततो दुर्योधनो दृष्ट्वा भग्नं स्वबलमन्तिकात् ।
जवेनाततः पार्थानेकः सर्वानवारयत् ॥ ७८
पाण्डवान्सरथान्दृष्ट्वा धृष्टद्युम्नं च पार्षतम् ।
आनर्तं च दुराधर्षं शितैर्बाणैरवारयत् ॥ ७९
तं परे नाभ्यवर्तन्त मर्त्या मृत्युमिवागतम् ।
अथान्यं रथमास्थाय हार्दिक्योऽपि न्यवर्तत ॥८०
ततो युधिष्ठिरो राजा त्वरमाणो महारथः ।
चतुर्भिर्निजघानाश्वान्पत्रिभिः कृतवर्मणः ।
विव्याध गौतमं चापि षड्भिर्भल्लैः सुतेजनैः ॥ ८१
अश्वत्थामा ततो राज्ञा हताश्वं विरथीकृतम् ।
तमपोवाह हार्दिक्यं स्वरथेन युधिष्ठिरात् ॥ ८२

ततः शारद्वतः षड्भिः प्रत्यविध्यद्युधिष्ठिरम् ।
विव्याध चाश्वान्निशितैस्तस्याष्टाभिः शिलीमुखैः॥
एवमेतन्महाराज युद्धशेषमवर्तत ।
तव दुर्मन्त्रिते राजन्सहपुत्रस्य भारत ॥ ८४
तस्मिन्महेष्वासधरे विशस्ते
सङ्गाममध्ये कुरुपुङ्गवेन ।
पार्थाः समेताः परमप्रहृष्टाः
शङ्खान्प्रदध्मुर्हतमीक्ष्य शल्यम् ॥ ८५
युधिष्ठिरं च प्रशशंसुराजौ
पुरा सुरा वृत्रवधे यथेन्द्रम् ।
चक्रुश्च नानाविधवाद्यशब्दा-
न्निनादयन्तो वसुधां समन्तात् ॥ ८६

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः ॥ १७ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
शल्येऽथ निहते राजन्मद्रराजपदानुगाः ।
रथाः सप्तशता वीरा दुद्रुवुर्महतो बलात् ॥ १
दुर्योधनस्तु द्विरदमारुह्याचलसन्निभम् ।
छत्रेण ध्रियमाणेन वीज्यमानश्च चामरैः ।
न गन्तव्यं न गन्तव्यमिति मद्रानवारयत् ॥ २
दुर्योधनेन ते वीरा वार्यमाणाः पुनः पुनः ।
युधिष्ठिरं जिघांसन्तः पाण्डूनां प्राविशन्बलम् ॥३
ते तु शूरा महाराज कृतचित्ताश्च योधने ।
धनुःशब्दं महत्कृत्वा सहायुध्यन्त पाण्डवैः ॥ ४
श्रुत्वा च निहतं शल्यं धर्मपुत्रं च पीडितम् ।
मद्रराजप्रिये युक्तैर्मद्रकाणां महारथैः ॥ ५
आजगाम ततः पार्थो गाण्डीवं विक्षिपन्धनुः ।
पूरयन्रथघोषेण दिशः सर्वा महारथः ॥ ६
ततोऽर्जुनश्च भीमश्च माद्रीपुत्रौ च पाण्डवौ ।
सात्यकिश्च नरव्याघ्रो द्रौपदेयाश्च सर्वशः ॥ ७
धृष्टद्युम्नः शिखण्डी च पाञ्चालाः सह सोमकैः ।
युधिष्ठिरं परीप्सन्तः समन्तात्पर्यवारयन् ॥ ८
ते समन्तात्परिवृताः पाण्डवैः पुरुषर्षभैः ।
क्षोभयन्ति स्म तां सेनां मकराः सागरं यथा ।
वृक्षानिव महावाताः कम्पयन्ति स्म तावकाः॥९
पुरोवातेन गङ्गेव क्षोभ्यमाणा महानदी ।
अक्षोभ्यत तदा राजन्पाण्डूनां ध्वजिनी ततः १०
प्रस्कन्द्य सेनां महतीं महात्मानो महारथाः ।
बहवश्चुक्रुशुस्तत्र क्व स राजा युधिष्ठिरः ।
भ्रातरो वाऽस्य ते शूरा दृश्यन्ते नेह केचन॥११
धृष्टद्युम्नोऽथ शैनेयो द्रौपदेयाश्च सर्वशः ।
पाञ्चालाश्च महावीर्याः शिखण्डी च महारथः १२
एवं तान्वादिनः शूरान्द्रौपदेया महारथाः ।
अभ्यघ्नन्युयुधानश्च मद्रराजपदानुगान् ॥ १३
चक्रैर्विमथितैः केचित्केचिच्छिन्नैर्महाध्वजैः ।
संप्रदृश्यन्त समरे तावका निहताः परैः ॥ १४
आलोक्य पाण्डवान्युद्धे योधा राजन्समन्ततः ।
वार्यमाणा ययुर्वेगात्पुत्रेण तव भारत ॥ १५
दुर्योधनश्च तान्वीरान्वारयामास सान्त्वयन् ।
न चास्य शासनं केचित्तत्र चक्रुर्महारथाः ॥ १६
ततो गान्धारराजस्य पुत्रः शकुनिरब्रवीत् ।
दुर्योधनं महाराज वचनं वचनक्षमम् ॥ १७
किं नः संप्रेक्षमाणानां मद्राणां हन्यते बलम् ।
न युक्तमेतत्समरे त्वयि तिष्ठति भारत ॥ १८
सहितैर्नाम योद्धव्यमित्येष समयः कृतः ।
अथ कस्मात्स्मरन्नेव व्रतो मर्षयसे नृप ॥ १९
दुर्योधन उवाच ।
वार्यमाणा मया पूर्वं नैते चक्रुर्वचो मम ।
एते विनिहताः सर्वे प्रस्कन्नाः पाण्डुवाहिनीम् २०

प्रस्कन्नाः प्रपन्नाः ॥ २० ॥ सप्तदशोऽध्यायः ॥ १७ ॥

शकुनिरुवाच ।
न भर्तुः शासनं वीरा रणे कुर्वन्त्यमर्षिताः ।
अलं क्रोद्धुमथैतेषां नायं काल उपेक्षितुम् ॥ २१
यामः सर्वेऽत्र संभूय सवाजिरथकुञ्जराः ।
परित्रातुं महेष्वासान्मद्रराजपदानुगान् ॥ २२
अन्योन्यं परिरक्षामो यत्नेन महता नृप ।
एवं सर्वेऽनुसंचिन्त्य प्रययुर्यत्र सैनिकाः ॥ २३
सञ्जय उवाच ।
एवमुक्तस्तदा राजा बलेन महता वृतः ।
प्रययौ सिंहनादेन कम्पयन्निव मेदिनीम् ॥ २४
हत विध्यत गृह्णीत प्रहरध्वं निकृन्तत ।
इत्यासीत्तुमुलः शब्दस्तव सैन्यस्य भारत ॥ २५
पाण्डवास्तु रणे दृष्ट्वा मद्रराजपदानुगान् ।
सहितानभ्यवर्तन्त गुल्ममास्थाय मध्यमम् ॥ २६
ते मुहूर्ताद्रणे वीरा हस्ताहस्ति विशांपते ।
निहताः प्रत्यदृश्यन्त मद्रराजपदानुगाः ॥ २७
ततो नः संप्रयातानां हता मद्रास्तरस्विनः ।
हृष्टाः किलकिलाशब्दमकुर्वन्सहिताः परे ॥ २८
अथोत्थितानि रुण्डानि समदृश्यन्त सर्वशः ।
पपात महती चोल्का मध्येनादित्यमण्डलम् ॥ २९
रथैर्भग्नयुगाक्षैश्च निहतैश्च महारथैः ।
अश्वैर्निपातितैश्चैव संछन्नाऽभूद्वसुंधरा ॥ ३०
वातायमानैस्तुरगैर्युगासक्तैस्ततस्ततः ।
अकृष्यन्त महाराज योधास्तत्र रणाजिरे ॥ ३१
भग्नचक्रान्रथान्केचिदहरंस्तुरगा रणे ।
रथार्धं केचिदादाय दिशो दश विबभ्रमुः ।
तत्रतत्र व्यदृश्यन्त योक्त्रैः श्लिष्टाः स्म वाजिनः ३२
रथिनः पतमानाश्च दृश्यन्ते स्म नरोत्तमाः ।
गगनात्प्रच्युताः सिद्धाः पुण्यानामिव संक्षये ॥ ३३
निहतेषु च शूरेषु मद्रराजानुगेषु वै ।
अस्मानापततश्चापि दृष्ट्वा पार्था महारथाः ॥ ३४
अभ्यवर्तन्त वेगेन जयगृद्धाः प्रहारिणः ।
बाणशब्दरवान्कृत्वा विमिश्राञ्शङ्खनिःस्वनैः ॥ ३५
अस्मांस्तु पुनरासाद्य लब्धलक्षाः प्रहारिणः ।
शरासनानि धुन्वानाः सिंहनादान्प्रचुक्रुशुः ॥ ३६
ततो हतमभिप्रेक्ष्य मद्रराजबलं महत् ।
मद्रराजं च समरे दृष्ट्वा शूरं निपातितम् ।
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम् ॥ ३७
वध्यमानं महाराज पाण्डवैर्जितकाशिभिः ।
दिशो भेजेऽथ संभ्रान्तं त्रासितं दृढधन्विभिः ३८

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः ॥ १८ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
पातिते युधि दुर्धर्षे मद्रराजे महारथे ।
तावकास्तव पुत्राश्च प्रायशो विमुखाऽभवन् ॥ १
वणिजो नावि भिन्नायां यथागाधे महार्णवे ।
अपारे पारमिच्छन्तो हते शूरे महात्मनि ॥ २
मद्रराजे महाराज वित्रस्ताः शरविक्षताः ।
अनाथा नाथमिच्छन्तो मृगाः सिंहार्दिता इव ॥ ३
वृषा यथा भग्नशृङ्गाः शीर्णदन्ता यथा गजाः ।
मध्याह्ने प्रत्यपायाम निर्जिताऽजातशत्रुणा ॥ ४
न संस्थातुमनीकानि न च राजन्पराक्रमे ।
आसीद्बुद्धिर्हते शल्ये तव योधस्य कस्यचित् ॥ ५
भीष्मे द्रोणे च निहते सूतपुत्रे च पातिते ।
यद्दुःखं तव योधानां भयं चासीद्विशांपते ॥ ६
तद्भयं स च नः शोको भूय एवाभ्यवर्तत ।
निराशाश्च जये राजन्हते शल्ये महारथे ॥ ७
हतप्रवीरा विध्वस्ता निकृत्ताश्च शितैः शरैः ।
मद्रराजे हते राजन्योधास्ते प्राद्रवन्भयात् ॥ ८
अश्वानन्ये गजानन्ये रथानन्ये महारथाः ।
आरुह्य जवसंपन्नाः पादाताः प्राद्रवंस्तथा ॥ ९
द्विसाहस्राश्च मातङ्गा गिरिरूपाः प्रहारिणः ।

संप्राद्रवन्हते शल्ये अङ्कुशाङ्कुष्ठनोदिताः ॥ १०
ते रणाद्धरतश्रेष्ठ तावकाः प्राद्रवन्दिशः ।
धावतश्चाप्यपश्याम श्वसमानाञ्शराहतान् ॥ ११
तान्प्रभग्नान्हतान्दृष्ट्वा हतोत्साहान्पराजितान् ।
अभ्यवर्तन्त पाञ्चालाः पाण्डवाश्च जयैषिणः ॥ १२
बाणशब्दरवाश्चापि सिंहनादाश्च पुष्कलाः ।
शङ्खशब्दश्च शूराणां दारुणः समपद्यत ॥ १३
दृष्ट्वा तु कौरवं सैन्यं भयत्रस्तं प्रविद्रुतम् ।
अन्योन्यं समभाषन्त पाञ्चालाः पाण्डवैः सह १४
अद्य राजा सत्यधृतिर्हतामित्रो युधिष्ठिरः ।
अद्य दुर्योधनो हीनो दीप्तया नृपतिश्रिया ॥ १५
अद्य श्रुत्वा हतं पुत्रं धृतराष्ट्रो जनेश्वरः ।
निःसंज्ञः पतितो भूमौ किल्बिषं प्रतिपत्स्यते ॥ १६
अद्य जानाति बीभत्सुं समर्थं सर्वधन्विनाम् ।
अद्यात्मानं च दुर्मेधा गर्हयिष्यति पापकृत् ॥ १७
अद्य क्षत्तुर्वचः सत्यं स्मरतां ब्रुवतो हितम् ।
अद्यप्रभृति पार्थं च प्रेष्यभूत इवाचरन् ।
विजानातु नृपो दुःखं यत्प्राप्तं पाण्डुनन्दनैः ॥ १८
अद्य कृष्णस्य माहात्म्यं विजानातु महीपतिः ।
अद्यार्जुनधनुर्घोषं घोरं जानातु संयुगे ॥ १९
अस्त्राणां च बलं सर्वं बाह्वोश्च बलमाहवे ।
'पुत्राणां च वधं घोरं भीमेन श्रोष्यते नृपः ॥' २०
अद्य ज्ञास्यति भीमस्य बलं घोरं महात्मनः ।
हते दुर्योधने युद्धे शक्रेणेव तु शम्बरे ॥ २१
यत्कृतं भीमसेनेन दुःशासनवधे तदा ।
कोऽन्यः कर्ताऽस्ति तल्लोके ऋते भीमान्महाबलात्
अद्य ज्येष्ठस्य जानीतां पाण्डवस्य पराक्रमम् ।
मद्रराजं हतं श्रुत्वा देवैरपि सुदुःसहम् ॥ २३
अद्य ज्ञास्यति सङ्ग्रामे माद्रीपुत्रौ सुदुःसहौ ।
निहते सौबले वीरे गान्धारेषु च सर्वशः ॥ २४
कथं जयो न तेषां स्याद्येषां योद्धा धनञ्जयः ।
सात्यकिर्भीमसेनश्च धृष्टद्युम्नश्च पार्षतः ॥ २५
द्रौपद्यास्तनयाः पञ्च माद्रीपुत्रौ च पाण्डवौ ।
शिखण्डी च महेष्वासो राजा चैव युधिष्ठिरः ॥ २६
येषां च जगतो नाथो नाथः कृष्णो जनार्दनः ।
कथं तेषां जयो न स्याद्येषां धर्मो व्यपाश्रयः ॥ २७
'लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषां नाथो हृषीकेशः सर्वलोकविभुर्हरिः ॥' २८
भीष्मं द्रोणं च कर्णं च मद्रराजानमेव च ।
तथाऽन्यान्नृपतीन्वीराञ्शतशोऽथ सहस्रशः ॥ २९
कोऽन्यः शक्तो रणे जेतुमृते पार्थाद्युधिष्ठिरात् ।
यस्य नाथो हृषीकेशः सदा सत्ययशोनिधिः ॥ ३०
इत्येवं वदमानास्ते हर्षेण महता युताः ।
प्रभग्नांस्तावकान्योधान्संहृष्टाः पृष्ठतोऽन्वयुः ॥ ३१
धनञ्जयो रथानीकमभ्यवर्तत वीर्यवान् ।
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महारथः ॥ ३२
तान्प्रेक्ष्य द्रवतः सर्वान्भीमसेनभयार्दितान् ।
दुर्योधनस्तदा सूतमब्रवीद्विस्मयन्निव ॥ ३३
मामतिक्रमते पार्थो धनुष्पाणिमवस्थितम् ।
जघने सर्वसैन्यानां शनैरश्वान्प्रचोदय ॥ ३४
जघने युध्यमानं हि कौन्तेयो मां न संशयः ।
नोत्सहेदभ्यतिक्रान्तुं वेलामिव महोदधिः ॥ ३५
पश्य सैन्यं महत्सूत पाण्डवैः समभिद्रुतम् ।
सैन्यरेणुं समुद्धूतं पश्य चैनं समन्ततः ॥ ३६
सिंहनादांश्च बहुशः शृणु घोरान्भयावहान् ।
तस्माद्याहि शनैः सूत जघनं परिपालय ॥ ३७
मयि स्थिते च समरे निरुद्धेषु च पाण्डुषु ।
पुनरावर्तते तूर्णं मामकं बलमोजसा ॥ ३८
तच्छ्रुत्वा तव पुत्रस्य शूरस्य सदृशं वचः ।
सारथिर्हेमसंछन्नाञ्शनैरश्वानचोदयत् ॥ ३९
गजाश्वरथिभिर्हीनास्त्यक्तात्मानः पदातयः ।
एकविंशतिसाहस्राः संयुगायावतस्थिरे ॥ ४०
नानादेशसमुद्भूता नानारञ्जितवाससः ।
अवस्थितास्तदा योधाः प्रार्थयन्तो महद्यशः ॥ ४१
तेषामापततां तत्र संहृष्टानां परस्परम् ।
संमर्दः सुमहाञ्ज्ञे घोररूपो भयानकः ॥ ४२
भीमसेनं तदा राजन्धृष्टद्युम्नं च पार्षतम् ।
बलेन चतुरङ्गेण नानादेश्यानवारयत् ॥ ४३

न मातिक्रमते पार्थः इति ङ. पाठः । न मानमस्यते इति क. पाठ. ॥ ३४ ॥ अष्टादशोऽध्यायः ॥ १८ ॥

भीममेवाभ्यवर्तन्त रणेऽन्ये तु पदातयः ।
प्रक्ष्वेड्यास्फोट्य संहृष्टा वीरलोकं यियासवः॥४४
आसाद्य भीमसेनं तु संरब्धा युद्धदुर्मदाः ।
धार्तराष्ट्रा विनेदुर्हि नान्यामकथयन्कथाम् ।
परिवार्य रणे भीमं निजघ्नुस्ते समन्ततः ॥ ४५
स वध्यमानः समरे पदातिगणसंवृतः ।
न चचाल ततः स्थानान्मैनाक इव पर्वतः ॥ ४६
ते तु क्रुद्धा महाराज पाण्डवस्य महारथम् ।
निग्रहीतुं प्रवृत्ता हि योधांश्चान्यानवारयन् ॥ ४७
अक्रुध्यत रणे भीमस्तैस्तदा पर्यवस्थितैः ।
सोऽवतीर्य रथात्तूर्णं पदातिः समवस्थितः ॥ ४८
जातरूपप्रतिच्छन्नां प्रगृह्य महतीं गदाम् ।
अवधीत्तावकान्योधान्दण्डपाणिरिवान्तकः॥ ४९
रथाश्वविग्रहीणांस्तु तान्भीमो गदया बली ।
एकविंशतिसाहस्रान्पदातीन्समपोथयत् ॥ ५०
हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः ।
धृष्टद्युम्नं पुरस्कृत्य न चिरात्प्रत्यदृश्यत ॥ ५१
पादाता निहता भूमौ शिश्यिरे रुधिरोक्षिताः ।
संभग्ना इव वातेन कर्णिकाराः सुपुष्पिताः ॥ ५२
नानाशस्त्रसमायुक्ता नानाकुण्डलधारिणः ।
नानाजात्या हतास्तत्र नानादेशसमागताः॥ ५३
पताकाध्वजसंछन्नं पदातीनां महद्बलम् ।
निकृत्तं विबभौ रौद्रं घोररूपं भयावहम् ॥ ५४
युधिष्ठिरपुरोगाश्च सहसैन्या महारथाः ।
अभ्यधावन्महात्मानं पुत्रं दुर्योधनं तव ॥ ५५
ते सर्वे तावकान्दृष्ट्वा महेष्वासान्पराङ्मुखान् ।
नाभ्यवर्तन्त ते पुत्रं वेलामिव महोर्मयः ॥ ५६
तदद्भुतमपश्याम तव पुत्रस्य पौरुषम् ।
यदेकं सहिताः पार्था न शेकुरतिवर्तितुम् ॥ ५७
नातिदूरापयातं तु कृतबुद्धि पलायने ।
दुर्योधनः स्वकं सैन्यमब्रवीद्भृशविक्षतम् ॥ ५८
न तं देशं प्रपश्यामि पृथिव्यां पर्वतेषु च ।
यत्र यातान्न वा हन्युः पाण्डवाः किं सृतेन वः ५९
अल्पं च बलमेतेषां कृष्णौ च भृशविक्षतौ ।
यदि सर्वेऽत्र तिष्ठामो ध्रुवं नो विजयो भवेत् ॥६०
विप्रयातांस्तु वो भिन्नान्पाण्डवाः कृतविप्रियाः ।
अनुयाय हनिष्यन्ति श्रेयान्नः समरे वधः ॥ ६१
शृण्वन्तु क्षत्रियाः सर्वे यावन्तोऽत्र समागताः ।
यदा शूरं च भीरुं च मारयत्यन्तकः सदा ॥ ६२
को नु मूढो न युध्येत पुरुषः क्षत्रियो ध्रुवम् ।
श्रेयान्नो भीमसेनस्य क्रुद्धस्याभिमुखे स्थितः॥६३
सुखः साङ्गामिको मृत्युर्दुःखो व्याधिजरादिभिः ।
मर्त्येनावश्यमर्तव्यं गृहेष्वपि कदाचन ॥ ६४
युध्यतः क्षत्रधर्मेण मृत्युरेष सनातनः ।
हत्वेह सुखमाप्नोति हतः प्रेत्य महत्फलम् ॥ ६५
न युद्धधर्माच्छ्रेयान्वै पन्थाः स्वर्गस्य कौरवाः ।
अचिरेणैव तॉल्लोकान्हतो युद्धे समश्नुते ॥ ६६
श्रुत्वा तद्वचनं तस्य पूजयित्वा च पार्थिवाः ।
पुनरेवाभ्यवर्तन्त पाण्डवानांततायिनः ॥ ६७
तानापतत एवाशु व्यूढानीकाः प्रहारिणः ।
प्रत्युद्ययुस्तदा पार्था जयगृद्धाः प्रमन्यवः ॥ ६८
धनञ्जयो रथेनाजावभ्यवर्तत वीर्यवान् ।
विश्रुतं त्रिषु लोकेषु व्याक्षिपन्गाण्डिवं धनुः॥ ६९
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महाबलः ।
जवेनाभ्यपतन्हृष्टा यत्ता वै तावकं बलम् ॥ ७०

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे अष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः ॥ १९ ॥

सात्यकिना साल्ववधः ॥ १ ॥

सञ्जय उवाच ।
सन्निवृत्तेषु सैन्येषु साल्वो म्लेच्छगणाधिपः ।
अभ्यद्रवत्सुसंक्रुद्धः पाण्डवानां महद्बलम् ॥ १
आस्थाय सुमहानागं प्रभिन्नं पर्वतोपमम् ।

दृप्तमैरावतप्रख्यममित्रगणमर्दनम् ॥ २
योऽसौ महान्भद्रकुलप्रसूतः
सुपूजितो धार्तराष्ट्रेण नित्यम् ।
सुकल्पितः शास्त्रविनिश्चयज्ञैः
सदोपवाह्यः समरेषु राजन् ॥ ३
ऐरावतं दैत्यगणान्विमृद्न-
ञ्शक्रो यथा सञ्जनयन्भयानि ।
तमास्थितो राजवरो बभूव
यथोदयस्थः सविता क्षपान्ते ॥ ४
स तेन नागप्रवरेण राज-
न्नभ्युद्ययौ पाण्डुसुतान्समेतान् ।
शितैः पृषत्कैर्विददार वेगै-
र्महेन्द्रवज्रप्रतिमैः सुघोरैः ॥ ५
ततः शरान्वै सृजतो महारणे
योधांश्च राजन्नयतो यमालयम् ।
नास्यान्तरं ददृशुः खे परे वा
यथा पुरा वज्रधरस्य दैत्याः ॥ ६
ते पाण्डवाः सोमकाः सृञ्जयाश्च
तमेकनागं ददृशुः समन्तात् ।
सहस्रशो वै विचरन्तमेकं
यथा महेन्द्रस्य गजं समीपे ॥ ७
संद्राव्यमाणं तु बलं परेषां
परेतकल्पं विबभौ समन्ततः ।
नैवावतस्थे समरे भृशं भया-
द्विमृद्यमानं तु परस्परं तदा ॥ ८
ततः प्रभग्ना सहसा महाचमूः
सा पाण्डवी तेन नराधिपेन ।
दिशश्चतस्रः सहसा विधाविता·
गजेन्द्रवेगं तमपारयन्ती ॥ ९
दृष्ट्वा च तां वेगवता प्रभग्नां
सर्वे त्वदीया युधि योधमुख्याः ।
अपूजयंस्ते तु नराधिपं तं
दध्मुश्च शङ्खान्शशिसन्निकाशान् ॥ १०
श्रुत्वा निनादं त्वथ कौरवाणां
हर्षाद्विमुक्तं सह शङ्खशब्दैः ।
सेनापतिः पाण्डवसृञ्जयानां
पाञ्चालपुत्रो ममृषे न कोपात् ॥ ११
ततस्तु तं वै द्विरदं महात्मा
प्रत्युद्ययौ त्वरमाणो जयाय ।
जम्भो यथा शक्रसमागमे वै
नागेन्द्रमैरावणमिन्द्रवाह्यम् ॥ १२
तमापतन्तं सहसा तु दृष्ट्वा
पाञ्चालपुत्रं युधि राजसिंहः ।
तं वै द्विपं प्रेषयामास तूर्णं
वधाय राजन्द्रुपदात्मजस्य ॥ १३
स तं द्विपेन्द्रं सहसापतन्त-
मविध्यदग्निप्रतिमैः पृषत्कैः ।
कर्मारधौतैर्निशितैर्ज्वलद्भि-
र्नाराचमुख्यैस्त्रिभिरुग्रवेगैः ॥ १४
ततोऽपरान्पञ्चशतान्महात्मा
नाराचमुख्यान्विससर्ज कुम्भे ।
स तैस्तु विद्धः परमद्विपो रणे
तदा परावृत्य भृशं प्रदुद्रुवे ॥ १५
तं नागराजं सहसा प्रणुन्नं
विद्राव्यमाणं विनिवर्त्य साल्वः ।
तोत्राङ्कुशैः प्रेषयामास तूर्णं
पाञ्चालराजस्य सुतं प्रदिश्य ॥ १६
दृष्ट्वा पतन्तं सहसा तु नागं
धृष्टद्युम्नः स्वरथाच्छीघ्रमेव ।
गदां प्रगृह्योग्रजवेन वीरो
भूमिं प्रपन्नो भयविह्वलाङ्गः ॥ १७
स तं रथं हेमविभूषिताङ्गं
साश्वं ससूतं सहसा विमृद्य ।
उत्क्षिप्य हस्तेन नदन्महाद्विपो
विपोथयामास वसुंधरातले ॥ १८
पाञ्चालराजस्य सुतं च दृष्ट्वा
तदार्दितं नागवरेण तेन ।
तमभ्यधावत्सहसा जवेन
भीमः शिखण्डी च शिनेश्च नप्ता ॥ १९

शरैश्च वेगं सहसा निगृह्य
तस्याभितो व्यापततो गजस्य ।
स संगृहीतो रथिभिर्गजो वै
चचाल तैर्वार्यमाणश्च सङ्ख्ये ॥ २०
ततः पृषत्कान्प्रववर्ष राजा
सूर्यो यथा रश्मिजालं समन्तात् ।
तैराशुगैर्वध्यमाना रथौघाः
प्रदुद्रुवुः सहितास्तत्रतत्र ॥ २१
तत्कर्म साल्वस्य समीक्ष्य सर्वे
पाञ्चालपुत्रा नृप सृञ्जयाश्च ।
हाहाकारैर्नादयन्ति स्म युद्धे
द्विपं समन्ताद्रुरुधुर्नराग्र्याः ॥ २२
पाञ्चालपुत्रस्त्वरितस्तु शूरो
गदां प्रगृह्याचलशृङ्गकल्पाम् ।
ससंभ्रमं भारत शत्रुघाती
जवेन वीरोऽनुससार नागम् ॥ २३
ततस्तु नागं धरणीधराभं
मदं स्रवन्तं जलदप्रकाशम् ।
गदां समाविध्य भृशं जघान
पाञ्चालराजस्य सुतस्तरस्वी ॥ २४
स भिन्नकुम्भः सहसा विनद्य
मुखात्प्रभूतं क्षतजं विमुञ्चन् ।
पपात नागो धरणीधराभः
क्षितिप्रकम्पाच्चलितो यथाऽद्रिः ॥ २५
निपात्यमाने तु तदा गजेन्द्रे
हाहाकृते तव पुत्रस्य सैन्ये ।
स साल्वराजस्य शिनिप्रवीरो
जहार भल्लेन शिरः शितेन ॥ २६
हृतोत्तमाङ्गो युधि सात्वतेन
पपात भूमौ सह नागराज्ञा ।
यथाऽद्रिशृङ्गं सुमहत्प्रणुन्नं
वज्रेण देवाधिपचोदितेन ॥ २७

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे एकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः ॥ २० ॥

साल्यकिना कृतवर्मपराजयः ॥ १ ॥

सञ्जय उवाच ।
तस्मिंस्तु निहते शूरे साल्वे समितिशोभने ।
तवाभज्यद्बलं वेगाद्वातेनेव महाद्रुमः ॥ १
तत्प्रभग्नं बलं दृष्ट्वा कृतवर्मा महारथः ।
दधार समरे शूरः शत्रुसैन्यं महाबलः ॥ २
सन्निवृत्तास्तु ते शूरा दृष्ट्वा सात्वतमाहवे ।
शैलोपमं स्थिरं राजन्कीर्यमाणं शरैर्युधि ॥ ३
ततः प्रववृते युद्धं कुरूणां पाण्डवैः सह ।
निवृत्तानां महाराज मृत्युं कृत्वा निवर्तनम् ॥ ४
तत्राश्चर्यमभूद्युद्धं सात्वतस्य परैः सह ।
यदेको वारयामास पाण्डुसेनां दुरासदाम् ॥ ५
तेषामन्योन्यसुहृदां कृते कर्मणि दुष्करे ।
सिंहनादः प्रहृष्टानां दिविस्पृक्सुमहानभूत् ॥ ६

सात्वत कृतवर्माणम् ॥ ३ ॥

तेन शब्देन वित्रस्तान्पाञ्चालान्भरतर्षभ ।
शिनेर्नप्ता महाबाहुरन्वपद्यत सात्यकिः ॥ ७
स समासाद्य राजानं क्षेमधूर्तिं महाबलम् ।
सप्तभिर्निशितैर्बाणैरनयद्यमसादनम् ॥ ८
तमायान्तं महाबाहुं शरवर्षं शिताञ्शरान् ।
जवेनाभ्यपतद्वीमान्हार्दिक्यः शिनिपुङ्गवम् ॥ ९
तौ सिंहाविव नर्दन्तौ धन्विनौ रथिनां वरौ ।
अन्योन्यमभिधावन्तौ शस्त्रप्रवरधारिणौ ॥ १०
पाण्डवाः सहपाञ्चाला योधाश्चान्ये नृपोत्तमाः ।
प्रेक्षकाः समपद्यन्त तयोः पुरुषसिंहयोः ॥ ११
नाराचैर्वत्सदन्तैश्च वृष्ण्यन्धकमहारथौ ।
अभिजघ्नतुरन्योन्यं प्रहृष्टाविव कुञ्जरौ ॥ १२
चरन्तौ विविधान्मार्गान्हार्दिक्यशिनिपुङ्गवौ ।

विंशोऽध्याय. ॥ २० ॥

मुहुरन्तर्दधाते तौ बाणवृष्ट्या परस्परम् ॥ १३
चापवेगबलोद्धूतान्मार्गणान्वृष्णिसिंहयोः ।
आकाशे समपश्याम पतङ्गानिव शीघ्रगान् ॥ १४
तमेकं सत्यकर्माणमासाद्य हृदिकात्मजः ।
अविध्यन्निशितैर्बाणैश्चतुर्भिश्चतुरो हयान् ॥ १५
स दीर्घबाहुः संक्रुद्धस्तोत्रार्दित इव द्विपः ।
अष्टभिः कृतवर्माणमविध्यत्परमेषुभिः ॥ १६
ततः पूर्णायतोत्सृष्टैः कृतवर्मा शिलाशितैः ।
सात्यकिं त्रिभिराहत्य धनुरेकेन चिच्छिदे ॥ १७
निकृत्तं तद्धनुःश्रेष्ठमपास्य शिनिपुङ्गवः ।
अन्यदादत्त वेगेन शैनेयः सशरं धनुः ॥ १८
तदादाय धनुःश्रेष्ठं वरिष्ठः सर्वधन्विनाम् ।
आरोप्य च धनुः शीघ्रं महावीर्यो महाबलः ॥ १९
अमृष्यमाणो धनुषश्छेदनं कृतवर्मणा ।
कुपितोऽतिरथः शीघ्रं कृतवर्माणमभ्ययात् ॥ २०
ततः सुनिशितैर्बाणैर्दशभिः शिनिपुङ्गवः ।
जघान सूतं चाश्वांश्च ध्वजं च कृतवर्मणः ॥ २१
ततो राजन्महेष्वासः कृतवर्मा महारथः ।
हताश्वसूतं संप्रेक्ष्य रथं हेमपरिष्कृतम् ॥ २२
रोषेण महताऽऽविष्टः शूलमुद्यम्य मारिष ।
चिक्षेप भुजवेगेन ज्ञिघांसुः शिनिपुङ्गवम् ॥ २३
तच्छूलं सात्वतो ह्याजौ निर्भिद्य निशितैः शरैः ।
चूर्णितं पातयामास मोहयन्निव माधवम् ।
ततोऽपरेण भल्लेन हृद्येनं समताडयत् ॥ २४
सुयुद्धे युयुधानेन हताश्वो हतसारथिः ।
कृतवर्मा कृतास्त्रेण धरणीमन्वपद्यत ॥ २५
तस्मिन्सात्यकिना वीरे द्वैरथे विरथीकृते ।
समपद्यत सर्वेषां सैन्यानां सुमहद्भयम् ॥ २६
पुत्राणां तव चात्यर्थं विषादः समजायत ।
हतसूते हताश्वे तु विरथे कृतवर्मणि ॥ २७
हताश्वं च समालक्ष्य हतसूतमरिंदम ।
अभ्यधावत्कृपो राजञ्जिघांसुः शिनिपुङ्गवम् २८
तमारोप्य रथोपस्थे मिषतां सर्वधन्विनाम् ।
अपोवाह महाबाहुं तूर्णमायोधनादपि ॥ २९
शैनेयेऽधिष्ठिते राजन्विरथे कृतवर्मणि ।
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम् ॥ ३०
तत्परे नान्वबुध्यन्त सैन्येन रजसा वृताः ।
तावकाः प्रद्रुता राजन्दुर्योधनमृते नृपम् ॥ ३१
दुर्योधनस्तु संप्रेक्ष्य भग्नं स्वबलमन्तिकात् ।
जवेनाभ्यपतत्तूर्णं सर्वांश्चैको न्यवारयत् ॥ ३२
पाण्डूंश्च सर्वान्संक्रुद्धो धृष्टद्युम्नं च पार्षतम् ।
शिखण्डिनं द्रौपदेयान्पाञ्चालानां च ये गणाः ३३
केकयान्सोमकांश्चैव सृञ्जयांश्चैव मारिष ।
असंभ्रमं दुराधर्षः शितैर्बाणैरवाकिरत् ॥ ३४
अतिष्ठदाहवे यत्तः पुत्रस्तव महाबलः ।
यथा यज्ञे महानग्निर्मन्त्रपूतः प्रकाशते ।
तथा दुर्योधनो राजा सङ्ग्रामे सर्वतोऽभवत् ॥ ३५
तं परे नाभ्यवर्तन्त मर्त्या मृत्युमिवाहवे ।
अथान्यं रथमास्थाय हार्दिक्यः समपद्यत ॥ ३६

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः ॥ २१ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
पुत्रस्तु ते महाराज रथस्थो रथिनां वरः ।
दुरुत्सहो बभौ युद्धे यथा रुद्रः प्रतापवान् ॥ १
तस्य बाणसहस्रैस्तु प्रच्छन्ना ह्यभवन्मही ।
परांश्च सिषिचे बाणैर्धाराभिरिव पर्वतान् ॥ २
न च सोऽस्ति पुमान्कश्चित्पाण्डवानां बलार्णवे ।
हयो गजो रथो वाऽपि यः स्याद्बाणैरविक्षतः ॥ ३
यं यं हि समरे योधं प्रपश्यामि विशांपते ।
स स बाणैश्चितोऽभूद्वै पुत्रेण तव भारत ॥ ४
यथा सैन्येन रजसा समुद्धूतेन वाहिनी ।

प्रत्यदृश्यत संछन्ना तथा बाणैर्महात्मनः ॥ ५
बाणभूतामपश्याम पृथिवीं पृथिवीपते ।
दुर्योधनेन प्रकृतां क्षिप्रहस्तेन धन्विना ॥ ६
तेषु योधसहस्रेषु तावकेषु परेषु च ।
नास्ति दुर्योधनसमः पुमानिति मतिर्मम ॥ ७
तत्राद्भुतमपश्याम तव पुत्रस्य विक्रमम् ।
यदेकं सहिताः पार्था नाभ्यवर्तन्त भारत ॥ ८
युधिष्ठिरं शतेनाजौ विव्याध भरतर्षभ ।
भीमसेनं च सप्तत्या सहदेवं च पञ्चभिः ॥ ९
नकुलं च चतुःषष्ट्या धृष्टद्युम्नं च पञ्चभिः ।
पञ्चभिर्द्रौपदेयांश्च त्रिभिर्विव्याध सात्यकिम् ॥ १०
धनुश्चिच्छेद भल्लेन सहदेवस्य मारिष ।
तदपास्य धनुश्छिन्नं माद्रीपुत्रः प्रतापवान् ॥ ११
अभ्यद्रवत राजानं प्रगृह्यान्यन्महद्धनुः ।
ततो दुर्योधनं सङ्ख्ये विव्याध दशभिः शरैः ॥ १२
नकुलस्तु ततो वीरो राजानं नवभिः शरैः ।
घोररूपैर्महेष्वासो विव्याध च ननाद च ॥ १३
सात्यकिश्चैव राजानं शरेणानतपर्वणा ।
द्रौपदेयास्त्रिसप्तत्या धर्मराजश्च पञ्चभिः ।
अशीत्या भीमसेनश्च शरै राजानमार्पयन् ॥ १४
समन्तात्कीर्यमाणस्तु बाणसङ्घैर्महात्मभिः ।
न चचाल महाराज सर्वसैन्यस्य पश्यतः ॥ १५
लाघवात्सौष्ठवाच्चापि वीर्याच्चापि महात्मनः ।
अति सर्वाणि भूतानि ददृशुः सर्वपार्थिवाः ॥ १६
धार्तराष्ट्रा हि राजेन्द्र योधास्तु स्वल्पमन्तरम् ।
अपश्यमाना राजानं पर्यवर्तन्त दंशिताः ॥ १७
तेषामापततां घोरस्तुमुलः समपद्यत ।
क्षुब्धस्य हि समुद्रस्य प्रावृट्काले यथा स्वनः ॥ १८
समासाद्य रणे ते तु राजानमपराजितम् ।
प्रत्युद्ययुर्महेष्वासाः पाण्डवानाततायिनः ॥ १९
भीमसेनं रणे क्रुद्धो द्रोणपुत्रो न्यवारयत् ।
तयोर्बाणैर्महाराज प्रमुक्तैः सर्वतोदिशम् ।
नाज्ञायन्त रणे वीरा न दिशः प्रदिशस्तथा ॥ २०
तावुभौ क्रूरकर्माणावुभौ भारतदुःसहौ ।
घोररूपमयुध्येतां कृतप्रतिकृतैषिणौ ॥ २१

त्रासयन्तौ दिशः सर्वा ज्याक्षेपकठिनत्वचौ ।
शकुनिस्तु रणे वीरो युधिष्ठिरमपीडयत् ॥ २२
तस्याश्वांश्चतुरो हत्वा सुबलस्य सुतो विभो ।
नादं चकार बलवत्सर्वसैन्यानि कम्पयन् ॥ २३
एतस्मिन्नन्तरे वीरं राजानमपराजितम् ।
अपोवाह रथेनाजौ सहदेवः प्रतापवान् ॥ २४
अथान्यं रथमास्थाय धर्मपुत्रो युधिष्ठिरः ।
शकुनिं नवभिर्विद्ध्वा पुनर्विव्याध पञ्चभिः ।
ननाद च महानादं प्रवरः सर्वधन्विनाम् ॥ २५
तद्युद्धमभवच्चित्रं घोररूपं च मारिष ।
प्रेक्षतां प्रीतिजननं सिद्धचारणसेवितम् ॥ २६
उलूकस्तु महेष्वासं नकुलं युद्धदुर्मदम् ।
अभ्यवर्षदमेयात्मा शरवर्षैः समन्ततः ॥ २७
तथैव नकुलः शूरः सौबलस्य सुतं रणे ।
शरवर्षेण महता समन्तात्पर्यवारयत् ॥ २८
तौ तत्र समरे वीरौ कुलपुत्रौ महारथौ ।
योधयन्तावपश्येतां कृतप्रतिकृतैषिणौ ॥ २९
तथैव कृतवर्माणं शैनेयः शत्रुतापनः ।
योधयञ्शुशुभे राजन्बलिं शक्र इवाहवे ॥ ३०
दुर्योधनो धनुश्छित्त्वा धृष्टद्युम्नस्य संयुगे ।
अथैनं छिन्नधन्वानं विव्याध निशितैः शरैः ॥ ३१
धृष्टद्युम्नोऽपि समरे प्रगृह्य परमायुधम् ।
राजानं योधयामास पश्यतां सर्वधन्विनाम् ॥ ३२
तयोर्युद्धं महच्चासीत्सङ्ग्रामे भरतर्षभ ।
प्रभिन्नयोर्यथा सक्तं मत्तयोर्वनहस्तिनोः ॥ ३३
गौतमस्तु रणे क्रुद्धो द्रौपदेयान्महाबलान् ।
विव्याध बहुभिः शूरः शरैः सन्नतपर्वभिः ॥ ३४
तस्य तैरभवद्युद्धमिन्द्रियैरिव देहिनः ।
घोररूपमसंवार्यं निर्मर्यादमवर्तत ॥ ३५
ते च संपीडयामासुरिन्द्रियाणीव बालिशम् ।
स च तान्प्रतिसंरब्धः प्रत्ययोधयदाहवे ॥ ३६
एवं चित्रमभूद्युद्धं तस्य तैः सह भारत ।
उत्थायोत्थाय हि यथा देहिनामिन्द्रियैर्विभो ३७
नराश्चैव नरैः सार्धं दन्तिनो दन्तिभिस्तथा ।
हया हयैः समासक्ता रथिनो रथिभिः सह ॥ ३८

संकुलं चाभवद्भूयो घोररूपं विशांपते ॥ ३९
इदं चित्रमिदं घोरमिदं रौद्रमिति प्रभो ।
युद्धान्यासन्महाराज घोराणि च बहूनि च ॥ ४०
ते समासाद्य समरे परस्परमरिंदमाः ।
व्यनदंश्चैव जघ्नुश्च समासाद्य महाहवे ॥ ४१
तेषां पत्रसमुद्भूतं रजस्तीव्रमदृश्यत ।
वातेन चोद्धतं राजन्धावद्भिश्चाश्वसादिभिः ॥ ४२
रथनेमिसमुद्भूतं निःश्वासैश्चापि दन्तिनाम् ।
रजः सन्ध्याभ्रकलिलं दिवाकरपथं ययौ ॥ ४३
रजसा तेन संपृक्तो भास्करो निष्प्रभः कृतः ।
संछादिताऽभवद्भूमिस्ते च शूरा महारथाः ॥ ४४
मुहूर्तादिव संवृत्तं नीरजस्कं समन्ततः ।
वीरशोणितसिक्तायां भूमौ भरतसत्तम ॥ ४५
उपाशाम्यत्ततस्तीव्रं तद्रजो घोरदर्शनम् ॥ ४६
ततोऽपश्यमहं भूयो द्वन्द्वयुद्धानि भारत ।
यथाप्राणं यथाश्रेष्ठं मध्याह्ने वै सुदारुणम् ॥ ४७
वर्मणां तत्र राजेन्द्र व्यदृश्यन्तोज्वलाः प्रभाः ।
शब्दश्च तुमुलः सङ्ख्ये शराणां पततामभूत् ।
महावेणुवनस्येव दह्यमानस्य पर्वते ॥ ४८

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे एकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः ॥ २२ ॥

संकुलयुद्धम् ॥ १ ॥

सञ्जय उवाच ।
वर्तमाने तदा युद्धे घोररूपे भयानके ।
अभज्यत बलं तत्र तव पुत्रस्य पाण्डवैः ॥ १
तांस्तु सर्वानयत्नेन सन्निवार्य महारथाः ।
पुत्रास्ते योधयामासुः पाण्डवानामनीकिनीम् ॥ २
निवृत्ताः सहसा योधास्तव पुत्रजयैषिणः ।
सन्निवृत्तेषु तेष्वेवं युद्धमासीत्सुदारुणम् ।
तावकानां परेषां च देवासुररणोपमम् ॥ ३
परेषां तावकानां च नासीत्कश्चित्पराङ्मुखः ॥ ४
अनुमानेन युध्यन्ते संज्ञाभिश्च परस्परम् ।
तेषां क्षयो महानासीद्युध्यतामितरेतरम् ॥ ५
ततो युधिष्ठिरो राजा क्रोधेन महता युतः ।
जिगीषमाणः सङ्ग्रामे धार्तराष्ट्रान्सराजकान् ॥ ६
त्रिभिः शारद्वतं विद्ध्वा रुक्मपुङ्खैः शिलाशितैः ।
चतुर्भिर्निजघानाश्वान्कल्याणान्कृतवर्मणः ॥ ७
अश्वत्थामा तु हार्दिक्यमपोवाह यशस्विनम् ।
अथ शारद्वतोऽष्टाभिः प्रत्यविध्यद्युधिष्ठिरम् ॥ ८
ततो दुर्योधनो राजा रथान्सप्तशतान्रणे ।
प्रैषयद्यत्र राजाऽसौ धर्मपुत्रो युधिष्ठिरः ॥ ९
ते रथा रथिभिर्युक्ता मनोमारुतरंहसः ।
अभ्यद्रवन्त सङ्ग्रामे कौन्तेयस्य रथं प्रति ॥ १०
ते समन्तान्महाराज परिवार्य युधिष्ठिरम् ।
अदृश्यं सायकैश्चक्रुर्मेघा इव दिवाकरम् ॥ ११
तं दृष्ट्वा धर्मराजानं कौरवेयैस्तथावृतम् ।
नामृष्यन्त सुसंरब्धाः शिखण्डिप्रमुखा रथाः ॥ १२
रथैरश्ववरैर्युक्तैः किङ्किणीजालसंवृतैः ।
आजग्मुरथ रक्षन्तः कुन्तीपुत्रं युधिष्ठिरम् ॥ १३
ततः प्रववृते रौद्रः सङ्ग्रामः शोणितोदकः ।
पाण्डवानां कुरूणां च यमराष्ट्रविवर्धनः ॥ १४
रथान्सप्तशतान्हत्वा कुरूणामाततायिनाम् ।
पाण्डवाः सह पाञ्चालैः पुनरेवाभ्यवारयन् ॥ १५
तत्र युद्धं महच्चासीत्तव पुत्रस्य पाण्डवैः ।
न च तत्तादृशं दृष्टं नैव चापि परिश्रुतम् ॥ १६
वर्तमाने तदा युद्धे निर्मर्यादे समन्ततः ।
वध्यमानेषु योधेषु तावकेष्वितरेषु च ॥ १७
विनदत्सु च योधेषु शङ्खवर्यैश्च पूरितैः ।
उत्कृष्टैः सिंहनादैश्च गर्जितैश्चैव धन्विनाम् ॥ १८
अतिप्रवृत्ते युद्धे च छिद्यमानेषु मर्मसु ।

पत्र वाहनम् ॥ ४२ ॥

एकविंशोऽध्यायः ॥ २१ ॥

धावमानेषु योधेषु जयगृद्धिषु मारिष ॥ १९
संहारे सर्वतो जाते पृथिव्यां शोकसंभवे ।
बह्वीनामुत्तमस्त्रीणां सीमन्तोद्धरणे कृते ॥ २०
निर्मर्यादे महायुद्धे वर्तमाने सुदारुणे ।
प्रादुरासन्विनाशाय तदोत्पाताः सुदारुणाः॥२१
चचाल शब्दं कुर्वाणा सपर्वतवना मही ।
सदण्डाः सोल्मुका राजन्कीर्यमाणाः समन्ततः ॥
उल्काः पेतुर्दिवो भूमावाहत्य रविमण्डलम् ।
विष्वग्वाताः प्रादुरासन्नीचैः शर्करवर्षिणः ॥ २३
अश्रूणि मुमुचुर्नागा वेपथुं चास्पृशन्भृशम् ।
एतान्घोराननादृत्य समुत्पातान्सुदारुणान्॥२४
पुनर्युद्धाय संयत्ताः क्षत्रियास्तस्थुरव्यथाः ।
रमणीये कुरुक्षेत्रे पुण्ये स्वर्गे यियासवः ॥ २५
ततो गान्धारराजस्य पुत्रः शकुनिरब्रवीत् ।
युध्यध्वमग्रतो यावत्पृष्ठतो हन्मि पाण्डवान् ॥ २६
ततो नः संप्रयातानां मद्रयोधास्तरस्विनः ।
हृष्टाः किलाकिलाशब्दमकुर्वत परे तथा ॥ २७
अस्मांस्तु पुनरासाद्य लब्धलक्षा दुरासदाः ।
शरासनानि धुन्वन्तः शरवर्षैरवाकिरन् ॥ २८
ततो हतं परैस्तत्र मद्रराजबलं तदा ।
दुर्योधनबलं दृष्ट्वा पुनरासीत्पराङ्मुखम् ॥ २९
गान्धारराजस्तु पुनर्वाक्यमाह ततो बली ।
निवर्तध्वमधर्मज्ञा युध्यध्वं किं मृतेन वः ॥ ३०
अनीकं दशसाहस्रमश्वानां भरतर्षभ ।
आसीद्गान्धारराजस्य विशालप्रासयोधिनाम्॥३१
बलेन तेन विक्रम्य वर्तमाने जनक्षये ।
पृष्ठतः पाण्डवानीकमभ्यघ्नन्निशितैः शरैः ॥ ३२
तदभ्रमिव वातेन क्षिप्यमाणं समन्ततः ।
अभज्यत महाराज पाण्डूनां सुमहद्बलम् ॥ ३३
ततो युधिष्ठिरः प्रेक्ष्य भग्नं स्वबलमन्तिकात् ।
अभ्यनोदयदव्यग्रः सहदेवं महाबलम् ॥ ३४
असौ सुबलपुत्रो नो जघनं पीड्य दंशितः ।
सैन्यानि सूदयत्येष पश्य पाण्डव दुर्मतिः ॥३५
गच्छ त्वं द्रौपदेयैश्च शकुनिं सौबलं जहि ।
रथानीकमहं धक्ष्ये पाञ्चालसहितोऽनघ ॥ ३६
गच्छन्तु कुञ्जराः सर्वे वाजिनश्च सह त्वया ।
पादाताश्च त्रिसाहस्राः शकुनिं तैर्वृतो जहि॥ ३७
ततो गजाः सप्तशताश्चापपाणिभिरास्थिताः ।
पञ्च चाश्वसहस्राणि सहदेवश्च वीर्यवान् ॥ ३८
पादाताश्च त्रिसाहस्रा द्रौपदेयाश्च सर्वशः ।
रणे ह्यभ्यद्रवंस्ते तु शकुनिं युद्धदुर्मदम् ॥ ३९
ततस्तु सौबलो राजन्नभ्यतिक्रम्य पाण्डवान् ।
जघान पृष्ठतः सेनां जयगृद्धः प्रतापवान् ॥ ४०
अश्वारोहास्तु संरब्धाः पाण्डवानां तरस्विनाम् ।
प्राविशन्सौबलानीकमभ्यतिक्रम्य तान्रथान् ४१
ते तत्र सादिनः शूराः सौबलस्य महद्बलम् ।
रणमध्ये व्यतिष्ठन्त शरवर्षैरवाकिरन् ॥ ४२
तदुद्यतगदाप्रासमकापुरुषसेवितम् ।
प्रावर्तत महद्युद्धं राजन्दुर्मन्त्रिते तव ॥ ४३
उपारमन्त ज्याशब्दाः प्रेक्षका रथिनोऽभवन् ।
न हि स्वेषां परेषां वा विशेषः प्रत्यदृश्यत ॥ ४४
शूरबाहुविसृष्टानां शक्तीनां भरतर्षभ ।
ज्योतिषामिव संपातमपश्यन्कुरुपाण्डवाः ॥ ४५
ऋष्टिभिर्विमलाभिश्च तत्रतत्र विशांपते ।
संपतन्तीभिराकाशमावृतं बहुशोभत ॥ ४६
प्रासानां पततां राजन्रूपमासीत्समन्ततः ।
शलभानामिवाकाशे तदा भरतसत्तम ॥ ४७
रुधिरोक्षितसर्वाङ्गा विप्रविद्धैर्नियन्तृभिः ।
हयाः परिपतन्तिस्म शतशोऽथ सहस्रशः ॥ ४८
अन्योन्यं परिपिष्टाश्च समासाद्य परस्परम् ।
सुविक्षताः स्म दृश्यन्ते वमन्तो रुधिरं मुखैः॥ ४९
ततोऽभवत्तमो घोरं सैन्येन रजसा वृतम् ।
तानपाक्रमतोऽद्राक्षं तस्मादेशादरिंदम ॥ ५०
अश्वान्राजन्मनुष्यांश्च रजसा संवृते सति ।
भूमौ निपतिताश्चान्ये वमन्तो रुधिरं बहु ॥ ५१
केशाकेशि समालग्ना न शेकुश्चेष्टितुं नराः ।
अन्योन्यमश्वपृष्ठेभ्यो विकर्षन्तो महाबलाः ॥ ५२
मल्ला इव समासाद्य निजघ्नुरितरेतरम् ।
अश्वैश्च व्यपकृष्यन्त बहवोऽत्र गतासवः ॥ ५३

भूमौ निपतिताश्चान्ये बहवो विजयैषिणः ।
तत्रतत्र व्यदृश्यन्त पुरुषाः शूरमानिनः ॥ ५४
रक्तोक्षितैश्छिन्नभुजैरवकृष्टशिरोरुहैः ।
व्यदृश्यत मही कीर्णा शतशोऽथ सहस्रशः ॥ ५५
दूरं न शक्यं तत्रासीद्गन्तुमश्वेन केनचित् ।
साश्वारोहैर्हतैरश्वैरावृते वसुधातले ॥ ५६
रुधिरोक्षितसन्नाहैरात्तशस्त्रैरुदायुधैः ।
नानाप्रहरणैर्घोरैः परस्परवधैषिभिः ।
सुसन्निकृष्टे सङ्ग्रामे हतभूयिष्ठसैनिके ॥ ५७
स मुहूर्तं ततो युद्ध्वा सौबलोऽथ विशांपते ।
षट्साहस्रैर्हयैः शिष्टैरपायाच्छकुनिस्ततः ॥ ५८
तथैव पाण्डवानीकं रुधिरेण समुक्षितम् ।
षट्साहस्रैर्हयैः शिष्टैरपायाच्छान्तवाहनम् ॥ ५९
अश्वारोहाश्च पाण्डूनामभवन्रुधिरोक्षिताः ।
सुसन्निकृष्टे सङ्ग्रामे भूयिष्ठे त्यक्तजीविताः ॥ ६०
न हि शक्यं रथैर्योद्धुं कुत एव महागजैः ।
रथानेव रथा यान्तु कुञ्जराः कुञ्जरानपि ॥ ६१
प्रतियातो हि शकुनिः स्वमनीकमवस्थितः ।
न पुनः सौबलो राजा योद्धुमभ्यागमिष्यति ॥६२
ततस्तु द्रौपदेयाश्च ते च मत्ता महाद्विपाः ।
प्रययुर्यत्र पाञ्चाल्यो धृष्टद्युम्नो महारथः ॥ ६३
सहदेवोऽपि कौरव्य रजोमेघे समुत्थिते ।
एकाकी प्रययौ तत्र यत्र राजा युधिष्ठिरः ॥६४
ततस्तेषु प्रयातेषु शकुनिः सौबलः पुनः ।
पार्श्वतोऽभ्यहनत्क्रुद्धो धृष्टद्युम्नस्य वाहिनीम् ॥६५
तत्पुनस्तुमुलं युद्धं प्राणांस्त्यक्त्वाऽभ्यवर्तत ।
तावकानां परेषां च परस्परवधैषिणाम् ॥ ६६
ते चान्योन्यमवैक्षन्त तस्मिन्वीरसमागमे ।
योधाः पर्यपतन्राजञ्शतशोऽथ सहस्रशः ॥ ६७
असिभिश्छिद्यमानानां शिरसां लोकसंक्षये ।
प्रादुरासीन्महाञ्शब्दस्तालानां पततामिव ॥ ६८
विमुक्तानां शरीराणां छिन्नानां पततां भुवि ।
सायुधानां च बाहूनामूरूणां च विशांपते ।
आसीत्कटकटाशब्दः सुमहान्रोमहर्षणः ॥ ६९
निघ्नन्तो निशितैः शस्त्रैर्भ्रातॄन्पुत्रान्सखीनपि ।
योधाः परिपतन्ति स्म यथाऽऽमिषकृते खगाः ७०
अन्योन्यं प्रतिसंरब्धाः समासाद्य परस्परम् ।
अहंपूर्वमहंपूर्वमिति निघ्नन्सहस्रशः ॥ ७१
संयातेनासनभ्रष्टैरश्वारोहैर्गतासुभिः ।
हयाः परिपतन्ति स्म शतशोऽथ सहस्रशः ॥ ७२
स्फुरतां प्रतिपिष्टानामश्वानां शीघ्रगामिनाम् ।
स्तनतां च मनुष्याणां सन्नद्धानां विशांपते ॥७३
शक्त्यृष्टिप्रासशब्दश्च तुमुलः समपद्यत ।
भिन्दतां परमर्माणि राजन्दुर्मन्त्रिते तव ॥ ७४
श्रमाभिभूताः संरब्धा श्रान्तवाहाः पिपासवः ।
विक्षताश्च शितैः शस्त्रैरभ्यवर्तन्त तावकाः ॥ ७५
मत्ता रुधिरगन्धेन बहवोऽत्र विचेतसः ।
जघ्नुः परान्स्वकांश्चैव प्राप्तान्प्राप्तानन्तरान् ॥ ७६
बहवश्च गतप्राणाः क्षत्रिया जयगृद्धिनः ।
भूमावभ्यपतन्राजञ्शरवृष्टिभिरावृताः ॥ ७७
वृकगृध्रशृगालानां तुमुले मोदनेऽहनि ।
आसीद्बलक्षयो घोरस्तव पुत्रस्य पश्यतः ॥ ७८
नराश्वकायैः संछन्ना भूमिरासीद्विशांपते ।
रुधिरोदकचित्रा च भीरूणां भयवर्धिनी ॥ ७९
असिभिः पट्टसैः शूलैस्तक्षमाणाः पुनःपुनः ।
तावकाः पाण्डवेयाश्च न न्यवर्तन्त भारत ॥ ८०
प्रहरन्तो यथाशक्ति यावत्प्राणस्य धारणम् ।
योधाः परिपतन्ति स्म वमन्तो रुधिरं मुखैः ॥ ८१
शिरो गृहीत्वा केशेषु कबन्धः स्म प्रदृश्यते ।
उद्यम्य च शितं खड्गं रुधिरेण परिप्लुतम् ॥ ८२
तथोत्थितेषु बहुषु कबन्धेषु नराधिप ।
तथा रुधिरगन्धेन योधाः कश्मलमाविशन् ॥ ८३
मन्दीभूते ततः शब्दे पाण्डवानां महद्बलम् ।
अल्पावशिष्टैस्तुरगैरभ्यवर्तत सौबलः ॥ ८४
ततोऽभ्यधावंस्त्वरिताः पाण्डवा जयगृद्धिनः ।
पदातयश्च नागाश्च सादिनश्चोद्यतायुधाः ॥ ८५
कोष्ठकीकृत्य चाप्येनं परिक्षिप्य च सर्वशः ।
शस्त्रैर्नानाविधैर्जघ्नुर्युद्धपारं तितीर्षवः ॥ ८६
त्वदीयास्तांस्तु संप्रेक्ष्य सर्वतः समभिद्रुतान् ।
रथाश्वपत्तिद्विरदाः पाण्डवानभिदुद्रुवुः ॥ ८७

केचित्पदातयः पद्भिर्मुष्टिभिश्च परस्परम् ।
निजघ्नुः समरे शूराः क्षीणशस्त्रास्ततोऽपतन्॥८८
रथेभ्यो रथिनः पेतुर्द्विपेभ्यो हस्तिसादिनः ।
विमानेभ्यो दिवो भ्रष्टाः सिद्धाः पुण्यक्षयादिव ॥
एवमन्योन्यमायत्ता योधा जघ्नुर्महाहवे ।
पितॄन्भ्रातॄन्वयस्यांश्च पुत्रानपि तथा परे ॥ ९०
एवमासीदमर्यादं युद्धं भरतसत्तम ।
प्रासासिबाणकलिलं वर्तमाने सुदारुणे ॥ ९१

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः ॥ २३ ॥

अर्जुनेन दुर्योधनगर्हणपूर्वकं तत्सेनानिबर्हणम् ॥ १ ॥

सञ्जय उवाच ।
अल्पावशिष्टे सैन्ये तु पाण्डवैर्निहते बले ।
अश्वैः सप्तसहस्रैस्तु उपावर्तत सौबलः ॥ १
स यात्वा वाहिनीं तूर्णं चोदयानः स्वकान्युधि ।
युध्यध्वमिति संहृष्टाः पुनःपुनररिंदमाः ॥ २
अपृच्छत्क्षत्रियांस्तत्र क्व नु राजा महाबलः ।
शकुनेस्तद्वचः श्रुत्वा तमूचुर्भरतर्षभ ॥ ३
असौ तिष्ठति कौरव्यो रणमध्ये महाबलः ।
यत्रैतत्सुमहच्छत्रं पूर्णचन्द्रसमप्रभम् ॥ ४
यत्र ते सतनुत्राणा रथास्तिष्ठन्ति दंशिताः ।
यत्रैष तुमुलः शब्दः पर्जन्यनिनदोपमः ॥ ५
तत्र गच्छ द्रुतं राजंस्ततो द्रक्ष्यसि कौरवम् ।
एवमुक्तस्तु तैर्योधैः शकुनिः सौबलस्तदा ॥ ६
प्रययौ तत्र यत्रास्ते पुत्रस्तव नराधिप ।
सर्वतः संवृतो वीरैः समरे चित्रयोधिभिः ॥ ७
ततो दुर्योधनं दृष्ट्वा रथानीके व्यवस्थितम् ।
स रथांस्तावकान्सर्वान्हर्षयञ्शकुनिस्ततः ॥ ८
दुर्योधनमिदं वाक्यं हृष्टरूपो विशांपते ।
कृतकार्यमिवात्मानं मन्यमानोऽब्रवीन्नृपम् ॥ ९
जहि राजन्रथानीकमश्वाः सर्वे जिता मया ।
नात्यक्त्वा जीवितं सङ्ख्ये शक्यो जेतुं युधिष्ठिरः १०
हते तस्मिन्रथानीके पाण्डवेनाभिपालिते ।
गजानेतान्हनिष्यामः पदातींश्चेतरांस्तथा ॥ ११
श्रुत्वा तु वचनं तस्य तावका जयगृद्धिनः ।
जवेनाभ्यपतन्हृष्टाः पाण्डवानामनीकिनीम्॥१२
बद्धनिस्त्रिंशहस्ताश्च प्रगृहीतशरासनाः ।
शरासनानि धून्वानाः सिंहनादान्प्रचक्रिरे॥ १३
ततो ज्यातलनिर्घोषः पुनरासीद्विशांपते ।
प्रादुरासीच्छराणां च सुमुक्तानां सुदारुणः॥ १४
तान्समीपगतान्दृष्ट्वा जनानुद्यतकार्मुकान् ।
उवाच देवकीपुत्रं कुन्तीपुत्रो धनञ्जयः ॥ १५
चोदयाश्वानसंभ्रान्तः प्रविशैतद्बलार्णवम् ।
अन्तमद्य गमिष्यामि शत्रूणां निशितैः शरैः॥१६
अष्टादश दिनान्यद्य युद्धस्यास्य जनार्दन ।
वर्तमानस्य महतः समासाद्य परस्परम् ॥ १७
अनन्तकल्पा ध्वजिनी भूत्वा ह्येषां महात्मनाम् ।
क्षयमद्य गता युद्धे पश्य दैवं यथाविधम् ॥ १८
समुद्रकल्पं च बलं धार्तराष्ट्रस्य माधव ।
अस्मानासाद्य संजातं गोष्पदोपममच्युत ॥ १९
हते भीष्मे धीर्ममासीच्छमः स्यादिति माधव ।
न च तत्कृतवान्मूढो धार्तराष्ट्रः सुबालिशः॥ २०
उक्तं भीष्मेण यद्वाक्यं हितं तथ्यं च माधव ।
तच्चापि नासौ कृतवान्वीतबुद्धिः सुयोधनः ॥२१
तस्मिंस्तु निहते भीष्मे प्रच्युते पृथिवीपतौ ।
न जाने कारणं किंतु येन युद्धमवर्तत ॥ २२
मूढांस्तु सर्वथा मन्ये धार्तराष्ट्रान्सुबालिशान् ।
पतिते शन्तनोः पुत्रे येऽकार्षुः संयुगं पुनः॥ २३
अनन्तरं च निहते द्रोणे ब्रह्मविदां वरे ।
राधेये च विकर्णे च नैव शाम्यति वैशसम्॥ २४
अल्पावशिष्टे सैन्येऽस्मिन्सूतपुत्रे च पातिते ।
सपुत्रे वै नरव्याघ्रे नैव शाम्यति वैशसम् ॥ २५

श्रुतायुषि हते वीरे जलसन्धे च मागधे ।
श्रुतायुधे च नृपतौ नैव शाम्यति वैशसम् ॥ २६
भूरिश्रवसि शल्ये च साल्वे चैव जनार्दन ।
आवन्त्येषु च वीरेषु नैव शाम्यति वैशसम् ॥२७
जयद्रथे च निहते राक्षसे चाप्यलायुधे ।
बाह्लिके सोमदत्ते च नैव शाम्यति वैशसम् ॥ २८
भगदत्ते हते शूरे काम्भोजे च सुदारुणे ।
दुःशासने च निहते नैव शाम्यति वैशसम् ॥ २९
दृष्ट्वा विनिहताञ्शूरान्पृथङ्माण्डलिकान्नृपान् ।
बलिनश्च रणे कृष्ण नैव शाम्यति वैशसम् ॥ ३०
अक्षौहिणीपतीन्दृष्ट्वा भीमसेननिपातितान् ।
मोहाद्वा यदि वा लोभान्नैव शाम्यति वैशसम् ३१
'हतप्रवीरां विध्वस्तां दृष्ट्वा चेमां चमूं रणे ।
अलम्बले च निहते नैव शाम्यति वैशसम् ॥ ३२
भ्रातॄन्विनिहतान्दृष्ट्वा वयस्यान्मातुलानपि ।
पुत्रान्विनिहतान्दृष्ट्वा नैव शाम्यति वैशसम् ॥'३३
को नु राजकुले जातः कौरवेषु विशेषतः ।
निरर्थकं महद्वैरं कुर्यादन्यः सुयोधनात् ॥ ३४
गुणतोऽभ्यधिकाञ्ज्ञात्वा बलतः शौर्यतोपि वा।
अमूढः को नु युध्येत जानन्प्राज्ञो हिताहितम् ३५
किंनु तस्य मनो ह्यासीत्त्वयोक्तस्य हितं वचः ।
प्रशमे पाण्डवैः सार्धं सोन्यस्य शृणुयात्कथम् ॥३६
येन शान्तनवो भीष्मो द्रोणो विदुर एव च ।
प्रत्याख्याताः शमस्यार्थे किंनु तस्याद्य भेषजम्३७
मौर्ख्याद्येन पिता वृद्धः प्रत्याख्यातो जनार्दन ।
तथा माता हितं वाक्यं भाषमाणा हितैषिणी ॥३८
प्रत्याख्याता ह्यसत्कृत्य स कस्मै रोचयेद्वचः ।
कुलान्तकरणो व्यक्तं जात एष जनार्दन ॥ ३९
तथास्य दृश्यते चेष्टा नीतिश्चैव विशांपते ।
नैष दास्यति नो राज्यमिति मे मतिरच्युत ॥ ४०
उक्तोऽहं बहुशस्तात विदुरेण महात्मना ।
न जीवन्दास्यते भागं धार्तराष्ट्रः सुयोधनः ॥ ४१
यावत्प्राणा धरिष्यन्ति धार्तराष्ट्रस्य दुर्मतेः ।
तावद्युष्मास्वपापेषु प्रचरिष्यति पापकम् ॥ ४२
न च युक्तोऽन्यथा जेतुमृते युद्धेन माधव ।
इत्यब्रवीत्सदा मां हि विदुरः सत्यदर्शनः ॥ ४३
तत्सर्वमद्य जानामि व्यवसायं दुरात्मनः ।
यदुक्तं वचनं तेन विदुरेण महात्मना ॥ ४४
यो हि श्रुत्वा वचः पथ्यं जामदग्न्याद्यथातथम् ।
अवामन्यत दुर्बुद्धिर्ध्रुवं नाशमुखे स्थितः ॥ ४५
उक्तं हि बहुभिः सिद्धैर्जातमात्रे सुयोधने ।
एनं प्राप्य दुरात्मानं क्षयं क्षत्रं गमिष्यति ॥ ४६
तदिदं वचनं तेषां निरुक्तं वै जनार्दन ।
क्षयं याता हि राजानो दुर्योधनकृते भृशम् ॥ ४७
सोऽद्य सर्वान्रणे योधान्निहनिष्यामि माधव ४८
क्षत्रियेषु हतेष्वाशु शून्ये च शिबिरे कृते ।
वधाय चात्मनोऽस्माभिः संयुगं रोचयिष्यति ४९
तदन्तं हि भवेद्वैरमनुमानेन माधव ।
एवं पश्यामि वार्ष्णेय चिन्तयन्प्रज्ञया स्वया ।
विदुरस्य च वाक्येन चेष्टया च दुरात्मनः ॥ ५०
तस्माद्याहि चमूं वीर यावद्धन्मि शितैः शरैः ।
दुर्योधनं महाबाहो वाहिनीं चास्य संयुगे ॥ ५१
क्षेममद्य करिष्यामि धर्मराजस्य माधव ।
हत्वैतद्दुर्बलं सैन्यं धार्तराष्ट्रस्य पश्यतः ॥ ५२

सञ्जय उवाच ।

अभीशुहस्तो दाशार्हस्तथोक्तः सव्यसाचिना ।
तद्बलौघममित्राणामभीतः प्राविशद्बलात् ॥ ५३
शरासनवनं घोरं शक्तिकण्टकसंकुलम् ।
गदापरिघपाषाणं रथनागमहाद्रुमम् ॥ ५४
हयपत्तिलताकीर्णं गाहमानो महायशाः ।
व्यचरत्तत्र गोविन्दो रथेनातिपताकिना ॥ ५५
ते हयाः पाण्डुरा राजन्वहन्तोऽर्जुनमाहवे ।
दिक्षु सर्वास्वदृश्यन्त दाशार्हेण प्रचोदिताः ॥ ५६
ततः प्रायाद्रथेनाजौ सव्यसाची परंतपः ।
किरञ्शरशतांस्तीक्ष्णान्वारिधारा घनो यथा ५७
प्रादुरासीन्महाञ्शब्दः शराणां नतपर्वणाम् ।

पापक प्रचरिष्यति आचरिष्यति धार्तराष्ट्र इति शेषः ॥ ४२ ॥

त्रयोविंशोऽध्याय ॥ २३ ॥

इषुभिश्छाद्यमानानां समरे सव्यसाचिना ॥ ५८
असज्जन्तस्तनुत्रेषु शरौघाः प्रापतन्भुवि ।
इन्द्राशनिसमस्पर्शा गाण्डीवप्रेषिताः शराः ॥ ५९
नरान्नागान्समाहत्य हयांश्चापि विशांपते ।
अपतन्त रणे बाणाः पतङ्गा इव घोषिणः ॥ ६०
आसीत्सर्वमवच्छन्नं गाण्डीवप्रेषितैः शरैः ।
न प्राज्ञायन्त समरे दिशो वा प्रदिशोपि वा ६१
सर्वमासीज्जगत्पूर्णं पार्थनामाङ्कितैः शरैः ।
रुक्मपुङ्खैस्तैलधौतैः कर्मारपरिमार्जितैः ॥ ६२
ते दह्यमानाः पार्थेन पावकेनेव कुञ्जराः ।
पार्थं न प्राजहुर्घोरा वध्यमानाः शितैः शरैः ॥ ६३
शरचापधरः पार्थः प्रज्वलन्निव भास्करः ।
ददाह समरे योधान्कक्षमग्निरिव ज्वलन् ॥ ६४
यथा वनान्ते वनपैर्विसृष्टः
कक्षं दहेत्कृष्णगतिः सुघोषः ।
भूरिद्रुमं शुष्कलताविताने
भृशं समृद्धो ज्वलनः प्रतापी ॥ ६५
एवं स नाराचगणप्रतापी
शरार्चिरुच्चावचतिग्मतेजाः ।
ददाह सर्वां तव पुत्रसेना-
ममृष्यमाणस्तरसा तरस्वी ॥ ६६
तस्येषवः प्राणहराः सुमुक्ता
नासज्जन्वै वर्मसु रुक्मपुङ्खाः ।
न च द्वितीयं प्रमुमोच बाणं
नरे हये वा परमद्विपे वा ॥ ६७
अनेकरूपाकृतिभिर्हि बाणै-
र्महारथानीकमनुप्रविश्य ।
स एव एकस्तव पुत्रस्य सेनां
जघान दैत्यानिव वज्रपाणिः । ६८

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः ॥ २४ ॥

धृष्टद्युम्नपराजितेन दुर्योधनेनाश्वारोहणेन पलायनम् ॥ १ ॥ अश्वत्थामादिभिस्तदन्वेषणम् ॥ २ ॥

सञ्जय उवाच ।
युध्यतां यतमानानां शूराणामनिवर्तिनाम् ।
संकल्पमकरोन्मोघं गाण्डीवेन धनञ्जयः ॥ १
इन्द्राशनिसमस्पर्शानविषह्यान्महौजसः ।
विसृजन्दृश्यते बाणान्धारा मुञ्चन्निवाम्बुदः ॥ २
तत्सैन्यं भरतश्रेष्ठ वध्यमानं किरीटिना ।
संप्रदुद्राव संग्रामात्तव पुत्रस्य पश्यतः ॥ ३
पितॄन्भ्रातॄन्परित्यज्य वयस्यानपि चापरे ॥ ४
हतधुर्या रथाः केचिद्धतसूतास्तथा परे ।
भग्नाक्षयुगचक्रेषाः केचिदासन्विशांपते ॥ ५
अन्येषां सायकाः क्षीणास्तथाऽन्ये बाणपीडिताः ।
अक्षता युगपत्केचित्प्राद्रवन्भयपीडिताः ॥ ६
केचित्पुत्रानुपादाय हतभूयिष्ठबान्धवाः ।
विचुक्रुशुः पितॄंस्त्वन्ये सहास्यानपरे पुनः ॥ ७
बान्धवांश्च नरव्याघ्र भ्रातॄन्संबन्धिनस्तथा ।
दुद्रुवुः केचिदुत्सृज्य तत्रतत्र विशांपते ॥ ८
बहवोऽत्र भृशं विद्धा मुह्यमाना महारथाः ।
निःश्वसन्ति स्म दृश्यन्ते पार्थबाणहता नराः ॥ ९
तानन्ये रथमारोप्य ह्याश्वास्य च मुहूर्तकम् ।
विश्रान्ताश्च वितृष्णाश्च पुनर्युद्धाय जग्मिरे ॥ १०
तानपास्य गताः केचित्पुनरेव युयुत्सवः ।
कुर्वन्तस्तव पुत्रस्य शासनं युद्धदुर्मदाः ॥ ११
पानीयमपरे पीत्वा पर्याश्वास्य च वाहनम् ।
वर्माणि च समारोप्य केचिद्धरतसत्तम ॥ १२
समाश्वास्यापरे भ्रातॄन्निक्षिप्य शिबिरेऽपि च ।
पुत्रानन्ये पितॄनन्ये पुनर्युद्धमरोचयन् ॥ १३

संप्रदुद्रावेति पूर्वस्थ सप्रदुद्रुवुरिति विपरिणामेन सबध्यते

॥ ४ ॥ चतुर्विंशोऽध्याय ॥ २४ ॥

सज्जयित्वा रथान्केचिद्यथामुख्यं विशांपते ।
आवृत्य पाण्डवानीकं पुनर्युद्धमरोचयन् ॥ १४
ते शूराः किङ्किणीजालैः समाच्छन्ना बभासिरे ।
त्रैलोक्यविजये युक्ता यथा दैतेयदानवाः ॥ १५
आगम्य सहसा केचिद्रथैः स्वर्णविभूषितैः ।
पाण्डवानामनीकेषु धृष्टद्युम्नमयोधयन् ॥ १६
धृष्टद्युम्नोऽपि पाञ्चाल्यः शिखण्डी च महारथः ।
नाकुलिस्तु शतानीको रथानीकमयोधयन् ॥ १७
पाञ्चाल्यस्तु ततः क्रुद्धः सैन्येन महता वृतः ।
अभ्यद्रवत्सुसंक्रुद्धस्तावकान्हन्तुमुद्यतः ॥ १८
ततस्त्वापततस्तस्य तव पुत्रो जनाधिप ।
बाणसङ्घाननेकान्वै प्रेषयामास भारत ॥ १९
धृष्टद्युम्नस्ततो राजंस्तव पुत्रेण धन्विना ।
नाराचैरर्धनाराचैर्बहुभिः क्षिप्रकारिभिः ॥ २०
वत्सदन्तैश्च बाणैश्च कर्मारपरिमार्जितैः ।
अश्वांश्च चतुरो हत्वा बाह्वोरुरसि चार्पितः ॥ २१
सोऽतिविद्धो महेष्वासस्तोत्रार्दित इव द्विपः ।
तस्याश्वांश्चतुरो बाणैः प्रेषयामास मृत्यवे ।
सारथेश्चास्य भल्लेन शिरः कायादपाहरत् ॥ २२
ततो दुर्योधनो राजा पृष्ठमारुह्य वाजिनः ।
अपाक्रामद्रथो नातिदूरमरिंदमः ॥ २३
दृष्ट्वा तु हतविक्रान्तं स्वमनीकं महाबलः ।
तव पुत्रो महाराज प्रययौ यत्र सौबलः ॥ २४
ततो रथेषु भग्नेषु त्रिसाहस्रा महाद्विपाः ।
पाण्डवान्रथिनः सर्वान्समन्तात्पर्यवारयन् ॥ २५
ते वृताः समरे पञ्च गजानीकेन भारत ।
अशोभन्त महाराज ग्रहास्तारागणैरिव ॥ २६
ततोऽर्जुनो महाराज लब्धलक्षो महाभुजः ।
विनिर्ययौ रथेनैव श्वेताश्वः कृष्णसारथिः ॥ २७
तैः समन्तात्परिवृतः कुञ्जरैः पर्वतोपमैः ।
नाराचैर्विमलैस्तीक्ष्णैर्गजानीकमयोधयत् ॥ २८
तत्रैकबाणनिहतानपश्याम महागजान् ।
पतितान्पात्यमानांश्च निर्भिन्नान्सव्यसाचिना २९
भीमसेनस्तु तान्दृष्ट्वा नागान्मत्तगजोपमः ।
करेणादाय महतीं गदामभ्यपतद्बली ।
अथाप्लुत्य रथात्तूर्णं दण्डपाणिरिवान्तकः ॥ ३०
तमुद्यतगदं दृष्ट्वा पाण्डवानां महारथम् ।
वित्रेसुस्तावकाः सैन्याः शकृन्मूत्रं च सुस्रुवुः ३१
आविग्नं च बलं सर्वं गदाहस्ते वृकोदरे ॥ ३२
गदया भीमसेनेन भिन्नकुम्भान्निपातितान् ।
धावमानानपश्याम कुञ्जरान्पर्वतोपमान् ॥ ३३
प्राद्रवन्कुञ्जरास्ते तु भीमसेनगदाहताः ।
पेतुरार्तस्वरं कृत्वा छिन्नपक्षा इवाद्रयः ॥ ३४
प्रभिन्नकुम्भांस्तु बहून्द्रवमाणानितस्ततः ।
पतमानांश्च संप्रेक्ष्य वित्रेसुस्तव सैनिकाः ॥ ३५
युधिष्ठिरोऽपि संक्रुद्धो माद्रीपुत्रौ च पाण्डवौ ।
गार्ध्रपत्रैः शितैर्बाणैर्जघ्नुर्वै गजयोधिनः ॥ ३६
धृष्टद्युम्नस्तु समरे पराजित्य नराधिपम् ।
अपक्रान्ते तव सुते हयपृष्ठं समाश्रिते ॥ ३७
दृष्ट्वा च पाण्डवान्सर्वान्कुञ्जरैः परिवारितान् ।
धृष्टद्युम्नो महाराज सहसा समुपाद्रवत् ॥ ३८
पुत्रः पाञ्चालराजस्य जिघांसुः कुञ्जरान्ययौ ।
अदृष्ट्वा तु रथानीके दुर्योधनमरिंदमम् ॥ ३९
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
अपृच्छन्क्षत्रियांस्तत्र क्व नु दुर्योधनो गतः ॥ ४०
तेऽपश्यमाना राजानं वर्तमाने जनक्षये ।
मन्वाना निहतं तत्र तव पुत्रं महारथाः ।
विवर्णवदना भूत्वा पर्यपृच्छन्त ते सुतम् ॥ ४१
आहुः केचिद्धते सूते प्रयातो यत्र सौबलः ।
हित्वा पाञ्चालराजस्य तदनीकं दुरुत्सहम् ॥ ४२
अपरे ब्रुवंस्तत्र क्षत्रिया भृशविक्षताः ।
दुर्योधनेन किं कार्यं द्रक्ष्यध्वं यदि जीवति ।
युध्यध्वं सहिताः सर्वे किं वो राजा करिष्यति ४३
ते क्षत्रियाः क्षतैर्गात्रैर्हतभूयिष्ठवाहनाः ।
शरैः संपीड्यमानास्तु नातिव्यक्तमथाब्रुवन् ॥४४
इदं सर्वं बलं हन्मो येन स्म परिवारिताः ।
एते सर्वे गजान्हत्वा उपयान्ति स्म पाण्डवाः ४५
श्रुत्वा तु वचनं तेषामश्वत्थामा महाबलः ।

भित्त्वा पाञ्चालराजस्य तदनीकं दुरुत्सहम् ॥ ४६
कृपश्च कृतवर्मा च प्रययौ यत्र सौबलः ।
रथानीकं परित्यज्य शूराः सुदृढधन्विनः ॥ ४७
ततस्तेषु प्रयातेषु धृष्टद्युम्नपुरस्कृताः ।
आययुः पाण्डवा राजन्विनिघ्नन्तः स्म तावकान् ॥
दृष्ट्वा तु तानापततः संप्रहृष्टान्महारथान् ।
पराक्रान्तास्ततो वीरा निराशा जीविते तदा ॥४९
विवर्णमुखभूयिष्ठमभवत्तावकं बलम् ।
परिक्षीणायुधान्दृष्ट्वा तानहं परिवारितान् ॥ ५०
राजन्बलेन व्यङ्गेन त्यक्त्वा जीवितमात्मनः ।
आत्मना पञ्चमोऽयुध्यं पाञ्चालस्य बलेन ह ॥ ५१
तस्मिन्देशे व्यवस्थाय यत्र शारद्वतः स्थितः ।
संप्रद्रुता वयं पञ्च किरीटिशरपीडिताः ॥ ५२
धृष्टद्युम्नं महारौद्रं तत्र नाभूद्रणो महान् ।
जितास्तेन वयं सर्वे व्यपयाम रणात्ततः ॥ ५३
अथापश्यं सात्यकिं तमुपायातं महारथम् ।
रथैश्चतुःशतैर्वीरो मामभ्यद्रवदाहवे ॥ ५४
धृष्टद्युम्नादहं मुक्तः कथंचिच्छ्रान्तवाहनात् ।
पतितो माधवानीकं दुष्कृती नरकं यथा ॥ ५५
तत्र युद्धमभूद्घोरं मुहूर्तमतिदारुणम् ॥ ५६
सात्यकिस्तु महाबाहुर्मम हत्वा परिच्छदम् ।
जीवग्राहमगृह्णान्मां मूर्च्छितं पतितं भुवि ॥ ५७
ततो मुहूर्तादिव तद्वजानीकमविध्यत ।
गदया भीमसेनेन नाराचैरर्जुनेन च ॥ ५८
अभिपिष्टैर्महानागैः समन्तात्पर्वतोपमैः ।
नातिप्रसिद्धैव गतिः पाण्डवानामजायत ॥ ५९
रथमार्गं ततश्चक्रे भीमसेनो महाबलः ।
पाण्डवानां महाराज व्यपाकर्षन्महागजान् ॥ ६०
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
अपश्यन्तो रथानीके दुर्योधनमरिंदमम् ।
राजानं मृगयामासुस्तव पुत्रं महारथम् ॥ ६१
परित्यज्य च पाञ्चाल्यं प्रयाता यत्र सौबलः ।
राज्ञोऽदर्शनसंविग्ना वर्तमाने जनक्षये ॥ ६२

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः ॥ २५ ॥

भीमेनावशिष्टानां दुर्योधनानुजानां वधः ॥ १ ॥

सञ्जय उवाच ।
गजानीके हते तस्मिन्पाण्डुपुत्रेण भारत ।
वध्यमाने बले चैव भीमसेनेन संयुगे ॥ १
चरन्तं च प्रपश्यामो भीमसेनमरिंदमम् ।
दण्डहस्तं यथा क्रुद्धमन्तकं प्राणहारिणम् ॥ २
समेत्य समरे राजन्हतशेषाः सुतास्तव ।
अदृश्यमाने कौरव्ये पुत्रे दुर्योधने तव ।
सोदर्याः सहिता भूत्वा भीमसेनमुपाद्रवन् ॥ ३
श्रुतर्वा संजयश्चैव जयत्सेनः श्रुतान्तकः ।
दुर्विमोचनकश्चैव तथा दुर्विषहो बली ॥ ४
दुर्मर्षणः सुजातश्च जैत्रो भूरिबलो रविः ।
इत्येते सहिता भूत्वा तव पुत्राः समन्ततः ।
भीमसेनमभिद्रुत्य रुरुधुः सर्वतो दिशम् ॥ ५
ततो भीमो महाराज स्वरथं पुनरास्थितः ।
मुमोच निशितान्बाणान्पुत्राणां तव मर्मसु ॥ ६
ते कीर्यमाणा भीमेन पुत्रास्तव महारणे ।
भीमसेनमुपासेदुः प्रवाता इव कुञ्जरम् ॥ ७
ततः क्रुद्धो रणे भीमः शिरो दुर्मर्षणस्य ह ।
क्षुरप्रेण प्रमथ्याशु पातयामास भूतले ॥ ८
ततोऽपरेण भल्लेन सर्वावरणभेदिना ।
श्रुतान्तमवधीद्भीमस्तव पुत्रं महारथः ॥ ९
जयत्सेनं ततो विद्ध्वा नाराचेन हसन्निव ।

प्रवणादिव कुञ्जरमिति झ. पाठः ॥ ७ ॥

पञ्चविंशोऽध्यायः ॥ २५ ॥

पातयामास कौरव्यं रथोपस्थादरिंदमः ।
स पपात रथाद्राजन्भूमौ तूर्णं ममार च ॥ १०
श्रुतर्वा तु ततो भीमं क्रुद्धो विव्याध मारिष ।
शतेन गृध्रवाजानां शराणां नतपर्वणाम् ॥ ११
ततः क्रुद्धो रणे भीमो जैत्रं भूरिबलं रविम् ।
त्रीनेतांस्त्रिभिरानर्च्छद्विषाग्निप्रतिमैः शरैः ॥ १२
ते हता न्यपतन्भूमौ स्यन्दनेभ्यो महारथाः ।
वसन्ते पुष्पशबला निकृत्ता इव किंशुकाः ॥१३
ततोऽपरेण भल्लेन तीक्ष्णेन च परंतपः ।
दुर्विमोचनमाहत्य प्रेषयामास मृत्यवे ॥ १४
स हतः प्रापतद्भूमौ स्वरथाद्रथिनां वरः ।
गिरेस्तु कूटजो भग्नो मारुतेनेव पादपः ॥ १५
दुष्प्रधर्षं ततश्चैव सुजातं च सुतं तव ।
एकैकं न्यहनत्सङ्ख्ये द्वाभ्यांद्वाभ्यां चमूमुखे ।
तौ शिलीमुखविद्धाङ्गौ पेततू रथसत्तमौ ॥ १६
ततः पतन्तं समरे अभिवीक्ष्य सुतं तव ।
भल्लेन पातयामास भीमो दुर्विषहं रणे ॥ १७
स पपात हतो वाहात्पश्यतां सर्वधन्विनाम् ॥१८
दृष्ट्वा तु निहतान्भ्रातॄन्बहूनेकेन संयुगे ।
अमर्षवशमापन्नः श्रुतर्वा भीममभ्ययात् ॥ १९
विक्षिपन्सुमहच्चापं कार्तस्वरविभूषितम् ।
विसृजन्सायकांश्चैव विषाग्निप्रतिमान्बहून् ॥ २०
स तु राजन्धनुश्छित्त्वा पाण्डवस्य महामृधे ।
अथैनं छिन्नधन्वानं विंशत्या समवाकिरत् ॥२१
ततोऽन्यद्धनुरादाय भीमसेनो महाबलः ।
अवाकिरत्तव सुतं तिष्ठतिष्ठेति चाब्रवीत् ॥ २२
महदासीत्तयोर्युद्धं चित्ररूपं भयानकम् ।
यादृशं समरे पूर्वं जम्भवासवयोर्युधि ॥ २३
तयोस्तत्र शितैर्मुक्तैर्यमदण्डनिभैः शरैः ।
समाच्छन्ना धरा सर्वा खं दिशो विदिशस्तथा ॥२४
ततः श्रुतर्वा संक्रुद्धो धनुरादाय सायकैः ।
भीमसेनं रणे राजन्बाह्वोरुरसि चार्पयत् ॥ २५
सोऽतिविद्धो महाराज तव पुत्रेण धन्विना ।
भीमः संचुक्षुभे क्रुद्धः पर्वणीव महोदधिः ॥ २६
ततो भीमो रुषाविष्टः पुत्रस्य तव मारिष ।
सारथिं चतुरश्चाश्वाञ्शरैर्निन्ये यमक्षयम् ॥ २७
विरथं तं समालक्ष्य विशिखैर्लोमवाहिभिः ।
अवाकिरदमेयात्मा दर्शयन्पाणिलाघवम् ॥ २८
श्रुतर्वा विरथो राजन्नाददे खड्गचर्मणी ।
अथास्याददतः खड्गं शतचन्द्रं च भानुमत् ।
क्षुरप्रेण शिरः कायात्पातयामास पाण्डवः ॥ २९
छिन्नोत्तमाङ्गस्य ततः क्षुरप्रेण महात्मना ।
पपात कायः स्वरथाद्वसुधामनुनादयन् ॥ ३०
तस्मिन्निपतिते वीरे तावका भयमोहिताः ।
अभ्यद्रवन्त सङ्ग्रामे भीमसेनं युयुत्सवः ॥ ३१
तानापतत एवाशु हतशेषाद्बलार्णवात् ।
दंशितान्प्रतिजग्राह भीमसेनः प्रतापवान् ॥ ३२
ते तु तं वै समासाद्य परिवव्रुः समन्ततः ॥ ३३
ततस्तु संवृतो भीमस्तावकान्निशितैः शरैः ।
पीडयामास तान्सर्वान्सहस्राक्ष इवासुरान् ॥ ३४
ततः पञ्चशतान्हत्वा सवरूथान्महारथान् ।
जघान कुञ्जरानीकं पुनः सप्तशतं युधि ॥ ३५
हत्वा शतसहस्राणि पत्तीनां परमेषुभिः ।
वाजिनां च शतान्यष्टौ पाण्डवः स्म विराजते ३६
भीमसेनस्तु कौन्तेयो हत्वा युद्धे सुतांस्तव ।
मेने कृतार्थमात्मानं सफलं जन्म च प्रभो ॥ ३७
तं तथा युध्यमानं च विनिघ्नन्तं च तावकान् ।
ईक्षितुं नोत्सहन्ते स्म तव सैन्या नराधिप ॥ ३८
विद्राव्य च कुरून्सर्वांस्तांश्च हत्वा पदानुगान् ।
दोर्भ्यां शब्दं ततश्चक्रे त्रासयानो महाद्विपान् ३९
हतभूयिष्ठयोधा तु तव सेना विशांपते ।
किंचिच्छेषा महाराज कृपणं समपद्यत ॥ ४०

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः ॥ २६ ॥

कृष्णार्जुनयोः संवादः ॥ १ ॥ संकुलयुद्धम् ॥ २ ॥ भीमेन सुदर्शननाम्नो दुर्योधनानुजस्य वधः ॥ ३ ॥

सञ्जय उवाच ।
दुर्योधनो महाराज सुदर्शश्चापि ते सुतः ।
हतशेषौ तदा सङ्ख्ये वाजिमध्ये व्यवस्थितौ ॥ १
ततो दुर्योधनं दृष्ट्वा वाजिमध्ये व्यवस्थितम् ।
उवाच देवकीपुत्रः कुन्तीपुत्रं धनञ्जयम् ॥ २
शत्रवो हतभूयिष्ठा ज्ञातयः परिपालिताः ।
गृहीत्वा सञ्जयं चासौ निवृत्तः शिनिपुङ्गवः ॥ ३
परिश्रान्तश्च नकुलः सहदेवश्च भारत ।
योधयित्वा रणे पापान्धार्तराष्ट्रान्सहानुगान् ॥ ४
दुर्योधनमतिक्रम्य त्रय एते व्यवस्थिताः ।
कृपश्च कृतवर्मा च द्रौणिश्चैव महारथः ॥ ५
असौ तिष्ठति पाञ्चाल्यः श्रिया परमया युतः ।
दुर्योधनबलं हत्वा सह सर्वैः प्रभद्रकैः ॥ ६
असौ दुर्योधनः पार्थ वाजिमध्ये व्यवस्थितः ।
छत्रेण ध्रियमाणेन प्रेक्षमाणो मुहुर्मुहुः ॥ ७
प्रतिव्यूह्य बलं सर्वं रणमध्ये व्यवस्थितः ।
एनं हत्वा शितैर्बाणैः कृतकृत्यो भविष्यसि ॥ ८
गजानीकं हतं दृष्ट्वा त्वां च प्राप्तमरिंदम ।
यावन्न विद्रवन्त्येते तावज्जहि सुयोधनम् ॥ ९
यातु कश्चित्तु पाञ्चाल्यं क्षिप्रमागम्यतामिति ।
परिश्रान्तबलस्तात नैष मुच्येत किल्बिषी ॥ १०
हत्वा तव बलं सर्वं संग्रामे धृतराष्ट्रजः ।
जितान्पाण्डुसुतान्मत्वा रूपं धारयते महत् ॥ ११
निहतं स्वबलं दृष्ट्वा पीडितं चापि पाण्डवैः ।
ध्रुवमेष्यति संग्रामे वधायैवात्मनो नृपः ॥ १२
एवमुक्तः फल्गुनस्तु कृष्णं वचनमब्रवीत् ।
धृतराष्ट्रसुताः सर्वे हता भीमेन माधव ।
यावेतावास्थितौ कृष्ण तावद्य नभविष्यतः ॥ १३
हतो भीष्मो हतो द्रोणः कर्णो वैकर्तनो हतः ।
मद्रराजो हतः शल्यो हतः कृष्ण जयद्रथः ॥ १४
हयाः पञ्चशताः शिष्टाः शकुनेः सौबलस्य च ।
रथानां तु शते शिष्टे द्वे एव तु जनार्दन ।
दन्तिनां च शतं साग्रं त्रिसाहस्राः पदातयः ॥ १५
अश्वत्थामा कृपश्चैव त्रिगर्ताधिपतिस्तथा ।
उलूकः शकुनिश्चैव कृतवर्मा च सात्वतः ॥ १६
एतद्बलमभूच्छेषं धार्तराष्ट्रस्य माधव ।
मोक्षो न नूनं कालात्तु विद्यते भुवि कस्यचित् ॥ १७
तथा विनिहते सैन्ये पश्य दुर्योधनं स्थितम् ।
अद्याहा हि महाराजो हतामित्रो भविष्यति ।
न हि मे मोक्ष्यते कश्चित्परेषामिह चिन्तये ॥ १८
ये त्वद्य समरं कृष्ण न हास्यन्ति मदोत्कटाः ।
तान्वै सर्वान्हनिष्यामि यद्यपि स्युरमानुषाः ॥ १९
अद्य युद्धे समुत्पन्नं दीर्घं राज्ञः प्रजागरम् ।
अपनेष्यामि गान्धारिं घातयित्वा शितैः शरैः २०
निकृत्या वै दुराचारो यानि रत्नानि सौबलः ।
सभायामहरद्द्यूते पुनस्तान्याहराम्यहम् ॥ २१
अद्य वेत्स्यन्ति मच्छक्तिं सर्वा नागपुरे स्त्रियः ।
श्रुत्वा पतींश्च पुत्रांश्च पाण्डवैर्निहतान्युधि ॥ २२
समाप्तमद्य वै कर्म सर्वं कृष्ण भविष्यति ।
अद्य दुर्योधनो दीप्तां श्रियं प्राणांश्च मोक्ष्यति ॥ २३
नापयाति भयात्कृष्ण संग्रामाद्यदि चेन्मम ।
निहतं विद्धि वार्ष्णेय धार्तराष्ट्रं सुबालिशम् ॥ २४
मम ह्येतदपर्याप्तं वाजिबृन्दमरिंदम ।
सोढुं ज्यातलनिर्घोषं याहि यावन्निहन्म्यहम् ॥ २५

सञ्जय उवाच ।
एवमुक्तस्तु दाशार्हः पाण्डवेन यशस्विना ।
अचोदयद्धयान्राजन्दुर्योधनबलं प्रति ॥ २६
तदनीकमभिप्रेक्ष्य त्रयः सञ्जा महारथाः ।
भीमसेनोऽर्जुनश्चैव सहदेवश्च मारिष ।
प्रययुः सिंहनादेन दुर्योधनजिघांसया ॥ २७
तान्प्रेक्ष्य सहितान्सर्वाञ्जवेनोद्यतकार्मुकान् ।
सौबलोऽभ्यद्रवद्युद्धे पाण्डवानाततायिनः ॥ २८
सुदर्शनस्तव सुतो भीमसेनं समभ्ययात् ।

मोक्षो नून कालसृष्ट. इति क. पाठः ॥ १७ ॥

षड्विंशोऽध्याय· ॥ २६ ॥

सुशर्मा शकुनिश्चैव युयुधाते किरीटिना ॥ २९
सहदेवं तव सुतो हयपृष्ठगतोऽभ्ययात् ॥ ३०
ततो हि यत्नतः क्षिप्रं तव पुत्रो जनाधिप ।
प्रासेन सहदेवस्य शिरसि प्राहरद्भृशम् ॥ ३१
सोपाविशद्रथोपस्थे तव पुत्रेण ताडितः ।
रुधिराप्लुतसर्वाङ्ग आशीविष इव श्वसन् ॥ ३२
प्रतिलभ्य ततः संज्ञां सहदेवो विशांपते ।
दुर्योधनं शरैस्तीक्ष्णैः संक्रुद्धः समवाकिरत् ॥३३
पार्थोऽपि युधि विक्रम्य कुन्तीपुत्रो धनञ्जयः ।
शूराणामश्वपृष्ठेभ्यः शिरांसि निचकर्त ह ॥ ३४
तदनीकं तदा पार्थो व्यधमद्बहुभिः शरैः ।
पातयित्वा हयान्सर्वांस्त्रिगर्तानां रथान्ययौ ॥३५
ततस्ते सहिता भूत्वा त्रिगर्तानां महारथाः ।
अर्जुनं वासुदेवं च शरवर्षैरवाकिरन् ॥ ३६
सत्यकर्माणमाक्षिप्य क्षुरप्रेण महायशाः ।
ततोऽस्य स्यन्दनस्येषां चिच्छिदे पाण्डुनन्दनः॥३७
शिलाशितेन च विभो क्षुरप्रेण महायशाः ।
शिरश्चिच्छेद सहसा तप्तकुण्डलभूषणम् ॥ ३८
सत्येषुमथ चादत्त योधानां मिषतां ततः ।
यथा सिंहो वने राजन्मृगं परि बुभुक्षितः ॥ ३९
तं निहत्य ततः पार्थः सुशर्माणं त्रिभिः शरैः ।
विद्ध्वा तानहनत्सर्वान्रथान्रुक्मविभूषितान् ॥४०
ततः प्रायाच्चरन्पार्थो दीर्घकालं सुसंवृतम् ।
मुञ्चन्क्रोधविषं तीक्ष्णं प्रस्थलाधिपतिं प्रति ॥ ४१
तमर्जुनः पृषत्कानां शतेन भरतर्षभ ।
पूरयित्वा ततो वाहान्प्राहरत्तस्य धन्विनः ॥ ४२
ततः शरं समादाय यमदण्डोपमं तदा ।
सुशर्माणं समुद्दिश्य चिक्षेपाशु हसन्निव ॥ ४३
स शरः प्रेषितस्तेन क्रोधदीप्तेन धन्विना ।
सुशर्माणं समासाद्य बिभेद हृदयं रणे ॥ ४४
स गतासुर्महाराज पपात धरणीतले ।
नन्दयन्पाण्डवान्सर्वान्व्यथयंश्चापि तावकान् ४५
सुशर्माणं रणे हत्वा पुत्रानस्य महारथान् ।
सप्त चाष्टौ च त्रिंशच्च सायकैरनयत्क्षयम् ॥ ४६
ततोऽस्य निशितैर्बाणैः सर्वान्हत्वा पदानुगान् ।
अभ्यगाद्वारतीं सेनां हतशेषां महारथः ॥ ४७
भीमस्तु समरे क्रुद्धः पुत्रं तव जनाधिप ।
सुदर्शनमदृश्यन्तं शरैश्चक्रे हसन्निव ॥ ४८
ततोऽस्य प्रहसन्क्रुद्धः शिरः कायादपाहरत् ।
क्षुरप्रेण सुतीक्ष्णेन स हतः प्रापतद्भुवि ॥ ४९
तस्मिंस्तु निहते वीरे ततस्तस्य पदानुगाः ।
परिवव्रू रणे भीमं किरन्तो विविधाञ्शरान् ॥५०
ततस्तु निशितैर्बाणैस्तवानीकं वृकोदरः ।
इन्द्राशनिसमस्पर्शैः समन्तात्पर्यवाकिरत् ॥ ५१
ततः क्षणेन तद्भीमो न्यहनद्भरतर्षभ ॥ ५२
तेषु तूत्साद्यमानेषु सेनाध्यक्षा महारथाः ।
भीमसेनं समासाद्य ततोऽयुध्यन्त भारत ॥ ५३
स तान्सर्वाञ्शरैर्घोरैरवाकिरत पाण्डवः ।
तथैव तावका राजन्पाण्डवेयान्महारथान् ।
शरवर्षेण महता समन्तात्पर्यवारयन् ॥ ५४
व्याकुलं तदभूत्सर्वं पाण्डवानां परैः सह ।
तावकानां च समरे पाण्डवैर्युयुत्सताम् ॥ ५५
तत्र योधास्तदा पेतुः परस्परसमाहताः ।
उभयोः सेनयो राजन्संशोचन्तः स्म बान्धवान् ५६

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः ॥ २७ ॥

सहदेवेन शकुन्युलूकयोर्वधः ॥ १ ॥

सञ्जय उवाच ।
तस्मिन्प्रवृत्ते सङ्ग्रामे गजवाजिनरक्षये ।
शकुनिः सौबलो राजन्सहदेवं समभ्ययात् ॥ १
ततोऽस्यापततस्तूर्णं सहदेवः प्रतापवान् ।
शरौघान्प्रेषयामास पतङ्गानिव शीघ्रगान् ।
उलूकं च रणे राजन्विव्याध दशभिः शरैः ॥ २

शकुनिश्च महाराज भीमं विद्ध्वा त्रिभिः शरैः ।
नवत्या निशितैर्बाणैः सहदेवमवाकिरत् ॥ ३
ते शूराः समरे राजन्समासाद्य परस्परम् ।
विव्यधुर्निशितैर्बाणैः कङ्कवर्हिणवाजितैः ।
स्वर्णपुङ्खैः शिलाधौतैराकर्णप्रहितैः शरैः ॥ ४
तेषां चापगुणोत्सृष्टा शरवृष्टिर्विशांपते ।
आच्छादयद्दिशः सर्वा धाराभिरिव तोयदः ॥ ५
ततः क्रुद्धो रणे भीमः सहदेवश्च भारत ।
चेरतुः कदनं सङ्ख्ये कुर्वन्तौ सुमहाबलौ ॥ ६
ताभ्यां शरशतैश्छन्नं तद्बलं तव भारत ।
सान्धकारमिवाकाशमभवत्तत्रतत्र ह ॥ ७
अश्वैर्विपरिधावद्भिः शरच्छन्नैर्विशांपते ।
तत्रतत्र कृतो मार्गो विकर्षद्भिर्हतान्बहून् ॥ ८
निहतानां हयानां च सहैव हयसादिभिः ।
वर्मभिर्विनिकृत्तैश्च प्रासैश्छिन्नैश्च मारिष ॥ ९
ऋष्टिभिः शक्तिभिश्चैव सासिप्रासपरश्वधैः ।
संछन्ना पृथिवी जज्ञे कुसुमैः शबला इव ॥ १०
योधास्तत्र महाराज समासाद्य परस्परम् ।
व्यचरन्त रणे क्रुद्धा विनिघ्नन्तः परस्परम् ॥ ११
उद्वृत्तनयनै रोषात्संदष्टौष्ठपुटैर्मुखैः ।
सकुण्डलैर्महीं च्छन्ना पद्मकिञ्जल्कसन्निभैः ॥ १२
भुजैश्छिन्नैर्महाराज नागराजकरोपमैः ।
साङ्गदैः सतनुत्रैश्च सासिप्रासपरश्वधैः ॥ १३
कबन्धैरुत्थितैश्छिन्नैर्नृत्यद्भिश्चापरैर्युधि ।
क्रव्यादगणसंछन्ना घोराऽभूत्पृथिवी विभो ॥ १४
अल्पावशिष्टे सैन्ये तु कौरवेयान्महाहवे ।
प्रहृष्टाः पाण्डवा भूत्वा निन्यिरे यमसादनम् ॥ १५
एतस्मिन्नन्तरे शूरः सौबलेयः प्रतापवान् ।
प्रासेन सहदेवस्य शिरसि प्राहरद्भृशम् ॥ १६
स विह्वलो महाराज रथोपस्थ उपाविशत् ॥ १७
सहदेवं तथा दृष्ट्वा भीमसेनः प्रतापवान् ।
सर्वसैन्यानि संक्रुद्धो वारयामास भारत ॥ १८
निर्बिभेद च नाराचैः शतशोऽथ सहस्रशः ।
स निर्भिद्याकरोच्चैव सिंहनादमरिंदमः ॥ १९
तेन शब्देन वित्रस्ताः सर्वे सहयवारणाः ।
प्राद्रवन्सहसा भीताः शकुनेश्च पदानुगाः ॥ २०
प्रभग्नानथ तान्दृष्ट्वा राजा दुर्योधनोऽब्रवीत् ।
निवर्तध्वमधर्मज्ञा युध्यध्वं किं सूतेन वः ॥ २१
इह कीर्तिं समाधाय प्रेत्य लोकान्समश्नुते ।
प्राणाञ्जहाति यो धीरो युद्धे पृष्ठमदर्शयन् ॥ २२
एवमुक्तास्तु ते राज्ञा सौबलस्य पदानुगाः ।
पाण्डवानभ्यवर्तन्त मृत्युं कृत्वा निवर्तनम् ॥ २३
द्रवद्भिस्तत्र राजेन्द्र कृतः शब्दोऽतिदारुणः ।
क्षुब्धसागरसंकाशः क्षुभितैः सर्वतो दिशम् ॥ २४
तांस्ततः पुरतो दृष्ट्वा सौबलस्य पदानुगान् ।
प्रत्युद्ययुर्महाराज पाण्डवा विजयोद्यताः ॥ २५
प्रत्याश्वस्य च दुर्धर्षः सहदेवो विशांपते ।
शकुनिं दशभिर्विद्ध्वा हयांश्चास्य त्रिभिः शरैः ।
धनुश्चिच्छेद च शरैः सौबलस्य हसन्निव ॥ २६
अथान्यद्धनुरादाय शकुनिर्युद्धदुर्मदः ।
विव्याध नकुलं षष्ट्या भीमसेनं च सप्तभिः ॥ २७
उलूकोऽपि महाराज भीमं विव्याध सप्तभिः ।
सहदेवं च सप्तत्या परीप्सन्पितरं रणे ॥ २८
तं भीमसेनः समरे विव्याध नवभिः शरैः ।
शकुनिं च चतुःषष्ट्या पार्श्वस्थांश्च त्रिभिस्त्रिभिः २९
ते हन्यमाना भीमेन नाराचैस्तैलपायितैः ।
सहदेवं रणे क्रुद्धाश्छादयञ्शरवृष्टिभिः ।
पर्वतं वारिधाराभिः सविद्युत इवाम्बुदाः ॥ ३०
ततोऽस्यापततः शूरः सहदेवः प्रतापवान् ।
उलूकस्य महाराज भल्लेनापाहरच्छिरः ॥ ३१
स जगाम रथाद्भूमिं सहदेवेन पातितः ।
रुधिरास्रुतसर्वाङ्गो नन्दयन्पाण्डवान्युधि ॥ ३२
पुत्रं तु निहतं दृष्ट्वा शकुनिस्तत्र भारत ।
साश्रुकण्ठो विनिःश्वस्य क्षत्तुर्वाक्यमनुस्मरन् ॥ ३३
चिन्तयित्वा मुहूर्तं स बाष्पपूर्णेक्षणः श्वसन् ।
सहदेवं समासाद्य त्रिभिर्विव्याध सायकैः ॥ ३४
तानपास्य शरान्मुक्ताञ्शरसङ्घैः प्रतापवान् ।

अलकृतमिवाकाश इति क. पाठ ॥ ७ ॥

सहदेवो महाराज धनुश्चिच्छेद संयुगे ॥ ३५
छिन्ने धनुषि राजेन्द्र शकुनिः सौबलस्तदा ।
प्रगृह्य विपुलं खड्गं सहदेवाय प्राहिणोत् ॥ ३६
तमापतन्तं सहसा घोररूपं विशांपते ।
द्विधा चिच्छेद समरे सौबलस्य हसन्निव ॥ ३७
असिं दृष्ट्वा द्विधा च्छिन्नं प्रगृह्य महतीं गदाम् ।
प्राहिणोत्सहदेवाय सा मोघा न्यपतद्भुवि ॥ ३८
ततः शक्तिं महाघोरां कालरात्रीमिवोद्यताम् ।
प्रेषयामास संक्रुद्धः पाण्डवं प्रति सौबलः ॥ ३९
तामापतन्तीं सहसा शरैः कनकभूषणैः ।
त्रिधा चिच्छेद समरे सहदेवो हसन्निव ॥ ४०
सा पपात त्रिधा च्छिन्ना भूमौ कनकभूषणा ।
शीर्यमाणा यथा दीप्ता गगनाद्वै शतह्रदा ॥ ४१
शक्तिं विनिहतां दृष्ट्वा सौबलं च भयार्दितम् ।
दुद्रुवुस्तावकाः सर्वे भये जाते ससौबलाः ॥ ४२
अथोत्कृष्टं महच्चासीत्पाण्डवैर्जितकाशिभिः ।
धार्तराष्ट्रास्ततः सर्वे प्रायशो विमुखाऽभवन् ॥४३
तान्वै विमनसो दृष्ट्वा माद्रीपुत्रः प्रतापवान् ।
शरैरनेकसाहस्रैर्वारयामास संयुगे ॥ ४४
ततो गान्धारकैर्गुप्तं पुष्टैरश्वैर्जये धृतम् ।
आससाद रणे यान्तं सहदेवोऽथ सौबलम् ॥ ४५
स्वमंशमवशिष्टं तं संस्मृत्य शकुनिं नृप ।
रथेन काञ्चनाङ्गेन सहदेवः समभ्ययात् ॥ ४६
अधिज्यं बलवत्कृत्वा व्याक्षिपन्सुमहद्धनुः ।
स सौबलमभिद्रुत्य गार्ध्रपत्रैः शिलाशितैः ॥४७
भृशमभ्यहनत्क्रुद्धस्तोत्रैरिव महाद्विपम् ।
उवाच चैनं मेधावी विगृह्य स्मारयन्निव ॥ ४८
क्षत्रधर्मे स्थिरो भूत्वा युध्यस्व पुरुषो भव ।
यत्तदा भाषसे मूढ गृह्णन्नक्षान्सभातले ।
फलमद्य प्रपद्यस्व कर्मणस्तस्य दुर्मते ॥ ४९
निहतास्ते दुरात्मानो येऽस्मानवहसन्पुरा ।
दुर्योधनः कुलाङ्गारः शिष्टस्त्वं चास्य मातुलः ॥५०
अद्य ते निहनिष्यामि क्षुरेणोन्मथितं शिरः ।
वृक्षात्फलमिवाविद्धं लगुडेन प्रमाथिना ॥ ५१
एवमुक्त्वा महाराज सहदेवो महाबलः ।
संक्रुद्धो रणशार्दूलो वेगेनाभिजगाम तम् ॥ ५२
अभिगम्य सुदुर्धर्षः सहदेवो युधां पतिः ।
विकृष्य बलवच्चापं क्रोधेन प्रज्वलन्निव ॥ ५३
शकुनिं दशभिर्विद्ध्वा चतुर्भिश्चास्य वाजिनः ।
छत्रं ध्वजं धनुश्चास्य च्छित्त्वा सिंह इवानदत् ॥५४
छिन्नध्वजधनुश्छत्रः सहदेवेन सौबलः ।
कृतो विद्धश्च बहुभिः सर्वमर्मसु सायकैः ॥ ५५
ततो भूयो महाराज सहदेवः प्रतापवान् ।
शकुनेः प्रेषयान्मास शरवृष्टिं दुरासदाम् ॥ ५६

ततस्तु क्रुद्धः सुबलस्य पुत्रो
माद्रीसुतं सहदेवं विमर्दे ।
प्रासेन जाम्बूनदभूषणेन
जिघांसुरेकोऽभिपपात शीघ्रम् ॥ ५७
माद्रीसुतस्तस्य समुद्यतं तं
प्रासं सुवृत्तौ च भुजौ रणाग्रे ।
भल्लैस्त्रिभिर्युगपत्संचकर्त
ननाद चोच्चैस्तरसाऽऽजिमध्ये ॥ ५८
तस्याशुकारी सुसमाहितेन
सुवर्णपुङ्खेन दृढायसेन ।
भल्लेन सर्वावरणातिगेन
शिरः शरीरात्प्रममाथ भूयः ॥ ५९
शरेण कार्तस्वरभूषितेन
दिवाकराभेण सुसंहितेन ।
हृतोत्तमाङ्गो युधि पाण्डवेन
पपात भूमौ सुबलस्य पुत्रः ॥ ६०
स तच्छिरो वेगवता शरेण
सुवर्णपुङ्खेन शिलाशितेन ।
प्रावेरयत्कुपितः पाण्डुपुत्रो
यत्तत्कुरूणामनयस्य मूलम् ॥ ६१
भुजौ सुवृत्तौ प्रचकर्त वीरः
पश्चात्कबन्धं रुधिरावसिक्तम् ।

यत्तदा हृष्यसे मूढ ग्लहन्नक्षैः सभातले इति झ. पाठ. ॥ ४९ ॥

सप्तविंशोऽध्याय. ॥ २७ ॥

विस्पन्दमानं निपपात घोरं
रथोत्तमात्पार्थिव पार्थिवस्य ॥ ६२
हृतोत्तमाङ्गं शकुनिं समीक्ष्य
भूमौ शयानं रुधिरार्द्रगात्रम् ।
योधास्त्वदीया भयनष्टसत्वा
दिशः प्रजग्मुः प्रगृहीतशस्त्राः ॥ ६३
प्रविद्रुताः शुष्कमुखा विसंज्ञा
गाण्डीवघोषेण समाहताश्च ।
भयार्दिता भग्नरथाश्वनागाः
पदातयश्चैव सधार्तराष्ट्राः ॥ ६४
ततो रथाच्छकुनिं पातयित्वा
मुदान्विता भारत पाण्डवेयाः ।
शङ्खान्प्रदध्मुः समरेऽतिहृष्टाः
सकेशवाः सैनिकान्हर्षयन्तः ॥ ६५
तं चापि सर्वे प्रतिपूजयन्तो
दृष्ट्वा ब्रुवाणाः सहदेवमाजौ ।
दिष्ट्या हतो नैकृतिको महात्मा
सहात्मजो वीर रणे त्वयेति ॥ ६६

॥ इति श्रीमन्महाभारते शल्यपर्वणि शल्यवधपर्वणि अष्टादशदिवसयुद्धे सप्तविंशोऽध्यायः ॥ २७ ॥

॥ इति शल्यवधपर्व ॥

(अथ ह्रदप्रवेशपर्व ॥ २ ॥)

अष्टाविंशोऽध्यायः ॥ २८ ॥

हतावशिष्टे बले पाण्डवैर्निहते दुर्योधनेन पलायने निर्धारणम् ॥ १ ॥

सञ्जय उवाच ।
ततः क्रुद्धा महाराज सौबलस्य पदानुगाः ।
त्यक्त्वा जीवितमाक्रन्दे पाण्डवान्पर्यवारयन् ॥ १
तानर्जुनः प्रत्यगृह्णात्सहदेवजये धृतः ।
भीमसेनश्च तेजस्वी क्रुद्धाशीविषदर्शनः ॥ २
शक्त्यृष्टिप्रासहस्तानां सहदेवं जिघांसताम् ।
संकल्पमकरोन्मोघं गाण्डीवेन धनञ्जयः ॥ ३
संगृहीतायुधान्बाहून्योधानामभिधावताम् ।
भल्लैश्चिच्छेद बीभत्सुः शिरांस्यपि हयानपि ॥ ४
ते हयाः प्रत्यपद्यन्त वसुधां विगतासवः ।
चरता लोकवीरेण प्रहताः सव्यसाचिना ॥ ५
ततो दुर्योधनो राजा दृष्ट्वा स्वबलसंक्षयम् ।
हतशेषान्समानीय क्रुद्धो रथगणान्बहून् ॥ ६
कुञ्जरांश्च हयांश्चैव पादातांश्च समन्ततः ।
उवाच दुःखितान्सर्वान्धार्तराष्ट्र इदं वचः ॥ ७
समासाद्य रणे सर्वान्पाण्डवान्ससुहृद्गणान् ।
पाञ्चाल्यं चापि सबलं हत्वा शीघ्रं न्यवर्तत ॥ ८
तस्य ते शिरसा गृह्य वचनं युद्धदुर्मदाः ।
अभ्युद्ययू रणे पार्थास्तव पुत्रस्य शासनात् ॥ ९
तानभ्यापततः शीघ्रं हतशेषान्महारणे ।
शरैराशीविषाकारैः पाण्डवाः समवाकिरन् ॥ १०
तत्सैन्यं भरतश्रेष्ठ मुहूर्तेन महात्मभिः ।
अवध्यत रणं प्राप्य त्रातारं नाभ्यविन्दत ॥ ११
पलायमानं तु भयान्नावतिष्ठति दंशितम् ।
अश्वैर्विपरिधावद्भिः सैन्येन रजसा वृते ॥ १२
न प्राज्ञायन्त समरे दिशः सप्रदिशस्तथा ।
ततस्तु पाण्डवानीकान्निःसृत्य बहवो जनाः ॥ १३
अभ्यघ्नंस्तावकान्युद्धे मुहूर्तादिव भारत ।
ततो निःशेषमभवत्तत्सैन्यं तव भारत ॥ १४
अक्षौहिण्यः समेतास्तु तव पुत्रस्य भारत ।
एकादश हता युद्धे ताः प्रभो पाण्डुसृञ्जयैः ॥ १५
तेषु राजसहस्रेषु तावकेषु महात्मसु ।
एको दुर्योधनो राजन्नदृश्यत भृशं क्षतः ॥ १६
ततो वीक्ष्य दिशः सर्वा दृष्ट्वा शून्यां च मेदिनीम् ।

विहीनः सर्वयोधैश्च पाण्डवान्वीक्ष्य संयुगे ॥ १७
मुदितान्सर्वतः सिद्धान्नर्दमानान्समन्ततः ।
वाणशब्दरवांश्चैव श्रुत्वा तेषां महात्मनाम् ॥ १८
दुर्योधनो महाराज कश्मलेनाभिसंवृतः ।
अपयाने मनश्चक्रे विहीनबलवाहनः ॥ १९

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि अष्टादशदिवसयुद्धे अष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः ॥ २९ ॥

पाण्डवैर्निहतसहायस्य दुर्योधनस्य गदामादाय ह्रदं प्रति प्रस्थानम् ॥ १ ॥ सञ्जयसहायासिमुद्यच्छता सात्यकिना व्यासवचनात्तद्विमोचनम् ॥ २ ॥ हास्तिनपुर गच्छतः सञ्जयस्य मध्येमार्ग दुर्योधनदर्शनम् ॥ ३ ॥ तेन तस्मिन्धृतराष्ट्राय स्ववृत्तान्तनिवेदनचोदनपूर्वकं ह्रदं प्रविश्य मायया जलस्तम्भनम् ॥ ४ ॥ तत्रागतैर्द्रौणिकृपकृतवर्मभिः सञ्जयादुर्योधनस्य ह्रदप्रवेशं विज्ञाय विलप्य पुन शिबिरगमनम् ॥ ५ ॥ ततो वृद्धपरिजनैर्युयुत्सुना च राजदाराणां नगरप्रापणम् ॥ ६ ॥

धृतराष्ट्र उवाच ।
निहते मामके सैन्ये निःशेषे शिबिरे कृते ।
पाण्डवानां बले सूत किंनु शेषमभूत्तदा ॥ १
एतन्मे पृच्छतो ब्रूहि कुशलो ह्यसि सञ्जय ।
यच्च दुर्योधनो मानी कृतवांस्तनयो मम ।
बलक्षयं तथा दृष्ट्वा स एकः पृथिवीपतिः ॥ २
सञ्जय उवाच ।
रथानां द्वे सहस्रे तु सप्त नागशतानि च ।
पञ्च चाश्वसहस्राणि पत्तीनामयुतानि च ॥ ३
एतच्छेषमभूद्राजन्पाण्डवानां महद्बलम् ।
परिगृह्य हि यद्युद्धे धृष्टद्युम्नो व्यवस्थितः ॥ ४
एकाकी भरतश्रेष्ठ ततो दुर्योधनो नृपः ।
नापश्यत्समरे कंचित्सहायं रथिनां वरः ॥ ५
नर्दमानान्परान्दृष्ट्वा स्वबलस्य च संक्षयम् ।
दृष्ट्वा भरतशार्दूलः कश्मलेनाभिसंवृतः ।
हतं स्वहयमुत्सृज्य प्राङ्मुखः प्राद्रवद्भयात् । ६
एकादशचमूभर्ता पुत्रो दुर्योधनस्तव ।
गदामादाय तेजस्वी पदातिः प्रस्थितो ह्रदम् ॥ ७
नातिदूरं ततो गत्वा पद्भ्यामेव नराधिपः ।
सस्मार वचनं क्षत्तुर्धर्मशीलस्य धीमतः ॥ ८
इदं नूनं महाप्राज्ञो विदुरो दृष्टवान्पुरा ।
महद्व्यसनमस्माकं क्षत्रियाणां च सर्वशः ॥ ९
एवं विचिन्तयानस्तु प्रविविक्षुर्ह्रदं नृपः ।
दुःखसंतप्तहृदयो दृष्ट्वा राजन्बलक्षयम् ॥ १०
'दशैकाक्षौहिणीभर्ता तदा दुर्योधनोऽपि सन् ।
प्राप्तवान्व्यसनं तीव्रं दैवं हि बलवत्तरम् ॥' ११
पाण्डवास्तु महाराज धृष्टद्युम्नपुरोगमाः ।
अभ्यद्रवन्त संक्रुद्धास्तव राजन्बलं प्रति ॥ १२
शक्त्यृष्टिप्रासहस्तानां बलानामभिगर्जताम् ।
संकल्पमकरोन्मोघं गाण्डीवेन धनञ्जयः ॥ १३
तान्हत्वा निशितैर्बाणैः सामात्यान्सह बन्धुभिः ।
रथे श्वेतहये तिष्ठन्नर्जुनो बह्वशोभत ॥ १४
सुबलस्य हते पुत्रे सवाजिरथकुञ्जरे ।
महावनमिव च्छिन्नमभवत्तावकं बलम् ॥ १५
अनेकशतसाहस्रे बले दुर्योधनस्य ह ।
नान्यो महारथो राजञ्जीवमानो व्यदृश्यत ॥ १६
द्रोणपुत्रादृते वीरात्तथैव कृतवर्मणः ।
कृपाच्च गौतमाद्राजन्पार्थिवाच्च तवात्मजात् ॥ १७
धृष्टद्युम्नस्तु मां दृष्ट्वा हसन्सात्यकिमब्रवीत् ।
किमनेन गृहीतेन नानेनार्थोऽस्ति जीवता ॥ १८
धृष्टद्युम्नवचः श्रुत्वा शिनेर्नप्ता महारथः ।
उद्यम्य निशितं खड्गं हन्तुं मामुद्यतस्तदा ॥ १९
तमागम्य महाप्राज्ञः कृष्णद्वैपायनोऽब्रवीत् ।
मुच्यतां सञ्जयो जीवन्न हन्तव्यः कथंचन ॥ २०
द्वैपायनवचः श्रुत्वा शिनेर्नप्ता कृताञ्जलिः ।
ततो मामब्रवीन्मुक्त्वा स्वस्ति सञ्जय साधय ॥ २१
अनुज्ञातस्त्वहं तेन न्यस्तवर्मा निरायुधः ।
प्रातिष्ठं येन नगरं सायाह्ने रुधिरोक्षितः ॥ २२

क्रोशमात्रमपक्रान्तं गदापाणिमवस्थितम् ।
एकं दुर्योधनं राजन्नपश्यं भृशविक्षतम् ॥ २३
स तु मामश्रुपूर्णाक्षो नाशक्नोदभिवीक्षितुम् ।
उपप्रैक्षत मां दृष्ट्वा तथा दीनमवस्थितम् ॥ २४
तं चाहमपि शोचन्तं दृष्ट्वैकाकिनमाहवे ।
मुहूर्तं नाशकं वक्तुमतिदुःखपरिप्लुतः ॥ २५
'यस्य मूर्धाभिषिक्तानां सहस्रमणिमौलिनाम् ।
आहृत्य च करं सर्वे स्वस्य वेश्म समागतम् ॥ २६
चतुःसागरपर्यन्ता पृथिवी रत्नभूषिता ।
कर्णेनैकेन यस्यार्थे करमाहारिता पुरा ॥ २७
यस्याज्ञा पररा्ष्ट्रेषु कर्णेनैव प्रसारिता ।
नाभवद्यस्य शस्त्रेषु खेदो राज्ञः प्रशासतः ॥ २८
आसीनो हास्तिनपुरे क्षेमं राज्यमकण्टकम् ।
अन्वपालयदैश्वर्यात्कुबेरमपि नास्मरत् ॥ २९
भवनाद्भवनं राजन्प्रयातुं पृथिवीपते ।
देवालयप्रदेशे च पन्था यस्य हिरण्मयः ॥ ३०
पताकावृतसूर्यांशुतोरणोच्छ्रितशोभिताः ।
प्रयाणे पृथिवीभर्तुर्धन्यानामभवन्गृहाः ॥ ३१
आरुह्यैरावतप्रख्यं नागमिन्द्रसमो बली ।
विभूत्या सुमहत्या यः प्रयाति पृथिवीपते ॥ ३२
तं भृशक्षतसर्वाङ्गं पद्भ्यामेव धरातले ।
तिष्ठन्तमेकं दृष्ट्वा तु ममाभूत्क्लेश उत्तमः ॥ ३३
तस्य चैवंविधस्याद्य जगन्नाथस्य भूपते ।
आपदप्रतिमैवाभूद्बलीयान्विभिरेव हि ॥' ३४
ततोऽस्मै तदहं सर्वमुक्तवान्ग्रहणं तदा ।
द्वैपायनप्रसादाच्च जीवतो मोक्षमाहवे ॥ ३५
स मुहूर्तमिव ध्यात्वा प्रतिलभ्य च चेतनाम् ।
भ्रातॄंश्च सर्वसैन्यानि पर्यपृच्छत मां ततः ॥ ३६
तस्मै तदहमाचक्षे सर्वं प्रत्यक्षदर्शिवान् ।
भ्रातॄंश्च निहतान्सर्वान्सैन्यं च विनिपातितम् ३७
त्रयः किल रथाः शिष्टास्तावकानां नराधिप ।
इति प्रस्थानकाले मां कृष्णद्वैपायनोऽब्रवीत् ॥ ३८
स दीर्घमिव निःश्वस्य प्रत्यवेक्ष्य पुनः पुनः ।
असौ मां पाणिना स्पृष्ट्वा पुत्रस्ते पर्यभाषत ३९

त्वदन्यो नेह संग्रामे कश्चिज्जीवति सञ्जय ।
द्वितीयं नेह पश्यामि ससहायाश्च पाण्डवाः ॥ ४०
ब्रूयाः सञ्जय राजानं प्रज्ञाचक्षुषमीश्वरम् ।
दुर्योधनस्तव सुतः प्रविष्टो ह्रदमित्युत ॥ ४१
सुहृद्भिस्ताद्दशैर्हीनः पुत्रैर्भ्रातृभिरेव च ।
पाण्डवैश्च हृते राज्ये को नु जीवेत मादृशः ॥ ४२
आचक्षीथाः सर्वमिदं मां च मुक्तं महाहवात् ।
अस्मिंस्तोयह्रदे गुप्तं जीवन्तं भृशविक्षतम् ॥ ४३
एवमुक्त्वा महाराज प्राविशत्तं महाह्रदम् ।
अस्तम्भयत तोयं च मायया मनुजाधिपः ॥ ४४
तस्मिन्ह्रदं प्रविष्टे तु त्रीन्रथाञ्श्रान्तवाहनान् ।
अपश्यं सहितानेकस्तं देशं समुपेयुषः ॥ ४५
कृपं शारद्वतं वीरं द्रौणिं च रथिनां वरम् ।
भोजं च कृतवर्माणं सहिताञ्शरविक्षतान् ॥ ४६
ते सर्वे मामभिप्रेक्ष्य तूर्णमश्वाननोदयन् ।
उपयाय तु मामूचुर्दिष्ट्या जीवसि सञ्जय ॥ ४७
अपृच्छंश्चैव मां सर्वे पुत्रं तव जनाधिपम् ।
कच्चिद्दुर्योधनो राजा स नो जीवति सञ्जय ॥ ४८
आख्यातवानहं तेभ्यस्तदा कुशलिनं नृपम् ।
तच्चैव सर्वमाचक्षं यन्मां दुर्योधनोऽब्रवीत् ॥ ४९
ह्रदं चैवाहमाचक्षं यं प्रविष्टो नराधिपः ।
अश्वत्थामा तु तद्राजन्निशम्य वचनं मम ॥ ५०
तं ह्रदं विपुलं प्रेक्ष्य करुणं पर्यदेवयत् ।
अहो धिक्स न जानाति जीवतोऽस्मान्नराधिपः ।
पर्याप्ता हि वयं तेन सह योधयितुं परान् ॥ ५१
ते तु तत्र चिरं कालं विलप्य च महारथाः ।
प्राद्रवन्रथिनां श्रेष्ठा दृष्ट्वा पाण्डुसुतान्रणे ॥ ५२
ते तु मां रथमारोप्य कृपस्य सुपरिष्कृतम् ।
सेनानिवेशमाजग्मुर्हतशेषास्त्रयो रथाः ॥ ५३
तत्र गुल्माः परिक्षिप्ताः सूर्ये चास्तमिते सति ।
सर्वे विचुक्रुशुः श्रुत्वा पुत्राणां तव संक्षयम् ॥ ५४
ततो वृद्धा महाराज योषितां रक्षिणो नराः ।
राजदारानुपादाय प्रययुर्नगरं प्रति ॥ ५५
तत्र विक्रोशमानानां रुदतीनां च सर्वशः ।

प्रादुरासीन्महाञ्शब्दः श्रुत्वा तद्बलसंक्षयम् ॥ ५६
ततस्ता योषितो राजन्रुदन्त्यो वै मुहुर्मुहुः ।
कुररय इव शब्देन नादयन्त्यो महीतलम् ॥ ५७
आजघ्नुः करजैश्चापि पाणिभिश्च शिरांस्युत ।
लुलुचुश्च तदा केशान्क्रोशन्त्यस्तत्रतत्र ह ॥ ५८
हाहाकारविनादिन्यो विनिघ्नन्त्य उरांसि च ।
शोचन्त्यस्तत्र रुरुदुः क्रन्दमाना विशांपते ॥ ५९
ततो दुर्योधनामात्याः साश्रुकण्ठा भृशातुराः ।
राजदारानुपामन्त्र्य प्रययुर्नगरं प्रति ॥ ६०
वेत्रव्यासक्तहस्ताश्च द्वाराध्यक्षा विशांपते ।
शयनीयानि शुभ्राणि स्पर्ध्यास्तरणवन्ति च ।
समादाय ययुस्तूर्णं नगरं दाररक्षिणः ॥ ६१
आस्थायाश्वतरीयुक्तान्स्यन्दनानपरे पुनः ।
स्वान्स्वान्दारानुपादाय प्रययुर्नगरं प्रति ॥ ६२
अदृष्टपूर्वा या नार्यो भास्करेणापि वेश्मसु ।
ददृशुस्ता महाराज जना याताः पुरं प्रति ॥ ६३
ताः स्त्रियो भरतश्रेष्ठ सौकुमार्यसमन्विताः ।
प्रययुर्नगरं तूर्णं हतस्वपतिबान्धवाः ॥ ६४
आगोपालाविपालेभ्यो द्रवन्तो नगरं प्रति ।
ययुर्मनुष्याः संभ्रान्ता भीमसेनभयार्दिताः ॥ ६५
अपिचैषां भयं तीव्रं पार्थेभ्योऽभूत्सुदारुणम् ।
प्रेक्षमाणास्तदाऽन्योन्यमाधावन्नगरं प्रति ॥ ६६
तस्मिंस्तथा वर्तमाने विद्रवे भृशदारुणे ।
युयुत्सुः शोकसंमूढः प्राप्तकालमचिन्तयत् ॥ ६७
जितो दुर्योधनः सङ्ख्ये पाण्डवैर्भीमविक्रमैः ।
एकादशचमूभर्ता भ्रातरश्चास्य सूदिताः ॥ ६८
हताश्च कुरवः सर्वे भीष्मद्रोणपुरःसराः ।
अहमेको विमुक्तस्तु भाग्ययोगाद्यदृच्छया ॥ ६९
विद्रुतानि च सर्वाणि शिबिराद्वै समन्ततः ।
[इतस्ततः पलायन्ते हतनाथा हतौजसः ॥ ७०
अदृष्टपूर्वा दुःखार्ता भयव्याकुललोचनाः ।
हरिणा इव वित्रस्ता वीक्षमाणा दिशो दश]॥ ७१
दुर्योधनस्य सचिवा ये केचिदवशेषिताः ।
राजदारानुपादाय प्रययुर्नगरं प्रति ।

प्राप्तकालमहं मन्ये प्रवेशं तैः सह प्रभो ॥ ७२
युधिष्ठिरमनुज्ञाय वासुदेवं तथैव च ।
एतमर्थं महाबाहुरुभयोः संन्यवेदयत् ॥ ७३
तस्य प्रीतोऽभवद्राजा नित्यं करुणवेदिता ।
परिष्वज्य महाबाहुर्वैश्यापुत्रं व्यसर्जयत् ॥ ७४
ततः स रथमास्थाय द्रुतमश्वानचोदयत् ।
संवाहयितवांश्चापि राजदारान्पुरं प्रति ॥ ७५
तैश्चैव सहितः क्षिप्रमस्तं गच्छति भास्करे ।
प्रविष्टो हास्तिनपुरं बाष्पकण्ठोऽश्रुलोचनः ॥ ७६
अपश्यत महाप्राज्ञं विदुरं साश्रुलोचनम् ।
राज्ञः समीपान्निष्क्रान्तं शोकोपहतचेतसम् ॥ ७७
तमब्रवीत्सत्यधृतिः प्रणतं त्वग्रतः स्थितम् ॥ ७८
विदुर उवाच ।
दिष्ट्या कुरुक्षये वृत्ते अस्मिंस्त्वं पुत्र जीवसि ।
विना राज्ञः प्रवेशाद्वै किमसि त्वमिहागतः ।
एतद्वै कारणं सर्वं विस्तरेण निवेदय ॥ ७९
युयुत्सुरुवाच ।
निहते शकुनौ तत्र सज्ञातिसुतबान्धवे ।
हतशेषपरीवारो राजा दुर्योधनस्ततः ।
स्वकं स हयमुत्सृज्य प्राङ्मुखः प्राद्रवद्भयात् ॥ ८०
अपक्रान्ते तु नृपतौ स्कन्धावारनिवेशनात् ।
भयव्याकुलितं सर्वं प्राद्रवन्नगरं प्रति ॥ ८१
ततो राज्ञः कलत्राणि भ्रातॄणां चास्य सर्वतः ।
वाहनेषु समारोप्य अध्यक्षाः प्राद्रवन्भयात् ॥ ८२
ततोऽहं समनुज्ञाप्य राजानं सहकेशवम् ।
प्रविष्टो हास्तिनपुरं रक्षन्लोकस्य वाच्यताम् ॥ ८३
सञ्जय उवाच ।
एतच्छ्रुत्वा तु वचनं वैश्यापुत्रेण भाषितम् ।
प्राप्तकालमिति ज्ञात्वा विदुरः सर्वधर्मवित् ।
अपूजयदमेयात्मा युयुत्सुं वाक्यमब्रवीत् ॥ ८४
प्राप्तकालमिदं सर्वं ब्रुवता भरतक्षये ।
[रक्षितः कुलधर्मश्च सानुक्रोशतया त्वया ॥ ८५
दिष्ट्या त्वामिह संग्रामादस्माद्वीरक्षयात्पुरम् ।
समागतमपश्याम ह्यंशुमन्तमिव प्रजाः ॥ ८६

हतो दुर्योधन इति क. पाठः ॥ ६८ ॥ अहमेकोऽवशिष्टस्तु इति क. पाठः ॥ ६९ ॥ एकोनत्रिंशोऽध्याय ॥ २९ ॥

अन्धस्य नृपतेर्यष्टिर्लुब्धस्यादीर्घदर्शिनः ।
बहुशो याच्यमानस्य दैवोपहतचेतसः ।
त्वमेको व्यसनार्तस्य प्रियसे पुत्र सर्वथा] ॥८७
अद्य त्वमिह विश्रान्तः श्वोऽभिगन्ता युधिष्ठिरम् ।
एतावदुक्त्वा वचनं विदुरः साश्रुलोचनः ।
युयुत्सुं समनुज्ञाप्य प्रविवेश नृपक्षयम् ॥ ८८
[पौरजानपदैर्दुःखाद्धाहेति भृशनादितम् ।
निरानन्दं गतश्रीकं हृताराममिवाशयम् ।
शून्यरूपमपध्वस्तं दुःखाद्दुःखतरोऽभवत् ॥ ८९
विदुरः सर्वधर्मज्ञो विक्लवेनान्तरात्मना ।
विवेश नगरे राजन्निशश्वास शनैः शनैः ॥ ९०
युयुत्सुरपि तां रात्रिं स्वगृहे न्यवसत्तदा ।
वन्द्यमानः स्वकैश्चापि नाभ्यनन्दत्सुदुःखितः ।
चिन्तयानः क्षयं तीव्रं भरतानां परस्परम् ॥९१

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि अष्टादशदिवसयुद्धे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः ॥ ३० ॥

कृपद्रौणिकृतवर्मसु ह्रदमेत्य दुर्योधनेन भाषमाणेषु तत्र यदृच्छोपागतैर्व्याधैस्तद्दर्शनम् ॥ १ ॥ व्याधनिवेदनेन सपरिवारैः पाण्डवैर्ह्रदं प्रत्यागमनम् ॥ २ ॥ तद्दर्शनेन कृपादिभिर्दुर्योधनाभ्यनुज्ञानेन दूरस्थन्यग्रोधतरुमेत्य तन्मूले उपवेशनम् ॥ ३ ॥ दुर्योधनेन पुनर्जलस्तम्भनेन ह्रदप्रवेशनम् ॥ ४ ॥

'सञ्जय उवाच ।
मुहूर्तादिव राजेन्द्र सर्वं शून्यमदृश्यत ।
मत्तवारणसंघुष्टं शिबिरं विद्रुते बले ॥ १
यत्र शब्देन महता नान्वबुध्यन्महारथाः ।
तत्र शब्दं न शृणुमो मनुष्यस्यापि कस्यचित् ॥'२
धृतराष्ट्र उवाच ।
हतेषु सर्वसैन्येषु पाण्डुपुत्रै रणाजिरे ।
मामकाश्चावशिष्टास्ते किमकुर्वत सञ्जय ॥ ३
कृतवर्मा कृपश्चैव द्रोणपुत्रश्च वीर्यवान् ।
दुर्योधनश्च मन्दात्मा राजा किमकरोत्तदा ॥ ४
सञ्जय उवाच ।
संप्राद्रवत्सु दारेषु क्षत्रियाणां महात्मनाम् ।
विद्रुते शिबिरे शून्ये भृशोद्विग्नास्त्रयो रथाः ॥ ५
निशम्य पाण्डुपुत्राणां तदा वैजयिनां स्वनम् ।
विद्रुतं शिबिरं दृष्ट्वा सायाह्ने राजगृद्धिनः ।
स्थानं नारोचयंस्तत्र ततस्ते ह्रदमभ्ययुः ॥ ६
युधिष्ठिरोऽपि धर्मात्मा भ्रातृभिः सहितो रणे ।
हृष्टः पर्यपतद्राजन्दुर्योधनवधेप्सया ॥ ७
मार्गमाणास्तु संक्रुद्धास्तव पुत्रं जयैषिणः ।
यत्नतोऽन्वेषमाणास्ते नैवापश्यञ्जनाधिपम् ॥ ८
यदा दुर्योधनो युद्धं त्यक्त्वा पद्भ्यां पराक्रमत् ।
तं ह्रदं प्राविशच्चापि विष्टभ्यापः स्वमायया ॥ ९
यदा तु पाण्डवाः सर्वे सुपरिश्रान्तवाहनाः ।
ततः स्वशिबिरं प्राप्य व्यतिष्ठन्त ससैनिकाः ॥१०
ततः कृपश्च द्रौणिश्च कृतवर्मा च सात्वतः ।
सन्निविष्टेषु पार्थेषु प्रययुस्तं ह्रदं शनैः ॥ ११
ते तं ह्रदं समासाद्य यत्र शेते जनाधिपः ।
अभ्यभाषन्त दुर्धर्षं राजानं सुप्तमम्भसि ॥ १२
राजन्नुत्तिष्ठ युध्यस्व सहास्माभिर्युधिष्ठिरम् ।
जित्वा वा पृथिवीं भुङ्क्ष्व हतो वा स्वर्गमाप्नुहि ॥ १३
तेषामपि बलं सर्वं हतं दुर्योधन त्वया ।
प्रतिविद्धाश्च भूयिष्ठं ये शिष्टास्तत्र सैनिकाः ॥१४
न ते वेगं विषहितुं शक्तास्तव विशांपते ।
अस्माभिरपि गुप्तस्य तस्मादुत्तिष्ठ भारत ॥ १५
दुर्योधन उवाच ।
दिष्ट्या पश्यामि वो मुक्तानीदृशात्पुरुषक्षयात् ।
पाण्डुकौरवसंमर्दाज्जीवमानान्नरर्षभान् ॥ १६
विजेष्यामो वयं सर्वे विश्रान्ता विगतक्लमाः ।
भवन्तश्च परिश्रान्ता वयं च भृशविक्षताः ।
उदीर्णं च बलं तेषां तेन युद्धं न रोचये ॥ १७
न त्वेतदद्भुतं वीरा यद्वो महदिदं मनः ।

अस्मासु च परा शक्तिर्न तु कालः पराक्रमे ॥१८
विश्रम्यैकां निशामद्य भवद्भिः सहितो रणे ।
प्रतियोत्स्याम्यहं शत्रूञ्श्वो न स्याच्च श्रमो मम १९
सञ्जय उवाच ।
एवमुक्तोऽब्रवीद्द्रौणी राजानं युद्धदुर्मदम् ।
उत्तिष्ठ राजन्भद्रं ते विजेष्यामो वयं परान् ॥ २०
इष्टापूर्तेन दानेन सत्येन च जपेन च ।
शपे राजन्यथा ह्यद्य निहनिष्यामि सोमकान् २१
मा स्म यज्ञकृतां प्रीतिमाप्नुयां सज्जनोचिताम् ।
यदीमां रजनीं व्युष्टां न हि हन्मि परान्रणे॥२२
नाहत्वा सर्वपाञ्चालान्विमोक्ष्ये कवचं विभो ।
उत्तिष्ठ त्वं ब्रवीम्येतत्तन्मे शृणु जनाधिप॥ २३
तेषु संभाषमाणेषु व्याधास्तं देशमाययुः ।
मांसभारपरिश्रान्ताः पानीयार्थं यदृच्छया ॥ २४
ते हि नित्यं महाराज भीमसेनस्य लुब्धकाः ।
मांसभारानुपाजह्रुर्भक्त्या परमया विभो ॥ २५
ते तत्र धिष्ठितास्तेषां सर्वं तद्वचनं रहः ।
दुर्योधनवचश्चैव शुश्रुवुः संगता मिथः ॥ २६
तेऽपि सर्वे महेष्वासा अयुद्धार्थिनि कौरवे ।
निर्बन्धं परमं चक्रुस्तदा वै युद्धकाङ्क्षिणः ॥ २७
तांस्तथा समुदीक्ष्याथ कौरवाणां महारथान् ।
अयुद्धमनसं चैव राजानं स्थितमम्भसि ॥ २८
तेषां श्रुत्वा च संवादं राज्ञश्च सलिले सतः ।
व्याधा ह्यजानन्राजेन्द्र सलिलस्थं सुयोधनम् ॥२९
ते पूर्वं पाण्डुपुत्रेण पृष्टा ह्यासन्सुतं तव ।
यदृच्छोपगतास्तत्र राजानं परिमार्गता ॥ ३०
ततस्ते पाण्डुपुत्रस्य स्मृत्वा तद्भाषितं तदा ।
अन्योन्यमब्रुवन्राजन्मृगव्याधाः शनैरिव ॥ ३१
दुर्योधनं ख्यापयामो धनं दास्यति पाण्डवः ।
सुव्यक्तमिह नः ख्यातो ह्रदे दुर्योधनो नृपः॥ ३२
तस्माद्गच्छामहे सर्वे यत्र राजा युधिष्ठिरः ।
आख्यातुं सलिले सुप्तं दुर्योधनममर्षणम् ॥ ३३
धृतराष्ट्रात्मजं तस्मै भीमसेनाय धीमते ।
शयानं सलिले सर्वे कथयामो धनुर्भृते ॥ ३४
स नो दास्यति सुप्रीतो धनानि बहुलान्युत ।
किं नो मांसेन शुष्केण परिक्लिष्टेन शोपिणा॥ ३५
एवमुक्त्वा तु ते व्याधाः संप्रहृष्टा धनार्थिनः ।
मांसभारानुपादाय प्रययुः शिबिरं प्रति ॥ ३६
पाण्डवाश्च महाराज लब्धलक्षाः प्रहारिणः ।
अपश्यमानाः समरे दुर्योधनमवस्थितम् ॥ ३७
निकृतिज्ञस्य पापस्य तस्याभिगमनेप्सया ।
चारान्संप्रेषयामासुः समन्तात्तद्रणाजिरे ॥ ३८
आगम्य तु ततः सर्वे नष्टं दुर्योधनं नृपम् ।
न्यवेदयन्त सहिता धर्मराजस्य सैनिकाः ॥ ३९
तेषां तद्वचनं श्रुत्वा चाराणां भरतर्षभ ।
चिन्तामभ्यगमत्तीव्रां निश्वास च पार्थिवः॥४०
'अरिशेषे जीवति तु संदिग्धो विजयो भवेत् ।
राज्यं लभे कथं तद्धि पूजितं विजयादिभिः ॥' ४१
अथ स्थितानां पाण्डूनां दीनानां भरतर्षभ ।
तस्मादेशादपक्रम्य त्वरिता लुब्धका विभो ॥४२
आजग्मुः शिबिरं हृष्टा दृष्ट्वा दुर्योधनं नृपम् ।
वार्यमाणाः प्रविष्टाश्च भीमसेनस्य पश्यतः ॥ ४३
ते तु पाण्डवमासाद्य भीमसेनं महाबलम् ।
तस्मै तत्सर्वमाचख्युर्यद्वृत्तं यच्च वै श्रुतम् ॥ ४४
ततो वृकोदरो राजन्दत्त्वा तेषां धनं बहु ।
धर्मराजाय तत्सर्वमाचचक्षे परंतपः ॥ ४५
असौ दुर्योधनो राजन्विज्ञातो मम लुब्धकैः ।
संस्तभ्य सलिलं शेते यस्यार्थे परितप्यसे ॥ ४६
तद्वचो भीमसेनस्य प्रियं श्रुत्वा विशांपते ।
अजातशत्रुः कौन्तेयो हृष्टोऽभूत्सह सोदरैः ॥ ४७
तं च श्रुत्वा महेष्वासं प्रविष्टं सलिलह्रदे ।
क्षिप्रमेव ततोऽगच्छन्पुरस्कृत्य जनार्दनम् ॥ ४८
ततः किलकिलाशब्दः प्रादुरासीद्विशांपते ।
पाण्डवानां प्रहृष्टानां पाञ्चालानां च सर्वशः ४९
सिंहनादांस्ततश्चक्रुः श्वेताश्च भरतर्षभ ।
त्वरिताः क्षत्रिया राजन्नुदक्रोशन्परस्परम् ॥ ५०

अस्मासु च परा भक्तिर्दर्शिता कार्यगौरवात् । इति ड पाठ. ॥ १८ ॥ यज्ञकृता प्रीति यज्ञादिजस्य पुण्यस्य फलम् ॥ २२ ॥ नष्ट अदृश्यत्व गत लीनमित्यर्थ ॥ ३९ ॥ त्रिंशोऽध्याय. ॥ ३० ॥

ज्ञातः पापो धार्तराष्ट्रो दृष्टश्चेत्यसकृद्रणे ।
प्राक्रोशन्सोमकास्तत्र हृष्टरूपाः समन्ततः ॥ ५१
तेषामाशु प्रयातानां रथानां तत्र वेगिनाम् ।
बभूव तुमुलः शब्दो दिवस्पृक् पृथिवीपते ॥ ५२
दुर्योधनं परीप्सन्तस्तत्रतत्र युधिष्ठिरम् ।
अन्वयुस्त्वरितास्ते वै राजानं श्रान्तवाहनाः॥५३
अर्जुनो भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ।
धृष्टद्युम्नश्च पाञ्चाल्यः शिखण्डी चापराजितः॥५४
उत्तमौजा युधामन्युः सात्यकिश्च महारथः ।
पाञ्चालानां च ये शिष्टा द्रौपदेयाश्च भारत ।
हयाश्च सर्वे नागाश्च शतशश्च पदातयः ॥ ५५
ततः प्राप्तो महाराज धर्मराजः प्रतापवान् ।
द्वैपायनह्रदं घोरं यत्र दुर्योधनोऽभवत् ॥ ५६
शीतामलजलं ह्यं द्वितीयमिव सागरम् ।
मायया सलिलं स्तभ्य यत्राभूत्ते स्थितः सुतः ५७
अत्यद्भुतेन विधिना दैवयोगेन भारत ।
सलिलान्तर्गतः शेते दुर्दर्शः कस्यचित्प्रभो ।
मानुषस्य मनुष्येन्द्र गदाहस्तो जनाधिपः ॥ ५८
ततो दुर्योधनो राजा सलिलान्तर्गतो वसन् ।
शुश्रुवे तुमुलं शब्दं जलदोपमनिःस्वनम् ॥ ५९
युधिष्ठिरश्च राजेन्द्र तं ह्रदं सह सोदरैः ।
आजगाम महाराज तव पुत्रवधाय वै ॥ ६०
महता शङ्खनादेन रथनेमिस्वनेन च ।
ऊर्ध्वं धुन्वन्महोरणुं कम्पयंश्चापि मेदिनीम् ॥६१
यौधिष्ठिरस्य सैन्यस्य श्रुत्वा शब्दं महारथाः ।
कृतवर्मा कृपो द्रौणी राजानमिदमब्रुवन् ॥ ६२
इमे ह्यायान्ति संहृष्टाः पाण्डवा जितकाशिनः ।
अपयास्यामहे तावदनुजानातु नो भवान् ॥ ६३
दुर्योधनस्तु तच्छ्रुत्वा तेषां तत्र तरस्विनाम् ।
तथेत्युक्त्वा ह्रदं तं वै मायया ऽस्तम्भयत्प्रभो ॥६४
ते त्वनुज्ञाप्य राजानं भृशं शोकपरायणाः ।
जग्मुर्दूरे महाराज कृपप्रभृतयो रथाः ॥ ६५
ते गत्वा दूरमध्वानं न्यग्रोधं प्रेक्ष्य मारिष ।
न्यविशन्त भृशं श्रान्ताश्चिन्तयन्तो नृपं प्रति ६६
विष्टभ्य सलिलं सुप्तो धार्तराष्ट्रो महाबलः ।
पाण्डवाश्चापि संप्राप्तास्तं देशं युद्धमीप्सवः ॥६७
कथं नु युद्धं भविता कथं राजा भविष्यति ।
कथं नु पाण्डवा राजन्प्रतिपत्स्यन्ति कौरवम् ६८
इत्येवं चिन्तयानास्तु रथेभ्योऽश्वान्विमुच्य ते ।
तत्रासांचक्रिरे राजन्कृपप्रभृतयो रथाः ॥ ६९

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि अष्टादशदिवसयुद्धे त्रिंशोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः ॥ ३१ ॥

युधिष्ठिरेण ह्रदस्थं दुर्योधनं प्रति निष्ठुरोक्तिभिः संतर्जनम् ॥ १ ॥ युधिष्ठिरदुर्योधनयोः संवादः ॥ २ ॥

सञ्जय उवाच ।
ततस्तेष्वपयातेषु रथेषु त्रिषु पाण्डवाः ।
तं ह्रदं प्रत्यपद्यन्त यत्र दुर्योधनोऽभवत् ॥ १
आसाद्य च कुरुश्रेष्ठ तदा द्वैपायनं ह्रदम् ।
स्तम्भितं धार्तराष्ट्रेण दृष्ट्वा तं सलिलाशयम् ॥ २
वासुदेवमिदं वाक्यमब्रवीत्कुरुनन्दनः ।
पश्येमां धार्तराष्ट्रेण मायामप्सु प्रयोजिताम् ॥ ३
विष्टभ्य सलिलं शेते नास्य मानुषतो भयम् ।
दैवीं मायामिमां कृत्वा सलिलान्तर्गतो ह्ययम् ॥४
निकृत्या निकृतिप्रज्ञो न मे जीवन्विमोक्ष्यते ।
यद्यस्य समरे साह्यं कुरुते वज्रभृत्स्वयम् ।
तथाप्येनं हतं युद्धे लोका द्रक्ष्यन्ति माधव ॥ ५
वासुदेव उवाच ।
मायाविन इमां मायां मायया जहि भारत ।
मायावी मायया वध्यः सत्यमेतद्युधिष्ठिर ॥ ६
क्रियाभ्युपायैर्बहुभिर्मायामप्सु प्रयोज्य च ।

क्रियाभ्युपायैः शत्रुक्रियानुरूपैः प्रतीकारैर्धर्म्यैरधर्म्यैर्वेत्यर्थः । एतेतु च्छलकारिणश्छलैरेव हन्तव्या इति भावः ।

जहि त्वं भरतश्रेष्ठ मायात्मानं सुयोधनम् ॥ ७
क्रियाभ्युपायैरिन्द्रेण निहता दैत्यदानवाः ।
क्रियाभ्युपायैर्बलिभिर्बलिर्बद्धो महात्मना ॥ ८
क्रियाभ्युपायपूर्वं वै हिरण्याक्षो महासुरः ।
हिरण्यकशिपुश्चैव क्रिययैव निषूदितौ ॥ ९
वृत्रश्च निहतो राजन्क्रिययैव महाबलः ।
तथा पौलस्त्यतनयो रावणो नाम राक्षसः ।
रामेण निहतो राजन्सानुबन्धः सहानुगः ॥ १०
क्रियया योगमास्थाय तथा त्वमपि विक्रम ॥ ११
क्रियाभ्युपायैर्निहतौ मया राजन्पुरातनौ ।
तारकश्च महादैत्यो विप्रचित्तिश्च वीर्यवान् ॥१२
वातापिरिल्वलश्चैव त्रिशिराश्च तथा विभो ।
सुन्दोपसुन्दावसुरौ क्रिययैव निषूदितौ ॥ १३
क्रियाभ्युपायैरिन्द्रेण त्रिदिवं भुज्यते विभो ।
क्रिया बलवती राजन्नान्यत्किंचिद्युधिष्ठिर ॥ १४
दैत्याश्च दानवाश्चैव राक्षसाः पार्थिवास्तथा ।
क्रियाभ्युपायैर्निहताः क्रियां तस्मात्समाचर ॥१५
सञ्जय उवाच ।
इत्युक्तो वासुदेवेन पाण्डवः संशितव्रतः ।
जलस्थं तं महाराज तव पुत्रं महाबलम् ।
अभ्यभाषत कौन्तेयः प्रहसन्निव भारत ॥ १६
सुयोधन किमर्थोऽयमारम्भोऽप्सु कृतस्त्वया ।
सर्वं क्षत्रं घातयित्वा स्वकुलं च विशांपते ॥ १७
जलाशयं प्रविष्टोऽद्य वाञ्छञ्जीवितमात्मनः ।
उत्तिष्ठ राजन्युध्यस्व सहास्माभिः सुयोधन ॥१८
स ते दर्पो नरश्रेष्ठ स च मानः क्व ते गतः ।
यस्त्वं संस्तभ्य सलिलं भीतो राजन्व्यवस्थितः १९
सर्वे त्वां शूर इत्येवं जना जल्पन्ति संसदि ।
व्यर्थं तद्भवतो मन्ये शौर्यं सलिलशायिनः ॥ २०
उत्तिष्ठ राजन्युध्यस्व क्षत्रियोऽसि कुलोद्भवः ।
कौरवेयो विशेषेण कुलं जन्म च संस्मर ॥ २१
स कथं कौरवे वंशे प्रशंसञ्जन्म चात्मनः ।
युद्धात्रस्ततरस्तोयं प्रविश्य प्रतितिष्ठसि ॥ २२
अयुद्धेन व्यवस्थानं नैष धर्मः सनातनः ॥ २३
अनार्यजुष्टमस्वर्ग्यं रणे राजन्पलायनम् ।
कथं पारमगत्वा हि युद्धे त्वं वै जिजीविषुः ॥ २४
इमान्निपतितान्दृष्ट्वा पुत्रान्भ्रातॄन्पितॄंस्तथा ।
संबन्धिनो वयस्यांश्च मातुलान्बान्धवांस्तथा ।
घातयित्वा कथं तात ह्रदे तिष्ठसि सांप्रतम् ॥२५
शूरमानी न शूरस्त्वं मृषा वदसि भारत ।
शूरोऽहमिति दुर्बुद्धे सर्वलोकस्य शृण्वतः ॥ २६
न हि शूराः पलायन्ते शत्रून्दृष्ट्वा कथंचन ।
ब्रूहि वा त्वं यया वृत्त्या शूर त्यजसि संगरम् ॥२७
स त्वमुत्तिष्ठ युध्यस्व विहाय भयमात्मनः ।
घातयित्वा सर्वसैन्यं भ्रातॄंश्चैव सुयोधन ॥ २८
नेदानीं जीविते बुद्धिः कार्या धर्मचिकीर्षया ।
क्षत्रधर्ममुपाश्रित्य त्वद्विधेन सुयोधन ॥ २९
यत्तु कर्णमुपाश्रित्य शकुनिं चापि सौबलम् ।
दुःशासनं च मोहात्त्वमात्मानं नावबुद्धवान् ॥३०
तत्पापं सुमहत्कृत्वा प्रतियुध्यस्व भारत ।
कथं हि त्वद्विधो मोहाद्रोचयेत पलायनम् ॥ ३१
क्व ते तत्पौरुषं यातं क्व च मानः सुयोधन ।
क्व च विक्रान्तता याता क्व च विस्फूर्जितं महत् ३२
क्व ते कृतास्त्रता याता किं नु शेषे जलाशये ।
स त्वमुत्तिष्ठ युध्यस्व क्षत्रधर्मेण भारत ॥ ३३
अस्मांस्तु वा पराजित्य प्रशाधि पृथिवीमिमाम् ।
अथवा निहतोस्माभिर्भूमौ स्वप्स्यसि भारत ॥ ३४
एष ते परमो धर्मः सृष्टो धात्रा महात्मना ।
तं कुरुष्व यथातथ्यं पौरुषे स्वे व्यवस्थितः ॥ ३५

मायया एव सुयोधन इति क पाठ ॥ ७ ॥ विक्रम विक्रम कुरुष्व क्रियया योगमास्थाय हतस्त्वाष्ट्रोऽपि विक्रमात् इति क पाठः ॥ ११ ॥ क्रियाभ्युपायैर्निहतो मयो नाम महासुरः । इति क. पाठ. ॥ १२ ॥ हे शूरेति साधिक्षेपसंबोधनम् । यया वृत्त्या निमित्तभूतया । वानप्रस्थत्वेन वा न्यस्तशस्त्रत्वेन वा क्लीबत्वेन वा त्व सगर त्यजसि ता वृत्तिं ब्रूहि । न त्व वानप्रस्थोऽसि राज्यार्थित्वात् । नापि न्यस्तशस्त्रो गदाधारित्वात् । परिशेषात् क्लीबोऽस्मीति मा भाषस्व । युद्ध कुर्वित्ति भाव ॥ २७ ॥ पौरुष यत्न । विक्रान्तता शौर्यम् । विस्फूर्जित गर्जनम् ॥ ३२ ॥

सञ्जय उवाच ।
एवमुक्तो महाराज धर्मपुत्रेण धीमता ।
सलिलस्थस्तव सुत इदं वचनमब्रवीत् ॥ ३६
नैतच्चित्रं महाराज यद्भीः प्राणिनमाविशेत् ।
न च प्राणभयाद्भीतो व्यपयातोऽसि भारत ॥३७
अरथश्चानिषङ्गी च निहतः पार्ष्णिसारथिः ।
एकश्चाप्यगणः सङ्ख्ये प्रत्याश्वासमरोचयम् ॥ ३८
न प्राणहेतोर्न भयान्न विषादाद्विशांपते ।
इदमम्भः प्रविष्टोऽसि श्रमाच्चिदमनुष्ठितम् ॥३९
त्वं चाश्वसिहि कौन्तेय ये चाप्यनुगतास्तव ।
अहमुत्थाय वः सर्वान्प्रतियोत्स्यामि संयुगे ॥ ४०
युधिष्ठिर उवाच ।
आश्वस्ता एव सर्वे स्म चिरं त्वां मृगयामहे ।
तदिदानीं समुत्तिष्ठ युध्यस्वेह सुयोधन ॥ ४१
हत्वा वा समरे पार्थान्स्फीतं राज्यमवाप्नुहि ।
निहतो वा रणेऽस्माभिर्वीरलोकमवाप्स्यसि ॥ ४२
दुर्योधन उवाच ।
यदर्थं राज्यमिच्छामि कुरूणां कुरुनन्दन ।
त इमे निहताः सर्वे भ्रातरो मे जनेश्वर ॥ ४३
क्षीणरत्नां च पृथिवीं हतक्षत्रियपुङ्गवाम् ।
न ह्युत्सहाम्यहं भोक्तुं विधवामिव योषितम् ॥ ४४
अद्यापि त्वहमाशंसे त्वां विजेतुं युधिष्ठिर ।
भङ्क्त्वा पाञ्चालपाण्डूनामुत्साहं भरतर्षभ ४५
न त्विदानीमहं मन्ये कार्यं युद्धेन कर्हिचित् ।
द्रोणे कर्णे च संशान्ते निहते च पितामहे ॥ ४६
अस्त्विदानीमियं राजन्केवला पृथिवी तव ।
असहायो हि को राजा राज्यमिच्छेत्प्रशासितुम् ४७
सुहृदस्तादृशान्हत्वा पुत्रान्भ्रातॄन्पितॄनपि ।
भवद्विश्च हृते राज्ये को नु जीवेत मादृशः ॥ ४८
अहं वनं गमिष्यामि ह्यजिनैः प्रतिवासितः ।
रतिर्हि नास्ति मे राज्ये हतपक्षस्य भारत ॥ ४९
हतबान्धवभूयिष्ठा हताश्वा हतकुञ्जरा ।
एषा ते पृथिवी राजन्मुङ्क्ष्वैनां विगतज्वरः ॥ ५०
वनमेव गमिष्यामि वसानो मृगचर्मणी ।
न हि मे निर्जनस्यास्ति जीवितेऽद्य स्पृहा विभो ॥
गच्छ त्वं भुङ्क्ष्व राजेन्द्र पृथिवीं निहतेश्वराम् ।
हतयोधां नष्टरत्नां शीर्णक्षत्रां यथासुखम् ॥ ५२
[सञ्जय उवाच ।
दुर्योधनं तव सुतं सलिलस्थं महायशाः ।
श्रुत्वा तु करुणं वाक्यमभाषत युधिष्ठिरः ॥] ५३
युधिष्ठिर उवाच ।
आर्तप्रलापान्मा तात सलिलस्थः प्रभाषथाः ।
नैतन्मनसि मे राजन्वाशितं शकुनेरिव ॥ ५४
यदि वापि समर्थः स्यास्त्वं दानाय सुयोधन ।
नाहमिच्छेयमवनिं त्वया दत्तां प्रशासितुम् ॥ ५५
अधर्मेण न गृह्णीयां त्वया दत्तां महीमिमाम् ।
न हि धर्मः स्मृतो राजन्क्षत्रियस्य प्रतिग्रहः ॥ ५६
त्वया दत्तां न चेच्छेयं पृथिवीमखिलामहम् ।
त्वां तु युद्धे विनिर्जित्य भोक्ताऽसि वसुधामिमाम्
अनीश्वरश्च पृथिवीं कथं त्वं दातुमिच्छसि ।
त्वयेयं पृथिवी राजन्किं न दत्ता तदैव हि ॥ ५८
धर्मतो याचमानानां प्रशमार्थं कुलस्य नः ।
वार्ष्णेयं प्रथमं राजन्प्रत्याख्याय महाबलम् ॥ ५९
किमिदानीं ददासि त्वं को हि ते चित्तविभ्रमः ।
अभियुक्तस्तु को राजा दातुमिच्छेद्धि मेदिनीं ६०
न त्वमद्य महीं दातुमीशः कौरवनन्दन ।
आच्छेत्तुं वा बलाद्राजन्स कथं दातुमिच्छसि ॥६१
मां तु निर्जित्य संग्रामे पालयेमां वसुंधराम् ।
सूच्यग्रेणापि यद्भूमेरपि भिद्येत भारत ॥ ६२
तन्मात्रमपि तन्मह्यं न ददाति पुरा भवान् ।
स कथं पृथिवीमेतां प्रददासि विशांपते ॥ ६३
सूच्यग्रं नात्यजः पूर्वं स कथं त्यजसि क्षितिम् ६४
एवमैश्वर्यमासाद्य प्रशास्य पृथिवीमिमाम् ।
को हि मूढो व्यवस्येत शत्रोर्दातुं वसुंधराम् ॥ ६५
त्वं तु केवलमौर्ख्येण विमूढो नावबुध्यसे ।
पृथिवीं दातुकामोऽपि जीवंस्त्वं नैव मोक्ष्यसे ६६

हतापत्यस्य भारत इति क पाठ. ॥ ४९ ॥ निहतत्विषमिति क. ङ पाठ. ॥ ५२ ॥ एकत्रिंशोऽध्यायः ॥ ३१ ॥

अस्मान्वा त्वं पराजित्य प्रशाधि पृथिवीमिमाम् ।
अथवा निहतोऽस्माभिर्व्रज लोकाननुत्तमान्॥६७
आवयोर्जीवतो राजन्मयि च त्वयि च ध्रुवम् ।
संशयः सर्वभूतानां विजये नौ भविष्यति ॥ ६८
जीवितं त्वयि दुष्प्रापं मयि यत्परिवर्तते ।
जीवेयमहं कामं न तु त्वं जीवितुं क्षमः ॥ ६९
दहने हि कृतो यत्नस्त्वयाऽस्मासु विशेषतः ।
आशीविषैर्विषैश्चापि जले चापि प्रवेशनैः ।
त्वया विनिकृता राजन्राज्यस्य हरणेन च॥ ७०
अप्रियाणां च वचनैर्द्रौपद्याः कर्षणेन च ।
एतस्मात्कारणात्पाप जीवितं ते न विद्यते ॥ ७१
उत्तिष्ठोत्तिष्ठ युध्यस्व युद्धे श्रेयो भविष्यति॥७२
एवं तु विविधा वाचो जययुक्ताः पुनःपुनः ।
कीर्तयन्ति स्म ते वीरास्तत्रतत्र जनाधिप॥ ७३

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि अष्टादशदिवसयुद्धे एकत्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः ॥ ३२ ॥

युधिष्ठिरकटुभाषणरुष्टेन सुयोधनेन गदयासह ह्रदादुत्थानम् ॥ १ ॥ युधिष्ठिरदुर्योधनयोः संवादः ॥ २ ॥

धृतराष्ट्र उवाच ।
एवं संतर्ज्यमानस्तु मम पुत्रो महीपतिः ।
प्रकृत्या मन्युमान्वीरः कथमासीत्परंतपः ॥ १
न हि संतर्जना तेन श्रुतपूर्वा कथंचन ।
राजभावेन मान्यश्च सर्वलोकस्य सोऽभवत् ॥ २
[यस्यातपत्रच्छायापि स्वका भानोस्तथा प्रभा ।
खेदायैवाभिमानित्वात्सहेत्सैवं कथं गिरः ॥] ३
इयं च पृथिवी सर्वा सम्लेच्छाटविका भृशम् ।
प्रसादाद्भियते यस्य प्रत्यक्षं तव सञ्जय ॥ ४
स तथा तर्ज्यमानस्तु पाण्डुपुत्रैर्विशेषतः ।
विहीनश्च स्वकैर्भृत्यैर्निर्जने चावृतो भृशम् ॥ ५
स श्रुत्वा कटुका वाचो जययुक्ताः पुनःपुनः ।
किमब्रवीत्पाण्डवेयांस्तन्ममाचक्ष्व सञ्जय ॥ ६
सञ्जय उवाच ।
तर्ज्यमानस्तदा राजन्नुदकस्थस्तवात्मजः ।
युधिष्ठिरेण राजेन्द्र भ्रातृभिः सहितेन ह ॥ ७
श्रुत्वा स कटुका वाचो विषमस्थो नराधिपः ।
दीर्घमुष्णं च निःश्वस्य सलिलस्थः पुनःपुनः ॥८
सलिलान्तर्गतो राजा धुन्वन्हस्तौ पुनःपुनः ।
मनश्चकार युद्धाय राजानं चाभ्यभाषत ॥ ९
यूयं समुहृदः पार्थाः सर्वे सरथवाहनाः ।
अहमेकः परिद्यूनो विरथो हतवाहनः ॥ १०
आत्तशस्त्रै रथोपेतैर्बहुभिः परिवारितः ।
कथमेकः पदातिः सन्नशस्त्रो योद्धुमुत्सहे ॥ ११
एकैकशश्च मां यूयं योधयध्वं युधिष्ठिर ।
न ह्येको बहुभिर्वीरैर्न्याय्यो योधयितुं युधि ॥ १२
विशेषतो विकवचः श्रान्तश्चापत्समाश्रितः ।
भृशं विक्षतगात्रश्च श्रान्तवाहनसैनिकः ॥ १३
न मे त्वत्तो भयं राजन्न च पार्थाद्वृकोदरात् ।
फल्गुनाद्वासुदेवाद्वा पाञ्चालेभ्योऽथवा पुनः १४
यमाभ्यां युयुधानाद्वा ये चान्ये तव सैनिकाः ।
एकः सर्वानहं क्रुद्धो वारयिष्ये युधि स्थितः॥१५
धर्ममूला सतां कीर्तिर्मनुष्याणां जनाधिप ।
धर्मं चैवेह कीर्तिं च पालयन्प्रब्रवीम्यहम् ॥ १६
अहमुत्थाय सर्वान्वै प्रतियोत्स्यामि संयुगे ।
अन्वभ्याशं गतान्सर्वान्निहनिष्यामि भारत ॥१७
अद्य वः सरथान्साश्वानशस्त्रो विरथोऽपि सन् ।
नक्षत्राणीव सर्वाणि सविता रात्रिसंक्षये ॥ १८
तेजसा नाशयिष्यामि स्थिरीभवत पाण्डवाः ।
अद्यानृण्यं गमिष्यामि क्षत्रियाणां यशस्विनां १९
बाह्लीकद्रोणभीष्माणां कर्णस्य च महात्मनः ।
जयद्रथस्य शूरस्य भगदत्तस्य चोभयोः ॥ २०
मद्रराजस्य शल्यस्य भूरिश्रवस एव च ।
पुत्राणां भरतश्रेष्ठ शकुनेः सौबलस्य च ॥ २१

आतपत्रेण दुर्योधन. सूर्यादृक्षित इत्येष प्रवादोऽपि यस्य न स इति भाव ॥ ३ ॥ परिद्यून. परिश्रान्तः ॥ १० ॥

मित्राणां सुहृदां चैव बान्धवानां तथैव च ।
आनृण्यमद्य गच्छामि हत्वा त्वां भ्रातृभिः सह २२
सञ्जय उवाच ।
एतावदुक्त्वा वचनं विरराम जनाधिपः ।
'सलिलान्तर्गतः श्रीमान्पुत्रो दुर्योधनस्तव ॥' २३
युधिष्ठिर उवाच ।
दिष्ट्या त्वमपि जानीषे क्षत्रधर्मं सुयोधन ।
दिष्ट्या ते वर्तते बुद्धिर्युद्धायैव महाभुज ॥ २४
दिष्ट्या शूरोऽसि गान्धारे दिष्ट्या जानासि संगरम्।
यस्त्वमेको हि नः सर्वान्संगरे योद्धुमिच्छसि ॥ २५
एक एकेन संगम्य यत्ते संमतमायुधम् ।
तच्चमादाय युध्यस्व प्रेक्षकास्ते वयं स्थिताः ॥ २६
अयमिष्टं च ते कामं वीर भूयो ददाम्यहम् ।
हत्वैकं भव नो राजा हतो वा स्वर्गमाप्नुहि ॥ २७
दुर्योधन उवाच ।
एकश्चेद्योद्धुमाक्रन्दे वरोऽद्य मम दीयताम् ।
आयुधानामियं चापि मता मे सततं गदा ॥ २८
भ्रातॄणां भवतामेकः शक्यं मां योऽभिमन्यते ।
पदातिर्गदया सङ्ख्ये स युध्यतु मया सह ॥ २९
वृत्तानि रथयुद्धानि विचित्राणि पदेपदे ।
इदमेकं गदायुद्धं भवत्वद्याद्भुतं महत् ॥ ३०
अन्नानामपि पर्यायं कर्तुमिच्छन्ति मानवाः ।
युद्धानामपि पर्यायो भवत्वनुमते तव ॥ ३१
गदया त्वां महाबाहो विजेष्यामि सहानुजम् ।
पाञ्चालान्सृञ्जयांश्चैव ये चान्ये तव सैनिकाः ।
न हि मे संभ्रमो जातु शक्रादपि युधिष्ठिर ॥ ३२
युधिष्ठिर उवाच ।
उत्तिष्ठोत्तिष्ठ गान्धारे मां योधय सुयोधन ।
एक एकेन संगम्य संयुगे गदया बली ॥ ३३
पुरुषो भव गान्धारे युध्यस्व सुसमाहितः ।
अद्य ते जीवितं नास्ति यदीन्द्रोऽपि तवाश्रयः ॥ ३४
सञ्जय उवाच ।
एतत्स नरशार्दूलो नामृष्यत तवात्मजः ।
सलिलान्तर्गतः श्वभ्रे महानाग इव श्वसन् ॥ ३५
तथाऽसौ वाक्प्रतोदेन तुद्यमानः पुनःपुनः ।
वचो न ममृषे राजन्नुत्तमाश्वः कशामिव ॥ ३६
संक्षोभ्य सलिलं वेगाद्गदामादाय वीर्यवान् ।
अद्रिसारमयीं गुर्वीं काञ्चनाङ्गदभूषणाम् ।
अन्तर्जलात्समुत्तस्थौ नागेन्द्र इव निःश्वसन् ॥ ३७
स भित्त्वा स्तम्भितं तोयं स्कन्धे कृत्वायसीं गदाम्।
उदतिष्ठत पुत्रस्ते प्रतपन्रश्मिवानिव ॥ ३८
ततः शैक्यायसीं गुर्वीं जातरूपपरिष्कृताम् ।
गदां परामृशद्धीमान्धार्तराष्ट्रो महाबलः ॥ ३९
गदाहस्तं तु तं दृष्ट्वा सशृङ्गमिव पर्वतम् ।
प्रजानामिव संक्रुद्धं शूलपाणिमिव स्थितम् ॥ ४०
सँगदो भारतो भाति प्रतपन्भास्करो यथा ॥ ४१
तमुत्तीर्णं महाबाहुं गदाहस्तमरिंदमम् ।
मेनिरे सर्वभूतानि दण्डपाणिमिवान्तकम् ॥ ४२
वज्रहस्तं यथा शक्रं शूलहस्तं यथा हरम् ।
ददृशुः सर्वपाञ्चालाः पुत्रं तव जनाधिप ॥ ४३
तमुत्तीर्णं तु संप्रेक्ष्य समहृष्यन्त सर्वशः ।
पाञ्चालाः पाण्डवेयाश्च तेऽन्योन्यस्य तलान्ददुः ॥
अवहासं तु तं मत्वा पुत्रो दुर्योधनस्तव ।
उद्वृत्य नयने क्रुद्धो दिधक्षुरिव पाण्डवान् ॥ ४५
त्रिशिखां भ्रुकुटीं कृत्वा संदष्टदशनच्छदः ।
प्रत्युवाच ततस्तान्वै पाण्डवान्सह केशवान् ॥ ४६
दुर्योधन उवाच ।
अस्यावहासस्य फलं प्रतिभोक्ष्यथ पाण्डवाः ।
गमिष्यथ हताः सद्यः सपाञ्चाला यमक्षयम् ॥ ४७
सञ्जय उवाच ।
उत्थितश्च जलात्तस्मात्पुत्रो दुर्योधनस्तव ।
अतिष्ठत गदापाणी रुधिरेण समुक्षितः ॥ ४८
तस्य शोणितदिग्धस्य सलिलेन समुक्षितम् ।
शरीरं स्म तदा भाति स्रवन्निव महीधरः ॥ ४९
तमुद्यतगदं वीरं मेनिरे तत्र पाण्डवाः ।
वैवस्वतमिव क्रुद्धं शूलपाणिमिव स्थितम् ॥ ५०

नः अस्माक पञ्चाना मध्ये एकमपि हत्वा त्व राजा भवेत्यन्वय ॥ २७ ॥ अद्य ते जीवितं नास्ति यद्यपि त्वं मनोजव.

इति क ङ पाठ. ॥ ३४ ॥

स मेघनिनदो हर्षान्नर्दन्निव च गोवृषः ।
आजुहाव ततः पार्थान्गदया युधि वीर्यवान् ॥५१
दुर्योधन उवाच ।
एकैकेन च मां यूयमासीदत युधिष्ठिर ।
न ह्येको बहुभिर्न्याय्यो वीरो योधयितुं युधि ॥५२
न्यस्तवर्मा विशेषेण श्रान्तश्चाप्सु परिप्लुतः ।
भृशं विक्षतगात्रश्च हतवाहनसैनिकः ॥ ५३
[अवश्यमेव योद्धव्यं सर्वैरेव मया सह ।
युक्तं त्वयुक्तमित्येतद्वेत्सि त्वं चैव सर्वदा ॥]५४
युधिष्ठिर उवाच ।
मा भूदियं तव प्रज्ञा कथमेकं सुयोधन ।
यदाऽभिमन्युं बहवो जघ्नुर्युधि महारथाः ॥ ५५
[क्षत्रधर्मं भृशं क्रूरं निरपेक्षं सुनिर्घृणम् ।
अन्यथा तु कथं हन्युरभिमन्युं तथागतम् ॥ ५६
सर्वे भवन्तो धर्मज्ञाः सर्वे शूरास्तनुत्यजः ।
न्यायेन युध्यतां प्रोक्ता शक्रलोकगतिः परा॥५७
यद्येकस्तु न हन्तव्यो बहुभिर्धर्म एव तु ।
तदाऽभिमन्युं बहवो निजघ्नुस्त्वन्मते कथम् ॥५८
सर्वो विमृशते जन्तुः कृच्छ्रस्थो धर्मदर्शनम् ।
पदस्थः पिहितं द्वारं परलोकस्य पश्यति ॥] ५९
आमुञ्च कवचं वीर मूर्धजान्यमयस्व च ।
यच्चान्यदपि ते नास्ति तदप्यादत्स्व भारत ॥ ६०
इममेकं च ते कामं वीर भूयो ददाम्यहम् ।
पञ्चानां पाण्डवेयानां येन त्वं योद्धुमिच्छसि ॥६१
तं हत्वा वै भवान्राजा हतो वा स्वर्गमाप्नुहि ।
ऋते च जीविताद्वीर युद्धे किं कुर्म ते प्रियम् ॥६२
सञ्जय उवाच ।
ततस्तव सुतो राजन्वर्म जग्राह काञ्चनम् ।
विचित्रं च शिरस्त्राणं जाम्बूनदपरिष्कृतम् ॥ ६३
सोऽवबद्धशिरस्त्राणः शुभकाञ्चनवर्मभृत् ।
रराज राजन्पुत्रस्ते काञ्चनः शैलराडिव ॥ ६४
सन्नद्धः सगदो राजन्सज्जः संग्राममूर्धनि ।
अब्रवीत्पाण्डवान्सर्वान्पुत्रो दुर्योधनस्तव ॥ ६५
भ्रातॄणां भवतामेको युध्यतां गदया मया ।
सहदेवेन वा योत्स्ये भीमेन नकुलेन वा ॥ ६६
अथवा फल्गुनेनाद्य त्वया वा भरतर्षभ ।
योत्स्येऽहं संगरं प्राप्य विजेष्ये च रणाजिरे ॥६७
अहमद्य गमिष्यामि वैरस्यान्तं सुदुर्गमम् ।
गदया पुरुषव्याघ्र हेमपट्टनिबद्धया ॥ ६८
गदायुद्धे न मे कश्चित्सदृशोऽस्तीति चिन्तये ।
गदया वो हनिष्यामि सर्वानेव समागतान् ॥६९
[न मे समर्थाः सर्वे वै योद्धुं न्यायेन केचन ।
न युक्तमात्मना वक्तुमेवं गर्वोद्धतं वचः ।
अथवा सफलं ह्येतत्करिष्ये भवतां पुरः ॥ ७०
अस्मिन्मुहूर्ते सत्यं वा मिथ्या वै तद्भविष्यति ।]
गृह्णातु च गदां यो वै योत्स्यतेऽद्य मया सह ॥ ७१

॥ इति श्रीमन्महाभारते शल्यपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

युधिष्ठिरेण दुर्योधनंप्रति स्वेष्वन्यतमपराजयेनापि तस्य राज्यप्राप्तिवचने कृष्णेन तंप्रति सकोपं भीमेनापि दुर्योधनपराजये स्वस्य संशयोक्तिः ॥ १ ॥ भीमेन कृष्णंप्रति स्वसामर्थ्यप्रकथनपूर्वकं स्वेन दुर्योधनवधस्य सुकरत्वे कथिते कृष्णादिभिस्तत्प्रशसनम् ॥ २ ॥ भीमदुर्योधनयोर्वीरवादपूर्वकं युद्धोद्यमः ॥ ३ ॥

सञ्जय उवाच ।
एवं दुर्योधने राजन्गर्जमाने मुहुर्मुहुः ।
युधिष्ठिरस्य संक्रुद्धो वासुदेवोऽब्रवीदिदम् ॥ १
यदि नाम ह्ययं युद्धे वरयेत्त्वां युधिष्ठिर ।
अर्जुनं नकुलं चैव सहदेवमथापि वा ॥ २
किमिदं साहसं राजंस्त्वया व्याहृतमीदृशम् ।

क्षत्रधर्मं अस्तीति शेषः । धर्मोऽस्त्री पुण्यआचारे इति मेदिनी

॥ ५६ ॥ द्वात्रिंशोऽध्यायः ॥ ३२ ॥

एकमेव निहत्याजौ भव राजा कुरुष्विति ॥ ३
एतेन हि कृता योग्या वर्षाणीह त्रयोदश ।
आयसे पुरुषे राजन्भीमसेनजिघांसया । ४
कथं नाम भवेत्कार्यमस्माद्धि भरतर्षभ ।
साहसं कृतवांस्त्वं तु ह्यनुक्रोशान्नृपोत्तम ॥ ५
नान्यमस्यानुपश्यामि प्रतियोद्धारमाहवे ।
ऋते वृकोदरात्पार्थात्स च नातिकृतश्रमः ॥ ६
तदिदं द्यूतमारब्धं पुनरेव यथा पुरा ।
विषमं शकुनेश्चैव तव चैव विशेषतः ॥ ७
बली भीमः समर्थश्च कृती राजा सुयोधनः ।
बलवान्वा कृती वेति कृती राजन्विशिष्यते ॥ ८
सोऽयं राजंस्त्वया शत्रुः समे पथि निवेशितः ।
न्यस्तश्चात्मा सुविषमे कृच्छ्रमापादिता वयम् ॥ ९
कोऽनु सर्वान्विनिर्जित्य शत्रूनेकेन वैरिणा ।
[कृच्छ्रप्राप्तेन च तथा हारयेद्राज्यमागतम् ।]
पातितश्चैकबाणेन शोचयेदेवमाहवे ॥ १०
न हि पश्यामि तं लोके योऽद्य दुर्योधनं रणे ।
गदाहस्तं विजेतुं वै शक्तः स्यादमरोपि हि ॥ ११
फल्गुनो वा भवान्वाथ माद्रीपुत्रावथापि वा ।
न समर्थानहं मन्ये गदाहस्तस्य संयुगे ॥ १२
न त्वं भीमो न नकुलः सहदेवोऽथ फल्गुनः ।
जेतुं न्यायेन शक्तो वै कृती राजा सुयोधनः १३
स कथं वदसे शत्रुं युध्यस्व गदयेति हि ।
एकं च नो निहत्याजौ भव राजेति भारत ॥१४
वृकोदरं समासाद्य संशयो वै जये हि नः ।
न्यायतो युध्यमानानां कृती ह्येष महाबलः॥१५
[नूनं न राज्यभागेषा पाण्डोः कुन्त्याश्च संततिः ।
अत्यन्तवनवासाय सृष्टा भैक्ष्याय वा पुनः ॥] १६
भीमसेन उवाच ।
मधुसूदन माकार्षीर्विषादं यदुनन्दन ।
अद्य पारं गमिष्यामि वैरस्य भृशदुर्गमम् ॥ १७
अहं सुयोधनं सङ्ख्ये हनिष्यामि न संशयः ।
विजयो वै ध्रुवः कृष्ण धर्मराजस्य दृश्यते ॥ १८
अध्यर्धेन गुणेनेयं गदा गुरुतरी मम ।
न तथा धार्तराष्ट्रस्य माकार्षीर्माधव व्यथाम् ॥१९
अनया गदया चाहं संयुगे योद्धुमुत्सहे ।
भवन्तः प्रेक्षकाः सर्वे मम सन्तु जनार्दन ॥ २०
सामरानपि लोकांस्त्रीन्नानाशस्त्रधरान्युधि ।
योधयेयं रणे कृष्ण किमुताद्य सुयोधनम् ॥ २१
सञ्जय उवाच ।
तथा संभाषमाणं तु वासुदेवो वृकोदरम् ।
हृष्टः संपूजयामास वचनं चेदमब्रवीत् ॥ २२
त्वामाश्रित्य महाबाहो धर्मराजो युधिष्ठिरः ।
निहतारिः स्वकां दीप्तां श्रियं प्राप्नोत्यसंशयम् ॥ २३
त्वया विनिहताः सर्वे धृतराष्ट्रसुता रणे ।
राजानो राजपुत्राश्च नागाश्च विनिपातिताः ॥ २४
कलिङ्गा मागधाः प्राच्या गान्धाराः कुरवस्तथा ।
त्वामासाद्य महायुद्धे निहताः पाण्डुनन्दन ॥ २५
हत्वा दुर्योधनं चापि प्रयच्छोर्वीं ससागराम् ।
धर्मराजाय कौन्तेय यथा विष्णुः शचीपतेः ॥२६
त्वां च प्राप्य रणे पापो धार्तराष्ट्रो विनङ्क्ष्यति ।
त्वमस्य सक्थिनी भंक्त्वा प्रतिज्ञां पालयिष्यसि२७
यत्नेन ह त्वया पापो योद्धव्यो धृतराष्ट्रजः ।
कृती च बलवांश्चैव युद्धशौण्डश्च नित्यदा ॥ २८
ततस्तु सात्यकी राजन्पूजयामास पाण्डवम् ।
विविधाभिश्च तं वाग्भिर्भीमसेनं जनेश्वर ॥ २९
पाञ्चालाः पाण्डवेयाश्च धर्मराजपुरोगमाः ।
तद्वचो भीमसेनस्य सर्व एवाभ्यपूजयन् ॥ ३०
ततो भीमबलो भीमो युधिष्ठिरमथाब्रवीत् ।
सृञ्जयैः सह तिष्ठन्तं तपन्तमिव भास्करम् ॥ ३१
अहमेतेन संगम्य संयुगे योद्धुमुत्सहे ।
न हि शक्तो रणे जेतुं मामेष पुरुषाधमः ॥ ३२
अद्य क्रोधं विमोक्ष्यामि निहितं हृदये भृशम् ।
सुयोधने धार्तराष्ट्रे खाण्डवेऽग्निमिवार्जुनः ॥ ३३
शल्यमद्योद्धरिष्यामि तव पाण्डव हृच्छयम् ।
निहते गदया पापे अद्य राजन्सुखी भव ॥ ३४

योग्या अभ्यास । योग्य प्रवीणेत्याद्युपक्रम्य रुग्भ्यासार्कयोषितोरिति मेदिनी ॥ ४ ॥ शकुनेश्च तव च यथापुरा तथैवेदमिति सबन्ध ॥ ७ ॥ पणित्वा चैकपाणेन रोचयेदेव माहवम् इति झ. पाठ. ॥ १० ॥ त्रयस्त्रिंशोऽध्याय. ॥ ३३ ॥

अद्य कीर्तिमयीं मालां प्रतिमोक्ष्ये तवानघ ।
प्राणाञ्श्रियं च राज्यं च मोक्ष्यतेऽद्य सुयोधनः ३५
राजा च धृतराष्ट्रोऽद्य श्रुत्वा पुत्रं मया हतम् ।
स्मरिष्यत्यशुभं कर्म यत्तच्छकुनिबुद्धिजम् ॥ ३६
इत्युक्त्वा भरतश्रेष्ठो गदामुद्यम्य वीर्यवान् ।
उदतिष्ठत युद्धाय शक्रो वृत्रमिवाह्वयन् ॥ ३७
[तदाह्वानममृष्यन्वै तव पुत्रोऽतिवीर्यवान् ।
प्रत्युपस्थित एवाशु मत्तो मत्तमिव द्विपम् ॥ ३८
गदाहस्तं तव सुतं युद्धाय समुपस्थितम् ।
ददृशुः पाण्डवाः सर्वे कैलासमिव शृङ्गिणम् ॥] ३९
तमेकाकिनमासाद्य धार्तराष्ट्रं महाबलम् ।
वियूथमिव मातङ्गं समहृष्यन्त पाण्डवाः ॥ ४०
[न संभ्रमो न च भयं न च ग्लानिर्न च व्यथा ।
आसीद्दुर्योधनस्यापि स्थितः सिंह इवाहवे ॥] ४१
समुद्यतगदं दृष्ट्वा कैलासमिव शृङ्गिणम् ।
भीमसेनस्तदा राजन्दुर्योधनमथाब्रवीत् ॥ ४२
राज्ञापि धृतराष्ट्रेण त्वया चास्मासु यत्कृतम् ।
स्मर तद्दुष्कृतं कर्म यद्द्यूतं वारणावते ॥ ४३
द्रौपदी च परामृष्टा सभामध्ये रजस्वला ।
द्यूते च वञ्चितो राजा शकुनेर्बुद्धिलाघवात् ॥ ४४
यानि चान्यानि दुष्टात्मन्पापानि कृतवानसि ।
अनागःसु च पार्थेषु तस्य पश्य महत्फलम् ॥ ४५
त्वत्कृते निहतः शेते शरतल्पे महायशाः ।
गाङ्गेयो भरतश्रेष्ठः सर्वेषां नः पितामहः ॥ ४६
हतो द्रोणश्च कर्णश्च हतः शल्यः प्रतापवान् ।
वैराग्नेरादिकर्ता च शकुनिर्निहतो रणे ॥ ४७
भ्रातरस्ते हताः शूराः पुत्राश्च सहसैनिकाः ।
राजानश्च हताः शूराः समरेष्वनिवर्तिनः ॥ ४८
एते चान्ये च निहता बहवः क्षत्रियर्षभाः ।
प्रातिकामी तथा पापो द्रौपद्याः क्लेशकृद्धतः ४९
अवशिष्टस्त्वमेवैकः कुलघ्नोऽधमपूरुषः ।
त्वामप्यद्य हनिष्यामि गदया नात्र संशयः ॥५०
अद्य तेऽहं रणे दर्पं सर्वं नाशयिता नृप ।
राज्याशां विपुलां चापि पाण्डवेषु च दुष्कृतम् ५१
दुर्योधन उवाच ।
किं कत्थितेन बहुना युध्यस्वाद्य मया सह ।
अद्य तेऽहं विनेष्यामि युद्धश्रद्धां वृकोदर ॥ ५२
किं न पश्यसि मां पाप गदायुद्धे व्यवस्थितम् ।
हिमवच्छिखराकारां प्रगृह्य महतीं गदाम् ॥ ५३
गदिनं कोऽद्य मां पाप हन्तुमुत्सहते रिपुः ।
न्यायतो युध्यमानश्च देवेष्वपि पुरंदरः ॥ ५४
मा वृथा गर्ज कौन्तेय शारदाभ्रमिवाजलम् ।
दर्शयस्व बलं युद्धे यावन्नासून्निहन्मि ते ॥ ५५
तस्य तद्वचनं श्रुत्वा पाण्डवाः सहसञ्जयाः ।
सर्वे संपूजयामासुस्तद्वचो विजिगीषवः ॥ ५६
उन्मत्तमिव मातङ्गं तलशब्देन मानवाः ।
भूयः संहर्षयामासू राजन्दुर्योधनं द्विषः ॥ ५७
बृंहन्ति कुञ्जरास्तत्र हया हेषन्ति चासकृत् ।
शस्त्राणि संप्रदीप्यन्ते पाण्डवानां जयैषिणाम् ५८

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

गदायुद्धारम्भे बलभद्रागमनम् ॥ १ ॥ तस्मिन्पाण्डवादिभिरर्चितोपविष्टे पुनर्गदायुद्धारम्भः ॥ २ ॥

सञ्जय उवाच ।
तस्मिन्युद्धे महाराज सुसंवृत्ते सुदारुणे ।
उपविष्टेषु सर्वेषु पाण्डवेषु महात्मसु ॥ १
ततस्तालध्वजो रामस्तयोर्युद्ध उपस्थिते ।
श्रुत्वा तच्छिष्ययो राजन्नाजगाम हलायुधः ॥ २
तं दृष्ट्वा परमप्रीताः पाण्डवाः सहकेशवाः ।
उपगम्योपसंगृह्य विधिवत्प्रत्यपूजयन् ॥ ३
पूजयित्वा ततः पश्चादिदं वचनमब्रुवन् ।
शिष्ययोः कौशलं युद्धे पश्य रामेति पार्थिव ॥ ४
अब्रवीच्च तदा रामो दृष्ट्वा कृष्णं सपाण्डवम् ।

दुर्योधनं च कौरव्यं गदापाणिमवस्थितम् ॥ ५
राम उवाच ।
चत्वारिंशदहान्यद्य द्वे च मे निःसृतस्य वै ।
पुष्येण संप्रयातोऽस्मि श्रवणे पुनरागतः ।
शिष्ययोर्वै गदायुद्धं द्रष्टुकामोऽस्मि माधव ॥ ६
ततो युधिष्ठिरो राजा परिष्वज्य हलायुधम् ।
स्वागतं कुशलं चास्मै पर्यपृच्छद्यथातथम् ॥ ७
कृष्णौ चापि महेष्वासावभिवाद्य हलायुधम् ।
सस्वजाते परिप्रीतौ प्रीयमाणौ यशस्विनौ ॥ ८
माद्रीपुत्रौ तथा शूरौ द्रौपद्याः पञ्च चात्मजाः ।
अभिवाद्य स्थिता राजन्रौहिणेयं महाबलम् ॥ ९
भीमसेनोऽथ बलवान्पुत्रस्तव जनाधिप ।
तथैव चोद्यतगदौ पूजयामासतुर्बलम् ॥ १०
स्वागतेन च ते तत्र प्रतिपूज्य पुनःपुनः ।
पश्य युद्धं महाबाहो इति ते राममब्रुवन् ॥ ११
एवमूचुर्महात्मानं रौहिणेयं नराधिपाः ॥ १२
परिष्वज्य तदा रामः पाण्डवान्सह सृञ्जयान् ।
अपृच्छत्कुशलं सर्वान्पार्थिवांश्चामितौजसः ।
तथैव ते समासाद्य पप्रच्छुस्तमनामयम् ॥ १३
प्रत्यभ्यर्च्य हली सर्वान्क्षत्रियांश्च महात्मनः ।
कृत्वा कुशलसंप्रश्नं संविदं च यथावयः ॥ १४
जनार्दनं सात्यकिं च प्रेम्णा संपरिषस्वजे ।
मूर्ध्नि चैतावुपाघ्राय कुशलं पर्यपृच्छत ॥ १५
तौ च तं विधिवद्राजन्पूजयामासतुर्गुरुम् ।
ब्रह्माणमिव देवेशमिन्द्रोपेन्द्रौ मुदान्वितौ ॥ १६
ततोऽब्रवीद्धर्मसुतो रौहिणेयमरिंदमम् ।
इदं भ्रात्रोर्महायुद्धं पश्य रामेति भारत ॥ १७
तेषां मध्ये महाबाहुः श्रीमान्केशवपूर्वजः ।
न्यविशत्परमप्रीतः पूज्यमानो महारथैः ॥ १८
स बभौ राजमध्यस्थो नीलवासाः सितप्रभः ।
दिवीव नक्षत्रगणैः परिवीतो निशाकरः ॥ १९
ततस्तयोः संनिपातस्तुमुलो रोमहर्षणः ।
आसीदन्तकरो राजन्वैरस्यान्तं विधित्सतोः ॥ २०

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि अष्टादशदिवसयुद्धे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

जनमेजयेन वैशंपायनंप्रति बलरामस्य तीर्थयात्राप्रकारप्रश्नः ॥ १ ॥ तेन तंप्रति तत्कथनमुपक्रम्य प्रभासतीर्थस्य तत्पदवाच्यत्वे हेतुकथनम् ॥ २ ॥

जनमेजय उवाच ।
पूर्वमेव यदा रामस्तस्मिन्युद्ध उपस्थिते ।
आमन्त्र्य केशवं यातो वृष्णिभिः सहितः प्रभुः ॥ १
साहाय्यं धार्तराष्ट्रस्य न च कर्ताऽस्मि केशव ।
न चैव पाण्डुपुत्राणां गमिष्यामि यथागतम् ॥ २
एवमुक्त्वा तदा रामो यातः शत्रुनिबर्हणः ।
तस्य चागमनं भूयो ब्रह्मञ्शंसितुमर्हसि ॥ ३
आख्याहि मे विस्तरशः कथं राम उपस्थितः ।
कथं च दृष्टवान्युद्धं कुशलो ह्यसि सत्तम ॥ ४
वैशंपायन उवाच ।
उपप्लाव्ये निविष्टेषु पाण्डवेषु महात्मसु ।
प्रेषितो धृतराष्ट्रस्य समीपं मधुसूदनः ॥ ५
शमं प्रति महाबाहो हितार्थं सर्वदेहिनाम् ॥ ६
स गत्वा हास्तिनपुरं धृतराष्ट्रं समेत्य च ।
उक्तवान्वचनं पथ्यं हितं चैव विशेषतः ॥ ७
न च तत्कृतवान्राजा यथाऽख्यातं हि तत्पुरा ॥ ८
अनवाप्य शमं तत्र कृष्णः पुरुषसत्तमः ।
आगच्छत महाबाहुरुपप्लाव्यं जनाधिप ॥ ९
ततः प्रत्यागतः कृष्णो धार्तराष्ट्रविसर्जितः ।
आजगाम नरव्याघ्रः पाण्डवानामनीकिनीम् ।
यथोक्तं च यथावृत्तं गत्वा पाण्डवमब्रवीत् ॥ १०
न कुर्वन्ति वचो मह्यं कुरवः कालनोदिताः ।
निर्गच्छध्वं पाण्डवेयाः पुण्येन सहिता मया ॥ ११
ततो विभज्यमानेषु बलेषु बलिनां वरः ।

प्रोवाच भ्रातरं कृष्णं रौहिणेयो महामनाः ॥१२
तेषामपि महाबाहो साहाय्यं मधुसूदन ।
क्रियतामिति तत्कृष्णो नास्य चक्रे वचस्तदा॥१३
ततो मन्युपरीतात्मा जगाम यदुनन्दनः ।
तीर्थयात्रां हलधरः सरस्वत्यां महायशाः ।
मैत्रनक्षत्रयोगे स्म सहितः सर्वयादवैः ॥ १४
आश्रयामास भोजस्तु दुर्योधनमरिंदमः ।
युयुधानेन सहितो वासुदेवस्तु पाण्डवान् ॥१५
रौहिणेये गते शूरे पुष्येण मधुसूदनः ।
पाण्डवेयान्पुरस्कृत्य ययावभिमुखः कुरून् ॥१६
गच्छन्नेव पथिस्थस्तु रामः प्रेष्यानुवाच ह ।
संभारांस्तीर्थयात्रायां सर्वोपकरणानि च ॥ १७
आनयध्वं द्वारकाया अग्नीन्वै याजकांस्तथा ।
सुवर्णरजतं चैव धेनूर्वासांसि वाजिनः ॥ १८
कुञ्जरांश्च रथांश्चैव खरोष्ट्रं वाहनानि च ।
क्षिप्रमानीयतां सर्वं तीर्थहेतोः परिच्छदम् ॥ १९
प्रतिस्रोतः सरस्वत्या गच्छध्वं शीघ्रगामिनः ।
ऋत्विजश्चानयध्वं वै शतशश्च द्विजर्षभान् ॥ २०
एवं संदिश्य तु प्रेष्यान्बलदेवो महाबलः ।
तीर्थयात्रां ययौ राजन्कुरूणां वैशसे तदा ॥२१
सरस्वत्याः प्रतिस्रोतः समुद्रादभिजग्मिवान् ।
रामो यदूत्तमः श्रीमांस्तीर्थयात्रामनुस्मरन् ॥ २२
ऋत्विग्भिश्च सुहृद्भिश्च तथाऽन्यैर्द्विजसत्तमैः ।
रथैर्गजैस्तथाऽश्वैश्च प्रेष्यैश्च भरतर्षभ ।
गोखरोष्ट्रप्रयुक्तैश्च यानैश्च बहुभिर्वृतः ॥ २३
श्रान्तानां क्लान्तवपुषां शिशूनां विपुलायुषाम् ।
देशेदेशे तु देयानि दानानि विविधानि च॥२४
अर्चायै चार्थिनां राजन्कृष्णानि बहुशस्तथा ।
तानि यानीह देशेषु प्रतीक्षन्ति स्म भारत ॥२५
बुभुक्षितानामर्थाय कृष्णमन्नं समन्ततः ॥ २६
योयो यत्र द्विजो भोज्यं भोक्तुं कामयते तदा ।
तस्यतस्य तु तत्रैवमुपजहुस्तदा नृप ॥ २७

तत्रतत्र स्थिता राजन्रौहिणेयस्य शासनात् ।
भक्ष्यपेयस्य कुर्वन्ति राशींस्तत्र समन्ततः ॥ २८
वासांसि च महार्हाणि पर्यङ्कास्तरणानि च ।
पूजार्थं तत्र कृष्णानि विप्राणां सुखमिच्छताम् ॥२९
यत्र यः स्वपते विप्रो यो वा जागर्ति भारत ।
तत्रतत्रैव सर्वस्य कृष्णं सर्वमपश्यत ॥ ३०
यथासुखं जनः सर्वो याति तिष्ठति वै तदा ।
यातुकामस्य यानानि पानानि तृषितस्य च ॥३१
बुभुक्षितस्य चान्नानि स्वादूनि भरतर्षभ ।
उपजह्रुर्नरास्तत्र वस्त्राण्याभरणानि च ॥ ३२
स पन्थाः प्रबभौ राजन्सर्वस्यैव सुखावहः ।
स्वर्गोपमस्तदा वीर नराणां तत्र गच्छताम् ॥ ३३
नित्यप्रमुदितोपेतः स्वादुभक्ष्यो जलान्वितः ।
विपण्यापणपण्यानां नानाजनशतैर्वृतः ।
नानाद्रुमलतोपेतो नानारत्नविभूषितः ॥ ३४
ततो महात्मा नियतो मनस्विनां
पुण्येषु तीर्थेषु वसूनि राजन् ।
ददौ द्विजेभ्यः क्रतुदक्षिणाश्च
यदुप्रवीरो हलभृत्प्रतीतः ॥ ३५
दोग्ध्रीश्च धेनूश्च सहस्रशो वै
सुवाससः काञ्चनबद्धशृङ्गीः ।
हयांश्च नानाविधदेशजातान्
यानानि दासांश्च शुभान्द्विजेभ्यः ॥ ३६
रत्नानि मुक्तामणिविद्रुमं चा-
प्यग्र्यं सुवर्णं रजतं सुशुद्धम् ।
अयस्मयं ताम्रमयं च भाण्डं
ददौ द्विजातिप्रवरेषु रामः ॥ ३७
एवं स वित्तं प्रददौ महात्मा
सरस्वतीतीर्थगतेषु भूरि ।
ययौ क्रमेणाप्रतिमप्रभाव-
स्ततः कुरुक्षेत्रमुदारवृत्तः ॥ ३८

मैत्रनक्षत्रयोगे अनुराधाया ॥ १४ ॥ भोज कृतवर्मा ॥ १५॥ पुष्येण हि पाण्डवेभ्यः प्रयाण अनुराधातस्तीर्थयात्रार्थमिति विवेकः ॥ १६ ॥ विपणि. पण्यवीथिका । आपणा हट्टाः । पण्यानि विक्रेयद्रव्याणि ॥ ३४ ॥ कृतदक्षिणाश्चेति क. ङ. पाठः ॥ ३५ ॥

जनमेजय उवाच ।
सारस्वतानां तीर्थानां गुणोत्पत्तिं वदस्व मे ।
फलं च द्विपदां श्रेष्ठ कर्म निर्वृत्तिमेव च ॥ ३९
यथाक्रमेण भगवंस्तीर्थानामनुपूर्वशः ।
ब्रूहि ब्रह्मविदां श्रेष्ठ परं कौतूहलं हि मे ॥ ४०
वैशंपायन उवाच ।
तीर्थानां च फलं राजन्गुणोत्पत्तिं च सर्वशः ।
मयोच्यमानं वै पुण्यं शृणु राजेन्द्र कृत्स्नशः ४१
पूर्वं महाराज यदुप्रवीर
ऋत्विक्सुहृद्विप्रगणैश्च सार्धम् ।
पुण्यं प्रभासं समुपाजगाम
यत्रोडुराज्यक्ष्मणा क्षीयमाणः ॥ ४२
विमुक्तशापः पुनराप्य तेजः
सर्वं जगद्भासयते नरेन्द्र ।
एतत्तु तीर्थप्रवरं पृथिव्यां
प्रभासनात्तस्य ततः प्रभासः ॥ ४३

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि अष्टादशदिवसयुद्धे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः ॥ ३६ ॥

चन्द्रे स्वभार्यास्वश्विन्यादिदक्षपुत्रीषु इतरोपेक्षणेन रोहिण्यामेवासक्ते दक्षेण रोषाच्चन्द्रे यक्ष्मप्रक्षेपः ॥ १ ॥ देवैः प्रसादितदक्षवचनाच्चन्द्रेण प्रभासतीर्थनिमज्जनेन क्षयरोगपरिहरणम् ॥ २ ॥ बलभद्रेण तत्तीर्थे मज्जनादि ॥ ३ ॥

जनमेजय उवाच ।
किमर्थं भगवान्सोमो यक्ष्मणा समगृह्यत ।
कथं च तीर्थप्रवरे तस्मिंश्चन्द्रो न्यमज्जत ॥ १
कथमाप्लुत्य तस्मिंस्तु पुनराप्यायितः शशी ।
एतन्मे सर्वमाचक्ष्व विस्तरेण महामुने ॥ २
वैशंपायन उवाच ।
दक्षस्य तनयास्तात प्रादुरासन्विशांपते ।
स सप्तविंशतिं कन्या दक्षः सोमाय वै ददौ ॥ ३
नक्षत्रयोगनिरताः सङ्ख्यानार्थं च ताभवन् ।
पत्न्यो वै तस्य राजेन्द्र सोमस्य शुभकर्मणः ॥ ४
तास्तु सर्वा विशालाक्ष्यो रूपेणाप्रतिमाऽभवन् ।
अत्यरिच्यत तासां तु रोहिणी रूपसंपदा ॥ ५
ततस्तस्यां स भगवान्प्रीतिं चक्रे निशाकरः ।
साऽस्य हृद्या बभूवाथ तस्मात्तां बुभुजे सदा ॥६
ततस्ताः कुपिताः सर्वा नक्षत्राख्या महात्मनः ।
ता गत्वा पितरं प्राहुः प्रजापतिमतन्द्रिताः ॥ ७
सोमो वसति नास्मासु रोहिणीं भजते सदा ।
ता वयं सहिताः सर्वास्त्वत्सकाशे प्रजेश्वर ।
वत्स्यामो नियताहारास्तपश्चरणतत्पराः ॥ ८
श्रुत्वा तासां तु वचनं दक्षः सोममथाब्रवीत् ।
समं वर्तस्व सर्वासु मा त्वाऽधर्मो महान्स्पृशेत् ९
तास्तु सर्वाऽब्रवीद्दक्षो गच्छध्वं शशिनोन्तिकम् ।
समं वर्त्स्यति सर्वासु चन्द्रमा मम शासनात् १०
विसृष्टास्तास्तथा जग्मुः शीतांशोर्भवनं शुभाः ।
तथाऽपि सोमो भगवान्पुनरेव महीपते ।
रोहिण्या सार्धमवसत्प्रीयमाणो मुहुर्मुहुः ॥ ११
ततस्ताः सहिताः सर्वा भूयः पितरमब्रुवन् ॥१२
सोमो वसति नास्मासु नाकरोद्वचनं तव ।
तव शुश्रूषणे युक्ता वत्स्यामो हि तवान्तिके ॥१३
तासां तद्वचनं श्रुत्वा दक्षः सोममथाब्रवीत् ।
समं वर्तस्व सर्वासु मा त्वां शप्स्ये विरोचन ॥ १४
अनादृत्य तु तद्वाक्यं दक्षस्य भगवाञ्शशी ।
रोहिण्या सार्धमवसत्ततस्ताः कुपिताः पुनः ॥ १५
गत्वा च पितरं प्राहुः प्रणम्य शिरसा तदा ।
सोमो वसति नास्मासु तस्मान्नः शरणं भव ॥ १६
रोहिण्यामेव भगवान्सदा वसति चन्द्रमाः ।

गुणान् रमणीयत्वादीन् । उत्पत्तिं सभवम् । कर्मनिर्वृत्तिं तीर्थयात्राविधिसिद्धम् । निवृत्तिमपि कर्मणाम् इति क. ङ. पाठ ॥ ३९ ॥ यथाक्रमेण तीर्थक्रमापेक्षया अनुपूर्वशः गुणोत्पत्त्यादिक्रमापेक्षया ॥ ४० ॥ प्रभास. प्रभासत्वम् ॥ ४३ ॥

पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

त्वा त्वा अधर्मः मा स्पृशेत् ॥ ९ ॥ विरोचन हे विशेषेण रोचमान । त्वा माशप्स्ये । तव रोचना यथाह शापेन न हरामि तथा यतस्वेत्यर्थं ॥ १४ ॥

न त्वद्वचो गणयति नास्मासु स्नेहमिच्छति ॥ १७
तस्मान्नस्त्राहि सर्वा वै यथा नः सोम आविशेत् ।
तच्छ्रुत्वा भगवान्क्रुद्धो यक्ष्माणं पृथिवीपते ॥ १८
ससर्ज रोषात्सोमाय स चोडुपतिमाविशत् ।
स यक्ष्मणाऽभिभूतात्मा क्षीयताहरहः शशी ॥ १९
यत्नं चाप्यकरोद्राजन्मोक्षार्थं तस्य यक्ष्मणः ।
इष्ट्वेष्टिभिर्महाराज विविधाभिर्निशाकरः ॥ २०
न चामुच्यत शापाद्वै क्षयं चैवाधिगच्छति ।
क्षीयमाणे ततः सोमे ओषध्यो न प्रजज्ञिरे ॥ २१
निरास्वादरसाः सर्वा हतवीर्याश्च सर्वशः ।
ओषधीनां क्षये जाते प्राणिनामपि संक्षयः ॥ २२
कृशाश्वासन्प्रजाः सर्वाः क्षीयमाणे निशाकरे ।
ततो देवाः समागम्य सोममूचुर्महीपते ॥ २३
किमिदं भवतो रूपमीदृशं संप्रकाशते ।
कारणं ब्रूहि नः सर्वं येनेदं ते महद्भयम् ॥ २४
श्रुत्वा तु कारणं त्वत्तो विधास्यामस्ततो वयम् ।
एवमुक्तः प्रत्युवाच सर्वांस्ताञ्शशलक्षणः ॥ २५
शापस्य कारणं चैव यक्ष्माणं च तथाऽऽत्मनः ।
देवास्तस्य वचः श्रुत्वा गत्वा दक्षमथाऽब्रुवन् ॥ २६
प्रसीद भगवन्सोमे शापोऽयं विनिवर्त्यताम् ।
असौ हि चन्द्रमाः क्षीणः किंचिच्छेषो हि लक्ष्यते ॥
क्षयाच्चैवास्य देवेश प्रजाश्चैव गताः क्षयम् ।
वीरुदोषधयश्चैव बीजानि विविधानि च ।
तथा नरा लोकगुरो प्रसादं कर्तुमर्हसि ॥ २८
एवमुक्तस्ततो देवान्प्राह वाक्यं प्रजापतिः ।
नैतच्छक्यं मम वचो व्यावर्तयितुमञ्जसा ॥ २९
हेतुना तु महाभागा निवर्तिष्यति केनचित् ।
समं वर्ततु सर्वासु शशी भार्यासु नित्यशः ॥ ३०
सरस्त्या वरे तीर्थे निमज्ज्याशशलक्षणः ।
पुनर्वर्धिष्यते देवास्तद्वै सत्यं वचो मम ॥ ३१
मासार्धं च क्षयं सोमो नित्यमेव गमिष्यति ।
मासार्धं तु पुनर्वृद्धिं सत्यमेतद्वचो मम ॥ ३२
समुद्रं पश्चिमं गत्वा सरस्त्यब्धिसंगमम् ।
आराधयतु देवेशं ततः कान्तिमवाप्स्यति ॥ ३३
सरस्वतीं ततः सोमः स जगामर्षिशासनात् ।
प्रभासं प्रथमं तीर्थं सरस्त्या जगाम ह ॥ ३४
अमावास्यां महातेजास्तत्रामज्जन्महाद्युतिः ।
लोकान्प्रभासयामास शीतांशुत्वमवाप च ॥ ३५
देवास्तु सर्वे राजेन्द्र प्रसादं प्राप्य पुष्कलम् ।
सोमेन सहिता भूत्वा दक्षस्य प्रमुखेऽभवन् ॥ ३६
ततः प्रजापतिः सर्वा विससर्जाथ देवताः ।
सोमं च भगवान्प्रीतो भूयो वचनमब्रवीत् ॥ ३७
मावमंस्थाः स्त्रियः पुत्र मा च विप्रान्कदाचन ।
गच्छ युक्तः सदा भूत्वा कुरु वै शासनं मम ॥ ३८
स विसृष्टो महाराज जगामाथ स्वमालयम् ।
प्रजाश्च मुदिता भूत्वा ईजिरे च यथा पुरा ॥ ३९
एवं ते सर्वमाख्यातं यथा शप्तो निशाकरः ।
प्रभासं च यथा तीर्थं तीर्थानां प्रवरं महत् ॥ ४०
अमावास्यां महाराज नित्यशः शशलक्षणः ।
स्नात्वाह्याप्यायते श्रीमान्प्रभासे तीर्थउत्तमे ॥ ४१
अतश्चैतत्प्रजानन्ति प्रभासमिति भूमिप ।
प्रभां हि परमां लेभे तस्मिंश्चामज्य चन्द्रमाः ॥ ४२
'लोकान्प्रभासयामास पुपोष च वपुस्तथा ।
तत्र स्नात्वा हली रामो दत्वा प्रीतोऽथ दक्षिणाः ॥'
ततस्तु चमसोद्भेदमभीतस्त्वगमद्बली ।
चमसोद्भेद इत्येवं यं जनाः कथयन्त्युत ॥ ४४
तत्र दत्त्वा च दानानि विशिष्टानि हलायुधः ।
उषित्वा रजनीमेकां स्नात्वा च विधिवत्तदा ॥ ४५
उदपानमथागच्छत्त्वरावान्केशवाग्रजः ।
आद्यं स्वस्त्ययनं चैव तत्रावाप्य महाबलः ॥ ४६
स्निग्धत्वादोषधीनां च भूमेश्च जनमेजय ।
जानन्ति सिद्धा राजेन्द्र निगूढां तां सरस्वतीम् ४७

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि अष्टादशदिवसयुद्धे षट्त्रिंशोऽध्यायः ॥ ३६ ॥

गच्छयत्तः इति क. पाठ ॥ ३८ ॥ | षट्त्रिंशोऽध्याय. ॥ ३६ ॥

सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

एकतद्वितत्रितनामकानां विप्राणां कथा ॥ १ ॥

वैशंपायन उवाच ।
तस्मान्नदीगतं चापि ह्युदपानं यशस्विनः ।
त्रितस्य च महाराज जगामाथ हलायुधः ॥ १
तत्र दत्त्वा बहुद्रव्यं पूजयित्वा तथा द्विजान् ।
उपस्पृश्य च तत्रैव प्रहृष्टो मुसलायुधः ॥ २
तत्र धर्मपरो ह्यासीत्रितः स सुमहातपाः ।
कूपे च वसता तेन सोमः पीतो महात्मना ॥ ३
तत्र चैनं समुत्सृज्य भ्रातरौ जग्मतुर्गृहान् ।
ततस्तौ वै शशापाथ त्रितो ब्राह्मणसत्तमः ॥ ४
जनमेजय उवाच ।
उदपानं कथं ब्रह्मन्कथं च सुमहातपाः ।
पतितः किं च संत्यक्तो भ्रातृभ्यां द्विजसत्तम ॥५
कूपे कथं च हित्वैनं भ्रातरौ जग्मतुर्गृहान् ।
कथं च याजयामास पपौ सोमं च वै कथम् ।
एतदाचक्ष्व मे ब्रह्मन्श्रोतव्यं यदि मन्यसे ॥ ६
वैशंपायन उवाच ।
आसन्पूर्वयुगे राजन्मुनयो भ्रातरस्त्रयः ।
एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः ॥ ७
सर्वे प्रजापतिसमाः प्रजावन्तस्तथैव च ।
ब्रह्मलोकजिताः सर्वे तपसा ब्रह्मवादिनः ॥ ८
तेषां तु तपसा प्रीतो नियमेन दमेन च ।
अभवद्गौतमो नित्यं पिता धर्मरतः सदा ॥ ९
स तु दीर्घेण कालेन तेषां प्रीतिमवाप्य च ।
जगाम भगवान्स्थानमनुरूपमिवात्मनः ॥ १०
राजानस्तस्य ये ह्यासन्याज्या राजन्महात्मनः ।
ते सर्वे स्वर्गते तस्मिंस्तस्य पुत्रानपूजयन् ॥ ११
तेषां तु कर्मणा राजंस्तथा चाध्ययनेन च ।
त्रितः स श्रेष्ठतां प्राप यथैवास्य पिता तथा ॥ १२
तथा सर्वे महाभागा मुनयः पुण्यलक्षणाः ।
अपूजयन्महाभागं यथास्य पितरं तथा ॥ १३
कदाचिद्धि ततो राजन्भ्रातरावेकतद्वितौ ।
यज्ञार्थं चक्रतुश्चिन्तां तथा वित्तार्थमेव च ॥ १४
तयोर्बुद्धिः समभवत्त्रितं गृह्य परंतप ।
याज्यान्सर्वानुपादाय प्रतिगृह्य पशूंस्ततः ।
सोमं पास्यामहे हृष्टाः प्राप्य यज्ञं महाफलम् ॥१५
चक्रुश्चैवं तथा राजन्भ्रातरस्त्रय एव च ।
यथा ते तु परिक्रम्य याज्यान्सर्वान्पशून्प्रति ।
याजयित्वा ततो याज्याँल्लब्ध्वा तु सुबहून्पशून् ॥
याज्येन कर्मणा तेन प्रतिगृह्य विधानतः ।
प्राचीं दिशं महात्मान आजग्मुस्ते महर्षयः ॥१७
त्रितस्तेषां महाराज पुरस्ताद्याति हृष्टवत् ।
एकतश्च द्वितश्चैव पृष्ठतः कालयन्पशून् ॥ १८
तयोश्चिन्ता समभवदेकतस्य द्वितस्य च ।
कथं च स्युरिमा गाव आवाभ्यां हि विना त्रितम् ॥
तावन्योन्यं समाभाष्य एकतश्च द्वितश्च ह ।
यदूचतुर्मिथः पापौ तन्निबोध जनेश्वर ॥ २०
त्रितो यज्ञेषु कुशलस्तथा वेदेषु निष्ठितः ।
ततस्त्रितो बहुतरं गावः समुपलप्स्यते ॥ २१
तदावां सहितौ भूत्वा गाः प्रकाल्य व्रजावहे ।
त्रितोऽपि गच्छतां काममावाभ्यां वै विनाकृतः ॥
वैशंपायन उवाच ।
तेषामागच्छतां रात्रौ पथिस्थानां वृकोऽभवत् ।
तत्र कूपो विदूरेऽभूत्सरस्त्यास्तटे महान् ॥ २३
अथ त्रितो वृकं दृष्ट्वा पथि तिष्ठन्तमग्रतः ।
तद्भयादपसर्पन्वै तस्मिन्कूपे पपात ह ।
अगाधे सुमहाघोरे सर्वभूतभयंकरे ॥ २४
त्रितस्ततो महाराज कूपस्थो मुनिसत्तमः ।
आर्तनादं ततश्चक्रे तौ तु शुश्रुवतुर्मुनी ॥ २५

याजयामास स्वार्थे णिच् याग कृतवान् ॥ ६ ॥ सर्वे प्रजापतिसुता. प्रजापतय एव च इति क पाठ ॥ ८ ॥ पशून्प्रति पश्वर्थम् । दक्षिणार्था गा प्राप्तुमित्यर्थ ॥ १६ ॥ त्रितश्चाकालयन्पशून् इति क. पाठः ॥१८ ॥ पथिस्थाने वृकोऽभवदिति क. ड. पाठ ॥ २३ ॥

तं ज्ञात्वा पतितं कूपे भ्रातरावेकतद्वितौ ।
वृकत्रासाच्च लोभाच्च समुत्सृज्य प्रजग्मतुः ॥२६
भ्रातृभ्यां पशुलुब्धाभ्यामुत्सृष्टः स महातपाः ।
उदपाने तदा राजन्निर्जले पांसुसंवृते ॥ २७
त्रित आत्मानमालक्ष्य कूपे वीरुत्तृणावृते ।
निमग्नं भरतश्रेष्ठ नरके दुष्कृती यथा ॥ २८
ततो ह्यचिन्तयत्प्राज्ञो मृतभूतो ह्यसोमपः ।
सोमः कथं तु पातव्य इहस्थेन मया भवेत् ॥२९
स एवमभिसंचिन्त्य तस्मिन्कूपे महातपाः ।
ददर्श वीरुधं तत्र लम्बमानां यदृच्छया ॥ ३०
पांसुग्रस्ते ततः कूपे न्यखनत्सलिलं मुनिः ।
अग्नीन्संकल्पयामास होतृनात्मानमेव च ॥ ३१
ततस्तां वीरुधं सोमं संकल्प्य सुमहातपाः ।
ऋचो यजूंषि सामानि मनसा चिन्तयन्मुनिः ३२
ग्रावाणः शर्कराः कृत्वा प्रचक्रेऽभिषवं नृप ।
आज्यं च सलिलं चक्रे भागांश्च त्रिदिवौकसाम् ३३
सोमस्याभिषवस्याग्रे प्रवृत्तस्तुमुलो ध्वनिः ।
स चाविशद्दिवं राजन्स्वरश्चैव त्रितस्य वै ॥ ३४
समवाप च तं यज्ञं यथोक्तं ब्रह्मवादिभिः ॥ ३५
वर्तमाने महायज्ञे त्रितस्य सुमहात्मनः ।
आविग्नं त्रिदिवं सर्वं कारणं च न बुध्यते ॥ ३६
ततः सुतुमुलं शब्दं शुश्रावाथ बृहस्पतिः ।
श्रुत्वा चैवाब्रवीत्सर्वान्देवान्देवपुरोहितः ॥ ३७
त्रितस्य वर्तते यज्ञस्तत्र गच्छामहे सुराः ।
स हि क्रुद्धः सृजेदन्यान्देवानपि महातपाः ॥ ३८
तच्छ्रुत्वा वचनं तस्य सहिताः सर्वदेवताः ।
प्रययुस्तत्र यत्रास्ते त्रितयज्ञश्च वर्तते ॥ ३९
ते तत्र गत्वा विबुधास्तं कूपं यत्र स त्रितः ।
ददृशुस्तं महात्मानं दीक्षितं यज्ञकर्मसु ॥ ४०
दृष्ट्वा चैनं महात्मानं श्रिया परमया युतम् ।
ऊचुश्चैनं महाभागं प्राप्ता भागार्थिनो वयम् ॥४१
अथाब्रवीद्दर्षिर्देवान्पश्यध्वं मां दिवौकसः ।
अस्मिन्प्रतिभये कूपे निमग्नं नष्टचेतसम् ॥ ४२
ततस्त्रितो महाराज भागांस्तेषां यथाविधि ।
मन्त्रयुक्तान्समददात्तेन प्रीतास्तदाऽभवन् ॥ ४३
ततो यथाविधि प्राप्तान्भागान्प्राप्य दिवौकसः ।
प्रीतात्मानो ददुस्तस्मै वरान्यान्मनसेच्छति ॥ ४४
स तु वव्रे वरं देवांस्त्रातुमर्हथ मामितः ।
यश्चाम्भोपस्पृशेत्कूपे स सोमपगतिं लभेत् ॥४५
तत्र चोर्मिमती राजन्नुत्पपात सरस्वती ।
तयोत्क्षिप्तस्त्रितस्तस्थौ पूजयंस्त्रिदिवौकसः ॥ ४६
तथेति चोक्त्वा विबुधा जग्मू राजन्यथाऽऽगताः ।
त्रितश्चाभ्यागमत्प्रीतः स्वमेव निलयं तदा ॥ ४७
क्रुद्धस्तु स समासाद्य तावृषी भ्रातरौ तदा ।
उवाच परुषं वाक्यं शशाप च महातपाः ॥ ४८
पशुलुब्धौ युवां यस्मान्मामुत्सृज्य प्रधावितौ ।
तस्माद्वृकाकृती रौद्रौ दंष्ट्रिणावभितश्चरौ ॥ ४९
भवितारौ मया शप्तौ पापेनानेन कर्मणा ।
प्रसवश्चैव युवयोर्गोलाङ्गूलर्क्षवानराः ॥ ५०
इत्युक्तेन तदा तेन क्षणादेव विशांपते ।
तथाभूतावदृश्येतां वचनात्सत्यवादिनः ॥ ५१
तत्राप्यमितविक्रान्तः स्पृष्ट्वा तोयं हलायुधः ।
दत्त्वा च विविधान्देयान्पूजयित्वा च वै द्विजान् ५२
उदपानं च तं वीक्ष्य प्रशस्य च पुनःपुनः ।
नदीगतमदीनात्मा प्राप्तो विनशनं तदा ॥ ५३

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

बलभद्रस्य सरस्वतीतीरस्थनानातीर्थयात्राप्रकारवर्णनम् ॥ १ ॥ तत्तत्तीर्थमहिमानुवर्णनं च ॥ २ ॥

वैशंपायन उवाच ।
ततो विनशनं राजन्नाजगाम हलायुधः ।
शूद्राभीरान्प्रति द्वेषाद्यत्र नष्टा सरस्वती ।
तस्मात्तामृषयो नित्यं प्राहुर्विनशनेति च ॥ १

यश्चैहोपस्पृशेदिति झ. पाठ ॥४५॥ सप्तत्रिंशोऽध्यायः ॥३७॥

शूद्राभीरान्द्विष्टमाना–इति क. पाठः ॥ १ ॥

तत्राप्युपस्पृश्य बलः सरस्वत्यां महाबलः ।
सुभूमिकं ततोऽगच्छत्सरस्वत्यास्तटे वरे ॥ २
तत्र चाप्सरसः शुभ्रा नित्यकालमतन्द्रिताः ।
क्रीडाभिर्विमलाभिश्च क्रीडन्ति विमलाननाः ॥ ३
तत्र देवाः सगन्धर्वा मासिमासि जनेश्वर ।
अभिगच्छन्ति तत्तीर्थं पुण्यं ब्राह्मणसेवितम् ॥ ४
तत्र नृत्यन्ति गन्धर्वास्तथैवाप्सरसां गणाः ।
समेत्य सहिता राजन्यथाप्राप्तं यथासुखम् ॥ ५
तत्र मोदन्ति देवाश्च पितरश्च सवीरुधः ।
पुण्यैः पुष्पैः सदा दिव्यैः कीर्यमाणाः पुनःपुनः ६
आक्रीडभूमिः सा राजंस्तासामप्सरसां शुभा ।
सुभूमिकेति विख्याता सरस्वत्यास्तटे वरे ॥ ७
तत्र स्नात्वा च दत्त्वा च वसु विप्रेषु माधवः ।
श्रुत्वा गीतं च तद्दिव्यं वादित्राणां च निःस्वनम् ८
शय्याश्च विपुला दृष्ट्वा देवगन्धर्वरक्षसाम् ।
गन्धर्वाणां ततस्तीर्थमागच्छद्रोहिणीसुतः ॥ ९
विश्वावसुमुखास्तत्र गन्धर्वाप्सरसां गणाः ।
नृत्तवादित्रगीतं च कुर्वन्ति सुमनोरमम् ॥ १०
तत्र दत्त्वा हलधरो विप्रेभ्यो विविधं वसु ।
अजाविकं गोखरोष्ट्रं सुवर्णं रजतं तथा ॥ ११
भोजयित्वा द्विजान्कामैः संतर्प्य च महाधनैः ।
प्रययौ सहितो विप्रैः स्तूयमानश्च माधवः ॥ १२
तस्माद्गन्धर्वतीर्थाच्च महाबाहुररिंदमः ।
गर्गस्रोतो महातीर्थमाजगामैककुण्डली ॥ १३
तत्र गर्गेण वृद्धेन तपसा भावितात्मना ।
कालज्ञानगतिश्चैव ज्योतिषां च व्यतिक्रमः ॥ १४
उत्पाता दारुणाश्चैक शुभाश्च जनमेजय ।
सरस्वत्याः शुभे तीर्थे विदिता वै महात्मना ॥ १५
तस्य नाम्ना च तत्तीर्थं गर्गस्रोत इति स्मृतम् ॥ १६
तत्र गर्गे महाभागमृषयः सुव्रता नृप ।
उपासांचक्रिरे नित्यं कालज्ञानं प्रति प्रभो ॥ १७
तत्र गत्वा महाराज बलः श्वेतानुलेपनः ।
विधिवद्वि धनं दत्त्वा मुनीनां भावितात्मनाम् १८
उच्चावचांस्तथा भक्ष्यान्विप्रेभ्यो विप्रदाय सः ।
नीलवासास्ततदाऽगच्छच्छङ्खतीर्थं महायशाः ॥ १९
तत्रापश्यन्महाशङ्खं महामेरुमिवोच्छ्रितम् ।
श्वेतपर्वतसंकाशमृषिसङ्घैर्निषेवितम् ।
सरस्वत्यास्तटे जातं नगं तालध्वजो बली ॥ २०
यक्षा विद्याधराश्चैव राक्षसाश्चामितौजसः ।
पिशाचाश्चामितबला यत्र सिद्धाः सहस्रशः ॥ २१
ते सर्वे ह्यशनं त्यक्त्वा फलं तस्य वनस्पतेः ।
व्रतैश्च नियमैश्चैव कालेकाले स्म भुञ्जते ॥ २२
प्राप्तैश्च नियमैस्तैस्तैर्विचरन्तः पृथक्पृथक् ।
अदृश्यमाना मनुजैर्व्यचरन्पुरुषर्षभ ॥ २३
एवं ख्यातो नरव्याघ्र लोकेऽस्मिन्स वनस्पतिः ।
तत्र तीर्थं सरस्वत्याः पावनं लोकविश्रुतम् ॥ २४
तस्मिंश्च यदुशार्दूलो दत्त्वा तीर्थे पयस्विनीः ।
ताम्रायसानि भाण्डानि वस्त्राणि विविधानि च २५
पूजयित्वा द्विजांश्चैव पूजितश्च तपोधनैः ।
पुण्यं नैसर्गिकं राजन्नाजगाम हलायुधः ॥ २६
तत्र गत्वा मुनीन्दृष्ट्वा नानावेषधरान्बलः ।
आप्लुत्य सलिले चापि पूजयामास वै द्विजान् ॥ २७
तथैव दत्त्वा विप्रेभ्यः परिभोगान्सुपुष्कलान् ।
ततः प्रायाद्बलो राजन्दक्षिणेन सरस्वतीम् ॥ २८
गत्वा चैवं महाबाहुर्नातिदूरे महायशाः ।
धर्मात्मा नागधन्वानं तीर्थमागमदच्युतः ॥ २९
यत्र पन्नगराजस्य वासुकेः सन्निवेशनम् ।
महाद्युतेर्महाराज बहुभिः पन्नगैर्वृतम् ॥ ३०
ऋषीणां हि सहस्राणि तत्र नित्यं चतुर्दश ।
यत्र देवाः समागम्य वासुकिं पन्नगोत्तमम् ।
सर्वपन्नगराजानमभ्यषिञ्चन्यथाविधि ॥ ३१
पन्नगेभ्यो भयं तत्र विद्यते न स्म पौरव ॥ ३२
तत्रापि विधिवद्दत्त्वा विप्रेभ्यो रत्नसंचयान् ।
प्रायात्प्राचीं दिशं राजंस्तत्र तीर्थान्यनेकशः ॥ ३३
सहस्रशतसङ्ख्यानि प्रथितानि पदेपदे ।
आप्लुत्य तत्र तीर्थेषु यथोक्तं तत्र चर्षिभिः ॥ ३४

शुभ्रा शुचय ॥ ३ ॥ छायाश्च विपुला इति ड पाठ ॥ ९ ॥ गन्धर्वाप्सरसान्विता इति ड. पाठ ॥ १० ॥ कालज्ञान प्रति कालज्ञानार्थम् ॥ १७ ॥ शङ्ख शङ्खनामानम् । नग वृक्षम् ॥ २० ॥ पुण्य द्वैतवन इति झ. पाठ ॥ २६ ॥

दत्त्वा वसु द्विजाग्र्येभ्यो निर्जगाम महाबलः ।
तत्रस्थानृषिसङ्घांस्तानभिवाद्य हलायुधः ॥ ३५
ततो रामोऽगमत्तीर्थमृषिभिः सेवितं महत् ।
यत्र भूयो निवृत्ते प्राङ्मुखा वै सरस्वती ॥ ३६
ऋषीणां नैमिषेयाणामवेक्षार्थं महात्मनाम् ।
निवृत्तां तां सरिच्छ्रेष्ठां तत्र दृष्ट्वा तु लाङ्गली ।
बभूव विस्मितो राजन्बलः श्वेतानुलेपनः ॥ ३७
जनमेजय उवाच ।
कस्मात्सरस्वती ब्रह्मन्निवृत्ता प्राङ्मुखी भवत् ।
व्याख्यातमेतदिच्छामि सर्वमध्वर्युसत्तम ॥ ३८
कस्मिंश्चित्कारणे तत्र विस्मितो यदुनन्दनः ।
निवृत्ता हेतुना केन कथमेव सरिद्वरा ॥ ३९
वैशंपायन उवाच ।
पूर्वं कृतयुगे राजन्नैमिषेयास्तपस्विनः ।
वर्तमाने सुविपुले सत्रे द्वादशवार्षिके ॥ ४०
ऋषयो बहवो राजंस्तत्सत्रमभिपेदिरे ।
उषित्वा च महाभागास्तस्मिन्सत्रे यथाविधि ॥ ४१
निवृत्ते नैमिषे ये वै सत्रे द्वादशवार्षिके ।
आजग्मुर्ऋषयस्तत्र बहवस्तीर्थकारणात् ॥ ४२
ऋषीणां बहुलत्वात्तु सरस्वत्या विशांपते ।
तीर्थानि नगरायन्ते कूले वै दक्षिणोत्तरे ॥ ४३
समन्तपञ्चकं यावत्तावत्ते द्विजसत्तमाः ।
तीर्थलोभान्नरव्याघ्र नद्यास्तीरं समाश्रिताः ॥ ४४
जुह्वतां तत्र तेषां तु मुनीनां भावितात्मनाम् ।
स्वाध्यायेनातिमहता बभूवुः पूरिता दिशः ॥ ४५
अग्निहोत्रैस्ततस्तेषां हूयमानैर्महात्मनाम् ।
अशोभत सरिच्छ्रेष्ठा दीप्यमानैः समन्ततः ॥ ४६
वालखिल्या महाराज अश्मकुट्टाश्च तापसाः ।
दन्तोलूखलिनश्चान्ये संप्रक्षालास्तथा परे ॥ ४७
वायुभक्षा जलाहाराः पर्णभक्षाश्च तापसाः ।
नानानियमयुक्ताश्च तथा स्थण्डिलशायिनः ॥ ४८
आसन्वै मुनयस्तत्र सरस्वत्याः समीपतः ।
शोभयन्तः सरिच्छ्रेष्ठां गङ्गामिव दिवौकसः ॥ ४९

शतशश्च समापेतुर्ऋषयः सत्रयाजिनः ।
तेऽवकाशं न ददृशुः सरस्त्या महाव्रताः ।
तेऽवकाशं च ददृशुः कुरुक्षेत्रं(त्रे)महाव्रताः ॥ ५०
ततो यज्ञोपवीतैः स्वैस्तत्र कृत्वा सरस्वतीम् ।
जुहुवुश्चाग्निहोत्रांश्च चक्रुश्च विविधाः क्रियाः ॥ ५१
ततस्तमृषिसंघातं निराशं चिन्तयान्वितम् ।
दर्शयामास राजेन्द्र तेषामर्थे सरस्वती ॥ ५२
ततः कुञ्जान्बहून्कृत्वा सन्निवृत्ता सरस्वती ।
ऋषीणां पुण्यतपसां कारुण्याज्जनमेजय ॥ ५३
ततो निवृत्त्य राजेन्द्र तेषामर्थे सरस्वती ।
भूयः प्रतीच्यभिमुखी प्रसुस्राव सरिद्वरा ॥ ५४
अमोघा गमनं कृत्वा तेषां भूयो जगाम ह ।
अत्यद्भुतं महच्चक्रे तदा राजन्महानदी ॥ ५५
एवं स कुञ्जो राजन्वै नैमिषीय इति स्मृतः ।
कुरुश्रेष्ठ कुरुक्षेत्रे कुरुष्व महतीं क्रियाम् ॥ ५६
तत्र कुञ्जान्बहून्दृष्ट्वा निवृत्तां च सरस्वतीम् ।
बभूव विस्मयस्तत्र रामस्याथ महात्मनः ॥ ५७
उपस्पृश्य तु तत्रापि विधिवद्यदुनन्दनः ।
दत्त्वा देयान्द्विजातिभ्यो भाण्डानि विविधानि च
भक्ष्यं भोज्यं च विविधं ब्राह्मणेभ्यः प्रदाय च ।
ततः प्रायाद्बलो राजन्पूज्यमानो द्विजातिभिः ५९
सरस्वतीतीर्थवरं नानाद्विजगणायुतम् ।
बदरैर्जुदुम्बरामाकाप्लक्षाश्वत्थबिभीतकैः ॥ ६०
कङ्कोलैश्च पलाशैश्च करीरैः पीलुभिस्तथा ।
सरस्वतीतीर्थरुहैस्तरुभिर्विविधैस्तथा ॥ ६१
करूषकवरैश्चैव बिल्वैराम्रातकैस्तथा ।
अतिमुक्तकषण्डैश्च पारिजातैश्च शोभितम् ॥ ६२
कदलीवनभूयिष्ठं दृष्टिकान्तं मनोहरम् ।
वाय्वम्बुफलपर्णादैर्दन्तोलूखलिकैरपि ॥ ६३
तथाऽश्मकुट्टैर्वातेयैर्मुनिभिर्बहुभिर्वृतम् ।
स्वाध्यायघोषसंघुष्टं मृगयूथशताकुलम् ॥ ६४
अहिंस्रैर्धर्मपरमैर्नृभिरत्यर्थसेवितम् ।

अवेक्षार्थमिष्टसिद्ध्यर्थम् ॥ ३७ ॥ इच्छामि श्रोतुमिति शेष ॥ ३८ ॥ यज्ञोपवीतै. यज्ञसूत्रै. निराश सरस्वतीजललाभे इत्यर्थ. ॥ ५१ ॥ कुञ्जान् आत्मनो वासस्थानानि तिर्थविशेषानित्यर्थः ॥ ५३ ॥ अष्टत्रिंशोऽध्याय. ॥ ३८ ॥

सप्तसारस्वतं तीर्थमाजगाम हलायुधः । यत्र मङ्कणकः सिद्धस्तपस्तेपे महामुनिः ॥ ६५

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

सरस्वत्या सप्तधाविभागे कारणाभिधानम् ॥ १ ॥ सप्तभागानां कस्मिंश्चित्तीर्थे एकीभवनात्तत्तीर्थस्य सप्तसारस्वतनामप्राप्तिः ॥ २ ॥ मङ्कणमुनिचरितप्रतिपादनम् ॥ ३ ॥

जनमेजय उवाच ।
सप्तसारस्वतं कस्मात्कश्च मङ्कणको मुनिः ।
कथं सिद्धः स भगवान्कश्चास्य नियमोऽभवत् ॥ १
कस्य वंशे समुत्पन्नः किं चाधीतं द्विजोत्तम ।
एतन्मे सर्वमाचक्ष्व यथातत्त्वं महामुने ॥ २

वैशंपायन उवाच ।
सप्तनद्यः सरस्वत्या याभिर्व्याप्तमिदं जगत् ।
आहूता बलवद्भिर्हि तत्रतत्र सरस्वती ॥ ३
सुप्रभा काञ्चनाक्षी च विशाला च मनोरमा ।
सरस्वती चौघवती सुरेणुर्विमलोदका ॥ ४
पितामहस्य महतो वर्तमाने महामखे ।
विततेयज्ञवाटे च संसिद्धेषु द्विजातिषु ॥ ५
पुण्याहघोषैर्विमलैर्वेदानां निनदैस्तथा ।
देवेषु चैव व्यग्रेषु तस्मिन्यज्ञविधौ तदा ॥ ६
तत्र चैव महाराज दीक्षिते प्रपितामहे ।
यजतस्तस्य सत्रेण सर्वकामसमृद्धिना ॥ ७
मनसा चिन्तिता ह्यर्था धर्मार्थकुशलैस्तदा ।
उपतिष्ठन्ति राजेन्द्र द्विजातींस्तत्रतत्र ह ॥ ८
जगुश्च तत्र गन्धर्वा ननृतुश्चाप्सरोगणाः ।
वादित्राणि च दिव्यानि वादयामासुरञ्जसा ॥ ९
तस्य यज्ञस्य संपत्त्या तुतुषुर्देवतागणाः ।
विस्मयं परमं जग्मुः किमु मानुषयोनयः ॥ १०
वर्तमाने यथा यज्ञे पुष्करस्थे पितामहे ।
अब्रुवन्नृषयो राजन्नायं यज्ञो महागुणः ॥ ११
न दृश्यते सरिच्छ्रेष्ठा यस्मादिह सरस्वती ।
तच्छ्रुत्वा भगवान्प्रीतः सस्मारास्य सरस्वतीम् ॥ १२
पितामहेन यजता आहूता पुष्करेषु वै ।
सुप्रभा नाम राजेन्द्र नाम्ना तत्र सरस्वती ॥ १३
तां दृष्ट्वा मुनयस्तुष्टास्त्वरायुक्तां सरस्वतीम् ।
पितामहं मानयन्तीं क्रतुं ते बहुमेनिरे ॥ १४
एवमेषा सरिच्छ्रेष्ठा पुष्करेषु सरस्वती ।
पितामहार्थं संभूता तुष्ट्यर्थं च मनीषिणाम् ॥ १५
नैमिषे मुनयो राजन्समागम्य समासते ।
तत्र चित्राः कथा ह्यासन्वेदं प्रति जनेश्वर ॥ १६
यत्र ते मुनयो ह्यासन्नानास्वाध्यायवेदिनः ।
ते समागम्य मुनयः सस्मरुर्वै सरस्वतीम् ॥ १७
सा तु ध्याता महाराज मुनिभिः सत्रयाजिभिः ।
समागतानां राजेन्द्र साहाय्यार्थं महात्मनाम् ।
आजगाम महाभागा तत्र पुण्या सरस्वती ॥ १८
नैमिषे काञ्चनाक्षी तु मुनीनां सत्रयाजिनाम् ।
आगता सरितां श्रेष्ठा तत्र भारत पूजिता ॥ १९
गयस्य यजमानस्य गयेष्वेव महाक्रतुम् ।
आहूता सरितां श्रेष्ठा गययज्ञे सरस्वती ॥ २०
विशालां तु गयस्याहुर्ऋषयः संशितव्रताः ॥ २१
सरित्सा हिमवत्पार्श्वात्प्रस्रुता शीघ्रगामिनी ।
औद्दालकेस्तथा यज्ञे यजतस्तस्य भारत ॥ २२
समेते सर्वतः स्फीते मुनीनां मण्डले तदा ।
उत्तरे कोसलाभागे पुण्ये राजन्महात्मनः ॥ २३
औद्दालकेन यजता पूर्वं ध्याता सरस्वती ।
आजगाम सरिच्छ्रेष्ठा तं देशं मुनिकारणात् ॥ २४
पूज्यमाना मुनिगणैर्वल्कलाजिनसंवृतैः ।
मनोहरेति विख्याता सा हि तैर्मनसा वृता ॥ २५

विशाला सुतनुस्तथा । सरस्वत्योघमाला च सुवेणी निर्मलोदका इति ङ पाठ । सरस्वत्यूर्मिमाला च सुवेणी विमलोदका इति क पाठ ॥ ४ ॥ सस्मरु स्मृतवन्त ॥ १७ ॥ गयेषु गयदेशेषु ॥ २० ॥ मनोरमेति विख्याता सा हि तैर्मनसा कृता

[सुरेणुर्ऋषभे द्वीपे पुण्ये राजर्षिसेविते ।]
कुरोश्च यजमानस्य कुरुक्षेत्रे महात्मनः ।
आजगाम महाभागा सरिच्छ्रेष्ठा सरस्वती ॥ २६
ओघवत्यपि राजेन्द्र वसिष्ठेन महात्मना ।
समाहूता कुरुक्षेत्रे दिव्यतोया सरस्वती ॥ २७
दक्षेण यजता चापि गङ्गाद्वारे सरस्वती ।
सुवेणिरिति विख्याता प्रस्रुता शीघ्रगामिनी२८
विमलोदा भगवती ब्रह्मणा यजता पुनः ।
समाहूता ययौ तत्र पुण्ये हैमवते गिरौ ॥ २९
एकीभूतास्ततस्तास्तु तस्मिंस्तीर्थे समागताः ।
सप्तसारस्वतं तीर्थं ततस्तु प्रथितं भुवि ॥ ३०
इति सप्तसरस्वत्यो नामतः परिकीर्तिताः ।
सप्तसारस्वतं चैव तीर्थं पुण्यं तथा स्मृतम् ॥ ३१
शृणु मङ्कणकस्यापि कौमारब्रह्मचारिणः ।
आपगामवगाढस्य राजन्प्रक्रीडितं महत् ॥ ३२
दृष्ट्वा यदृच्छया तत्र स्त्रियमम्भसि भारत ।
स्नायन्तीं रुचिरापाङ्गीं दिग्वाससमनिन्दिताम् ।
सरस्वत्यां महाराज चस्कन्दे वीर्यमम्भसि ॥ ३३
तद्रेतः स तु जग्राह कलशे वै महातपाः ।
'ऋषिः परमधर्मात्मा तदा पुरुषसत्तम ॥' ३४
सप्तधा प्रविभागं तु कलशस्थं जगाम ह ।
तत्रर्षयः सप्त जाता जज्ञिरे मरुतां गणाः ॥ ३५
वायुवेगो वायुबलो वायुहा वायुमण्डलः ।
वायुज्वालो वायुरेता वायुचक्रश्च वीर्यवान् ।
एवमेते समुत्पन्ना मरुतां जनयित्नवः ॥ ३६
इदमन्यच्च राजेन्द्र शृण्वाश्चर्यतरं भुवि ।
महर्षेश्चरितं यादृक् त्रिषु लोकेषु विश्रुतम् ॥ ३७
पुरा मङ्कणकः सिद्धः कुशाग्रेणेति नः श्रुतम् ।
क्षतः किल करे राजंस्तस्य शाकरसोऽस्रवत् ॥३८
स वै शाकरसं दृष्ट्वा हर्षाविष्टः प्रनृत्तवान् ॥ ३९
ततस्तस्मिन्प्रनृत्ते वै स्थावरं जङ्गमं च यत् ।
प्रनृत्तमुभयं वीर तेजसा तस्य मोहितम् ॥ ४०
ब्रह्मादिभिः सुरै राजन्नृषिभिश्च तपोधनैः ।
विज्ञप्तो वै महादेव ऋषेरर्थे नराधिप ।
नायं नृत्येद्यथा देव तथा त्वं कर्तुमर्हसि ॥ ४१
ततो देवो मुनिं दृष्ट्वा हर्षाविष्टमतीव ह ।
सुराणां हितकामार्थं महादेवोऽभ्यभाषत ॥ ४२
भोभो ब्राह्मण धर्मज्ञ किमर्थं नृत्यते भवान् ।
हर्षस्थानं किमर्थं च तवेदमधिकं मुने ।
तपस्विनो धर्मपथे स्थितस्य द्विजसत्तम ॥ ४३
ऋषिरुवाच ।
किं न पश्यसि मे ब्रह्मन्कराच्छाकरसं स्रुतम् ।
यं दृष्ट्वा संप्रनृत्तो वै हर्षेण महता विभो ॥ ४४
तं प्रहस्याब्रवीद्देवो मुनिं रागेण मोहितम् ।
अहं न विस्मयं विप्र गच्छामीति प्रपश्य माम् ॥ ४५
एवमुक्त्वा मुनिश्रेष्ठं महादेवेन धीमता ।
अङ्गुल्यग्रेण राजेन्द्र स्वाङ्गुष्ठस्ताडितोऽभवत् ॥ ४६
ततो भस्म क्षताद्राजन्निर्गतं हिमसन्निभम् ॥ ४७
तदृष्ट्वा व्रीडितो राजन्स मुनिः पादयोर्गतः ।
मेने देवं महादेवमिदं चोवाच विस्मितः ॥ ४८
नान्यं देवादहं मन्ये रुद्रात्परतरं महत् ।
सुरासुरस्य जगतो गतिस्त्वमसि शूलधृक् ॥ ४९
त्वया सृष्टमिदं विश्वं वदन्तीह मनीषिणः ।
त्वामेव सर्वं विशति पुनरेव युगक्षये ॥ ५०
देवैरपि न शक्यस्त्वं परिज्ञातुं कुतो मया ।
त्वयि सर्वे स्म दृश्यन्ते भावा ये जगति स्थिताः ॥५१
त्वामुपासन्त वरदं देवा ब्रह्मादयोऽनघ ।
सर्वस्त्वमसि देवानां कर्ता कारयिता च ह ॥ ५२
त्वत्प्रसादात्सुराः सर्वे मोदन्तीहाकुतोभयाः ।
'त्वं प्रभुः परमैश्वर्यादधिकं भासि शंकर ॥ ५३
त्वयि ब्रह्मा च विष्णुश्च लोकान्संधाय तिष्ठतः ।
त्वन्मूलं च जगत्सर्वं भूतस्थावरजंगमम् ॥ ५४
स्वर्गं च परमं स्थानं नृणामभ्युदयार्थिनाम् ।
ददासि च प्रसन्नस्त्वं भक्तानां परमेश्वर ॥ ५५
अनावृत्तिपदं नृणां नित्यं निश्रेयसार्थिनाम् ।
ददासि कर्मिणां कर्म भावयन्ध्यानयोगतः ॥ ५६

इति झ. पाठ ॥ २५ ॥ सुरेणुरिति झ पाठ. ॥ २८ ॥ राजन्प्रजपित महत् इति क. पाठ. ॥ ३२ ॥ स्नायन्ती स्नान्तीम् ॥ ३३ ॥ मरुता प्राणवायूना एकोनपञ्चाशताम् । एतेषा तपसा मरुतो दित्यामुत्पन्ना इति कल्पान्तरविषयोऽयमर्थः ॥ ३६ ॥

न वृथाऽस्ति महादेव प्रसादस्ते महेश्वर ।
यस्मात्त्वयोपकरणात्करोमि कमलेक्षण ॥ ५७
प्रपद्ये शरणं शंभुं सर्वदा सर्वतः स्थितम् ।
कर्मणा मनसा वाचा तमेवाभिभजाम्यहम् ॥५८
जनमेजय उवाच ।'
एवं स्तुत्वा महादेवं स ऋषिः प्रणतोऽभवत् ॥५९
यदिदं चापलं देव कृतमेतत्स्मयादिकम् ।
ततः प्रसादयामि त्वां तपो मे न क्षरेदिति ॥ ६०
ततो देवः प्रीतमनास्तमृषिं पुनरब्रवीत् ।
तपस्ते वर्धतां विप्र मत्प्रसादात्सहस्रधा ॥ ६१
आश्रमे चेह वत्स्यामि त्वया सार्धमहं सदा ।
सप्तसारस्वते चास्मिन्यो मामर्चिष्यते नरः ॥ ६२
न तस्य दुर्लभं किंचिद्भवितेह परत्र वा ।
सारस्वतं च ते लोकं गमिष्यन्ति न संशयः ॥ ६३
एतन्मङ्कणकस्यापि चरितं भूरितेजसः ।
स हि पुत्रः सुकन्यायामुत्पन्नो मातरिश्वना ॥ ६४

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः ॥ ४० ॥

बलरामस्यौशनसतीर्थगमनम् ॥ १ ॥ तत्तीर्थस्य कपालमोचननामप्राप्तिहेतूक्ति ॥ २ ॥ बलस्य उशंग्वाश्रमगमनम् ॥ ३ ॥ उशङ्गुचरित्रकथनं बलस्य पृथूदकतीर्थे स्नानदानादि ॥ ४ ॥

वैशंपायन उवाच ।
उषित्वा तत्र रामस्तु संपूज्याश्रमवासिनः ।
तथा मङ्कणके प्रीतिं शुभां चक्रे हलायुधः ॥ १
दत्त्वा दानं द्विजातिभ्यो रजनीं तामुपोष्य च ।
पूजितो मुनिसङ्घैश्च प्रातरुत्थाय लाङ्गली ॥ २
अनुज्ञाप्य मुनीन्सर्वान्स्पृष्ट्वा तोयं च भारत ।
प्रययौ त्वरितो रामस्तीर्थहेतोर्महाबलः ॥ ३
ततस्त्वौशनसं तीर्थमाजगाम हलायुधः ।
कपालमोचनं नाम यत्र मुक्तो महामुनिः ॥ ४
महता शिरसा राजन्ग्रस्तजङ्घो महोदरः ।
राक्षसस्य महाराज रामक्षिप्तस्य वै पुरा ॥ ५
तत्र पूर्वं तपस्तप्तं काव्येन सुमहात्मना ।
यत्रास्य नीतिरखिला प्रादुर्भूता महात्मनः ।
यत्रस्थश्चिन्तयामास दैत्यदानवविग्रहम् ॥ ६
तत्प्राप्य च बलो राजंस्तीर्थप्रवरमुत्तमम् ।
विधिवद्वै ददौ वित्तं ब्राह्मणानां महात्मनाम् ॥ ७
जनमेजय उवाच ।
कपालमोचनं ब्रह्मन्कथं यत्र महामुनिः ।
मुक्तः कथं चास्य शिरो लग्नं केन च हेतुना ॥ ८

स्मयादिकं गर्वादिकम् ॥६०॥ एकोनचत्वारिंशोऽध्याय ॥३९॥

वैशंपायन उवाच ।
पुरा वै दण्डकारण्ये राघवेण महात्मना ।
वसता राजशार्दूल राक्षसाञ्शमयिष्यता ॥ ९
जनस्थाने शिरश्छिन्नं राक्षसस्य दुरात्मनः ।
क्षुरेण शितधारेण तत्पपात महावने ॥ १०
महोदरस्य तल्लग्नं जङ्घायां वै यदृच्छया ।
वने विचरतो राजन्नस्थि भित्त्वाऽस्फुरत्तदा ॥ ११
स तेन लग्नेन तदा द्विजातिर्न शशाक ह ।
अभिगन्तुं महाप्राज्ञस्तीर्थान्यायतनानि च ॥ १२
स पूतिना विस्रवता वेदनार्तो महामुनिः ।
जगाम सर्वतीर्थानि पृथिव्यां चेति नः श्रुतम् ॥ १३
स गत्वा सरितः सर्वाः समुद्रांश्च महातपाः ।
कथयामास तत्सर्वमृषीणां भावितात्मनाम् ॥ १४
आप्लुत्य सर्वतीर्थेषु न च मोक्षमवाप्तवान् ।
स तु शुश्राव विप्रेन्द्रो मुनीनां वचनं महत् ॥ १५
सरस्वत्यास्तीर्थवरं ख्यातमौशनसं तदा ।
सर्वपापप्रशमनं सिद्धिक्षेत्रमनुत्तमम् ॥ १६
स तु गत्वा ततस्तत्र तीर्थमौशनसं द्विजः ॥ १७
तत औशनसे तीर्थे तस्योपस्पृशतस्तदा ।

तीर्थमुपास्पृशादिति शेषः ॥ १७ ॥

तच्छिरश्चरणं मुक्त्वा पपातान्तर्जले तदा ॥ १८
विमुक्तस्तेन शिरसा परं सुखमवाप ह ।
स चाप्यन्तर्जले मूर्धा जगामादर्शनं विभो ॥ १९
ततः स विरुजो राजन्पूतात्मा वीतकल्मषः ।
आजगामाश्रमं प्रीतः कृतकृत्यो महोदरः ॥ २०
सोऽथ गत्वाऽऽश्रमं पुण्यं विप्रमुक्तो महातपाः ।
कथयामास तत्सर्वमृषीणां भावितात्मनाम् ॥ २१
ते श्रुत्वा वचनं तस्य ततस्तीर्थस्य मानद ।
कपालमोचनमिति नाम चक्रुः समागताः ॥ २२
स चापि तीर्थप्रवरं पुनर्गत्वा महानृषिः ।
पीत्वा पयः सुविपुलं सिद्धिमायात्तदा मुनिः ॥ २३
तत्र दत्त्वा बहून्देयान्विप्रान्संपूज्य माधवः ।
जगाम तत्र राजेन्द्र उशङ्गोराश्रमं तदा ॥ २४
यत्र तप्तं तपो घोरमार्ष्टिषेणेन भारत ।
ब्राह्मण्यं लब्धवान्यत्र विश्वामित्रो महामुनिः ॥ २५
सर्वकामसमृद्धं च तदाश्रमपदं महत् ।
मुनिभिर्ब्राह्मणैश्चैव सेवितं सर्वदा विभो ॥ २६
ततो हलधरः श्रीमान्ब्राह्मणैः परिवारितः ।
जगाम तत्र राजेन्द्र उशङ्गुस्तनुमत्यजत् ॥ २७
उशङ्गुर्ब्राह्मणो वृद्धस्तपोनित्यश्च भारत ।
देहन्यासे कृतमना विचिन्त्य बहुधा तदा ॥ २८
ततः सर्वानुपादाय तनयान्वै महातपाः ।
उशङ्गुरब्रवीत्तत्र नयध्वं मां पृथूदकम् ॥ २९
विज्ञायातीतवयसमुशङ्गुं ते तपोधनाः ।
तं च तीर्थमपानिन्युः सरस्वत्यास्तपोधनम् ॥ ३०
स तैः पुत्रैस्तदा धीमानानीतो वै सरस्वतीम् ।
पुण्यां तीर्थशतोपेतां विप्रसङ्घैर्निषेविताम् ॥ ३१
स तत्र विधिना राजन्नाप्लुत्य सुमहातपाः ।
ज्ञात्वा तीर्थगुणांश्चैव प्राहेदमृषिसत्तमः ।
सुप्रीतः पुरुषव्याघ्र सर्वान्पुत्रानुपासतः ॥ ३२
सरस्वत्युत्तरे तीरे यस्त्यजेदात्मनस्तनुम् ।
पृथूदके जप्यपरो नैनं श्वो मरणं तपेत् ॥ ३३
'इत्युक्त्वा स्वां तनुं त्यक्त्वा प्रपेदे वैष्णवं पदम् ।'
तत्राप्लुत्य स धर्मात्मा उपस्पृश्य हलायुधः ।
दत्त्वा चैव बहून्देयान्विप्राणां विप्रवत्सलः ॥ ३४
ससर्ज यत्र भगवाँल्लोकाँल्लोकपितामहः ॥ ३५
यत्रार्ष्टिषेणः कौरव्य ब्राह्मण्यं संशितव्रतः ।
तपसा महता राजन्प्राप्तवानृषिसत्तमः ॥ ३६
सिन्धुद्वीपश्च राजर्षिर्देवापिश्च महातपाः ।
ब्राह्मण्यं लब्धवान्यत्र विश्वामित्रस्तथा मुनिः ३७
महातपस्वी भगवानुग्रतेजा महातपाः ।
तत्राजगाम बलवान्बलभद्रः प्रतापवान् ॥ ३८

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥

एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

आर्ष्टिषेणेन पृथूदकतीर्थे तपश्चर्यया कृत्स्नवेदाधिगमः ॥ १ ॥ विश्वामित्रादीनां तत्तत्तीर्थे तपश्चर्यया ब्राह्मण्याधिगमः ॥ २ ॥ बलभद्रस्य तत्र स्नानादिपूर्वक बकाश्रमंप्रति गमनम् ॥ ३ ॥

जनमेजय उवाच ।
आर्ष्टिषेणस्तथा ब्रह्मन्विपुलं तप्तवांस्तपः ।
सिंधुद्वीपः कथं चापि ब्राह्मण्यं लब्धवांस्तदा ॥ १
देवापिश्च कथं ब्रह्मन्विश्वामित्रश्च सत्तम ।
तन्ममाचक्ष्व भगवन्परं कौतूहलं हि मे ॥ २
वैशंपायन उवाच ।
पुरा कृतयुगे राजन्नार्ष्टिषेणो द्विजोत्तमः ।
वसन्गुरुकुले नित्यं नित्यमध्ययने रतः ॥ ३
तस्य राजन्गुरुकुले वसतो नित्यमेव च ।
समाप्तिं नागमद्विद्या नापि वेदा विशांपते ॥ ४
स निर्विण्णस्ततो राजंस्तपस्तेपे महातपाः ।
ततो वै तपसा तेन प्राप्य वेदाननुत्तमान् ॥ ५

त्रिशङ्कोराश्रम तदा इति क. पाठ । रुशङ्गोराश्रम तदा इति झ. पाठः ॥ २४ ॥ अक्षय स्वर्गमाप्नोतीत्यर्थ. ॥ ३३ ॥ ब्राह्मण ब्रह्मसघातो वेदसमूह इति यावत् । तत स्वार्थे ष्यञ् । ब्राह्मणं ब्रह्मसघाते इति मेदिनी ॥ ३६ ॥ चत्वारिंशोऽध्याय. ॥ ४० ॥

स विद्वान्वेदयुक्तश्च सिद्धश्चाप्यृषिसत्तमः ।
तत्र तीर्थे वरान्प्रादात्रीनेव सुमहातपाः ॥ ६
अस्मिंस्तीर्थे महानद्या अद्यप्रभृति मानवः ।
आप्लुतो वाजिमेधस्य फलं प्राप्स्यति पुष्कलम् ॥ ७
अद्यप्रभृति नैवात्र भयं व्यालाद्भविष्यति ।
अपि चाल्पेन कालेन फलं प्राप्स्यति पुष्कलम् ॥ ८
एवमुक्त्वा महातेजा जगाम त्रिदिवं मुनिः ।
एवं सिद्धः स भगवानार्ष्टिषेणः प्रतापवान् ॥ ९
तस्मिन्नेव तदा तीर्थे सिन्धुद्वीपः प्रतापवान् ।
देवापिश्च महाराज ब्राह्मण्यं प्रापतुर्महत् ॥ १०
तथाच कौशिकस्तात तपोनित्यो जितेन्द्रियः ।
तपसा वै सुतप्तेन ब्राह्मणत्वमवाप्तवान् ॥ ११
गाधिर्नाम महानासीत्क्षत्रियः प्रथितो भुवि ।
तस्य पुत्रोऽभवद्राजन्विश्वामित्रः प्रतापवान् ॥ १२
स राजा कौशिकस्तात महायोग्यभवत्किल ।
स पुत्रमभिषिच्याथ विश्वामित्रं महातपाः ॥ १३
देहन्यासे मनश्चक्रे तमूचुः प्रणताः प्रजाः ।
न गन्तव्यं महाप्राज्ञ त्राहि चास्मान्महाभयात् १४
एवमुक्तः प्रत्युवाच ततो गाधिः प्रजास्ततः ।
विश्वस्य जगतो गोप्ता भविष्यति सुतो मम ॥ १५
इत्युक्त्वा तु ततो गाधिर्विश्वामित्रं निवेश्य च ।
जगाम त्रिदिवं राजन्विश्वामित्रोऽभवन्नृपः ॥ १६
न स शक्नोति पृथिवीं यत्नवानपि रक्षितुम् ।
ततः शुश्राव राजा स राक्षसेभ्यो महाभयम् ॥ १७
निर्ययौ नगराच्चापि चतुरङ्गबलान्वितः ।
स गत्वा दूरमध्वानं वसिष्ठाश्रममभ्ययात् ॥ १८
तस्य ते सैनिका राजंश्चक्रुस्तत्रानयान्बहून् ।
ततस्तु भगवान्विप्रो वसिष्ठो श्रममभ्ययात् ।
ददृशेऽथ ततः सर्वं भज्यमानं महावनम् ॥ १९
तस्य क्रुद्धो महाराज वसिष्ठो मुनिसत्तमः ।
सृजस्व शबरान्घोरानिति स्वां गामुवाच ह ॥ २०
तथोक्ता साऽसृजद्धेनुः पुरुषान्घोरदर्शनान् ।
ते तु तद्बलमासाद्य बभञ्जुः सर्वतोदिशम् ॥ २१
तच्छ्रुत्वा विद्रुतं सैन्यं विश्वामित्रस्तु गाधिजः ।
तपः परं मन्यमानस्तपस्येव मनो दधे ॥ २२
सोऽस्मिंस्तीर्थवरे राजन्सरस्वत्याः समाहितः ।
नियमैश्चोपवासैश्च कर्शयन्देहमात्मनः ॥ २३
जलाहारो वायुभक्षः पर्णाहारश्च सोऽभवत् ।
तथा स्थण्डिलशायी च ये चान्ये नियमाः पृथक् २४
असकृत्तस्य देवास्तु व्रतविघ्नं प्रचक्रिरे ।
न चास्य नियमाद्बुद्धिरपयाति महात्मनः ॥ २५
ततः परेण यत्नेन तप्त्वा बहुविधं तपः ।
तेजसा भास्करागारो गाधिजः समपद्यत ॥ २६
तपसा तु तथायुक्तं विश्वामित्रं पितामहः ।
अमन्यत महातेजा वरदोऽदर्शयत्तदा ॥ २७
स तु वव्रे वरं राजन्स्यामहं ब्राह्मणस्त्विति ।
तथेति चाब्रवीद्ब्रह्मा सर्वलोकपितामहः ॥ २८
स लब्ध्वा तपसोग्रेण ब्राह्मणत्वं महायशाः ।
विचचार महीं कृत्स्नां कृतकामः सुरोपमः ॥ २९
तस्मिंस्तीर्थवरे रामः प्रदाय विविधं वसु ।
पयस्विनीस्तथा धेनूर्यानानि शयनानि च ॥ ३०
अथ वस्त्राण्यलंकारं भक्ष्यं पेयं च शोभनम् ।
अददन्मुदितो राजन्पूजयित्वा द्विजोत्तमान् ॥ ३१
ययौ राजंस्ततो रामो बकस्याश्रममन्तिकात् ।
यत्र तेपे तपस्तीव्रं दाल्भ्यो बक इति श्रुतिः ॥ ३२

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

बलदेवस्यावाकीर्णतीर्थगमनम् ॥ १ ॥ बकमुनिचरित्रकथनम् ॥ २ ॥ बलदेवस्य ततो वसिष्ठापवाहतीर्थगमनम् ॥ ३ ॥

वैशंपायन उवाच ।
ब्रह्मयोनिभिराकीर्णं जगाम यदुनन्दनः ।
यत्र दाल्भ्यो बको राजन्पश्चर्थं सुमहातपाः ।
जुहाव धृतराष्ट्रस्य राष्ट्रं कोपसमन्वितः ॥ १

ब्रह्मयोनेरवाकीर्णमिति झ. पाठः । तत्र ब्रह्मयोनेः ब्राह्मण्योत्पादकात्तीर्थादवाकीर्णं नाम दाल्भ्यसेवित तीर्थं जगामेत्यर्थः.

तपसा घोररूपेण कर्शयन्देहमात्मनः ।
क्रोधेन महताऽऽविष्टो धर्मात्मा वै प्रतापवान् ॥ २
पुरा हि नैमिशीयानां सत्रे द्वादशवार्षिके ।
वृत्ते विश्वजितोऽन्ते वै पाञ्चालानृषयोऽगमन् ॥ ३
तत्रेश्वरमयाचन्त दक्षिणार्थं मनस्विनः ।
'तत्र ते लेभिरे राजन्पाञ्चालेभ्यो महर्षयः ।'
बलान्वितान्वत्सतरान्निर्व्याधीन्सप्तविंशतिम् ॥ ४
तानब्रवीद्बको दाल्भ्यो विभजध्वं पशूनिति ।
पशूनेतानहं त्यक्त्वा भिक्षिष्ये राजसत्तमम् ॥ ५
एवमुक्त्वा बको राजन्नृषीन्सर्वान्प्रतापवान् ।
जगाम धृतराष्ट्रस्य भवनं ब्राह्मणोत्तमः ॥ ६
स समीपगतो भूत्वा धृतराष्ट्रं जनेश्वरम् ।
अयाचत पशून्दाल्भ्यः स चैनं रुषितोऽब्रवीत् ॥ ७
यदृच्छया मृता दृष्ट्वा गास्तदा नृपसत्तमः ।
एतान्पशून्नय क्षिप्रं ब्रह्मबन्धो यदीच्छसि ॥ ८
ऋषिस्त्वथ बकः क्रुद्धश्चिन्तयामास धर्मवित् ।
अहो बत नृशंसं वै वाक्यमुक्तोऽस्मि संसदि ॥ ९
चिन्तयित्वा मुहूर्तेन रोषाविष्टो द्विजोत्तमः ।
मतिं चक्रे विनाशाय धृतराष्ट्रस्य भूपतेः ॥ १०
स तूत्कृत्य मृतानां वै मांसानि मुनिसत्तमः ।
जुहाव धृतराष्ट्रस्य राष्ट्रं नरपतेः पुरा ॥ ११
अवाकीर्णे सरस्वत्यास्तीर्थे प्रज्वाल्य पावकम् ।
बको दाल्भ्यो महाराज नियमं परमं स्थितः ॥ १२
स तैरेव जुहावाग्नौ राष्ट्रं मांसैर्महातपाः ॥ १३
तस्मिंस्तु विधिवत्सत्रे संप्रवृत्ते सुदारुणे ।
अक्षीयत ततो राष्ट्रं धृतराष्ट्रस्य पार्थिव ॥ १४
छिद्यमानं यथा कान्तं वनं परशुना विभो ।
बभूवापद्गतं तच्च व्यवकीर्णमचेतनम् ॥ १५
दृष्ट्वा तथाऽवकीर्णं तु राष्ट्रं स मनुजाधिपः ।
बभूव दुर्मना राजा चिन्तयामास च प्रभुः ॥ १६
मोक्षार्थमकरोद्यत्नं ब्राह्मणैः सहितः पुरा ।
न च श्रेयोऽध्यगच्छत्तु क्षीयते राष्ट्रमेव च ॥ १७
यदा स पार्थिवः खिन्नस्ते च विप्रास्तदाऽनघ ॥ १८
यदा चापि न शक्नोति राष्ट्रं मोक्षयितुं नृपः ।
अथ विप्रादिकांस्तत्र पप्रच्छ जनमेजय ॥ १९
ततो विप्रादिकाः प्राहुः पशुविप्रकृतस्त्वया ।
मांसैरभिजुहोतीदं तव राष्ट्रं मुनिर्बकः ॥ २०
तेन ते हूयमानस्य राष्ट्रस्यास्य क्षयो महान् ।
तस्यैतत्तपसः कर्म येन तेऽद्य लयो महान् ॥ २१
'यदीच्छसि महाबाहो शान्तिं राष्ट्रस्य भूमिप ।'
अपां कुञ्जे सरस्वत्यास्तं प्रसादय पार्थिव ॥ २२
वैशंपायन उवाच ।
सरस्वतीं ततो गत्वा स राजा बकमब्रवीत् ।
निपत्य शिरसा भूमौ प्राञ्जलिर्भरतर्षभ ॥ २३
प्रसादये त्वां भगवन्नपराधं क्षमस्व मे ।
मम दीनस्य लुब्धस्य मौर्ख्येण हतचेतसः ।
त्वं गतिस्त्वं च मे नाथः प्रसादं कर्तुमर्हसि ॥ २४
तं तथा विलपन्तं तु शोकोपहतचेतसम् ।
दृष्ट्वा तस्य कृपा जज्ञे राष्ट्रं तस्य व्यमोचयत् ॥ २५
ऋषिः प्रसन्नस्तस्याभूत्संरम्भं च विहाय सः ।
मोक्षार्थं तस्य राज्यस्य जुहाव पुनराहुतिम् ॥ २६
मोक्षयित्वा ततो राष्ट्रं प्रतिगृह्य पशून्बहून् ।
हृष्टात्मा नैमिशारण्यं जगाम पुनरेव सः ॥ २७
धृतराष्ट्रोऽपि धर्मात्मा स्वस्थचेता महामनाः ।
स्वमेव नगरं राजन्प्रतिपेदे महर्द्धिमत् ॥ २८
तत्र तीर्थे महाराज बृहस्पतिरुदारधीः ।
असुराणामभावाय भवाय च दिवौकसाम् ॥ २९
मांसैरभिजुहावेष्टिमक्षीयन्त ततोऽसुराः ।
दैवतैरपि संभग्ना जितकाशिभिराहवे ॥ ३०
तत्रापि विधिवद्दत्त्वा ब्राह्मणेभ्यो महायशाः ।
वाजिनः कुञ्जरांश्चैव रथांश्चाश्वतरीयुतान् ॥ ३१
रत्नानि च महार्हाणि धनं धान्यं च पुष्कलम् ।
ययौ तीर्थं महाबाहुर्यायातं पृथिवीपते ॥ ३२
तत्र यज्ञे ययातेश्च महाराज सरस्वती ।
सर्पिः पयश्च सुस्राव नाहुषस्य महात्मनः ॥ ३३

॥ १ ॥ पाञ्चालान्विश्वजितो यज्ञस्यान्ते अगमन् ॥ ३ ॥ ईश्वरं पाञ्चालराजम् ॥ ४ ॥ एतान्पाञ्चालराजदत्तान् । स्वय तत्र भाग न गृहीतवानित्यर्थ ॥ ५ ॥ अथ वै प्राश्निकास्तत्रेति झ. पाठः ॥ १९ ॥ द्विचत्वारिंशोऽध्याय ॥ ४२ ॥

तत्रेष्ट्वा पुरुषव्याघ्रो ययातिः पृथिवीपतिः ।
आक्रामदूर्ध्वं मुदितो लेभे लोकांश्च पुष्कलान् ३४
पुनस्तत्र च राज्ञस्तु ययातेर्यजतः प्रभोः ।
औदार्यं परमं कृत्वा भक्तिं चात्मनि शाश्वतीम् ।
ददौ कामान्ब्राह्मणेभ्यो यान्यान्यो मनसेच्छति ३५
यो यत्र स्थित एवेह आहूतो यज्ञसंस्तरे ।
तस्यतस्य सरिच्छ्रेष्ठा गृहादि शयनादिकम् ।
षड्रसं भोजनं चैव दानं नानाविधं तथा ॥ ३६
ते मन्यमाना राज्ञस्तु संप्रदानमनुत्तमम् ।
राजानं तुष्टुवुः प्रीता दत्त्वा चैवाशिषः शुभाः ॥ ३७
तत्र देवाः सगन्धर्वाः प्रीता यज्ञस्य संपदा ।
विस्मिता मानुषाश्चासन्दृष्ट्वा तां यज्ञसंपदम् ॥ ३८
ततस्तालकेतुर्महाधर्मकेतु-
र्महात्मा कृतात्मा महादाननित्यः ।
वसिष्ठापवाहं महाभीमवेगं
धृतात्मा जितात्मा समभ्याजगाम ॥ ३९

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

वसिष्ठापवाहतीर्थस्य तन्नामप्राप्तिप्रकारकथनम् ॥ १ ॥

जनमेजय उवाच ।
वसिष्ठापवाहो ब्रह्मन्वै भीमवेगः कथं नु सः ।
किमर्थं च सरिच्छ्रेष्ठा तमृषिं प्रत्यवाहयत् ॥ १
कथमस्याभवद्वैरं कारणं किं च तत्प्रभो ।
शंस पृष्टो महाप्राज्ञ न हि तृप्यामि कथ्यति ॥ २
वैशंपायन उवाच ।
विश्वामित्रस्य विप्रर्षेर्वसिष्ठस्य च भारत ।
भृशं वैरमभूद्राजंस्तपःस्पर्धाकृतं महत् ॥ ३
आश्रमो वै वसिष्ठस्य स्थाणुतीर्थेऽभवन्महान् ।
पूर्वतः पार्श्वतश्चासीद्विश्वामित्रस्य धीमतः ॥ ४
यत्र स्थाणुर्महाराज तप्तवान्परमं तपः ।
तत्रास्य कर्म तद्घोरं प्रवदन्ति मनीषिणः ॥ ५
यत्रेष्ट्वा भगवान्स्थाणुः पूजयित्वा सरस्वतीम् ।
स्थापयामास तत्तीर्थं स्थाणुतीर्थमिति प्रभो ॥ ६
तत्र तीर्थे सुराः स्कन्दमभ्यषिञ्चन्नराधिप ।
सैनापत्येन महता सुरारिविनिबर्हणम् ॥ ७
तस्मिन्सारस्वते तीर्थे विश्वामित्रो महामुनिः ।
वसिष्ठं चालयामास तपसोग्रेण तच्छृणु ॥ ८
विश्वामित्रवसिष्ठौ तावहन्यहनि भारत ।
स्पर्धां तपःकृतां तीव्रां चक्रतुस्तौ तपोधनौ ॥ ९
तत्राप्यधिकसंतप्तो विश्वामित्रो महामुनिः ।
दृष्ट्वा तेजो वसिष्ठस्य चिन्तामभिजगाम ह ॥ १०
तस्य बुद्धिरियं ह्यासीद्धर्मनित्यस्य भारत ।
इयं सरस्वती तूर्णं मत्समीपं तपोधनम् ॥ ११
आनयिष्यति वेगेन वसिष्ठं जपतां वरम् ।
इहागतं द्विजश्रेष्ठं हनिष्यामि न संशयः ॥ १२
एवं निश्चित्य भगवान्विश्वामित्रो महामुनिः ।
सस्मार सरितां श्रेष्ठां क्रोधसंरक्तलोचनः ॥ १३
सा ध्याता मुनिना तेन व्याकुलत्वं जगाम ह ।
गत्वा चैनं महावीर्यं महाकोपं च भामिनी ॥ १४
तदा तं वेपमानाङ्गी विवर्णा प्राञ्जलिर्भृशम् ।
उपतस्थे मुनिवरं विश्वामित्रं सरस्वती ॥ १५
हतवीरा यथा नारी साऽभवद्दुःखिता भृशम् ।
ब्रूहि किं करवाणीति प्रोवाच मुनिसत्तमम् ॥ १६
तामुवाच मुनिः क्रुद्धो वसिष्ठं शीघ्रमानय ।
यावदेनं निहन्म्यद्य तच्छ्रुत्वा व्यथिता नदी ॥ १७
साञ्जलिं तु ततः कृत्वा पुण्डरीकनिभेक्षणा ।
प्राकम्पत भृशं भीता वायुनेवाहता लता ॥ १८
तथारूपां तु तां दृष्ट्वा मुनिराह महानदीम् ।
अविचारं वसिष्ठं त्वमानयस्वान्तिकं मम ॥ १९

अपोह्यते तीरे प्रास्यतेऽनेनेत्यपवाहस्तीर्थविशेषः ॥ १ ॥

कथ्यति त्वयि कथयति सति ॥ २ ॥

सा तस्य वचनं श्रुत्वा ज्ञात्वा पापं चिकीर्षितम् ।
वसिष्ठस्य प्रभावं च जानन्त्यप्रतिमं भुवि ॥ २०
साऽभिगम्य वसिष्ठं च इदमर्थमचोदयत् ।
यदुक्ता सरितांश्रेष्ठा विश्वामित्रेण धीमता ॥ २१
उभयोः शापयोर्भीता वेपमाना पुनःपुनः ।
चिन्तयित्वा महाशापमृषिवित्रासिता भृशम् २२
तां कृशां च विवर्णां च दृष्ट्वा चिन्तासमन्विताम् ।
उवाच राजन्धर्मात्मा वसिष्ठो द्विपदां वरः॥ २३
पाह्यात्मानं सरिच्छ्रेष्ठे वह मां शीघ्रगामिनी ।
विश्वामित्रः शपेद्धि त्वां मा कृथास्त्वं विचारणाम्
तस्य तद्वचनं श्रुत्वा कृपाशीलस्य सा सरित् ।
चिन्तयामास कौरव्य किंकृत्वा सुकृतं भवेत्॥२५
तस्याश्चिन्ता समुत्पन्ना वसिष्ठो मय्यतीव हि ।
कृतवान्हि दयां नित्यं तस्य कार्यं हितं मया ॥२६
अथ कूले स्वके राजञ्जपन्तमृषिसत्तमम् ।
जुह्वानं कौशिकं प्रेक्ष्य सरस्वत्यभ्यचिन्तयत् ॥ २७
इदमन्तरमित्येवं ततः सा सरितां वरा ।
कूलापहारमकरोत्स्वेन वेगेन सा सरित् ॥ २८
तेन कूलापहारेण मैत्रावरुणिरौह्यत ।
उह्यमानः स तुष्टाव तदा राजन्सरस्वतीम् ॥ २९
पितामहस्य सरसः प्रवृत्ताऽसि सरस्वति ।
व्याप्तं चेदं जगत्सर्वं तैर्वैवाम्भोभिरुत्तमैः ॥ ३०
त्वमेवाकाशगा देवि मेघेषु सृजसे पयः ।
सर्वाश्चापस्त्वमेवेति यथा वयमधीमहि ॥ ३१
पुष्टिर्द्युतिस्तथा कीर्तिः सिद्धिर्बुद्धिरुमा तथा ।
त्वमेव वाणी स्वाहा त्वं तवायत्तमिदं जगत् ।
त्वमेव सर्वभूतेषु वससीह चतुर्विधा ॥ ३२
वैशंपायन उवाच ।
एवं सरस्वती राजन्स्तूयमाना महर्षिणा ।
वेगेनोवाह तं विप्रं विश्वामित्राश्रमं प्रति ॥ ३३
न्यवेदयत चाभीक्ष्णं विश्वामित्राय तं मुनिम् ३४
तमानीतं सरस्वत्या दृष्ट्वा कोपसमन्वितः ।
अथान्वेषत्प्रहरणं वसिष्ठान्तकरं तदा ॥ ३५
तं तु क्रुद्धमभिप्रेक्ष्य ब्रह्मवध्याभयान्नदी ।
अपोवाह वसिष्ठं तु प्राचीं दिशमतन्द्रिता ।
उभयोः कुर्वती वाक्यं वञ्चयित्वा च गाधिजम् ३६
ततोपवाहितं दृष्ट्वा वसिष्ठमृषिसत्तमम् ।
अब्रवीत्त्वथ संक्रुद्धो विश्वामित्रः सरस्वतीम् ॥ ३७
यस्मान्मां त्वं सरिच्छ्रेष्ठे वञ्चयित्वा पुनर्गता ।
शोणितं वह कल्याणि राक्षसानां च संमतम् ॥ ३८
ततः सरस्वती शप्ता विश्वामित्रेण धीमता ।
अवहच्छोणितोन्मिश्रं तोयं संवत्सरं तदा ॥ ३९
अथर्षयश्च देवाश्च गन्धर्वाप्सरसस्तदा ।
सरस्वतीं तथा दृष्ट्वा बभूवुर्भृशदुःखिताः ॥ ४०
एवं वसिष्ठापवाहो लोके ख्यातो जनाधिप ।
आगच्छच्च पुनर्मार्गं स्वमेव सरितां वरा ॥ ४१

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

विश्वामित्रशापाद्रुधिरजलायाः सरस्वत्या ऋषिभिस्तपसा शोधनम् ॥ १ ॥ इन्द्रेण सरस्वत्यरुणासंगमे यजनादिना ब्रह्महत्यापरिहरणम् ॥ २ ॥ बलरामस्य तत्र स्नानादिपूर्वकं तस्मात्सोमतीर्थगमनम् ॥ ३ ॥

वैशंपायन उवाच ।
सा शप्ता तेन क्रुद्धेन विश्वामित्रेण धीमता ।
तस्मिंस्तीर्थवरे शुभ्रे शोणितं समुपावहत् ॥ १
अथाजग्मुस्ततो राजन्राक्षसास्तत्र भारत ।
तत्र ते शोणितं सर्वे पिबन्तः सुखमासते ॥ २
तृप्ताश्च सुभृशं तेन सुखिता विगतज्वराः ।
नृत्यन्तश्च हसन्तश्च यथा स्वर्गजितस्तथा ॥ ३
कस्यचित्त्वथ कालस्य ऋषयः सुतपोधनाः ।

वय ऋषय त्वत्तोऽधीमहि वेदान् । कदाचिदनावृष्ट्या मृतेषु ऋषिषु सप्रदायोच्छेदे सतीति भाव ॥ ३१ ॥

त्रिचत्वारिंशोऽध्याय ॥ ४२ ॥

तीर्थयात्रां समाजग्मुः सरस्वत्यां महीपते ॥ ४
तेषु सर्वेषु तीर्थेषु स्वाप्लुत्य मुनिपुङ्गवाः ।
प्राप्य प्रीतिं परां चापि तपोलुब्धा विशारदाः ५
प्रययुर्हि ततो राजन्येन तीर्थमसङ्गवहम् ।
अथागम्य महाभागास्तत्तीर्थं दारुणं तदा ॥ ६
दृष्ट्वा तोयं सरस्वत्याः शोणितेन परिप्लुतम् ।
पीयमानं च रक्षोभिर्बहुभिर्नृपसत्तम ॥ ७
तान्दृष्ट्वा राक्षसान्राजन्मुनयः संशितव्रताः ।
परित्राणे सरस्वत्याः परं यत्नं प्रचक्रिरे ॥ ८
ते तु सर्वे महाभागाः समागम्य महाव्रताः ।
आहूय सरितां श्रेष्ठामिदं वचनमब्रुवन् ॥ ९
कारणं ब्रूहि कल्याणि किमर्थं ते ह्रदो ह्ययम् ।
एवमग्राह्यतां यातः श्रुत्वाऽध्यास्यामहे वयम् १०
ततः सा सर्वमाचष्ट यथावृत्तं प्रवेपती ।
दुःखितामथ तां दृष्ट्वा ऊचुस्ते वै तपोधनाः ॥ ११
कारणं श्रुतमस्माभिः शापश्चैव श्रुतोऽनघे ।
करिष्यन्ति तु यत्प्राप्तं सर्व एव तपोधनाः ॥ १२
एवमुक्त्वा सरिच्छ्रेष्ठामूचुस्तेऽथ परस्परम् ।
विमोचयामहे सर्वे शापादेतां सरस्वतीम् ॥ १३
ते सर्वे ब्राह्मणा राजंस्तपोभिर्नियमैस्तथा ।
उपवासैश्च विविधैर्यमैः कष्टव्रतैस्तथा ॥ १४
आराध्य पशुभर्तारं महादेवं जगत्पतिम् ।
मोक्षयामासुस्तां देवीं सरिच्छ्रेष्ठां सरस्वतीम् १५
तेषां तु सा प्रभावेण प्रकृतिस्था सरस्वती ।
प्रसन्नसलिला जज्ञे यथा पूर्वं तथैव हि ।
निर्मुक्ता च सरिच्छ्रेष्ठा विबभौ सा यथा पुरा॥१६
दृष्ट्वा तोयं सरस्वत्या मुनिभिस्तैस्तथा कृतम् ।
तानेव शरणं जग्मू राक्षसाः क्षुधितास्तथा ॥१७
कृताञ्जलिं ततो राजन्राक्षसाः क्षुधयाऽर्दिताः ।
ऊचुस्तान्वै मुनीन्सर्वान्कृपायुक्तान्पुनःपुनः॥१८
वयं च क्षुधिताश्चैव धर्माद्धीनाश्च शाश्वतात् ।
न च नः कामकारोऽयं यद्वयं पापकारिणा॥ १९
युष्माकं चाप्रसादेन दुष्कृतेन च कर्मणा ।

पक्षोऽयं वर्धतेऽस्माकं यतः स्मो ब्रह्मराक्षसाः ।
योषितां चैव पापेन योनिदोषकृतेन च ॥ २०
एवं हि वैश्यशूद्राणां क्षत्रियाणां तथैव च ।
ये ब्राह्मणान्प्रद्विषन्ति ते भवन्तीह राक्षसाः॥२१
'शक्तिमन्तोऽपि ये केचिदाश्रितानां च रक्षणम् ।
न कुर्वन्ति मनुष्यास्ते संभवन्तीह राक्षसाः॥'२२
आचार्यमृत्विजं चैव गुरुं वृद्धजनं तथा ।
प्राणिनो येऽवमन्यन्ते ते भवन्तीह राक्षसाः॥२३
तत्कुरुध्वमिहास्माकं तारणं द्विजसत्तमाः ।
शक्ता भवन्तः सर्वेषां लोकानामपि तारणे॥२४
तेषां तु वचनं श्रुत्वा तुष्टुवुस्तां महानदीम् ।
मोक्षार्थं रक्षसां तेषामूचुः प्रयतमानसाः ॥ २५
ऋषय ऊचुः ।
क्षुतं कीटावपन्नं च यच्चोच्छिष्टाचितं भवेत् ।
सकेशमवधूतं च रुदितोपहतं च यत् ॥ २६
श्वभिः संसृष्टमन्नं च भागोऽसौ रक्षसामिह ।
तस्माज्ज्ञात्वा सदा विद्वानेतान्यन्नाद्विवर्जयेत् ।
राक्षसान्नमसौ भुङ्क्ते यो भुङ्क्ते ह्यन्नमीदृशम् ॥ २७
शोधयित्वा ततस्तीर्थमृषयस्ते तपोधनाः ।
मोक्षार्थं राक्षसानां च नदीं तां प्रत्यचोदयन्॥२८
महर्षीणां मतं ज्ञात्वा ततः सा सरितां वरा ।
अरुणामानयामास स्वां तनुं पुरुषर्षभ ॥ २९
तस्यान्ते राक्षसाः स्नात्वा तनूस्त्यक्त्वा दिवं गताः।
अरुणायां महाराज ब्रह्मवध्यापहा हि सा ॥३०
एतमर्थमभिज्ञाय देवराजः शतक्रतुः ।
तस्मिंस्तीर्थे वरे स्नात्वा विमुक्तः पाप्मना किल ३१
जनमेजय उवाच ।
किमर्थं भगवान्शक्रो ब्रह्मवध्यामवाप्तवान् ।
कथमस्मिंश्च तीर्थे वै आप्लुत्याकल्मषोऽभवत्॥ ३२
वैशंपायन उवाच ।
शृणुष्वैतदुपाख्यानं यथावृत्तं जनेश्वर ।
यथा विभेद समयं नमुचेर्वासवः पुरा ॥ ३३
नमुचिर्वासवाद्भीतः सूर्यरश्मिं समाविशत् ।
तेनेन्द्रः सख्यमकरोत्समयं चेदमब्रवीत् ॥ ३४

अध्यास्यामहे अभ्यवसाय करिष्यामहे ॥ १० ॥

न चार्द्रेण न शुष्केण न रात्रौ नापि चाहनि ।
वधिष्याम्यसुरश्रेष्ठ सखे सत्येन ते शपे ॥ ३५
एवं स कृत्वा समयं दृष्ट्वा नीहारमीश्वरः ।
चिच्छेदास्य शिरो राजन्नपां फेनेन वासवः ॥ ३६
तच्छिरो नमुचेश्छिन्नं पृष्ठतः शक्रमन्वियात् ।
भोभो मित्रह पापेति ब्रुवाणं शक्रमन्तिकात् ३७
एवं स शिरसा तेन चोद्यमानः पुनःपुनः ।
पितामहाय संतप्त एतमर्थं न्यवेदयत् ॥ ३८
तमब्रवील्लोकगुरुररुणायां यथाविधि ।
इष्ट्वोपस्पृश देवेन्द्र तीर्थे पापभयापहे ॥ ३९
[एषा पुण्यजला शक्र कृता मुनिभिरेव तु ।
निगूढमस्यागमनमिहासीत्पूर्वमेव तु ॥ ४०
ततोऽभ्येत्यारुणां देवीं प्लावयामास वारिणा ।
सरस्वत्यारुणायाश्च पुण्योऽयं संगमो महान् ॥ ४१
इह त्वं यज देवेन्द्र दद दानान्यनेकशः ।
अत्राप्लुत्य सुघोराच्त्वं पातकाद्विप्रमोक्ष्यसे ॥] ४२
इत्युक्तः स सरस्वत्याः कुञ्जे वै जनमेजय ।
इष्ट्वा यथावद्बलभिद्रुणायामुपास्पृशत् ॥ ४३
स मुक्तः पाप्मना तेन ब्रह्मवध्याकृतेन च ।
जगाम संहृष्टमनास्त्रिदिवं त्रिदशेश्वरः ॥ ४४
शिरस्तचापि नमुचेस्तत्रैवाप्लुत्य भारत ।
लोकान्कामदुघान्प्राप्तमक्षयान्राजसत्तम ॥ ४५
वैशंपायन उवाच ।
तत्राप्युपस्पृश्य बलो महात्मा
दत्त्वा च दानानि पृथग्विधानि ।
अवाप्य धर्मं परमार्यकर्मा
जगाम सोमस्य महत्सुतीर्थम् ॥ ४६
यत्रायजद्राजसूयेन सोमः
साक्षात्पुरा विधिवत्पार्थिवेन्द्र ।
अत्रिर्धीमान्ब्रह्मपुत्रो बभूव
होता यस्मिन्क्रतुमुख्ये महात्मा ॥ ४७
यस्यान्तेऽभूत्सुमहद्दानवानां
दैतेयानां राक्षसानां च देवैः ।
संग्रामो वै तारकाख्यः सुतीव्रो
यत्र स्कन्दस्तारकाख्यं जघान ॥ ४८
सैनापत्यं लब्धवान्दैवतानां
महासेनो यत्र दैत्यान्तकर्ता ।
साक्षाच्चैवं न्यवसत्कार्तिकेयः
सदा कुमारो यत्र स प्लक्षराजः ॥ ४९

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

कुमारोत्पत्तिवर्णनम् ॥ १ ॥

जनमेजय उवाच ।
सरस्वत्याः प्रभावोऽयमुक्तस्ते द्विजसत्तम ।
कुमारस्याभिषेकं तु ब्रह्मन्नाख्यातुमर्हसि ॥ १
यस्मिन्देशे च काले च यथा च वदतां वर ।
यैश्चाभिषिक्तो भगवान्विधिना येन च प्रभुः ॥ २
स्कन्दो यथा च दैत्यानामकरोत्कदनं महत् ।
तथा मे सर्वमाचक्ष्व परं कौतूहलं हि मे ॥ ३
वैशंपायन उवाच ।
कुरुवंशस्य सदृशं कौतूहलमिदं तव ।
हर्षमुत्पादयत्येव वचो मे जनमेजय ॥ ४
हन्त ते कथयिष्यामि शृण्वानस्य नराधिप ।
अभिषेकं कुमारस्य प्रभावं च महात्मनः ॥ ५
तेजो माहेश्वरं स्कन्नमग्नौ प्रपतितं पुरा ।
तत्सर्वं भगवानग्निर्नाशकद्धर्तुमक्षयम् ॥ ६
तेन सीदति तेजस्वी दीप्तिमान्हव्यवाहनः ।
न चैनं धारयामास ब्रह्मणे उक्तवान्प्रभुः ॥ ७

सदा कुमारो यत्र नक्षत्रधर्मा इति क. पाठ । यत्र नक्षत्रकाम इति ङ. पाठः ॥ ४९ ॥ चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

तत्सर्वमक्षो भगवान्नाशकद्दग्धुमक्षयमिति झ पाठ. ॥ ६ ॥ तेनासीदति तेजस्वी इति झ. ङ. पाठ. ॥ ७ ॥

स गङ्गामुपसंगम्य नियोगाद्ब्रह्मणः प्रभुः ।
गर्भमाहितवान्दिव्यं भास्करोपमतेजसम् ॥ ८
अथ गङ्गापि तं गर्भमसहन्ती विधारणे ।
उत्ससर्ज गिरौ रम्ये हिमवत्यमरार्चिते ॥ ९
स तत्र ववृधे लोकानावृत्य ज्वलनात्मजः ।
ददृशुर्ज्वलनाकारं तं गर्भमथ कृत्तिकाः ॥ १०
शरस्तम्बे महात्मानमनलात्मजमीश्वरम् ।
ममायमिति ताः सर्वाः पुत्रार्थिन्योऽभिचुक्रुशुः ॥
तासां विदित्वा भावं तं मातॄणां भगवान्प्रभुः ।
प्रस्रुतानां पयः षड्भिर्वदनैरपिबत्तदा ॥ १२
तं प्रभावं समालक्ष्य तस्य बालस्य कृत्तिकाः ।
परं विस्मयमापन्ना देव्यो दिव्यवपुर्धराः ॥ १३
यत्रोत्सृष्टश्च गर्भः स गङ्गया गिरिमूर्धनि ।
स शैलः काञ्चनः सर्वः संबभौ मेरुवत्तदा ॥ १४
वर्धता चैव गर्भेण पृथिवी तेन रञ्जिता ।
अतश्च सर्वे संवृत्ता गिरयः काञ्चनात्मकाः ॥ १५
कुमारः सुमहावीर्यः कार्तिकेय इति स्मृतः ।
गाङ्गेयः पूर्वमभवन्महाकायो बलान्वितः ॥ १६
शमेन तपसा चैव वीर्येण च समन्वितः ।
ववृधेऽतीव राजेन्द्र चन्द्रवत्प्रियदर्शनः ॥ १७
स तस्मिन्काञ्चने दिव्ये शरस्तम्बे श्रिया वृतः ।
स्तूयमानः सदा शेते गन्धर्वैर्मुनिभिस्तथा ॥ १८
तथैनमन्वनृत्यन्त देवकन्याः सहस्रशः ।
दिव्यवादित्रनृत्यज्ञाः स्तुवन्त्यश्चारुदर्शनाः ॥ १९
अन्वयुश्चाग्नयः सर्वे गङ्गा च सरितां वरा ।
दधार पृथिवी चैनं बिभ्रती रूपमुत्तमम् ॥ २०
जातकर्मादिकास्तस्य क्रियाश्चक्रे बृहस्पतिः ।
वेदश्चैनं चतुर्मूर्तिरुपतस्थे कृताञ्जलिः ॥ २१
धनुर्वेदश्चतुष्पादः सास्त्रग्रामः ससंग्रहः ।
तत्रैनं समुपातिष्ठत्साक्षाद्वाणी च केवला ॥ २२
स ददर्श महात्मानं देवदेवमुमापतिः ।
शैलपुत्र्या समागम्य भूतसङ्घशतैर्वृतः ॥ २३
निकाया भूतसङ्घानां परमाद्भुतदर्शनाः ।
विकृता विकृताकारा विकृताभरणध्वजाः ॥ २४
व्याघ्रसिंहर्क्षवदना बिडालमकराननाः ।
वृषदंशमुखाश्चान्ये गजोष्ट्रवदनास्तथा ॥ २५
उलूकवदनाः केचिद्गृध्रगोमायुदर्शनाः ।
क्रौञ्चपारावतनिभैर्वदनै राङ्कवैरपि ॥ २६
श्वाविच्छल्यकगोधानामजैडकगवां तथा ।
सदृशानि वपूंष्यन्ये तत्रतत्र व्यधारयन् ॥ २७
केचिच्छैलाम्बुदप्रख्याश्चक्रालातगदायुधाः ।
केचिदञ्जनपुञ्जाभाः केचिच्छ्वेताचलप्रभाः ॥२८
सप्तमातृगणाश्चैव समाजग्मुर्विशांपते ।
साध्या विश्वेऽथ मरुतो वसवः पितरस्तथा ॥ २९
रुद्रादित्यास्तथा सिद्धा भुजगा दानवाः खगाः ।
ब्रह्मा स्वयंभूर्भगवान्सपुत्रः सहविष्णुना ॥ ३०
शक्रस्तथाऽभ्ययाद्द्रष्टुं कुमारममितप्रभम् ।
नारदप्रमुखाश्चापि देवगन्धर्वसत्तमाः ॥ ३१
देवर्षयश्च सिद्धाश्च बृहस्पतिपुरोगमाः ।
पितरो जगतः श्रेष्ठा देवानामपि देवताः ।
तेऽपि तत्र समाजग्मुर्यामा धामाश्च सर्वशः ॥ ३२
स तु बालोऽपि बलवान्महायोगबलान्वितः ।
अभ्याजगाम देवेशं शूलहस्तं पिनाकिनम् ॥ ३३
तमाव्रजन्तमालक्ष्य शिवस्यासीन्मनोगतम् ।
युगपच्छैलपुत्र्याश्च गङ्गायाः पावकस्य च ॥ ३४
कं नु पूर्वमयं बालो गौरवाद्भ्युपैष्यति ।
अपि मामिति सर्वेषां तेषामासीन्मनोगतम् ॥ ३५
तेषामेतमभिप्रायं चतुर्णामुपलक्ष्य सः ।
युगपद्योगमास्थाय ससर्ज विविधास्तनूः ॥ ३६
ततोऽभवच्चतुर्मूर्तिः क्षणेन भगवान्प्रभुः ।
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठतः ॥ ३७
एवं स कृत्वा ह्यात्मानं चतुर्धा भगवान्प्रभुः ।
यतो रुद्रस्ततः स्कन्दो जगामाद्भुतदर्शनः ॥ ३८
विशाखस्तु ययौ देवीं ततो गिरिवरात्मजाम् ।
शाखो ययौ स भगवान्दिव्यमूर्तिर्विभावसुम् ३९
नैगमेयोऽगमद्गङ्गां कुमारः पावकप्रभः ॥ ४०

विडालवृषदंशौ मार्जारजातिभेदौ तत्सदृशाननौ ॥ २५ ॥ श्वान-शल्यकगोधानामिति क. पाठ. ॥ २७ ॥ तस्य स्कन्दस्य पृष्ठत. पश्चात् शाखविशाखनैगमेया आसन् । ते स्कन्देन सह चत्वार. ॥ ३७ ॥ वायुमूर्तिर्विभावसुमिति झ. पाठ. ॥ ३९ ॥

सर्वे भासुरदेहास्ते चत्वारः समरूपिणः ।
तान्समभ्ययुरव्यग्रास्तद्‌द्भुतमिवाभवत् ॥ ४१
हाहाकारो महानासीद्देवदानवरक्षसाम् ।
तद्दृष्ट्वा महदाश्चर्यमद्भुतं रोमहर्षणम् ॥ ४२
ततो रुद्रश्च देवी च पावकश्च पितामहम् ।
गङ्गया सहिताः सर्वे प्रणिपेतुर्जगत्पतिम् ॥ ४३
प्रणिपत्य ततस्ते तु विधिवद्राजपुङ्गव ।
इदमूचुर्वचो राजन्कार्तिकेयप्रियेप्सया ॥ ४४
अस्य बालस्य भगवन्नाधिपत्यं यथेप्सितम् ।
अस्मत्प्रियार्थं देवेश सदृशं दातुमर्हसि ॥ ४५
ततः स भगवान्धीमान्सर्वलोकपितामहः ।
मनसा चिन्तयामास किमयं लभतामिति ॥ ४६
ऐश्वर्याणि च सर्वाणि देवगन्धर्वरक्षसाम् ।
भूतयक्षविहङ्गानां पन्नगानां च सर्वशः ॥ ४७
सर्वमेवादिदेशासौ कौरवेय महात्मनः ।
समर्थं च तमैश्वर्ये महामतिरमन्यत ॥ ४८
ततो मुहूर्तं स ध्यात्वा देवानां श्रेयसि स्थितः ।
सैनापत्यं ददौ तस्मै सर्वभूतेषु भारत ॥ ४९
सर्वदेवनिकायानां ये राजानः परिश्रुताः ।
तान्सर्वान्व्यादिदेशास्मै सर्वभूतपितामहः ॥ ५०
ततः कुमारमादाय देवा ब्रह्मपुरोगमाः ।
अभिषेकार्थमाजग्मुः शैलेन्द्रं सहितास्ततः ॥ ५१
पुण्यां हैमवतीं देवीं सरिच्छ्रेष्ठां सरस्वतीम् ।
समन्तपञ्चके या वै त्रिषु लोकेषु विश्रुता ॥ ५२
तत्र तीरे सरस्त्याः पुण्ये सर्वगुणान्विते ।
निषेदुर्देवगन्धर्वाः सर्वे संपूर्णमानसाः ॥ ५३

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

बृहस्पत्यादिभिः स्कन्दस्य सेनापत्येऽभिषेचनम् ॥ १ ॥ ब्रह्मादिभिः स्कन्दाय स्वस्वपारिषदानां दानम् ॥ २ ॥

वैशंपायन उवाच ।
ततोऽभिषेकसंभारान्सर्वान्संभृत्य शास्त्रतः ।
बृहस्पतिः समिद्धेऽग्नौ जुहावाग्निं यथाविधि ॥ १
ततो हिमवता दत्ते मणिप्रवरशोभिते ।
दिव्यरत्नाचिते पुण्ये निषण्णं परमासने ॥ २
सर्वमङ्गलसंभारैर्विधिमन्त्रपुरस्कृतम् ।
आभिषेचनिकं द्रव्यं गृहीत्वा देवतागणाः ॥ ३
इन्द्राविष्णू महावीर्यौ सूर्याचन्द्रमसौ तथा ।
धाता चैव विधाता च तथा चैवानिलानलौ ॥ ४
पूषा भगेनार्यम्णा च अंशेन च विवस्वता ।
रुद्रश्च सहितो धीमान्मित्रेण वरुणेन च ॥ ५
रुद्रैर्वसुभिरादित्यैरश्विभ्यां च वृतः प्रभुः ।
विश्वैर्देवैर्मरुद्भिश्च साध्यैश्च पितृभिः सह ॥ ६
गन्धर्वैरप्सरोभिश्च यक्षराक्षसपन्नगैः ।
देवर्षिभिरसङ्ख्यातैस्तथा ब्रह्मर्षिभिस्तथा ॥ ७
वैखानसैर्वालखिल्यैर्वाय्वाहारैर्मरीचिपैः ।
भृगुभिश्चाङ्गिरोभिश्च यतिभिश्च महात्मभिः ॥ ८
सर्वैर्विद्याधरैः पुण्यैर्योगसिद्धैस्तथा वृतः ।
पितामहः पुलस्त्यश्च पुलहश्च महातपाः ॥ ९
अङ्गिराः कश्यपोऽत्रिश्च मरीचिर्भृगुरेव च ।
क्रतुर्हरिः प्रचेताश्च मनुर्दक्षस्तथैव च ॥ १०
ऋतवश्च ग्रहाश्चैव ज्योतींषि च विशांपते ।
मूर्तिमत्यश्च सरितो वेदाश्चैव सनातनाः ॥ ११
समुद्राश्च ह्रदाश्चैव तीर्थानि विविधानि च ।
पृथिवी द्यौर्दिशश्चैव पादपाश्च जनाधिप ॥ १२
अदितिर्देवमाता च ह्रीः श्रीः स्वाहा सरस्वती ।
उमा शची सिनीवाली तथैवानुमतिः कुहूः ॥ १३
राका च धिषणा चैव पत्न्यश्चान्या दिवौकसाम् ।
हिमवांश्चैव विन्ध्यश्च मेरुश्चानेकशृङ्गवान् ॥ १४
ऐरावतः सानुचरः कलाः काष्ठास्तथैव च ।
मासार्धमासा ऋतवस्तथा रात्र्यहनी नृप ॥ १५
उच्चैःश्रवा हयश्रेष्ठो नागराजश्च वासुकिः ।

अद्भुतमदृष्टपूर्वम् ॥ ४२ ॥ पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

नागराजश्च वामन इति ख पाठः ॥ १६ ॥

अरुणो गरुडश्चैव वृक्षाश्चौषधिभिः सह ॥ १६
धर्मश्च भगवान्देवः समाजग्मुर्हि संगताः।
कालो यमश्च मृत्युश्च यमस्यानुचराश्च ये ॥ १७
बहुलत्वाच्च नोक्ता ये विविधा देवतागणाः।
ते कुमाराभिषेकार्थं समाजग्मुस्ततस्ततः ॥ १८
जगृहुस्ते तदा राजन्सर्व एव दिवौकसः।
आभिषेचनिकं भाण्डं मङ्गलानि च सर्वशः॥ १९
दिव्यसंभारसंयुक्तैः कलशैः काञ्चनैर्नृप।
सारस्वताभिः पुण्याभिरद्भिस्ताभिरलङ्कृतम्॥ २०
अभ्यषिञ्चन्कुमारं वै संप्रहृष्टा दिवौकसः।
सैनापत्ये महात्मानमसुराणां भयंकरम् ॥ २१
पुरा यथा महाराज वरुणं वै जलेश्वरम्।
तथाऽभ्यषिञ्चद्भगवान्सर्वलोकपितामहः ॥ २२
कश्यपश्च महातेजा ये चान्ये लोककीर्तिताः।
तस्मै ब्रह्मा ददौ प्रीतो बलिनो वातरंहसः॥ २३
कामवीर्यधरान्सिद्धान्महापारिषदान्प्रभुः।
नन्दिसेनं लोहिताक्षं घण्टाकर्णं च संमतम्॥ २४
चतुर्थमस्यानुचरं ख्यातं कुमुदमालिनम्।
तत्र स्थाणुर्महातेजा महापारिषदं प्रभुः॥ २५
मायाशतधरं कामं कामवीर्यबलान्वितम्।
ददौ स्कन्दाय राजेन्द्र सुरारिविनिबर्हणम्॥ २६
स हि देवासुरे युद्धे दैत्यानां भीमकर्मणाम्।
जघान दोर्भ्यां संक्रुद्धः प्रयुतानि चतुर्दश॥ २७
तथा देवा ददुस्तस्मै सेनां नैर्ऋतसंकुलाम्।
देवशत्रुक्षयकरीमजय्यां विश्वरूपिणीम् ॥ २८
जयशब्दं तथा चक्रुर्देवाः सर्वे सवासवाः।
गन्धर्वा यक्षरक्षांसि मुनयः पितरस्तथा ॥ २९
ततः प्रादादनुचरौ यमः कालोपमावुभौ।
उन्माथं च प्रमाथं च महावीर्यौ महाद्युती॥ ३०
सुभ्राजो भास्वरश्चैव यौ तौ सूर्यानुयायिनौ।
तौ सूर्यः कार्तिकेयाय ददौ प्रीतः प्रतापवान्॥३१
कैलासशृङ्गसंकाशौ श्वेतमाल्यानुलेपनौ।
सोमोऽप्यनुचरौ प्रादान्मणिं सुमणिमेव च ३२॥
ज्वालाजिह्वं तथा ज्योतिरात्मजाय हुताशनः।
ददावनुचरौ शूरौ परसैन्यप्रमाथिनौ ॥ ३३
परिघं च वटं चैव भीमं च सुमहाबलम्।
दहतिं दहनं चैव प्रचण्डौ वीर्यसंमतौ ॥ ३४
अंशोऽप्यनुचरान्पञ्च ददौ स्कन्दाय धीमते।
उत्क्रोशं सत्करं चैव वज्रदण्डधरावुभौ॥ ३५
ददावनलपुत्राय वासवः परवीरहा।
तौ हि शत्रून्महेन्द्रस्य जघ्नतुः समरे बहून् ॥ ३६
चक्रं विक्रमकं चैव संक्रमं च महाबलम्।
स्कन्दाय त्रीननुचरान्ददौ विष्णुर्महायशाः॥ ३७
वर्धनं नन्दनं चैव सर्वविद्याविशारदौ।
स्कन्दाय ददतुः प्रीतावश्विनौ भिषजां वरौ॥ ३८
कुन्दं च कुसुमं चैव कुमुदं च महायशाः।
डम्बराडम्बरौ चैव ददौ धाता महात्मने॥ ३९
वक्रानुवक्रौ बलिनौ मेषवक्त्रौ बलोत्कटौ।
ददौ त्वष्टा महामायौ स्कन्दायानुचरावुभौ॥ ४०
सुव्रतं सत्यसन्धं च ददौ मित्रो महात्मने।
कुमाराय महात्मानौ तपोविद्याधरौ प्रभुः॥ ४१
सुदर्शनीयौ वरदौ त्रिषु लोकेषु विश्रुतौ।
सुव्रतं च महात्मानं शुभकर्माणमेव च॥ ४२
कार्तिकेयाय संप्रादाद्विधाता लोकविश्रुतौ।
पाणीतकं कालिकं च महामायाविनावुभौ॥ ४३
पूषा च पार्षदौ प्रादात्कार्तिकेयाय भारत।
बलं चातिबलं चैव महावक्त्रौ महाबलौ ॥ ४४
प्रददौ कार्तिकेयाय वायुर्भरतसत्तम।
यमं चातियमं चैव तिमिवक्त्रौ महाबलौ॥ ४५
प्रददौ कार्तिकेयाय वरुणः सत्यसंगरः।
सुवर्चसं महात्मानं तथैवाप्यतिवर्चसम्॥ ४६
हिमवान्प्रददौ राजन्हुताशनसुताय वै।
काञ्चनं च महात्मानं मेघमालिनमेव च॥ ४७
ददावनुचरौ मेरुरग्निपुत्राय भारत।
स्थिरं चातिस्थिरं चैव मेरुरेवापरौ ददौ॥ ४८
महात्मा त्वग्निपुत्राय महाबलपराक्रमौ।

घसं चातिघसं चैवेति ख. पाठः ॥ ४५ ॥

षट्चत्वारिंशोऽध्याय ॥ ४६ ॥

उच्छृङ्गं चातिशृङ्गं च महापाषाणयोधिनौ ॥ ४९
प्रददावग्निपुत्राय विन्ध्यः पारिषदावुभौ ।
संग्रहं विग्रहं चैव समुद्रोऽपि गदाधरौ ॥ ५०
प्रददावग्निपुत्राय महापारिषदावुभौ ।
उन्मादं शंकुकर्णं च पुष्पदन्तं तथैव च ॥ ५१
प्रददावग्निपुत्राय पार्वती शुभदर्शना ।
जयं महाजयं चैव गङ्गा ज्वलनसूनवे ॥ ५२
प्रददौ पुरुषव्याघ्र वासुकिः पन्नगेश्वरः ।
एवं साध्याश्च रुद्राश्च वसवः पितरस्तथा ॥ ५३
सागराः सरितश्चैव गिरयश्च महाबलाः ।
ददुः सेनागणाध्यक्षाञ्शूलपट्टसधारिणः ॥ ५४
दिव्यप्रहरणोपेतान्नानावेषविभूषितान् ।
शृणु नामानि चाप्येषां येऽन्ये स्कन्दस्य सैनिकाः ॥
विविधायुधसंपन्नाश्चित्राभरणभूषिताः ।
शङ्कुकर्णो निकुम्भश्च पद्मः कुमुद एव च ॥ ५६
अनन्तो द्वादशभुजस्तथा कृष्णोपकृष्णकौ ।
घ्राणश्रवाः कपिस्कन्धः काञ्चनाक्षो जलंधमः ५७
अक्षः संतर्जनो राजन्कुनदीकस्तमोन्तकृत् ।
एकाक्षो द्वादशाक्षश्च तथैवैकजटः प्रभुः ॥ ५८
सहस्रबाहुर्विकटो व्याघ्राक्षः क्षितिकम्पनः ।
पुण्यनामा सुनामा च सुचक्रः प्रियदर्शनः ॥ ५९
परिश्रुतः कोकनदः प्रियमाल्यानुलेपनः ।
अजोदरो गजशिराः स्कन्धाक्षः शतलोचनः ६०
ज्वालाजिह्वः करालाक्षः शितिकेशो जटी हरिः ।
परिश्रुतः कोकनदः कृष्णकेशो जटाधरः ॥ ६१
चतुर्दंष्ट्रोऽष्टजिह्वश्च मेघनादः पृथुश्रवाः ।
विद्युताक्षो धनुर्वक्त्रो जाठरो मारुताशनः ॥ ६२
उदाराक्षो रथाक्षश्च वज्रनाभो वसुप्रभः ।
समुद्रवेगो राजेन्द्र शैलकम्पी तथैव च ॥ ६३
वृषो मेषः प्रवाहश्च तथा नन्दोपनन्दकौ ।
धूम्रः श्वेतः कलिङ्गश्च सिद्धार्थो वरदस्तथा ॥ ६४
प्रियकश्चैव नन्दश्च गोनन्दश्च प्रतापवान् ।
आनन्दश्च प्रमोदश्च स्वस्तिको ध्रुवकस्तथा ॥ ६५
क्षेमवाहः सुवाहश्च सिद्धपात्रश्च भारत ।
गोव्रजः कनकापीडो महापारिषदेश्वरः ॥ ६६
गायनो हसनश्चैव बाणः खड्गश्च वीर्यवान् ।
वैताली गतिताली च तथा कथकवातिकौ ॥ ६७
हंसजः पङ्कदिग्धाङ्गः समुद्रोन्मादनश्च ह ।
रणोत्कटः प्रहासश्च श्वेतसिद्धश्च नन्दनः ॥ ६८
कालकण्ठः प्रभासश्च तथा कुम्भाण्डकोदरः ।
कालकक्षः सितश्चैव भूतानां मथनस्तथा ॥ ६९
यज्ञवाहः सुवाहश्च देवयाजी च सोमपः ।
मज्ञानश्च महातेजाः क्रथक्राथौ च भारत ॥ ७०
तुहरश्च तुहारश्च चित्रदेवश्च वीर्यवान् ।
मधुरः सुप्रसादश्च किरीटी च महाबलः ॥ ७१
वत्सलो मधुवर्णश्च कलशोदर एव च ।
धर्मदो मन्मथकरः सूचीवक्त्रश्च वीर्यवान् ॥ ७२
श्वेतवक्त्रः सुवक्त्रश्च चारुवक्त्रश्च पाण्डुरः ।
दण्डबाहुः सुबाहुश्च रजः कोकिलकस्तथा ॥ ७३
अचलः कनकाक्षश्च बालानामपि यः प्रभुः ।
संचारकः कोकनदो गृध्रपत्रश्च जम्बुकः ॥ ७४
लोहाजवक्त्रो जवनः कुम्भवक्त्रश्च कुम्भकः ।
स्वर्णग्रीवश्च कृष्णौजा हंसवक्त्रश्च चन्द्रभः ॥ ७५
पाणिकूर्चाश्च शम्बूकः पञ्चवक्त्रश्च शिक्षकः ।
चाषवक्त्रश्च जम्बूकः शाकवक्त्रश्च कुञ्जलः ॥ ७६
योगयोक्ता महात्मानः सततं ब्राह्मणप्रियाः ।
पैतामहा महात्मानो महापारिषदाश्च ये ॥ ७७
यौवनस्थाश्च बालाश्च वृद्धाश्च जनमेजय ।
सहस्रशः पारिषदाः कुमारमुपतस्थिरे ॥ ७८
वक्त्रैर्नानाविधैर्यैस्तु शृणु ताञ्जनमेजय ।
कूर्मकुक्कुटवक्त्राश्च शशोलूकमुखास्तथा ॥ ७९
खरोष्ट्रवदनाश्चान्ये वराहवदनास्तथा ।
मार्जारशशवक्त्राश्च दीर्घवक्त्राश्च भारत ॥ ८०
नकुलोलूकवक्त्राश्च काकवक्त्रास्तथा परे ।
आखुबभ्रुकवक्त्राश्च मयूरवदनास्तथा ॥ ८१
मत्स्यमेषाननाश्चान्ये अजाविमहिषाननाः ।
ऋक्षशार्दूलवक्त्राश्च द्वीपिसिंहाननास्तथा ॥ ८२
भीमा गजाननाश्चैव तथा नक्रमुखाश्च ये ।

गरुडाननाः कङ्कमुखा वृककाकमुखास्तथा ॥ ८३
गोखरोष्ट्रमुखाश्चान्ये वृषदंशमुखास्तथा ।
महाजठरपादाङ्गास्तारकाक्षाश्च भारत ॥ ८४
पारावतमुखाश्चान्ये तथा वृषमुखाः परे ।
कोकिलाभाननाश्चान्ये श्येनतित्तिरिकाननाः ८५
कृकलासमुखाश्चैव विरजोम्बरधारिणः ।
व्यालवक्त्राः शूलमुखाश्चण्डवक्त्राः शुभाननाः ८६
आशीविषाश्चीरधरा गोनासावदनास्तथा ।
स्थूलोदराः कृशाङ्गाश्च स्थूलाङ्गाश्च कृशोदराः ८७
ह्रस्वग्रीवा महाकर्णा नानाव्यालविभूषणाः ।
गजेन्द्रचर्मवसनास्तथा कृष्णाजिनाम्बराः ॥ ८८
स्कन्धेमुखा महाराज तथाप्युदरतोमुखाः ।
पृष्ठेमुखा हनुमुखास्तथा जङ्घामुखा अपि ॥ ८९
पार्श्वाननाश्च बहवो नानादेशमुखास्तथा ।
तथा कीटपतङ्गानां सदृशास्या गणेश्वराः ॥ ९०
नानाव्यालमुखाश्चान्ये बहुबाहुशिरोधराः ।
नानावृक्षभुजाः केचित्कटिशीर्षास्तथा परे ॥ ९१
भुजङ्गभोगवदना नानागुल्मनिवासिनः ।
चीरसंवृतगात्राश्च नानाकनकवाससः ॥ ९२
नानावेषधराश्चैव नानामाल्यानुलेपनाः ।
नानावस्त्रधराश्चैव चर्मवासस एव च ॥ ९३
उष्णीषिणो मुकुटिनः सुग्रीवाश्च सुवर्चसः ।
किरीटिनः पञ्चशिखास्तथा काञ्चनमूर्धजाः ॥ ९४
त्रिशिखा द्विशिखाश्चैव तथा सप्तशिखाः परे ।
शिखण्डिनो मुकुटिनो मुण्डाश्च जटिलास्तथा ॥ ९५
चित्रमालाधराः केचित्केचिद्रोमाननास्तथा ।
विग्रहैकरसा नित्यमजेयाः सुरसत्तमैः ॥ ९६
कृष्णा निर्मांसवक्त्राश्च दीर्घपृष्ठास्तनूदराः ।
स्थूलपृष्ठा ह्रस्वपृष्ठाः प्रलम्बोदरमेहनाः ॥ ९७
महाभुजा ह्रस्वभुजा ह्रस्वगात्राश्च वामनाः ।
कुब्जाश्च ह्रस्वजङ्घाश्च हस्तिकर्णशिरोधराः ॥ ९८
हस्तिनासाः कूर्मनासा वृकनासास्तथा परे ।
दीर्घोच्छ्वासा दीर्घजङ्घा विकराला ह्यधोमुखाः ९९
महादंष्ट्रा ह्रस्वदंष्ट्राश्चतुर्दंष्ट्रास्तथा परे ।
वारणेन्द्रनिभाश्चान्ये भीमा राजन्सहस्रशः १००
सुविभक्तशरीराश्च दीप्तिमन्तः स्वलङ्कृताः ।
पिङ्गाक्षाः शङ्कुकर्णाश्च रक्तनासाश्च भारत ॥ १०१
पृथुदंष्ट्रा महादंष्ट्राः स्थूलौष्ठा हरिमूर्धजाः ।
नानापादौष्ठदंष्ट्राश्च नानाहस्तशिरोधराः ॥ १०२
नानाचर्मभिराच्छन्ना नानाभाषाश्च भारत ।
कुशला देशभाषासु जल्पन्तोऽन्योन्यमीश्वराः ॥
हृष्टाः परिपतन्ति स्म महापारिषदास्तथा ।
दीर्घग्रीवा दीर्घनखा दीर्घपादशिरोभुजाः ॥ १०४
पिङ्गाक्षा नीलकण्ठाश्च लम्बकर्णाश्च भारत ।
वृकोदरनिभाश्चैव केचिदञ्जनसन्निभाः ॥ १०५
श्वेताक्षा लोहितग्रीवाः पिङ्गाक्षाश्च तथा परे ।
कल्माषा बहवो राजंश्चित्रवर्णाश्च भारत ॥ १०६
चामरापीडकनिभाः श्वेतलोहितराजयः ।
नानावर्णाः सवर्णाश्च मयूरसदृशप्रभाः ॥ १०७
पुनः प्रहरणान्येषां कीर्त्यमानानि मे शृणु ।
शेषैः कृतः पारिषदैरायुधानां परिग्रहः ॥ १०८
पाशोद्यतकराः केचिद्व्यादितास्याः खराननाः ।
पृष्ठाक्षा नीलकण्ठाश्च तथा परिघबाहवः ॥ १०९
शतघ्नीचक्रहस्ताश्च तथा मुसलपाणयः ।
असिमुद्गरहस्ताश्च दण्डहस्ताश्च भारत ॥ ११०
गदाभुशुण्डिहस्ताश्च तथा तोमरपाणयः ।
आयुधैर्विविधैर्घोरैर्महात्मानो महाजवाः ॥ १११
महाबला महावेगा महापारिषदास्तथा ।
अभिषेकं कुमारस्य दृष्ट्वा हृष्टा रणप्रियाः ॥ ११२
घण्टाजालपिनद्धाङ्गा ननृतुस्ते महौजसः ।
एते चान्ये च बहवो महापारिषदा नृप ॥ ११३
उपतस्थुर्महात्मानं कार्तिकेयं यशस्विनम् ।
दिव्याश्चाप्यान्तरिक्षाश्च पार्थिवाश्चानिलोपमाः ॥
व्यादिष्टा दैवतैः शूराः स्कन्दस्यानुचराऽभवन् ।
तादृशानां सहस्राणि प्रयुतान्यर्बुदानि च ।
अभिषिक्तं महात्मानं परिवार्योपतस्थिरे ॥ ११५

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

कुमारमातृगणस्य नामकीर्तनम् ॥ १ ॥ कुमारेण तारकासुरवधः क्रौञ्चपर्वतभेदनं च ॥ २ ॥

वैशंपायन उवाच ।
शृणु मातृगणान्राजन्कुमारानुचरानिमान् ।
कीर्त्यमानान्मया वीर सपत्नगणसूदनान् ॥ १
यशस्विनीनां मातॄणां शृणु नामानि भारत ।
याभिर्व्याप्तास्त्रयो लोकाः कल्याणीभिश्च भागशः॥
प्रभावती विशालाक्षी पालिता गोस्तनी तथा ।
श्रीमती बहुला चैव तथैव बहुपुत्रिका ॥ ३
अप्सुजाता च गोपाली बृहदम्बालिका तथा ।
जयावती मालतिका ध्रुवरत्ना भयंकरी ॥ ४
वसुदामा च दामा च विशोका नन्दिनी तथा ।
एकचूडा महाचूडा चक्रनेमिश्च भारत ॥ ५
उत्तेजनी जयत्सेना कमलाक्ष्यथ शोभना ।
शत्रुंजया तथा चैव क्रोधना शलभी खरी ॥ ६
माधवी शुभवक्त्रा च तीर्थसेनिश्च भारत ।
गीतप्रिया च कल्याणी रुद्ररोमाऽमिताशना ॥ ७
मेघस्वना भोगवती सुभ्रूश्च कनकावती ।
अलाताक्षी वीर्यवती विद्युज्जिह्वा च भारत ॥ ८
पद्मावती सुनक्षत्रा कन्दरा बहुयोजना ।
संतानिका च कौरव्य कमला च महाबला ॥ ९
सुदामा बहुदामा च सुप्रभा च यशस्विनी ।
नृत्यप्रिया च राजेन्द्र शतोलूखलमेखला ॥ १०
शतघण्टा शतानन्दा भगनन्दा च भाविनी ।
वपुष्मती चन्द्रशीता भद्रकाली च भारत ॥ ११
ऋक्षाम्बिका निष्कुटिका वामा चत्वरवासिनी ।
सुमङ्गला स्वस्तिमती बुद्धिकामा जयप्रिया ॥ १२
धनदा सुप्रसादा च भवदा च जलेश्वरी ।
एडी भेडी समेडी च वेतालजननी तथा ॥ १३
कण्डूतिः कालिका चैव देवमित्रा च भारत ।
वसुश्रीः कोटरा चैव चित्रसेना तथाऽचला ॥ १४
कुक्कुटिका शङ्कुलिका तथा शकुनिका नृप ।
कुण्डारिका कौकुलिका कुम्भिकाऽथ शतोदरी १५
उत्क्राथिनी जलेला च महावेगा च कङ्कणा ।
मनोजवा कण्टकिनी प्रघसा पूतना तथा ॥ १६
केशयन्त्री त्रुटिर्वामा क्रोशनाऽथ तडित्प्रभा ।
मन्दोदरी च मुण्डी च कोटरा मेघवाहिनी ॥ १७
सुभगा लम्बिनी लम्बा ताम्रचूडा विकाशिनी ।
ऊर्ध्ववेणीधरा चैव पिङ्गाक्षी लोहमेखला ॥ १८
पृथुवक्त्रा मधुलिका मधुकुम्भा तथैव च ।
पक्षालिका मत्कुलिका जरायुर्जर्जराननना ॥ १९
ख्याता दहदहा चैव तथा धमधमा नृप ।
खण्डखण्डा च राजेन्द्र पूषणा मणिकुट्टिका॥२०
अमोघा चैव कौरव्य तथा लम्बपयोधरा ।
वेणुवीणाधरा चैव पिङ्गाक्षी लोहमेखला ॥ २१
शशोलूकमुखी कृष्णा खरजङ्घा महाजवा ।
शिशुमारमुखी श्वेता लोहिताक्षी विभीषणा॥२२
जटालिका कामचरी दीर्घजिह्वा बलोत्कटा ।
कालेहिका वामनिका मुकुटा चैव भारत ॥ २३
लोहिताक्षी महाकाया हरिपिण्डा च भूमिप ।
एकत्वचा सुकुसुमा कृष्णकर्णी च भारत ॥ २४
क्षुरकर्णी चतुष्कर्णी कर्णप्रावरणा तथा ।
चतुष्पथनिकेता च गोकर्णी महिषानना ॥ २५
खरकर्णी महाकर्णी भेरीस्वनमहास्वना ।
शङ्कुकुम्भश्रवाश्चैव भगदा च महाबला ॥ २६
गणा च सुगणा चैव तथा भीत्यथ कामदा ।
चतुष्पथरता चैव भूतितीर्थान्यगोचरी ॥ २७
पशुदा वित्तदा चैव सुखदा च महायशाः ।
पयोदा गोमहिषदा सविशाला च भारत ॥ २८
प्रतिष्ठा सुप्रतिष्ठा च रोचमाना सुरोचना ।
नौकर्णी मुखकर्णी च विशिरा मन्थिनी तथा ॥२९
एकचन्द्रा मेघकर्णा मेघमाला विरोचना ।
एताश्चान्याश्च बहवो मातरो भरतर्षभ ॥ ३०
कार्तिकेयानुयायिन्यो नानारूपाः सहस्रशः ।
दीर्घनख्यो दीर्घदन्त्यो दीर्घतुण्ड्यश्च भारत॥३१
सबला मधुराश्चैव यौवनस्थाः स्वलङ्कृताः ।

माहात्म्येन च संयुक्ताः कामरूपधरास्तथा॥३२
निर्मांसगात्र्यः श्वेताश्च तथा काञ्चनसन्निभाः ।
कृष्णमेघनिभाश्चान्या धूम्राश्च भरतर्षभ ॥ ३३
अरुणाभा महाभोगा दीर्घकेश्यः सिताम्बराः ।
ऊर्ध्ववेणीधराश्चैव पिङ्गाक्ष्यो लम्बमेखलाः ॥३४
लम्बोदर्यो लम्बकर्णास्तथा लम्बपयोधराः ।
ताम्राक्ष्यस्ताम्रवर्णाश्च हर्यक्ष्यश्च तथाऽपराः॥ ३५
वरदाः कामचारिण्यो नित्यं प्रमुदितास्तथा ।
याम्या रौद्रास्तथा सौम्याः कौबेर्योऽथ महाबलाः॥
वारुण्योऽथ च माहेन्द्र्यस्तथाऽऽग्नेय्यः परंतप ।
वायव्यश्चाथ कौमार्यो ब्राह्मश्च भरतर्षभ ॥ ३७
वैष्णव्यश्च तथा सौर्यो वाराह्यश्च महाबलाः ।
रूपेणाप्सरसां तुल्या मनोहार्यो मनोरमाः ॥ ३८
परपुष्टोपमा वाक्ये तथर्द्ध्या धनदोपमाः ।
शक्रवीर्योपमा युद्धे दीप्त्या वह्निसमास्तथा ॥ ३९
शत्रूणां विग्रहे नित्यं भयदास्ता भवन्त्युत ।
कामरूपधराश्चैव जवे वायुसमास्तथा ॥ ४०
अचिन्त्यबलवीर्याश्च तथाऽचिन्त्यपराक्रमाः ।
वृक्षचत्वरवासिन्यश्चतुष्पथनिकेतनाः ॥ ४१
गुहाश्मशानवासिन्यः शैलप्रस्रवणालयाः ।
नानाभरणधारिण्यो नानामाल्याम्बरास्तथा॥४२
नानाविचित्रवेषाश्च नानाभाषास्तथैव च ।
एते चान्ये च मातॄणां गणाः शत्रुभयंकराः॥ ४३
अनुजग्मुर्महात्मानं त्रिदशेन्द्रस्य संमते ।
ततः शक्त्यस्त्रमददद्भगवान्पाकशासनः ॥ ४४
गुहाय राजशार्दूल विनाशाय सुरद्विषाम् ।
महास्वनां महाघण्टां द्योतमानां सितप्रभाम्॥४५
अरुणादित्यवर्णां च पताकां भरतर्षभ ।
ददौ पशुपतिस्तस्मै सर्वभूतमहाचमूम् ॥ ४६
उग्रां नानाप्रहरणां तपोवीर्यबलान्विताम् ।
अजेयां स्वगणैर्युक्तां नाम्ना सेनां धनञ्जयाम्॥४७
रुद्रतुल्यबलैर्युक्तां योधानामयुतैस्त्रिभिः ।
न सा विजानाति रणात्कदाचिद्विनिवर्तितुम् ४८
विष्णुर्ददौ वैजयन्तीं मालां बलविवर्धिनीम् ।
उमा ददौ विरजसी वाससी रविसप्रभे ॥ ४९
गङ्गा कमण्डलुं दिव्यममृतोद्भवमुत्तमम् ।
ददौ प्रीत्या कुमाराय दण्डं चैव बृहस्पतिः॥ ५०
गरुडो दयितं पुत्रं मयूरं चित्रबर्हिणम् ।
अरुणस्ताम्रचूडं च प्रददौ चरणायुधम् ॥ ५१
छागं तु वरुणो राजा बलवीर्यसमन्वितम् ।
कृष्णाजिनं ततो ब्रह्मा ब्रह्मण्याय ददौ प्रभुः ।
समरेषु जयं चैव प्रददौ लोकभावनः ॥ ५२
सैनापत्यमनुप्राप्य स्कन्दो देवगणस्य ह ।
शुशुभे ज्वलितोर्चिष्मान्द्वितीय इव पावकः॥५३
ततः पारिषदैश्चैव मातृभिश्च समन्वितः ।
ययौ दैत्यविनाशाय ह्लादयन्सुरपुङ्गवान् ॥ ५४
सा सेना नैर्ऋती भीमा सघण्टोच्छ्रितकेतना ।
सभेरीशङ्खमुरजा सायुधा सपताकिनी ॥ ५५
शारदी द्यौरिवाभाति ज्योतिर्भिरिव शोभिता ५६
ततो देवनिकायास्ते नानाभूतगणास्तथा ।
वादयामासुरव्यग्रा भेरीः शङ्खांश्च पुष्कलान्॥५७
पटहान्झर्झरांश्चैव ककचान्गोविषाणिकान् ।
आडम्बरान्गोमुखांश्च डिण्डिमांश्च महास्वनान्५८
तुष्टुवुस्ते कुमारं तु सर्वे देवाः सवासवाः ।
जगुश्च देवगन्धर्वा ननृतुश्चाप्सरोगणाः ॥ ५९
ततः प्रीतो महासेनस्त्रिदशेभ्यो वरं ददौ ।
रिपून्हन्ताऽस्मि समरे ये वो वधचिकीर्षवः॥ ६०
प्रतिगृह्य वरं देवास्तस्माद्विबुधसत्तमात् ।
प्रीतात्मानो महात्मानो मेनिरे निहतान्रिपून् ६१
सर्वेषां भूतसङ्घानां हर्षान्नादः समुत्थितः ।
अपूरयत लोकांस्त्रीन्वेरे दत्ते महात्मना ॥ ६२
स निर्ययौ महासेनो महत्या सेनया वृतः ।
वधाय युधि दैत्यानां रक्षार्थं च दिवौकसाम्॥ ६३
व्यवसायो जयो धर्मः सिद्धिर्लक्ष्मीर्धृतिः स्मृतिः ।
महासेनस्य सैन्यानामग्रे जग्मुर्नराधिप ॥ ६४
स तया भीमया देवः शूलमुद्गरहस्तया ।
ज्वलितालातधारिण्या चित्राभरणवर्मया ॥ ६५
गदामुसलनाराचशक्तितोमरहस्तया ।
दृप्तसिंहनिनादिन्या विनद्य प्रययौ गुहः ॥ ६६
तं दृष्ट्वा सर्वदैतेया राक्षसा दानवास्तथा ।

व्यद्रवन्त दिशः सर्वा भयोद्विग्नाः समन्ततः ॥ ६७
अभ्यद्रवन्त देवास्तान्विविधायुधपाणयः ।
दृष्ट्वा च स ततः क्रुद्धः स्कन्दस्तेजोबलान्वितः ६८
शक्त्यस्त्रं भगवान्भीमं पुनःपुनरवाकिरत् ।
आदधच्चात्मनस्तेजो हविषेद्ध इवानलः ॥ ६९
अभ्यस्यमाने शक्त्यस्त्रे स्कन्देनामिततेजसा ।
उल्काज्वाला महाराज पपात वसुधातले ॥ ७०
संह्रादयन्तश्च तथा निर्घाताश्चापतन्क्षितौ ।
यथान्तकालसमये सुघोराः स्युस्तथा नृप ॥ ७१
क्षिप्ता ह्येका यदा शक्तिः सुघोराऽनलसूनुना ।
ततः कोट्यो विनिष्पेतुः शक्तीनां भरतर्षभ ॥ ७२
ततः प्रीतो महासेनो जघान भगवान्प्रभुः ।
दैत्येन्द्रं तारकं नाम महाबलपराक्रमम् ॥ ७३
वृतं दैत्यायुतैर्वीरैर्बलिभिर्दशभिर्नृप ।
महिषं चाष्टभिः पद्मैर्वृतं सङ्ख्ये निजघ्निवान् ॥ ७४
त्रिपादं चायुतशतैर्जघान दशभिर्वृतम् ।
ह्रदोदरं निखर्वैश्च वृतं दशभिरीश्वरः ॥ ७५
जघानानुचरैः सार्धं विविधायुधपाणिभिः ।
तथाऽकुर्वन्त विपुलं नादं वध्यत्सु शत्रुषु ॥ ७६
कुमारानुचरा राजन्पूरयन्तो दिशो दश ।
ननृतुश्च ववल्गुश्च जहसुश्च मुदान्विताः ॥ ७७
शक्त्यस्त्रस्य तु राजेन्द्र ततोऽर्चिर्भिः समन्ततः ।
त्रैलोक्यं त्रासितं सर्वं जृम्भमाणाभिरेव च ॥ ७८
दग्धाः सहस्रशो दैत्या नादैः स्कन्दस्य चापरे ।
पताकयावधूताश्च हताः केचित्सुरद्विषः ॥ ७९
केचिद्घण्टारवत्रस्ता निषेदुर्वसुधातले ।
केचित्प्रहरणैश्छिन्ना विनिष्पेतुर्गतायुषः ॥ ८०
एवं सुरद्विषोऽनेकान्बलवानाततायिनः ।
जघान समरे वीरः कार्तिकेयो महाबलः ॥ ८१
बाणो नामाथ दैतेयो बलेः पुत्रो महाबलः ।
क्रौञ्चं पर्वतमाश्रित्य देवसङ्घानबाधत ॥ ८२
तमभ्ययान्महासेनः सुरशत्रुमुदारधीः ।
स कार्तिकेयस्य भयात्क्रौञ्चं शरणमीयिवान् ॥ ८३
ततः क्रौञ्चं महामन्युः क्रौञ्चनादनिनादितम् ।
शक्त्या विभेद भगवान्कार्तिकेयोऽग्निदत्तया ॥ ८४
ससालस्कन्धशबलं त्रस्तवानरवारणम् ।
प्रोड्डीनोद्भ्रान्तविहगं विनिष्पतितपन्नगम् ॥ ८५
गोलाङ्गूलर्क्षसङ्घैश्च द्रवद्भिरनुनादितम् ।
कुरङ्गमविनिर्घोषनिनादितवनान्तरम् ॥ ८६
विनिष्पतद्भिः शरभैः सिंहैश्च सहसा द्रुतैः ।
शोच्यामपि दशां प्राप्तो रराजेव सपर्वतः ॥ ८७
विद्याधराः समुत्पेतुस्तस्य शृङ्गनिवासिनः ।
किन्नराश्च समुद्विग्नाः शक्तिपातरवोद्धताः ॥ ८८
ततो दैत्या विनिष्पेतुः शतशोऽथ सहस्रशः ।
प्रदीप्तात्पर्वतश्रेष्ठाद्विचित्राभरणस्रजः ॥ ८९
तान्निजघ्नुरतिक्रम्य कुमारानुचरा मृधे ।
स चैव भगवान्क्रुद्धो दैत्येन्द्रस्य सुतं तदा ॥ ९०
सहानुजं जघानाशु वृत्रं देवपतिर्यथा ।
बिभेद क्रौञ्चं शक्त्या च पावकिः परवीरहा ९१
बहुधा चैकधा चैव कृत्वाऽऽत्मानं महाबलः ।
शक्तिः क्षिप्ता रणे तस्य पाणिमेति पुनःपुनः ९२
एवंप्रभावो भगवांस्ततो भूयश्च पावकिः ।
शौर्याद्विगुणयोगेन तेजसा यशसा श्रिया ॥ ९३
क्रौञ्चस्तेन विनिर्भिन्नो दैत्याश्च शतशो हताः ॥ ९४
ततः स भगवान्देवो निहत्य विबुधद्विषः ।
सभाज्यमानो विबुधैः परं हर्षमवाप ह ॥ ९५
ततो दुन्दुभयो राजन्नेदुः शङ्खाश्च भारत ।
मुमुचुर्देवयोषाश्च पुष्पवर्षमनुत्तमम् ।
योगिनामीश्वरं देवं शतशोऽथ सहस्रशः ॥ ९६
दिव्यगन्धमुपादाय ववौ पुण्यश्च मारुतः ।
गन्धर्वास्तुष्टुवुश्चैनं यज्वानश्च महर्षयः ॥ ९७
केचिदेनं व्यवस्यन्ति पितामहसुतं प्रभुम् ।
सनत्कुमारं सर्वेषां ब्रह्मयोनिं तमग्रजम् ॥ ९८
केचिन्महेश्वरसुतं केचित्पुत्रं विभावसोः ।
उमायाः कृत्तिकानां च गङ्गायाश्च वदन्त्युत ॥ ९९
एकधा च द्विधा चैव चतुर्धा च महाबलम् ।
योगिनामीश्वरं देवं शतशोऽथ सहस्रशः ॥ १००
एतत्ते कथितं राजन्कार्तिकेयाभिषेचनम् ।
शृणु चैव सरस्वत्यास्तीर्थवंशस्य पुण्यताम् ॥ १०१

बभूव तीर्थप्रवरं हतेषु सुरशत्रुषु ।
कुमारेण महाराज त्रिविष्टपमिवापरम् ॥ १०२
ऐश्वर्याणि च तत्रस्थो ददावीशः पृथक्पृथक् ।
ददौ नैर्ऋतमुख्येभ्यस्त्रैलोक्यं पावकात्मजः १०३
एवं स भगवांस्तस्मिंस्तीर्थे दैत्यकुलान्तकः ।
अभिषिक्तो महाराज देवसेनापतिः सुरैः ॥ १०४
औशनं नाम तत्तीर्थं यत्र पूर्वमपांपतिः ।
अभिषिक्तः सुरगणैर्वरुणो भरतर्षभ ॥ १०५
अस्मिंस्तीर्थवरे स्नात्वा स्कन्दं चाभ्यर्च्य लाङ्गली ।
ब्राह्मणेभ्यो ददौ रुक्मं वासांस्याभरणानि च १०६
उषित्वा रजनीं तत्र माधवः परवीरहा ।
पूज्यतीर्थवरं तच्च स्पृष्ट्वा तोयं च लाङ्गली ॥ १०७
हृष्टः प्रीतमनाश्चैव ह्यभवन्माधवोत्तमः ।
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ १०८
यथाऽभिषिक्तो भगवान्स्कन्दो देवैः समागतैः ।
'सेनानीश्च कृतो राजन्बाल एव महाबलः ॥' १०९

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

देवैर्वरुणस्य जलाधिपत्येऽभिषेचनम् ॥ १ ॥ बलभद्रस्याग्नितीर्थकौबेरतीर्थगमनं तन्महिमानुवर्णनं च ॥ २ ॥

जनमेजय उवाच ।
अत्यद्भुतमिदं ब्रह्मञ्श्रुतवानस्मि तत्त्वतः ।
अभिषेकं कुमारस्य विस्तरेण यथाविधि ॥ १
यच्छ्रुत्वा पूतमात्मानं विजानामि तपोधन ।
प्रहृष्टानि च रोमाणि प्रसन्नं च मनो मम ॥ २
अभिषेकं कुमारस्य दैत्यानां च वधं तथा ।
श्रुत्वा मे परमा प्रीतिर्भूयः कौतूहलं हि मे ॥ ३
अपांपतिः कथं ह्यस्मिन्नभिषिक्तः पुरा सुरैः ।
तन्मे ब्रूहि महाप्रज्ञ कुशलो ह्यसि सत्तम ॥ ४
वैशंपायन उवाच ।
शृणु राजन्निदं चित्रं पूर्वकाले यथाऽभवत् ॥ ५
आदौ कृतयुगे राजन्वर्तमाने यथाविधि ।
वरुणं देवताः सर्वाः समेत्येदमथाब्रुवन् ॥ ६
यथाऽस्मान्सुरराट् शक्रो भयेभ्यः पाति सर्वदा ।
तथा त्वमपि सर्वासां सरितां वै पतिर्भव ॥ ७
वासश्च ते सदा देव सागरे मकरालये ।
समुद्रोऽयं तव वशे भविष्यति नदीपतिः ॥ ८
सोमेन सार्धं च तव हानिवृद्धी भविष्यतः ।
एवमस्त्विति तान्देवान्वरुणो वाक्यमब्रवीत् ॥ ९
समागम्य ततः सर्वे वरुणं सागरालयम् ।
अपांपतिं प्रचक्रुर्हि विधिदृष्टेन कर्मणा ॥ १०
अभिषिच्य ततो देवा वरुणं यादसांपतिम् ।
जग्मुः स्थान्येव स्थानानि पूजयित्वा जलेश्वरम् ११
अभिषिक्तस्ततो देवैर्वरुणोऽपि महायशाः ।
सरितः सागरांश्चैव नदांश्चापि सरांसि च ।
पालयामास विधिना यथा देवाञ्शतक्रतुः ॥ १२
ततस्तत्राप्युपस्पृश्य दत्त्वा च विविधं वसु ।
अग्नितीर्थं महाप्राज्ञो जगामाथ प्रलम्बहा ।
नष्टो न दृश्यते यत्र शमीगर्भे हुताशनः ॥ १३
लोकालोकविनाशे च प्रादुर्भूते तदाऽनघ ।
उपतस्थुः सुरा यत्र सर्वलोकपितामहम् ॥ १४
अग्निः प्रनष्टो भगवान्कारणं च न विद्महे ।
सर्वभूतक्षयो राजन्संपादय विभोऽनलम् ॥ १५
जनमेजय उवाच ।
किमर्थं भगवानग्निः प्रनष्टो लोकभावनः ।
विज्ञातश्च कथं देवैस्तन्ममाचक्ष्व तत्त्वतः ॥ १६
वैशंपायन उवाच ।
भृगोः शापाद्भृशं भीतो जातवेदाः प्रतापवान् ।
शमीगर्भमथासाद्य ननाश भगवांस्ततः ॥ १७
प्रनष्टे तु तदा वह्नौ देवाः सर्वे सवासवाः ।
अन्वैषन्त तदा नष्टं ज्वलनं भृशदुःखिताः ॥ १८
ततोऽग्नितीर्थमासाद्य शमीगर्भस्थमेव हि ।
ददृशुर्ज्वलनं तत्र वसमानं यथाविधि ॥ १९
देवाः सर्वे नरव्याघ्र बृहस्पतिपुरोगमाः ।

ज्वलनं तं समासाद्य प्रीताऽभूवन्सवासवाः ॥ २०
पुनर्यथागतं जग्मुः सर्वभक्षश्च सोऽभवत् ।
भृगोः शापान्महाभाग यदुक्तं ब्रह्मवादिना ॥ २१
तत्राप्याप्लुत्य मतिमान्ब्रह्मशापान्मुमोच ह ॥ २२
तत्राप्लुत्य ततो ब्रह्मा सह देवैः प्रभुः पुरा ।
ससर्ज चान्नानि तथा देवतानां यथाविधि ॥ २३
तत्र स्नात्वा च दत्त्वा च वसूनि विविधानि च ।
कौबेरं प्रययौ तीर्थं यत्र तप्त्वा महत्तपः ॥ २४
धनाधिपत्यं संप्राप्तो राजन्नैलबिलः प्रभुः ॥ २५
तत्रस्थमेव तं राजन्धनानि निधयस्तथा ।
उपतस्थुर्नरश्रेष्ठ तत्तीर्थं लाङ्गली बलः ॥ २६
गत्वा स्नात्वा च विधिवद्ब्राह्मणेभ्यो धनं ददौ ।
ददृशे तत्र तत्स्थानं कौबेरे काननोत्तमे ॥ २७
पुरा यत्र तपस्तप्तं विपुलं सुमहात्मना ।
यक्षराज्ञा कुबेरेण वरा लब्धाश्च पुष्कलाः ॥ २८
धनाधिपत्यं सख्यं च रुद्रेणामिततेजसा ।
सुरत्वं लोकपालत्वं पुत्रं च नलकूबरम् ॥ २९
यत्र लेभे महाबाहो धनाधिपतिरञ्जसा ।
अभिषिक्तश्च तत्रैव समागम्य मरुद्गणैः ॥ ३०
वाहनं चास्य तद्दत्तं हंसयुक्तं मनोजवम् ।
विमानं पुष्पकं दिव्यं नैर्ऋतैश्वर्यमेव च ॥ ३१
तत्राप्लुत्य बलो राजन्दत्त्वा दायांश्च पुष्कलान् ।
जगाम त्वरितो रामस्तीर्थं श्वेतानुलेपनः ॥ ३२
निषेवितं सर्वसत्त्वैर्नाम्ना बदरपाचनम् ।
नानर्तुकवनोपेतं सदा पुष्पफलं शुभम् ॥ ३३

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

बलरामस्य बदरपाचनतीर्थगमनम् ॥ १ ॥ श्रुतावत्यरुन्धत्योर्महिमानुवर्णनम् ॥ २ ॥

वैशंपायन उवाच ।
ततस्तीर्थवरं रामो ययौ बदरपाचनम् ।
तपस्सिसिद्धचरितं यत्र कन्या धृतव्रता ॥ १
भरद्वाजस्य दुहिता रूपेणाप्रतिमा भुवि ।
श्रुतावती नाम विभो कुमारी ब्रह्मचारिणी ॥ २
तपश्चचार सात्युग्रं नियमैर्बहुभिर्वृता ।
भर्ता मे देवराजः स्यादिति निश्चित्य भामिनी ॥ ३
समास्तस्या व्यतिक्रान्ता बह्व्यः कुरुकुलोद्वह ।
चरन्त्या नियमांस्तांस्तान्स्त्रीभिस्तीव्रान्सुदुश्चरान् ४
तस्यास्तु तेन वृत्तेन तपसा च विशांपते ।
भक्त्या च भगवान्प्रीतः परया पाकशासनः ॥ ५
आजगामाश्रमं तस्यास्त्रिदशाधिपतिः प्रभुः ।
आस्थाय रूपं विप्रर्षेर्वसिष्ठस्य महात्मनः ॥ ६
सा तं दृष्ट्वोग्रतपसं वसिष्ठं तपतां वरम् ।
आचारैर्मुनिभिर्दृष्टैः पूजयामास भारत ॥ ७
उवाच नियमज्ञा च कल्याणी सा प्रियंवदा ।
भगवन्मुनिशार्दूल किमाज्ञापयसि प्रभो ॥ ८
सर्वमद्य यथाशक्ति तव दास्यामि सुव्रत ।
शक्रभक्त्या च ते पाणिं न दास्यामि कथंचन ॥ ९
व्रतैश्च नियमैश्चैव तपसा च तपोधन ।
शक्रस्तोषयितव्यो वै मया त्रिभुवनेश्वरः ॥ १०
इत्युक्तो भगवान्देवः स्मयन्निव निरीक्ष्य ताम् ।
उवाच नियमं ज्ञात्वा सांत्वयन्निव भारत ॥ ११
उग्रं तपश्चरसि वै विदिता मेऽसि सुव्रते ।
यदर्थमयमारम्भस्तव कल्याणि हृद्गतः ॥ १२
तच्च सर्वं यथाभूतं भविष्यति वरानने ।
तपसा लभ्यते सर्वं यथाभूतं भविष्यति ॥ १३
यथा स्थानानि दिव्यानि विबुधानां शुभानने ।
तपसा तानि प्राप्याणि तपोमूलं महत्सुखम् ॥ १४
इति कृत्वा तपो घोरं देहं संन्यस्य मानवाः ।

ऐलबिल कुबेरः ॥ २५ ॥

अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

देवत्वं यान्ति कल्याणि शृणुष्वैकं वचो मम ॥ १५
पञ्च चैतानि सुभगे बदराणि शुभव्रते ।
पचेत्युक्त्वा तु भगवाञ्जगाम बलमूदनः ॥ १६
आमन्त्र्य तां तु कल्याणीं ततो जप्यं जजाप सः ।
अविदूरे ततस्तस्मादाश्रमात्तीर्थमुत्तमम् ॥ १७
तच्च तीर्थं महाराज यत्र जप्यं जजाप सः ।
इन्द्रतीर्थेतिविख्यातं त्रिषु लोकेषु मानद ॥ १८
तस्य जिज्ञासनार्थं स भगवान्पाकशासनः ।
बदराणामपचनं चकार विबुधाधिपः ॥ १९
ततः प्रतप्ता सा राजन्वाग्यता विगतक्लमा ।
तत्परा शुचिसंवीता पावके समधिश्रयत् ।
अपचद्राजशार्दूल बदराणि महाव्रता ॥ २०
तस्याः पचन्त्याः सुमहान्कालोऽगात्पुरुषर्षभ ।
न च स्म तान्यपच्यन्त दिनं च क्षयमभ्यगात् ॥ २१
हुताशनेन दग्धश्च यस्तस्याः काष्ठसंचयः ।
अकाष्ठमग्निं सा दृष्ट्वा स्वशरीरमथादहत् ॥ २२
पादौ प्रक्षिप्य सा पूर्वं पावके चारुदर्शना ।
दग्धौ दग्धौ पुनः पादावुपावर्तयतानघ ॥ २३
चरणे दह्यमाने च नाचिन्तयदनिन्दिता ।
दुःखं कमलपत्राक्षी महर्षिप्रियकाम्यया ॥ २४
न वैमनस्यं तस्यास्तु मुखभेदोऽथवाऽभवत् ।
शरीरमग्निना दीप्य जलमध्ये यथा स्थिता ॥ २५
तच्चास्याः पचने यत्नं न न्यवर्तत भारत ।
सर्वथा बदराण्येव पक्तव्यानीति कन्यका ॥ २६
सा तन्मनसि कृत्वैव महर्षेर्वचनं शुभा ।
अपचद्बदराण्येव न चापच्यन्त भारत ॥ २७
तस्यास्तु चरणौ वह्निर्ददाह भगवान्स्वयम् ।
न च तस्या मनोदुःखं स्वल्पमप्यभवत्तदा ॥ २८
अथ तत्कर्म दृष्ट्वाऽस्याः प्रीतस्त्रिभुवनेश्वरः ।
ततः संदर्शयामास कन्यायै रूपमात्मनः ॥ २९
उवाच च सुरश्रेष्ठस्तां कन्यां सुदृढव्रताम् ।
प्रीतोऽस्मि ते शुभे भक्त्या तपसा नियमेन च ३०
तस्माद्योऽभिमतः कामः स ते संपत्स्यते शुभे ।
देहं त्यक्त्वा महाभागे त्रिदिवे मयि वत्स्यसि ३१
इदं च ते तीर्थवरं स्थिरं लोके भविष्यति ।
सर्वपापापहं सुभ्रु नाम्ना बदरपाचनम् ।
विख्यातं त्रिषु लोकेषु ब्रह्मर्षिभिरभिप्लुतम् ॥ ३२
अस्मिन्खलु महाभागे शुभे तीर्थवरेऽनघे ।
त्यक्त्वा सप्तर्षयो जग्मुर्हिमवन्तमरुन्धतीम् ॥ ३३
ततस्ते वै महाभागा गत्वा तत्र सुसंशिताः ।
वृत्त्यर्थं फलमूलानि समाहर्तुं ययुः किल ॥ ३४
तेषां वृत्त्यर्थिनां तत्र वसतां हिमवद्वने ।
अनावृष्टिरनुप्राप्ता तदा द्वादशवार्षिकी ॥ ३५
ते कृत्वा चाश्रमं तत्र न्यवसन्त तपस्विनः ।
अरुन्धत्यपि कल्याणी तपोनित्याऽभवत्तदा ३६
अरुन्धतीं ततो दृष्ट्वा तीव्रं नियममास्थिताम् ।
अथागमत्त्रिनयनः सुप्रीतो वरदस्तदा ॥ ३७
ब्राह्मं रूपं ततः कृत्वा महादेवो महायशाः ।
तामभ्येत्याब्रवीद्देवो भिक्षामिच्छाम्यहं शुभे ॥ ३८
प्रत्युवाच ततः सा तं ब्राह्मणं चारुदर्शना ।
क्षीणोऽन्नसंचयो विप्र बदराणीह भक्षय ॥ ३९
ततोऽब्रवीन्महादेवः पचस्वैतानि सुव्रते ।
इत्युक्ता साऽपचत्तानि ब्राह्मणप्रियकाम्यया ।
अधिश्रित्य समिद्धेऽग्नौ बदराणि यशस्विनी ॥ ४०
दिव्या मनोरमाः पुण्याः कथाः शुश्राव सा तदा ।
अतीता सा त्वनावृष्टिर्घोरा द्वादशवार्षिकी ॥ ४१
अनश्नन्त्याः पचन्त्याश्च शृण्वन्त्याश्च कथाः शुभाः ।
दिनोपमः स तस्याथ कालोऽतीतः सुदारुणः ४२
ततस्तु मुनयः प्राप्ताः फलान्यादाय पर्वतात् ।
ततः स भगवान्प्रीतः प्रोवाचारुन्धतीं ततः ॥ ४३
उपसर्पस्व धर्मज्ञे यथापूर्वमिमानृषीन् ।
प्रीतोऽस्मि तव धर्मज्ञे तपसा नियमेन च ॥ ४४
ततः संदर्शयामास स्वरूपं भगवान्हरः ।
ततोऽब्रवीत्तदा तेभ्यस्तस्याश्च चरितं महत् ॥ ४५

उपावर्तयत अग्रेऽग्रे प्रसारितवती ॥ २३ ॥ तच्चास्या वचन नित्यमवर्तद्धृदि भारत इति झ पाठः ॥ २६ ॥

एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

भवद्भिर्हिमवत्पृष्ठे यत्तपः समुपार्जितम् ।
अस्माश्च यत्तपो विप्रा न समं तन्मतं मम ॥ ४६
अनया हि तपस्विन्या तपस्तप्तं सुदुश्चरम् ।
अनश्नन्त्या पचन्त्या च समा द्वादश पारिताः ४७
ततः प्रोवाच भगवांस्तामेवारुन्धतीं पुनः ।
वरं वृणीष्व कल्याणि यत्तेऽभिलषितं हृदि ॥४८
साऽब्रवीत्पृथुताम्राक्षी देवं सप्तर्षिसंसदि ।
भगवान्यदि मे प्रीतस्तीर्थं स्यादिदमद्भुतम् ॥ ४९
सिद्धदेवर्षिदयितं नाम्ना बदरपाचनम् ।
तथाऽस्मिन्देववदेवेश त्रिरात्रमुषितः शुचिः ॥ ५०
प्राप्नुयादुपवासेन फलं द्वादशवार्षिकम् ।
एवमस्त्विति तां देवः प्रत्युवाच तपस्विनीम् ॥५१
सप्तर्षिभिः स्तुतो देवस्ततो लोकं ययौ तदा ।
ऋषयो विस्मयं जग्मुस्तां दृष्ट्वा चाप्यरुन्धतीम् ।
अश्रान्तां चाविवर्णां च क्षुत्पिपासाऽसमायुताम् ॥
एवं सिद्धिः परा प्राप्ता अरुन्धत्या विशुद्धया ।
यथा त्वया महाभागे मदर्थं संशितव्रते ॥ ५२
विशेषो हि त्वया भद्रे व्रते ह्यस्मिन्समर्पितः ।
तथा चेदं ददाम्यद्य नियमेन सुतोषितः ।
विशेषं तव कल्याणि प्रयच्छामि वरं वरे ॥ ५४
अरुन्धत्या वरस्तस्या यो दत्तो वै महात्मना ।
तस्य चाहं प्रभावेन तव कल्याणि तेजसा ।
प्रवक्ष्यामि परं भूयो वरमत्र यथाविधि ॥ ५५
यस्त्वेकां रजनीं तीर्थे वत्स्यते सुसमाहितः ।
स स्नात्वा प्राप्स्यते लोकान्देहन्यासात्सुदुर्लभान् ॥
इत्युक्त्वा भगवान्देवः सहस्राक्षः प्रतापवान् ।
श्रुतावतीं ततः पुण्यां जगाम त्रिदिवं पुनः ॥ ५७
गते वज्रधरे राजंस्तत्र वर्षं पपात ह ।
पुष्पाणां भरतश्रेष्ठ दिव्यानां पुण्यगन्धिनाम् ॥५८
देवदुन्दुभयश्चापि नेदुस्तत्र महास्वनाः ।
मारुतश्च ववौ पुण्यः पुण्यगन्धो विशांपते ॥ ५९
उत्सृज्य तु शुभा देहं जगामास्य च भार्यताम् ।
तपसोग्रेण तं लब्ध्वा तेन रेमे सहाच्युत ॥ ६०

जनमेजय उवाच ।

का तस्या भगवन्माता क्व संवृद्धा च शोभना ।
श्रोतुमिच्छाम्यहं विप्र परं कौतूहलं हि मे ॥ ६१

वैशंपायन उवाच ।

भरद्वाजस्य विप्रर्षेः स्कन्नं रेतो महात्मनः ।
दृष्ट्वाऽप्सरसमायान्तीं घृताचीं पृथुलोचनाम् ॥६२
स तु जग्राह तद्रेतः करेण जपतां वरः ।
तदाऽपतत्पर्णपुटे तत्र सा संभवत्सुता ॥ ६३
तस्यास्तु जातकर्मादि कृत्वा सर्वं तपोधनः ।
नाम चास्याः स कृतवान्भरद्वाजो महामुनिः ॥ ६४
श्रुतावतीति धर्मात्मा देवर्षिगणसंसदि ।
स्वे च तामाश्रमे न्यस्य जगाम हिमवद्वनम् ॥ ६५

तत्राप्युपस्पृश्य महानुभावो
वसूनि दत्त्वा च महाद्विजेभ्यः ।
जगाम तीर्थं सुसमाहितात्मा
शक्रस्य वृष्णिप्रवरस्तदानीम् ॥ ६६

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

पञ्चाशोऽध्यायः ॥ ५० ॥

बलभद्रस्येन्द्रतीर्थादिगमनम् ॥ १ ॥ तत्तत्तीर्थमाहात्म्यकथनम् ॥ २ ॥

वैशंपायन उवाच ।

इन्द्रतीर्थं ततो गत्वा यदूनां प्रवरो बली ।
विप्रेभ्यो धनरत्नानि ददौ स्नात्वा यथाविधि ॥ १
तत्र ह्यमरराजो वै ईजे क्रतुशतेन ह ।
बृहस्पतेश्च देवेशः प्रददौ विपुलं धनम् ॥ २
अनर्गलान्सजारूथ्यान्सर्वान्विविधदक्षिणान् ।
आजहार क्रतूंस्तत्र यथोक्तं वेदपारगैः ॥ ३
तान्क्रतून्भरतश्रेष्ठ शतकृत्वो महाद्युतिः ।
पूरयामास विधिवत्ततः ख्यातः शतक्रतुः ॥ ४
तस्य नाम्ना तु तत्तीर्थं शिवं पुण्यं सनातनम् ।

इन्द्रतीर्थमिति ख्यातं सर्वपापप्रमोचनम् ॥ ५
उपस्पृश्य च तत्रापि विधिवन्मुसलायुधः।
ब्राह्मणान्पूजयित्वा च पानाच्छादनभोजनैः ॥ ६
शुभं तीर्थवरं तस्माद्रामतीर्थं जगाम ह।
यत्र रामो महाभागो भार्गवः सुमहातपाः ॥ ७
असकृत्पृथिवीं कृत्वा हतक्षत्रियपुङ्गवाम्।
उपाध्यायं पुरस्कृत्य काश्यपं मुनिसत्तमम् ॥ ८
अयजद्वाजपेयेन सोऽश्वमेधशतेन च।
प्रददौ दक्षिणार्थं च पृथिवीं सागराम्बराम् ॥ ९
रामो दत्त्वा धनं तत्र द्विजेभ्यो जनमेजय।
उपस्पृश्य यथान्यायं पूजयित्वा तथा द्विजान् १०
पुण्यतीर्थे शुभे देशे वसु दत्त्वा हलायुधः।
मुनींश्चैवाभिवाद्याथ यमुनातीर्थमागमत्।
यत्रानयामास तदा राजसूयमपांपतिः ॥ ११
दितेः सुतान्महाभागो वरुणो वै सितप्रभः।
यत्र निर्जित्य सङ्ग्रामे मानुषान्दानवांस्तथा।
गन्धर्वान्राक्षसांश्चैव वरुणः परवीरहा ॥ १२
तस्मिन्क्रतुवरे वृत्ते सङ्ग्रामः समजायत।
देवानां दानवानां च त्रैलोक्यस्य भयावहः॥१३
राजसूये क्रतुश्रेष्ठे निवृत्ते जनमेजय।
जायते सुमहाघोरः संक्षयः क्षत्रियान्प्रति ॥ १४
हलायुधस्तदा रामस्तस्मिंस्तीर्थवरे शुभे।
तत्र स्नात्वा च दत्त्वा च द्विजेभ्यो वसु माधवः॥१५
वनमाली ततो हृष्टः स्तूयमानो द्विजातिभिः।
तस्मादादित्यतीर्थं च जगाम कमलेक्षणः ॥ १६
यत्रेष्ट्वा भगवाञ्ज्योतिर्भास्करो राजसत्तम।
ज्योतिषामाधिपत्यं च प्रभावं चाभ्यपद्यत ॥ १७
तस्या नद्यास्तु तीरे वै सर्वे देवाः सवासवाः।
विश्वेदेवाः समरुतो गन्धर्वाप्सरसश्च ह ॥ १८
द्वैपायनः शुकश्चैव कृष्णश्च मधुसूदनः।
यक्षाश्च राक्षसाश्चैव पिशाचाश्च विशांपते ॥ १९
एते चान्ये च बहवो योगसिद्धाः सहस्रशः।
तस्मिंस्तीर्थे सरस्वत्याः शिवे पुण्ये परंतप ॥ २०
तत्र हत्वा पुरा विष्णुरसुरौ मधुकैटभौ।
आप्लुत्य भरतश्रेष्ठ तीर्थप्रवर उत्तमे ॥ २१
द्वैपायनश्च धर्मात्मा तत्रैवाप्लुत्य भारत।
संप्राप्तः परमं योगं सिद्धिं च परमां गतः ॥ २२
असितो देवलश्चैव तस्मिन्नेव महातपाः।
परमं योगमास्थाय ऋषिर्योगमवाप्तवान् ॥ २३

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि पञ्चाशोऽध्यायः ॥ ५० ॥

एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

देवलजैगीषव्ययोश्चरित्रकीर्तनम् ॥ १ ॥ बलभद्रस्यादित्यतीर्थात्सोमतीर्थगमनम् ॥ २ ॥

वैशंपायन उवाच।
तस्मिन्नेव तु धर्मात्मा वसति स्म तपोधनः।
गार्हस्थ्यं धर्ममास्थाय ह्यसितो देवलः पुरा ॥ १
धर्मनित्यः शुचिर्दान्तो यज्ञशीलो महातपाः।
कर्मणा मनसा वाचा समः सर्वेषु जन्तुषु ॥ २
अक्रोधनो महाराज तुल्यनिन्दात्मसंस्तुतिः।
प्रियाप्रिये तुल्यवृत्तिर्यमवत्समदर्शनः ॥ ३
काञ्चने लोष्टके चैव समदर्शी महातपाः।
देवानपूजयन्नित्यमतिथींश्च द्विजैः सह।
ब्रह्मचर्यरतो नित्यं सदा धर्मपरायणः ॥ ४
ततोऽभ्येत्य महाभाग योगमास्थाय भिक्षुकः।
जैगीषव्यो मुनिर्धीमांस्तस्मिंस्तीर्थे समाहितः ॥ ५
देवलस्याश्रमे राजन्यवसत्स महाद्युतिः।
योगनित्यो महाराज सिद्धिं प्राप्तो महातपाः ॥ ६
तं तत्र वसमानं तु जैगीषव्यं महामुनिम्।
देवलो दर्शयन्नेव नैवायुञ्जत धर्मतः ॥ ७

आनयामास मुनीनित्यनुषज्यते। राजसूय कर्तुमिति शेष ॥ ११ ॥ पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

नैवामुञ्चत धर्मत इति छ. पाठ ॥ ७ ॥

एवं तयोर्महाराज दीर्घकालो व्यतिक्रमत् ॥ ८
जैगीषव्यो मुनिस्तं तु ददर्शाथ स केवलम् ।
आहारकाले मतिमान्परिव्राड् जनमेजय ॥ ९
उपातिष्ठत धर्मज्ञो भैक्षकाले स देवलम् ।
स दृष्ट्वा भिक्षुरूपेण प्राप्तं तत्र महामुनिम् ।
गौरवं परमं चक्रे प्रीतिं च विपुलां तथा ॥ १०
देवलस्तु यथाशक्ति पूजयामास भारत ।
ऋषिदृष्टेन विधिना समा बह्वीः समाहितः ॥११
कदाचित्तस्य नृपते देवलस्य महात्मनः ।
चिन्ता सुमहती जाता मुनिं दृष्ट्वा महाद्युतिम्॥१२
समास्तु समतिक्रान्ता बह्वयः पूजयतो मम ।
न चायमलसो भिक्षुरभ्यभाषत किंचन ॥ १३
एवं विगणयन्नेव स जगाम महोदधिम् ।
अन्तरिक्षचरः श्रीमान्कलशं गृह्य देवलः ॥ १४
गच्छन्नेव स धर्मात्मा समुद्रं सरितां पतिम् ।
जैगीषव्यं ततोऽपश्यद्गतं प्रागेव भारत ॥ १५
ततः सविस्मयश्चिन्तां जगामाथामितप्रभः ।
कथं भिक्षुरयं प्राप्तः समुद्रे स्नात एव च ॥ १६
इत्येवं चिन्तयामास महर्षिरसितस्तदा ।
स्नात्वा समुद्रे विधिवच्छुचिर्जप्यं जजाप सः॥१७
कृतजप्याह्निकः श्रीमानाश्रमं च जगाम ह ।
कलशं जलपूर्णं वै गृहीत्वा जनमेजय ॥ १८
ततः स प्रविशन्नेव स्वमाश्रमपदं मुनिः ।
आसीनमाश्रमे तत्र जैगीषव्यमपश्यत ॥ १९
न व्याहरति चैवैनं जैगीषव्यः कथंचन ।
काष्ठभूतोऽऽश्रमपदे वसति स्म महातपाः ॥ २०
तं दृष्ट्वा चाप्लुतं तोये सागरे सागरोपमम् ।
प्रविष्टमाश्रमं चापि पूर्वमेव ददर्श सः ॥ २१
असितो देवलो राजंश्चिन्तयामास बुद्धिमान् ।
दृष्ट्वा प्रभावं तपसो जैगीषव्यस्य योगजम् ॥२२
चिन्तयामास राजेन्द्र तदा स मुनिसत्तमः ।
मया दृष्टः समुद्रे च आश्रमे च कथंन्वयम्॥२३
एवं विगणयन्नेव स मुनिर्मन्त्रपारगः ।

व्यतिक्रमत् व्यत्यक्रामत् ॥ ८ ॥

उत्पपाताश्रमात्तस्मादन्तरिक्षं विशांपते ।
जिज्ञासार्थं तदा भिक्षोर्जैगीषव्यस्य देवलः ॥२४
सोऽन्तरिक्षचरान्सिद्धान्समपश्यत्समाहितान् ।
जैगीषव्यं च तैः सिद्धैः पूज्यमानमपश्यत ॥२५
ततोऽसितः सुसंरब्धो व्यवसायी दृढव्रतः ।
अपश्यद्वै दिवं यातं जैगीषव्यं स देवलः ॥ २६
तस्माच्च पितृलोकं तं व्रजन्तं सोऽन्वपश्यत ।
पितृलोकाच्च तं यातं याम्यं लोकमपश्यत ॥ २७
'तस्मादादित्यलोकं च व्रजन्तं सोऽन्वपश्यत ।'
तस्मादपि समुत्पत्य सोमलोकमभिष्टुतम् ।
व्रजन्तमन्वपश्यत्स जैगीषव्यं स देवलः ॥ २८
लोकान्समुत्पतन्तं तु शुभानेकान्तयाजिनाम् ।
ततोऽग्निहोत्रिणां लोकांस्ततश्चाप्युत्पपात ह ॥२९
दर्शे च पौर्णमासं च ये यजन्ति तपोधनाः ।
तेभ्यः स ददृशे धीमाँल्लोकेभ्यः पशुयाजिनाम् ।
व्रजन्तं लोकममलमपश्यद्देवपूजितम् ॥ ३०
चातुर्मास्यैर्बहुविधैर्यजन्ते ये तपोधनाः ।
तेषां स्थानं ततो यातं तथाऽग्निष्टोमयाजिनाम् ३१
अग्निष्टुतेन च तथा ये यजन्ति तपोधनाः ।
तत्स्थानमनुसंप्राप्तमन्वपश्यत देवलः ॥ ३२
वाजपेयं ऋतुवरं तथा बहुसुवर्णकम् ।
आहरन्ति महाप्राज्ञास्तेषां लोकेष्वपश्यत ॥ ३३
यजन्ते राजसूयेन पुण्डरीकेण चैव ये ।
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ॥ ३४
अश्वमेधं ऋतुवरं नरमेधं तथैव च ।
आहरन्ति नरश्रेष्ठास्तेषां लोकेष्वपश्यत ॥ ३५
सर्वमेधं च दुष्प्रापं तथा सौत्रामणिं च ये ।
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ॥ ३६
द्वादशाहैश्च सत्रैश्च यजन्ते विविधैर्नृप ।
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ॥ ३७
मैत्रावरुणयोर्लोकानादित्यानां तथैव च ।
सलोकतामनुप्राप्तमपश्यत ततोऽसितः ॥ ३८
रुद्राणां च वसूनां च स्थानं यच्च बृहस्पतेः ।

असितप्रभ इति छ. पाठः ॥ १६ ॥

तानि सर्वाण्यतीतं च समपश्यत्ततोऽसितः ॥३९
आरुह्य च गवां लोकं प्रयान्तं ब्रह्मसत्रिणाम् ।
लोकानपश्यद्गच्छन्तं जैगीषव्यं ततोऽसितः ॥४०
त्रीँल्लोकान्प्रवरान्विप्रमुत्पतन्तं स्वतेजसा ।
पतिव्रतानां लोकांश्च व्रजन्तं सोऽन्वपश्यत ॥४१
ततो मुनिवरं भूयो जैगीषव्यमथासितः ।
नान्वपश्यत लोकस्थमन्तर्हितमरिंदम ॥ ४२
सोऽचिन्तयन्महाभागो जैगीषव्यस्य देवलः ।
प्रभावं सुव्रतत्वं च सिद्धिं योगस्य चातुलाम् ॥ ४३
असितोऽपृच्छत तदा सिद्धाँल्लोकेषु सत्तमान् ।
प्रयतः प्राञ्जलिर्भूत्वा धीरस्तान्ब्रह्मचारिणः ॥ ४४
जैगीषव्यं न पश्यामि तं शंसन्तु तपोधनाः ।
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ॥ ४५
सिद्धा ऊचुः ।
शृणु देवल भूतार्थं शंसतां नो दृढव्रत ।
जैगीषव्यो गतो लोकं शाश्वतं ब्रह्मणोक्षयम् ॥४६
वैशंपायन उवाच ।
स श्रुत्वा वचनं तेषां सिद्धानां ब्रह्मचारिणाम् ।
असितो देवलस्तूर्णमुत्पपात पपात च ॥ ४७
ततः सिद्धास्त ऊचुर्हि देवलं पुनरेव ह ।
न देवलगतिस्तत्र तव गन्तुं तपोधन ।
ब्रह्मणः सदने विप्र जैगीषव्यो यदाप्तवान् ॥ ४८
वैशंपायन उवाच ।
तेषां तद्वचनं श्रुत्वा सिद्धानां देवलः पुनः ।
आनुपूर्व्येण लोकांस्तान्सर्वानवततार ह ॥ ४९
स्वमाश्रमपदं पुण्यमाजगाम पतङ्गवत् ।
प्रविशन्नेव चापश्यज्जैगीषव्यं स देवलः ॥ ५०
ततो बुद्ध्या व्यगणयद्देवलो धर्मयुक्तया ।
दृष्ट्वा प्रभावं तपसो जैगीषव्यस्य योगजम् ॥ ५१
ततोऽब्रवीन्महात्मानं जैगीषव्यं स देवलः ।
विनयावनतो राजन्नुपसर्प्य महामुनिम् ।
मोक्षधर्मं समास्थातुमिच्छेयं भगवन्नहम् ॥ ५२
तस्य तद्वचनं श्रुत्वा उपदेशं चकार सः ।
विधिं योगस्य परमं कार्याकार्यस्य शास्त्रतः ॥ ५३
संन्यासे कृतबुद्धिं तं ततो दृष्ट्वा महातपाः ।
सर्वाश्चास्य क्रियाश्चक्रे विधिदृष्टेन कर्मणा ॥ ५४
संन्यासे कृतबुद्धिं तं भूतानि पितृभिः सह ।
ततो दृष्ट्वा प्ररुरुदुः कोऽस्मान्संविभजिष्यति ॥५५
देवलस्तु वचः श्रुत्वा भूतानां करुणं तथा ।
दिशो दश व्याहरतां मोक्षं त्यक्तुं मनो दधे ॥ ५६
ततस्तु फलमूलानि पवित्राणि च भारत ।
पुष्पाण्योषधयश्चैव रोरूयन्ते सहस्रशः ॥ ५७
पुनर्नो देवलः क्षुद्रो नूनं छेत्स्यति दुर्मतिः ।
अभयं सर्वभूतेभ्यो यो दत्त्वा नावबुध्यते ॥ ५८
ततो भूयो व्यगणयत्स्वबुद्ध्या मुनिसत्तमः ।
मोक्षे गार्हस्थ्यधर्मे वा किंनु श्रेयस्करं भवेत् ॥ ५९
इति निश्चित्य मनसा देवलो राजसत्तम ।
त्यक्त्वा गार्हस्थ्यधर्मं स मोक्षधर्ममरोचयत् ॥ ६०
एवमादीनि संचिन्त्य देवलो निश्चयान्वितः ।
प्राप्तवान्परमां सिद्धिं परं योगं च भारत ॥ ६१
ततो देवाः समागम्य बृहस्पतिपुरोगमाः ।
जैगीषव्यं तपश्चास्य प्रशंसन्ति तपस्विनः ॥ ६२
अथाब्रवीद्दृषिवरो देवान्वै नारदस्तथा ।
जैगीषव्ये तपो नास्ति विस्मापयति योऽसितम् ६३
तमेवंवादिनं धीरं प्रत्यूचुस्ते दिवौकसः ।
नैवमित्येव शंसन्तो जैगीषव्यं महामुनिम् ॥ ६४
नातः परतरं किंचित्तुल्यमस्ति प्रभावतः ।
तेजसस्तपसश्चास्य योगस्य च महात्मनः ॥ ६५
एवं प्रभावो धर्मात्मा जैगीषव्यस्तथाऽसितः ।
तयोरिदं स्थानवरं तीर्थं चैव महात्मनोः ॥ ६६

भूतार्थं यथाभूतार्थम् ॥ ४६ ॥ उत्पपात ब्रह्मलोक गन्तुमिति शेषः । पपात च गगनात् ॥ ४७ ॥ सर्वाः क्रिया उत्सर्गेच्छादयः ॥ ५४ ॥ मोक्ष संन्यासं त्यक्तु मनो दधे । उत्सृष्टानामग्नीना पुनराधान कर्तुमैच्छत् ॥ ५६ ॥ असितो देवलः ॥ ६६ ॥ एकपञ्चाशत्ततोऽध्यायः ॥ ५१ ॥

तत्राप्युपस्पृश्य ततो महात्मा
दत्त्वा च वित्तं हलभृद्द्विजेभ्यः ।
अवाप्य धर्मं परमार्थकर्मा
जगाम सोमस्य महत्सुतीर्थम् ॥ ६७

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

दधीचिसारस्वतयोश्चरितवर्णनम् ॥ १ ॥

वैशंपायन उवाच ।
यत्रेजिवानुडुपती राजसूयेन भारत ।
यस्मिन्वृत्ते महानासीत्संग्रामस्तारकामयः ॥ १
तत्राप्युपस्पृश्य बलो दत्त्वा दानानि चात्मवान् ।
सारस्वतस्य धर्मात्मा मुनेस्तीर्थं जगाम ह ॥ २
यत्र द्वादशवार्षिक्यामनावृष्ट्यां द्विजोत्तमान् ।
वेदानध्यापयामास पुरा सारस्वतो मुनिः ॥ ३
जनमेजय उवाच ।
कथं द्वादशवार्षिक्यामनावृष्ट्यां द्विजोत्तमान् ।
वेदानध्यापयामास पुरा सारस्वतो मुनिः ॥ ४
वैशंपायन उवाच ।
आसीत्पूर्वं महाराज मुनिर्धीमान्महातपाः ।
दधीचिरिति विख्यातो ब्रह्मचारी जितेन्द्रियः ॥५
तस्यातितपसः शक्रो बिभेति सततं विभो ।
न स लोभयितुं शक्यः फलैर्बहुविधैरपि ॥ ६
प्रलोभनार्थं तस्याथ प्राहिणोत्पाकशासनः ।
दिव्यामप्सरसं पुण्यां दर्शनीयामलम्बुसाम् ॥ ७
तस्य तर्पयतो देवान्सरस्त्यां महात्मनः ।
समीपतो महाराज सोपातिष्ठत भामिनी ॥ ८
तां दिव्यवपुषं दृष्ट्वा तस्यर्षेर्भावितात्मनः ।
रेतः स्कन्नं सरस्त्यां तत्सा जग्राह निम्नगा ॥ ९
कुक्षौ चाप्यदधद्धृष्टा तद्रेतः पुरुषर्षभ ।
सा दधार च तं गर्भं पुत्रहेतोर्महात्मनः ॥ १०
सुषुवे चापि समये पुत्रं सारस्वतं वरम् ।
जगाम पुत्रमादाय तमृषिं प्रति च प्रभो ॥ ११
ऋषिसंसदि तं दृष्ट्वा सा नदी मुनिसत्तमम् ।
ततः प्रोवाच राजेन्द्र ददती पुत्रमस्य तम् ।
ब्रह्मर्षे तव पुत्रोऽयं त्वद्भक्त्या धारितो मया ॥ १२
दृष्ट्वा तेऽप्सरसं रेतो यत्स्कन्नं प्रागलम्बुसाम् ।
तत्कुक्षिणाऽहं ब्रह्मर्षे त्वद्भक्त्या धृतवत्यहम् ॥१३
न विनाशमिदं गच्छेत्त्वत्तेज इति निश्चयात् ।
प्रतिगृह्णीष्व पुत्रं स्वं मया दत्तमनिन्दितम् ॥ १४
इत्युक्तः प्रतिजग्राह प्रीतिं चावाप पुष्कलाम् ।
पितृवच्चोपजिघ्रत्तं मूर्ध्नि प्रेम्णा द्विजोत्तमः ॥ १५
परिष्वज्य चिरं कालं तदा भरतसत्तम ।
सरस्त्यै वरं प्रादात्प्रीयमाणो महामुनिः ॥ १६
विश्वेदेवाः सपितरो गन्धर्वाप्सरसां गणाः ।
तृप्तिं यास्यन्ति सुभगे तर्प्यमाणास्त्वाम्भसा १७
इत्युक्त्वा स तु तुष्टाव वचोभिर्वै महानदीम् ।
प्रीतः परमहृष्टात्मा यथावच्छृणु पार्थिव ॥ १८
दधीचिरुवाच ।
प्रस्रुताऽसि महाभागे सरसो ब्रह्मणः पुरा ।
जानन्ति त्वां सरिच्छ्रेष्ठे मुनयः संशितव्रताः ॥१९
मम प्रियकरी चापि सततं प्रियदर्शने ।
तस्मात्सारस्वतं पुत्रमदधा वरवर्णिनि ॥ २०
तवैव नाम्ना प्रथितः पुत्रस्ते लोकभावनः ।
सारस्वत इति ख्यातो भविष्यति महातपाः २१
एष द्वादशवार्षिक्यामनावृष्ट्यां द्विजर्षभान् ।
सारस्वतो महाभागे वेदानध्यापयिष्यति ॥ २२
पुण्याभ्यश्च सरिद्भ्यस्त्वं सदा पुण्यतमा शुभे ।
भविष्यसि महाभागे मत्प्रसादात्सरस्वति ॥ २३
एवं सा संस्तुता तेन वरं लब्ध्वा महानदी ।

दधीच इति इति छ. झ. पाठः ॥ ५ ॥ ऋषिसंसादित द्रष्टेति क छ. पाठः । तत्र संसादित परिवारितमित्यर्थः ॥ १२ ॥

पुत्रमादाय मुदिता जगाम भरतर्षभ ॥ २४
एतस्मिन्नेव काले तु विरोधे देवदानवैः ।
शक्रः प्रहरणान्वेषी लोकांस्त्रीन्विचचार ह ॥ २५
न चोपलेभे भगवाञ्शक्रः प्रहरणं तदा ।
यद्वै तेषां भवेद्योग्यं वधाय विबुधद्विषाम् ॥ २६
ततोऽब्रवीत्सुराञ्शक्रो न मे शक्याः सुरारयः ।
ऋतेऽस्थिभिर्दधीचस्य निहन्तुं त्रिदशद्विषः ॥ २७
तस्माद्यत्नाद्दधिश्रेष्ठो याच्यतां कार्यसिद्धये ।
दधीचास्थीनि देहीति तैर्वधिष्यामहे रिपून् ॥ २८
स च तैर्याचितोऽस्थीनि यत्नाद्दधिवरस्तदा ।
साहाय्यं नः कुरुष्वेति चकारैवाविचारयन् ॥ २९
स लोकानक्षयान्प्राप्तो देवप्रियकरस्तदा ।
तस्यास्थिभिरथो शक्रः संप्रहृष्टमनास्तदा ॥ ३०
कारयामास दिव्यानि नानाप्रहरणान्युत ।
गदा वज्राणि चक्राणि गुरून्दण्डांश्च पुष्कलान् ३१
स हि तीव्रेण तपसा संभृतः परमर्षिणा ।
प्रजापतिसुतेनाथ भृगुणा लोकभावनः ॥ ३२
अतिकायः स तेजस्वी लोकसारो विनिर्मितः ।
जज्ञे शैलगुरुः प्रांशुर्महिम्ना प्रथितः प्रभुः ॥ ३३
नित्यमुद्विजते चास्य तेजसः पाकशासनः ॥ ३४
तेन वज्रेण भगवान्मत्रयुक्तेन भारत ।
भृशं क्रोधविसृष्टेन ब्रह्मतेजोद्भवेन च ।
दैत्यदानववीराणां जघान नवतीर्नव ॥ ३५
अथ काले व्यतिक्रान्ते महत्यतिभयंकरी ।
अनावृष्टिरनुप्राप्ता राजन्द्वादशवार्षिकी ॥ ३६
तस्यां द्वादशवार्षिक्यामनावृष्ट्यां महर्षयः ।
वृत्त्यर्थं प्राद्रवन्राजन्क्षुधार्ताः सर्वतोदिशम् ॥ ३७
दिग्भ्यस्तान्प्रद्रुतान्दृष्ट्वा मुनिः सारस्वतस्तदा ।
गमनाय मतिं चक्रे तं प्रोवाच सरस्वती ॥ ३८
न गन्तव्यमितः पुत्र तवाहारमहं सदा ।
दास्यामि मत्स्यप्रवरानुष्यतामिह भारत ॥ ३९
इत्युक्तस्तर्पयामास स पितॄन्देवतास्तथा ।
आहारमकरोन्नित्यं प्राणान्वेदांश्च धारयन् ॥ ४०
अथ तस्यामनावृष्ट्यामतीतायां महर्षयः ।
अन्योन्यं परिपप्रच्छुः पुनः स्वाध्यायकारणात् ४१
तेषां क्षुधापरीतानां नष्टा वेदा विधावताम् ।
सर्वेषामेव राजेन्द्र न किंचित्प्रतिभाति ह ॥ ४२
अथ कश्चिदृषिस्तेषां सारस्वतमुपेयिवान् ।
कुर्वाणं संशितात्मानं स्वाध्यायमृषिसत्तमम् ॥ ४३
स गत्वाऽचष्ट तेभ्यश्च सारस्वतमृषिं प्रभुम् ।
स्वाध्यायममरप्रख्यं कुर्वाणं विजने वने ॥ ४४
ततः सर्वे समाजग्मुस्तत्र राजन्महर्षयः ।
सारस्वतं मुनिश्रेष्ठमिदमूचुः समागताः ॥ ४५
अस्मानध्यापयस्वेति तानुवाच ततो मुनिः ।
शिष्यत्वमुपगच्छध्वं विधिना च ममेत्युत ॥ ४६
तत्राब्रुवन्मुनिगणा बालस्त्वमसि पुत्रक ।
स तानाह न मे धर्मो नश्येदिति पुनर्मुनीन् ॥ ४७
यो ह्यधर्मेण वै ब्रूयाद्गृह्णीयाद्योऽप्यधर्मतः ।
म्रियेतां तावुभौ क्षिप्रं स्यातां वा वैरिणावुभौ ॥ ४८
न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥ ४९
एतच्छ्रुत्वा वचस्तस्य मुनयस्ते विधानतः ।
तस्माद्वेदाननुप्राप्य पुनर्धर्मं प्रचक्रिरे ॥ ५०
षष्टिर्मुनिसहस्राणि शिष्यत्वं प्रतिपेदिरे ।
सारस्वतस्य विप्रर्षेर्वेदस्वाध्यायकारणात् ॥ ५१
मुष्टिं मुष्टिं ततः सर्वे दर्भाणां ते ह्युपाहरन् ।
तस्यासनार्थं विप्रर्षेर्बालस्यापि वशे स्थिताः ॥ ५२

तत्रापि दत्त्वा वसु रौहिणेयो
महाबलः केशवपूर्वजोऽथ ।
जगाम तीर्थं मुदितः क्रमेण
तं वृद्धकन्याश्रममेव वीरः ॥ ५३

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

दधीचोऽस्थीनीति छ पाठ ॥ २८ ॥ प्राणत्याग कुरुश्रेष्ठ चकारैवाविचार्यन्निति झ. पाठः ॥ २९ ॥ अस्य मुने. ॥३४॥ तेन तदस्थिजेन वज्रेण नवतीर्नव दशाधिका अष्टशतीम् ॥ ३५ ॥ द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

वृद्धकन्याचरित्रकथनम् ॥ १ ॥

जनमेजय उवाच ।
कथं कुमारी भगवंस्तपोयुक्ता ह्यभूत्पुरा ।
किमर्थं च तपस्तेपे को वाऽस्या नियमोऽभवत् ॥ १
सुदुष्करमिदं ब्रह्मंस्त्वत्तः श्रुतमनुत्तमम् ।
आख्याहि तत्त्वमखिलं यथा तपसि सा स्थिता ॥२
वैशंपायन उवाच ।
ऋषिरासीन्महावीर्यः कुणिर्गार्ग्यो महायशाः ।
स तप्त्वा विपुलं राजंस्तपो वै तपतां वरः ।
तपसाऽथ सुतां सुभ्रूं समुत्पादितवान्विभुः ॥ ३
तां च दृष्ट्वा मुनिः प्रीतः कुणिर्गार्ग्यो महायशाः ।
जगाम त्रिदिवं राजन्संत्यज्येह कलेवरम् ॥ ४
सुभ्रूः सा ह्यथ कल्याणी पुण्डरीकनिभेक्षणा ।
महता तपसोग्रेण कृत्वाश्रममनिन्दिता ॥ ५
उपवासैः पूजयन्ती पितृन्देवांश्च सा पुरा ।
तस्यास्तु तपसोग्रेण महान्कालोऽत्यगान्नृप ॥ ६
सा पित्रा दीयमानापि पतिं नैच्छदनिन्दिता ।
आत्मनः सदृशं सा तु भर्तारं नान्वपश्यत ॥ ७
ततः सा तपसोग्रेण पीडयित्वाऽऽत्मनस्तनुम् ।
पितृदेवार्चनरता बभूव विजने वने ॥ ८
साऽऽत्मानं मन्यमाना तु कृतकृत्यं श्रमान्विता ।
'जगाम वृद्धभावं तु कौमारब्रह्मचारिणी ॥' ९
वार्धकेन च राजेन्द्र तपसा चैव कर्शिता ।
सा नाशकद्यदा गन्तुं पदात्पदमपि स्वयम् ॥ १०
चकार गमने बुद्धिं परलोकाय वै तदा ।
मोक्तुकामां तु तां दृष्ट्वा शरीरं नारदोऽब्रवीत् ॥११
असंस्कृतायाः कन्यायाः कुतो लोकास्तवानघे ।
एवं तु श्रुतमस्माभिर्देवलोके महाव्रते ॥ १२
तपः परमकं प्राप्तं न तु लोकास्त्वया जिताः ।
तन्नारदवचः श्रुत्वा साऽब्रवीदृषिसंसदि ॥ १३
तपसोऽर्धं प्रयच्छामि पाणिग्राहस्य सत्तमाः ।
इत्युक्तेऽस्यास्तु जग्राह पाणिं गालवसंभवः ॥१४
ऋषिः प्राक् शृङ्गवान्नाम समयं चेममब्रवीत् ।
समयेन तवाद्याहं पाणिं स्प्रक्ष्यामि शोभने ॥ १५
यद्येकरात्रं वस्तव्यं त्वया सह मयेति ह ।
तथेति सा प्रतिश्रुत्य तस्मै पाणिं ददौ तदा ॥ १६
यथादृष्टेन विधिना हुत्वा चाग्निं विधानतः ।
चक्रे च पाणिग्रहणं तस्योद्वाहं च गालविः ॥१७
सा रात्रावभवद्राजंस्तरुणी वरवर्णिनी ।
दिव्याभरणवस्त्रा च दिव्यगन्धानुलेपना ॥ १८
तां दृष्ट्वा गालविः प्रीतो दीपयन्तीमिव श्रिया ।
उवास च क्षपामेकां प्रभाते साऽब्रवीच्च तम् ॥१९
यस्त्वया समयो विप्र कृतो मे तपतां वर ।
तेनोषिताऽस्मि भद्रं ते स्वस्ति तेऽस्तु व्रजाम्यहम् ॥
सा तु ध्यात्वाऽब्रवीद्भूयो योऽस्मिंस्तीर्थे समाहितः ।
वसते रजनीमेकां तर्पयित्वा दिवौकसः ॥ २१
चत्वारिंशतमष्टौ च द्वौ चाष्टौ सम्यगाचरेत् ।
यो ब्रह्मचर्यं वर्षाणि फलं तस्य लभेत सः ॥ २२
एवमुक्त्वा ततः साध्वी देहं त्यक्त्वा दिवं गता ।
ऋषिरप्यभवद्दीनस्तस्या रूपं विचिन्तयन् ॥ २३
समयेन तपोऽर्धं च कृच्छ्रात्प्रतिगृहीतवान् ।
साधयित्वा तदाऽऽत्मानं तस्याः स गतिमाप्तवान् ।
दुःखितो भरतश्रेष्ठ तस्या रूपबलात्कृतः ॥ २४
एतत्ते वृद्धकन्याया व्याख्यातं चरितं महत् ।
तथैव ब्रह्मचर्यं च स्वर्गस्य च गतिः शुभा ॥२५
तत्रस्थश्चापि शुश्राव हतं शल्यं हलायुधः ॥ २६
तत्रापि दत्त्वा दानानि द्विजातिभ्यः परंतपः ।
शुशोच शल्यं संग्रामे निहतं पाण्डवैस्तदा ॥ २७

तपसा सयुता सुभ्रूः समुत्पन्ना महात्मन इति छ. पाठ ॥ ३ ॥ चत्वारिंशतमष्टौ चेति । प्रतिवेद द्वादशवर्षाणीति वेदचतुष्टयाध्ययनायाष्टाचत्वारिंशद्वर्षाणि । ततो द्वौ वत्सरौ स्नातकेन गुरोरानृण्यार्थं सेवा कार्या । ततोऽष्टवार्षिकी कन्या परिणीय तस्या यौवनावाप्त्यष्टवर्षाणीत्यष्टपञ्चाशद्वर्षाणि ब्रह्मचर्यं सर्वस्येष्टम् ॥२२॥ सगतिमन्वियात् इति छ. पाठ. ॥२४॥ त्रिपञ्चाशोऽध्यायः ॥५३॥

समन्तपञ्चकद्वारात्ततो निष्क्रम्य माधवः। ते पृष्टा यदुसिंहेन कुरुक्षेत्रफलं विभो।
पप्रच्छर्षिगणान्रामः कुरुक्षेत्रस्य यत्फलम् ॥ २८ समाचख्युर्महात्मानस्तस्मै सर्वं यथातथम् ॥ २९

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

बलभद्राय महर्षिभिः कुरुक्षेत्रमहिमानुवर्णनम् ॥ १ ॥

ऋषय ऊचुः।
प्रजापतेरुत्तरवेदिरुच्यते
सनातनं राम समन्तपञ्चकम्।
समीजिरे यत्र पुरा दिवौकसो
वरेण सत्रेण महावरप्रदाः ॥ १
पुरा च राजर्षिवरेण धीमता
बहूनि वर्षाण्यमितेन तेजसा।
प्रकृष्टमेतत्कुरुणा महात्मना
ततः कुरुक्षेत्रमितीह पप्रथे ॥ २

राम उवाच।
किमर्थं कुरुणा कृष्टं क्षेत्रमेतन्महात्मना।
एतदिच्छाम्यहं श्रोतुं कथ्यमानं तपोधनाः ॥ ३

ऋषय ऊचुः।
पुरा किल कुरुं राम कर्षन्तं सततोत्थितम्।
अभ्येत्य शक्रस्त्रिदिवात्पर्यपृच्छत कारणम् ॥ ४

इन्द्र उवाच।
किमिदं वर्तते कर्म प्रयत्नेन परेण च।
राजर्षे किमभिप्रेत्य येनेयं कृष्यते क्षितिः ॥ ५

कुरुरुवाच।
इह ये पुरुषाः क्षेत्रे जनिष्यन्ति शतक्रतो।
ते गमिष्यन्ति सुकृतां लोकान्पापविवर्जितान् ॥ ६
अवहास्य तु तं शक्रो जगाम त्रिदिवं पुनः।
राजर्षिरप्यनिर्विण्णः कर्षत्येव वसुंधराम् ॥ ७
आगम्यागम्य चैवैनं भूयोभूयोऽपहास्य च।
शतक्रतुरनिर्विण्णं दृष्ट्वापृष्ट्वा जगाम ह ॥ ८
यदा तु तपसोग्रेण चकर्ष वसुधां नृपः।
ततः शक्रोऽब्रवीद्देवान्राजर्षेर्यच्चिकीर्षितम् ॥ ९
एतच्छ्रुत्वाऽब्रुवन्देवाः सहस्राक्षमिदं वचः।
वरेण च्छन्द्यतां शक्र राजर्षिर्यदि शक्यते ॥ १०
यदि ह्यत्र प्रसूता वै स्वर्गं गच्छन्ति मानवाः।
अस्माननिष्ट्वा क्रतुभिर्भागो नो न भविष्यति ॥ ११
आगम्य च ततः शक्रस्तदा राजर्षिमब्रवीत्।
अलं खेदेन भवतः क्रियतां वचनं मम ॥ १२
मानवा ये निराहारा देहं त्यक्ष्यन्त्यतन्द्रिताः।
युधि वा निहताः सम्यगपि तिर्यग्गता नृप ॥ १३
ते स्वर्गभाजो राजेन्द्र भवन्त्विह हतास्तु ये।
तथास्त्विति ततो राजा कुरुः शक्रमुवाच ह ॥ १४
ततस्तमभ्यनुज्ञाप्य प्रहृष्टेनान्तरात्मना।
जगाम त्रिदिवं भूयः क्षिप्रं बलनिषूदनः ॥ १५
एवमेतद्यदुश्रेष्ठ कृष्टं राजर्षिणा पुरा।
शक्रेण चाभ्यनुज्ञातः पुण्ये प्राणान्मुमोच ह ॥ १६
[शक्रेण चाभ्यनुज्ञातं ब्रह्माद्यैश्च सुरैस्तथा।
नातः परतरं पुण्यं भूमेः स्थानं भविष्यति ॥ १७
इह तप्स्यन्ति ये केचित्तपः परमकं नराः।
देहत्यागेन ते सर्वे यास्यन्ति ब्रह्मणः क्षयम् ॥ १८
ये पुनः पुण्यभाजो वै दानं दास्यन्ति मानवाः।
तेषां सहस्रगुणितं भविष्यत्यचिरेण वै ॥ १९
ये चेह नित्यं मनुजा निवत्स्यन्ति शुभैषिणः।
यमस्य विषयं ते तु न द्रक्ष्यन्ति कदाचन ॥ २०
यक्ष्यन्ति ये च क्रतुभिर्महद्भिर्मनुजेश्वराः।
तेषां त्रिविष्टपे वासो यावद्भूमिर्धरिष्यति ॥] २१

पप्रथे प्रसिद्ध बभूव ॥ २ ॥ मरिष्यन्ति शतक्रतो इति झ. पाठः ॥ ६ ॥ प्रमीता वै इति झ. पाठ. ॥ ११ ॥ ब्रह्मणः क्षयं निवासम् ॥ १८ ॥

अपि चात्र स्वयं शक्रो जगौ गाथां सुराधिपः ।
कुरुक्षेत्रनिबद्धां वै तां शृणुष्व हलायुध ॥ २२
पांसवोऽपि कुरुक्षेत्राद्वायुना समुदीरिताः ।
अपि दुष्कृतकर्माणं नयन्ति परमां गतिम् ॥ २३
'कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम् ।
इत्येवं निश्चितो भूत्वा तेन स्वर्गं गमिष्यति ॥ २४
कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम् ।
तथा स्थानं च मौनं च वीरासनमुपास्महे ॥ २५
एवं प्रलपमानोऽपि चिन्तयंश्च मुहुर्मुहुः ।
दूरस्थो यदि वा तिष्ठँल्लभेत्स्वर्गं सुनिश्चितम् ॥' २६
सुरर्षभा ब्राह्मणसत्तमाश्च
तथा नृगाद्या नरदेवमुख्याः ।
इष्ट्वा महार्हैः क्रतुभिर्नृसिंह
संत्यज्य देहान्सुगतिं प्रपन्नाः ॥ २७
तरन्तुकारन्तुकयोर्यदन्तरं
रामह्रदानां च मचक्रुकस्य च ।
एतत्कुरुक्षेत्रसमन्तपञ्चकं
प्रजापतेरुत्तरवेदिरुच्यते ॥ २८
शिवं महापुण्यमिदं दिवौकसां
सुसंमतं स्वर्गगुणैः समन्वितम् ।
अतश्च सर्वे निहता नृपा रणे
यास्यन्ति पुण्यां गतिमक्षयां सदा ॥ २९
[इत्युवाच स्वयं शक्रः सह ब्रह्मादिभिस्तदा ।
तच्चानुमोदितं सर्वं ब्रह्मविष्णुमहेश्वरैः ॥] ३०

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

मित्रावरुणाश्रमे नारदाद्भीमदुर्योधनयोर्गदायुद्धोपक्रमश्राविणा बलरामेण तद्दिदृक्षया कुरुक्षेत्रं प्रत्यागमनम् ॥ १ ॥

वैशंपायन उवाच ।
कुरुक्षेत्रं ततो दृष्ट्वा दत्त्वा देयांश्च सात्वतः ।
आश्रमं सुमहत्पुण्यमगमज्जनमेजय ॥ १
मधूकाम्रवणोपेतं प्लक्षन्यग्रोधसंकुलम् ।
चिरबिल्वयुतं पुण्यं पनसार्जुनसंकुलम् ॥ २
तं दृष्ट्वा यादवश्रेष्ठः प्रवरं पुण्यलक्षणम् ।
पप्रच्छ तानृषीन्सर्वान्कस्याश्रमवरस्त्वयम् ॥ ३
ते तु सर्वे महात्मानमूचू राजन्हलायुधम् ।
शृणु विस्तरशो राम यस्यायं पूर्वमाश्रमः ॥ ४
अत्र विष्णुः पुरा देवस्तप्तवांस्तप उत्तमम् ।
अत्रास्य विधिवद्यज्ञाः सर्वे वृत्ताः सनातनाः ॥ ५
अत्रैव ब्राह्मणी वृद्धा कौमारब्रह्मचारिणी ।
योगयुक्ता दिवं याता तपोयुक्ता विशांपते ॥ ६
बभूव श्रीमती राजञ्शाण्डिल्यस्य महात्मनः ।
सुता धृतव्रता साध्वी नियता ब्रह्मचारिणी ॥ ७
साऽपि प्राप्य परं योगं गता स्वर्गमनुत्तमम् ।
भुक्त्वाऽश्रमेऽश्वमेधस्य फलं फलवतः शुभम् ॥ ८
गता स्वर्गं महाराज पूजिता च महात्मभिः ।
अभिगम्याश्रमं पुण्यं स दृष्ट्वा यदुनन्दनः ॥ ९
ऋषींस्तानभिवाद्याथ पार्श्वे हिमवतोऽच्युतः ।
सन्ध्याकार्याणि सर्वाणि निर्वर्त्यारुरुहेऽचलम् १०
नातिदूरं ततो गत्वा नगं तालध्वजो बली ।
पुण्ये तीर्थवरे स्नात्वा विस्मयं परमं गतः ॥ ११
प्रभवं च सरस्वत्याः प्लक्षप्रस्रवणं बलः ।
संप्राप्तः कारपचनं तीर्थप्रवरमुत्तमम् ॥ १२
हलायुधस्तु तत्रापि दत्त्वा दानं महाबलः ।
आप्लुतः सलिले पुण्ये सुशीते विमले शुचौ ।
संतर्पयामास पितॄन्देवांश्च रणदुर्मदः ॥ १३

आरुन्दुकारुन्दकयोर्यदन्तर रामहदान। च समन्दुकस्य इति क पाठ । परमन्दुक्स्येति ड छ. पाठ ॥ २८ ॥ चतु पञ्चाशत्तमोऽ-याय ॥ ५४ ॥

स्कन्धावाराणि सर्वाणीति क ड छ पाठ ॥ १० ॥ प्लक्ष-प्रस्रवण विलमिति क पाठ ॥ १२ ॥

तत्रोष्यैकां तु रजनीं यतिभिर्ब्राह्मणैः सह ।
मित्रावरुणयोः पुण्यं जगामाश्रममच्युतः ॥ १४
इन्द्रोऽग्निर्यमा चैव यत्र प्राक् प्रीतिमाप्नुवन् ।
तं देशं कारपचनात्स तस्मादाजगामह ॥ १५
स्नात्वा तत्र च धर्मात्मा परां प्रीतिमवाप्य च ।
ऋषिभिश्चैव सिद्धैश्च सहितो वै महाबलः ।
उपविष्टः कथाः शुभ्राः शुश्राव यदुपुङ्गवः ॥ १६
तथा तु तिष्ठतां तेषां नारदो भगवानृषिः ।
आजगामाथ तं देशं यत्र रामो व्यवस्थितः ॥ १७
जटामण्डलसंवीतः कुशचीरी महातपाः ।
हेमदण्डधरो राजन्कमण्डलुधरस्तथा ॥ १८
महतीं सुखशब्दां तां गृह्य वीणां मनोरमाम् ।
नृत्ये गीते च कुशलो देवब्राह्मणपूजितः ॥ १९
प्रभवः कलहानां च नित्यं च कलहप्रियः ।
तं देशमगमद्यत्र श्रीमान्रामो व्यवस्थितः ॥ २०
प्रत्युत्थाय च तं रामः पूजयित्वा यतव्रतम् ।
देवर्षिं पर्यपृच्छत्स यथावृत्तं कुरून्प्रति ॥ २१
तदाऽस्याकथयद्राजन्नारदः सर्ववेदवित् ।
सर्वमेतद्यथावृत्तमतीतं कुरुसंक्षयम् ॥ २२
ततोऽब्रवीद्रौहिणेयो नारदं दीनया गिरा ।
किमवस्थं तु तत्क्षत्रं ये तु तत्राभवन्नृपाः ॥ २३
श्रुतमेतन्मया पूर्वं सर्वमेव तपोधन ।
विस्तरश्रवणे जातं कौतूहलमतीव मे ॥ २४
नारद उवाच ।
पूर्वमेव हतो भीष्मो द्रोणः सिन्धुपतिस्तथा ।
हतो वैकर्तनः कर्णः पुत्राश्चास्य महारथाः ॥ २५
भूरिश्रवा रौहिणेय मद्रराजश्च वीर्यवान् ।
एते चान्ये च बहवो हतास्तत्र महाबलाः ॥ २६
प्रियान्प्राणान्परित्यज्य प्रियार्थं कौरवस्य वै ।
राजानो राजपुत्राश्च समरेष्वनिवर्तिनः ॥ २७
अहतांस्तु महाबाहो शृणु मे तत्र माधव ॥ २८
धार्तराष्ट्रबले शेषास्त्रयः समितिमर्दनाः ।
कृपश्च कृतवर्मा च द्रोणपुत्रश्च वीर्यवान् ।
तेऽपि वै विद्रुता राम दिशो दश भयार्त्तदा ॥ २९
दुर्योधनो हते सैन्ये विद्रुतेषु पदातिषु ।
ह्रदं द्वैपायनं नाम विवेश भृशदुःखितः ॥ ३०
शयानं धार्तराष्ट्रं तु सलिले स्तम्भिते तदा ।
पाण्डवाः सह कृष्णेन वाग्भिरुग्राभिरार्दयन् ॥ ३१
स तुद्यमानो बलवान्वाग्भी राम समन्ततः ।
उत्थितः स ह्रदाद्वीरः प्रगृह्य महतीं गदाम् ॥ ३२
स चाप्युपगतो योद्धुं भीमेन सह साम्प्रतम् ।
भविष्यति तयोरद्य युद्धं राम सुदारुणम् ॥ ३३
यदि कौतूहलं तेऽस्ति व्रज माधव मा चिरम् ।
पश्य युद्धं महाघोरं शिष्ययोर्यदि मन्यसे ॥ ३४
वैशंपायन उवाच ।
नारदस्य वचः श्रुत्वा तानभ्यर्च्य द्विजर्षभान् ।
सर्वान्विसर्जयामास ये तेनाभ्यागताः सह ।
गम्यतां द्वारकां चेति सोऽन्वशादनुयायिनः ॥ ३५
सोऽवतीर्याचलश्रेष्ठात्प्लक्षप्रस्रवणाच्छुभात् ।
ततः प्रीतमना रामः श्रुत्वा तीर्थफलं महत् ।
विप्राणां सन्निधौ श्लोकमगायदिममच्युतः ॥ ३६

सरस्वतीवाससमा कुतो रतिः
सरस्वतीवाससमाः कुतो गुणाः ।
सरस्वतीं प्राप्य दिवं गता जनाः
सदा स्मरिष्यन्ति नदीं सरस्वतीम् ॥ ३७
सरस्वती सर्वनदीषु पुण्या
सरस्वती लोकशुभावहा सदा ।
सरस्वतीं प्राप्य जनाः सुदुष्कृतं
सदा न शोचन्ति परत्र चेह च ॥ ३८

ततो मुहुर्मुहुः प्रीत्या प्रेक्षमाणः सरस्वतीम् ।

कच्छपी सुखशब्दा तामिति क. छ. झ पाठ ॥ १९ ॥ दुर्योधनो हते शल्ये विद्रुतेषु कृपादिषु इति झ पाठ ॥ ३० ॥ सरस्वती हीनविदेशवासिनः सदा स्मरिष्यन्ति इति ङ. पाठ. । सरस्वतीहीनविदेशवासिन· इति क. पाठ. ॥ ३८ ॥ पञ्चपञ्चाशत्तमोऽध्याय ॥ ५५ ॥


हयैर्युक्तं रथं शुभ्रमारुरोह परंतपः ॥ ३९
स शीघ्रगामिना तेन रथेन यदुपुङ्गवः ।
दिदृक्षुरभिसंप्राप्तः शिष्ययुद्धमुपस्थितम् ॥ ४०
एवं तदभवद्युद्धं तुमुलं जनमेजय ।
यत्र दुःखान्वितो राजा धृतराष्ट्रोऽब्रवीदिदम् ४१


धृतराष्ट्र उवाच ।

रामं संनिहितं श्रुत्वा गदायुद्ध उपस्थिते ।
मम पुत्रः कथं भीमं प्रत्ययुध्यत सञ्जय ॥ ४२

॥ इति श्रीमन्महाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

समाप्तं ह्रदप्रवेशपर्व ॥ २ ॥


दुर्योधनः
गदायुद्धम्
भीमसेनः


भीमसेनः
दुर्योधनः

(अथ गदायुद्धपर्व ॥ ३ ॥)

षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

गदायुद्धाय संनद्धयोर्भीमदुर्योधनयोर्वर्णनम् ॥ १ ॥

सञ्जय उवाच ।
रामसान्निध्यमागम्य पुत्रो दुर्योधनस्तव ।
योद्धुकामो महाबाहुः समहृष्यत वीर्यवान् ॥ १
दृष्ट्वा लाङ्गलिनं राजा प्रत्युत्थाय च भारत ।
प्रीत्या* परमया युक्तो युधिष्ठिरमथाब्रवीत् ॥ २
दुर्योधन उवाच ।
समन्तपञ्चकं पुण्यमितो याम विशांपते ।
प्रथितोत्तरवेदी सा देवलोके प्रजापतेः ॥ ३
तस्मिन्महापुण्यतमे त्रैलोक्यस्य सनातने ।
सङ्गामे निधनं प्राप्य ध्रुवं स्वर्गं गमिष्यसि ॥ ४
तथेत्युक्त्वा महाराज कुन्तीपुत्रो युधिष्ठिरः ।
समन्तपञ्चकं वीरः प्रायादभिमुखः प्रभुः ॥ ५
ततो दुर्योधनो राजा प्रगृह्य महतीं गदाम् ।
पद्भ्याममर्षी द्युतिमानगच्छत्पाण्डवैः सह ॥ ६
तथा यान्तं गदाहस्तं वर्मणा चापि दंशितम् ।
अन्तरिक्षचरा देवाः साधुसाध्वित्यपूजयन् ॥ ७
वादकाश्च नरास्तत्र दृष्ट्वा ते हर्षमागताः ॥ ८
स पाण्डवैः परिवृतः कुरुराजस्तवात्मजः ।
मत्तस्येव गजेन्द्रस्य गतिमास्थाय सोऽव्रजत् ॥ ९
ततः शङ्खनिनादैश्च भेरीणां च महास्वनैः ।
सिंहनादैश्च शूराणां दिशः सर्वाः प्रपूरिताः ॥ १०
ततस्ते तु कुरुक्षेत्रं प्राप्ता नरवरोत्तमाः ।
प्रतीच्यभिमुखं देशं यथोद्दिष्टं सुतेन ते ।
दक्षिणेन सरस्वत्याः स्वयनं तीर्थमुत्तमम् ॥ ११
तस्मिन्देशे ह्यनिरिणे ते तु युद्धमरोचयन् ॥ १२
ततो भीमो महाकोटिं गदां गृह्याथ वर्मभृत् ।
बिभ्रद्रूपं महाराज सदृशं हि गरुत्मतः ॥ १३
अवबद्धशिरस्त्राणः शुद्धकाञ्चनवर्मभृत् ।
रराज राजन्पुत्रस्ते काञ्चनः शैलराडिव ॥ १४
तौ तथा संगतौ वीरौ भीमदुर्योधनावुभौ ।
संयुगे संप्रकाशेते संरब्धाविव कुञ्जरौ ॥ १५
रथमण्डलमध्यस्थौ भ्रातरौ तौ नरर्षभौ ।
अशोभेतां महाराज चन्द्रसूर्याविवोदितौ ॥ १६
तावन्योन्यं निरीक्षेतां क्रुद्धाविव महोरगौ ।
दहन्तौ लोचनै राजन्परस्परवधैषिणौ ॥ १७
संप्रहृष्टमना राजन्गदामादाय कौरवः ।
सृक्किणी संलिहन्राजन्क्रोधरक्तेक्षणः श्वसन् ॥ १८
ततो दुर्योधनो राजन्गदामादाय वीर्यवान् ।
भीमसेनमभिप्रेक्ष्य गजो गजमिवाह्वयत् ॥ १९
अद्रिसारमयीं भीमस्तथैवादाय वीर्यवान् ।
आह्वयामास नृपतिं सिंहः सिंहं यथा वने ॥ २०
तावुद्यतगदापाणी दुर्योधनवृकोदरौ ।
संयुगे संप्रकाशेतां गिरी सशिखराविव ॥ २१
तावुभौ समतिक्रुद्धावुभौ भीमपराक्रमौ ।
उभौ शिष्यौ गदायुद्धे रौहिणेयस्य धीमतः ॥ २२
उभौ सदृशकर्माणौ वरुणस्य महाबलौ ।

वातिकाश्चारणा ये तु इति झ पाठ । तत्र वातिका वातेन सह गच्छन्ति ते आकाशचारिणः । चारणा सिद्धविशेषा इत्यर्थः ॥ ८ ॥ स्वयन सुगतिदम् ॥ ११ ॥ अनिरिणे अनूषरे ॥ १२ ॥

* एतच्छ्लोकस्य स्थाने झ पुस्तके अधोलिखिता पञ्च श्लोका वर्तन्ते । ते च ।
प्रीत्या परमया युक्तः समभ्यर्च्य यथाविधि ।
आसनं च ददौ तस्मै पर्यपृच्छदनामयम् ॥ १
ततो युधिष्ठिरं रामो वाक्यमेतदुवाच ह ।
मधुरं धर्मसंयुक्तं शूराणां हितमेव च ॥ २
मया श्रुतं कथयतामृषीणां राजसत्तम ।
कुरुक्षेत्रं परं पुण्यं पावनं स्वर्ग्यमेव च ॥ ३
देवतैर्ऋषिभिर्जुष्टं ब्राह्मणैश्च महात्मभिः ।
तत्र वै योत्स्यमाना ये देहं त्यक्ष्यन्ति मानवाः ॥ ४
तेषां स्वर्गे ध्रुवो वासः शक्रेण सह मारिष ।
तस्मात्समन्तपञ्चकमितो याम द्रुतं नृप ॥ ५

वासुदेवस्य रामस्य तथा वैश्रवणस्य च ॥ २३
सदृशौ तौ महाराज मधुकैटभयोरपि ।
उभौ सदृशकर्माणौ तथा सुन्दोपसुन्दयोः ॥ २४
[रामरावणयोश्चैव वालिसुग्रीवयोस्तथा ।]
तथैव कालस्य समौ मृत्योश्चैव परंतपौ ॥ २५
अन्योन्यमभिधावन्तौ मत्ताविव महाद्विपौ ।
वासितासंगमे दृप्तौ शरदीव मदोत्कटौ ॥ २६
उभौ क्रोधविषं दीप्तं वमन्तावुरगाविव ।
अन्योन्यमभिसंरब्धौ प्रेक्षमाणावरिंदमौ ॥ २७
उभौ भरतशार्दूलौ विक्रमेण समन्वितौ ।
सिंहाविव दुराधर्षौ गदायुद्धविशारदौ ॥ २८
नखदंष्ट्रायुधौ वीरौ व्याघ्राविव दुरुत्सहौ ।
प्रजासंहरणे क्षुब्धौ समुद्राविव दुस्तरौ ॥ २९
लोहिताङ्गाविव क्रुद्धौ प्रतपन्तौ महारथौ ।
[पूर्वपश्चिमजौ मेघौ प्रेक्षमाणावरिंदमौ ॥ ३०
गर्जमानौ सुविषमं क्षरन्तौ प्रावृषीव हि ।
रश्मियुक्तौ महात्मानौ दीप्तिमन्तौ महाबलौ ३१
ददृशाते कुरुश्रेष्ठौ कालसूर्याविवोदितौ ।
व्याघ्राविव सुसंरब्धौ गर्जन्ताविवतोयदौ ॥ ३२
जहृषाते महाबाहू सिंहकेसरिणाविव ।
गजाविव सुसंरब्धौ ज्वलिताविव पावकौ ॥ ३३
ददृशाते महात्मानौ सशृङ्गाविव पर्वतौ ।
रोषात्प्रस्फुरमाणोष्ठौ निरीक्षन्तौ परस्परम् ॥ ३४
तौ समेतौ महात्मानौ गदाहस्तौ नरोत्तमौ ।]
उभौ परमसंहृष्टावुभौ परमसंमतौ ॥ ३५
सदृश्याविव हेषन्तौ बृंहन्ताविव कुञ्जरौ ।
वृषभाविव गर्जन्तौ दुर्योधनवृकोदरौ ।
दैत्याविव बलोन्मत्तौ रेजतुस्तौ नरोत्तमौ ॥ ३६
ततो दुर्योधनो राजन्निदमाह युधिष्ठिरम् ।
सृञ्जयैः सह तिष्ठन्तं तपन्तमिव भास्करम् ॥ ३७
इदं व्यवसितं युद्धं मम भीमस्य चोभयोः ।
उपोपविष्टाः पश्यध्वं विमर्दं नृपसत्तमाः ॥ ३८
ततः समुपविष्टं तत्समहद्राजमण्डलम् ।
विराजमानं ददृशे दिवीवादित्यमण्डलम् ॥ ३९
तेषां मध्ये महाबाहुः श्रीमान्केशवपूर्वजः ।
उपविष्टो महाराज पूज्यमानः समन्ततः ॥ ४०
शुशुभे राजमध्यस्थो नीलवासाः सितप्रभः ।
नक्षत्रैरिव संपूर्णो वृतो निशि निशाकरः ॥ ४१
तौ तथा तु महाराज गदाहस्तौ सुदुःसहौ ।
अन्योन्यं वाग्भिरुग्राभिस्तक्षमाणौ व्यवस्थितौ ४२
अप्रियाणि ततोऽन्योन्यमुक्त्वा तौ कुरुसत्तमौ ।
उदीक्षन्तौ स्थितौ तत्र वृत्रशक्रौ यथाऽऽहवे ॥ ४३

॥ इति श्रीमन्महाभारते शल्यपर्वणि गदायुद्धपर्वणि षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

भीमदुर्योधनयोर्वीरवादः ॥ १ ॥

वैशंपायन उवाच ।
ततो वाग्युद्धमभवत्तुमुलं जनमेजय ।
यत्र दुःखान्वितो राजा धृतराष्ट्रोऽब्रवीदिदम् ॥ १
धिगस्तु खलु मानुष्यं यस्य निष्ठेयमीदृशी ।
एकादशचमूभर्ता यत्र पुत्रो ममानघ ॥ २
आज्ञाप्य सर्वान्नृपतीन्मुक्त्वा चेमां वसुंधराम् ।
गदामादाय चैकाकी पदातिः प्रस्थितो रणम् ॥ ३
भूत्वा हि जगतो नाथो ह्यनाथ इव मे सुतः ।
गदामुद्यम्य यो याति किमन्यद्भागधेयतः ॥ ४
अहो दुःखं महत्प्राप्तं पुत्रेण मम सञ्जय ।
एवमुक्त्वा स दुःखार्तो विरराम जनाधिपः ॥ ५
सञ्जय उवाच ।
स मेघनिनदो हर्षान्निनदन्निव गोवृषः ।
आजुहाव तदा पार्थं युद्धाय युधि वीर्यवान् ॥ ६

वासितासंगमे एककरिणीसंगमार्थे दृप्तौ मोहितौ ॥ २६ ॥ लोहिताङ्गौ द्वौ कुजाविवेत्यभूतोपमा ॥ ३० ॥ जहृषाते हर्षं प्रापतु ॥ ३३ ॥ षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

भीममाह्वयमाने तु कुरुराजे महात्मनि ।
प्रादुरासन्सुघोराणि रूपाणि विविधान्युत ॥ ७
ववुर्वाताः सनिर्घाताः पांसुवर्षं पपात च ।
बभूवुश्च दिशः सर्वास्तिमिरेण समावृताः ॥ ८
महास्वनाः सुनिर्वातास्तुमुला रोमहर्षणाः ।
पेतुस्तथोल्काः शतशः स्फोटयन्त्यो नभस्तलात् ९
राहुश्चाग्रसदादित्यमपर्वणि विशांपते ।
चकम्पे च महाकम्पं पृथिवी सवनद्रुमा ॥ १०
रूक्षाश्च वाताः प्रववुर्नीचैः शर्करकर्षिणः ।
गिरीणां शिखराण्येव न्यपतन्त महीतले ॥ ११
मृगा बहुविधाकाराः संपतन्ति दिशो दश ।
दीप्ताः शिवाश्चाप्यनदन्घोररूपाः सुदारुणाः १२
निर्घाताश्च महाघोरा बभूवू रोमहर्षणाः ।
दीप्तायां दिशि राजेन्द्र मृगाश्चाशुभवादिनः ॥१३
उदपानगताश्चापो व्यवर्धन्त समन्ततः ।
अशरीरा महानादाः श्रूयन्ते स्म भयानकाः ॥ १४
एवमादीनि दृष्ट्वा स निमित्तानि वृकोदरः ।
उवाच भ्रातरं ज्येष्ठं धर्मराजं युधिष्ठिरम् ॥ १५
एष शक्यो मया जेतुं मन्दात्मा च सुयोधनः १६
अद्य क्रोधं विमोक्ष्यामि निगूढं हृदयेशयम् ।
सुयोधने कौरवेन्द्रे खाण्डवेऽग्निमिवार्जुनः ॥ १७
शल्यमद्योद्धरिष्यामि तव पाण्डव हृच्छयम् ।
निहत्य गदया पापमिमं कुरुकुलान्तकम् ॥ १८
अद्य कीर्तिमयीं मालां प्रतिमोक्ष्याम्यहं त्वयि ।
हत्वेमं पापकर्माणं गदया रणमूर्धनि ॥ १९
अद्योरुगदया राजन्भेत्ताऽस्मि समरेऽनया ।
नायं प्रवेष्टा नगरं पुनर्वारणसाह्वयम् ॥ २०
सर्पोत्सर्गस्य शयने विषदानस्य भोजने ।
प्रमाणकोट्यां पातस्य दाहस्य जतुवेश्मनि ॥ २१
सभायामवहासस्य सर्वस्वहरणस्य च ।
वर्षमज्ञातवासस्य वनवासस्य चानघ ॥ २२
अद्यान्तमेषां दुःखानां गन्ताऽहं भरतर्षभ ।
एकाह्ना विनिहत्येमं भविष्याम्यात्मनोऽनृणः २३
अद्यायुर्धार्तराष्ट्रस्य दुर्मतेरकृतात्मनः ।
समाप्तं भरतश्रेष्ठ मातापित्रोश्च दर्शनम् ॥ २४
अद्य सौख्यं तु राजेन्द्र कुरुराजस्य दुर्मतेः ।
समाप्तं च महाराज नारीणां दर्शनं पुनः ॥ २५
अद्यायं कुरुराजस्य शन्तनोः कुलपांसनः ।
प्राणाञ्श्रियं च राज्यं च त्यक्त्वा शेष्यति भूतले ॥
राजा च धृतराष्ट्रोऽद्य श्रुत्वा पुत्रं निपातितम् ।
स्मरिष्यत्यशुभं कर्म यत्तच्छकुनिबुद्धिजम् ॥ २७
इत्युक्त्वा राजशार्दूल गदामादाय वीर्यवान् ।
अभ्यतिष्ठत युद्धाय शक्रो वृत्रमिवाह्वयन् ॥ २८
तमुद्यतगदं दृष्ट्वा कैलासमिव शृङ्गिणम् ।
भीमसेनः पुनः क्रुद्धो दुर्योधनमुवाच ह ॥ २९
राज्ञश्च धृतराष्ट्रस्य तथा त्वमपि चात्मनः ।
स्मर तदुष्कृतं कर्म यद्वृत्तं वारणावते ॥ ३०
द्रौपदी च परिक्लिष्टा सभामध्ये रजस्वला ।
द्यूते च वञ्चितो राजा यत्त्वया सौबलेन च ॥ ३१
वने दुःखं च यत्प्राप्तमस्माभिस्त्वत्कृतं महत् ।
विराटनगरे चैव योन्यन्तरगतैरिव ।
तत्सर्वं पातयाम्यद्य दिष्ट्या दृष्टोऽसि दुर्मते ॥३२
त्वत्कृतेऽसौ हतः शेते शरतल्पे पितामहः ।
गाङ्गेयो रथिनां श्रेष्ठो रथिना याज्ञसेनिना ॥ ३३
हतो द्रोणश्च कर्णश्च तथा शल्यः प्रतापवान् ।
वैराग्नेरादिकर्तासौ शकुनिः सौबलो हतः ॥ ३४
प्रातिकामी तथा पापो द्रौपद्याः क्लेशकृद्धतः ।
भ्रातरस्ते हताः सर्वे शूरा विक्रान्तयोधिनः ॥३५
एते चान्ये च बहवो निहतास्त्वत्कृते नृपाः ।
त्वामद्य निहनिष्यामि गदया नात्र संशयः॥ ३६
इत्येवमुच्चै राजानं भाषमाणं वृकोदरम् ।
उवाच गतभी राजन्पुत्रस्ते सत्यविक्रमः ॥ ३७
किं कत्थनेन बहुना युध्यस्वेह वृकोदर ।
अद्य तेऽहं विनेष्यामि युद्धश्रद्धां कुलाधम ॥३८
इति दुर्योधनोऽक्षुद्रस्त्वया क्षुद्रबलेन वै ।
शक्यस्त्रासयितुं वाचा न चान्यः प्राकृतो यथा ३९

नैष शक्यो रणे जेतु मन्दात्मा मा सुयोधन इति झ. पाठ. ॥ १६ ॥

चिरकालेप्सितं दिष्ट्या हृदयस्थमिदं मम ।
त्वया सह गदायुद्धं त्रिदशैरुपपादितम् ॥ ४०
किं वाचा बहुनोक्तेन कत्थितेन च दुर्मते ।
वाणी संकोच्यतामेषा कर्मणा मा चिरं कृथाः ॥४१
तस्य तद्वचनं श्रुत्वा सर्व एवाभ्यपूजयन् ।
राजानः सोमकाश्चैव ये तत्रासन्समागताः ॥ ४२
ततः संपूजितः सर्वैः संप्रहृष्टतनूरुहः ।
भूयो धीरां मतिं चक्रे युद्धाय कुरुनन्दनः ॥ ४३
तं मत्तमिव मातङ्गं तलशब्दैर्नराधिपाः ।
भूयः संहर्षयांचक्रुर्दुर्योधनममर्षणम् ॥ ४४
तं महात्मा महात्मानं गदामुद्यम्य पाण्डवः ।
अभिदुद्राव वेगेन धार्तराष्ट्रं वृकोदरः ॥ ४५
बृंहन्ति कुञ्जरास्तत्र हया ह्रेषन्ति चासकृत् ।
शस्त्राणि चाप्यदीप्यन्त पाण्डवानां जयैषिणां ४६

॥ इति श्रीमन्महाभारते शल्यपर्वणि गदायुद्धपर्वणि सप्तपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

भीमदुर्योधनयोर्गदायुद्धवर्णनम् ॥ १ ॥

सञ्जय उवाच ।
ततो दुर्योधनो दृष्ट्वा भीमसेनं तथाऽऽगतम् ।
प्रत्युद्ययावदीनात्मा वेगेन महता नदन् ॥ १
समापेततुरन्योन्यं शृङ्गिणौ वृषभाविव ।
महानिर्घातघोषश्च प्रहाराणामजायत ॥ २
अभवच्च तयोर्युद्धं तुमुलं रोमहर्षणम् ।
जिघृक्षतोर्यथाऽन्योन्यमिन्द्रप्रह्लादयोरिव ॥ ३
रुधिरोक्षितसर्वाङ्गौ गदाहस्तौ मनस्विनौ ।
ददृशाते महात्मानौ पुष्पिताविव किंशुकौ ॥ ४
तथा तस्मिन्महायुद्धे वर्तमाने सुदारुणे ।
खद्योतसङ्घैरिव खं दर्शनीयं व्यरोचत ॥ ५
तथा तस्मिन्वर्तमाने संकुले तुमुले भृशम् ।
उभावपि परिश्रान्तौ युध्यमानावरिंदमौ ॥ ६
तौ मुहूर्तं समाश्वस्य पुनरेव परंतपौ ।
संप्रहारयतां चित्रे संप्रगृह्य गदे शुभे ॥ ७
तौ तु दृष्ट्वा महावीर्यौ समाश्वस्तौ नरर्षभौ ।
बलिनौ वारणौ यद्वद्वासितार्थे मदोत्कटौ ॥ ८
समानवीर्यौ संप्रेक्ष्य प्रगृहीतगदावुभौ ।
प्रहर्षं परमं जग्मुर्देवगन्धर्वदानवाः ॥ ९
प्रगृहीतगदौ दृष्ट्वा दुर्योधनवृकोदरौ ।
संशयः सर्वभूतानां विजये समपद्यत ॥ १०
समागम्य ततो भूयो भ्रातरौ बलिनां वरौ ।
अन्योन्यस्यान्तरप्रेप्सू प्रचक्रातेऽन्तरं प्रति ॥ ११
यमदण्डोपमां गुर्वीमिन्द्राशनिमिवोद्यताम् ।
ददृशुः प्रेक्षका राजन्रौद्रीं विशसनीं गदाम् ॥ १२
आविद्ध्यतो गदां तस्य भीमसेनस्य संयुगे ।
शब्दः सुतुमुलो घोरो मुहूर्तं समपद्यत ॥ १३
आविद्ध्यन्तमरिं प्रेक्ष्य धार्तराष्ट्रोऽथ पाण्डवम् ।
गदामतुलवेगां तां विस्मितः संबभूव ह ॥ १४
चरंश्च विविधान्मार्गान्मण्डलानि च भारत ।
अशोभत तदा वीरो भूय एव वृकोदरः ॥ १५
तौ परस्परमासाद्य यत्तावन्योन्यसूदने ।
मार्जाराविव भक्षार्थे ततक्षाते मुहुर्मुहुः ॥ १६
अचरद्भीमसेनस्तु मार्गान्बहुविधांस्तथा ।
मण्डलानि विचित्राणि गतप्रत्यागतानि च ॥१७
गोमूत्रिकाणि चित्राणि स्थानानि विविधानि च ।
परिमोक्षं प्रहाराणां वर्जनं परिधावनम् ॥ १८
अभिद्रवणमाक्षेपमवस्थानं सविग्रहम् ।
मत्स्योद्धृत्तं सोरुवृत्तमवप्लुतमुपप्लुतम् ॥ १९
उपन्यस्तमपन्यस्तं गदायुद्धविशारदौ ।
एवं तौ विचरन्तौ तु न्यङ्गतां वै परस्परम् ॥ २०
वञ्चयानौ पुनश्चैव चेरतुः कुरुसत्तमौ ।

वाणी सपद्यतामिति झ. पाठ. ॥४१॥ सप्तपञ्चाशत्तमोऽध्याय ५७

जिगीषतोर्यथेति झ. पाठः ॥ २ ॥

विक्रीडन्तौ सुबलिनौ मण्डलानि विचेरतुः ॥२१
[तौ दर्शयन्तौ समरे युद्धक्रीडां समन्ततः ।
गदाभ्यां सहसाऽन्योन्यमाजघ्नतुररिंदमौ ॥ २२
परस्परं समासाद्य दंष्ट्राभ्यां द्विरदौ यथा ।
अशोभेतां महाराज शोणितेन परिप्लुतौ ॥ २३
एवं तदभवद्युद्धं घोररूपं परंतप ।
परिवृत्तेऽहनि क्रूरं वृत्रवासवयोरिव ॥] २४
गदाहस्तौ ततस्तौ तु मण्डलावस्थितौ बली ।
दक्षिणं मण्डलं राजन्धार्तराष्ट्रोऽभ्यवर्तत ।
सव्यं तु मण्डलं तत्र भीमसेनोऽभ्यवर्तत ॥ २५
तथा तु चरतस्तस्य भीमस्य रणमूर्धनि ।
दुर्योधनो महाराज पार्श्वदेशेऽभ्यताडयत् ॥ २६
आहतस्तु ततो भीमः पुत्रेण तव भारत ।
आविध्यत गदां गुर्वीं प्रहारं तमचिन्तयन् ॥ २७
इन्द्राशनिसमां घोरां यमदण्डमिवोद्यताम् ।
ददृशुस्ते महाराज भीमसेनस्य तां गदाम् ॥ २८
आविध्यन्तं गदां दृष्ट्वा भीमसेनं तवात्मजः ।
समुद्यम्य गदां घोरां प्रत्यविध्यत्परंतपः ॥ २९
गदामारुतवेगेन तव पुत्रस्य भारत ।
शब्द आसीत्सुतुमुलस्तेजश्च समजायत ॥ ३०
स चरन्विविधान्मार्गान्मण्डलानि च भागशः ।
समशोभत तेजस्वी भूयो भीमात्सुयोधनः ॥ ३१
आविद्धा सर्ववेगेन भीमेन महती गदा ।
सधूमं सार्चिषं चाग्निं मुमोचोग्रमहास्वना ॥ ३२
आधूतां भीमसेनेन गदां दृष्ट्वा सुयोधनः ।
अद्रिसारमयीं गुर्वीमाविध्यन्बह्वशोभत ॥ ३३
गदामारुतवेगं हि दृष्ट्वा तस्य महात्मनः ।
भयं विवेश पाण्डूंस्तु सर्वानेव ससात्यकीन् ॥ ३४
तौ दर्शयन्तौ समरे युद्धक्रीडां समन्ततः ।
गदाभ्यां सहसाऽन्योन्यमाजघ्नतुररिंदमौ ॥ ३५
तौ परस्परमासाद्य दंष्ट्राभ्यां द्विरदौ यथा ।
अशोभेतां महाराज शोणितेन परिप्लुतौ ॥ ३६

एवं तदभवद्युद्धं घोररूपमसंवृतम् ।
परिवृत्तेऽहनि क्रूरं वृत्रवासवयोरिव ॥ ३७
दृष्ट्वा व्यवस्थितं भीमं तव पुत्रो महाबलः ।
चरंश्चित्रतरान्मार्गान्कौन्तेयमभिदुद्रुवे ॥ ३८
तस्य भीमो महावेगां जाम्बूनदपरिष्कृताम् ।
अतिक्रुद्धस्य क्रुद्धस्तु ताडयामास तां गदाम् ३९
सविस्फुलिङ्गो निर्ह्रादस्तयोस्तत्राभिघातजः ।
प्रादुरासीन्महाराज वृष्टयोर्वज्रयोरिव ॥ ४०
वेगवत्या तया तत्र भीमसेनप्रमुक्तया ।
निपतन्त्या महाराज पृथिवी समकम्पत ॥ ४१
तां नामृष्यत कौरव्यो गदां प्रतिहतां रणे ।
मत्तो द्विप इव क्रुद्धः प्रतिकुञ्जरदर्शनात् ॥ ४२
स सव्यं मण्डलं राजा उद्धाम्य कृतनिश्चयः ।
आजघ्ने मूर्ध्नि कौन्तेयं गदया भीमवेगया ॥ ४३
तया त्वभिहतो भीमः पुत्रेण तव पाण्डवः ।
नाकम्पत महाराज तदद्भुतमिवाभवत् ॥ ४४
आश्चर्यं चापि तद्राजन्सर्वसैन्यान्यपूजयन् ।
यद्गदाभिहतो भीमो नाकम्पत पदात्पदम् ॥४५
ततो गुरुतरां दीप्तां गदां हेमपरिष्कृताम् ।
दुर्योधनाय व्यसृजद्भीमो भीमपराक्रमः ॥ ४६
तं प्रहारमसंभ्रान्तो लाघवेन महाबलः ।
मोघं दुर्योधनश्चक्रे तत्राभूद्विस्मयो महान् ॥ ४७
सा तु मोघा गदा राजन्पतन्ती भीमचोदिता ।
चालयामास पृथिवीं महानिर्घातनिःस्वना ॥ ४८
आस्थाय कौशिकान्मार्गानुत्पतन्स पुनःपुनः ।
गदानिपातं प्रज्ञाय भीमसेनं च वञ्चितम् ॥ ४९
वञ्चयित्वा तदा भीमं गदया कुरुसत्तमः ।
ताडयामास संक्रुद्धो वक्षोदेशे महाबलः ॥ ५०
गदया निहतो भीमो मुह्यमानो महारणे ।
नाभ्यमन्यत कर्तव्यं पुत्रेणाभ्याहतस्तव ॥ ५१
तस्मिंस्तथा वर्तमाने राजन्सोमकपाण्डवाः ।
भृशोपहतसंकल्पा नहृष्टमनसोऽभवन् ॥ ५२

आस्थायेति । कौशिकान् कुश उन्मत्तस्तदाचरितान्मार्गानास्थाय पुन पुनरुत्पतनेन वञ्चनेन च भीममुन्मत्तीकृत्य गदया ताडयामासेति द्वयोः संबन्धः ॥ ४९ ॥ नहृष्टमनस· खिन्नचेतस. ॥ ५२ ॥

स तु तेन प्रहारेण मातङ्ग इव रोषितः ।
हस्तिवद्धस्तिसंकाशमभिदुद्राव ते सुतम् ॥ ५३
ततस्तु तरसा भीमो गदया तनयं तव ।
अभिदुद्राव वेगेन सिंहो वनगजं यथा ॥ ५४
उपसृत्य तु राजानं गदामोक्षविशारदः ।
आविध्यत गदां राजन्समुद्दिश्य सुतं तव ॥ ५५
अताडयद्भीमसेनः पार्श्वे दुर्योधनं तदा ।
स विह्वलः प्रहारेण जानुभ्यामगमन्महीम् ॥ ५६
तस्मिन्कुरुकुलश्रेष्ठे जानुभ्यामवनीं गते ।
उदतिष्ठत्ततो नादः सृञ्जयानां जगत्पते ॥ ५७
तेषां तु निनदं श्रुत्वा सृञ्जयानां नरर्षभः ।
अमर्षाद्भरतश्रेष्ठ पुत्रस्ते समकुप्यत ॥ ५८
उत्थाय तु महाबाहुर्महानाग इव श्वसन् ।
दिधक्षन्निव नेत्राभ्यां भीमसेनमवैक्षत ॥ ५९
ततः स भरतश्रेष्ठो गदापाणिरभिद्रवन् ।
प्रमथिष्यन्निव शिरो भीमसेनस्य संयुगे ॥ ६०
स महात्मा महात्मानं भीमं भीमपराक्रमः ।
अताडयच्छङ्खदेशे न चचालाचलोपमः ॥ ६१
स भूयः शुशुभे पार्थस्ताडितो गदया रणे ।
उद्भिन्नरुधिरो राजन्प्रभिन्न इव कुञ्जरः ॥ ६२
ततो गदां वीरहणीमयोमयीं
प्रगृह्य वज्राशनितुल्यनिःस्वनाम् ।
अताडयच्छत्रुममित्रकर्शनो
बलेन विक्रम्य धनञ्जयाग्रजः ॥ ६३
स भीमसेनाभिहतस्तवात्मजः
पपात संकम्पितदेहबन्धनः ।
सुपुष्पितो मारुतवेगताडितो
वने महासाल इवावघूर्णितः ॥ ६४
ततः प्रणेदुर्जहृषुश्च पाण्डवाः
समीक्ष्य पुत्रं पतितं क्षितौ तव ।
ततः सुतस्ते प्रतिलभ्य चेतनां
समुत्पपात द्विरदो यथा ह्रदात् ॥ ६५
स पार्थिवो नित्यममर्षितस्तदा
महारथः शिक्षितवत्परिभ्रमन् ।
अताडयत्पाण्डवमग्रतः स्थितं
स विह्वलाङ्गो जगतीमुपास्पृशत् ॥ ६६
स सिंहनादं विननाद कौरवो
निपात्य भूमौ युधि भीममोजसा ।
बिभेद चैवाशनितुल्यमोजसा
गदानिपातेन शरीररक्षणम् ॥ ६७
ततोऽन्तरिक्षे ननदो महानभू-
द्दिवौकसामप्सरसां च नेदुषाम् ।
पपात चोच्चैरमरप्रवेरितं
विचित्रपुष्पोत्करवर्षमुत्तमम् ॥ ६८
ततः परानाविशदुत्तमं भयं
समीक्ष्य भूमौ पतितं नरोत्तमम् ।
अहीयमानं च बलेन कौरवं
निशाम्य भेदं सुदृढस्य वर्मणः ॥ ६९
ततो मुहूर्तादुपलभ्य चेतनां
प्रमृज्य वक्त्रं रुधिराक्तमात्मनः ।
धृतिं समालम्ब्य विवृत्य लोचने
बलेन संस्तभ्य वृकोदरः स्थितः ॥ ७०
'ततो यमौ यमसदृशौ पराक्रमे
सपार्षतः शिनितनयश्च वीर्यवान् ।
समाह्वयन्नहमहमित्यभित्वरं-
स्तवात्मजं समभिययुर्वधैषिणः ॥ ७१
निवर्त्य तान्पुनरपि पाण्डवो बली
तवात्मजं स्वयमभिगम्य कालवत् ।
चचार चाप्यपगतखेदवेपथुः
सुरेश्वरो नमुचिमिवोत्तमं रणे ॥' ७२

॥ इति श्रीमन्महाभारते शल्यपर्वणि गदायुद्धपर्वणि अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

शङ्खदेशे ललाटप्रान्ते ॥ ६१ ॥ नेदुषा नादं कृतवतीनाम् | ॥ ६८ ॥ अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

भीमसेनेन दुर्योधनस्योरुभेदनम् ॥ १ ॥

सञ्जय उवाच ।
समुदीर्णं ततो दृष्ट्वा सङ्ग्रामं कुरुमुख्ययोः ।
अब्रवीदर्जुनस्तत्र वासुदेवं यशस्विनम् ॥ १
अनयोर्वीरयोर्युद्धे को ज्यायान्भवतो मतः ।
कस्य वा को गुणो ज्यायानेतद्वद जनार्दन ॥ २
वासुदेव उवाच ।
उपदेशोऽनयोस्तुल्यो भीमस्तु बलवत्तरः ।
कृती यत्नपरस्त्वेष धार्तराष्ट्रो वृकोदरात् ॥ ३
भीमसेनस्तु धर्मेण युध्यमानो न जेष्यति ।
अन्यायेन तु युध्यन्वै हन्यादेव सुयोधनम् ॥ ४
मायया निर्जिता देवैरसुरा इति नः श्रुतम् ।
विरोचनस्तु शक्रेण मायया निर्जितः स वै ॥ ५
मायया चाक्षिपत्तेजो वृत्रस्य बलसूदनः ।
तस्मान्मायामयं वीर आतिष्ठतु वृकोदरः ॥ ६
प्रतिज्ञातं च भीमेन द्यूतकाले धनञ्जय ।
ऊरू भेत्स्यामि ते सङ्ख्ये गदयेति सुयोधनम् ॥ ७
सोऽयं प्रतिज्ञां तां चापि पारयत्वरिकर्शनः ।
मायाविनं तु राजानं माययैव निकृन्ततु ॥ ८
यद्येष बलमास्थाय न्यायेन प्रहरिष्यति ।
विषमस्थस्ततो राजा भविष्यति युधिष्ठिरः ॥ ९
पुनरेव तु वक्ष्यामि पाण्डवेय निबोध मे ।
धर्मराजापराधेन भयं नः पुनरागतम् ॥ १०
कृत्वा हि सुमहत्कर्म हत्वा भीष्ममुखान्कुरून् ।
जयः प्राप्तो यशः प्राप्यं वैरं च प्रतियातितम् ।
तदेवं विजयः प्राप्तः पुनः संशयितः कृतः ॥ ११
अबुद्धिरेषा महती धर्मराजस्य पाण्डव ।
यदेकविजये वीर पणितं कृतमीदृशम् ॥ १२
सुयोधनः कृती वीर एकायनगतस्तथा ॥ १३
अपि चोशनसा गीतः श्रूयतेऽयं पुरातनः ।
श्लोकस्तत्त्वार्थसहितस्तन्मे निगदतः शृणु ॥ १४
पुनरावर्तमानानां भग्नानां जीवितैषिणाम् ।
भेतव्यमरिशेषाणामेकायनगता हि ते ॥ १५
[साहसोत्पतितानां च निराशानां च जीविते ।
न शक्यमग्रतः स्थातुं शक्रेणापि धनञ्जय ॥] १६
सुयोधनमिमं भग्नं हतसैन्यं ह्रदं गतम् ।
पराजितं वनप्रेप्सुं निराशं राज्यलम्भने ।
कोऽन्विष्य संयुगे प्राज्ञः पुनर्द्वन्द्वे समाह्वयेत् ॥ १७
अपि नो निर्जितं राज्यं न हरेत सुयोधनः ।
यस्त्रयोदशवर्षाणि गदया कृतनिश्रमः ।
चरत्यूर्ध्वं च तिर्यक्च भीमसेनजिघांसया ॥ १८
एनं चेन्न महाबाहुरन्यायेन हनिष्यति ।
एष वः कौरवो राजा धार्तराष्ट्रो भविष्यति ॥ १९
सञ्जय उवाच ।
धनञ्जयस्तु श्रुत्वैतत्केशवस्य महात्मनः ।
प्रेक्षतो भीमसेनस्य सव्यमूरुमताडयत् ॥ २०
गृह्य संज्ञां ततो भीमो गदया व्यचरद्रणे ।
मण्डलानि विचित्राणि यमकानीतराणि च ॥ २१
दक्षिणं मण्डलं सव्यं गोमूत्रिकमथापि च ।
व्यचरत्पाण्डवो राजन्नरिं संमोहयन्निव ॥ २२
तथैव तव पुत्रोऽपि गदामार्गविशारदः ।
व्यचरल्लघु चित्रं च भीमसेनजिघांसया ॥ २३
आधुन्वन्तौ गदे घोरे चन्दनागरुरूषिते ।
वैरस्यान्तं परीप्सन्तौ रणे क्रुद्धाविवान्तकौ ॥ २४
अन्योन्यं तौ जिघांसन्तौ प्रवीरौ पुरुषर्षभौ ।
युयुधाते गरुत्मन्तौ यथा नागामिषैषिणौ ॥ २५
मण्डलानि विचित्राणि चरतोर्नृपभीमयोः ।
गदासंपातजास्तत्र प्रजज्ञुः पावकार्चिषः ॥ २६
समं प्रहरतोस्तत्र शूरयोर्बलिनोर्मृधे ।
क्षुब्धयोर्वायुना राजन्द्वयोरिव समुद्रयोः ॥ २७
तयोः प्रहरतोस्तुल्यं मत्तकुञ्जरयोरिव ।
गदानिर्घातसंह्रादः प्रहाराणामजायत ॥ २८
तस्मिंस्तदा संप्रहारे दारुणे संकुले भृशम् ।

अरिशेषाणा पञ्चम्यर्थे षष्ठी ॥ १५ ॥

उभावपि परिश्रान्तौ युध्यमानावरिंदमौ ॥ २९
तौ मुहूर्तं समाश्वस्य पुनरेव परंतप ।
अभ्यहारयतां क्रुद्धौ प्रगृह्य महती गदे ॥ ३०
तयोः समभवद्युद्धं घोररूपमसंवृतम् ।
गदानिपातै राजेन्द्र तक्षतोर्वै परस्परम् ॥ ३१
समरे प्रद्रुतौ तौ तु वृषभाक्षौ तरस्विनौ ।
अन्योन्यं जघ्नतुर्वीरौ पङ्कस्थौ महिषाविव ॥ ३२
जर्झरीकृतसर्वाङ्गौ रुधिरेणाभिसंप्लुतौ ।
ददृशाते हिमवति पुष्पिताविव किंशुकौ ॥ ३३
दुर्योधनस्तु पार्थेन विवरे संप्रदर्शिते ।
ईषदुत्स्मयमानस्तु सहसा प्रससार ह ॥ ३४
तमभ्याशगतं प्राज्ञः क्षणे प्रेक्ष्य वृकोदरः ।
अवाक्षिपद्गदां तस्मिन्वेगेन महता बली ॥ ३५
अवक्षेपं तु तं दृष्ट्वा पुत्रस्तव विशांपते ।
अपासर्पत्ततः स्थानात्सा मोघा न्यपतद्भुवि ॥ ३६
मोक्षयित्वा प्रहारं तं सुतस्तव सुसंभ्रमात् ।
भीमसेनं च गदया प्राहरत्कुरुसत्तम ॥ ३७
तस्य विस्यन्दमानेन रुधिरेणामितौजसः ।
प्रहारगुरुपाताच्च मूर्छेव समजायत ॥ ३८
तन्नाबुध्यत पुत्रस्ते पीडितं पाण्डवं रणे ।
धारयामास भीमोऽपि शरीरमतिपीडितम् ॥ ३९
अमन्यत स्थितं ह्येनं प्रहरिष्यन्तमाहवे ।
अतो न प्राहरत्तस्मै पुनरेव तवात्मजः ॥ ४०
ततो मुहूर्तमाश्वस्य दुर्योधनमुपस्थितम् ।
वेगेनाभ्यपतद्राजन्गदामादाय पाण्डवः ॥ ४१
तमापतन्तं संप्रेक्ष्य संरब्धममितौजसम् ।
मोघमस्य प्रहारं तं चिकीर्षुर्भरतर्षभ ॥ ४२
अवस्थाने मतिं कृत्वा पुत्रस्तव महामनाः ।
इयेषोत्पतितुं राजञ्छलयिष्यन्वृकोदरम् ॥ ४३
अबुध्यद्भीमसेनस्तु राज्ञस्तस्य चिकीर्षितम् ।
अथास्य समभिद्रुत्य समुत्पत्य च सिंहवत् ॥ ४४
सृत्या वञ्चयतो राजन्पुनरेवोत्पतिष्यतः ।
ऊरुभ्यां प्राहिणोद्राजन्गदां वेगेन पाण्डवः ४५
सा वज्रनिष्पेषसमा प्रहिता भीमकर्मणा ।
ऊरू दुर्योधनस्याथ बभञ्ज प्रियदर्शनौ ॥ ४६
स पपात नरव्याघ्रो वसुधामनुनादयन् ।
भग्नोरुर्भीमसेनेन पुत्रस्तव महीपते ॥ ४७
ववुर्वाताः सनिर्घाताः पांसुवर्षं पपात च ।
चचाल पृथिवी चापि सवृक्षक्षुपपर्वता ॥ ४८
तस्मिन्निपतिते वीरे पत्यौ सर्वमहीक्षिताम् ।
महास्वना पुनर्दीप्ता सनिर्घाता भयंकरी ।
पपात चोल्का महती पतिते पृथिवीपतौ ॥ ४९
तथा शोणितवर्षं च पांसुवर्षं च भारत ।
ववर्ष मघवांस्तत्र तव पुत्रे निपातिते ॥ ५०
यक्षाणां राक्षसानां च पिशाचानां तथैव च ।
अन्तरिक्षे महानादस्तत्र भारत शुश्रुवे ॥ ५१
तेन शब्देन घोरेण मृगाणामथ पक्षिणाम् ।
जज्ञे घोरतरः शब्दो बहूनां सर्वतोदिशम् ॥ ५२
ये तत्र वाजिनः शेषा गजाश्च मनुजैः सह ।
मुमुचुस्ते महानादं तव पुत्रे निपातिते ॥ ५३
भेरीशङ्खमृदङ्गानामभवच्च स्वनो महान् ।
अन्तर्भूमिगतश्चैव तव पुत्रे निपातिते ॥ ५४
[बहुपादैर्बहुभुजैः कबन्धैर्घोरदर्शनैः ।
नृत्यद्भिर्भयदैर्व्याप्ता दिशस्तत्राभवन्नृप ॥ ५५
ध्वजवन्तोऽस्त्रवन्तश्च शस्त्रवन्तस्तथैव च ।
प्राकम्पन्त ततो राजंस्तव पुत्रे निपातिते ॥] ५६
ह्रदाः कूपाश्च रुधिरमुद्वेमुर्नृपसत्तम ।
नद्यश्च सुमहावेगाः प्रतिस्रोतोवहाऽभवन् ॥ ५७
पुल्लिङ्गा इव नार्यस्तु स्त्रीलिङ्गाः पुरुषाऽभवन् ।
दुर्योधने तदा राजन्पतिते तनये तव ॥ ५८
दृष्ट्वा तानद्भुतोत्पातान्पाञ्चालाः पाण्डवैः सह ।
आविग्नमनसः सर्वे बभूवुर्भरतर्षभ ॥ ५९
ययुर्देवा यथाकामं गन्धर्वाप्सरसस्तथा ।
कथयन्तोऽद्भुतं युद्धं सुतयोस्तव भारत ॥ ६०

सहसैवाभिसारित इति क. छ पाठः ॥ ३४ ॥ धृत्या वञ्चयत इति क. छ. पाठः ॥ ४५ ॥ क्षुपः क्षुद्रवृक्षः ॥ ४८ ॥

एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

तथैव सिद्धा राजेन्द्र तथा वातिकचारणाः । नरसिंहौ प्रशंसन्तौ विप्रजग्मुर्यथागतम् ॥ ६१

॥ इति श्रीमन्महाभारते शल्यपर्वणि गदायुद्धपर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

षष्टितमोऽध्यायः ॥ ६० ॥

भीमसेनेन दुर्योधनापनयानुस्मारणपूर्वकं वामपादेन तच्छिरस्ताडनम् ॥ १ ॥ युधिष्ठिरेण दुर्योधनसमाश्वासनम् ॥ २ ॥

सञ्जय उवाच ।
तं पातितं ततो दृष्ट्वा महासालमिवोद्गतम् ।
प्रहृष्टमनसः सर्वे बभूवुस्तत्र पाण्डवाः ॥ १
उन्मत्तमिव मातङ्गं सिंहेन विनिपातितम् ।
ददृशुर्हृष्टरोमाणः सर्वे ते चापि सोमकाः ॥ २
ततो दुर्योधनं हत्वा भीमसेनः प्रतापवान् ।
पातितं कौरवेन्द्रं तमुपगम्येदमब्रवीत् ॥ ३
गौर्गौरिति पुरा मन्द द्रौपदीमेकवाससम् ।
यत्सभायां हसन्नस्मांस्तदा वदसि दुर्मते ।
तस्यावहासस्य फलमद्य त्वं समवाप्नुहि ॥ ४
एवमुक्त्वा स वामेन पदा मौलिमुपास्पृशत् ।
शिरश्च राजसिंहस्य पादेन समलोडयत् ॥ ५
तथैव क्रोधसंरक्तो भीमः परबलार्दनः ।
पुनरेवाब्रवीद्वाक्यं यत्तच्छृणु नराधिप ॥ ६
येऽस्मान्पुरा प्रनृत्यन्ति मूढा गौरिति गौरिति ।
तान्वयं प्रतिनृत्यामः पुनर्गौरिति गौरिति ॥ ७
नास्माकं निकृतिर्वह्निर्नाक्षद्यूतं न वञ्चना ।
स्वबाहुबलमाश्रित्य प्रबाधामो वयं रिपून् ॥ ८
सोऽवाप्य वैरस्य चिरस्य पारं
वृकोदरः प्राह शनैः प्रहस्य ।
युधिष्ठिरं केशवसृञ्जयांश्च
धनञ्जयं माद्रवतीसुतौ च ॥ ९
रजस्वलां द्रौपदीमानयन्ये
ये चाप्यकुर्वन्त सदस्यवस्त्राम् ।
तान्पश्यध्वं पाण्डवैर्धार्तराष्ट्रान्
रणे हतांस्तपसा याज्ञसेन्याः ॥ १०
ये नः पुरा षण्ढतिलानवोचन्
क्रूरा राज्ञो धृतराष्ट्रस्य पुत्राः ।
ते नो हताः सगणाः सानुबन्धाः
कामं स्वर्गं नरकं वा व्रजामः ॥ ११
पुनश्च राज्ञः पतितस्य भूमौ
स तां गदां स्कन्धगतां प्रगृह्य ।
वामेन पादेन शिरः प्रमृद्य
दुर्योधनं नैकृतिकेत्यवोचत् ॥ १२
हृष्टेन राजन्कुरुपार्थिवस्य
क्षुद्रात्मना भीमसेनेन पादम् ।
दृष्ट्वा कृतं मूर्धनि नाभ्यनन्दन्
धर्मात्मानः सोमकानां प्रवर्हाः ॥ १३
तव पुत्रं तथा हत्वा कत्थमानं वृकोदरम् ।
नृत्यमानं च बहुशो धर्मराजोऽब्रवीदिदम् ॥ १४
गतोऽसि वैरस्यानृण्यं प्रतिज्ञा पूरिता त्वया ।
शुभेनाथाशुभेनैव कर्मणा विरमाधुना ॥ १५
मा शिरोऽस्य पदाऽमर्दीर्मा धर्मस्तेऽतिगो भवेत् ।
राजा ज्ञातिर्हतश्चायं नैतन्न्याय्यं तवानघ ॥ १६
एकादशचमूनाथं कुरूणामधिपं तथा ।
मास्प्राक्षीर्भीम पादेन राजानं ज्ञातिमेव च ॥ १७
हतबन्धुर्हतामात्यो भ्रष्टसैन्यो हतो मृधे ।
सर्वाकारेण शोच्योऽयं नावहास्योऽयमीश्वरः ॥ १८
विध्वस्तोऽयं हतामात्यो हतबन्धुर्हतात्मजः ।
उत्सन्नपिण्डो भ्राता च नैतन्न्याय्यं कृतं त्वया १९
धार्मिको भीमसेनोऽसावित्याहुस्त्वां पुरा जनाः ।
स कस्माद्भीमसेन त्वं राजानमधितिष्ठसि ॥ २०
इत्युक्त्वा भीमसेनं तु साश्रुकण्ठो युधिष्ठिरः ।
उपसृत्याब्रवीद्दीनो दुर्योधनमरिंदमम् ॥ २१
तात मन्युर्न ते कार्यो नात्मा शोच्यस्त्वया तथा ।
नूनं पूर्वकृतं कर्म सुघोरमनुभूयते ॥ २२

धात्रोपदिष्टं विषमं नूनं फलमसंस्कृतम् ।
यद्वयं त्वां जिघांसामस्त्वं चास्मान्कुरुसत्तम॥२३
आत्मनो ह्यपराधेन महद्व्यसनमीदृशम् ।
प्राप्तवानसि यल्लोभान्मदाद्बाल्याच्च भारत ॥ २४
घातयित्वा वयस्यांश्च भ्रातॄनथ पितॄंस्तथा ।
पुत्रान्पौत्रांस्तथा चान्यांस्ततोसि निधनं गतः २५
तवापराधादस्माभिर्भ्रातरस्ते निपातिताः ।
निहता ज्ञातयश्चापि दिष्टं मन्ये दुरत्ययम् ॥ २६
[आत्मा न शोचनीयस्ते श्लाघ्यो मृत्युस्तवानघ ।
वयमेवाधुना शोच्याः सर्वावस्थासु कौरव ॥ २७
कृपणं वर्तयिष्यामस्तैर्हीना बन्धुभिः प्रियैः ।
भ्रातॄणां चैव पुत्राणां तथा वै शोकविह्वलाः २८
कथं द्रक्ष्यामि विधवा वधूः शोकपरिप्लुताः ।
त्वमेकः सुस्थितो राजन्स्वर्गे ते निलयो ध्रुवः ।
वयं नरकसंज्ञं वै दुःखं प्राप्स्याम दारुणम्॥] २९
स्नुषाश्च स्नुषाश्चैव धृतराष्ट्रस्य विह्वलाः ।
गर्हयिष्यन्ति नो नूनं विधवाः शोककर्शिताः ३०
सञ्जय उवाच ।
एवमुक्त्वा सुदुःखार्तो निश्श्वास स पार्थिवः ।
विललाप चिरं चापि धर्मपुत्रो युधिष्ठिरः॥ ३१

॥ इति श्रीमन्महाभारते शल्यपर्वणि गदायुद्धपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥

एकषष्टितमोऽध्यायः ॥ ६१ ॥

भीमे अपनयबुद्ध्या क्रुद्धेन बलरामेण लाङ्गलमुद्यम्य तंप्रत्यभिगमनम् ॥ १ ॥ कृष्णेन तत्सान्त्वनं ततो बलस्य द्वारकागमनम् ॥ २ ॥ युधिष्ठिरस्य कृष्णेन भीमेन च संलापः ॥ ३ ॥

धृतराष्ट्र उवाच ।
अधर्मेण हतं दृष्ट्वा राजानं माधवोत्तमः ।
किमब्रवीत्तदा सूत बलदेवो महाबलः ॥ १
गदायुद्धविशेषज्ञो गदायुद्धविशारदः ।
कृतवान्रौहिणेयो यत्तन्ममाचक्ष्व सञ्जय ॥ २
सञ्जय उवाच ।
शिरस्यभिहतं दृष्ट्वा भीमसेनेन ते सुतम् ।
रामः प्रहरतां श्रेष्ठश्चुक्रोध बलवद्बली ॥ ३
ततो मध्ये नरेन्द्राणामूर्ध्ववाहुर्हलायुधः ।
कुर्वन्नार्तस्वरं घोरं धिग्धिग्भीमेत्युवाच ह ॥ ४
अहो धिग्यदधो नाभेः प्रहृतं धर्मविग्रहे ।
नैतदृष्टं गदायुद्धे कृतवान्यद्वृकोदरः ॥ ५
अधो नाभ्या न हन्तव्यमिति शास्त्रस्य निश्चयः ।
अयं तु शास्त्रमुत्सृज्य स्वच्छन्दात्संप्रवर्तते ॥ ६
तस्य तत्तद्वचाणस्य रोषः समभवन्महान् ।
[ततो राजानमालोक्य रोषसंरक्तलोचनः ।
बलदेवो महाराज ततो वचनमब्रवीत् ॥ ७
न चैष पतितः कृष्ण केवलं मत्समोऽसमः ।
आश्रितस्य तु दौर्बल्यादाश्रयः परिभर्त्स्यते॥] ८
ततो लाङ्गलमुद्यम्य भीममभ्यद्रवद्बली ॥ ९
तस्योर्ध्ववाहोः सदृशं रूपमासीन्महात्मनः ।
बहुधातुविचित्रस्य श्वेतस्येव महागिरेः ॥ १०
'भ्रातृभिः सहितो वीरैः सार्जुनैरस्त्रकोविदैः ।
न विव्यथे महाराज दृष्ट्वा हलधरं बली ॥' ११
अथ रामं निजग्राह केशवो विनयान्वितः ।
बाहुभ्यां पीनवृत्ताभ्यां प्रयत्नाद्बलवद्बली ॥ १२
सितासितौ यदुवरौ शुशुभातेऽधिकं तदा ।
'संगताविव राजेन्द्र कैलासाञ्जनपर्वतौ ।
नभोगतौ यथा राजंश्चन्द्रसूर्यौ दिनक्षये ॥ १३
उवाच चैनं संरब्धं शमयन्निव केशवः ॥ १४
आत्मवृद्धिर्मित्रवृद्धिर्मित्रमित्रोदयस्तथा ।
विपरीतं द्विषत्स्वेतत्षड्विधा वृद्धिरात्मनः ॥ १५
आत्मन्यपि च मित्रे च विपरीतं यदा भवेत् ।

आत्मवृद्धिः शत्रुक्षय. स्वमित्रस्य वृद्धि. शत्रुमित्रस्य क्षय स्व- मित्रमित्रस्य वृद्धि. शत्रुमित्रमित्रस्य क्षय. एव षड्विधा आत्मनो

तदा विद्यान्मनोग्लानिमाशु शान्तिकरो भवेत्॥
अस्माकं सहजं मित्रं पाण्डवाः शुद्धपौरुषाः।
स्वकाः पितृष्वसुः पुत्रास्ते परैर्निकृता भृशम्॥१७
प्रतिज्ञापालनं धर्मः क्षत्रियस्येति वेत्थ तत्॥ १८
सुयोधनस्य गदया भक्ताऽस्म्यूरू महाहवे।
इति पूर्वं प्रतिज्ञातं भीमेन हि सभातले॥ १९
मैत्रेयेणाभिशप्तश्च पूर्वमेव महर्षिणा।
ऊरू ते भेत्स्यते भीमो गदयेति परंतप।
अतो दोषं न पश्यामि मा क्रुध्यस्व प्रलम्बहन्॥ २०
यौनैः स्वैः सुखहार्दैश्च संबन्धैः सह पाण्डवैः।
तेषां वृद्ध्या हि वृद्धिर्नो मा क्रुधः पुरुषर्षभ॥ २१
वासुदेववचः श्रुत्वा सीरभृत्प्राह धर्मवित्॥ २२
धर्मश्च धारितः सद्भिः स च द्वाभ्यां नियच्छति।
अर्थश्चाप्यतिलुब्धस्य कामश्चातिप्रसङ्गिणः॥ २३
धर्मार्थौ धर्मकामौ च कामार्थौ चाप्यपीडयन्।
धर्मार्थकामान्योऽभ्येति सोत्यन्तं सुखमश्नुते॥२४
तदिदं व्याकुलं सर्वं कृतं धर्मस्य पीडनात्।
भीमसेनेन गोविन्द कामं त्वं तु यथाऽऽत्थ माम्॥
कृष्ण उवाच।
अरोषणो हि धर्मात्मा सततं धर्मवत्सलः।
भवान्प्रख्यायते लोके तस्मात्संशाम्य मा क्रुधः॥
प्राप्तं कलियुगं विद्धि प्रतिज्ञां पाण्डवस्य च।
आनृण्यं यातु वैरस्य प्रतिज्ञायाश्च पाण्डवः।
'ततः पुरुषशार्दूलो हत्वा नैकृतिकं रणे॥ २७
निकृत्या निकृतिप्रज्ञं यो हन्याद्वैरिणं रणे।
अधर्मो विद्यते नात्र यद्भीमो हतवान्रिपुम्॥ २८
युध्यमानं रणे वीरं कुरुवृष्णियशस्करम्।
अनेन कर्णः संदिष्टः पृष्ठतो धनुरच्छिनत्॥ २९
ततः संछिन्नधन्वानं विरथं पौरुषे स्थितम्।
व्यायुधीकृत्य बहवः सौभद्रमपलायिनम्॥ ३०
जन्मप्रभृति लुब्धश्च पापात्मा चैष दुर्मतिः।
निहतो भीमसेनेन दुर्बुद्धिः कुलपांसनः॥ ३१
प्रतिज्ञां भीमसेनेन त्रयोदशसमार्जिताम्।
किमर्थं नाभिजानाति युध्यमानो हि शत्रुभिः ३२
ऊर्ध्वमाक्रम्य वेगेन जिघांसन्तं वृकोदरः।
बिभेद गदया चोरू न स्थाने न च मण्डले॥' ३३
सञ्जय उवाच।
धर्मच्छलमिमं श्रुत्वा केशवात्स विशांपते।
नैव प्रीतमना रामो वचनं प्राह संसदि॥ ३४
हत्वाऽधर्मेण राजानं धर्मात्मानं सुयोधनम्।
जिह्मयोधीति लोकेऽस्मिन्ख्यातिं यास्यति पाण्डवः
दुर्योधनोऽपि धर्मात्मा गतिं यास्यति शाश्वतीम्।
ऋजुयोधी हतो राजा धर्मराष्ट्रो नराधिपः॥ ३६
युद्धदीक्षां प्रविश्याजौ रणयज्ञं वितत्य च।
हुत्वाऽऽत्मानममित्राग्नौ प्राप चावभृथं यशः।
'स्वर्गं गन्ता महाराजः ससुहृज्ज्ञातिबान्धवः॥'३७
इत्युक्त्वा रथमास्थाय रौहिणेयः प्रतापवान्।
श्वेताभ्रशिखराकारः प्रययौ द्वारकां प्रति॥ ३८
पाञ्चालाश्च सवार्ष्णेयाः पाण्डवाश्च विशांपते।
रामे द्वारवतीं याते नातिप्रमनसोऽभवन्॥ ३९
ततो युधिष्ठिरं दीनं चिन्तापरमधोमुखम्।
शोकोपहतसंकल्पं वासुदेवोऽब्रवीदिदम्॥ ४०
वासुदेव उवाच।
धर्मराज किमर्थं त्वमधर्ममनुमन्यसे।
हतबन्धोर्यदेतस्य पतितस्य विचेतसः॥ ४१
दुर्योधनस्य भीमेन मृद्यमानं शिरः पदा।
उपप्रेक्षसि कस्मात्त्वं धर्मज्ञः सन्नराधिप॥ ४२
युधिष्ठिर उवाच।
न ममैतत्प्रियं कृष्ण यद्राजानं वृकोदरः।
पदा मूर्ध्न्यस्पृशत्क्रोधान्न च हृष्ये कुलक्षये॥ ४३

वृद्धिः॥ १५॥ यदि चेदात्मनो ग्लानिस्तदा शान्तिकर इति क. पाठ॥१६॥ भक्ता भङ्क्ष्ये॥१९॥ यौन योनिनिमित्तः सबन्धः। अस्माक पितामहः पाण्डवानां मातामहश्चैक इति यौनसंबन्धः॥२१॥ सीरभृत् रामः॥२२॥ धर्मइति। नियच्छति नियममेति अर्थकामाभ्या धर्मः संकोचमेतीत्यर्थः॥ २३॥ धर्मार्थौ कामेनापीडयन् धर्मकावर्थेनापीडयन् कामार्थौ धर्मेण चापीडयन्नित्यर्थः॥ २४॥ काम यथेष्ट त्व मा प्रति उक्तवानसि नतु धर्म्यं॥ २५॥ कलियुगारम्भे एतावत्पाप नातीव खेदावहमिति भावः॥ २७॥ अधर्ममनुपश्यसीति क. छ पाठः॥ ४१॥

निकृत्या निकृता नित्यं धृतराष्ट्रसुतैर्वयम् ।
बहूनि परुषाण्युक्त्वा वनं प्रस्थापिता वयम् ॥४४
भीमसेनस्य तद्दुःखमतीव हृदि वर्तते ।
इति संचिन्त्य वार्ष्णेय मयैतत्समुपेक्षितम् ॥४५
तस्माद्धत्वाऽकृतप्रज्ञं लुब्धं कामवशानुगम् ।
लभतां पाण्डवः कामं धर्मोऽधर्मोऽथवा कृतः॥४६
सञ्जय उवाच ।
इत्युक्तवति कौन्तेये धर्मराजे युधिष्ठिरे ।
वासुदेवो महाबाहुर्युधिष्ठिरमभाषत ।
काममस्त्वेतदिति वै कृच्छ्राद्यदुकुलोद्वहः ॥ ४७
इत्युक्त्वा वासुदेवोऽपि वायुपुत्रप्रियेप्सया ।
अन्वमोदत तत्सर्वं यद्भीमेन कृतं युधि ॥ ४८
'अर्जुनोऽपि महाबाहुरप्रीतेनान्तरात्मना ।
नोवाच किंचिद्वचनं भ्रातरं साध्वसाधु वा॥'४९
भीमसेनोऽपि हत्वाऽऽजौ तव पुत्रममर्षणः ।
अभिवाद्याग्रतः स्थित्वा संप्रहृष्टः कृताञ्जलिः॥ ५०
प्रोवाच सुमहातेजा धर्मराजं युधिष्ठिरम् ।
हर्षादुत्फुल्लनयनो जितकाशी विशांपते ॥ ५१
तवाद्य पृथिवी सर्वा क्षेमा निहतकण्टका ।
तां प्रशाधि महाराज स्वधर्ममनुपालय ॥ ५२
यस्तु कर्ताऽस्य वैरस्य निकृत्या निकृतिप्रियः ।
सोऽयं विनिहतः शेते पृथिव्यां पृथिवीपते ॥५३
दुःशासनप्रभृतयः सर्वे ते चोग्रवादिनः ।
राधेयः शकुनिश्चैव हताश्च तव शत्रवः ॥ ५४
सेयं रत्नसमाकीर्णा मही सवनपर्वता ।
उपावृत्ता महाराज त्वामद्य निहतद्विषम् ॥ ५५
युधिष्ठिर उवाच ।
गतो वैरस्य निधनं हतो राजा सुयोधनः ।
कृष्णस्य मतमास्थाय विजितेयं वसुंधरा ॥ ५६
दिष्ट्या गतस्त्वमानृण्यं मातुः कोपस्य चोभयोः ।
दिष्ट्या जयसि दुर्धर्ष दिष्ट्या शत्रुर्निपातितः ॥ ५७

॥ इति श्रीमन्महाभारते शल्यपर्वणि गदायुद्धपर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥

द्विषष्टितमोऽध्यायः ॥ ६२ ॥

पाञ्चालादिभिर्भीमस्तुतिः ॥ १ ॥ कृष्णदुर्योधनयोः परस्परगर्हणम् ॥ २ ॥ दुर्योधनेनात्मस्तुतौ तन्मूर्धि गन्धर्वैः पुष्पवर्षणम् ॥ ३ ॥ भीष्मादिमरणेन दुःखितानां पाण्डवानां कृष्णेन समाश्वासनम् ॥ ४ ॥

धृतराष्ट्र उवाच ।
हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
पाण्डवाः सृञ्जयाश्चैव किमकुर्वत सञ्जय ॥ १
सञ्जय उवाच ।
हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
सिंहेनेव महाराज मत्तं वनगजं यथा ॥ २
प्रहृष्टमनसस्तत्र कृष्णेन सह पाण्डवाः ।
पाञ्चालाः सृञ्जयाश्चैव निहते कुरुनन्दने ।
आविध्यन्नुत्तरीयाणि सिंहनादांश्च नेदिरे ॥ ३
नैतान्हर्षसमाविष्टानियं सेहे वसुंधरा ॥ ४
धनूंष्येके व्याक्षिपन्त ज्याश्चाप्यन्ये तथाऽक्षिपन् ।
दध्मुरन्ये महाशङ्खानन्ये जघ्नुश्च दुन्दुभीन् ॥ ५
चिक्रीडुश्च तथैवान्ये जहसुश्च तवाहिताः ।
अब्रुवंश्चासकृद्वीरा भीमसेनमिदं वचः ॥ ६
दुष्करं भवता कर्म रणेऽद्य सुमहत्कृतम् ।
कौरवेयं रणे हत्वा गदयाऽतिकृतश्रमम् ॥ ७
इन्द्रेणेव हि वृत्रस्य वधं परमसंयुगे ।
त्वया कृतममन्यन्त शत्रोर्वधमिमं जनाः ॥ ८
चरन्तं विविधान्मार्गान्मण्डलानि च सर्वशः ।
दुर्योधनमिमं शूरं कोऽन्यो हन्याद्वृकोदरात् ॥ ९
वैरस्य च गतः पारं त्वमिहान्यैः सुदुर्गमम् ।
अशक्यमेतदन्येन संपादयितुमीदृशम् ॥ १०
कुञ्जरेणेव मत्तेन वीरसंग्राममूर्धनि ।
दुर्योधनशिरो दिष्ट्या पादेन मृदितं त्वया ॥ ११

धर्मोऽधर्मे च वा कृते इति झ. पाठ. ॥ ४६ ॥

एकषष्टितमोऽध्यायः ॥ ६१ ॥

सिंहेन महिषस्येव कृत्वा संगरमुत्तमम् ।
दुःशासनस्य रुधिरं दिष्ट्या पीतं त्वयाऽनघ ॥१२
ये विप्रकुर्वन्राजानं धर्मात्मानं युधिष्ठिरम् ।
मूर्ध्नि तेषां कृतः पादो दिष्ट्या ते स्वेन कर्मणा॥१३
अमित्राणामधिष्ठानाद्वधाद्दुर्योधनस्य च ।
भीम दिष्ट्या पृथिव्यां ते प्रथितं सुमहद्यशः॥१४
एवं नूनं हते वृत्रे शक्रं नन्दन्ति बन्दिनः ।
तथा त्वां निहतामित्रं वयं नन्दाम भारत॥ १५
दुर्योधनवधे यानि रोमाणि हृषितानि नः ।
अद्यापि न विकृष्यन्ते तानि तद्विद्धि भारत ।
इत्यब्रुवन्भीमसेनं वातिकास्तत्र संगताः ॥ १६
तान्हृष्टान्पुरुषव्याघ्रान्पाञ्चालान्पाण्डवैः सह ।
ब्रुवतोऽसदृशं तत्र प्रोवाच मधुसूदनः ॥ १७
न न्याय्यं निहतं शत्रुं भूयो हन्तुं नराधिपाः।
असकृद्वाग्भिरुग्राभिर्निहतो ह्येष मन्दधीः ॥ १८
तदैवैष हतः पापो यदैव निरपत्रपः ।
लुब्धः पापसहायश्च सुहृदां शासनातिगः ॥ १९
बहुशो विदुरद्रोणकृपगाङ्गेयसृञ्जयैः ।
पाण्डुभ्यः प्रार्थ्यमानोऽपि पित्र्यमंशं न दत्तवान्॥
नैव तेभ्योऽद्य मित्रं वा शत्रुर्वा पुरुषाधमः ।
किमनेन वितुन्नेन वाग्भिः काष्ठसधर्मणा ॥ २१
रथेष्वारोहत क्षिप्रं गच्छामो वसुधाधिपाः ।
दिष्ट्या हतोऽयं पापात्मा सामात्यज्ञातिबान्धवः॥
इति श्रुत्वा त्वधिक्षेपं कृष्णादुर्योधनो नृपः ।
अमर्षवशमापन्न उदतिष्ठद्विशांपते ॥ २३
स्फिग्देशेनोपविष्टः स दोर्भ्यां विष्टभ्य मेदिनीम् ।
दृष्टिं भ्रूसंकटां कृत्वा वासुदेवे न्यपातयत्॥ २४
अर्धोन्नतशरीरस्य रूपमासीन्नृपस्य तु ।
क्रुद्धस्याशीविषस्येव च्छिन्नपुच्छस्य भोगिनः॥ २५
प्राणान्तकरिणीं घोरां वेदनामप्यचिन्तयन् ।
दुर्योधनो वासुदेवं वाग्भिरुग्राभिरार्दयत् ॥ २६
कंसदासस्य दायाद न ते लज्जाऽस्त्यनेन वै ।
अधर्मेण गदायुद्धे यदहं विनिपातितः ।
ऊरू भिन्धीति भीमस्य स्मृतिं मिथ्याप्रयच्छता २७
किं न विज्ञातमेतन्मे यदर्जुनमवोचथाः ।
घातयित्वा महीपालानृजुयुद्धान्सहस्रशः ।
जिह्मैरुपायैर्बहुभिर्न ते लज्जा न ते घृणा ॥ २८
अहन्यहनि शूराणां कुर्वाणः कदनं महत् ।
शिखण्डिनं पुरस्कृत्य घातितस्ते पितामहः॥ २९
अश्वत्थाम्नः सनामानं हत्वा नागं सुदुर्मते ।
आचार्यो न्यासितः शस्त्रं किं तन्न विदितं मया ३०
स चानेन नृशंसेन धृष्टद्युम्नेन वीर्यवान् ।
पात्यमानस्त्वया दृष्टो न चैनं त्वमवारयः ॥ ३१
वधार्थं पाण्डुपुत्रस्य याचितां शक्तिमेव च ।
घटोत्कचे व्यंसयतः कस्त्वत्तः पापकृत्तमः ॥ ३२
छिन्नहस्तः प्रायगतस्तथा भूरिश्रवा बली ।
त्वयाऽभिसृष्टेन हतः शैनेयेन दुरात्मना ॥ ३३
कुर्वाणश्चोत्तमं कर्म कर्णः पार्थजिगीषया ।
व्यंसनेनाश्वसेनस्य पन्नगेन्द्रस्य वै पुनः ॥ ३४
पुनश्च पतिते चक्रे व्यसनार्तः पराजितः ।
पातितः समरे कर्णश्चक्रव्यग्रोऽग्रणीर्नृणाम् ॥ ३५
यदि मां चापि कर्णं च भीष्मद्रोणौ च संयुगे ।
ऋजुना प्रतियुध्येथा न ते स्याद्विजयो ध्रुवम्॥३६
त्वया पुनरनार्येण जिह्ममार्गेण पार्थिवाः ।
स्वधर्ममनुतिष्ठन्तो वयं चान्ये च घातिताः ॥ ३७
'त्वया मायाविना कृष्ण मायां मर्कप्रमोषिणीम् ।
कृत्वा हतः सिन्धुपतिः किं तन्न विदितं मम॥'३८
वासुदेव उवाच ।
हतस्त्वमसि गान्धारे सभ्रातृसुतबान्धवः ।
सगणः ससुहृच्चैव पापं मार्गमनुष्ठितः ॥ ३९
तवैव दुष्कृतैर्वीरौ भीष्मद्रोणौ निपातितौ ।
कर्णश्च निहतः सङ्ख्ये तव शीलानुवर्तकः ॥ ४०
याच्यमानं मया मूढ पित्र्यमंशं न दित्ससि ।
पाण्डवेभ्यः स्वराज्यं च लोभाच्छकुनिनिश्चयात्॥

नैष योग्योऽद्य मित्र वेति झ पाठ. ॥ २१ ॥

द्विषष्टितमोऽध्याय. ॥ ६२ ॥

विषं ते भीमसेनाय दत्तं सर्वे च पाण्डवाः ।
प्रदीपिता जतुगृहे मात्रा सह सुदुर्मते ॥ ४२
सभायां याज्ञसेनी च कृष्टा द्यूते रजस्वला ।
तदैव तावदुष्टात्मन्वध्यस्त्वं निरपत्रप ॥ ४३
अनक्षज्ञं च धर्मज्ञं सौबलेनाक्षवेदिना ।
निकृत्या यत्पराजैषीस्तस्मादसि हतो रणे ॥ ४४
जयद्रथेन पापेन यत्कृष्णा क्लेशिता वने ।
यातेषु मृगयां चैव तृणबिन्दोरथाश्रमम् ॥ ४५
अभिमन्युश्च यद्बाल एको बहुभिराहवे ।
त्वदोषैर्निहतः पाप तस्मादसि हतो रणे ॥ ४६
'कुर्वाणं कर्म समरे पाण्डवानर्थकाङ्क्षिणम् ।
यच्छिखण्ड्यवधीद्भीष्मं मित्रार्थे न व्यतिक्रमः ४७
स्वधर्मं पृष्ठतः कृत्वा आचार्यस्त्वत्प्रियेप्सया ।
पार्षतेन हतः सङ्ख्ये वर्तमानोऽसतां पथि ॥ ४८
प्रतिज्ञामात्मनः सत्यां चिकीर्षन्समरे रिपुम् ।
हतवान्सात्वतो विद्वान्सौमदत्तिं महारथम् ॥ ४९
अर्जुनः समरे राजन्युध्यमानः कदाचन ।
निन्दितं पुरुषव्याघ्रः करोति न कथंचन ॥ ५०
लब्ध्वाऽपि बहुधा छिद्रं वीरवृत्तमनुस्मरन् ।
निजघान रणे कर्णं मैवं वोचः सुदुर्मते ॥ ५१
देवानां मतमाज्ञाय तेषां प्रियहितेप्सया ।
अर्जुनस्य महानागं मया व्यंसितमस्त्रजम् ॥ ५२
त्वं च भीष्मश्च कर्णश्च द्रोणो द्रौणायनिस्तथा ।
विराटनगरे तस्य ह्यानृशंस्येन जीविताः ॥ ५३
स्मर पार्थस्य विक्रान्तं गन्धर्वेषु कृतं तथा ।
अधर्मं नात्र गान्धारे पाण्डवैर्यत्कृतं त्वयि ॥ ५४
स्वबाहुबलमास्थाय स्वधर्मेण परंतपाः ।
जितवन्तो रणे वीराः पापोसि निधनं गतः ॥'५५
[यान्यकार्याणि चास्माकं कृतानीति प्रभाषसे ।
वैगुण्येन तवात्यर्थं सर्वं हि तदनुष्ठितम् ॥ ५६
बृहस्पतेरुशनसो नोपदेशः श्रुतस्त्वया ।
वृद्धा नोपासिताश्चैव हितं वाक्यं न ते श्रुतम् ॥५७
लोभेनातिबलेन त्वं तृष्णया च वशीकृतः ।
कृतवानस्यकार्याणि विपाकस्तस्य भुज्यताम्] ५८

दुर्योधन उवाच ।
अधीतं विधिवद्दत्तं भूः प्रभुक्ता ससागरा ।
मूर्ध्नि स्थितममित्राणां को नु स्वन्ततरो मया ५९
यदिष्टं क्षत्रबन्धूनां स्वधर्ममनुपश्यताम् ।
तदिदं निधनं प्राप्तं को नु स्वन्ततरो मया ॥ ६०
देवार्हा मानुषा भोगाः प्राप्ता असुलभा नृपैः ।
ऐश्वर्यं चोत्तमं प्राप्तं को नु स्वन्ततरो मया ॥ ६१
ससुहृत्सानुबन्धश्च स्वर्गं गन्ताऽहमच्युत ।
यूयं गर्हितसंकल्पाः शोचन्तो वर्तयिष्यथ ॥ ६२
'न मे विषादो भीमेन पादेन शिर आहतम् ।
काका वा कङ्कगृध्रा वा निधास्यन्ति पदं क्षणात् ॥'
सञ्जय उवाच ।
अस्य वाक्यस्य निधने कुरुराजस्य धीमतः ।
अपतत्सुमहद्वर्ष पुष्पाणां पुण्यगन्धिनाम् ॥ ६४
अवादयन्त गन्धर्वा वादित्रं सुमनोहरम् ॥ ६५
जगुश्चाप्सरसो राज्ञो यशःसंबद्धमेव च ।
सिद्धाश्च मुमुचुर्वाचः साधुसाध्विति पार्थिव ॥ ६६
ववौ च सुरभिर्वायुः पुण्यगन्धो मृदुः सुखः ।
व्यराजंश्च दिशः सर्वा नभो वैदूर्यसन्निभम् ॥ ६७
अत्यद्भुतानि ते दृष्ट्वा वासुदेवपुरोगमाः ।
दुर्योधनस्य पूजां तु दृष्ट्वा व्रीडामुपागमन् ॥ ६८
हतांश्चाधर्मतः श्रुत्वा शोकार्ताः शुशुचुर्हि ते ।
भीष्मं द्रोणं तथा कर्णं भूरिश्रवसमेव च ॥ ६९
तांस्तु चिन्तापरान्दृष्ट्वा पाण्डवान्दीनचेतसः ।
प्रोवाचेदं वचः कृष्णो मेघदुन्दुभिनिस्वनः ॥ ७०
नैष शक्योऽतिशीघ्रास्त्रस्ते च सर्वे महारथाः ।
ऋजुयुद्धेन विक्रान्ता हन्तुं युष्माभिराहवे ॥ ७१
उपायान्निहता ह्येते मया तस्मान्नराधिपाः ।
अन्यथा पाण्डवेयानां नाभविष्यज्जयः क्वचित् ७२
ते हि सर्वे महेष्वासाश्चत्वारोऽतिरथा भुवि ।
अशक्या धर्मतो हन्तुं लोकपालैरपि स्वयम् ७३
तथैवायं गदापाणिर्धार्तराष्ट्रो गतश्रमः ।
अशक्यो धर्मतो हन्तुं कालेनापि हि दण्डिना ॥७४

नैतन्मनसि कर्तव्यं यदयं निहतो नृपः ।
मिथ्याचर्याच्छलोपायैर्बहवः शत्रवो हताः ॥ ७५
पूर्वैरनुगतो मार्गो देवैरसुरघातिभिः ।
सद्भिश्चानुगतः पन्थाः सर्वैरनुगमिष्यते ॥ ७६
'एवं विधात्रा विहितं स्वयमेषां महात्मनाम् ।
दैवं पुरुषकारेण न शक्यमतिवर्तितुम् ॥ ७७
भूतं भव्यं भविष्यच्च निमेषाद्यो हनिष्यति ।
कृतान्तमन्यथा कर्तुं नेच्छेत्सोऽयं धनञ्जय ॥'७८
कृतकृत्याः स्म सायाह्ने निवासं रोचयामहे ।
साश्वनागरथाः सर्वे विश्राम्यन्तु नराधिपाः ॥७९
वासुदेववचः श्रुत्वा तदानीं पाण्डवैः सह ।
पाञ्चाला भृशसंहृष्टा विनेदुः सिंहसङ्घवत् ॥ ८०
ततः प्राध्मापयच्छङ्खं पाञ्चजन्यं जनार्दनः ।
'देवदत्तं प्रहृष्टात्मा शङ्खप्रवरमर्जुनः ॥ ८१
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
पोण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥८२
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ।
धृष्टद्युम्नस्तथा जैत्रं सात्यकिर्नन्दिवर्धनम् ॥ ८३
तेषां नादेन महता शङ्खानां भरतर्षभ ।
आपुपूरे नभः सर्वं पृथिवी च चचाल ह ॥ ८४
ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
पाण्डुसैन्येष्ववाद्यन्त स शब्दस्तुमुलोऽभवत् ॥८५
अस्तुवन्पाण्डवानन्ये निर्भीश्च स्तुतिमङ्गलैः ।'
हृष्टा दुर्योधनं दृष्ट्वा निहतं पुरुषर्षभाः ॥ ८६

॥ इति श्रीमन्महाभारते शल्यपर्वणि गदायुद्धपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥

त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

पाञ्चालादिषु स्वस्वशिबिराण्युपगतेषु पाण्डवैर्दुर्योधनशिबिरमेत्य स्वस्वरथेभ्योऽवतरणम् ॥ १ ॥ कृष्णे रथात्प्रथमं पार्थमवतार्य पश्चात्स्वयमप्यवतीर्णे अग्निना तद्रथस्य भस्मीकरणम् ॥ २ ॥ कृष्णेनार्जुनंप्रति रथदाहस्य कारणकथनम् ॥ ३ ॥ कृष्णचोदनया पाण्डवैरोघवतीतीरे रात्रौ निवसनम् ॥ ४ ॥ कृष्णेन युधिष्ठिरचोदनया गान्धार्याश्वासनाय हास्तिनपुरगमनम् ॥ ५ ॥

सञ्जय उवाच ।
ततस्ते प्रययुः सर्वे निवासाय महीक्षितः ।
शङ्खान्प्रध्मापयन्तो वै हृष्टाः परिघबाहवः ॥ १
पाण्डवान्गच्छतश्चापि शिबिरं नो विशांपते ।
महेष्वासोऽन्वगात्पश्चाद्युयुत्सुः सात्यकिस्तथा ॥२
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाश्च सर्वशः ।
सर्वे चान्ये महेष्वासा ययुः स्वशिबिराण्युत ॥ ३
ततस्ते प्राविशन्पार्था हतत्विट्कं हतेश्वरम् ।
दुर्योधनस्य शिबिरं रङ्गवन्निःसृते जने ॥ ४
गतोत्सवं पुरमिव हृतनागमिव ह्रदम् ।
स्त्रीवर्षवरभूयिष्ठं वृद्धामात्यैरधिष्ठितम् ॥ ५
तत्रैतान्पर्युपातिष्ठन्दुर्योधनपुरःसराः ।
कृताञ्जलिपुटा राजन्काषायमलिनाम्बराः ॥ ६
शिबिरं समनुप्राप्य कुरुराजस्य पाण्डवाः ।
अवतेरुर्महाराज रथेभ्यो रथसत्तमाः ॥ ७
ततो गाण्डीवधन्वानमभ्यभाषत केशवः ।
स्थितः प्रियहिते नित्यमतीव भरतर्षभ ॥ ८
अवरोपय गाण्डीवमक्षयौ च महेषुधी ।
अथाहमवरोक्ष्यामि पश्चाद्भरतसत्तम ।
स्वयं चैवावरोह त्वमेतच्छ्रेयस्तवानघ ॥ ९
तच्चाकरोत्तथा वीरः पाण्डुपुत्रो धनञ्जयः ॥ १०
अथ पश्चात्ततः कृष्णो रश्मीनुत्सृज्य वाजिनाम् ।
अवारोहत मेधावी रथाद्गाण्डीवधन्वनः ॥ ११
अथावतीर्णे भूतानामीश्वरे सुमहात्मनि ।

वर्षवर· षण्ढः ॥ ५ ॥ दुर्योधनस्य पुरसराः दुर्योधनपुरः सरा. ॥ ६ ॥

कपिरप्याश्वपाक्रामत्सहदेवैर्ध्वजालयैः ॥ १२
स दग्धो द्रोणकर्णाभ्यां दिव्यैरस्त्रैर्महारथः ।
अथ दीप्तोऽग्निना ह्याशु प्रजज्वाल महीपते ॥ १३
सोपासङ्गः सरश्मिश्च साश्वः सयुगबन्धनः ।
भस्मीभूतोऽपतद्भूमौ रथो गाण्डीवधन्वनः ॥१४
तं तथा भस्मभूतं तु दृष्ट्वा पाण्डुसुताः प्रभो ।
अभवन्विस्मिता राजन्नर्जुनश्चेदमब्रवीत् ॥ १५
कृताञ्जलिः सप्रणयं प्रणिपत्याभिवाद्य ह ।
गोविन्द कस्माद्भगवन्रथो दग्धोऽयमग्निना ॥१६
किमेतन्महदाश्चर्यमभवद्यदुनन्दन ।
तन्मे ब्रूहि महाबाहो श्रोतव्यं यदि मन्यसे ॥१७
वासुदेव उवाच ।
द्रोणकर्णास्त्रनिर्दग्धः पूर्वमेवायमर्जुन ।
मदास्थितत्वात्समरे न विशीर्णः परंतप ॥ १८
इदानीं तु विशीर्णोऽयं दग्धो ब्रह्मास्त्रतेजसा ।
मया विमुक्तः कौन्तेय त्यज्यद्य कृतकर्मणि ॥१९
सञ्जय उवाच ।
ईषदुत्स्मयमानस्तु भगवान्केशवोऽरिहा ।
परिष्वज्य च राजानं युधिष्ठिरमभाषत ॥ २०
दिष्ट्या जयसि कौन्तेय दिष्ट्या ते शत्रवो जिताः ।
दिष्ट्या गाण्डीवधन्वा च भीमसेनश्च पाण्डवः ॥२१
त्वं चापि कुशली राजन्माद्रीपुत्रौ च पाण्डवौ ।
मुक्ता वीरक्षयादस्मात्संग्रामान्निहतद्विषः ।
क्षिप्रमुत्तरकालानि कुरु कार्याणि भारत ॥ २२
उपयातमुपप्लाव्यं सह गाण्डीवधन्वना ।
आनीय मधुपर्कं मां यत्पुरा त्वमवोचथाः ॥ २३
एष भ्राता सखा चैव तव कृष्ण धनञ्जयः ।
रक्षितव्यो महाबाहो सर्वास्वापत्स्विति प्रभो ॥२४
तव चैव ब्रुवाणस्य तथेत्येवाहमब्रुवम् ॥ २५
स सव्यसाची गुप्तस्ते विजयी च जनेश्वर ।
भ्रातृभिः सह राजेन्द्र शूरः सत्यपराक्रमः ।
मुक्तो वीरक्षयादस्मात्संग्रामाद्रोमहर्षणात् ॥ २६
एवमुक्तस्तु कृष्णेन धर्मराजो युधिष्ठिरः ।
हृष्टरोमा महाराज प्रत्युवाच जनार्दनम् ॥ २७
युधिष्ठिर उवाच ।
प्रमुक्तं द्रोणकर्णाभ्यां ब्रह्मास्त्रमरिमर्दन ।
कस्त्वदन्यः सहेत्साक्षादपि वज्री पुरंदरः ॥ २८
भवतस्तु प्रसादेन संग्रामे बहवो हताः ।
महारणगतः पार्थो यच्च नासीत्पराङ्मुखः ॥ २९
तथा तव महाबाहो पर्यायैर्बहुभिर्मया ।
कर्मणामनुसंधानात्तेजस्वी जगति श्रुता ॥ ३०
उपप्लाव्ये महर्षिर्मे कृष्णद्वैपायनोऽब्रवीत् ।
यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ॥ ३१
'एवमुक्तस्ततः कृष्णः प्रत्युवाच युधिष्ठिरम् ।
अक्षौहिण्यो दशाष्टौ च तव तेषां च भारत ।
न तुल्याश्चार्जुनस्येह बलेन कुरुनन्दन ॥ ३२
स एष सर्वाण्यस्त्राणि दिव्यानि प्राप्य शङ्करात् ।
मत्समो वा विशिष्टो वा रणे त्वमिति पाण्डवः ।
अनुज्ञातः पाण्डुसुतः पुनः प्रत्यागमन्महीम् ॥३३
भूतं भव्यं भविष्यच्च अनुज्ञातस्त्वया विभो ।
निमेषार्धान्नरव्याघ्रो नयेदिति मतिर्मम ॥ ३४
द्रोणं भीष्मं कृपं कर्णं द्रोणपुत्रं जयद्रथम् ।
निहन्तुं शक्नुयात्क्रुद्धो निमेषार्धाद्धनञ्जयः ॥ ३५
सदेवासुरगन्धर्वान्सयक्षोरगराक्षसान् ।
त्रीन्वा लोकान्विजेतुं स शक्तः किमिह मानुषान् ॥
विधिना विहितं चासौ मया संचोदितोऽपि सन् ।
न चकार मतिं हन्तुं ततस्ते बलवत्तराः ॥ ३७
अत्र गीता मया सुष्ठु गिरः सत्या महीपते ।
दर्शितं मयि सर्वं च तेनासौ जितवान्रिपून् ॥ ३८
अर्जुनोऽपि महाबाहुर्मया तुल्यो महीपते ।
स महेश्वरलब्धास्त्रः किं न कुर्याद्विभुः प्रभो ॥'३९
इत्येवमुक्ते ते वीराः शिबिरं तव भारत ।

तेजस्वीति गति श्रुता इति छ पाठ. । तथैव च महाबाहो—मनुसतान तेजसश्च गती शुभाः इति झ पाठः ॥ ३० ॥

त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

प्रविश्य प्रत्यपद्यन्त कोशरत्नर्धिसंचयान् ॥ ४०
रजतं जातरूपं च मणीनथ च मौक्तिकान् ।
भूषणान्यथ मुख्यानि कम्बलान्यजिनानि च ४१
'गजानश्वान्रथांश्चैव महान्ति शयनानि च' ।
दासीदासमसंख्येयं राज्योपकरणानि च ॥ ४२
ते प्राप्य धनमक्षय्यं त्वदीयं भरतर्षभ ।
उदक्रोशन्महाभागा नरेन्द्र विजितारयः ॥ ४३
ते तु वीराः समाश्वस्य वाहनान्यवमुच्य च ।
अतिष्ठन्त मुहुः सर्वे पाण्डवा विगतज्वराः ॥ ४४
अथाब्रवीन्महाराज वासुदेवो महायशाः ।
अस्माभिर्मङ्गलार्थाय वस्तव्यं शिबिराद्बहिः ॥ ४५
तथेत्युक्त्वा हि ते सर्वे पाण्डवाः सात्यकिस्तथा ।
वासुदेवेन सहिता मङ्गलार्थं बहिर्ययुः ॥ ४६
ते समासाद्य सरितं पुण्यामोघवतीं नृप ।
न्यवसन्नथ तां रात्रिं पाण्डवा हतशत्रवः ॥ ४७
युधिष्ठिरस्ततो राजा प्राप्तकालमचिन्तयत् ॥ ४८
तत्र ते गमनं प्राप्तं रोचते तव माधव ।
गान्धार्याः क्रोधदीप्तायाः प्रशमार्थमरिंदम ॥४९
हेतुकारणयुक्तैश्च वाक्यैः कालसमीरितैः ।
क्षिप्रमेव महाभाग गान्धारीं प्रशमिष्यसि ।
पितामहश्च भगवान्व्यासस्तत्र भविष्यति ॥ ५०
ततः संप्रेषयामासुर्यादवं नागसाह्वयम् ॥ ५१
स च प्रायाज्जवेनाशु वासुदेवः प्रतापवान् ।
दारुकं रथमारोप्य येन राजाऽम्बिकासुतः ॥ ५२
तमूचुः संप्रयास्यन्तं शैब्यसुग्रीववाहनम् ।
प्रत्याश्वासय गान्धारीं हतपुत्रां यशस्विनीम् ॥५३
स प्रायात्पाण्डवैरुक्तस्तत्पुरं सात्वतां वरः ।
आससाद ततः क्षिप्रं गान्धारीं निहतात्मजाम् ५४

॥ इति श्रीमन्महाभारते शल्यपर्वणि गदायुद्धपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

जनमेजयेन गान्धार्याश्वासनकारणप्रश्ने वैशंपायनेन तत्कथनम् ॥ १ ॥ कृष्णेन गान्धारीधृतराष्ट्रौ समाश्वास्य पुनः पाण्डवसमीपागमनम् ॥ २ ॥

जनमेजय उवाच ।
किमर्थं द्विजशार्दूल धर्मराजो युधिष्ठिरः ।
गान्धार्याः प्रेषयामास वासुदेवं परंतपम् ॥ १
यदा पूर्वं गतः कृष्णः शमार्थं कौरवान्प्रति ।
न च तं लब्धवान्कामं ततो युद्धमभूदिदम् ॥ २
निहतेषु तु योधेषु हते दुर्योधने तदा ।
पृथिव्यां पाण्डवेयस्य निःसपत्ने कृते युधि ॥ ३
विद्रुते शिबिरे शून्ये प्राप्ते यशसि चोत्तमे ।
किं नु तत्कारणं ब्रह्मन्येन कृष्णो गतः पुनः ॥ ४
न चैतत्कारणं ब्रह्मन्नल्पं विप्रतिभाति मे ।
यत्रागमदमेयात्मा स्वयमेव जनार्दनः ॥ ५
तत्त्वतो वै समाचक्ष्व सर्वमध्वर्युसत्तम ।
यच्चात्र कारणं ब्रह्मन्कार्यस्यास्य विनिश्चये ॥ ६

वैशंपायन उवाच ।
त्वद्युक्तोऽयमनुप्रश्नो यन्मां पृच्छसि पार्थिव ।
तत्तेऽहं संप्रवक्ष्यामि यथावद्भरतर्षभ ॥ ७
हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
व्युत्क्रम्य समयं राजन्धार्तराष्ट्रं महाबलम् ॥ ८
अन्यायेन हतं दृष्ट्वा गदायुद्धेन भारत ।
युधिष्ठिरं महाराज महद्भयमथाविशत् ॥ ९
सोऽचिन्तयन्महाभागां गान्धारीं तपसान्विताम् ।
घोरेण तपसा युक्तां त्रैलोक्यमपि सा दहेत् ॥१०
तस्य चिन्तयमानस्य बुद्धिः समभवत्तदा ।
गान्धार्याः क्रोधदीप्तायाः पूर्वं प्रशमनं भवेत् ॥११
सा हि पुत्रवधं श्रुत्वा कृतमस्माभिरीदृशम् ।
मानसेनाग्निना क्रुद्धा भस्मसान्नः करिष्यति ॥ १२

कथं दुःखमिदं तीव्रं गान्धारी संप्रशक्ष्यति ।
श्रुत्वा विनिहतं पुत्रं छलेनाजिह्मयोधिनम् ॥ १३
एवं विचिन्त्य बहुधा भयशोकसमन्वितः ।
वासुदेवमिदं वाक्यं धर्मराजोऽभ्यभाषत ॥ १४
तव प्रसादाद्गोविन्द राज्यं निहतकण्टकम् ।
अप्राप्यं मनसाऽपीदं प्राप्तमस्माभिरच्युत ॥ १५
प्रत्यक्षं मे महाबाहो संग्रामे रोमहर्षणे ।
विमर्दः सुमहान्प्राप्तस्त्वया यादवनन्दन ॥ १६
त्वया देवासुरे युद्धे वधार्थममरद्विषाम् ।
यथा साह्यं पुरा दत्तं हताश्च विबुधद्विषः ॥ १७
साह्यं तथा महाबाहो दत्तमस्माकमच्युत ।
सारथ्येन च वार्ष्णेय भवता हि धृता वयम् ॥ १८
यदि न त्वं भवेन्नाथः फल्गुनस्य महारणे ।
कथं शक्यो रणे जेतुं भवेदेष बलार्णवः ॥ १९
गदाप्रहारा विपुलाः परिघैश्चापि ताडनम् ।
शक्तिभिर्भिण्डिपालैश्च तोमरैः सपरश्वधैः ॥ २०
असत्कृते त्वया कृष्ण वाचः सुपरुषाः श्रुताः ।
शस्त्राणां च निपाता वै वज्रस्पर्शोपमा रणे ॥२१
ते च ते सफला जाता हते दुर्योधनेऽच्युत ।
तत्सर्वं न यथा नश्येत्पुनः कृष्ण तथा कुरु ॥२२
संदेहडोलां प्राप्तं नश्चेतः कृष्ण जये सति ।
गान्धार्या हि महाबाहो क्रोधं शमय माधव ॥२३
सा हि नित्यं महाभागा तपसोग्रेण कर्शिता ।
पुत्रपौत्रवधं श्रुत्वा ध्रुवं नः संप्रधक्ष्यति ।
तस्याः प्रसादनं वीर प्राप्तकालं मतं मम ॥ २४
कश्च तां क्रोधसंदीप्तां पुत्रव्यसनकर्शिताम् ।
वीक्षितुं पुरुषः शक्तस्त्वामृते पुरुषोत्तम ॥ २५
तत्र मे गमनं प्राप्तं रोचते तव माधव ।
गान्धार्याः क्रोधदीप्तायाः प्रशमार्थमरिंदम ॥२६
त्वं हि कर्ता विकर्ता च लोकानां प्रभवाव्ययः ।
हेतुकारणसंयुक्तैर्वाक्यैः कालसमीरितैः ॥ २७
क्षिप्रमेव महाबाहो गान्धारीं शमयिष्यसि ।
पितामहश्च भगवान्कृष्णस्तत्र भविष्यति ॥ २८
सर्वथा ते महाबाहो गान्धार्याः क्रोधनाशनम् ।
कर्तव्यं सात्वतां श्रेष्ठ पाण्डवानां हितार्थिना ॥२९
धर्मराजस्य वचनं श्रुत्वा यदुकुलोद्वहः ।
आमन्त्र्य दारुकं प्राह रथः सज्जो विधीयताम् ॥३०
केशवस्य वचः श्रुत्वा त्वरमाणोऽथ दारुकः ।
न्यवेदयद्रथं सज्जं केशवाय महात्मने ॥ ३१
तं रथं यादवश्रेष्ठः समारुह्य परंतपः ।
जगाम हास्तिनपुरं त्वरितः केशवो विभुः ॥ ३२
ततः प्रायान्महाराज माधवो भगवान्रथी ।
नागसाह्वयमासाद्य प्रविवेश च वीर्यवान् ॥ ३३
प्रविश्य नगरं वीरो रथघोषेण नादयन् ।
विदितो धृतराष्ट्रस्य सोऽवतीर्य रथोत्तमात् ।
अभ्यगच्छददीनात्मा धृतराष्ट्रनिवेशनम् ॥ ३४
पूर्वं चाभिगतं तत्र सोऽपश्यदृषिसत्तमम् ॥ ३५
पादौ प्रपीड्य कृष्णस्य राज्ञश्चापि जनार्दनः ।
अभ्यवादयदव्यग्रो गान्धारीं चापि केशवः ॥३६
ततस्तु यादवश्रेष्ठो धृतराष्ट्रमधोक्षजः ।
पाणिमालम्ब्य राजेन्द्र सुस्वरं प्ररुरोद ह ॥ ३७
स मुहूर्तादिवोत्सृज्य बाष्पं शोकसमुद्भवम् ।
प्रक्षाल्य वारिणा नेत्रे ह्याचम्य च यथाविधि ।
उवाच प्रश्रितं वाक्यं धृतराष्ट्रमरिंदमः ॥ ३८
न तेऽस्त्यविदितं किंचिद्भूतं भव्यं च भारत ।
कालस्य च यथावृत्तं तत्त्वे सुविदितं प्रभो ॥ ३९
यदिदं पाण्डवैः सर्वैस्तव चित्तानुरोधिभिः ।
कथं कुलक्षयो न स्यात्तथा क्षत्रस्य भारत ॥ ४०
भ्रातृभिः समयं कृत्वा क्षान्तवान्धर्मवत्सलः ।
द्यूतच्छलजितैः शुद्धैर्वनवासो ह्युपागतः ॥ ४१
अज्ञातवासचर्या च नानावेषसमावृतैः ।
अन्ये च बहवः क्लेशास्त्वशक्तैरिव सर्वदा ॥ ४२
मया च स्वयमागम्य युद्धकाल उपस्थिते ।
सर्वलोकस्य सान्निध्ये ग्रामांस्त्वं पञ्च याचितः ॥४३

हेतुकारणसयुक्तै हेतवो दृष्टा अपराधा. । कारणानि अदृष्टान्यवश्यभावीनि तैर्युक्तानि तैः ॥ २७ ॥ प्रायादगच्छत् ॥ ३३ ॥ विदित धृतराष्ट्रस्येति झ. पाठः ॥ ३४ ॥ कृष्णस्य व्यासस्य ॥ ३६ ॥

त्वया कालोपसृष्टेन लोभतो नापवर्जिताः ।
तवापराधान्नृपते सर्वं क्षत्रं क्षयं गतम् ॥ ४४
भीष्मेण सोमदत्तेन बाह्लीकेन कृपेण च ।
द्रोणेन च सपुत्रेण विदुरेण च धीमता ।
याचितस्त्वं शमं नित्यं न च तत्कृतवानसि ॥ ४५
कालोपहतचित्ता हि सर्वे मुह्यन्ति भारत ।
यथा मूढो भवान्पूर्वमस्मिन्नर्थे समुद्यते ॥ ४६
किमन्यत्कालयोगाद्धि द्विष्टमेव परायणम् ।
मा च दोषान्महाप्राज्ञ पाण्डवेषु निवेशय ॥ ४७
अल्पोप्यतिक्रमो नास्ति पाण्डवानां महात्मनाम् ।
धर्मतो न्यायतश्चैव स्नेहतश्च परंतप ॥ ४८
एतत्सर्वं तु विज्ञाय ह्यात्मदोषकृतं फलम् ।
तन्मन्युं पाण्डुपुत्रेषु न भवान्कर्तुमर्हति ॥ ४९
कुलं वंशश्च पिण्डाश्च यच्च पुत्रकृतं फलम् ।
गान्धार्यास्तव वै नाथ पाण्डवेषु प्रतिष्ठितम् ॥ ५०
त्वं चैव कुरुशार्दूल गान्धारी च यशस्विनी ।
मा शुचो नरशार्दूल पाण्डवान्प्रतिकिल्बिषम् ॥ ५१
एतत्सर्वमनुध्याय आत्मनश्च व्यतिक्रमम् ।
शिवेन पाण्डवान्ध्याहि नमस्ते भरतर्षभ ॥ ५२
जानासि च महाबाहो धर्मराजस्य या त्वयि ।
भक्तिर्भरतशार्दूल स्नेहश्चापि स्वभावतः ॥ ५३
एतच्च कदनं कृत्वा शत्रूणामपकारिणाम् ।
दह्यते स दिवारात्रौ न च शर्माधिगच्छति ॥ ५४
त्वां चैव नरशार्दूल गान्धारीं च यशस्विनीम् ।
स शोचन्नरशार्दूलः शान्तिं नैवाधिगच्छति ॥ ५५
ह्रिया च परयाऽविष्टो भवन्तं नाधिगच्छति ।
पुत्रशोकाभिसंतप्तं बुद्धिव्याकुलितेन्द्रियम् ॥ ५६
एवमुक्त्वा महाराज धृतराष्ट्रं यदूत्तमः ।
उवाच परमं वाक्यं गान्धारीं शोककर्शिताम् ॥ ५७
सौबलेयि निबोध त्वं यत्त्वां वक्ष्यामि सुव्रते ।
त्वत्समा नास्ति लोकेऽस्मिन्नद्य सीमन्तिनी शुभे ॥
जानासि च यथा राज्ञि सभायां मम सन्निधौ ।
धर्मार्थसहितं वाक्यमुभयोः पक्षयोर्हितम् ॥ ५९
उक्तवत्यसि कल्याणि न च ते तनयैः कृतम् ।
दुर्योधनस्त्वया चोक्तो जयार्थी परुषं वचः ॥ ६०
शृणु मूढ वचो मह्यं यतो धर्मस्ततो जयः ।
तदिदं समनुप्राप्तं तव वाक्यं नृपात्मजे ॥ ६१
एवं विदित्वा कल्याणि मा स्म शोके मनः कृथाः ।
पाण्डवानां विनाशाय मा ते बुद्धिः कदाचन ॥ ६२
शक्ता चासि महाभागे पृथिवीं सचराचराम् ।
चक्षुषा क्रोधदीप्तेन निर्दग्धुं तपसो बलात् ॥ ६३
वासुदेववचः श्रुत्वा गान्धारी वाक्यमब्रवीत् ।
एवमेतन्महाबाहो यथा वदसि केशव ॥ ६४
आधिभिर्दह्यमानाया मतिः संचलिता मम ।
सा मे व्यवस्थिता श्रुत्वा तव वाक्यं जनार्दन ॥ ६५
राज्ञस्त्वन्धस्य वृद्धस्य हतपुत्रस्य केशव ।
त्वं गतिः सहितैर्वीरैः पाण्डवैर्द्विपदां वर ॥ ६६
एतावदुक्त्वा वचनं मुखं प्रच्छाद्य वाससा ।
पुत्रशोकाभिसंतप्ता गान्धारी प्ररुरोद ह ॥ ६७
तत एनां महाबाहुः केशवः शोककर्शिताम् ।
हेतुकारणसंयुक्तैर्वाक्यैराश्वासयत्प्रभुः ॥ ६८
समाश्वास्य च गान्धारीं धृतराष्ट्रं च माधवः ।
द्रौणिसंकल्पितं भावमन्वबुध्यत केशवः ॥ ६९
ततस्त्वरित उत्थाय पादौ मूर्ध्ना प्रणम्य च ।
द्वैपायनस्य राजेन्द्र ततः कौरवमब्रवीत् ॥ ७०
आपृच्छे त्वां कुरुश्रेष्ठ मा च शोके मनः कृथाः ।
द्रौणेः पापोस्त्यभिप्रायस्तेनास्मि सहसोत्थितः ॥
पाण्डवानां वधे रात्रौ बुद्धिस्तेन प्रदर्शिता ॥ ७२
एतच्छ्रुत्वा तु वचनं गान्धार्या सहितोऽब्रवीत् ।
धृतराष्ट्रो महाबाहुः केशवं केशिसूदनम् ॥ ७३
शीघ्रं गच्छ महाबाहो पाण्डवान्परिपालय ।
भूयस्त्वया समेष्यामि क्षिप्रमेव जनार्दन ॥ ७४
प्रायात्ततस्तु त्वरितो दारुकेण सहाच्युतः ॥ ७५
वासुदेवे गते राजन्धृतराष्ट्रं जनेश्वरम् ।
आश्वासयदमेयात्मा व्यासो लोकनमस्कृतः ॥ ७६

असूया पाण्डुपुत्रेष्विति झ पाठः ॥ ४९ ॥

चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

वासुदेवोऽपि धर्मात्मा कृतकृत्यो जगाम ह ।
शिबिरं हास्तिनपुरादिदृक्षुः पाण्डवान्नृप ॥ ७७
आगम्य शिबिरं रात्रौ सोऽभ्यगच्छत पाण्डवान् ।
तच्च तेभ्यः समाख्याय सहितस्तैः समाहितः ॥ ७८

॥ इति श्रीमन्महाभारते शल्यपर्वणि गदायुद्धपर्वणि चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

सञ्जयेन धृतराष्ट्रंप्रति दुर्योधनविलापप्रकारकथनम् ॥ १ ॥ वादिकैरश्वत्थाग्नि दुर्योधनपातननिवेदनम् ॥ २ ॥

धृतराष्ट्र उवाच ।
अधिष्ठितः पदा मूर्ध्नि भग्नसक्थो महीं गतः ।
शौटीर्यमानी पुत्रो मे किमभाषत सञ्जय ॥ १
अत्यर्थं कोपनो राजा जातवैरश्च पाण्डुषु ।
व्यसनं परमं प्राप्तः किमाह परमाहवे ॥ २
सञ्जय उवाच ।
शृणु राजन्प्रवक्ष्यामि यथावृत्तं नराधिप ।
राज्ञा यदुक्तं मग्नेन तस्मिन्व्यसनसागरे ॥ ३
भग्नसक्थो नृपो राजन्पांसुना सोऽवकुण्ठितः ।
यमयन्मूर्धजांस्तत्र वीक्ष्य चैव दिशो दश ॥ ४
केशान्नियम्य यत्नेन निःश्वसन्नुरगो यथा ।
संरम्भाश्रुपरीताभ्यां नेत्राभ्यामभिवीक्ष्य माम् ५
बाहू धरण्यां निष्पिष्य सुदुर्मत्त इव द्विपः ।
प्रकीर्णान्मूर्धजान्धुन्वन्दन्तैर्दन्तानुपस्पृशन् ।
गर्हयन्पाण्डवं ज्येष्ठं निःश्वस्येदमथाब्रवीत् ॥ ६
भीष्मे शान्तनवे नाथे कर्णे शस्त्रभृतां वरे ।
गौतमे शकुनौ चापि द्रोणे चास्त्रभृतां वरे ॥ ७
अश्वत्थाग्नि तथा शल्ये शूरे च कृतवर्मणि ।
अन्येष्वपि च शूरेषु न्यस्तभारो महात्मसु ।
इमामवस्थां प्राप्तोऽस्मि कालो हि दुरतिक्रमः ॥ ८
एकादशचमूभर्ता सोऽहमेतां दशां गतः ।
कालं प्राप्य महाबाहो न कश्चिदतिवर्तते ॥ ९
आख्यातव्यं मदीयानां येऽस्मिञ्जीवन्ति संयुगे ।
यथाऽहं भीमसेनेन व्युत्क्रम्य समयं हतः ॥ १०
बहूनि सुनृशंसानि कृतानि खलु पाण्डवैः ।
भूरिश्रवसि कर्णे च भीष्मे द्रोणे च धीमति ॥ ११
इदं च गर्हितं कर्म नृशंसैः पाण्डवैः कृतम् ।
येन ते वाच्यतां सत्सु गमिष्यन्तीति मे मतिः १२
का प्रीतिः सत्वयुक्तस्य कृत्वोपाधिकृतं जयम् ।
को वा समयभेत्तारं बुधः संमन्तुमर्हति ॥ १३
अधर्मेण जयं लब्ध्वा को नु हृष्येत पण्डितः ।
यथा संहृष्यते पापः पाण्डुपुत्रो वृकोदरः ॥ १४
किंनु चित्रमितस्त्वद्य भग्नसक्थस्य यन्मम ।
क्रुद्धेन भीमसेनेन पादेन मृदितं शिरः ॥ १५
प्रतपन्तं श्रिया जुष्टं वर्तमानं च बन्धुषु ।
एवं कुर्यान्नरो यो हि स वै संजय पूरुषः ॥ १६
अभिज्ञौ युद्धधर्मस्य मम माता पिता च यौ ।
तौ हि सञ्जय दुःखार्तौ विज्ञाप्यौ वचनाद्धि मे १७
इष्टं भृत्या भृताः सम्यग्भूः प्रशास्ता ससागरा ।
मूर्ध्नि स्थितममित्राणां जीवतामेव सञ्जय ॥ १८
दत्ता दाया यथाशक्ति मित्राणां च प्रियं कृतम् ।
अमित्रा बाधिताः सर्वे को नु स्वन्ततरो मया ॥ १९
मानिता बान्धवाः सर्वे मान्यः संपूजितो जनः ।
त्रितयं सेवितं सर्वं को नु स्वन्ततरो मया ॥ २०
आज्ञप्तं नृपमुख्येषु मानः प्राप्तः सुदुर्लभः ।
आजानेयैस्तथा यातं को नु स्वन्ततरो मया २१
यातानि परराष्ट्राणि नृपा भुक्ताश्च दासवत् ।
प्रियेभ्यः प्रकृतं साधु को नु स्वन्ततरो मया २२

शौटीर शूरः स एव शौटीर्यमात्मान मन्यते शौटीर्यमानी ॥ १ ॥

स वै सञ्जयपूजित इति झ पाठः ॥ १६ ॥ मया मत्तः ॥ २० ॥

अधीतं विधिवद्दत्तं प्राप्तमायुर्निरामयम् ।
स्वधर्मेण जिता लोकाः को नु स्वन्ततरो मया २३
दिष्ट्या नाहं जितः सङ्ख्ये परान्प्रेष्यवदाश्रितः ।
दिष्ट्या मे विपुला लक्ष्मीर्मृते त्वन्यगता विभो २४
यदिष्टं क्षत्रबन्धूनां स्वधर्ममनुतिष्ठताम् ।
निधनं तन्मया प्राप्तं को नु स्वन्ततरो मया॥२५
दिष्ट्या नाहं परावृत्तो वैरात्प्राकृतवज्जितः ।
दिष्ट्या न विमतिं कांचिद्भजित्वा तु पराजितः २६
सुप्तं वाऽथ प्रमत्तं वा यथा हन्याद्विषेण वा ।
एवं व्युत्क्रान्तधर्मेण व्युत्क्रम्य समयं हतः॥२७
अश्वत्थामा महाभागः कृतवर्मा च सात्वतः ।
कृपः शारद्वतश्चैव वक्तव्या वचनान्मम ॥ २८
अधर्मेण प्रवृत्तानां पाण्डवानामनेकशः ।
विश्वासं समयघ्नानां न यूयं गन्तुमर्हथ ॥ २९
वार्तिकांश्चाब्रवीद्राजा पुत्रस्ते सत्यविक्रमः ।
अधर्माद्भीमसेनेन निहतोऽहं यथा रणे ॥ ३०
सोऽहं द्रोणं स्वर्गगतं कर्णशल्यावुभौ तथा ।
वृषसेनं महावीर्यं शकुनिं चापि सौबलम् ॥ ३१
जलसन्धं महावीर्यं भगदत्तं च पार्थिवम् ।
सोमदत्तं महेष्वासं सैन्धवं च जयद्रथम् ॥ ३२
दुःशासनपुरोगांश्च भ्रातॄनात्मसमांस्तथा ।
दौःशासनिं च विक्रान्तं लक्ष्मणं चात्मजावुभौ ॥
एतांश्चान्यांश्च सुबहून्मदीयांश्च सहस्रशः ।
पृष्ठतोऽनुगमिष्यामि सार्थहीनो यथाऽध्वगः ३४
कथं भ्रातॄन्हताञ्श्रुत्वा भर्तारं च स्वसा मम ।
रोरूयमाणा दुःखार्ता दुःशला सा भविष्यति ३५
स्नुषाभिः प्रस्नुषाभिश्च वृद्धो राजा पिता मम ।
गान्धारीसहितश्चैव कां गतिं प्रतिपत्स्यति ॥ ३६
नूनं लक्ष्मणमाताऽपि हतपुत्रा हतेश्वरा ।
विनाशं यास्यति क्षिप्रं कल्याणी पृथुलोचना ३७
यदि जानाति चार्वाकः परिव्राड्वाग्विशारदः ।
करिष्यति महाभागो ध्रुवं चापचितिं मम ॥ ३८
समन्तपञ्चके पुण्ये त्रिषु लोकेषु विश्रुते ।
अहं निधनमासाद्य लोकान्प्राप्स्यामि शाश्वतान् ॥
ततो जनसहस्राणि बाष्पपूर्णानि भारिष ।
प्रलापं नृपतेः श्रुत्वा व्यद्रवन्त दिशो दश ॥४०
ससागरवना घोरा पृथिवी सचराचरा ।
चचालाथ सनिर्ह्रादा दिशश्चैवाविलाऽभवन्॥४१
ते द्रोणपुत्रमासाद्य यथावृत्तं न्यवेदयन् ।
व्यवहारं गदायुद्धे पार्थिवस्य च पातनम् ॥ ४२
तदाख्याय ततः सर्वे द्रोणपुत्रस्य भारत ।
'वादिका दुःखसंतप्ताः शोकोपहतचेतसः ।'
ध्यात्वा च सुचिरं कालं जग्मुरार्ता यथागतम्॥४३

॥ इति श्रीमन्महाभारते शल्यपर्वणि गदायुद्धपर्वणि पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

षट्षष्टितमोऽध्यायः ॥ ६६ ॥

द्रौणिकृपकृतवर्मभिर्दुर्योधनस्य भूपतनदर्शनेन शोचनम् ॥ १ ॥ द्रौणिदुर्योधनयोः संलापः ॥ २ ॥ द्रौणिना रात्रौ पाण्डववधप्रतिज्ञानम् ॥ ३ ॥ दुर्योधनवचनात् कृपेण द्रौणेः सैनापत्येऽभिषेचनम् ॥ ४ ॥

सञ्जय उवाच।
वादिकानां सकाशात्तु श्रुत्वा दुर्योधनं हतम् ।
हतशिष्टास्तदा राजन्कौरवाणां महारथाः ॥ १
विनिर्भिन्नाः शितैर्बाणैर्गदातोमरशक्तिभिः ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
त्वरिता जवनैरश्वैरायोधनमुपागमन् ॥ २
तत्रापश्यन्महात्मानं धार्तराष्ट्रं निपातितम् ।
प्रभग्नं वायुवेगेन महासालं यथा वने ॥ ३

वार्तिकान्वार्ताहारिण ॥ ३० ॥ चार्वाको ब्राह्मणवेषधारी राक्षस । अपचिति प्रतीकारम् ॥ ३८ ॥

पञ्चषष्टितमोऽध्याय ॥ ६५ ॥

भूमौ विवेष्टमानं तं रुधिरेण समुक्षितम् ।
महागजमिवारण्ये व्याधेन विनिपातितम् ॥ ४
विवर्तमानं बहुशो रुधिरौघपरिप्लुतम् ।
यदृच्छया निपतितं चन्द्रमादित्यगोचरात् ॥ ५
युगान्तमारुतेनेव शोषितं मकरालयम् ।
पूर्णचन्द्रमिव व्योम्नि तुषारावृतमण्डलम् ॥ ६
रेणुध्वस्तं दीर्घभुजं मातङ्गमिव विक्रमे ।
वृतं भूतगणैर्घोरैः क्रव्यादैश्च समन्ततः ॥ ७
यथा धनं लिप्समानैर्भृत्यैर्नृपतिसत्तमम् ।
भ्रुकुटीकृतवक्त्रान्तं क्रोधादुद्वृत्तचक्षुषम् ।
सामर्षं तं नरव्याघ्रं भौमं निपतितं तथा ॥ ८
ते तं दृष्ट्वा महेष्वासं भूतले पतितं नृपम् ।
मोहमभ्यागमन्सर्वे कृपप्रभृतयो रथाः ॥ ९
अवतीर्य रथेभ्यश्च प्राद्रवन्राजसन्निधौ ।
दुर्योधनं च संप्राप्य सर्वे भूमावुपाविशन् ॥ १०
ततो द्रौणिर्महाराज बाष्पपूर्णेक्षणः श्वसन् ।
उवाच भरतश्रेष्ठं सर्वलोकेश्वरेश्वरम् ॥ ११
न नूनं विद्यते पुण्यं मानुषे किंचिदेव हि ।
यत्र त्वं पुरुषव्याघ्र शेषे पांसुषु रूषितः ॥ १२
भूत्वा हि नृपतिः पूर्वं समाज्ञाप्य च मेदिनीम् ।
कथमेकोऽद्य राजेन्द्र तिष्ठसे निर्जने वने ॥ १३
दुःशासनं न पश्यामि नापि कर्णं महारथम् ।
नापि तान्सुहृदः सर्वान्किमिदं भरतर्षभ ॥ १४
दुःखं नूनं कृतान्तस्य गतिं ज्ञातुं कथंचन ।
लोकनाथो भवान्यत्र शेषे पांसुषु रूषितः ॥ १५
एष मूर्धाभिषिक्तानामग्रे गत्वा परंतपः ।
सतृणं ग्रसते पांसुं पश्य कालस्य पर्ययम् ॥ १६
क्व ते तदमलं छत्रं व्यजनं क्व च पार्थिव ।
सा च ते महती सेना क्व गता पार्थिवोत्तम १७
दुर्विज्ञेया गतिर्नूनं कार्याणां कारणान्तरे ।
यो वै लोकगुरुर्नाथो भवानेतां दशां गतः॥१८
अध्रुवा सर्वमर्त्येषु ध्रुवैव श्रीर्विचिन्त्यते ।
भवतो व्यसनं दृष्ट्वा शक्रविस्पर्धिनो भृशम्॥ १९
तस्य तद्वचनं श्रुत्वा दुःखितस्य विशेषतः ।
उवाच राजन्पुत्रस्ते प्राप्तकालमिदं वचः ॥ २०
विमृज्य नेत्रे पाणिभ्यां शोकजं बाष्पमुत्सृजन् ।
कृपादीन्स तदा वीरान्सर्वानेव नराधिपः ॥ २१
ईदृशो लोकधर्मोऽयं धात्रा निर्दिष्ट उच्यते ।
विनाशः सर्वभूतानां कालपर्यायकारितः ॥ २२
सोऽयं मां समनुप्राप्तः प्रत्यक्षो भवतां हि यः ।
पृथिवीं पालयित्वाऽहमेतां निष्ठामुपागतः॥ २३
दिष्ट्या नाहं परावृत्तो युद्धे कस्यांचिदापदि ।
दिष्ट्याऽहं निहतः पापैश्छलेनैव विशेषतः॥ २४
उत्साहश्च कृतो नित्यं मया दिष्ट्या युयुत्सता ।
दिष्ट्या चास्मिन्हतो युद्धे निहतज्ञातिबान्धवः २५
दिष्ट्या च वोऽहं पश्यामि मुक्तानस्माज्जनक्षयात् ।
स्वस्तियुक्तांश्च कल्याणांस्तन्मे प्रियमनुत्तमम् २६
मा भवन्तोऽत्र तप्यन्तां सौहृदान्निधनेन मे ।
यदि वेदाः प्रमाणं वो जिता लोका मयाऽक्षयाः ॥
जानमानः प्रभावं च कृष्णस्यामिततेजसः ।
तेन न च्यावितश्चाहं क्षत्रधर्मात्स्वनुष्ठितात्॥ २८
स मया समनुप्राप्तो नास्मि शोच्यः कथंचन ।
कृतं भवद्भिः सदृशमनुरूपमिवात्मनः ।
यतितं विजये शक्त्या दैवं तु दुरतिक्रमम् ॥ २९
एतावदुक्त्वा वचनं बाष्पव्याकुललोचनः ।
तूष्णींबभूव राजेन्द्र रुजाऽसौ विह्वलो भृशम् ३०
तथा दृष्ट्वा तु राजानं बाष्पशोकसमन्वितम् ।
द्रौणिः क्रोधेन जज्वाल यथा वह्निर्जगत्क्षये ३१
स च क्रोधसमाविष्टः पाणौ पाणिं निपीड्य च ।
बाष्पविह्वलया वाचा राजानमिदमब्रवीत् ॥ ३२
पिता मे निहतः क्षुद्रैः सुनृशंसेन कर्मणा ।
न तथा तेन तप्यामि यथा राजंस्त्वयाऽद्य वै॥ ३३

आदित्यगोचरात्गगनात् । चक्रमादित्यगोचरमिति झ पाठ तत्र चक्रमादित्यगोचरं सूर्यमण्डलमिवेति लुप्तोपमा ॥ ५ ॥

कारणान्तरे अदृष्टरूपे सति । तेन दृष्टसामग्रीवैयर्थ्यं जायत इति भाव. ॥ १८ ॥ षट्पष्टितमोऽध्याय. ॥ ६६ ॥

शृणु चेदं वचो मह्यं सत्येन वदतः प्रभो ।
इष्टापूर्तेन दानेन धर्मेण सुकृतेन च ॥ ३४
अद्याहं सर्वपाञ्चालान्वासुदेवस्य पश्यतः ।
अद्य रात्रौ महाराज निहनिष्यामि पाण्डवान् ३५
अनुज्ञां तु महाराज भवान्मे दातुमर्हति ॥ ३६
तच्छ्रुत्वा वचनं द्रौणेर्धृतराष्ट्र तवात्मजः ।
मनसः प्रीतिजननं कृपं वचनमब्रवीत् ।
दुर्योधन उवाच ।
आचार्य शीघ्रं कलशं जलपूर्णं समानय ॥ ३७
स तद्वचनमाज्ञाय राज्ञो ब्राह्मणसत्तमः ।
कलशं पूर्णमादाय राज्ञोऽन्तिकमुपागमत् ॥ ३८
तमब्रवीन्महाराज पुत्रस्तव विशांपते ।
ममाज्ञया द्विजश्रेष्ठ द्रोणपुत्रोऽभिषिच्यताम् ।
सैनापत्येन भद्रं ते मम चेदिच्छसि प्रियम् ॥ ३९
राज्ञो नियोगाद्योद्धव्यं ब्राह्मणेन विशेषतः ।
वर्तता क्षत्रधर्मेण ह्येवं धर्मविदो विदुः ॥ ४०
राज्ञस्तु वचनं श्रुत्वा कृपः शारद्वतस्ततः ।
द्रौणिं राज्ञो नियोगेन सैनापत्येऽभ्यषेचयत् ४१
सोऽभिषिक्तो महाराज परिष्वज्य नृपोत्तमम् ।
प्रययौ सिंहनादेन दिशः सर्वा विनादयन् ॥ ४२
दुर्योधनोऽपि राजेन्द्र शोणितेन परिप्लुतः ।
तां निशां प्रतिपेदेऽथ सर्वभूतभयावहाम् ॥ ४३
अपक्रम्य तु ते तूर्णं तस्मादायोधनान्नृप ।
शोकसंविग्नमनसश्चिन्तामापेदिरे भृशम् ॥ ४४

॥ इति श्रीमन्महाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां शल्यपर्वणि गदायुद्धपर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥

॥ समाप्तं गदायुद्धपर्व शल्यपर्व च ॥ ९ ॥

अतः परं सौप्तिकं पर्व भविष्यति ।
तस्यायमाद्यः श्लोकः ।
सञ्जय उवाच ।
ततस्ते सहिताः सर्वे प्रयातो दक्षिणामुखाः ।
उपास्तमयवेलायां शिबिराभ्याशमागताः ॥ १

इदं शल्यपर्व कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८२९ सन १९०७.

SRIMANMAHABHARATAM

A NEW EDITION

MAINLY BASED ON

THE SOUTH INDIAN TEXTS,

With footnotes and Readings.


SAUPTIKAPARVA X.



EDITED BY

T. R. KRISHNACHARYA & T. R. VYASACHARYA,

Proprietors, Madhva Vilas Book Depot, Kumbakonam.



PRINTED AT THE

Javaji Dadaji's "Nirnaya-sagar" Press,

BOMBAY.

1907.

(*Registered according to the Act XXV of 1867.*)

[All rights reserved by the publisher.]

॥ श्रीः ॥

श्रीमन्महाभारतम् ।

सटिप्पणम् ।



सौप्तिकपर्व १०.

एतच्च

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च

अनेकेषां विदुषां साहाय्येन दाक्षिणात्यबहुकोशानुसारेण

संशोध्य

मुंबापुर्यां

जावजी दादाजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८२९ प्लवगनामसंवत्सरे ।

इदं पुस्तकं १८६७ सख्याकराजनियमस्य २५ सख्याकविभागानुसारतो लेखारूढ
कृत्वास्य सर्वेऽविकारा प्रसिद्धिकर्त्रा स्वाधीना रक्षिता ।


वटवृक्ष
शिबिर
अश्वत्थामा
कृपाचार्य
कृतवर्मा

श्रीः ।

श्रीमन्महाभारतम् ।



सौप्तिकपर्व १० ।

प्रथमोऽध्यायः ॥ १ ॥

सञ्जयधृतराष्ट्रयोः संलापः ॥ १ ॥ द्रौणिकृपकृतवर्मभिर्वनमध्यमेत्य न्यग्रोधस्याधस्तादुपवेशनम् ॥ २ ॥ तत्र रात्रौ घूकेन बहुकाकवधदर्शिना द्रौणिना तद्वत्स्वेनापि पाण्डववधनिर्धारणम् ॥ ३ ॥ ततः कृपकृतवर्माणौ समुद्बोध्य स्वकर्तव्यकथनप्रार्थना ॥ ४ ॥

श्रीवेदव्यासाय नमः ।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १

सञ्जय उवाच ।

ततस्ते सहिताः सर्वे प्रयाता दक्षिणामुखाः ।
उपास्तमयवेलायां शिबिराभ्याशमागताः ॥ १
विमुच्य वाहांस्त्वरिता भीताः समनुबोधनात् ।
गहनं देशमासाद्य प्रच्छन्ना न्यविशन्त ते ॥ २
सेनानिवेशमभितो नातिदूरमवस्थिताः ।
[निकृत्ता निशितैः शस्त्रैः समन्तात्क्षतविक्षताः ।]
दीर्घमुष्णं च निःश्वस्य पाण्डवानन्वचिन्तयन् ॥ ३
श्रुत्वा च निनदं घोरं पाण्डवानां जयैषिणाम् ।
अनुसारभयाद्भीताः प्राङ्मुखाः प्राद्रवन्पुनः ॥ ४
ते मुहूर्तात्ततो गत्वा श्रान्तवाहा पिपासिताः ।
नामृष्यन्त महेष्वासाः क्रोधामर्षवशंगताः ॥ ५
राज्ञो वधेन संतप्ता मुहूर्तं समवस्थिताः ॥ ६

धृतराष्ट्र उवाच ।

अश्रद्धेयमिदं कर्म कृतं भीमेन सञ्जय ।
यत्स नागायुतप्राणः पुत्रो मम निपातितः ॥ ७
अवध्यः सर्वभूतानां वज्रसंहननो युवा ।
पाण्डवैः समरे पुत्रो निहतो मम सञ्जय ॥ ८
न दिष्टमभ्यतिक्रान्तुं शक्यं गावल्गणे नरैः ।
यत्समेत्य रणे पार्थैः पुत्रो मम निपातितः ॥ ९
अद्रिसारमयं नूनं हृदयं मम सञ्जय ।
हतं पुत्रशतं श्रुत्वा यन्न दीर्णं सहस्रधा ॥ १०
कथं हि वृद्धमिथुनं हतपुत्रं भविष्यति ।
न ह्यहं पाण्डुपुत्रस्य विषये वस्तुमुत्सहे ॥ ११
कथं राज्ञः पिता भूत्वा स्वयं राजा च सञ्जय ।
प्रेष्यभूतः प्रवर्तेयं पाण्डवेयस्य शासनात् ॥ १२
प्रभुज्य पृथिवीं सर्वां स्थिता मूर्धनि सञ्जय ।
कथमद्य भविष्यामि प्रेष्यभूतो दुरन्तकृत् ॥ १३
कथं भीमस्य वाक्यानि श्रोतुं शक्ष्यामि सञ्जय ।
येन पुत्रशतं पूर्णमेकेन निहतं मम ॥ १४
कृतं सत्यं वचस्तस्य विदुरस्य महात्मनः ।
अकुर्वता वचस्तस्य मम पुत्रेण सञ्जय ॥ १५
अधर्मेण हते तात पुत्रे दुर्योधने मम ।
कृतवर्मा कृपो द्रौणिः किमकुर्वत सञ्जय ॥ १६

तत. दुर्योधनेन सैनापत्येऽश्वत्थाम्नोऽभिषेकानन्तर ते अश्वत्थामकृपाचार्यकृतवर्माण· ॥ १ ॥ शिबिरनिकटस्थ देश आसाद्य वाहान्विमुच्य न्यविशन्तेति योजना ॥ २ ॥ अनुसारः पृष्ठगमनम् । प्राद्रवन्निति पुनर्वाहान्योजयित्वेति गम्यते ॥ ४ ॥ राज्ञो दुर्योधनस्य ॥ ६ ॥

सञ्जय उवाच ।
गत्वा तु तावका राजन्नातिदूरं मनस्विनः ।
अपश्यन्त वनं घोरं नानाद्रुमलतावृतम् ॥ १७
ते मुहूर्तं तु विश्रम्य लब्धतोयैर्हयोत्तमैः ।
सूर्यास्तमयवेलायां कौरवेयस्य शासनात् ॥ १८
नानामृगगणैर्जुष्टं नानापक्षिभिराकुलम् ।
नानाद्रुमलताच्छन्नं नानाव्यालनिषेवितम् ॥ १९
नानातोयसमाकीर्णैस्तटाकैरुपशोभितम् ।
पद्मिनीशतसंछन्नं नीलोत्पलसमायुतम् ॥ २०
प्रविश्य तद्वनं घोरं वीक्षमाणाः समन्ततः ।
शाखासहस्रसंछन्नं न्यग्रोधं ददृशुस्ततः ॥ २१
उपेत्य तु तदा राजन्यग्रोधं ते महारथाः ।
ददृशुर्द्विपदां श्रेष्ठाः श्रेष्ठं तं वै वनस्पतिम् ॥ २२
तेऽवतीर्य रथेभ्यश्च विप्रमुच्य च वाजिनः ।
उपस्पृश्य यथान्यायं सन्ध्यामन्वासत प्रभो ॥ २३
ततोऽस्तं पर्वतश्रेष्ठमनुप्राप्ते दिवाकरे ।
सर्वस्य जगतो धात्री शर्वरी प्रत्यपद्यत ॥ २४
ग्रहनक्षत्रताराभिः प्रकीर्णाभिरलंकृतम् ।
नभोऽशुकमिवाभाति प्रेक्षणीयं समन्ततः ॥ २५
इच्छया ते प्रवल्गन्ति ये सत्वा रात्रिचारिणः ।
दिवाचराश्च ये सत्वास्ते निद्रावशमागताः ॥ २६
रात्रिंचराणां सत्वानां निनादोऽभूत्सुदारुणः ।
क्रव्यादाश्च प्रमुदिता घोरा प्राप्ता च शर्वरी ॥ २७
तस्मिन्रात्रिमुखे घोरे दुःखशोकसमन्विताः ।
कृतवर्मा कृपो द्रौणिरुपोपविविशुः समम् ॥ २८
उपोपविष्टाः शोचन्तो न्यग्रोधस्य समीपतः ।
तमेवार्थमतिक्रान्तं कुरुपाण्डवयोः क्षयम् ॥ २९
निद्रया च परीताङ्गा निषेदुर्धरणीतले ।
श्रमेण सुदृढं युक्ता विक्षता विविधैः शरैः ॥ ३०
ततो निद्रावशं प्राप्तौ कृपभोजौ महाबलौ ।
सुखोचितावदुःखार्हौ निषण्णौ धरणीतले ॥ ३१
तौ तु सुप्तौ महाराज तस्मिन्देशे महारथौ ।
[महार्हशयनोपेतौ भूमावेव ह्यनाथवत् ॥] ३२

क्रोधामर्षवशं प्राप्तो द्रोणपुत्रस्तु भारत ।
न वै स्म स जगामाथ निद्रां सर्प इव श्वसन् ॥ ३३
न लेभे स तु निद्रां वै दह्यमानोऽतिमन्युना ।
वीक्षांचक्रे महाबाहुस्तद्वनं घोरदर्शनम् ॥ ३४
वीक्षमाणो वनोद्देशं नानासत्वैर्निषेवितम् ।
अपश्यत महाबाहुर्न्यग्रोधं वायसावृतम् ॥ ३५
तत्र काकसहस्राणि तां निशां पर्यणामयन् ।
सुखं स्वपन्तः कौरव्य पृथक्पृथगुपाश्रयाः ॥ ३६
सुप्तेषु तेषु काकेषु विस्रब्धेषु समन्ततः ।
सोऽपश्यत्सहसा यान्तमुलूकं घोरदर्शनम् ॥ ३७
महास्वनं महाकायं हर्यक्षं बभ्रुपिङ्गलम् ।
सुतीक्ष्णघोणानखरं सुपर्णमिव वेगितम् ॥ ३८
सोऽथ शब्दं मृदुं कृत्वा लीयमान इवाण्डजः ।
न्यग्रोधस्य ततः शाखां पातयामास भारत ॥ ३९
संनिपत्य तु शाखायां न्यग्रोधस्य विहंगमः ।
सुप्ताञ्जघान विस्रब्धान्वायसान्वायसान्तकः ॥ ४०
केषांचिदच्छिनत्पक्षाञ्शिरांसि च चकर्त ह ।
चरणांश्चैव केषांचिद्बभञ्ज चरणायुधः ॥ ४१
क्षणेनाप्तत्स बलवान्येऽस्य दृष्टिपथे स्थिताः ॥ ४२
तेषां शरीरावयवैः शरीरैश्च विशांपते ।
न्यग्रोधमण्डलं सर्वं संछन्नं पर्वतोपमम् ॥ ४३
तांस्तु हत्वा ततः काकान्कौशिको मुदितोऽभवत् ।
प्रतिकृत्य यथाकामं शत्रूणां शत्रुसूदनः ॥ ४४
तदृष्ट्वा तादृशं कर्म कौशिकेन कृतं निशि ।
तद्भावे कृतसंकल्पो द्रौणिरेकोऽन्वचिन्तयत् ॥ ४५
उपदेशः कृतोऽनेन पक्षिणा मम संयुगे ।
शत्रूणां क्षपणं युक्तं प्राप्तः कालश्च मे मतः ॥ ४६
नाद्य शक्यं मया हन्तुं पाण्डवा जितकाशिनः ।
बलवन्तः कृतोत्साहा लब्धलक्षाः प्रहारिणः ॥ ४७
राज्ञः सकाशे तेषां च प्रतिज्ञातो वधो मया ।
पतङ्गाग्निसमां वृत्तिमास्थायात्मविनाशिनीम् ॥ ४८
न्यायतो युध्यमानस्य प्राणत्यागो न संशयः ।
छद्मना तु भवेत्सिद्धिः शत्रूणां च क्षयो महान् ॥ ४९

नानापुष्पोपशोभितमिति झ. पाठ ॥ २० ॥ अन्वासत उपासितवन्तः ॥ २३ ॥ अशुक वस्त्रम् ॥ २५ ॥ शयनोपेतौ प्रागिति शेष. ॥ ३२ ॥ पर्यणामयन् परिणीतवन्त आसन् ॥ ३६ ॥ हर्यक्ष हरिन्मणिनिभलोचनम् । घोणा नासा ॥ ३८ ॥ प्रथमोऽध्याय. ॥ १ ॥

तत्र संशयितादर्थाद्योऽर्थो निःसंशयो भवेत् ।
तं जना बहुमन्यन्ते येऽर्थशास्त्रविशारदाः ॥ ५०
यच्चाप्यत्र भवेत्कार्यं गर्हितं लोकनिन्दितम् ।
कर्तव्यं तन्मनुष्येण क्षत्रधर्मेण वर्तता ॥ ५१
निन्दितानि च कर्माणि कुत्सितानि पदेपदे ।
सोपधानि कृतान्येव पाण्डवैरकृतात्मभिः ॥ ५२
अस्मिन्नर्थे पुरा गीताः श्रूयन्ते धर्मवित्तमैः ।
श्लोका न्यायमवेक्षद्भिस्तत्त्वार्थास्तत्त्वदर्शिभिः ५३
परिश्रान्ते विदीर्णे वा भुञ्जाने वाऽपि शत्रुभिः ।
प्रस्थाने वा प्रवेशे वा प्रहर्तव्यं रिपोर्बलम् ॥ ५४
निद्रार्तमर्धरात्रे च तथा नष्टप्रणायकम् ।
भिन्नयोधं बलं यच्च द्विधा युक्तं च यद्भवेत् ॥ ५५
इत्येवं निश्चयं चक्रे सुप्तानां निशि मारणे ।
पाण्डूनां सह पाञ्चालैर्द्रौणपुत्रः प्रतापवान् ॥ ५६
स क्रूरां मतिमास्थाय विनिश्चित्य मुहुर्मुहुः ।
सुप्तौ प्राबोधयत्तौ तु मातुलं भोजमेव च ॥ ५७
तौ प्रबुद्धौ महात्मानौ कृपभोजौ महाबलौ ।
नोत्तरं प्रतिपद्येतां तत्र युक्तं ह्रिया वृतौ ॥ ५८
स मुहूर्तमिव ध्यात्वा तावुभौ वाक्यमब्रवीत् ॥ ५९
हतो दुर्योधनो राजा एकवीरो महाबलः ।
यस्यार्थे वैरमस्माभिरासक्तं पाण्डवैः सह ॥ ६०
एकाकी बहुभिः क्षुद्रैराहवे शुद्धविक्रमः ।
पातितो भीमसेनेन एकादशचमूपतिः ॥ ६१
वृकोदरेण क्षुद्रेण सुनृशंसमिदं कृतम् ।
मूर्धाभिषिक्तस्य शिरः पादेन परिमृद्नता ॥ ६२
विनर्दन्ति च पाञ्चालाः क्ष्वेलन्ति च हसन्ति च ।
धमन्ति शङ्खाञ्शतशो हृष्टा घ्नन्ति च दुन्दुभीन् ६३
वादित्रघोषस्तुमुलो विमिश्रः शङ्खनिःस्वनैः ।
अनिलेनेरितो घोरो दिशः पूरयतीव ह ॥ ६४
अश्वानां हेषमाणानां गजानां चैव बृंहताम् ।
सिंहनादश्च शूराणां श्रूयते सुमहानयम् ॥ ६५
दिशं प्राचीं समाश्रित्य हृष्टानां गच्छतां भृशम् ।
रथनेमिस्वनाश्चैव श्रूयन्ते रोमहर्षणाः ॥ ६६
पाण्डवैर्धार्तराष्ट्राणां यदिदं कदनं कृतम् ।
वयमेव त्रयः शिष्टा अस्मिन्महति वैशसे ॥ ६७
केचिन्नागशतप्राणाः केचित्सर्वास्त्रकोविदाः ।
निहताः पाण्डवैर्यस्मिन्मन्ये कालस्य पर्ययम् ॥ ६८
एवमेतेन भाव्यं हि नूनं कार्येण तत्त्वतः ।
यथा ह्यस्येदृशी निष्ठा कृते यत्नेऽपि दुष्करे ॥ ६९
भवतोस्तु यदि प्रज्ञा न मोहादपचीयते ।
व्यसनेऽस्मिन्महत्यर्थे यन्नः श्रेयस्तदुच्यताम् ॥ ७०

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ॥ २ ॥

कृपेण द्रौणिंप्रति कर्तव्योपदेशः ॥ १ ॥

कृप उवाच ।
श्रुतं ते वचनं सर्वं हेतुयुक्तं मया विभो ।
ममापि तु वचः किंचिच्छृणुष्वाद्य महाभुज ॥ १
आबद्धा मानुषाः सर्वे निबद्धाः कर्मणोर्द्वयोः ।
दैवे पुरुषकारे च परं ताभ्यां न विद्यते ॥ २
न हि दैवेन सिध्यन्ति कार्याण्येकेन सत्तम ।
न चापि कर्मणैकेन द्वाभ्यां सिद्धिस्तु योगतः ॥ ३
ताभ्यामुभाभ्यां सर्वार्था निबद्धा अधमोत्तमाः ।
प्रवृत्ताश्चैव दृश्यन्ते निवृत्ताश्चैव सर्वशः ॥ ४
पर्जन्यः पर्वते वर्षन्किनु साधयते फलम् ।
कृष्टे क्षेत्रे तथा वर्षन्किं न साधयते फलम् ॥ ५
उत्थानं चापि दैवस्य ह्यनुत्थानं च दैवतम् ।
व्यर्थं भवति सर्वत्र पूर्वस्तत्र विनिश्चयः ॥ ६
सुवृष्टे च यथा देवे सम्यक्ष क्षेत्रे च कर्षिते ।

दैवे आसमन्तात् बद्धाः पुरुषकारे निहीनतया बद्धाः । तेन दैव प्रधान पुरुषकार उपसर्जनमित्युक्त भवति । आरम्भा मानुषाः सर्वे इति क. पाठ ॥२॥ उत्थानमिति । दैवस्य प्रधानस्योत्थान पुरुषकारो व्यर्थ भवति तथाऽनुत्थानमुत्थानहीन

बीजं महागुणं भूयात्तथा सिद्धिर्हि मानुषी ॥ ७
तयोर्दैवं तु दुश्चिन्त्यं स्ववशेनैव वर्तते ।
प्राज्ञाः पुरुषकारे तु वर्तन्ते दैवमास्थिताः ॥ ८
ताभ्यां सर्वे हि कार्यार्था मनुष्याणां नरर्षभ ।
विचेष्टन्तः स्म दृश्यन्ते निवृत्तास्तु तथैव च ॥ ९
कृतः पुरुषकारश्च सोऽपि दैवेन सिध्यति ।
तथास्य कर्मणः कर्तुरभिनिर्वर्तते फलम् ॥ १०
उत्थानं च मनुष्याणां दक्षाणां दैववर्जितम् ।
अफलं दृश्यते लोके सम्यगप्युपपादितम् ॥ ११
तत्रालसा मनुष्याणां ये भवन्त्यमनस्विनः ।
उत्थानं ते विगर्हन्ति प्राज्ञानां तन्न रोचते ॥ १२
प्रायशो हि कृतं कर्म नाफलं दृश्यते भुवि ।
अकृत्वा च पुनर्दुःखं कर्म पश्येन्महाफलम् ॥ १३
चेष्टामकुर्वल्लभते यदि किंचिद्यदृच्छया ।
यो वा न लभते कृत्वा दुर्दर्शौ तावुभावपि ॥ १४
शक्नोति जीवितुं दक्षो नालसः सुखमेधते ।
दृश्यन्ते जीवलोकेऽस्मिन्दक्षाः प्रायो हितैषिणः १५
यदि दक्षः समारम्भात्कर्मणो नाश्नुते फलम् ।
नास्य वाच्यं भवेत्किंचिल्लब्धव्यं वाऽधिगच्छति १६
नाकृत्वा कर्म लोके हि फलं विन्दति कर्हिचित् ।
स तु वक्तव्यतां याति द्वेष्यो भवति भूयशः ॥ १७
एवमेतदनादृत्य वर्तते यस्त्वतोऽन्यथा ।
स करोत्यात्मनोऽनर्थानेष बुद्धिमतां नयः ॥ १८
हीनं पुरुषकारेण यदि दैवेन वा पुनः ।
कारणाभ्यामथैताभ्यामुत्थानमफलं भवेत् ॥ १९
हीनं पुरुषकारेण कर्म त्विह न सिध्यति ॥ २०
दैवतेभ्यो नमस्कृत्य यस्त्वर्थान्सम्यगीहते ।
दक्षो दाक्षिण्यसंपन्नो न स मोघैर्विहन्यते ॥ २१
सम्यगीहा पुनरियं यो वृद्धानुपसेवते ।
आपृच्छति च यच्छ्रेयः करोति च हितं वचः ॥ २२
उत्थायोत्थाय हि सदा प्रष्टव्या वृद्धसंमताः ।
ते स्म योगे परं मूलं तन्मूला सिद्धिरुच्यते ॥ २३
वृद्धानां वचनं श्रुत्वा योऽभ्युत्थानं प्रयोजयेत् ।
उत्थानस्य फलं सम्यक्तदा स लभतेऽचिरात् ॥ २४
रागात्क्रोधाद्भयाल्लोभाद्योऽर्थानीहेत मानवः ।
अनीशश्चावमानी च स शीघ्रं भ्रश्यते श्रियः ॥ २५
सोयं दुर्योधनेनार्थो लुब्धेनादीर्घदर्शिना ।
असमर्थः समारब्धो मूढत्वादविचिन्तितः ॥ २६
हितबुद्धीननादृत्य संमन्त्र्यासाधुभिः सह ।
वार्यमाणोऽकरोद्वैरं पाण्डवैर्गुणवत्तरैः ॥ २७
पूर्वमप्यतिदुःशीलो न धैर्यं कर्तुमर्हति ।
तपत्यर्थे विपन्ने हि मित्राणां न कृतं वचः ॥ २८
अनुवर्तामहे यत्तु तं वयं पापपूरुषम् ।
अस्मानप्यनयस्तस्मात्प्राप्तोऽयं दारुणो महान् ॥ २९
अनेन तु ममाद्यापि व्यसनेनोपतापिता ।
बुद्धिश्चिन्तयते किंचित्स्वं श्रेयो नावबुध्यते ॥ ३०
मुह्यता तु मनुष्येण प्रष्टव्याः सुहृदो जनाः ।
तत्रास्य बुद्धिर्विनयस्तत्र श्रेयश्च पश्यति ॥ ३१
ततोऽस्य मूलं कार्याणां बुद्ध्या निश्चित्य वै बुधाः ।
तेऽत्र पृष्टा यथा ब्रूयुस्तत्कर्तव्यं तथा भवेत् ॥ ३२
ते वयं धृतराष्ट्रं च गान्धारीं च यशस्विनीम् ।
उपपृच्छामहे गत्वा विदुरं च महामतिम् ॥ ३३
ते पृष्टास्तु वदेयुर्यच्छ्रेयो नः समनन्तरम् ।
तदस्माभिः पुनः कार्यमिति मे नैष्ठिकी मतिः ॥ ३४
अनारम्भात्तु कार्याणां नार्थः संपद्यते क्वचित् ॥ ३५

दैवमपि व्यर्थमिति पक्षद्वय सर्वत्र व्यवस्यति तत्र पूर्वएव पक्ष श्रेयानित्यर्थ. ॥ ६ ॥ विचेष्टन्त प्रवृत्ता दृश्यन्ते लोकदृष्ट्येत्यर्थ ॥ ९ ॥ कर्माकृत्वा दु ख पश्येदित्यपि प्रायशोऽस्ति ॥ १३ ॥ दुर्दर्शौ दुर्लभौ ॥ १४ ॥ स्पर्श चास्याधिगच्छतीति छ पाठ । तत्र अस्य कर्मणः स्पर्श लोकस्य संबन्ध चाधिगच्छति लोकप्रिय. स्यादित्यर्थ. ॥ १६ ॥ अकृत्वा कर्म यो लोके फल विन्दति धिष्ठित इति झ. पाठ । तत्र अदक्षस्तु परप्रयत्नार्जितेन जीवन्नपि भोक्तुमेवाय समर्थो नार्जयितुमिति निन्द्यत इति भाव । ॥ १७ ॥ एतत् दैवदाक्ष्ययोः साहित्यम् । अन्यथा तयोरन्यतरालम्बनेन ॥ १८ ॥ योगे अलब्धलाभे ॥ २३ ॥ अनीशः अजितचित्त । अवमानी परमवजानन् ॥ २५ ॥ द्वितीयोऽध्यायः ॥ २ ॥

कृते पुरुषकारे तु येषां कार्यं न सिध्यति । दैवेनोपहतास्ते तु नात्र कार्या विचारणा ॥ ३६

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ॥ ३ ॥

द्रौणिना कृपवचनमनादृत्य कृपकृतवर्मणोः पुरतः निशि प्रसुप्तपाण्डुपाञ्चालहननप्रतिज्ञानम् ॥ १ ॥

सञ्जय उवाच ।
कृपस्य वचनं श्रुत्वा धर्मार्थसहितं शुभम् ।
अश्वत्थामा महाराज दुःखशोकसमन्वितः ॥ १
दह्यमानस्तु शोकेन प्रदीप्तेनाग्निना यथा ।
क्रूरं मनस्ततः कृत्वा तावुभौ प्रत्यभाषत ॥ २
पुरुषेपुरुषे बुद्धिर्याया भवति शोभना ।
तुष्यन्ति च पृथक्सर्वे प्रज्ञया ते स्वयास्वया ॥ ३
सर्वो हि मन्यते लोक आत्मानं बुद्धिमत्तरम् ।
सर्वस्यात्मा बहुमतः सर्वोत्मानं प्रशंसति ॥ ४
सर्वस्य हि स्वका प्रज्ञा साधुवादे प्रतिष्ठिता ।
परबुद्धिं च निन्दन्ति स्वां प्रशंसन्ति चासकृत्॥५
कारणान्तरयोगेन येषां संवदते मतिः ।
तेऽन्योन्येन च तुष्यन्ति बहुमन्यन्ति चासकृत् ६
तस्यैव तु मनुष्यस्य सासा बुद्धिस्तदातदा ।
कालयोगे विपर्यासं प्राप्यान्योन्यं विपद्यते ॥ ७
अनित्यत्वात्तु चित्तानां मनुष्याणां विशेषतः ।
चित्तवैक्लव्यमासाद्य सासा बुद्धिः प्रजायते ॥ ८
यथा हि वैद्यः कुशलो ज्ञात्वा व्याधिं यथाविधि ।
भैषज्यं कुरुते योगात्प्रशमार्थमिति प्रभो ॥ ९
एवं कार्यस्य योगार्थं बुद्धिं कुर्वन्ति मानवाः ।
प्रज्ञया च स्वया युक्त्या तां च गृह्णन्ति वै बुधाः१०
अन्यया यौवने बाल्ये बुद्ध्या भवति मोहितः ।
मध्येऽन्यया जरायां तु सोन्यां रोचयते मतिम् ११
व्यसनं वा महाघोरं समृद्धिं चापि तादृशीम् ।
अवाप्य पुरुषो भोज कुरुते बुद्धिवैकृतम् ॥ १२
एकस्मिन्नेव पुरुषे सासा बुद्धिस्तदातदा ।
भवत्यनित्या प्रज्ञा हि सा तस्यैव न रोचते ॥ १३
निश्चित्य तु यथाप्रज्ञं यां मतिं साधु पश्यति ।
तया प्रकुरुते भावं सा तस्योद्योगकारिका ॥ १४
सर्वो हि पुरुषो भोज साध्वेतदिति निश्चितः ।
कर्तुमारभते प्रीतिं मरणादिषु कर्मसु ॥ १५
सर्वे हि युक्तां विज्ञाय प्रज्ञां वापि स्वकां नराः ।
चेष्टन्ते विविधां चेष्टां हितमित्येव जानते ॥ १६
उपजाता व्यसनजा येयमद्य मतिर्मम ।
युवयोस्तां प्रवक्ष्यामि सर्वेषां शोकनाशिनीम् १७
प्रजापतिः प्रजाः सृष्ट्वा कर्म तासु विधाय च ।
वर्णेवर्णे समाधत्त ह्येकैकं गुणवत्तरम् ॥ १८
ब्राह्मणे वेदमभ्यं तु क्षत्रिये तेज उत्तमम् ।
दाक्ष्यं वैश्ये च शूद्रे च सर्ववर्णानुकूलताम् ॥ १९
अदान्तो ब्राह्मणोऽसाधुर्निस्तेजाः क्षत्रियो मृतः ।
अदक्षो निन्द्यते वैश्यः शूद्रश्च प्रतिकूलवान् ॥ २०
सोऽस्मि जातः कुले श्रेष्ठे ब्राह्मणैरभिपूजिते ।
मन्दभाग्यतयाऽस्म्येतं क्षत्रधर्ममनुष्ठितः ॥ २१
क्षत्रधर्मं विदित्वाऽहं यदि ब्राह्मण्यमाश्रितः ।
प्रकरिष्ये महत्कर्म न मे तत्साधुसंमतम् ॥ २२
धारयित्वा धनुर्दिव्यं दिव्यान्यस्त्राणि चाहवे ।
पितरं निहतं दृष्ट्वा किंनु वक्ष्यामि संसदि ॥ २३
सोऽहमद्य यथाकामं क्षत्रधर्ममवाप्य च ।

सर्वोत्मानमित्यत्र सर्व आत्मानमिति च्छेद । सधिरार्ष ॥ ४ ॥ योगे येषा समा गतिरिति झ. पाठः । तत्र योगे समुदाये इत्यर्थ ॥ ६ ॥ तां च निन्दन्ति मानवा इति झ. पाठ· ॥ १० ॥ हे भोज हे कृतवर्मन् । एकमेव सबोधयन् कृपस्य वचसि अनादरं सूचयति ॥ १२ ॥ भवत्यकृतबुद्धित्वादिति झ. पाठ । तत्र अकृतधर्मत्वात् अवसरानुरोधात् । इदानी मम शान्तिबुद्धिर्न रोचते इत्यर्थ· ॥ १३ ॥ क्षत्रियोऽधम इति झ. पाठ ॥ २० ॥ विदित्वा आश्रित्य ॥ २२ ॥

गन्ताऽस्मि पदवीं राज्ञः पितुश्चापि महात्मनः २४
अद्य स्वप्स्यन्ति पाञ्चाला विश्वस्ता जितकाशिनः ।
विमुक्तयुग्यकवचा हर्षेण च समन्विताः ।
वयं जिता मताश्चैषां श्रान्ता व्यायामकर्शिताः २५
तेषां निशि प्रसुप्तानां सुस्थानां शिबिरे स्वके ।
अवस्कन्दं करिष्यामि शिबिरस्याद्य दुष्करम् ॥ २६
तानवस्कन्द्य शिबिरे प्रेतभूतानचेतसः ।
सूदयिष्यामि विक्रम्य मघवानिव दानवान् ॥ २७
अद्य तान्सहितान्सर्वान्धृष्टद्युम्नपुरोगमान् ।
सूदयिष्यामि विक्रम्य कक्षं दीप्त इवानलः ॥ २८
निहत्य चैव पाञ्चालाञ्शान्तिं लब्धाऽस्मि सत्तम ॥
पाञ्चालेषु चरिष्यामि सूदयन्नद्य संयुगे ।
पिनाकपाणिः संक्रुद्धः स्वयं रुद्रः पशुष्विव ॥ ३०

अद्याहं सर्वपाञ्चालान्निकृत्या च निकृष्य च ।
अर्दयिष्यामि संहृष्टो रणे पाण्डुसुतांस्तथा ।
'सूदयिष्यामि संक्रुद्धः पशूनिव पिनाकधृत् ॥' ३१
अद्याहं सर्वपाञ्चालैः कृत्वा भूमिं शरीरिणीम् ।
प्रहृत्यैकेन शस्त्रेण भविष्याम्यनृणः पितुः ॥ ३२
दुर्योधनस्य कर्णस्य भीष्मसैन्धवयोरपि ।
गमिष्यामि निशावेलां पदवीमद्य दुर्गमाम् ॥ ३३
अद्य पाञ्चालराजस्य धृष्टद्युम्नस्य वै निशि ।
विरात्रे प्रमथिष्यामि पशोरिव शिरो बलात् ॥३४
अद्य पाञ्चालपाण्डूनां शयितानां शिरो निशि ।
खड्गेन निशितेनाजौ प्रमथिष्यामि गौतम ॥ ३५
अद्य पाञ्चालसेनां तां निहत्य निशि सौप्तिके ।
कृतकृत्यः सुखी चैव भविष्यामि महामते ॥ ३६

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ॥ ४ ॥

द्रौणिकृपयोः संवादः ॥ १ ॥

कृप उवाच ।
दिष्ट्या ते प्रतिकर्तव्ये मतिर्जातेयमच्युत ।
न त्वां वारयितुं शक्तो वज्रपाणिरपि स्वयम् ॥ १
अनुयास्यावहे त्वां तु प्रभाते सहितावुभौ ।
अद्य रात्रौ विश्रमस्व विमुक्तकवचध्वजः ॥ २
अहं त्वामनुयास्यामि कृतवर्मा च सात्वतः ।
परानभिमुखं यान्तं रथावास्थाय दंशितौ ॥ ३
आवाभ्यां सहितः शत्रून्धो निहन्ता समागमे ।
विक्रम्य रथिनां श्रेष्ठ पाञ्चालान्सपदानुगान् ॥ ४
शक्तस्त्वमसि विक्रम्य विश्रमस्व निशामिमाम् ।
चिरं ते जाग्रतस्तात स्वप तावन्निशामिमाम् ॥ ५
विश्रान्तश्च विनिद्रश्च स्वस्थचित्तश्च मानद ।
समेत्य समरे शत्रून्वधिष्यसि न संशयः ॥ ६
न हि त्वां रथिनां श्रेष्ठं प्रगृहीतवरायुधम् ।
जेतुमुत्सहते कश्चिदपि देवेषु पावकिः ॥ ७

कृपेण सहितं यान्तं गुप्तं च कृतवर्मणा ।
को द्रौणिं युधि संरब्धं योधयेदपि देवराट् ॥ ८
ते वयं निशि विश्रान्ता विनिद्रा विगतज्वराः ।
प्रभातायां रजन्यां वै निहनिष्याम शात्रवान् ॥ ९
तव ह्यस्त्राणि दिव्यानि मम चैव न संशयः ।
सात्वतोपि महेष्वासो नित्यं युद्धेषु कोविदः ॥ १०
ते वयं सहितास्तात सर्वाञ्शत्रून्समागतान् ।
प्रसह्य समरे हत्वा प्रीतिं प्राप्स्याम पुष्कलाम् ॥ ११
विश्रमस्व त्वमव्यग्रः स्वप चेमां निशां सुखम् ।
अहं च कृतवर्मा च प्रभाते त्वां नरोत्तमम् ॥ १२
अनुयास्याव सहितौ धन्विनौ परतापनौ ।
रथिनं त्वरया यान्तं रथमास्थाय दंशितौ ॥ १३
स गत्वा शिबिरं तेषां नाम विश्राव्य चाहवे ।
ततः कर्ताऽसि शत्रूणां युध्यतां कदनं महत् ॥ १४
कृत्वा च कदनं तेषां प्रभाते विमलेऽहनि ।

गन्तास्मि गमिष्यामि । पदवीं आनृण्यम् ॥ २४ ॥ गमयिष्यामि पाञ्चालान्पदवीमद्य दुर्गमामिति झ. पाठः ॥ ३३ ॥

तृतीयोऽध्याय. ॥ ३ ॥

निहन्ता निहनिष्यसि ॥ ४ ॥

विहरस्व यथा शक्रः सूदयित्वा महासुरान् ॥ १५
त्वं हि शक्तो रणे जेतुं पाञ्चालानां वरूथिनीम् ।
दैत्यसेनामिव क्रुद्धः सर्वदानवसूदनः ॥ १६
मया त्वां सहितं सङ्ख्ये गुप्तं च कृतवर्मणा ।
न सहेत विभुः साक्षाद्वज्रपाणिरपि स्वयम् ॥ १७
न चाहं समरे तात कृतवर्मा न चैव हि ।
अनिर्जित्य रणे पाण्डूनपयास्यामि कर्हिचित् ॥१८
हत्वा च समरे क्षुद्रान्पाञ्चालान्पाण्डुभिः सह ।
निवर्तिष्यामहे सर्वे हता वा स्वर्गगा वयम् ॥ १९
सर्वोपायैः सहायास्ते प्रभाते वयमाहवे ।
सत्यमेतन्महाबाहो ब्रवीमि तवानघ ॥ २०
एवमुक्तस्ततो द्रौणिर्मातुलेन हितं वचः ।
अब्रवीन्मातुलं राजन्क्रोधादुद्वृत्य लोचने ॥ २१
आतुरस्य कुतो निद्रा नरस्यामर्षितस्य च ।
अर्थांश्चिन्तयतश्चापि कामयानस्य वा पुनः ॥ २२
तदिदं समनुप्राप्तं पश्य मेऽद्य चतुष्टयम् ।
यस्य भागश्चतुर्थो मे स्वप्नमह्राय नाशयेत् ॥ २३
किं नाम दुःखं लोकेऽस्मिन्पितुर्वधमनुस्मरन् ।
हृदयं निर्दहन्मेऽद्य रात्र्यहानि न शाम्यति ॥ २४
यथा च निहतः पापैः पिता मम विशेषतः ।
प्रत्यक्षमपि ते सर्वं तन्मे मर्माणि कृन्तति ॥ २५
कथं हि मादृशो लोके मुहूर्तमपि जीवति ।
द्रोणहन्तेति यद्वाचः पाञ्चालानां शृणोम्यहम् २६
धृष्टद्युम्नमहत्वा तु नाहं जीवितुमुत्सहे ।
स मे पितुर्वधाद्भ्यः पाञ्चाला ये च संगताः २७
विलापो भग्नसक्थस्य यस्तु राज्ञो मया श्रुतः ।
स पुनर्हृदयं कस्य क्रूरस्यापि न निर्दहेत् ॥ २८
कस्य ह्यकरुणस्यापि नेत्राभ्यामश्रु नाव्रजेत् ।
नृपतेर्भग्नसक्थस्य श्रुत्वा तादृग्वचः पुनः ॥ २९
यश्चायं मित्रपक्षो मे मयि जीवति निर्जितः ।
शोकं मे वर्धयत्येष वारिवेग इवार्णवम् ॥ ३०
एकाग्रमनसो मेऽद्य कुतो निद्रा कुतः सुखम् ॥३१
वासुदेवार्जुनाभ्यां च तानहं परिरक्षितान् ।
अविषह्यतमान्मन्ये महेन्द्रेणापि सत्तम ॥ ३२
न चापि शक्तः संयन्तुमस्मात्कार्यात्कथंचन ।
तं न पश्यामि लोकेऽस्मिन्यो मां कोपान्निवर्तयेत् ॥
इति मे निश्चिता बुद्धिरेषा साधुमता मम ॥ ३४
वादिकैः कथ्यमानस्तु मित्राणां मे पराभवः ।
पाण्डवानां च विजयो हृदयं दहतीव मे ॥ ३५
अहं तु कदनं कृत्वा शत्रूणामद्य सौप्तिके ।
ततो विश्रमिता चैव स्वप्ता च विगतज्वरः ॥ ३६

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ॥ ५ ॥

कृपेण प्रसुप्तमारणस्याधार्मिकत्वकथनेन प्रतिषेधनेऽपि पितृवधामर्षिणा द्रौणिना जिघांसया रिपुशिबिरद्वारगमनम् ॥ १ ॥ कृपकृतवर्मभ्यामपि सौहार्दात्तदनुगमनम् ॥ २ ॥

कृप उवाच ।
शुश्रूषुरपि दुर्मेधाः पुरुषोऽनियतेन्द्रियः ।
नालं वेदयितुं कृत्स्नौ धर्मार्थाविति मे मतिः ॥१
तथैव तावन्मेधावी विनयं यो न शिक्षते ।
न च किंचन जानाति सोऽपि धर्मार्थनिश्चयम् ॥२
[चिरं ह्यपि जडः शूरः पण्डितं पर्युपास्य ह ।
न स धर्मान्विजानाति दर्वी सूपरसानिव ॥ ३
मुहूर्तमपि तं प्राज्ञः पण्डितं पर्युपास्य हि ।
क्षिप्रं धर्मान्विजानाति जिह्वा सूपरसानिव ॥ ४
शुश्रूषुस्त्वेव मेधावी पुरुषो नियतेन्द्रियः ।

चतुर्थ आतुरादीना चतुर्णा मध्ये एको भाग. अमर्ष । मे मम स्वप्न अह्राय झटिति नाशयेत् । तस्मात् स्वपेत्युक्त तन्न युज्यते ॥२३॥ अनुस्मरन् अनुस्मरतः । न शाम्यति अमर्ष इत्यर्थः ॥ २४ ॥ स्वप्ता स्वप्स्यामि ॥ ३६ ॥ चतुर्थोऽध्याय· ॥ ४ ॥

अशुश्रूषु सुदुर्मेधा इति ड पाठः । दुर्मेधाः मूढः । अनियतेतिच्छेद. ॥ १ ॥

जानीयादागमान्सर्वान्ग्राह्यं च न विरोधयेत् ॥ ५
अनयस्त्ववमानी यो दुरात्मा पापपूरुषः ।
दिष्टमुत्सृज्य कल्याणं करोति बहुपातकम् ॥ ६
नाथवन्तं तु सुहृदः प्रतिषेधन्ति पातकात् ।
निवर्तते तु लक्ष्मीवान्नालक्ष्मीवान्निवर्तते ॥ ७
यथा ह्युच्चावचैर्वाक्यैः क्षिप्तचित्तो नियम्यते ।
तथैव सुहृदा शक्यो नशक्यस्त्ववसीदति ॥ ८
तथैव सुहृदोऽप्राज्ञान्कुर्वाणान्कर्म पापकम् ।
प्राज्ञाः संप्रतिषेधन्ति यथाशक्ति पुनःपुनः ॥ ९
स कल्याणे मनः कृत्वा नियम्यात्मानमात्मना ।
कुरु मे वचनं तात येन पश्चान्न तप्स्यसे ॥ १०
न वधः पूज्यते लोके सुप्तानामिह धर्मतः ।
तथैव न्यस्तशस्त्राणां विमुक्तरथवाजिनाम् ॥ ११
ये च ब्रूयुस्तवास्मीति ये च स्युः शरणागताः ।
विमुक्तमूर्धजा ये च ये चापि हतवाहनाः ॥ १२
अद्य स्वप्स्यन्ति पाञ्चाला विमुक्तकवचा विभो ।
विश्वस्ता रजनीं सर्वे प्रेता इव विचेतसः ॥ १३
यस्तेषां तदवस्थानां द्रुह्येत पुरुषोऽनृजुः ।
व्यक्तं स नरके मज्जेदगाधे विपुलेऽप्लवे ॥ १४
सर्वास्त्रविदुषां लोके श्रेष्ठस्त्वमसि विश्रुतः ।
न च ते जातु लोकेऽस्मिन्सुसूक्ष्ममपि किल्बिषम् १५
त्वं पुनः सूर्यसंकाशः श्वोभूत उदिते रवौ ।
प्रकाशे सर्वभूतानां विजेता युधि शात्रवान् ॥ १६
असंभावितरूपं हि त्वयि कर्म विगर्हितम् ।
शुक्ले रक्तमिव न्यस्तं भवेदिति मतिर्मम ॥ १७

अश्वत्थामोवाच ।

एवमेव यथाऽऽत्थ त्वमनुशाससि मातुल ।
तैस्तु पूर्वमयं सेतुः समन्ताद्विहलीकृतः ॥ १८
प्रत्यक्षं भूमिपालानां भवतां चापि सन्निधौ ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ १९
कर्णश्च पतिते चक्रे उत्थास्यन्रथिनां वरः ।
उत्तमे व्यसने मग्नो हतो गाण्डीवधन्वना ॥ २०
तथा शान्तनवो भीष्मो न्यस्तशस्त्रो निरायुधः ।
शिखण्डिनं पुरस्कृत्य हतो गाण्डीवधन्वना ॥ २१
भूरिश्रवा महेष्वासस्तथा प्रायगतो रणे ।
क्रोशतां भूमिपालानां युयुधानेन पातितः ॥ २२
दुर्योधनश्च भीमेन समेत्य गदया मृधे ।
पश्यतां भूमिपालानामधर्मेण निपातितः ॥ २३
एकाकी बहुभिस्तत्र परिवार्य महारथैः ।
अधर्मेण नरव्याघ्रो भीमसेनेन पातितः ॥ २४
विलापो भग्नसक्थस्य यो मे राज्ञः परिश्रुतः ।
वादिकानां कथयतां स मे मर्माणि कृन्तति ॥ २५
एवं चाधार्मिकाः पापाः पाञ्चाला भिन्नसेतवः ।
तानेवं भिन्नमर्यादान्किं भवान्न विगर्हति ॥ २६
पितृहन्तॄनहं हत्वा पाञ्चालान्निशि सौप्तिके ।
कामं कीटः पतङ्गो वा जन्म प्राप्य भवामि वै ॥ २७
त्वरे चाहमनेनाद्य यदिदं मे चिकीर्षितम् ।
तस्य मे त्वरमाणस्य कुतो निद्रा कुतः सुखम् २८
न स जातः पुमाँल्लोके कश्चिन्न स भविष्यति ।
यो मे व्यावर्तयेदेतां वधे तेषां कृतां मतिम् ॥ २९

सञ्जय उवाच ।

एवमुक्त्वा महाराज द्रोणपुत्रः प्रतापवान् ।
एकान्ते योजयित्वाऽश्वान्प्रायादभिमुखः परान् ३०
तमब्रूतां महात्मानौ भोजशारद्वतावुभौ ।
किमयं स्यन्दनो युक्तः किं च कार्यं चिकीर्षितम् ३१
एकसार्थप्रयातौ स्वस्त्वया सह नरर्षभ ।
समदुःखसुखौ चापि तस्माच्छंसितुमर्हसि ॥ ३२
अश्वत्थामा तु संक्रुद्धः पितुर्वधमनुस्मरन् ।
ताभ्यां तथ्यं तथाऽऽचख्यौ यदस्यात्मचिकीर्षितम् ।
हत्वा शतसहस्राणि योधानां निशितैः शरैः ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ ३४
तं तथैव वधिष्यामि न्यस्तवर्माणमद्य वै ।
पुत्रं पाञ्चालराजस्य पापं पापेन कर्मणा ॥ ३५
तथा विनिहतः पापः पाञ्चाल्यः पशुवन्मया ।

अनेय इति झ पाठ । तत्र अनेय सन्मार्गं नेतुमशक्य । दिष्टमुपदिष्टम् ॥ ६ ॥ उच्चावचैः सगैंरिति क. छ. पाठः ॥ ८ ॥ अप्लवे इति च्छेदः ॥ १४ ॥ अधर्मेण नाभेरधस्तात्प्रहारेण ॥ २३ ॥ नावां शङ्कितुमर्हसीति झ. पाठः ॥ ३२ ॥

शस्त्रेण विजिताँल्लोकान्नाप्नुयादिति मे मतिः ३६
क्षिप्रं सन्नद्धकवचौ सखड्गावात्तकार्मुकौ ।
मामेवाद्य प्रतीक्षेतां रथवर्यौ परंतपौ ॥ ३७
इत्युक्त्वा रथमास्थाय प्रायादभिमुखः परान् ।
तमन्वगात्कृपो राजन्कृतवर्मा च सात्वतः ॥ ३८
ते प्रयाता व्यरोचन्त परानभिमुखास्त्रयः ।
हूयमाना यथा यज्ञे समिद्धा हव्यवाहनाः ॥ ३९
ययुश्च शिबिरं तेषां संप्रसुप्तजनं विभो ।
द्वारदेशमनुप्राप्य द्रौणिस्तस्थौ महारथः ॥ ४०

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ॥ ६ ॥

अश्वत्थाम्नः शिबिरद्वारस्थमहाभूतदर्शनम् ॥ १ ॥ भूतजिगीषया द्रौणिविसृष्टानामस्त्रशस्त्राणां भूतेन ग्रसनम् ॥ २ ॥ ततश्चितातान्तस्य द्रौणेर्महादेवोपासनाध्यवसायः ॥ ३ ॥

धृतराष्ट्र उवाच ।
द्वारदेशे ततो द्रौणिमवस्थितमवेक्ष्य तौ ।
अकुर्वतां भोजकृपौ किं सञ्जय वदस्व मे ॥ १
सञ्जय उवाच ।
कृतवर्माणमामन्त्र्य कृपं च स महारथः ।
द्रौणिर्मन्युपरीतात्मा शिबिरद्वारमासदत् ॥ २
तत्र भूतं महाकायं चन्द्रार्कसदृशद्युतिम् ।
सोऽपश्यद्वारमावृत्य तिष्ठन्तं रोमहर्षणम् ॥ ३
वसानं चर्म वैयाघ्रं वसारुधिरविस्रवम् ।
कृष्णाजिनोत्तरासङ्गं नागयज्ञोपवीतिनम् ॥ ४
बाहुभिः स्वायतैर्भीमैर्नानाग्रहरणोद्यतैः ।
बद्धाङ्गदमहासर्पं ज्वालामालाकुलाननम् ॥ ५
दंष्ट्राकरालवदनं व्यादितास्यं भयानकम् ।
नयनानां सहस्रैश्च विचित्रैरभिभूषितम् ॥ ६
नैव तस्य वपुः शक्यं प्रवक्तुं वेष एव च ।
सर्वथा तु तदालक्ष्य स्फुटेयुरपि पर्वताः ॥ ७
तस्यास्यनासिकाभ्यां च श्रवणाभ्यां च सर्वशः ।
तेभ्यश्चाक्षिसहस्रेभ्यः प्रादुरासन्महार्चिषः ॥ ८
तथा तेजोमरीचिभ्यः शङ्खचक्रगदाधराः ।
प्रादुरासन्हृषीकेशाः शतशोऽथ सहस्रशः ॥ ९
तदत्यद्भुतमालोक्य भूतं लोकभयंकरम् ।
द्रौणिरव्यथितो दिव्यैरस्त्रवर्षैरवाकिरत् ॥ १०
द्रौणिमुक्तान्छरांस्तांस्तु तद्भूतं महदग्रसत् ।
उदधेरिव वार्योघान्पावको बडवामुखः ॥ ११
अश्वत्थामा तु संप्रेक्ष्य शरौघांस्तान्निरर्थकान् ।
रथशक्तिं मुमोचाशु दीप्तामग्निशिखामिव ॥ १२
सा तमाहत्य दीप्ताग्रा रथशक्तिरदीर्यत ।
युगान्ते सूर्यमाहत्य महोल्केव दिवश्च्युता ॥ १३
अथ हेमत्सरुं दिव्यं खड्गमाकाशवर्चसम् ।
कोशात्समुद्धबर्हाशु बिलादीप्तमिवोरगम् ॥ १४
ततः खड्गवरं धीमान्भूताय प्राहिणोत्तदा ।
स तदासाद्य भूतं वै विलयं तूलवद्ययौ ॥ १५
ततः स कुपितो द्रौणिरिन्द्रकेतुनिभां गदाम् ।
ज्वलन्तीं प्राहिणोत्तस्मै भूतं तामपि चाग्रसत् ॥ १६
ततः सर्वायुधाभावे वीक्षमाणस्ततस्ततः ।
अपश्यत्कृतमाकाशमनाकाशं जनार्दनैः ॥ १७
तदद्भुततमं दृष्ट्वा द्रोणपुत्रो निरायुधः ।
अचिन्तयत्सुसंत्रस्तः कृपभोजवचः स्मरन् ॥ १८
ब्रुवतामप्रियं पथ्यं सुहृदां न शृणोति यः ।
स शोचत्यापदं प्राप्य यथाऽहमवमत्य तौ ॥ १९
शास्त्रदृष्टानविद्वान्यः समतीत्य जिघांसति ।
स पथः प्रच्युतो धर्म्यात्कुपथे प्रतिहन्यते ॥ २०

शस्त्राग्निवर्जिताँल्लोकान्प्राप्नुयादिति मे मति. इति ङ. पाठ. ॥ ३६ ॥ पञ्चमोऽध्याय ॥ ५ ॥

रथशक्ति चक्रम् ॥ १२ ॥ युग्मान्ते सूर्यमिति झ. पाठः

तत्र युग्मावे मिथुनराशेरन्ते अतिदीप्त इत्यर्थ. ॥ १३ ॥ विल नकुलवद्ययौ इति झ. पाठ ॥ १५ ॥ अनाकाश निरवकाशम् ॥ १७ ॥ षष्ठोऽध्याय. ॥ ६ ॥

गोब्राह्मणनृपस्त्रीषु सख्युर्मातुर्गुरोस्तथा ।
वृद्धबालजडान्धेषु सुप्तभीतोत्थितेषु च ॥ २१
मत्तोन्मत्तप्रमत्तेषु न शस्त्राणि च पातयेत् ।
इत्येवं गुरुभिः पूर्वमुपदिष्टं नृणां सदा ॥ २२
सोऽहमुत्क्रम्य पन्थानं शास्त्रदृष्टं सनातनम् ।
अमार्गेणैवमारभ्य घोरामापदमागतः ॥ २३
तां चापदं घोरतरां प्रवदन्ति मनीषिणः ।
यदुद्यम्य महत्कृत्यं भयादपि निवर्तते ॥ २४
अशक्यं चैव कः कर्तुं शक्तः शक्तिबलादिह ।
न हि दैवाद्वरीयो वै मानुष्यं किंचिदिष्यते ॥२५
मानुष्यं कुर्वतः कर्म यदि दैवान्न सिध्यति ।
स पथः प्रच्युतो धर्म्याद्विपदं प्रतिपद्यते ॥ २६
प्रतिज्ञानं ह्यविज्ञानं प्रवदन्ति मनीषिणः ।
यदारभ्य क्रियां कांचिद्भयादिह निवर्तते ॥२७
तदिदं दुष्प्रणीतेन भयं मां समुपस्थितम् ।
न हि द्रोणसुतः सङ्ख्ये निवर्तेत कथंचन ॥ २८
इदं च सुमहद्भूतं दैवदण्डमिवोद्यतम् ।
न चैतदभिजानामि चिन्तयन्नपि सर्वथा ॥ २९
ध्रुवं येयमधर्मेण प्रहिता कलुषा मतिः ।
तस्याः फलमिदं घोरं प्रतिघाताय कल्पते ॥ ३०
तदिदं दैवविहितं मम सङ्ख्ये निवर्तनम् ।
नान्यत्र दैवादुद्धन्तुमिह शक्यं कथंचन ॥ ३१
सोऽहमद्य महादेवं प्रपद्ये शरणं विभुम् ।
दैवदण्डमिमं घोरं स हि मे नाशयिष्यति ॥ ३२
कपर्दिनं प्रपद्येऽहं देवदेवमुमापतिम् ।
कपालमालिनं रुद्रं भगनेत्रहरं हरम् ॥ ३३
स हि देवोऽत्यगाद्देवांस्तपसा विक्रमेण च ।
तस्माच्छरणमभ्येष्ये गिरिशं शूलपाणिनम् ॥ ३४

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः ॥ ७ ॥

द्रौणिना शिवस्तुतिः ॥ १ ॥ द्रौणेः पुरतः काञ्चनवेद्यामग्न्युद्भवः ॥ २ ॥ द्रौणेः समीपे नानाविधभीषणभूतगणानामागमनम् ॥ ३ ॥ शिवेन आत्मनो हविष्ट्वकल्पनपूर्वकमग्नौ प्रविष्टाय द्रौणये खड्गदानपूर्वकं तच्छरीरप्रवेशः ॥ ४ ॥ पुनरश्वत्थाग्नेः शिबिरगमनम् ॥ ५ ॥

सञ्जय उवाच ।
एवं संचिन्तयित्वा तु द्रोणपुत्रो विशांपते ।
अवतीर्य रथोपस्थाद्ध्यौ स प्रयतः स्थितः ॥ १
द्रौणिरुवाच ।
उग्रं स्थाणुं शिवं रुद्रं शर्वमीशानमीश्वरम् ।
गिरिशं वरदं देवं भवभावनमव्ययम् ॥ २
शितिकण्ठमजं रुद्रं दक्षक्रतुहरं हरम् ।
विश्वरूपं विरूपाक्षं बहुरूपमुमापतिम् ॥ ३
श्मशानवासिनं दृप्तं महागणपतिं विभुम् ।
खट्वाङ्गधारिणं मुण्डं जटिलं ब्रह्मचारिणम् ॥ ४
मनसा ह्यनुचिन्त्यैनं दुष्करेणाल्पचेतसा ।
अद्य भूतोपहारेण यक्ष्ये त्रिपुरघातिनम् ॥ ५
स्तुतं स्तुत्यं स्तूयमानममोघं कृत्तिवाससम् ।
विलोहितं नीलकण्ठमसह्यं दुर्निवारणम् ॥ ६
शुक्रं विश्वसृजं ब्रह्म ब्रह्मचारिणमेव च ।
व्रतवन्तं तपोनिष्ठमनन्तं तपतां गतिम् ॥ ७
बहुरूपं गणाध्यक्षं त्र्यक्षं पारिषदप्रियम् ।
धनाध्यक्षप्रियसखं गौरीहृदयवल्लभम् ॥ ८
कुमारपितरं पिङ्गं गोवृषोत्तमवाहनम् ।
कृत्तिवाससमत्युग्रमुमातोषणतत्परम् ॥ ९
परं परेभ्यः परमं परं यस्मान्न विद्यते ।
इष्वस्त्रोत्तमभर्तारं दिगन्तं देशरक्षिणम् ॥ १०
हिरण्यकवचं देवं चन्द्रमौलिविभूषणम् ।
प्रपद्ये शरणं देवं परमेण समाधिना ॥ ११

रथोपस्थाद्ध्यौ स प्रयत स्थित इति क. पाठ. ॥ १ ॥ सोऽहमात्मोपहारेणेति झ. पाठः ॥ ५ ॥ उमाभूषणतत्परमिति झ पाठ. ॥ ९ ॥ हिरण्यदण्डकवच चारुमौलिविभूषणमिति क. पाठ. ॥ ११ ॥

इमां चेदापदं घोरां तराम्यद्य सुदुस्तराम् ।
सर्वभूतोपहारेण यक्ष्येऽहं शुचिना शुचिम् ॥१२
इति तस्य व्यवसितं ज्ञात्वा योगात्सुकर्मणः ।
पुरस्तात्काञ्चनी वेदी प्रादुरासीन्महात्मनः ॥१३
तस्यां वेद्यां तदा राजंश्चित्रभानुरजायत ।
स दिशो विदिशः खं च ज्वालाभिरिव पूरयन्॥१४
दीप्तास्यनयनाश्चात्र नैकपादशिरोधराः ।
[रत्नचित्राङ्गदधराः समुद्यतकरास्तथा ॥] १५
द्विपाः शैलप्रतीकाशाः प्रादुरासन्महागणाः ।
श्वराहोष्ट्ररूपाश्च हयगोमायुगोमुखाः ॥ १६
ऋक्षमार्जारवदना व्याघ्रद्वीपिमुखास्तथा ।
काकवक्त्राः प्लवमुखाः शुकवक्त्रास्तथैव च ॥ १७
महाजगरवक्त्राश्च हंसवक्त्राः शितप्रभाः ।
दार्वाघाटमुखाश्चापि चाषवक्त्राश्च भारत ॥ १८
कूर्मनक्रमुखाश्चैव शिंशुमारमुखास्तथा ।
महामकरवक्त्राश्च तिमिवक्त्रास्तथैव च ॥ १९
हरिवक्त्राः क्रौञ्चमुखाः कपोताभमुखास्तथा ।
पारावतमुखाश्चैव मद्गुवक्त्रास्तथैव च ॥ २०
पाणिकर्णाः सहस्राक्षास्तथैव च महोदराः ।
निर्मांसाः काकवक्त्राश्च श्येनवक्त्राश्च भारत ॥ २१
तथैवाशिरसो राजन्नृक्षवक्त्राश्च भीषणाः ।
प्रदीप्तनेत्रजिह्वाश्च ज्वालावर्णास्तथैव च ॥ २२
ज्वालाकेशाश्च राजेन्द्र ज्वलद्रोमचतुर्भुजाः ।
मेषवक्त्रास्तथैवान्ये तथा छागमुखा नृप ॥ २३
शङ्खाभाः शङ्खवक्त्राश्च शङ्खवर्णास्तथैव च ।
शङ्खमालापरिकराः शङ्खध्वनिसमस्वनाः ॥ २४
जटाधराः पञ्चशिखास्तथा मुण्डाः कृशोदराः ।
चतुर्दंष्ट्राश्चतुर्जिह्वाः शङ्कुकर्णाः किरीटिनः ॥ २५
मौञ्जीधराश्च राजेन्द्र तथा कुञ्चितमूर्धजाः ।
उष्णीषिणः कुण्डलिनश्चारुवक्त्राः स्वलंकृताः ॥२६
पद्मोत्पलापीडधरास्तथा मुकुटधारिणः ।
माहात्म्येन च संयुक्ताः शतशोऽथ सहस्रशः॥२७
शतघ्नीचक्रहस्ताश्च तथा मुसलपाणयः ।
भुशुण्डीपाशहस्ताश्च दण्डहस्ताश्च भारत ॥ २८
पृष्ठेषु बद्धेषुधयश्चित्रबाणोत्कटास्तथा ।
सध्वजाः सपताकाश्च सघण्टाः सपरश्वधाः ॥ २९
महापाशोद्यतकरास्तथा लगुडपाणयः ।
स्थूणाहस्ताः खड्गहस्ताः सर्पोच्छ्रितकिरीटिनः॥३०
महासर्पाङ्गदधराश्चित्राभरणधारिणः ।
रजोध्वजाः पङ्कदिग्धाः सर्वे चित्राम्बरस्रजः ।
नीलाङ्गाः पिङ्गलाङ्गाश्च मुण्डवक्त्रास्तथैव च ॥ ३१
भेरीशङ्खमृदङ्गांश्च झर्झरानकगोमुखान् ।
अवादयन्पारिषदाः प्रहृष्टाः कनकप्रभाः ॥ ३२
गायमानास्तथैवान्ये संहृष्टाः पुरुषर्षभाः ।
लङ्घयन्तः प्लवन्तश्च वल्गन्तश्च महारथाः ॥ ३३
धावन्तो जवनाश्चण्डाः पावकोद्धूतमूर्धजाः ।
मत्ता इव महानागा विनदन्तो मुहुर्मुहुः ॥ ३४
सुभीमा घोररूपाश्च शूलपट्टसपाणयः ।
नानाविरागवसनाश्चित्रमाल्यानुलेपनाः ॥ ३५
रत्नचित्राङ्गदधराः समुद्यतकरास्तथा ।
हन्तारो द्विषतां शूराः प्रसह्यासह्यविक्रमाः ॥ ३६
पातारोऽसृग्वसाज्यानां मांसान्नकृतभोजनाः ।
चूडालाः कर्णिकाराश्च प्रहृष्टाः पिठरोदराः ॥ ३७
अतिह्रस्वातिदीर्घाश्च प्रलम्बाश्चातिभैरवाः ।
विकटाः काललंबोष्ठा बृहच्छेफाण्डपिण्डिकाः॥३८
महार्हनानाविकटा मुण्डाश्च जटिलाः परे ।
सार्केन्दुग्रहनक्षत्रां द्यां कुर्युस्ते महीतले ॥ ३९
उत्सहेरंश्च ये हन्तुं भूतग्रामं चतुर्विधम् ।
ये च वीतभया नित्यं हरस्य भ्रुकुटीसहाः ॥ ४०
कामकारकरा नित्यं त्रैलोक्यस्येश्वरेश्वराः ।
नित्यानन्दप्रमुदिता वागीशा वीतमत्सराः ॥४१
प्राप्याष्टगुणमैश्वर्यं ये न यास्यन्ति वै स्वयम् ।
येषां विस्मयते नित्यं भगवान्कर्मभिर्हरः ॥ ४२
मनोवाक्कर्मभिर्युक्तैर्नित्यमाराधितश्च यैः ।
मनोवाक्कर्मभिर्भक्तान्पाति पुत्रानिवौरसान् ॥ ४३
पिबन्तोऽसृग्वसाश्चान्ये क्रुद्धा ब्रह्मद्विषां सदा ।

प्लवमुखा मण्डूकवक्त्रा ॥ १७ ॥ दार्वाघाट. पक्षिविशेष । महागजसवक्त्राश्चेति क. पाठ. ॥ १८ ॥ पिण्डिका जानुनोरध.-पश्चाद्भाग. ॥ ३८ ॥

चतुर्विधात्मकं सोमं ये पिबन्ति च सर्वदा ॥ ४४
श्रुतेन ब्रह्मचर्येण तपसा च दमेन च ।
ये समाराध्य शूलाङ्कं भवसायुज्यमागताः ॥ ४५
यैरात्मभूतैर्भगवान्पार्वत्या च महेश्वरः ।
महाभूतगणैर्भुङ्क्ते भूतभव्यभवत्प्रभुः ॥ ४६
नानावादित्रहसितक्ष्वेडितोत्कृष्टगर्जितैः ।
संत्रासयन्तस्ते विश्वमश्वत्थामानमभ्ययुः ॥ ४७
संस्तुवन्तो महादेवं भाः कुर्वाणाः सुवर्चसः ।
विवर्धयिषवो द्रौणेर्महिमानं महात्मनः ॥ ४८
जिज्ञासमानास्तत्तेजः सौप्तिकं च दिदृक्षवः ।
भीमोग्रपरिघालातशूलपट्टसपाणयः ।
घोररूपाः समाजग्मुर्भूतसङ्घाः सहस्रशः ॥ ४९
जनयेयुर्भयं ये स्म त्रैलोक्यस्यापि दर्शनात् ।
न च तान्प्रेक्षमाणोऽपि व्यथामुपजगाम ह ॥५०
अथ द्रौणिर्धनुष्पाणिर्बद्धगोधाङ्गुलित्रवान् ।
स्वयमेवात्मनात्मानमुपहारमुपाहरत् ॥ ५१
धनूंषि समिधस्तत्र पवित्राणि सिताः शराः ।
हविरात्मवतश्चात्मा तस्मिन्भारत कर्मणि ॥ ५२
ततः सौम्येन मन्त्रेण द्रोणपुत्रः प्रतापवान् ।
उपहारं महामन्युरथात्मानमुपाहरत् ॥ ५३
तं रुद्रं रौद्रकर्माणं रौद्रैः कर्मभिरच्युतम् ।
अभिष्टुत्य महात्मानमित्युवाच कृताञ्जलिः ॥५४
द्रौणिरुवाच ।
इममात्मानमद्याहं जातमाङ्गिरसे कुले ।
स्वयौ जुहोमि भगवन्प्रतिगृह्णीष्व मां बलिम् ॥ ५५
भवद्भक्त्या महादेव परमेण समाधिना ।
अस्यामापदि विश्वात्मन्नुपाकुर्मि तवाग्रतः ॥ ५६
त्वयि सर्वाणि भूतानि सर्वभूतेषु चासि वै ।
गुणानां हि प्रधानानां कैवल्यं त्वयि तिष्ठति ॥५७
सर्वभूताश्रय विभो हविर्भूतमवस्थितम् ।
प्रतिगृहाण मां देव यद्यशक्याः परे मया ॥ ५८
इत्युक्त्वा द्रौणिरास्थाय तां वेदीं दीप्तपावकाम् ।
संत्यज्यात्मानमारुह्य कृष्णवर्त्मन्युपाविशत् ॥५९
तमूर्ध्वबाहुं निश्चेष्टं दृष्ट्वा हविरुपस्थितम् ।
अब्रवीद्भगवान्साक्षान्महादेवो हसन्निव ॥ ६०
सत्यशौचार्जवत्यागैस्तपसा नियमेन च ।
क्षान्त्या भक्त्या च धृत्या च कर्मणा मनसा गिरा ॥
यथावदहमाराद्धः कृष्णेनाक्लिष्टकर्मणा ।
तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते ॥ ६२
कुर्वता तात संमानं त्वां च जिज्ञासता मया ।
पाञ्चालाः सर्वदा गुप्ता मायाश्च बहुशः कृताः ॥६३
कृतस्तस्यैव संमानः पाञ्चालान्रक्षता मया ।
अभिभूतास्तु कालेन नैषामद्यास्ति जीवितम् ॥६४
एवमुक्त्वा महात्मानं भगवानात्मनस्तनुम् ।
आविवेश ददौ चास्मै विमलं खड्गमुत्तमम् ॥ ६५
अथाविष्टो भगवता भूयो जज्वाल तेजसा ।
वेगवांश्चाभवद्युद्धे देवसृष्टेन तेजसा ॥ ६६
तं दृष्ट्वा तानि भूतानि रक्षांसि च समाद्रवन् ।
अभितः शिबिरं यान्तं द्रोणपुत्रं महारथम् ।
देवदेवं हरं स्थाणुं यान्तं साक्षादिवेश्वरम् ॥ ६७

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ॥ ८ ॥

शिबिरद्वारे कृपकृतवर्माणौ संस्थाप्यान्तः प्रविष्टेन द्रौणिना धृष्टद्युम्नादिपाञ्चालानां द्रौपदेयादीनां च वधः ॥ १ ॥ भयाद्बहिर्निष्क्रान्तानां कृपकृतवर्मभ्यां वधः ॥ २ ॥

धृतराष्ट्र उवाच ।
तथा प्रयाते शिबिरं द्रोणपुत्रे महारथे ।
कच्चित्कृपश्च भोजश्च भयार्तौ न व्यवर्तताम् ॥ १
कच्चिन्न वारितौ क्षुद्रै रक्षिभिर्नोपलक्षितौ ।
असह्यमिति मन्वानौ न निवृत्तौ महारथौ ॥ २
कच्चिदुन्मथ्य शिबिरं हत्वा सोमकपाण्डवान् ।

सौम्येन सोमदैवत्येन मन्त्रेण ॥ ५३ ॥

सप्तमोऽध्यायः ॥ ७ ॥

'कृता प्रतिज्ञा सफला कच्चित्सञ्जय सा निशि ॥'३
दुर्योधनस्य पदवीं कच्चित्परमिकां रणे ।
'गत्वातिष्ठदसौ द्रौणिः कृत्वा कर्म सुदुष्करम् ॥ ४
धृष्टद्युम्नशिखण्डिभ्यां द्रौपद्याश्च सुतैः किल ।
संछन्ना मेदिनी सुप्तैर्निहतैः पाण्डुसैनिकैः ॥ ५
पाञ्चालैर्वा विनिहतैः शयानै रुधिरोक्षितैः ।
कच्चिन्महीतलं छन्नं तन्ममाचक्ष्व सञ्जय ॥' ६
[पाञ्चालैर्निहतौ वीरौ कच्चित्तु स्वपतां क्षितौ ।
कच्चित्ताभ्यां कृतं कर्म तन्ममाचक्ष्व सञ्जय ॥] ७
सञ्जय उवाच ।
तस्मिन्प्रयाते शिबिरं द्रोणपुत्रे महात्मनि ।
कृपश्च कृतवर्मा च द्रौणिमेवाभ्यवर्तताम् ॥ ८
अश्वत्थामा तु तौ दृष्ट्वा यत्नवन्तौ महारथौ ।
प्रहृष्टः शनकै राजन्निदं वचनमब्रवीत् ॥ ९
यत्तौ भवन्तौ पर्याप्तौ सर्वक्षत्रस्य नाशने ।
किंपुनर्योधशेषस्य प्रसुप्तस्य विशेषतः ॥ १०
अहं प्रवेक्ष्ये शिबिरं चरिष्यामि च कालवत् ।
यथा न कश्चिदपि वां जीवन्मुच्येत मानवः ।
तथा भवद्भ्यां कार्यं स्यादिति मे निश्चिता मतिः ११
इत्युक्त्वा प्राविशद्द्रौणिः पार्थानां शिबिरं महत् ।
अद्वारेणाभ्यवस्कन्द्य विहाय भयमात्मनः ॥ १२
स प्रविश्य महाबाहुरुदेशज्ञश्च तस्य ह ।
'द्रौणिः परमसंक्रुद्धस्तेजसा प्रज्वलन्निव ।
ततः पर्यचरत्सर्वं संप्रसुप्तं जनं निशि ॥' १३
धृष्टद्युम्नस्य निलयं शनकैरभ्युपागमत् ॥ १४
ते तु कृत्वा महत्कर्म श्रान्ताश्च बलवद्रणे ।
प्रसुप्ता वै सुविश्वस्ताः स्वसैन्यपरिवारिताः ॥ १५
अथ प्रविश्य तद्वेश्म धृष्टद्युम्नस्य भारत ।
पाञ्चाल्यं शयने द्रौणिरपश्यत्सुप्तमन्तिकात् ॥ १६
क्षौमावदाते महति स्पर्द्ध्यास्तरणसंवृते ।
माल्यप्रवरसंयुक्ते धूपैश्चूर्णैश्च वासिते ॥ १७
तं शयानं महात्मानं विस्रब्धमकुतोभयम् ।
अपोथयत पादेन शयनस्थं महीपते ॥ १८
संबुध्य चरणस्पर्शादुत्थाय रणदुर्मदः ।
अभ्यजानादमेयात्मा द्रोणपुत्रं महारथम् ॥ १९
तमुत्पतन्तं शयनादश्वत्थामा महाबलः ।
केशेष्वालभ्य पाणिभ्यां निष्पिपेष महीतले ॥ २०
स बलात्तेन निष्पिष्टः साध्वसेन च भारत ।
अभ्याक्रान्तश्च निद्रान्धो नाशकच्चेष्टितुं तदा ॥ २१
'निष्पिष्य तु ततो भूमौ पाञ्चाल्यं द्रौणिरञ्जसा ।
धनुषो ज्यां विमुच्याशु क्रूरबुद्धिरमर्षणः ॥ २२
तस्य कण्ठेऽथ बद्ध्वा तां त्वरितः क्रोधमूर्च्छितः ।'
द्रौणिः क्रूरं मनः कृत्वा पाञ्चाल्यमवधीत्तदा ॥ २३
तमाक्रम्य पदा राजन्कण्ठे चोरसि पादयोः ।
नदन्तं विस्फुरन्तं च पशुमारममारयत् ॥ २४
'स वार्यमाणस्तरसा बलाद्बलवता बली ।'
तुदन्नखैस्तु स द्रौणिं नातिव्यक्तमुदाहरत् ॥ २५
आचार्यपुत्र शस्त्रेण जहि मां मा चिरं कृथाः ।
त्वत्कृते सुकृतां लोकान्गच्छेयं द्विपदांवर ॥ २६
एवमुक्त्वा तु वचनं विरराम परंतपः ।
सुतः पाञ्चालराजस्य आक्रान्तो बलिना भृशम् २७
तस्याव्यक्तां तु तां वाचं संश्रुत्य द्रौणिरब्रवीत् ।
आचार्यघातिनां लोका न सन्ति कुलपांसन ।
तस्माच्छस्त्रेण निधनं न त्वमर्हसि दुर्मते ॥ २८
'नृशंसेनातिवृत्तेन त्वया मे निहतः पिता ।
तस्मात्त्वमपि वध्यश्च नृशंसेन नृशंसकृत् ॥' २९
एवं ब्रुवाणस्तं वीरं सिंहो मत्तमिव द्विपम् ।
मर्मस्वभ्यवधीत्क्रुद्धः पादघातैः सुदारुणैः ॥ ३०
तस्य वीरस्य शब्देन मार्यमाणस्य वेश्मनि ।
अबुध्यन्त महाराज स्त्रियो ये चास्य रक्षिणः ॥३१
ते दृष्ट्वा धर्षयन्तं तमतिमानुषविक्रमम् ।
भूतमित्यध्यवस्यन्तो न स्म प्रव्याहरन्भयात् ॥३२
तं तु तेनाभ्युपायेन गमयित्वा यमक्षयम् ।
अध्यतिष्ठत तेजस्वी रथं प्राप्य सुदर्शनम् ॥ ३३

पाञ्चालै पूर्वं निहतौ सन्तौ स्वपता कच्चित् कोपात् स्वपता पाञ्चालाना कर्म वधाख्य ताभ्या कच्चित्कृतमिति सम्बन्ध ॥ ७ ॥ शिबिरद्वार्यतिष्ठतामिति झ. पाठ. ॥ ८ ॥ वा युवा प्राग्येति शेष ॥ ११ ॥ उद्देशज्ञ धृष्टद्युम्नस्थलज्ञः ॥ १३ ॥ पादाष्टीलैरिति झ पाठः । तत्र पादाष्टीलैः पादग्रन्थिभि. । पार्ष्णिघातैरित्यर्थ. ॥ ३० ॥

स तस्य भवनाद्राजन्निष्क्रम्यानादयन्दिशः ।
रथेन शिबिरं प्रायाज्जिघांसुर्द्विषतो बली ॥ ३४
अपक्रान्ते ततस्तस्मिन्द्रोणपुत्रे महारथे ।
सहितै रक्षिभिः सर्वैः प्राणेदुर्योधितस्तदा ॥ ३५
राजानं निहतं दृष्ट्वा भृशं शोकपरायणाः ।
व्याक्रोशन्क्षत्रियाः सर्वे धृष्टद्युम्नस्य भारत ॥ ३६
तासां तु तेन शब्देन समीपे क्षत्रियर्षभाः ।
संभ्रान्ताः समनह्यन्त किमेतदिति चाब्रुवन् ॥ ३७
स्त्रियस्तु राजन्वित्रस्ता भारद्वाजं निरीक्ष्य ताः ।
अब्रुवन्दीनकण्ठेन क्षिप्रमाद्रवतेति वै ॥ ३८
राक्षसो वा मनुष्यो वा नैनं जानीम कोन्वयम् ।
हत्वा पाञ्चालराजानं रथमारुह्य तिष्ठति ॥ ३९
ततस्ते योधमुख्यास्तं सहसा पर्यवारयन् ।
स तानापततः सर्वान्रुद्रास्त्रेण व्यपोथयत् ॥ ४०
धृष्टद्युम्नं च हत्वा स तांश्चैवास्य पदानुगान् ।
अपश्यच्छयने सुप्तमुत्तमौजसमन्तिके ॥ ४१
तमप्याक्रम्य पादेन कण्ठे चोरसि तेजसा ।
तथैव मारयामास विनर्दन्तमरिंदमम् ॥ ४२
युधामन्युश्च विक्रान्तो मत्वा तं राक्षसं स्म सः ।
गदामुद्यम्य वेगेन हृदि द्रौणिमताडयत् ॥ ४३
'गदाप्रहाराभिहतो नाचलद्द्रौणिराहवे ।'
तमभिद्रुत्य वेगेन क्षितौ चैनमपातयत् ॥ ४४
विस्फुरन्तं च पशुवत्तथैवैनममारयत् ।
तथा स वीरो हत्वा तं ततोऽन्यान्समुपाद्रवत् ॥ ४५
संसुप्तानेव राजेन्द्र तत्र तत्र महारथान् ।
पाञ्चालवीरानाक्रम्य क्रुद्धो न्यहनदन्तिके ।
स्फुरतो वेपमानांश्च शमितेव पशून्मखे ॥ ४६
ततो निस्त्रिंशमादाय जघानान्यान्पृथक्पृथक् ।
भागशो विचरन्मार्गानसियुद्धविशारदः ॥ ४७
तथैव गुल्मे संप्रेक्ष्य शयानान्मध्यगौल्मिकान् ।
श्रान्तान्व्यस्तायुधान्सर्वानसिनैव व्यपोथयत् ॥ ४८
योधानश्वान्द्विपांश्चैव प्राच्छिनत्स वरासिना ।
रुधिरोक्षितसर्वाङ्गः कालसृष्ट इवान्तकः ॥ ४९
विस्फुरद्भिश्च तैर्द्रौणिर्निस्त्रिंशस्योद्यमेन च ।
अवक्षेपेण चैवासेस्त्रिधा रक्तोक्षितोऽभवत् ॥ ५०
तस्य लोहितरक्तस्य दीप्तखड्गस्य युध्यतः ।
अमानुष इवाकारो बभौ परमभीषणः ॥ ५१
ये त्वजाग्रन्त कौरव्य तेऽपि शब्देन मोहिताः ।
वीक्षमाणास्तु ते तत्र द्रौणिं दृष्ट्वा प्रविव्यथुः ॥ ५२
तद्रूपं तस्य ते दृष्ट्वा क्षत्रियाः शत्रुकर्शनम् ।
राक्षसं मन्यमानास्तं नयनानि न्यमीलयन् ॥ ५३
स घोररूपो व्यचरत्कालवच्छिबिरे तदा ।
अपश्यद्द्रौपदीपुत्रानवशिष्टांश्च सोमकान् ॥ ५४
तेन शब्देन वित्रस्ता धनुर्हस्ता महारथाः ।
धृष्टद्युम्नं हतं श्रुत्वा द्रौपदेया विशांपते ।
अवाकिरञ्शरव्रातैर्भारद्वाजमभीतवत् ॥ ५५
ततस्तेन निनादेन संप्रबुद्धाः प्रभद्रकाः ।
शिलीमुखैः शिखण्डी च द्रोणपुत्रं समार्दयन् ॥ ५६
भारद्वाजः स तान्दृष्ट्वा शरवर्षाणि वर्षतः ।
ननाद बलवन्नादं जिघांसुस्तान्महारथान् ॥ ५७
ततः परमसंक्रुद्धः पितुर्वधमनुस्मरन् ।
अवरुह्य रथोपस्थाच्चरमाणोऽभिदुद्रुवे ॥ ५८
सहस्रचन्द्रविमलं गृहीत्वा चर्म संयुगे ।
खड्गं च विमलं दिव्यं जातरूपपरिष्कृतम् ।
द्रौपदेयानभिद्रुत्य खड्गेन व्यधमद्बली ॥ ५९
ततः स नरशार्दूलः प्रतिविन्ध्यं महाहवे ।
कुक्षिदेशेऽवधीद्राजन्स हतो न्यपतद्भुवि ॥ ६०
प्रासेन विद्ध्वा द्रौणिं तु सुतसोमः प्रतापवान् ।
पुनश्चासिं समुद्यम्य द्रोणपुत्रमुपाद्रवत् ॥ ६१
सुतसोमस्य सासिं तं बाहुं छित्त्वा नरर्षभ ।
पुनरप्याहनत्पार्श्वे स भिन्नहृदयोऽपतत् ॥ ६२
नाकुलिस्तु शतानीको रथचक्रेण वीर्यवान् ।
दोर्भ्यामुत्क्षिप्य वेगेन वक्षस्येनमताडयत् ॥ ६३
अताडयच्छतानीकं मुक्तचक्रं द्विजस्तु सः ।
स विह्वलो ययौ भूमिं ततोऽस्यापाहरच्छिरः ॥ ६४
श्रुतकर्मा तु परिघं घोरं गृह्य दुरासदम् ।

तैर्दिछन्नगात्रैर्विस्फुरद्भिस्तेषा शरीरादुच्चलद्भी रक्तबिन्दुभिरित्यर्थः ॥ ५० ॥

अताडयत्समुद्यम्य वेगेन द्रौणिमुत्स्मयन् ॥ ६५
स तु तं श्रुतकर्माणमास्ये जघ्ने वरासिना ।
स हतो न्यपतद्भूमौ विमूर्धा विकृताननः ॥ ६६
तेन शब्देन वीरस्तु श्रुतकीर्तिरबुध्यत ।
अश्वत्थामानमासाद्य शरवर्षैरवाकिरत् ॥ ६७
'शरैराच्छादितस्तेन द्रोणपुत्रो महारथः ।
अदृश्यत महाराज श्वाविच्छललतो यथा ॥' ६८
तस्यापि शरवर्षाणि चर्मणा प्रतिवार्य सः ।
सकुण्डलं शिरः कायाद्बाजमानमपाहरत् ॥ ६९
ततो भीष्मनिहन्तारं सह सर्वैः प्रभद्रकैः ।
आहनत्सर्वतो वीरं नानाप्रहरणैर्बलात् ॥ ७०
शिलीमुखेन चाप्येनं भ्रुवोर्मध्ये समार्पयत् ॥ ७१
स तु क्रोधसमाविष्टो द्रोणपुत्रो महाबलः ।
शिखण्डिनं समासाद्य द्विधा चिच्छेद सोसिना ७२
शिखण्डिनं ततो हत्वा क्रोधाविष्टः परंतपः ।
प्रभद्रकगणान्सर्वानभिदुद्राव वेगवान् ॥ ७३
यच्च शिष्टं विराटस्य बलं तु भृशमाद्रवत् ।
द्रुपदस्य च पुत्राणां पौत्राणां सुहृदामपि ।
चकार कदनं घोरं दृष्ट्वा तत्र महाबलः ॥ ७४
अन्यानन्यांश्च पुरुषानभिसृत्याभिसृत्य च ।
न्यकृन्तदसिना द्रौणिरसिमार्गविशारदः ॥ ७५
कालीं रक्ताक्षनयनां रक्तमाल्यानुलेपनाम् ।
रक्ताम्बरधरां घोरां पाशहस्तां कुटुम्बिनीम् ॥ ७६
ददृशुः कालरात्रिं ते स्मयमानामिव स्थिताम् ।
नराश्वकुञ्जरान्पाशैर्बद्ध्वा घोरैः प्रतस्थुषीम् ॥ ७७
वहन्तीं विविधान्प्रेतान्पाशबद्धान्विमूर्धजान् ।
तथैव च सदा राजन्यस्तशस्त्रान्महारथान् ॥ ७८
स्वप्ने सुप्तान्नयन्तीं तां रात्रिष्वन्यासु मारिष ।
ददृशुर्योधमुख्यास्ते घ्नन्तं द्रौणिं च नित्यदा ॥ ७९
यतः प्रभृति संग्रामः कुरुपाण्डवसेनयोः ।
ततः प्रभृति तां कन्यामपश्यन्द्रौणिमेव च ॥ ८०
तांस्तु दैवहतान्पूर्वं पश्चाद्रौणिर्व्यपातयत् ।
त्रासयन्सर्वभूतानि विनदन्भैरवान्रवान् ॥ ८१
तदनुस्मृत्य ते वीरा दर्शनं पूर्वकालिकम् ।
इदं तदित्यमन्यन्त दैवेनोपनिपीडिताः ॥ ८२
ततस्तेन निनादेन प्रत्यबुध्यन्त धन्विनः ।
शिबिरे पाण्डवेयानां शतशोऽथ सहस्रशः ॥ ८३
सोऽच्छिनत्कस्यचित्पदौ जघनं चैव कस्यचित् ।
कांश्चिद्भिभेदपार्श्वेषु कालसृष्ट इवान्तकः ॥ ८४
अत्युग्रप्रतिपिष्टैश्च नदद्भिश्च भृशोत्कटैः ।
गजाश्वमथितैश्चान्यैर्मही कीर्णाऽभवत्प्रभो ॥ ८५
क्रोशतां किमिदं कोऽयं कः शब्दः किंनु किं कृतम् ।
पाञ्चालानां तथा द्रौणिरन्तकः समपद्यत ॥ ८६
अपेतशस्त्रसन्नाहान्सन्नद्धान्पाण्डुसृञ्जयान् ।
प्राहिणोन्मृत्युलोकाय द्रौणिः प्रहरतां वरः ॥ ८७
ततस्तच्छस्त्रवित्रस्ता भयादभ्यपतन्नराः ।
निद्रान्धा नष्टसंज्ञाश्च तत्रतत्र निपेतिरे ॥ ८८
ऊरुस्तम्भगृहीताश्च कश्मलाभिहतौजसः ।
विनदन्तो भृशं त्रस्ता निरैक्षन्त परस्परम् ॥ ८९
ततो रथं पुनर्द्रौणिरास्थितो भीमदर्शनः ।
धनुष्पाणिः शरैरन्यान्प्रैषयद्वै यमक्षयम् ॥ ९०
पुनरुत्पततश्चापि दूरादपि नरोत्तमान् ।
शूरान्संपततश्चान्यान्कालराज्ञे न्यवेदयत् ॥ ९१
तथैव स्यन्दनाग्रेण प्रमथन्स व्यरोचत ।
शरवर्षैश्च विविधैरवर्षच्छात्रवांस्ततः ॥ ९२
पुनश्च सुविचित्रेण शतचन्द्रेण चर्मणा ।
तेन चाकाशवर्णेन तथाचरत सोऽसिना ॥ ९३
तथा स शिबिरं तेषां द्रौणिराहवदुर्मदः ।
व्यक्षोभयत राजेन्द्र महाह्रदमिव द्विपः ॥ ९४
उत्पेतुस्तेन शब्देन योधा राजन्विचेतसः ।
निद्रार्ताश्च भयार्ताश्च व्यधावन्त ततस्ततः ॥ ९५
विस्वरं चुक्रुशुश्चान्ये बह्वबद्धं तथाऽवदन् ।
न च स्म प्रत्यपद्यन्त शस्त्राणि वसनानि च ॥ ९६
विमुक्तकेशाश्चाप्यन्ये नाभ्यजानन्परस्परम् ।
उत्पतन्तोऽपतञ्श्रान्ताः केचित्तत्राश्रमंस्तदा ।
पुरीषमसृजन्केचित्केचिन्मूत्रं प्रसुस्रुवुः ॥ ९७

पाण्डुसृञ्जयान् पाण्डवसबन्धिनः सृञ्जयान् । पाण्डोर्गोत्रापत्यानि सृञ्जयाश्च तान्वा ॥ ८७ ॥

बन्धनानि च राजेन्द्र संछिद्य तुरगा द्विपाः ।
समं पर्यपतंश्चान्ये कुर्वन्तो महदाकुलम् ॥ ९८
तत्र केचिन्नरा भीता व्यलीयन्त महीतले ।
तथैव तान्निपतितानपिंषन्गजवाजिनः ॥ ९९
तस्मिंस्तथा वर्तमाने रक्षांसि पुरुषर्षभ ।
हृष्टानि व्यनदन्भुवैर्मुदा युक्तानि सत्तम ॥ १००
स शब्दः प्रेरितो राजन्भूतसङ्घैर्मुदा युतैः ।
अपूरयद्दिशः सर्वा दिवं चातिमहान्स्वनः ॥ १०१
तेषामार्तरवं श्रुत्वा वित्रस्ता गजवाजिनः ।
मुक्ताः पर्यपतन्राजन्मृद्नन्तः शिबिरे जनम् ॥ १०२
तैस्तत्र परिधावद्भिश्चरणोदीरितं रजः ।
अकरोच्छिबिरे तेषां रजन्यां द्विगुणं तमः ॥ १०३
तस्मिंस्तमसि संजाते प्रमूढाः सर्वतो जनाः ।
नाजानन्पितरः पुत्रान्भ्रातॄन्भ्रातर एव च ॥ १०४
गजो गजानतिक्रम्य निर्मनुष्या हया हयान् ।
अताडयंस्तथाऽभञ्जंस्तथाऽमृद्नंश्च भारत ॥ १०५
ते भग्नाः प्रपतन्ति स्म मृद्नन्तश्च परस्परम् ।
न्यपातयंस्तथा चान्यान्पातयित्वा तदाऽपिषन् ॥
विचेतसः सनिद्राश्च तमसा चावृता नराः ।
जघ्नुः स्वानेव तत्राथ कालेनैव प्रचोदिताः ॥ १०७
त्यक्त्वाद्वाराणि च द्वास्थास्तथागुल्मानिगौल्मिकाः
प्राद्रवन्त यथाशक्ति कांदिशीका विचेतसः ॥ १०८
विप्रनष्टाश्च तेऽन्योन्यं नाजानन्तस्तथा विभो ।
क्रोशन्तस्तात पुत्रेति दैवोपहतचेतसः ॥ १०९
पलायतां दिशस्तेषां स्वानप्युत्सृज्य बान्धवान् ।
गोत्रनामभिरन्योन्यमाक्रन्दन्त ततो जनाः ॥ ११०
हाहाकारं च कुर्वाणाः पृथिव्यां शेरते परे ।
तान्बुद्ध्वा रणमध्येऽसौ द्रोणपुत्रो व्यपोथयत् १११
तत्रापरे वध्यमाना मुहुर्मुहुरचेतसः ।
शिबिरान्निष्पतन्ति स्म क्षत्रिया भयपीडिताः ११२
तांस्तु निष्पतितांस्त्रस्ताञ्शिबिराज्जीवितैषिणः ।
कृतवर्मा कृपश्चैव द्वारदेशे निजघ्नतुः ॥ ११३
विस्रस्तयत्रकवचान्मुक्तकेशान्कृताञ्जलीन् ।
वेपमानान्क्षितौ भीतान्नैव कांश्चिदमुच्यताम् ११४
नामुच्यत तयोः कश्चिन्निष्क्रान्तः शिबिराद्बहिः ॥
कृपश्चैव महाराज हार्दिक्यश्चैव दुर्मतिः ।
भूयश्चैव चिकीर्षन्तौ द्रोणपुत्रस्य तौ प्रियम् ।
त्रिषु देशेषु ददतुः शिबिरस्य हुताशनम् ॥ ११६
ततः प्रकाशे शिबिरे खड्गेन पितृनन्दनः ।
अश्वत्थामा महाराज व्यचरत्कृतहस्तवत् ॥ ११७
कांश्चिदापततो वीरानपरांश्चैव धावतः ।
व्ययोजयत खड्गेन प्राणैर्द्विजवरोत्तमः ॥ ११८
कांश्चिद्योधान्स खड्गेन मध्ये संछिद्य वीर्यवान् ।
अशातयद्द्रोणपुत्रः संरब्धस्तिलकाण्डवत् ॥ ११९
निनदद्भिर्भृशायस्तैर्नराश्वद्विरदोत्तमैः ।
पतितैरभवत्कीर्णा मेदिनी भरतर्षभ ॥ १२०
मानुषाणां सहस्रेषु हतेषु पतितेषु च ।
उदतिष्ठन्कबन्धानि बहून्युत्थाय चापतन् ॥ १२१
सायुधान्साङ्गदान्बाहून्विचकर्त शिरांसि च ।
हस्तिहस्तोपमानूरून्हस्तान्पादांश्च भारत ॥ १२२
पृष्ठच्छिन्नान्पार्श्वच्छिन्नाञ्शिरश्छिन्नांस्तथापरान् ।
स महात्माकरोद्द्रौणिः कांश्चिच्चापि पराङ्मुखान् ॥
मध्यदेशे नरानन्यांश्चिच्छेदान्यांश्च कर्णतः ।
अंसदेशे निहत्यान्यान्काये प्रावेशयच्छरैः ॥ १२४
एवं हि बहुभिः शस्त्रैर्हतोऽपि बलवत्तरान् ।
तमसा रजनी घोरा बभौ दारुणदर्शना ॥ १२५
किंचित्प्राणैश्च पुरुषैर्हतैश्चान्यैः सहस्रशः ।
बहुना च गजाश्वेन भूरभूद्भीमदर्शना ॥ १२६
यक्षरक्षःसमाकीर्णे रथाश्वद्विपदारुणे ।
क्रुद्धेन द्रोणपुत्रेण संछिन्नाः प्रापतन्भुवि ।
भ्रातॄनन्ये पितॄनन्ये पुत्रानन्ये विचुक्रुशुः ॥ १२७
केचिदूचुर्न तत्क्रुद्धैर्धार्तराष्ट्रैः कृतं रणे ।
यत्कृतं नः प्रसुप्तानां रक्षोभिः क्रूरकर्मभिः ।
असान्निध्याद्धि पार्थानामिदं वः कदनं कृतम् १२८
न चासुरैर्न गन्धर्वैर्न यक्षैर्न च राक्षसैः ।
शक्यो विजेतुं कौन्तेयो नेता यस्य जनार्दनः ।

अभञ्जन् गात्राण्यनमयन् । अमृद्नन् परस्परं मर्दितवन्त. ॥ १०५ ॥ अपिषन् अपिषन् ॥ १०६ ॥

ब्रह्मण्यः सत्यवाग्दान्तः सर्वभूतानुकम्पकः॥१२९
न च सुप्तं प्रमत्तं वा न्यस्तशस्त्रं कृताञ्जलिम् ।
धावन्तं मुक्तकेशं वा हन्ति पार्थो धनञ्जयः॥१३०
तदिदं नः कृतं घोरं रक्षोभिः क्रूरकर्मभिः ।
इति लालप्यमानाः स्म शेरते बहवो जनाः॥१३१
स्तनतां च मनुष्याणामपरेषां च कूजताम् ।
ततो मुहूर्तात्प्राशाम्यत्स शब्दस्तुमुलो महान् १३२
शोणितव्यतिषिक्तायां वसुधायां च भूमिप ।
तद्रजस्तुमुलं घोरं क्षणेनान्तरधीयत ॥ १३३
स चेष्टमानानुद्विग्नान्निरुत्साहान्सहस्रशः ।
न्यपातयन्नरान्क्रुद्धः पशून्पशुपतिर्यथा ॥ १३४
अन्योन्यं संपरिष्वज्य शयानाञ्जीवतोऽपरान् ।
संलीनान्युध्यमानांश्च सर्वान्द्रौणिरपोथयत्॥१३५
दह्यमाना हुताशेन वध्यमानाश्च तेन ते ।
परस्परं तदा योधाननयद्यमसादनम् ॥ १३६
तस्या रजन्यास्त्वर्धेन पाण्डवानां महद्बलम् ।
गमयामास राजेन्द्र द्रौणिर्यमनिवेशनम् ॥ १३७
निशाचराणां सत्वानां रात्रिः सा हर्षवर्धिनी ।
आसीन्नरगजाश्वानां रौद्री क्षयकरी भृशम् ॥१३८
तत्रादृश्यन्त रक्षांसि पिशाचाश्च पृथग्विधाः ।
खादन्तो नरमांसानि पिबन्तः शोणितानि च१३९
कराला पिङ्गला रौद्राः शैलदन्ता रजस्वलाः ।
जटिला भीमवक्त्राश्च पञ्चपादा महोदराः॥१४०
पश्चादङ्गुलयो रूक्षा विरूपा भैरवस्वनाः ।
गजाननाश्च ह्रस्वाश्च नीलवर्णा बिभीषणाः॥१४१
सपुत्रदाराः सुक्रूराः सुदुर्दर्शाः सुनिर्घृणाः ।
विविधानि च रूपाणि तत्रादृश्यन्त रक्षसाम् १४२
पीत्वा च शोणितं हृष्टाः प्रानृत्यन्गणशोऽपरे ।
इदं परमिदं मेध्यमिदं स्वाद्विति चाब्रुवन्॥१४३
मेदोमज्जास्थिरक्तानां मांसानां च भृशाशिताः ।
परे मांसानि खादन्तः क्रव्यादा मांसजीविनः१४४
वसाश्चैवापरे पीत्वा पर्यधावन्विकुक्षिकाः ।
नानावक्त्रास्तथा रौद्राः क्रव्यादाः पिशिताशनाः॥
अयुतानि च तत्रासन्प्रयुतान्यर्बुदानि च ।
रक्षसां घोररूपाणां महतां क्रूरकर्मणाम् ॥ १४६
मुदितानां वितृप्तानां तस्मिन्महति वैशसे ।
समेतानि बहून्यासन्भूतानि च जनाधिप॥१४७
एवंविधा हि सा रात्रिः सोमकानां जनक्षये ।
प्रसुप्तानां प्रमत्तानामासीत्सुभृशदारुणा ॥ १४८
असंशयं हि कालस्य पर्यायो दुरतिक्रमः ।
तादृशा निहता यत्र कृत्वाऽस्माकं जनक्षयम्॥१४९
धृतराष्ट्र उवाच ।
प्रागेव सुमहत्कर्म द्रौणिरेतन्महारथः ।
नाकरोदीदृशं कस्मान्मत्पुत्रविजये धृतः॥ १५०
अथ कस्माद्धते क्षत्रे कर्मेदं कृतवानसौ ।
द्रोणपुत्रो महात्मा स तन्मे शंसितुमर्हसि॥ १५१
सञ्जय उवाच ।
तेषां नूनं भयान्नासौ कृतवान्कुरुनन्दन ।
असान्निध्याद्धि पार्थानां केशवस्य च धीमतः ।
सात्यकेश्चापि कर्मेदं द्रोणपुत्रेण साधितम्॥ १५२
को हि तेषां समक्षं तान्हन्यादपि मरुत्पतिः ।
एतदीदृशकं वृत्तं राजन्सुप्तजने विभो ॥ १५३
ततो जनक्षयं कृत्वा पाण्डवानां महात्ययम् ।
प्रत्यूषकाले शिबिरात्प्रतिगन्तुमियेष सः ॥ १५४
नृशोणितावसिक्तस्य द्रौणेरासीदसित्सरुः ।
पाणिना सह संश्लिष्ट एकीभूत इव प्रभो ॥ १५५
स निःशेषानरीन्कृत्वा विरराम निशाक्षये ।
युगान्ते सर्वभूतानि भस्म कृत्वेव पावकः॥१५६
यथाप्रतिज्ञं तत्कर्म कृत्वा द्रौणायनिः प्रभो ।
दुर्गमां पदवीं गच्छन्पितुरासीद्वतज्वरः॥ १५७
यथैव संसुप्तजने शिबिरे प्राविशन्निशि ।
तथैव हत्वा निःशब्दो निश्चक्राम नरर्षभः॥ १५८
निष्क्रम्य शिबिरात्तस्मात्ताभ्यां संगम्य वीर्यवान् ।
आचख्यौ कर्म तत्सर्वं हृष्टः संहर्षयन्विभो॥ १५९
तावथाचख्यतुस्तस्मै प्रियं प्रियकरौ तदा ।
पाञ्चालान्सृञ्जयांश्चैव विनिकृत्तान्सहस्रशः॥१६०

॥ १४५ ॥ अष्टमोऽध्यायः ॥ ८ ॥

भृशाशिता. भृशं संतर्पिता ॥१४४॥ विकुक्षिका. विपुलकुक्षय·

प्रीत्या चोच्चैरुदक्रोशंस्तथैवास्फोटयंस्तलान् ।
दिष्ट्यादिष्ट्येति चान्योन्यं समेत्योचुर्महारथाः १६१
पर्यष्वजत्ततो द्रौणिस्ताभ्यां संप्रतिनन्दितः ।
इदं हर्षात्तु सुमहदाददे वाक्यमुत्तमम् ॥ १६२
पाञ्चाला निहताः सर्वे द्रौपदेयाश्च सर्वशः ।
सोमका मत्स्यशेषाश्च सर्वे विनिहता मया ॥ १६३
इदानीं कृतकृत्याः स्म याम तत्रैव मा चिरम् ।
यदि जीवति नो राजा तस्मै शंसामहे प्रियम् ॥ १६४

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः ॥ ९ ॥

द्रौणिकृपकृतवर्मभिर्दुर्योधनमेत्य शोचनम् ॥ १ ॥ दुर्योधनंप्रति द्रौणिना सुप्तजनवधकथनम् ॥ २ ॥ दुर्योधनेन प्राणत्यागः ॥ ३ ॥ द्रौण्यादीनां नगरगमनम् ॥ ४ ॥ सञ्जयस्य व्यासानुग्रहप्राप्तदिव्यज्ञाननाशः ॥ ५ ॥

सञ्जय उवाच ।
ते हत्वा सर्वपाञ्चालान्द्रौपदेयांश्च सर्वशः ।
आगच्छन्सहितास्तत्र यत्र दुर्योधनो हतः ॥ १
गत्वा चैनमपश्यन्त किंचित्प्राणं जनाधिपम् ।
ततो रथेभ्यः प्रस्कन्द्य परिवव्रुस्तवात्मजम् ॥ २
तं भग्नसक्थं राजेन्द्र कृच्छ्रप्राणमचेतसम् ।
वमन्तं रुधिरं वक्त्रादपश्यन्वसुधातले ॥ ३
वृतं समन्ताद्बहुभिः श्वापदैर्घोरदर्शनैः ।
सालावृकगणैश्चैव भक्षयिष्यद्भिरन्तिकात् ॥ ४
निवारयन्तं कृच्छ्रात्ताञ्श्वापदांश्च चिखादिषून् ।
विवेष्टमानमूरुभ्यां सुभृशं गाढवेदनम् ॥ ५
तं शयानं तथा दृष्ट्वा भूमौ सुरुधिरोक्षितम् ।
हतशिष्टास्त्रयो वीराः शोकार्ताः पर्यदेवयन् ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ॥ ६
तैस्त्रिभिः शोणितादिग्धैर्निःश्वसद्भिर्महारथैः ।
शुशुभे स वृतो राजा वेदी त्रिभिरिवाग्निभिः ॥ ७
ते तं शयानं संप्रेक्ष्य राजानमतथोचितम् ।
अविषह्येन दुःखेन ततस्ते रुरुदुस्त्रयः ॥ ८
ततस्तु रुधिरं हस्तैर्मुखान्निर्मृज्य तस्य हि ।
रणे राज्ञः शयानस्य कृपः संपर्यदेवयत् ॥ ९

कृप उवाच ।
न दैवस्यातिभारोऽस्ति यदयं रुधिरोक्षितः ।
एकादशचमूभर्ता शेते दुर्योधनो हतः ॥ १०
पश्य चामीकराभस्य चामीकरविभूषिताम् ।
गदां गदाप्रियस्येमां समीपे पतितां भुवि ॥ ११
इयमेनं गदा शूरं न जहाति रणेरणे ।
स्वर्गायापि व्रजन्तं हि न जहाति यशस्विनम् ॥ १२
पश्येमां सह वीरेण जाम्बूनदविभूषिताम् ।
शयानां शयने हर्म्ये भार्यां प्रीतिमतीमिव ॥ १३
योऽयं मूर्धाभिषिक्तानामग्रे याति परंतपः ।
स हतो ग्रसते पांसून्पश्य कालस्य पर्ययम् ॥ १४
येनाजौ निहता भूमौ शेरते क्षत्रियर्षभाः ।
स भूमौ निहतः शेते कुरुराजः परैरयम् ॥ १५
भयान्नमन्ति राजानो यस्य स्म शतसङ्घशः ।
स वीरशयने शेते क्रव्याद्भिः परिवारितः ॥ १६
यमुपासन्नृपाः पूर्वमर्थहेतोर्महीपतिम् ।
उपासते च तं ह्यद्य क्रव्यादा मांसगृद्धिनः ॥ १७

सञ्जय उवाच ।
तं शयानं कुरुश्रेष्ठं ततो भरतसत्तमम् ।
अश्वत्थामा समालिङ्ग्य करुणं पर्यदेवयत् ॥ १८
आहुस्त्वां राजशार्दूल मुख्यं सर्वधनुष्मताम् ।
धनाध्यक्षोपमं युद्धे शिष्यं संकर्षणस्य च ॥ १९
कथं विवरमद्राक्षीद्भीमसेनस्तवानघ ।
बलिनं कृतिनो नित्यं सूदः पापात्मवान्नृप ॥ २०
कालो नूनं महाराज लोकेऽस्मिन्बलवत्तरः ।
पश्यामो निहतं त्वां च भीमसेनेन संयुगे ॥ २१
कथं त्वां सर्वधर्मज्ञं क्षुद्रः पापो वृकोदरः ।

उपासत द्विजाः पूर्वमर्थहेतोर्यमीश्वरमिति झ पाठ. ॥ १७ ॥

निकृत्या हतवान्मन्दो नूनं कालो दुरत्ययः ॥ २२
द्वन्द्वयुद्धे ह्यधर्मेण समाहूयौजसा मृधे ।
गदया भीमसेनेन निर्भग्ने सक्थिनी तव ॥ २३
अधर्मेण हतस्याजौ मृद्यमानं पदा शिरः ।
य उपेक्षितवान्क्षुद्रं धिक्तमस्तु युधिष्ठिरम् ॥ २४
युद्धेष्वपवदिष्यन्ति योधा नूनं वृकोदरम् ।
यावत्स्थास्यन्ति भूतानि निकृत्या ह्यसि पातितः ॥
ननु रामोऽब्रवीद्राजंस्त्वां सदा यदुनन्दनः ।
दुर्योधनसमो नास्ति गदायामिति वीर्यवान् ॥ २६
श्लाघते त्वां हि वार्ष्णेयो राजन्संसत्सु भारत ।
स शिष्यो मम कौरव्यो गदायुद्ध इति प्रभो ॥ २७
यां गतिं क्षत्रियस्याहुः प्रशस्तां परमर्षयः ।
हतस्याभिमुखस्याजौ प्राप्तस्त्वमसि तां गतिम् ॥ २८
दुर्योधन न शोचामि त्वामहं पुरुषर्षभ ।
हतपुत्रौ तु शोचामि गान्धारीं पितरं च ते ॥ २९
द्वावनाथौ कृतौ वीर त्वया नाथेन वर्धितौ ।
भिक्षुकौ विचरिष्येते शोचन्तौ पृथिवीमिमाम् ॥ ३०
धिगस्तु कृष्णं वार्ष्णेयमर्जुनं चापि दुर्मतिम् ।
धर्मज्ञमानिमौ यौ त्वां वध्यमानमुपेक्षताम् ॥ ३१
पाण्डवाश्चापि ते सर्वे किं वक्ष्यन्ति नराधिप ।
कथं दुर्योधनोऽस्माभिर्हत इत्यनपत्रपाः ॥ ३२
धन्यस्त्वमसि गान्धारे यस्त्वमायोधने हतः ।
प्रयातोऽभिमुखः शत्रून्धर्मेण पुरुषर्षभ ॥ ३३
हतपुत्रा हि गान्धारी निहतज्ञातिबान्धवा ।
प्रज्ञाचक्षुश्च दुर्धर्षः कां दशां प्रतिपत्स्यते ॥ ३४
धिगस्तु कृतवर्माणं मां कृपं च महारथम् ।
ये वयं न गताः स्वर्गं त्वां पुरस्कृत्य पार्थिवम् ॥ ३५
दातारं सर्वकामानां रक्षितारं प्रजाहितम् ।
यद्वयं नानुगच्छाम त्वां धिगस्मान्नराधमान् ॥ ३६
कृपस्य तव वीर्येण मम चैव पितुश्च मे ।
सभृत्यानां नरव्याघ्र रत्नवन्ति गृहाणि च ॥ ३७
तव प्रसादादस्माभिः समित्रैः सह बान्धवैः ।
अवाप्ताः क्रतवो मुख्या बहवो भूरिदक्षिणाः ॥ ३८
कुतश्चापीदृशं पापाः प्रवर्तिष्यामहे वयम् ।
यादृशेन पुरस्कृत्य त्वं गतः सर्वपार्थिवान् ॥ ३९
वयमेव त्रयो राजन्गच्छन्तं परमां गतिम् ।
यद्वै त्वां नानुगच्छामस्तेन तप्स्यामहे वयम् ॥ ४०
तत्स्वर्गहीना हीनार्थाः स्मरन्तः सुकृतस्य ते ।
किं नाम तद्भवेत्कर्म येन त्वां न व्रजाम वै ॥ ४१
दुःखं नूनं कुरुश्रेष्ठ चरिष्याम महीमिमाम् ।
हीनानां नस्त्वया राजन्कुतः शान्तिः कुतः सुखं ४२
गत्वैव तु महाराज समेत्य च महारथान् ।
यथाज्येष्ठं यथाश्रेष्ठं पूजयेर्वचनान्मम ॥ ४३
आचार्यं पूजयित्वा च केतुं सर्वधनुष्मताम् ।
हतं मयाऽद्य शंसेथा धृष्टद्युम्नं नराधिप ॥ ४४
परिष्वजेथा राजानं बाह्लिकं सुमहारथम् ।
सैन्धवं सोमदत्तं च भूरिश्रवसमेव च ॥ ४५
तथा पूर्वगतानन्यान्स्वर्गे पार्थिवसत्तमान् ।
असद्वाक्यात्परिष्वज्य संपृच्छेस्त्वमनामयम् ॥ ४६

सञ्जय उवाच ।

इत्येवमुक्त्वा राजानं भग्नसक्थमचेतसम् ।
अश्वत्थामा लघुप्राणं पुनर्वचनमब्रवीत् ॥ ४७
दुर्योधन जीवसि चेद्वाक्यं श्रोत्रसुखं शृणु ।
सप्त पाण्डवतः शिष्टा धार्तराष्ट्रास्त्रयो वयम् ॥ ४८
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः ।
अहं च कृतवर्मा च कृपः शारद्वतस्तथा ॥ ४९
द्रौपदेया हताः सर्वे धृष्टद्युम्नस्य चात्मजाः ।
पञ्चाला निहताः सर्वे मत्स्यशेषं च भारत ॥ ५०
कृते प्रतिकृतं पश्य हतपुत्रा हि पाण्डवाः ।
सौप्तिके शिबिरं तेषां हतं सनरवाहनम् ॥ ५१
मया च पापकर्माऽसौ धृष्टद्युम्नो महीपते ।
प्रविश्य शिबिरं रात्रौ पशुमारेण मारितः ॥ ५२
दुर्योधनस्तु तां वाचं निशम्य मनसः प्रियाम् ।
प्रतिलभ्य पुनश्चेत इदं वचनमब्रवीत् ॥ ५३
न मेऽकरोत्तद्राजेयो न कर्णो न च ते पिता ।
यत्त्वया कृपभोजाभ्यां सहितेनाद्य मे कृतम् ॥ ५४

धर्मयुद्धे ह्यधर्मेणेति झ. पाठः ॥ २३ ॥

नवमोऽध्यायः ॥ ९ ॥

स च सेनापतिः क्षुद्रो हतः सार्धं शिखण्डिना ।
तेन मन्ये मघवता सममात्मानमद्य वै ॥ ५५
स्वस्ति प्राप्नुत भद्रं वः स्वर्गे नः संगमः पुनः ।
इत्येवमुक्त्वा पुत्रस्ते कुरुराजो महामनाः ॥ ५६
प्राणानुपासृजद्वीरः सुहृदां दुःखमादधत् ।
अपाक्रामद्दिवं पुण्यां शरीरं क्षितिमाविशत् ॥ ५७
एवं ते निधनं यातः पुत्रो दुर्योधनो नृप ।
अग्रे यात्वा रणे शूरः पश्चाद्विनिहतः परैः ॥ ५८
तथैव ते परिष्वक्ताः परिष्वज्य च ते नृपम् ।
पुनः पुनः प्रेक्षमाणाः स्वकानारुरुहू रथान् ॥ ५९

इत्येवं द्रोणपुत्रस्य निशम्य करुणां गिरम् ।
प्रत्यूषकाले शोकार्ताः प्राद्रवन्नगरं प्रति ॥ ६०
एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः ।
घोरो विशसनो रौद्रो राजन्दुर्मन्त्रिते तव ॥ ६१
तव पुत्रे गते स्वर्गं शोकार्तस्य ममानघ ।
ऋषिदत्तं प्रनष्टं तद्दिव्यदर्शित्वमद्य वै ॥ ६२

वैशंपायन उवाच.।

इति श्रुत्वा स नृपतिर्ज्ञातिपुत्रवधं तदा ।
निःश्वस्य दीर्घमुष्णं च ततश्चिन्तापरोऽभवत् ॥ ६३

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि नवमोऽध्यायः ॥ ९ ॥

समाप्तं सौप्तिकपर्व १ ।

(अथैषीकपर्व ॥ २ ॥)

दशमोऽध्यायः ॥ १० ॥

दैवादुर्वरितेन धृष्टद्युम्नसारथिना युधिष्ठिराय रात्रौ वृत्तशिबिरवृत्तान्तविनेदनम् ॥ १ ॥ तच्छ्रवणेन द्रौपद्यानयनाय नकुलमादिश्य शिबिरभुवमुपागतवता युधिष्ठिरेण मृतनिजजनावलोकनेन परिदेवनम् ॥ २ ॥

वैशंपायन उवाच ।
तस्यां रात्र्यां व्यतीतायां धृष्टद्युम्नस्य सारथिः ।
गत्वा शशंस पाण्डुभ्यः सौप्तिके कदनं कृतम् ॥१
सूत उवाच ।
द्रौपदेया हता राजन्द्रुपदस्यात्मजैः सह ।
प्रमत्ता निशि विश्वस्ताः स्वपन्तः शिबिरे स्वके ॥२
गौतमेन नृशंसेन भोजेन कृतवर्मणा ।
अश्वत्थाम्ना च पापेन हतं वः शिबिरं निशि ॥ ३
एतैर्नरगजाश्वानां प्रासशक्तिपरश्वधैः ।
सहस्राणि निकृन्तद्भिर्निःशेषं शिबिरं कृतम् ॥ ४
'विकृष्टनानाविहगफलभारनतस्य ह ।'
छिद्यमानस्य महतो वनस्येव परश्वधैः ।
शुश्रुवे सुमहाञ्शब्दो बलस्य तव भारत ॥ ५
महमेकोऽवशिष्टस्तु तस्मात्सैन्यान्महीपते ।
मुक्तः कथंचिद्धर्मात्मन्व्यग्राच्च कृतवर्मणः ॥ ६
तच्छ्रुत्वा वाक्यमशिवं कुन्तीपुत्रो युधिष्ठिरः ।
पपात मह्यां धर्मात्मा पुत्रशोकसमन्वितः ॥ ७
पतन्तं तमतिक्रम्य परिजग्राह सात्यकिः ।
भीमसेनोऽर्जुनश्चैव माद्रीपुत्रौ च पाण्डवौ ॥ ८
लब्धचेतास्तु कौन्तेयः शोकविह्वलया गिरा ।
जित्वा शत्रूञ्जितः पश्चात्पर्यदेवयदार्तवत् ॥ ९
'अगम्या गतिरर्थानां कर्मणामीश्वरस्य च ।'
दुर्विदा गतिरर्थानामपि ये दिव्यचक्षुषः ।
जीयमाना जयन्त्यन्ये जयमाना वयं जिताः ॥ १०
हत्वा भ्रातॄन्वयस्यांश्च पितॄन्पुत्रान्सुहृद्गणान् ।
बन्धूनमात्यान्पौत्रांश्च जित्वा सर्वाञ्जिता वयम् ११
अनर्थो ह्यर्थसंकाशस्तथाऽनर्थोऽर्थदर्शनः ।
जयोऽयमजयाकारो जयस्तस्मात्पराजयः ॥ १२

अतिक्रम्य धैर्यमर्यादां त्यक्त्वा पतन्तम् ॥ ८ ॥ अन्ये शत्रव. । जयमानाः जयन्तः । जिताना जयो जयता पराजयः

यज्जित्वा तप्यते पश्चादापन्न इव दुर्मतिः ।
कथं मन्येत विजयं ततो जिततरः परैः ॥ १३
येषामर्थाय पापं स्याद्विजयस्य सुहृद्वधैः ।
निर्जितैरप्रमत्तैर्हि विजिता जितकाशिनः ॥ १४
कर्णिनालीकदंष्ट्रस्य खड्गजिह्वस्य संयुगे ।
चापव्यात्तास्यरौद्रस्य ज्यातलस्वननादिनः ॥ १५
क्रुद्धस्य नरसिंहस्य संग्रामेष्वपलायिनः ।
ये व्यमुञ्चन्त कर्णस्य प्रमादात्तेऽमे हताः ॥ १६
रथह्रदं शरवर्षोर्मिमन्तं
रत्नाचितं वाहनयोधवृन्दम् ।
शक्त्यृष्टिमीनध्वजनागनक्रं
शरासनावर्तमहेषुफेनम् ॥ १७
संग्रामचन्द्रोदयवेगवेलं
द्रोणार्णवं ज्यातलनेमिघोषम् ।
ये तेरुरुच्चावचशस्त्रनौभि-
स्ते राजपुत्रा निहताः प्रमादात् ॥ १८
न हि प्रमादात्परमस्ति कश्चि-
द्वधो नराणामिह जीवलोके ।
प्रमत्तमर्था हि नरं समन्ता-
त्त्यजन्त्यनर्थाश्च समाविशन्ति ॥ १९
ध्वजोत्तमाग्रोच्छ्रितधूमकेतुं
शरार्चिषं दीप्तमहापताकम् ।
महाधनुर्ज्यातलनेमिघोषं
तनुत्रनानाविधशस्त्रहोमम् ॥ २०
महाचमूकक्षदवाभिपन्नं
महाहवे भीष्ममहादवाग्निम् ।
ये तेरुरुच्चावचशस्त्रवेगै-
स्ते राजपुत्रा निहताः प्रमादात् ॥ २१
न हि प्रमत्तेन नरेण शक्य-
मामुं वसु श्रीर्विपुलं यशो वा ।
पश्याप्रमादेन निहत्य शत्रू-
न्सर्वान्महेन्द्रं सुखमेधमानम् ॥ २२
इन्द्रोपमान्पार्थिवपुत्रपौत्रा-
न्पश्याविशेषेण हतान्प्रमादात् ।
तीर्त्वा समुद्रं वणिजः समृद्धा
मग्नाः कुनद्यामिव सीदमानाः ॥ २३
अमर्षितैर्ये निहता नरेन्द्रा
निःसंशयं ते त्रिदिवं प्रपन्नाः ।
कृष्णां तु शोचामि कथं नु साध्वी
शोकार्णवं सा विषहिष्यतीति ॥ २४
भ्रातॄंश्च पुत्रांश्च हतान्निशम्य
पाञ्चालराजं पितरं च वृद्धम् ।
ध्रुवं विसंज्ञा पतिता पृथिव्यां
सा शोष्यते शोककृशाङ्गयष्टिः ॥ २५
तच्छोकजं दुःखमपारयन्ती
कथं भविष्यत्युचिता सुखानाम् ।
रोरूयते ज्ञातिवधाभितप्ता
प्रदह्यमानेव हुताशनेन ॥ २६
इत्येवमार्तः परिदेवयन्स
राजा कुरूणां नकुलं बभाषे ।
गच्छानयैनामिह मन्दभाग्यां
समात्पक्षामिति राजपुत्रीम् ॥ २७
माद्रीसुतस्तत्परिगृह्य वाक्यं
धर्मेण धर्मप्रथमस्य राज्ञः ।
ययौ रथेनालयमाशु देव्याः
पाञ्चालराजस्य च यत्र दाराः ॥ २८
प्रस्थाप्य माद्रीसुतमाजमीढः
शोकार्दितस्तैः सहितः सुहृद्भिः ।
रोरूयमाणः प्रययौ सुताना-
मायोधनं भूतगणानुकीर्णम् ॥ २९
स तत्प्रविश्याशिवमुग्ररूपं
ददर्श पुत्रान्सुहृदः सखींश्च ।
भूमौ शयानान्रुधिरार्द्रगात्रा-
न्विभिन्नदेहान्प्रहृतोत्तमाङ्गान् ॥ ३०

फलतोऽभूदिति महदाश्चर्यमित्यर्थ ॥ १० ॥ पश्चात्स पाप इव दुर्मतिरिति क पाठ ॥ १३ ॥ व्यमुञ्चन्त मुक्ता. । कर्णस्य कर्णात् । प्रमादादस्मत्कृतादसान्निध्यात् ॥ १६ ॥ वाहनवाजि-युक्तमिति झ. पाठ. ॥ १७ ॥ तनुत्राणि नानाविधानि शस्त्राणि च तेषा होम प्रक्षेपो यत्र त तनुत्रनानाविधशस्त्रहोमम् ॥ २० ॥ भीष्ममय भीष्मप्रधान अग्निदाहम् । भीष्मरूपेण अग्निना दाहमित्यर्थ. ॥ २१ ॥ निहता. शयाना इति झ. पाठ. ॥ २४ ॥ दशमोऽध्यायः ॥ १० ॥

स तांस्तु दृष्ट्वा भृशमार्तरूपो
युधिष्ठिरो धर्मभृतां वरिष्ठः ।
उच्चैः प्रचुक्रोश च कौरवाग्र्यः
पपात चोर्व्यां सगणो विसंज्ञः ॥ ३१

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः ॥ ११ ॥

नकुलेन युधिष्ठिरसमीपं प्रति द्रौपद्यानयनम् ॥ १ ॥ द्रौपद्या द्रौणिमस्तकमणिहरणचोदितेन भीमेन नकुलसारथिना रथेन द्रौणिवधाय प्रस्थानम् ॥ २ ॥

वैशंपायन उवाच ।
स दृष्ट्वा निहतान्सङ्ख्ये पुत्रान्पौत्रान्सखींस्तथा ।
महादुःखपरीतात्मा बभूव जनमेजय ॥ १
ततस्तस्य महाञ्शोकः प्रादुरासीन्महात्मनः ।
स्मरतः पुत्रपौत्रांस्तान्भ्रातॄन्सुहृद एव च ॥ २
तमश्रुपरिपूर्णाक्षं वेपमानमचेतसम् ।
सुहृदो भृशसंविग्नाः सांत्वयांचक्रिरे तदा ॥ ३
'कृत्वा तु विधिवत्तेषां पुत्राणाममितौजसाम् ।
प्रेतकार्याणि सर्वेषां बभूव भृशदुःखितः ॥' ४
तस्मिन्मुहूर्ते जवनैर्वाजिभिर्हेममालिभिः ।
नकुलः कृष्णया सार्धमुपायात्परमार्तया ॥ ५
उपप्लाव्यं गता सा तु श्रुत्वा सुमहदप्रियम् ।
तदा विनाशं सर्वेषां पुत्राणां व्यथितेन्द्रिया ॥ ६
कम्पमानेव कदली वातेनाभिसमीरिता ।
कृष्णा राजानमासाद्य शोकार्ता न्यपतद्भुवि ॥ ७
न बभौ वदनं तस्या रुदन्त्याः शोककर्शितम् ।
फुल्लपद्मपलाशाक्ष्या मेघावृत इवोडुराट् ॥ ८
ततस्तां पतितां दृष्ट्वा संरम्भी सत्यविक्रमः ।
बाहुभ्यां परिजग्राह समुत्पत्य वृकोदरः ॥ ९
सा समाश्वासिता तेन भीमसेनेन भामिनी ।
रुदती पाण्डवज्येष्ठमिदं वचनमब्रवीत् ॥ १०
दिष्ट्या राजन्नवाप्येमामखिलां भोक्ष्यसे महीम् ।
आत्मजान्क्षत्रधर्मेण संप्रदाय यमाय वै ॥ ११
दिष्ट्या सर्वास्त्रकुशलं मत्तमातङ्गगामिनम् ।
अवाप्य पृथिवीं कृत्स्नां सौभद्रं न स्मरिष्यसि ॥ १२
आत्मजान्क्षत्रधर्मेण श्रुत्वा शूरान्निपातितान् ।
स्थितो राज्ये मया सार्धं विहरन्न स्मरिष्यसि ॥ १३
प्रसुप्तानां वधं श्रुत्वा द्रौणिना पापकर्मणा ।
शोको मां दहते गाढो हुताशन इवाश्रयम् ॥ १४
तस्य पापकृतो द्रौणेर्न चेदद्य दुरात्मनः ।
ह्रियते सानुबन्धस्य युधि विक्रम्य जीवितम् ॥ १५
इहैव प्रायमासिष्ये तन्निबोधत पाण्डवाः ।
न चेत्फलमवाप्नोति द्रौणिः पापस्य कर्मणः ॥ १६
एवमुक्त्वा ततः कृष्णा पाण्डवं प्रत्युपाविशत् ।
युधिष्ठिरं याज्ञसेनी धर्मराजं यशस्विनी ॥ १७
दृष्ट्वोपविष्टां राजा तु पाण्डवो महिषीं प्रियाम् ।
प्रत्युवाच स धर्मात्मा द्रौपदीं चारुदर्शनाम् ॥ १८
क्षत्रधर्मेण धर्मज्ञे प्राप्तास्ते निधनं शुभे ।
पुत्रास्ते भ्रातरश्चैव तान्न शोचितुमर्हसि ॥ १९
स कल्याणि वनं दुर्गं दूरं द्रौणिरितो गतः ।
तस्य त्वं पातनं सङ्ख्ये कथं ज्ञास्यसि शोभने ॥ २०
द्रौपद्युवाच ।
द्रोणपुत्रस्य सहजो मणिः शिरसि मे श्रुतः ।
निहत्य सङ्ख्ये तं पापं पश्येयं मणिमाहृतम् ।
द्रौणेः शिरस उत्कृत्य जीवेयमिति मे मतिः ॥ २१
इत्युक्त्वा पाण्डवं कृष्णा राजानं चारुदर्शना ।
भीमसेनकरे स्पृष्ट्वा कुपिता वाक्यमब्रवीत् ॥ २२
त्रातुमर्हसि मां भीम क्षत्रधर्ममनुस्मरन् ।
जहि तं पापकर्माणं शम्बरं मघवानिव ॥ २३
न हि ते विक्रमे तुल्यः पुमानस्तीह कश्चन ।
श्रुतं तत्सर्वलोकेषु परमव्यसने तथा ॥ २४
द्वीपोऽभूस्त्वं हि पार्थानां नगरे वारणावते ।

दिष्ट्येति । पुत्रनाशापेक्षया राज्यप्राप्तिसुख तव महदित्य- धिक्षेपः ॥ ११ ॥

हिडिम्बदर्शने चैव तथा त्वमभवो गतिः ॥ २५
तथा विराटनगरे कीचकेन भृशार्दिताम् ।
मामप्युद्धृतवान्कृच्छ्रात्पौलोमीं मघवानिव ॥ २६
यथैतान्यकृथाः पार्थ महाकर्माणि वै पुरा ।
तथा द्रौणिममित्रघ्न विनिहत्य सुखी भव ॥ २७
वैशंपायन उवाच ।
तस्या बहुविधं दुःखं निशम्य परिदेवितम् ।
न चामर्षत कौन्तेयो भीमसेनो महाबलः ॥ २८
स काञ्चनविचित्राङ्गमारुरोह महारथम् ।
आदाय रुचिरं चित्रं समार्गणगुणं धनुः ॥ २९
नकुलं सारथिं कृत्वा द्रोणपुत्रवधे धृतः ।
विस्फार्य सशरं चापं तूर्णमश्वानचोदयत् ॥ ३०
ते हयाः पुरुषव्याघ्र दीप्यमानाः स्वतेजसा ।
वहन्तः सहसा जग्मुर्हरयः शीघ्रगामिनः ॥ ३१
शिबिरात्स्वाद्गृहीत्वा स रथस्य पदमच्युतः ।
'द्रोणपुत्रगतेनाशु ययौ मार्गेण भारत ॥' ३२

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ॥ १२ ॥

द्रौणिजिघांसया भीमे प्रतिगते कृष्णेन युधिष्ठिरंप्रति द्रौणिदौश्शील्यादिकथनपूर्वकं भीमस्य ततो रक्षणीयत्वकथनम् ॥ १ ॥

वैशंपायन उवाच ।
तस्मिन्प्रयाते दुर्धर्षे यदूनामृषभस्ततः ।
अब्रवीत्पुण्डरीकाक्षः कुन्तीपुत्रं युधिष्ठिरम् ॥ १
एष पाण्डव ते भ्राता पुत्रशोकपरायणः ।
जिघांसुर्द्रौणिमाक्रन्दे एक एवाभिधावति ॥ २
भीमः प्रियस्ते सर्वेभ्यो भ्रातृभ्यो भरतर्षभ ।
तं कृच्छ्रगतमद्य त्वं कस्मान्नाभ्युपपद्यसे ॥ ३
यत्तदाचष्ट पुत्राय द्रोणः परपुरंजयः ।
अस्त्रं ब्रह्मशिरो नाम दहेत पृथिवीमपि ॥ ४
तन्महात्मा महाभागः केतुः सर्वधनुष्मताम् ।
प्रत्यपादयदाचार्यः प्रीयमाणो धनञ्जयम् ॥ ५
तं पुत्रोऽप्येक एवैनमन्वयाचदमर्षणः ।
ततः प्रोवाच पुत्राय नातिहृष्टमना इव ॥ ६
विदितं चापलं ह्यासीदात्मजस्य दुरात्मनः ।
सर्वधर्मविदाचार्यः सोऽन्वशासत्सुतं ततः ॥ ७
परमापद्गतेनापि न त्वया तात रणे ।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥ ८
इत्युक्तवान्गुरुः पुत्रं द्रोणः पश्चादथोक्तवान् ।
न त्वं जातु सतां मार्गे स्थातेति पुरुषर्षभ ॥ ९
स तदाज्ञाय दुष्टात्मा पितुर्वचनमप्रियम् ।
निराशः सर्वकल्याणैः शोकात्पर्यचरन्महीम् ॥ १०
ततस्तदा कुरुश्रेष्ठ वनस्थे त्वयि भारत ।
अवसद्द्वारकामेत्य वृष्णिभिः परमार्चितः ॥ ११
स कदाचित्समुद्रान्ते वसन्द्वारवतीमनु ।
एक एकं समागम्य मामुवाच हसन्निव ॥ १२
यत्तदुग्रं तपः कृष्ण चरन्नमितविक्रमः ।
अगस्त्याद्भारताचार्यः प्रत्यपद्यत मे पिता ॥ १३
अस्त्रं ब्रह्मशिरो नाम देवगन्धर्वपूजितम् ।
तदद्य मयि दाशार्ह यथा पितरि मे तथा ॥ १४
अस्मत्तस्तदुपादाय दिव्यमस्त्रं यदूत्तम ।
ममाप्यस्त्रं प्रयच्छ त्वं चक्रं रिपुहणं रणे ॥ १५
स राजन्प्रीयमाणेन मयाप्युक्तः कृताञ्जलिः ।
याचमानः प्रयत्नेन मत्तोऽस्त्रं भरतर्षभ ॥ १६
देवदानवगन्धर्वमनुष्यपतगोरगाः ।
न समा मम वीर्यस्य शतांशेनापि पिण्डिताः ॥ १७
इदं धनुरियं शक्तिरिदं चक्रमियं गदा ।
यद्यदिच्छसि चेदस्त्रं मत्तस्तत्तद्ददामि ते ॥ १८
यच्छक्तोपि समुद्यन्तुं प्रयोक्तुमपि वा रणे ।

चोदिता वातरहस इति झ पाठ ॥ ३१ ॥ पद गमनमार्गचिह्न गृहीत्वालक्ष्य ॥ ३२ ॥ एकादशोऽध्याय ॥ ११ ॥

आक्रन्दे सग्रामे ॥ २ ॥ स्थाता स्थास्यसि ॥ ९ ॥

तद्गृहाण विनाऽस्त्रेण यन्मे दातुमभीप्ससि ॥ १९
स सुनाभं सहस्रारं वज्रनाभमयस्मयम् ।
वव्रे चक्रं महाभागो मत्तः स्पर्धन्मया सह ॥ २०
गृहाण चक्रमित्युक्तो मया तु तदनन्तरम् ।
जग्राहोत्पत्य सहसा चक्रं सव्येन पाणिना ॥ २१
न चैनमशकत्स्थानात्संचालयितुमप्युत ।
अथैनं दक्षिणेनापि ग्रहीतुमुपचक्रमे ॥ २२
सर्वयत्नेन तेनापि गृह्य नैनमकम्पयत् ॥ २३
ततः सर्वबलेनापि यदैनं न शशाक ह ।
उद्यन्तुं वा चालयितुं द्रौणिः परमदुर्मनाः ।
कृत्वा यत्नं परिश्रान्तः स न्यवर्तत भारत ॥ २४
निवृत्तमनसं तस्मादभिप्रायाद्विचेतसम् ।
अहमामन्त्र्य संविग्नमश्वत्थामानमब्रुवम् ॥ २५
यः स दैवमनुष्येषु प्रमाणं परमं गतः ।
गाण्डीवधन्वा श्वेताश्वः कपिप्रवरकेतनः ॥ २६
यः साक्षाद्देवदेवेशं शितिकण्ठमुमापतिम् ।
द्वन्द्वयुद्धे पुरा जिष्णुस्तोषयामास शंकरम् ॥ २७
यस्मात्प्रियतरो नास्ति ममान्यः पुरुषो भुवि ।
नादेयं यस्य मे किंचिदपि प्राणान्महात्मनः ॥ २८
तेनापि सुहृदा ब्रह्मन्पार्थेनाक्लिष्टकर्मणा ।
नोक्तपूर्वमिदं वाक्यं यस्त्वं मामभिभाषसे ॥ २९
ब्रह्मचर्यं महद्घोरं तीर्त्वा द्वादशवार्षिकम् ।
हिमवत्पार्श्वमास्थाय यो मया तपसाऽऽर्जितः ॥ ३०
समानव्रतचारिण्यां रुक्मिण्यां योऽन्वजायत ।
सनत्कुमारस्तेजस्वी प्रद्युम्नो नाम मे सुतः ॥ ३१
तेनाप्येतन्महद्दिव्यं चक्रमप्रतिमं रणे ।
न प्रार्थितमभून्मूढ तदिदं प्रार्थितं त्वया ॥ ३२
रामेणातिबलेनैतन्नोक्तपूर्वं कदाचन ।
न गदेन न साम्बेन यदिदं प्रार्थितं त्वया ॥ ३३
द्वारकावासिभिश्चान्यैर्वृष्ण्यन्धकमहारथैः ।
नोक्तपूर्वमिदं क्षुद्रं तदिदं प्रार्थितं त्वया ॥ ३४
भारताचार्यपुत्रस्त्वं मानितः सर्वयादवैः ।
चक्रेण रथिनां श्रेष्ठ कं नु तात युयुत्ससे ॥ ३५
एवमुक्तो मया द्रौणिर्मामिदं प्रत्युवाच ह ।
प्रयुज्य भवते पूजां योत्स्ये कृष्ण त्वया सह ॥ ३६
प्रार्थितं ते मया चक्रं देवदानवपूजितम् ।
अजेयः स्यामिति विभो सत्यमेतद्ब्रवीमि ते ॥ ३७
सोऽहं तदुर्लभं चक्रमनवाप्यैव केशव ।
प्रतियास्यामि गोविन्द शिवेनाभिवदस्व माम् ॥ ३८
एतत्सुनाभं भोजानामृषभेण त्वया धृतम् ।
चक्रमप्रतिचक्रेण भुवि नान्योऽभिपद्यते ॥ ३९
एतावदुक्त्वा द्रौणिर्मां युग्यानश्वान्धनानि च ।
आदायोपययौ काले रत्नानि विविधानि च ॥ ४०
स संरम्भी दुरात्मा च चपलः क्रूर एव च ।
वेद चास्त्रं ब्रह्मशिरस्तस्माद्रक्ष्यो वृकोदरः ॥ ४१

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः ॥ १३ ॥

कृष्णादिभिर्भागीरथीतीरे व्याससमीपसमासीनद्रौणिदर्शनम् ॥ १ ॥ तद्दर्शिना द्रौणिना अपाण्डवहेतोर्ब्रह्मशिरोऽस्त्रप्रयोगः ॥ २ ॥

वैशंपायन उवाच ।
एवमुक्त्वा कुरुश्रेष्ठं सर्वयादवनन्दनः ।
सर्वायुधवरोपेतमारुरोह रथोत्तमम् ॥ १
युक्तं परमकाम्भोजैस्तुरगैर्हेममालिभिः ।
उदितादित्यसंकाशं सर्वरत्नविभूषितम् ॥ २
दक्षिणे ह्यावहच्छैब्यः सुग्रीवः सव्यतो धुरम् ।
पार्ष्णिवाहौ तु तस्यास्तां मेघपुष्पबलाहकौ ॥ ३
विश्वकर्मकृता दिव्या रत्नधातुविभूषिता ।
उच्छ्रिता च रथे तस्मिन्ध्वजयष्टिरदृश्यत ॥ ४
वैनतेयः स्थितस्तस्यां प्रभामण्डलरश्मिवान् ।

मे मह्यं दातुमिच्छसि तेन विनापि गृहाण । त्वदीयेऽस्त्रे ममेच्छा नास्तीति भाव. ॥ १९ ॥ द्वादशोऽध्यायः ॥ १२ ॥

तस्य सत्यवतः केतुर्भुजगारिरदृश्यत ॥ ५
अथारोहद्धृषीकेशः केतुः सर्वधनुष्मताम् ।
अर्जुनः स च धर्मात्मा कुरुराजो युधिष्ठिरः ॥ ६
अशोभेतां महात्मानौ दाशार्हमभितः स्थितौ ।
रथस्थं शार्ङ्गधन्वानमश्विनाविव वासवम् ॥ ७
उभावारोप्य दाशार्हः स्यन्दनं लोकपूजितम् ।
प्रतोदेन जवोपेतान्परमाश्वानचोदयत् ॥ ८
ते हयाः सहसोत्पेतुर्गृहीत्वा स्यन्दनोत्तमम् ।
आस्थितं पाण्डवेयाभ्यां यदूनामृषभेण च ॥ ९
वहतां शार्ङ्गधन्वानमश्वानां शीघ्रगामिनाम् ।
प्रादुरासीन्महाञ्शब्दः पक्षिणां पततामिव ॥ १०
ते समर्था महाबाहुं क्षणेन भरतर्षभ ।
भीमसेनं महेष्वासमनुसस्रुः सुवेगिताः ॥ ११
क्रोधदीप्तं तु कौन्तेयं द्विषदर्थे समुद्यतम् ।
नाशक्नुवन्वारयितुं समेत्यापि महारथाः ॥ १२
स तेषामग्रतः शूरः श्रीमतां दृढधन्विनाम् ।
ययौ भागीरथीतीरं हरिभिर्भृशवेगितैः ।
यत्र स श्रूयते द्रौणिः पुत्रहन्ता दुरात्मवान् ॥ १३
स ददर्श महात्मानमुदकान्ते यशस्विनम् ।
कृष्णद्वैपायनं व्यासमासीनमृषिभिः सह ॥ १४
तं चैव क्रूरकर्माणं घृताक्तं कुशचीरिणम् ।
रजसा ध्वस्तमासीनं ददर्श द्रौणिमन्तिके ॥ १५
तमभ्यधावत्कौन्तेयः प्रगृह्य सशरं धनुः ।
भीमसेनो महाबाहुस्तिष्ठतिष्ठेति चाब्रवीत् ॥ १६
तं दृष्ट्वा भीमकर्माणं प्रगृहीतशरासनम् ।
भ्रातरौ पृष्ठतश्चास्य जनार्दनरथे स्थितौ ।
व्यथितात्माऽभवद्द्रौणिः प्राप्तं चेदममन्यत ॥ १७
स तदिव्यमदीनात्मा परमास्त्रमचिन्तयत् ।
जग्राह च शरैषीकां द्रौणिः सव्येन पाणिना ॥ १८
स तामापदमासाद्य दिव्यमस्त्रमुदैरयत् ।
अमृष्यमाणस्ताञ्छूरान्दिव्यायुधधरान्स्थितान् ।
अपाण्डवायेति रुषा वाचमुत्सृज्य दारुणम् ॥ १९
इत्युक्त्वा राजशार्दूल द्रोणपुत्रः प्रतापवान् ।
सर्वलोकप्रमोहार्थं तदस्त्रं प्रमुमोच ह ॥ २०
ततस्तस्यामिषीकायां पावकः समजायत ।
प्रधक्ष्यन्निव लोकांस्त्रीन्कालान्तकयमोपमः ॥ २१

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः ॥ १४ ॥

अर्जुनेन कृष्णाज्ञया द्रौण्यस्त्रप्रत्यस्त्रप्रयोगः ॥ १ ॥

वैशंपायन उवाच ।
इङ्गितेनैव दाशार्हस्तस्याभिप्रायमादितः ।
द्रौणेर्बुद्ध्वा महाबाहुरर्जुनं प्रत्यभाषत ॥ १
अर्जुनार्जुन यद्दिव्यमस्त्रं ते हृदि वर्तते ।
द्रोणोपदिष्टं तस्यायं कालः संप्रति पाण्डव ॥ २
भ्रातॄणामात्मनश्चैव परित्राणाय भारत ।
विसृजैतत्त्वमप्याजावस्त्रमस्त्रनिवारणम् ॥ ३
केशवेनैवमुक्तोऽथ पाण्डवः परवीरहा ।
अवातरद्रथात्तूर्णं प्रगृह्य सशरं धनुः ॥ ४
पूर्वमाचार्यपुत्राय ततोऽनन्तरमात्मने ।
भ्रातृभ्यश्चैव सर्वेभ्यः स्वस्तीत्युक्त्वा परंतपः ॥ ५
देवताभ्यो नमस्कृत्य गुरुभ्यश्चैव सर्वशः ।
उत्ससर्ज शिवं ध्यायन्नस्त्रमस्त्रेण शाम्यताम् ॥ ६
ततस्तदस्त्रं सहसा सृष्टं गाण्डीवधन्वना ।
प्रजज्वाल महार्चिष्मद्युगान्तानलसन्निभम् ॥ ७
तथैव द्रोणपुत्रस्य तदस्त्रं तिग्मतेजसः ।
प्रजज्वाल महाज्वालं तेजोमण्डलसंवृतम् ॥ ८
निर्घाता बहवश्चासन्पेतुरुल्काः सहस्रशः ।

अपाण्डवाय पाण्डवानामभावाय ॥ १९ ॥
सौप्ति० ४

त्रयोदशोऽध्याय ॥ १३ ॥

महद्भयं च भूतानां सर्वेषां समजायत ॥ ९
सशब्दमभवद्व्योम ज्वालामालाकुलं भृशम् ।
चचाल च मही कृत्स्ना सपर्वतवनद्रुमा ॥ १०
तावस्त्रतेजसा लोकांस्त्रासयन्तौ ततः स्थितौ ।
महर्षी सहितौ तत्र दर्शयामासतुस्तदा ॥ ११
नारदः सर्वधर्मात्मा भरतानां पितामहः ।
उभौ शमयितुं वीरौ भारद्वाजधनञ्जयौ ॥ १२
तौ मुनी सर्वधर्मज्ञौ सर्वभूतहितैषिणौ ।
दीप्तयोरस्त्रयोर्मध्ये स्थितौ परमतेजसौ ॥ १३
तदन्तरमनाधृष्यावुपगम्य यशस्विनौ ।
आस्तामृषिवरौ तत्र ज्वलिताविव पावकौ ॥ १४
प्राणभृद्भिरनाधृष्यौ देवदानवसंमतौ ।
अस्त्रतेजः शमयितुं लोकानां हितकाम्यया ॥ १५
ऋषी ऊचतुः ।
महास्त्रविदुषः पूर्वे येऽप्यतीता महारथाः ।
नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथंचन ।
किमिदं साहसं वीरौ कृतवन्तौ महात्ययम् ॥ १६

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः ॥ १५ ॥

अर्जुनेन व्यासनारदभावानुरोधेन स्वप्रयुक्तब्रह्मशिरोऽस्त्रप्रतिसहारः ॥ १ ॥ कृष्णेनाश्वत्थामानं प्रति उत्तरागर्भे ऐषीकास्त्रपातेऽपि मृतशिशोः स्वेन समुज्जीवनप्रतिज्ञा ॥ २ ॥ ब्रह्मचर्याभावादस्त्रप्रतिसंहारासमर्थेन द्रौणिना व्यासकृष्णावनादृत्य पाण्डवगर्भेष्वैषीकास्त्रोत्सर्जनम् ॥ ३ ॥

वैशंपायन उवाच ।
दृष्ट्वैव मुनिशार्दूलौ तावग्निसमतेजसौ ।
'गाण्डीवधन्वा संचिन्त्य प्राप्तकालं महारथः ।'
संजहार शरं दिव्यं त्वरमाणो धनञ्जयः ॥ १
उवाच वचनं श्रेष्ठस्तावृषी प्राञ्जलिस्तदा ।
प्रमुक्तमस्त्रमस्त्रेण शाम्यतामिति वै मया ॥ २
संहृते परमास्त्रेऽस्मिन्सर्वानस्मानशेषतः ।
पापकर्मा ध्रुवं द्रौणिः प्रधक्ष्यत्यस्त्रतेजसा ॥ ३
यदत्र हितमस्माकं लोकानां चैव सर्वथा ।
भवन्तौ देवसंकाशौ तथा संमन्तुमर्हतः ॥ ४
इत्युक्त्वा संजहारास्त्रं पुनरेव धनञ्जयः ।
संहारो दुष्करस्तस्य देवैरपि हि संयुगे ॥ ५
विसृष्टस्य रणे तस्य परमास्त्रस्य संग्रहे ।
अशक्तः पाण्डवादन्यः साक्षादपि शतक्रतुः ॥ ६
ब्रह्मतेजोऽद्भवं तद्धि विसृष्टमकृतात्मना ।
न शक्यमावर्तयितुं ब्रह्मचर्यव्रताद्ते ॥ ७
अचीर्णब्रह्मचर्यो यः सृष्ट्वाऽऽवर्तयते पुनः ।
तदस्त्रं सानुबन्धस्य मूर्धानं तस्य कृन्तति ॥ ८
ब्रह्मचारी व्रती चापि दुरवापमवाप्य तत् ।
परमव्यसनार्तोऽपि नार्जुनोऽस्त्रं व्यमुञ्चत ॥ ९
सत्यव्रतधरः शूरो ब्रह्मचारी च पाण्डवः ।
गुरुवर्ती च तेनास्त्रं संजहारार्जुनः पुनः ॥ १०
द्रौणिरप्यथ संप्रेक्ष्य सोऽन्तरा तावृषी स्थितौ ।
न शशाक पुनर्घोरमस्त्रं संहर्तुमोजसा ॥ ११
अशक्तः प्रतिसंहारे परमास्त्रस्य संयुगे ।
द्रौणिर्दीनमना राजन्द्वैपायनमभाषत ॥ १२
उत्तमव्यसनार्तेन प्राणत्राणमभीप्सुना ।
मयैतदस्त्रमुत्सृष्टं भीमसेनभयान्मुने ॥ १३
अधर्मश्च कृतोऽनेन धार्तराष्ट्रं जिघांसता ।
मिथ्याचारेण भगवन्भीमसेनेन संयुगे ॥ १४
अतः सृष्टमिदं ब्रह्मन्मयाऽस्त्रमकृतात्मना ।
तस्य भूयोऽपि संहारं कर्तुं नाहमिहोत्सहे ॥ १५
निसृष्टं हि मया दिव्यमेतदस्त्रं दुरासदम् ।
अपाण्डवायेति मुने वह्नितेजोऽनुमन्त्र्य वै ॥ १६
तदिदं पाण्डवेयानामन्तायैवाभिसंहितम् ।

आवर्तयते उपसहरति ॥ ८ ॥

अद्य पाण्डुसुतान्सर्वाञ्जीविताद्भ्रंशयिष्यति ॥ १७
कृतं पापमिदं ब्रह्मन्रोषाविष्टेन चेतसा ।
वधमाशास्य पार्थानां मयास्त्रं सृजता रणे ॥ १८
व्यास उवाच ।
अस्त्रं ब्रह्मशिरस्तात विद्धान्पार्थो धनञ्जयः ।
उत्सृष्टवानहिंसार्थं न रोषेण तवाहवे ॥ १९
अस्त्रमस्त्रेण तु रणे तव संशमयिष्यता ।
विसृष्टमर्जुनेनेदं पुनश्च प्रतिसंहृतम् ॥ २०
ब्रह्मास्त्रमप्यवाप्यैतदुपदेशात्पितुस्तव ।
क्षत्रधर्मान्महाबाहुर्नाकम्पत धनञ्जयः ॥ २१
एवं धृतिमतः साधोः सर्वास्त्रविदुषः सतः ।
सभ्रातृबन्धोः कस्मात्त्वं वधमस्य चिकीर्षसि ॥ २२
अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते ।
समा द्वादश पर्जन्यस्तद्राष्ट्रं नाभिवर्षति ॥ २३
एतदर्थं महाबाहुः शक्तिमानपि पाण्डवः ।
न विहन्यात्तदस्त्रं तु प्रजाहितचिकीर्षया ॥ २४
पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव नः ।
तस्मात्संहर दिव्यं त्वमस्त्रमेतन्महाभुज ॥ २५
अरोषस्तव चैवास्तु पार्थाः सन्तु निरामयाः ।
न ह्यधर्मेण राजर्षिः पाण्डवो जेतुमिच्छति ॥ २६
मणिं चैव प्रयच्छाद्य यस्ते शिरसि तिष्ठति ।
एतदादाय ते प्राणान्प्रतिदास्यन्ति पाण्डवाः ॥ २७
द्रौणिरुवाच ।
पाण्डवैर्यानि रत्नानि यच्चान्यत्कौरवैर्धनम् ।
अवाप्तमिह तेभ्योऽयं मणिर्मम विशिष्यते ॥ २८
यमाबध्य भयं नास्ति शस्त्रव्याधिक्षुधाश्रयम् ।
देवेभ्यो दानवेभ्यो वा नागेभ्यो वा कथंचन ॥ २९
न च रक्षोगणभयं न तस्करभयं तथा ।
एवंवीर्यो मणिरयं न मे त्याज्यः कथंचन ॥ ३०
यत्तु मे भगवानाह तन्मे कार्यमनन्तरम् ।
अयं मणिरयं चाहमिषीका तु पतिष्यति ।
गर्भेषु पाण्डुपुत्राणामुत्तरायास्तथोदरे ॥ ३१
वैशंपायन उवाच ।
प्राह द्रोणसुतं तत्र व्यासः परमदुर्मनाः ॥ ३२
एवं कुरु न चान्यत्र बुद्धिः कार्या कथंचन ।
गर्भेषु पाण्डवेयानां विसृज्यैतदुपारम ॥ ३३
'तमुवाच हृषीकेशः पाण्डवानां हिते मतः ।
भविष्यमेकमुत्सृज्य गर्भेष्वस्त्रं निपात्यताम् ॥ ३४
अहमेनं ददाम्येषां पिण्डदं कीर्तिवर्धनम् ।
राजर्षिं पुण्यकर्माणमनेकक्रतुयाजिनम् ॥ ३५
एवं कुरु न चान्या ते बुद्धिः कार्या कथंचन ।
आगर्भात्पाण्डवेयानां कृत्वा पातं विनङ्क्ष्यति' ३६
एवं ब्रुवाणं गोविन्दं वृषभं सर्वसात्वताम् ।
द्रौणिः परमसंक्रुद्धः प्रत्युवाचेदमुत्तरम् ॥ ३७
नैतदेवं यदात्थ त्वं पक्षपातेन केशव ।
वचनात्पुण्डरीकाक्ष तव मद्वाक्यमन्यथा ॥ ३८
पतिष्यत्येतदस्त्रं वै गर्भे तस्या मयोद्यतम् ।
विराटदुहितुः कृष्ण यं त्वं रक्षितुमर्हसि ॥ ३९
वासुदेव उवाच ।
अमोघः परमास्त्रस्य पातस्त्वद्य भविष्यति ।
'अभिमन्योः सृजैषीकां गर्भस्थः शाम्यतां शिशुः ॥
अहमेनं मृतं जातं जीवयिष्यामि बालकम् ।'
स तु गर्भो मृतो जातो दीर्घमायुरवाप्स्यति ॥ ४१
'इत्युक्तः प्रत्युवाचैनं द्रोणपुत्रः स्मयन्निव ।
यद्यस्त्रदग्धं गोविन्द जीवयस्येवमस्त्विति ॥' ४२
ततः परममस्त्रं तु द्रौणिरुद्यतमाहवे ।
द्वैपायनमनादृत्य गर्भेषु प्रमुमोच ह ॥ ४३

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥

एव जीवितमादाय तव यास्यन्ति पाण्डवा. । इति क पाठ ॥ २७ ॥ मम वध्यभय नास्तीति क पाठ ॥ २९ ॥

पञ्चदशोऽध्याय ॥ १५ ॥

षोडशोऽध्यायः ॥ १६ ॥

कृष्णेन स्ववचनोल्लङ्घनेनास्त्रप्रयोक्तुरश्वत्थाम्नः शापदानं व्यासेन तदनुमोदनं च ॥ १ ॥ भीमेन द्रौणिमस्तकमणिदानेन द्रौपदीसमाश्वासनम् ॥ २ ॥ युधिष्ठिरेण द्रौपदीवचनात्स्वमस्तके तन्मणिधारणम् ॥ ३ ॥

वैशंपायन उवाच ।
तद्विज्ञाय हृषीकेशो विकृष्टं पापकर्मणा ।
हृष्यमाण इदं वाक्यं द्रौणिं प्रत्यब्रवीत्तदा ॥ १
विराटस्य सुतां पूर्वं स्नुषां गाण्डीवधन्वनः ।
उपप्लाव्यगतां दृष्ट्वा ऋतवाग्ब्राह्मणोऽब्रवीत् ॥ २
परिक्षीणेषु कुरुषु पुत्रस्तव भविष्यति ।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति ॥ ३
तस्य तद्वचनं साधोः सत्यमेतद्भविष्यति ।
परिक्षिद्भविता ह्येषां पुनर्वंशकरः सुतः ॥ ४
त्वां तु कापुरुषं पापं विदुः सर्वे मनीषिणः ।
असकृत्पापकर्माणं बालजीवितघातकम् ॥ ५
तस्मात्त्वमस्य पापस्य कर्मणः फलमाप्नुहि ।
त्रीणि वर्षसहस्राणि चरिष्यसि महीमिमाम् ॥ ६
अप्राप्नुवन्कचित्कांचित्संविदं जातु केनचित् ।
निर्जनानसहायस्त्वं देशान्प्रविचरिष्यसि ॥ ७
भवित्री न हि ते क्षुद्र जनमध्येषु संस्थितिः ।
पूयशोणितगन्धी च दुर्गकान्तारसंश्रयः ।
विचरिष्यसि पापात्मंश्चिरमेको वसुंधराम् ॥ ८
वयः प्राप्य परिक्षित्तु देवव्रतमवाप्य च ।
कृपाच्छारद्वताच्छूरः सर्वास्त्राण्युपपत्स्यते ॥ ९
विदित्वा परमास्त्राणि क्षत्रधर्मव्रते स्थितः ।
षष्टिं वर्षाणि धर्मात्मा वसुधां पालयिष्यति ॥ १०
इतश्चोर्ध्वं महाबाहुः कुरुराजो भविष्यति ।
परिक्षिन्नाम नृपतिर्मिषतस्ते सुदुर्मते ॥ ११
[अहं तं जीवयिष्यामि दग्धं शस्त्राग्नितेजसा ।]
पश्य मे तपसो वीर्यं सत्यस्य च नराधम ॥ १२

व्यास उवाच ।
यस्मादनार्य कृतं त्वयाऽस्मान्कर्म दारुणम् ।
ब्राह्मणस्य सतश्चेदं वृत्तमन्यायवर्तिनः ॥ १३
तस्माद्यद्देवकीपुत्र उक्तवानुत्तमं वचः ।
आलोकात्तव तद्भावि क्षुद्रकर्मन्व्रजेति ह ॥ १४
अश्वत्थामोवाच ।
सहैव भवता ब्रह्मन्स्थास्यामि पुरुषेष्विह ।
सत्यवागस्तु भगवानयं च पुरुषोत्तमः ॥ १५
वैशंपायन उवाच ।
प्रदायाथ मणिं द्रौणिः पाण्डवानां महात्मनाम् ।
जगाम विमनास्तेषां सर्वेषां पश्यतां वनम् ॥ १६
पाण्डवाश्च सदाशार्हास्तानृषीनभिवाद्य च ।
कृष्णद्वैपायनं चैव नारदं चैव पर्वतम् ॥ १७
द्रोणपुत्रस्य सहजं मणिमादाय सत्वराः ।
द्रौपदीमभ्यधावन्त प्रायोपेतां मनस्विनीम् ॥ १८
वैशंपायन उवाच ।
ततस्ते पुरुषव्याघ्राः सदश्वैरनिलोपमैः ।
अभ्ययुः सहदाशार्हाः शिबिरं पुनरेव हि ॥ १९
अवतीर्य रथेभ्यस्तु त्वरमाणा महारथाः ।
ददृशुर्द्रौपदीं हृष्टामार्तामार्ततराः स्वयम् ॥ २०
तामुपेत्य निरानन्दां दुःखशोकसमन्विताम् ।
परिवार्य व्यतिष्ठन्त पाण्डवाः सहकेशवाः ॥ २१
ततो राज्ञाऽभ्यनुज्ञातो भीमसेनो महाबलः ।
प्रददौ तं मणिं दिव्यं वचनं चेदमब्रवीत् ॥ २२
अयं भद्रे तव मणिः पुत्रहन्ता जितश्च ते ।
उत्तिष्ठ शोकमुत्सृज्य क्षात्रधर्ममनुस्मर ॥ २३

सविद सलापम् ॥ ७ ॥ प्रायोपेता मरणार्थं यो नियमस्तेनोपेताम् ॥ १८ ॥ हृष्टामश्वत्थाम्न. पराभवेन । आर्ता पुत्रादे. शोकेन ॥ २० ॥

प्रयाणे वासुदेवस्य शमार्थमसितेक्षणे ।
यान्युक्तानि त्वया भीरु वाक्यानि मधुघातिनि २४
नैव मे पतयः सन्ति न पुत्रा भ्रातरो न च ।
न वै त्वमिति गोविन्द शममिच्छति राजनि ॥ २५
उक्तवत्यसि तीव्राणि वाक्यानि पुरुषोत्तमम् ।
क्षत्रधर्मानुरूपाणि तानि संस्मर्तुमर्हसि ॥ २६
हतो दुर्योधनः पापो राज्यस्य परिपन्थिकः ।
दुःशासनस्य रुधिरं पीतं विस्फुरतो मया ॥ २७
वैरस्य गतमानृण्यं न स्म वाच्या विवक्षताम् ।
जित्वा मुक्तो द्रोणपुत्रो ब्राह्मण्याद्दौरवेण च ॥ २८
यशोऽस्य पतितं देवि शरीरं त्ववशेषितम् ।
वियोजितश्च मणिना भ्रंशितश्चायुधं भुवि ॥ २९
द्रौपद्युवाच ।
केवलानृण्यमाप्नाऽस्मि गुरुपुत्रो गुरुर्मम ।
शिरस्येतं मणिं राजा ग्रहीतुमनघोऽर्हति ॥ ३०
तं गृहीत्वा ततो राजा शिरस्येवाकरोत्तदा ।
गुरोरुच्छेषमित्येव द्रौपद्या वचनादपि ॥ ३१
ततो दिव्यं मणिवरं शिरसा धारयन्प्रभुः ।
शुशुभे स तदा राजा सचन्द्र इव पर्वतः ॥ ३२
उत्तस्थौ पुत्रशोकार्ता ततः कृष्णा मनस्विनी ।
कृष्णं चापि महाबाहुः परिपप्रच्छ धर्मराट् ॥ ३३

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः ॥ १७ ॥

युधिष्ठिरेण द्रौणेरेकस्य बहुमारणशक्तिप्रश्ने कृष्णेन रुद्रप्रसादादित्युक्त्वा रुद्रमहिमकथनम् ॥ १ ॥

वैशंपायन उवाच ।
हतेषु सर्वसैन्येषु सौप्तिके तै रथैस्त्रिभिः ।
शोचन्युधिष्ठिरो राजा दाशार्हमिदमब्रवीत् ॥ १
कथं नु कृष्ण पापेन क्षुद्रेण शठबुद्धिना ।
द्रौणिना निहताः सर्वे मम पुत्रा महारथाः ॥ २
तथा कृतास्त्रविक्रान्ताः संग्रामेष्वपलायिनः ।
द्रुपदस्यात्मजाश्चैव द्रोणपुत्रेण पातिताः ॥ ३
यस्य द्रोणो महेष्वासो न प्रादादाहवे मुखम् ।
निजघ्ने रथिनां श्रेष्ठं धृष्टद्युम्नं कथं नु सः ॥ ४
किंनु तेन कृतं कर्म तथायुक्तं नरर्षभ ।
यदेकः समरे सर्वानवधीन्नो गुरोः सुतः ॥ ५
श्रीभगवानुवाच ।
नूनं स देवदेवानामीश्वरेश्वरमव्ययम् ।
जगाम शरणं द्रौणिरेकस्तेनावधीद्बहून् ॥ ६
प्रसन्नो हि महादेवो दद्यादमरतामपि ।
वीर्यं च गिरिशो दद्याद्येनेन्द्रमपि शातयेत् ॥ ७
वेदाहं हि महादेवं तत्त्वेन भरतर्षभ ।
यानि चास्य पुराणानि कर्माणि विविधानि च ॥ ८
आदिरेष हि भूतानां मध्यमन्तश्च भारत ।
विचेष्टते जगच्चेदं सर्वमस्यैव कर्मणा ॥ ९
एवं सिसृक्षुर्भूतानि ददर्श प्रथमं विभुः ।
पितामहोऽब्रवीच्चैनं भूतानि सृज माचिरम् ॥ १०
हरिकेशस्तथेत्युक्त्वा दीर्घदर्शी तदा प्रभुः ।
दीर्घकालं तपस्तेपे मग्नोऽम्भसि महातपाः ॥ ११
सुमहान्तं ततः कालं प्रतीक्ष्यैनं पितामहः ।
स्रष्टारं सर्वभूतानां ससर्ज मनसाऽपरम् ॥ १२
सोऽब्रवीद्भ्रातरं दृष्ट्वा गिरिशं सुप्तमम्भसि ।
यदि मे नाग्रजोऽस्त्यन्यस्ततः स्रक्ष्याम्यहं प्रजाः १३
तमब्रवीत्पिता नास्ति त्वदन्यः पुरुषोऽग्रजः ।
स्थाणुरेष जले मग्नो विस्रब्धः कुरु वै प्रजाः ॥ १४

मधुघातिनि मधुदैत्यहन्तरि ॥ २४ ॥ विवक्षता वक्तुमिच्छता वाच्या निन्द्या नैव स्म ॥ २८ ॥ षोडशोऽध्यायः ॥ १६ ॥

भूतान्यन्वसृजत्सप्त दक्षः क्षिप्रं प्रजापतिः ।
यैरिमं व्यकरोत्सर्वं भूतग्रामं चतुर्विधम् ॥ १५
ताः सृष्टमात्राः क्षुधिताः प्रजाः सर्वाः प्रजापतिम् ।
विभक्षयिषवो राजन्सहसा प्राद्रवंस्तदा ॥ १६
स भक्ष्यमाणस्त्राणार्थी पितामहमुपाद्रवत् ।
अभ्यो मां भगवांस्त्रातु वृत्तिरासां विधीयताम् १७
ततस्ताभ्यो ददावन्नमोषधीः स्थावराणि च ।
जङ्गमानि च भूतानि दुर्बलानि बलीयसाम् ॥ १८
विहितान्नाः प्रजास्तास्तु जग्मुस्तुष्टा यथागतम् ।
ततो ववृधिरे राजन्प्रीतिमत्यः स्वयोनिषु ॥ १९
भूतग्रामे विवृद्धे तु सृष्टे देवासुरे तदा ।
उदतिष्ठज्जलाज्ज्येष्ठः प्रजाश्चेमा ददर्श सः ॥ २०
बहुरूपाः प्रजाः सृष्टा विवृद्धाश्च स्वतेजसा ।
चुक्रोध बलवद्दृष्ट्वा लिङ्गं स्वं चाप्यविध्यत ॥ २१
तत्प्रविद्धं तथा भूमौ तथैव प्रत्यतिष्ठत ।
तमुवाचाव्ययो ब्रह्मा वचोभिः शमयन्निव ॥ २२
किं कृतं सलिले शर्व चिरकालस्थितेन ते ।
किमर्थं चेदमुत्पाद्य लिङ्गं भूमौ प्रवेशितम् ॥ २३
सोऽब्रवीज्जातसंरम्भस्तथा लोकगुरुर्गुरुम् ।
प्रजाः सृष्टाः परेणेमाः किं करिष्याम्यनेन वै ॥ २४
तपसाऽधिगतं चान्नं प्रजार्थं मे पितामह ।
ओषध्यः परिवर्तेरन्यथैवं सततं प्रजाः ॥ २५
एवमुक्त्वा स सक्रोधो जगाम विमना भवः ।
गिरेर्मुञ्जवतः पादं तपस्तप्तुं महातपाः ॥ २६

॥ इति श्रीमन्महाभारते सौप्तिकपर्वणि ऐषीकपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः ॥ १८ ॥

कृष्णेन युधिष्ठिरंप्रति रुद्रस्य कोपप्रसादाभ्यां देवानां यज्ञनाशतत्प्रवृत्तिकथनपूर्वक तत एवाश्वत्थामद्वारा पुत्रादिवधसंभवकथनम् ॥ १ ॥

श्रीभगवानुवाच ।
ततो देवयुगेऽतीते देवा वै समकल्पयन् ।
यज्ञवेदप्रमाणेन विधिवद्यष्टुमीप्सवः ॥ १
कल्पयामासुरथ ते साधनानि हवींषि च ।
भागार्हा देवताश्चैव यज्ञियं द्रव्यमेव च ॥ २
ता वै रुद्रमजानन्त्यो याथातथ्येन देवताः ।
नाकल्पयन्त देवस्य स्थाणोर्भागं नराधिप ॥ ३
सोऽकल्प्यमाने भागे तु कृत्तिवासा मखेऽमरैः ।
तपसा यज्ञमन्विच्छन्धनुरादौ ससर्ज ह ॥ ४
लोकयज्ञः क्रियायज्ञो गृहयज्ञः सनातनः ।
पञ्चभूतनृयज्ञश्च जज्ञे सर्वमिदं जगत् ॥ ५
लोकयज्ञैर्नृयज्ञैश्च कपर्दी विदधे धनुः ।
धनुः सृष्टमभूत्तस्य षष्टिकिष्कुप्रमाणतः ॥ ६
वषट्कारोऽभवज्या तु धनुषस्तस्य भारत ।
यज्ञाङ्गानि च चत्वारि तस्य संनहनेऽभवन् ॥ ७
ततः क्रुद्धो महादेवस्तदुपादाय कार्मुकम् ।
आजगामाथ तत्रैव यत्र देवाः समीजिरे ॥ ८
तमात्तकार्मुकं दृष्ट्वा ब्रह्मचारिणमव्ययम् ।
विव्यथे पृथिवी देवी पर्वताश्च चकम्पिरे ॥ ९
न ववौ पवनश्चैव नाग्निर्जज्वाल वैधितः ।
व्यभ्रमच्चापि संविग्नं दिवि नक्षत्रमण्डलम् ॥ १०
न बभौ भास्करश्चापि सोमः श्रीमुक्तमण्डलः ।
तिमिरेणाकुलं सर्वमाकाशं चाभवद्भृतम् ॥ ११
अभिभूतास्ततो देवा विषयान्न प्रजज्ञिरे ।

लोकयज्ञो लोकेषणा सर्वो मां साधुमेव जानात्विति वासनारूपः । क्रियायज्ञ. गर्भाधानादिसंस्काररूप· । गृहयज्ञ· पत्नीसाध्याग्निहोत्रादि· । पञ्चभूतनृयज्ञः पञ्चभूताना गुणैः शब्दादिभिर्या नृणा प्रीतिस्तद्रूपः । विषयज सुखमित्यर्थ. । एतैरेव चतुर्भिर्यज्ञै सर्व जगत्सृष्टम् ॥ ५ ॥ तत्र मध्यमयो. शास्त्रोक्तयोर्यज्ञयोर्नाशार्थ प्रथमचरमयज्ञाभ्यामीश्वरो धनुः कृतवान् । किष्कुर्हस्त ॥ ६ ॥ अष्टादशोऽध्याय ॥ १८ ॥

न प्रत्यभाच्च यज्ञः स देवतास्त्रेसिरे तथा ॥ १२
ततः स यज्ञं विव्याध रौद्रेण हृदि पत्त्रिणा ।
अपक्रान्तस्ततो यज्ञो मृगो भूत्वा सपावकः ॥ १३
स तु तेनैव रूपेण दिविस्थो वै व्यराजत ।
अन्वीयमानो रुद्रेण युधिष्ठिर नभस्तले ॥ १४
अपक्रान्ते ततो यज्ञे संज्ञा न प्रत्यभात्सुरान् ।
नष्टसंज्ञेषु देवेषु न प्राज्ञायत किंचन ॥ १५
त्र्यम्बकः सवितुर्बाहू भगस्य नयने तथा ।
पूष्णश्च दशनान्क्रुद्धो धनुष्कोट्या व्यशातयत् ॥ १६
प्राद्रवन्त ततो देवा यज्ञाङ्गानि च सर्वशः ।
केचित्तत्रैव घूर्णन्तो गतासव इवाभवन् ॥ १७
स तु विद्राव्य तत्सर्वं शितिकण्ठोऽवहस्य च ।
अवष्टभ्य धनुष्कोटिं रुरोध विबुधांस्ततः ॥ १८
ततो वागमैरुक्ता ज्यां तस्य धनुषोऽच्छिनत् ।
अथ तत्सहसा राजंश्छिन्नज्यं विस्फुरद्धनुः ॥ १९
ततो विधनुषं देवा देवश्रेष्ठमुपागमन् ।
शरणं सह यज्ञेन प्रसादं चाकरोत्प्रभुः ॥ २०
ततः प्रसन्नो भगवान्प्रास्यत्कोपं जलाशये ।
स जलं पावको भूत्वा शोषयत्यनिशं प्रभो ॥ २१
भगस्य नयने चैव बाहू च सवितुस्तथा ।
प्रादात्पूष्णश्च दशनान्पुनर्यज्ञांश्च पाण्डव ॥ २२
ततः सुस्थमिदं सर्वं बभूव पुनरेव हि ।
सर्वाणि च हवींष्यस्य देवा भागमकल्पयन् ॥ २३
तस्मिन्क्रुद्धेऽभवत्सर्वमसुस्थं भुवनं प्रभो ।
प्रसन्ने च पुनः सुस्थं जगद्भवति भारत ॥ २४
ततस्ते निहताः सर्वे तव पुत्रा महारथाः ।
अन्ये च बहवः शूराः पाञ्चालस्य पदानुगाः ॥ २५
न तन्मनसि कर्तव्यं न च तद्द्रौणिना कृतम् ।
महादेवप्रसादः स कुरु कार्यमनन्तरम् ॥ २६

॥ इति श्रीमन्महाभारते शतसाहस्रिकायां सहितायां वैयासिक्यां सौप्तिकपर्वणि ऐषीकपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥

समाप्तं ऐषीकपर्व ॥ २ ॥ सौप्तिकपर्व च समाप्तम् ॥ १० ॥

अस्यानन्तरं स्त्रीपर्व भविष्यति
तस्यायमाद्यः श्लोकः ।
जनमेजय उवाच ।

हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
धृतराष्ट्रो महाराज श्रुत्वा किमकरोन्मुने ॥ १

इदं सौप्तिकपर्व कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८२९ सन १९०७.

SRIMANMAHABHARATAM

A NEW EDITION

MAINLY BASED ON

THE SOUTH INDIAN TEXTS,

With footnotes and Readings.

STRIPARVA XI.



EDITED BY

T. R. KRISHNACHARYA & T. R. VYASACHARYA,

Proprietors, Madhva Vilas Book Depot, Kumbakonam.



PRINTED AT THE

Javaji Dadaji's "Nirnaya-sagar" Press,

BOMBAY.

1907.

(*Registered according to the Act XXV of 1867.*)

[All rights reserved by the publisher]

॥ श्रीः ॥

श्रीमन्महाभारतम् ।

सटिप्पणम् ।



स्त्रीपर्व ११.

एतच्च

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च

अनेकेषां विदुषां साहाय्येन दाक्षिणात्यबहुकोशानुसारेण


संशोध्य

मुंबापुर्यां

जावजी दादाजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८२९ प्लवगनामसवत्सरे ।

इदं पुस्तक १८६७ संख्याकराजनियमस्य २५ सख्याकविभागानुसारतो लेखारूढं
कृत्वास्य सर्वेऽधिकारा. प्रसिद्धिकर्त्रा स्वाधीना रक्षिताः ।


स्त्रीपर्व

श्रीः ।

श्रीमन्महाभारतम् ।



स्त्रीपर्व ११ ।

(अथ जलप्रदानिकपर्व ॥ १ ॥)

प्रथमोऽध्यायः ॥ १ ॥

सञ्जयेन पुत्रादीन्प्रति शोचतो धृतराष्ट्रस्य समाश्वासनम् ॥ १ ॥

श्रीवेदव्यासाय नमः ।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १

जनमेजय उवाच ।
हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
धृतराष्ट्रो महाराज श्रुत्वा किमकरोन्मुने ॥ १
तथैव कौरवो राजा धर्मपुत्रो महामनाः ।
कृपप्रभृतयश्चैव किमकुर्वत ते त्रयः ॥ २
अश्वत्थाम्नः कृतं कर्म शापश्चान्योन्यकारितः ।
वृत्तान्तमुत्तरं ब्रूहि यदभाषत सञ्जयः ॥ ३

वैशंपायन उवाच ।
हते पुत्रशते दीनं छिन्नशाखमिव द्रुमम् ।
पुत्रशोकाभिसंतप्तं धृतराष्ट्रं महीपतिम् ॥ ४
ध्यानमूकत्वमापन्नं चिन्तया समभिप्लुतम् ।
सञ्जयो जयतां श्रेष्ठ राजानं वाक्यमब्रवीत् ॥ ५
किं शोचसि महाराज नास्ति शोके सहायता ।
अक्षौहिण्यो हताश्चाष्टौ दश चैव विशांपते ।
निर्जितेयं वसुमती शून्या स्थास्यति केवलम् ॥ ६
नानादिग्भ्यः समागम्य नानाजात्या नराधिपाः ।
सहितास्तव पुत्रेण सर्वे वै निधनं गताः ॥ ७
पितॄणां पुत्रपौत्राणां ज्ञातीनां सुहृदां तथा ।
गुरूणां चानुपूर्व्येण ये चान्येऽनुचरा हताः ।
प्रेतकार्याणि सर्वाणि कारयस्व नराधिप ॥ ८

वैशंपायन उवाच ।
तच्छ्रुत्वा करुणं वाक्यं पुत्रपौत्रवधार्दितः ।
पपात भुवि दुर्धर्षो वाताहत इव द्रुमः ॥ ९

धृतराष्ट्र उवाच ।
हतपुत्रो हतामात्यो हतसर्वसुहृज्जनः ।
दुःखं नूनं गमिष्यामि विचरन्पृथिवीमिमाम् ॥ १०
किंनु बन्धुविहीनस्य जीवितेन ममाद्य वै ।
लूनपक्षस्य इव मे वैनतेयस्य सञ्जय ॥ ११
हृतराज्यो हतसुहृद्धतपुत्रश्च वै तथा ।
न भ्राजिष्ये महाप्राज्ञ क्षीणरश्मिरिवांशुमान् ॥ १२
न कृतं सुहृदां वाक्यं जामदग्न्यस्य जल्पतः ।
नारदस्य च देवर्षेः कृष्णद्वैपायनस्य च ॥ १३
सभामध्ये तु कृष्णेन यच्छ्रेयोऽभिहितं मम ।

अश्वत्थाम्न श्रुत कर्म शापश्चान्योन्यकारित इति क पाठः । अश्वत्थाम्न. श्रुत कर्म शापादन्योन्यकरितादिति झ पाठ. । तत्र अन्योन्य कारितात्पाण्डवाना गर्भे ब्रह्मशिरोस्त्र पतत्यिस्यश्वत्थाम्ना शापो दत्त' । सहस्रवर्षाणि गलत्कुष्ठो भविष्यसीत्यश्वत्थाम्न. कृष्णेन शापो दत्त इत्यर्थ ॥ ३ ॥ शून्या राजभिर्हीना ॥ ६ ॥ गुरूणा चानुपूर्व्येण प्रेतकार्याणि कारयेति झ पाठ. । तत्र आनुपूर्व्येणेति । आदौ हतानामादावेव पश्चाद्धताना पश्चादेवेति पौर्वापर्येण प्रेताना परेताना कार्याणि पारलौकिकानि कर्माणीत्यर्थ. ॥ ८ ॥

अलं वैरेण ते राजन्पुत्रः संगृह्यतामिति ।
तच्च वाक्यमकृत्वाऽहं भृशं तप्यामि दुर्मतिः॥१४
न हि श्रोताऽसि भीष्मस्य शर्मयुक्तं प्रभाषितम्१५
दुर्योधनस्य च तथा वृषभस्येव नर्दतः ।
दुःशासनवधं श्रुत्वा कर्णस्य च विपर्ययम् ।
द्रोणसूर्योपरागं च हृदयं मे विदीर्यते ॥ १६
न स्मराम्यात्मनः किंचित्पुरा सञ्जय दुष्कृतम् ।
यस्येदं फलमद्येह मया मूढेन भुज्यते ॥ १७
नूनं व्यपकृतं किंचिन्मया पूर्वेषु जन्मसु ।
येन मां दुःखभागेषु धाता कर्मसु युक्तवान्॥ १८
परिणामश्च वयसः सर्वबन्धुक्षयश्च मे ।
सुहृन्मित्रविनाशश्च दैवयोगादुपागतः ॥ १९
कोन्वस्ति दुःखिततरो मत्तोऽन्यो हि पुमान्भुवि २०
तन्मामद्यैव पश्यन्तु पाण्डवाः संशितव्रताः ।
विवृतं ब्रह्मलोकस्य दीर्घमध्वानमास्थितम् ॥ २१
वैशंपायन उवाच ।
तस्य लालप्यमानस्य बहु शोकं विचिन्वतः ।
शोकापहं नरेन्द्रस्य संजयो वाक्यमब्रवीत् ॥ २२
शोकं राजन्व्यपनुद श्रुतास्ते वेदनिश्चयाः ।
शास्त्रागमाश्च विविधा वृद्धेभ्यो नृपसत्तम ॥ २३
सञ्जये पुत्रशोकार्ते यदूचुर्मुनयः पुरा ।
यथा यौवनजं दर्पमास्थिते ते सुते नृप ॥ २४
न त्वया सुहृदां वाक्यं ब्रुवतामवधारितम् ।
स्वार्थश्च न कृतः कश्चिल्लुब्धेन फलगृद्धिना ॥२५
असिनैवैकधारेण स्वबुद्ध्या तु विचेष्टितम् ।
प्रायशोऽवृत्तसंपन्नाः सततं पर्युपासिताः ॥ २६
यस्य दुःशासनो मन्त्री राधेयश्च दुरात्मवान् ।
शकुनिश्चैव दुष्टात्मा चित्रसेनश्च दुर्मतिः ॥ २७
अनल्पं येन वै सर्वं शल्यभूतं कृतं जगत् ।
कुरुवृद्धस्य भीष्मस्य गान्धार्या विदुरस्य च ॥ २८
द्रोणस्य च महाराज कृपस्य च शरद्वतः ।
कृष्णस्य च महाबाहो नारदस्य च धीमतः ॥ २९
ऋषीणां च तथाऽन्येषां व्यासस्यामिततेजसः ।
न कृतं तेन वचनं तव पुत्रेण भारत ।
क्षपिताः क्षत्रियाः सर्वे शत्रूणां वर्धितं यशः ॥ ३०
अधर्मसंयुतं किंचिन्नित्यं युद्धमिति ब्रुवन् ।
मध्यस्थो हि त्वमप्यासीर्न क्षमं किंचिदुक्तवान् ३१
धूर्धरेण त्वया भारस्तुलया न समं धृतः ॥ ३२
आदावेव मनुष्येण वर्तितव्यं यथाक्रमम् ।
यथा नातीतमर्थं वै पश्चात्तापेन युज्यते ॥ ३३
पुत्रगृद्ध्या त्वया राजन्प्रियं तस्य चिकीर्षितम् ।
पश्चात्तापमिमं प्राप्तो न त्वं शोचितुमर्हसि ॥ ३४
मधु यः केवलं दृष्ट्वा प्रपातं नानुपश्यति ।
स भ्रष्टो मधुलोभेन शोचत्येव यथा भवान्॥ ३५
अर्थान्न शोचन्प्राप्नोति न शोचन्विन्दते सुखम् ।
न शोचञ्श्रियमाप्नोति न शोचन्विन्दते जयम् ३६
स्वयमुत्पादयित्वाऽग्निं परीतस्तेन योऽग्निना ।
दह्यमानः पुनस्तापं भजते न स पण्डितः ॥ ३७
त्वयैव ससुतेनायं वाक्यवायुसमीरितः ।
लोभाज्येन च संसिक्तो ज्वलितः पार्थपावकः॥३८
तस्मिन्समिद्धे पतिताः शलभा इव ते सुताः ।
तान्केशवाग्निर्निर्दग्धान्न त्वं शोचितुमर्हसि ॥ ३९
यच्चाश्रुपातकलिलं वदनं वहसे नृप ।
अशास्त्रदृष्टमेतद्धि न प्रशंसन्ति पण्डिताः ॥ ४०
विस्फुलिङ्गा इव ह्येतान्दहन्ति किल मानवान् ।

श्रोतासि श्रुतवानसि ॥ १५ ॥ विपर्ययं विनाशम् ॥ १६ ॥ तन्मामिति । अद्यैव प्राणत्याग करिष्यामीत्यर्थ ॥ २१ ॥ शोक वितन्वत इति झ. पाठ. । तत्र वितन्वत विरचयत इत्यर्थ ॥ २२ ॥ अवृत्तेति च्छेद ॥ २६ ॥ शल्यश्च येन वै सर्व इति झ. पाठ. । तत्र शल्यश्च मन्त्रीति पूर्वेणान्वय ॥ २८ ॥ न धर्मः स कृतः कश्चिन्नित्य युद्धमभीप्सता । अल्पबुद्धिरहकारी नित्य युद्धमिति ब्रुवन् । क्रूरो दुर्मर्षणो नित्यमसतुष्टश्च वीर्यवान् । श्रुतवानसि मेधावी सत्यवाश्चैव नित्यदा । न मुह्यन्तीदृशा सन्तो बुद्धिमन्तो भवादृशा । न धर्मं. सत्कृत. कश्चित्तव पुत्रेण मारिष । इति झ पाठ । अत्र ब्रुवन् दुर्योधन आसीदिति शेष ॥३१॥ दुर्धरेणेति झ. ढ पाठः॥३२॥प्रपात पर्वताग्राद्भ्रशम् ॥ ३५ ॥

जहीहि मन्युं बुद्ध्या वै धारयात्मानमात्मना ॥ ४१
वैशंपायन उवाच ।
एवमाश्वासितं तेन सञ्जयेन महात्मना ।
विदुरो भूय एवाह बुद्धिपूर्वं परंतप ॥ ४२

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ॥ २ ॥

विदुरेण शास्त्रार्थकथनेन धृतराष्ट्रस्य शोकापनोदनम् ॥ १ ॥

वैशंपायन उवाच ।
ततोऽमृतरसैर्वाक्यैर्ह्रादयन्पुरुषर्षभम् ।
वैचित्रवीर्यं विदुरो यदुवाच निबोध तत् ॥ १
विदुर उवाच ।
उत्तिष्ठ राजन्किं शेषे धारयात्मानमात्मना ।
एषा वै सर्वसत्वानां लोकेश्वर परा गतिः ॥ २
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥ ३
यदा शूरं च भीरुं च यमः कर्षति भारत ।
तत्किं न योत्स्यन्ति हि ते क्षत्रियाः क्षत्रियर्षभ ॥ ४
अयुध्यमानो म्रियते युध्यमानश्च जीवति ।
कालं प्राप्य महाराज न कश्चिदतिवर्तते ॥ ५
अभावादीनि भूतानि भावमध्यानि भारत ।
अभावनिधनान्येव तत्र का परिदेवना ॥ ६
न शोचन्मृतमन्वेति न शोचन्म्रियते नरः ।
एवं सांसिद्धिके लोके किमर्थमनुशोचसि ॥ ७
कालः कर्षति भूतानि सर्वाणि विविधान्युत ।
न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम ॥ ८
यथा वायुस्तृणाग्राणि संवर्तयति सर्वशः ।
तथा कालवशं यान्ति भूतानि भरतर्षभ ॥ ९
एकसार्थप्रयातानां सर्वेषां तत्र गामिनाम् ।
यस्य कालः स यात्यग्रे तत्र का परिदेवना ॥ १०
न चाप्येतान्हतान्युद्धे राजञ्शोचितुमर्हसि ।
प्रमाणं यदि शास्त्राणि गतास्ते परमां गतिम् ॥ ११
सर्वे स्वाध्यायवन्तो हि सर्वे च चरितव्रताः ।
सर्वे चाभिमुखाः क्षीणास्तत्र का परिदेवना ॥ १२
अदर्शनादापतिताः पुनश्चादर्शनं गताः ।
नैते तव न तेषां त्वं तत्र का परिदेवना ॥ १३
हतो हि लभते स्वर्गं जित्वा च लभते यशः ।
उभयं नो बहुगुणं नास्ति निष्फलता रणे ॥ १४
तेषां कामदुघॉल्लोकानिन्द्रः संकल्पयिष्यति ।
इन्द्रस्यातिथयो ह्येते भवन्ति भरतर्षभ ॥ १५
न यज्ञैर्दक्षिणावद्भिर्न तपोभिर्न विद्यया ।
स्वर्गं यान्ति तथा मर्त्या यथा शूरा रणे हताः ॥ १६
शरीराग्निषु शूराणां जुहुवुस्ते शराहुतीः ।
हूयमानाञ्शरांश्चैव सेहुस्तेजस्विनो मिथः ॥ १७
एवं राजंस्तवाचक्षे स्वर्ग्यं पन्थानमुत्तमम् ।
न युद्धादधिकं किंचित्क्षत्रियस्येह विद्यते ॥ १८
क्षत्रियास्ते महात्मानः शूराः समितिशोभनाः ।
आशिषः परमाः प्राप्ता न शोच्याः सर्व एव हि ॥ १९
आत्मानमात्मनाऽऽश्वास्य मा शुचः पुरुषर्षभ ।
नाद्य शोकाभिभूतस्त्वं कायमुत्स्रष्टुमर्हसि ॥ २०
मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि कस्य ते कस्य वा वयम् ॥ २१
शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसेदिवसे मूढमाविशन्ति न पण्डितम् ॥ २२

जहि मन्युं स्वबुद्ध्या वै इति क छ ट. पाठ । दहन्ति शोका इत्यर्थात् । मन्यु दैन्यम् । मन्युर्दैन्ये क्रतौ क्रुधि इत्यमर· । आत्मान चित्त आत्मना धैर्येण धारय । प्राणान्मात्याक्षीरित्यर्थ ॥ ४१ ॥ प्रथमोऽध्याय ॥ १ ॥

एषा मरणान्ता । अत उत्तिष्ठ शोक त्यज ॥ २ ॥ अभावादीनि दु खानि दु खमध्यानि भारतेति छ. पाठ· ॥ ६ ॥ सासिद्धिके स्वभावसिद्धे ॥ ७ ॥ सवर्तयति स्ववश नयति ॥ ९ ॥ तत्र गामिनां परत्र गमनशीलाना यस्य काल उपस्थित सोऽग्रे प्रयाति ॥ १० ॥ अदर्शनादज्ञानात् ॥ १३ ॥ नोऽस्माक क्षत्रियाणाम् ॥ १४ ॥ आचक्षे कथयामि ॥ १८ ॥

न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम ।
न मध्यस्थः क्वचित्कालः सर्वं कालः प्रकर्षति ॥२३
कालः पचति भूतानि कालः संहरते प्रजाः ।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥ २४
अनित्यं यौवनं रूपं जीवितं द्रव्यसंचयः ।
आरोग्यं प्रियसंवासो गृद्ध्येदेषु न पण्डितः ॥२५
न जानपदिकं दुःखमेकः शोचितुमर्हसि ।
अप्यभावेन युज्येत तच्चास्य न निवर्तते ॥ २६
अशोचन्प्रतिकुर्वीत यदि पश्येत्पराक्रमम् ।
भैषज्यमेतद्दुःखस्य यदेतन्नानुचिन्तयेत् ॥ २७
चिन्त्यमानं हि न व्येति भूयश्चापि प्रवर्धते ॥ २८
अनिष्टसंप्रयोगाच्च विप्रयोगात्प्रियस्य च ।
मानुषा मानसैर्दुःखैर्युज्यन्ते येऽल्पबुद्धयः ॥ २९
नार्थो न धर्मो न सुखं यदेतदनुशोचति ।
तच्च नाप्नोति कार्यार्थं त्रिवर्गाच्चैव भ्रश्यते ॥ ३०
अन्योन्यबाधनावस्थां प्राप्य वैषयिकीं नराः ।
असंतुष्टाः प्रमुह्यन्ति संतोषं यान्ति पण्डिताः ॥ ३१
प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः ।
एतद्विज्ञानसामर्थ्यं न बालैः समतामियात् ॥ ३२
शयानं चानुशेते हि तिष्ठन्तं चानुतिष्ठति ।
अनुधावति धावन्तं कर्म पूर्वकृतं नरम् ॥ ३३
यस्यांयस्यामवस्थायां यत्करोति शुभाशुभम् ।
तस्यांतस्यामवस्थायां तत्तत्फलमवाप्नुते ॥ ३४
[येनयेन शरीरेण यद्यत्कर्म करोति यः ।
तेनतेन शरीरेण तत्फलं समुपाश्नुते ॥ ३५
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
आत्मैव ह्यात्मनः साक्षी कृतस्यापकृतस्य च ॥ ३६
शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ।
कृतं भवति सर्वत्र नाकृतं विद्यते क्वचित् ॥ ३७
न हि ज्ञानविरुद्धेषु बह्वपायेषु कर्मसु ।
मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥]३८

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ॥ ३ ॥

विदुरेण धृतराष्ट्रशोकापनोदनाय शास्त्रार्थकथनम् ॥ १ ॥

धृतराष्ट्र उवाच ।
सुभाषितं महाप्राज्ञ शोकोऽयं विगतो मम ।
भूय एव तु वाक्यानि श्रोतुमिच्छामि तत्त्वतः ॥ १
अनिष्टानां च संसर्गादिष्टानां च निवर्तनात् ।
कथं हि मानसं दुःखं विप्रयुज्यन्ति पण्डिताः ॥ २
विदुर उवाच ।
यतोयतो मनो दुःखात्सुखाद्वा विप्रमुच्यते ।
ततस्ततः शमं लब्ध्वा सुगतिं विन्दते बुधः ॥ ३
अशाश्वतमिदं सर्वं चिन्त्यमानं नरर्षभ ।
कदलीसन्निभो लोकः सारो ह्यस्य न विद्यते ॥ ४
[यदा प्राज्ञाश्च मूढाश्च धनवन्तोऽथ निर्धनाः ।
सर्वे पितृवनं प्राप्य स्वपन्ति विगतज्वराः ॥ ५
निर्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धिभिः ।
किं विशेषं प्रपश्यन्ति तत्र तेषां परे जनाः ॥ ६
येन प्रत्यवगच्छेयुः कुलरूपविशेषणम् ।
कस्मादन्योन्यमिच्छन्ति विप्रलब्धधियो नराः ॥]७
गृहाण्येव हि मर्त्यानामाहुर्देहानि पण्डिताः ।
कालेन विनियुज्यन्ते सत्वमेकं तु शोभनम् ॥ ८

जानपदिक सर्वसाधारणम् । अभावेन मरणेन । तच्च दु ख च ॥ २६ ॥ नच नापैति कार्यार्थात्त्रिवर्गाच्चैव हीयते इति झ. पाठ· । तत्र कार्यार्थान्नापैतीतिनापिल्वपैल्वेवेत्यर्थ. ॥ ३० ॥ अन्यामन्या धनावस्था प्राप्य वैशेषिकी नरा· । इति झ. पाठ ॥ ३१ ॥ अवस्थाया यौवनादिरूपायाम् ॥ ३४ ॥ येनेति । स्थूलेन देहेन कृते तत्तेनैव भुज्यते । मनःकृत चेत्तेनैव भुज्यते स्वप्नादौ ॥ ३५ ॥ द्वितीयोऽध्याय· ॥ २ ॥

सुभाषितैरिति झ पाठ ॥ १ ॥ पितृवन मृत्युम् ॥ ५ ॥ सत्वमेक तु शाश्वतमिति झ. पाठ । तत्र सत्व लिङ्गशरीरम् । शाश्वत मोक्षपर्यन्त स्थायित्वात् इत्यर्थः ॥ ८ ॥

यथा जीर्णमजीर्णं वा वस्त्रं त्यक्त्वा तु पूरुषः ।
अन्यद्रोचयते वस्त्रमेवं देहाः शरीरिणाम् ॥ ९
वैचित्रवीर्य सत्यं हि दुःखं वा यदि वा सुखम् ।
प्राप्नुवन्तीह भूतानि स्वकृतेनैव कर्मणा ॥ १०
कर्मणा प्राप्यते स्वर्गः सुखं दुःखं च भारत ।
ततो वहति तं भारमवशः स्ववशोऽपि वा ॥ ११
यथा च मृन्मयं भाण्डं चक्रारूढं विपद्यते ।
किंचित्प्रक्रियमाणं वा कृतमात्रमथापि वा ॥ १२
हीनं वाऽप्यवरोप्यं वा अवतीर्णमथापि वा ।
आर्द्रं वाऽप्यथवा शुष्कं पच्यमानमथापि वा ॥ १३
अवतार्यन्तमापाकादुद्धृतं चापि भारत ।
अथवा परिभुञ्जन्तमेवं देहाः शरीरिणाम् ॥ १४
गर्भस्थो वा प्रसूतो वाऽप्यथवा दशरात्रिकः ।
अर्धमासगतो वाऽपि मासमात्रगतोऽपि वा ॥ १५
संवत्सरगतो वापि द्विसंवत्सर एव वा ।
यौवनस्थोऽथ मध्यस्थो वृद्धो वापि विपद्यते ॥ १६
प्राक्कर्मभिस्तु भूतानि भवन्ति नभवन्ति च ।
एवं संवर्धिते लोके किमर्थमनुतप्यसे ॥ १७
यथा तु सलिलं राजन्क्रीडार्थमनुसंचरन् ।
उन्मज्जेच्च निमज्जेच्च चेष्टते च नराधिप ॥ १८
एवं संसारगहने उन्मज्जननिमज्जने ।
कर्मयोगेन बध्यन्ते क्लिश्यन्ते चाल्पबुद्धयः ॥ १९
ये तु प्राज्ञाः स्थिता मध्ये संसारान्तगतैषिणः ।
समागमज्ञा भूतानां ते यान्ति परमां गतिम् ॥ २०

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ॥ ४ ॥

विदुरेण धृतराष्ट्रंप्रति जीवस्य गर्भवासप्रकारकथनम् ॥ १ ॥

धृतराष्ट्र उवाच ।
कथं संसारगहनं विज्ञेयं वदतां वर ।
एतदिच्छाम्यहं श्रोतुं तत्त्वमाख्याहि पृच्छतः ॥ १
विदुर उवाच ।
जन्मप्रभृति भूतानां क्रियाः सर्वास्तु लक्षयन् ।
पूर्वमेवेह कलिले वसते किंचिदन्तरम् ॥ २
ततः स पञ्चमेऽतीते मासे मांसमकल्पयत् ।
ततः सर्वाङ्गसंपूर्णो गर्भो मासे तु जायते ॥ ३
अमेध्यमध्ये वसति मांसशोणितलेपने ।
ततस्तु वायुवेगेन ऊर्ध्वपादो ह्यधोमुखः ॥ ४
योनिद्वारमुपागम्य बहून्क्लेशान्समृच्छति ।
योनिसंपीडनाच्चैव पूर्वकर्मभिरन्वितः ॥ ५
तस्मान्मुक्तः स संसारादन्यान्पश्यत्युपद्रवान् ।
ग्रहास्तमनुगच्छन्ति सारमेया इवामिषम् ॥ ६
ततः कालान्तरे प्राप्ते व्याधयश्चापि तं तथा ।
उपसर्पन्ति जीवन्तं बध्यमानं स्वकर्मभिः ॥ ७
बद्धमिन्द्रियपाशैस्तं सङ्गकामुकमातुरम् ।
व्यसनान्यनुवर्तन्ते विविधानि नराधिप ॥ ८
बाध्यमानश्च तैर्भूयो नैव तृप्तिमुपैति सः ।
[तदा नावैति चैवायं प्रकुर्वन्साध्वसाधु वा ॥] ९
तत्रैनं परिपश्यन्ति ये ध्यानपरिनिष्ठिताः ।
अयं न बुध्यते तावद्यमलोकादिहागमे ॥ १०
यमदूतैर्विकृष्यंश्च मृत्युं कालेन गच्छति ।
वाग्घीनस्य च या मात्रा इष्टानिष्टकृताऽस्य वै ।
भूय एवात्मनाऽऽत्मानं बध्यमानमुपैति सः ॥ ११
अहो विनिकृतो लोको लोभेन च वशीकृतः ।

अवरोप्यन्तमितिपाठे अवरोप्यमाणम् ॥ १३ ॥ आपाकात् कुलालकृतात् पात्रपाककूटात् । अथवा परिभृज्जन्तमिति झ. पाठ ॥ १४ ॥ एव ससारगहनादुन्मज्जननिमज्जनात् इति क. छ. ट. पाठ ॥ १९ ॥ तृतीयोऽध्याय ॥ ३ ॥

कलिल शुक्रशोणितसयोगः । एकरात्रोषित कलिल भवति पञ्चरात्राद्बुद्बुद इत्यादिशास्त्राद्गम्यते । तत्र कलिले वसते जीव इति शेषः । किंचिदन्तर पूर्वदिनापेक्षया वृद्ध्यवस्थाभेदेन अल्पेन परिमाणान्तरेण ॥ २ ॥ पूर्वकर्मापदानत इति क. पाठ ॥ ५ ॥ मृगयन्पर्यटन्नित्य सारमेया इति ट. पाठः ॥ ६ ॥ चतुर्थोऽध्याय ॥ ४ ॥

लोभक्रोधमदोन्मत्तो नात्मानमवबुध्यते ॥ १२
कुलीनत्वे च रमते दुष्कुलीनान्विकुत्सयन् ।
धनदर्पेण दृप्तश्च दरिद्रान्परिकुत्सयन् ॥ १३
मूर्खानिति परानाह नात्मानं समवेक्षते ।
दोषान्क्षिपति चान्येषां नात्मानं शास्तुमिच्छति ॥
यदा प्राज्ञाश्च मूर्खाश्च धनवन्तश्च निर्धनाः ।
कुलीनाश्चाकुलीनाश्च मानिनोऽथाप्यमानिनः॥१५
सर्वे पितृवनं प्राप्ताः स्वपन्ति विगतत्वचः ।
निर्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धनैः ॥ १६
किं विशेषं प्रपश्यन्ति तत्र तेषां परे जनाः ।
येन प्रत्यवगच्छेयुः कुलरूपविशेषणम् ॥ १७
यदा सर्वे समं न्यस्ताः स्वपन्ति धरणीतले ।
कस्मादन्योन्यमिच्छन्ति विप्रलब्धुमिहाबुधाः॥१८
प्रत्यक्षं च परोक्षं च यो निशम्य श्रुतिं त्विमाम् ।
[अध्रुवे जीवलोकेऽस्मिन्यो धर्ममनुपालयन् ।]
जन्मप्रभृति वर्तेत प्राप्नुयात्परमां गतिम् ॥ १९
एवं सर्वं विदित्वा वै यस्तच्चमनुवर्तते ।
स प्रमोक्षयते चैव पन्थानं मनुजेश्वर ॥ २०

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ॥ ५ ॥

विदुरेण धृतराष्ट्रं प्रति उत्तराध्याये वक्ष्यमाणसंसारादीनां कान्तारादित्वेन रूपणम् ॥ १ ॥

धृतराष्ट्र उवाच ।
यदिदं धर्मगहनं बुद्ध्या समनुबुध्यते ।
एतद्विस्तरतः सर्वं बुद्धिमार्गं प्रशंस मे ॥ १
विदुर उवाच ।
अत्र ते वर्तयिष्यामि नमस्कृत्वा स्वयंभुवे ।
यथा संसारगहनं वदन्ति परमर्षयः ॥ २
कश्चिन्महति कान्तारे वर्तमानो द्विजः किल ॥
महद्दुर्गमनुप्राप्तो वनं क्रव्यादसंकुलम् ॥ ३
सिंहव्याघ्रगजक्षौघैरतिघोरमहास्वनैः ।
पिशितादैरतिभयैर्महोग्राकृतिभिस्तथा ॥ ४
समन्तात्संपरिक्षिप्तं यस्माद्वृष्टुर्महद्भयम् ।
तदस्य दृष्ट्वा हृदयमुद्वेगमगमत्परम् ॥ ५
अभ्युच्छ्रयन्ति रोमाणि विक्रियाश्च परंतप ।
स तद्वनं व्यनुसरन्संप्रधावन्नितस्ततः ॥ ६
वीक्षमाणो दिशः सर्वाः शरणं क्व भवेदिति ।
स तेषां नाशमन्विच्छन्प्रद्रुतो भयपीडितः ।
न च निर्याति वै दूरं न वा तैर्विप्रयुज्यते ॥ ७
अथापश्यद्वनं गूढं समन्ताद्वागुरावृतम् ।
बाहुभ्यां संपरिष्वक्तः स्त्रिया परमघोरया ॥ ८
पञ्चशीर्षधरैर्नागैः शैलैरिव समुन्नतैः ।
नभःस्पृशैर्महावृक्षैः परिक्षिप्तं महावनम् ॥ ९
वनमध्ये च तत्राभूदुदपानः समावृतः ।
वल्लीभिस्तृणनद्धाभिर्गूढाभिरभिसंवृतः ॥ १०
पपात स द्विजस्तत्र निगूढे सलिलाशये ।
विलग्नश्चाभवत्तस्मिँल्लतासंतानसंकुले ॥ ११
पनसस्य यथा जातं वृन्तबद्धं महाफलम् ।
स तथा लम्बते तत्र ह्यूर्ध्वपादो ह्यधःशिराः॥ १२
अथ तत्रापि चान्योऽस्य भूयो जात उपद्रवः ।
कूपमध्ये महानागमपश्यत महाबलम् ॥ १३
कूपपीनाहवेलायामपश्यत महागजम् ॥ १४
षड्वक्त्रं कृष्णशबलं द्विषट्पदचारिणम् ।
क्रमेण परिसर्पन्तं वल्लीवृक्षसमावृतम् ॥ १५
तस्य शाखाप्रशाखासु वृक्षशाखावलम्बिनः ।
नानारूपा मधुकरा घोररूपा भयावहाः ॥ १६
आसते मधु संवृत्य पूर्वमेव निकेतजाः ।
भूयोभूयः समीहन्ते मधूनि भरतर्षभ ॥ १७
स्वादनीयानि भूतानां यैर्बालो न वितृप्यते ।
तेषां मधूनां बहुधा धारा प्रस्रवते तदा ॥ १८
आलम्बमानः स पुमान्धारां पिबति सर्वदा ।
न चास्य तृष्णा विरता पिबमानस्य संकटे ॥ १९

अभीप्सति च तां नित्यमतृप्तः स पुनःपुनः ।
न चास्य जीविते राजन्निर्वेदः समजायत ॥ २०
तत्रैव च मनुष्यस्य जीविताशा प्रतिष्ठिता ।
कृष्णाः श्वेताश्च तं वृक्षं निकृन्तन्ति स्म मूषिकाः २१
व्यालैश्च तद्वनं दुर्गं स्त्रिया च परमोग्रया ।
कूपाधस्ताच्च नागेन पीनाहे कुञ्जरेण च ॥ २२
वृक्षप्रपाताच्च भयं मूषिकेभ्यश्च पञ्चमम् ।
मधुलोभान्मधुकरैः षष्ठमाहुर्महद्भयम् ॥ २३
एवं स वसते तत्र क्षिप्तः संसारसागरे ।
न चैव जीविताशायां निर्वेदमुपगच्छति ॥ २४

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ॥ ६ ॥

पूर्वाध्याये कान्तारादित्वेन रूपितानां संसारादीनां स्वस्वशब्दैः प्रतिपादनम् ॥ १ ॥

धृतराष्ट्र उवाच ।
अहो खलु महद्दुःखं कृच्छ्रवासं वसत्यसौ ।
कथं तस्य रतिस्तत्र तुष्टिर्वा वदतां वर ॥ १
स देशः कनु यत्रासौ वसते धर्मसंकटे ।
कथं वा स विमुच्येत नरस्तस्मान्महाभयात् ॥ २
एतन्मे सर्वमाचक्ष्व साधु चेष्टामहे तदा ।
कृपा मे महती जाता तस्याभ्युद्धरणेन हि ॥ ३
विदुर उवाच ।
उपाख्यानमिदं राजन्मोक्षविद्भिरुदाहृतम् ।
सुगतिं विन्दते येन परलोकेषु मानवः ॥ ४
उच्यते यत्तु कान्तारं महासंसार एव सः ।
वनं दुर्गं हि यच्चैतत्संसारगहनं हि तत् ॥ ५
ये च ते कथिता व्याला व्याधयस्ते प्रकीर्तिताः ॥ ६
या सा नारी बृहत्काया अध्यतिष्ठत तत्र वै ।
तामाहुस्तु जरां प्राज्ञा रूपवर्णविनाशिनीम् ॥ ७
स यस्तु कूपो नृपते स तु देहः शरीरिणाम् ।
यस्तत्र वसतेऽधस्तान्महाहिः काल एव सः ।
अन्तकः सर्वभूतानां देहिनां प्राणहार्यसौ ॥ ८
कूपमध्ये च या जाता वल्ली यत्र स मानवः
प्रोतो ययाऽभवल्लग्नो जीविताशा शरीरिणाम् ॥ ९
स यस्तु कूपपीनाहे तं वृक्षं परिसर्पति ।
षड्वक्त्रः कुञ्जरो राजन्स तु संवत्सरः स्मृतः ॥१०
मुखानि ऋतवो मासाः पादा द्वादश कीर्तिताः ।
ये तु वृक्षं निकृन्तन्ति मूषिकाः पन्नगास्तथा ॥ ११
रात्र्यहानि तु तान्याहुर्भूतानां परिचिन्तकाः ।
ये ते मधुकरास्तत्र कामास्ते परिकीर्तिताः ॥ १२
यास्तु ता बहुशो धाराः स्रवन्ति मधुनिस्रवम् ।
तांस्तु कामरसान्विन्द्याद्यत्र सज्जन्ति मानवाः १३
एवं संसारचक्रस्य परिवृत्तिं विदुर्बुधाः ।
येन संसारचक्रस्य पाशांश्छिन्दन्ति सर्वथा ॥ १४

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः ॥ ७ ॥

विदुरेण धृतराष्ट्रंप्रति तत्त्वकथनम् ॥ १ ॥

धृतराष्ट्र उवाच ।
अहोऽभिहितमाख्यानं भवता तत्त्वदर्शिना ।
भूय एव तु मे हर्षः श्रोतुं वागमृतं तव ॥ १

उपमानमिद राजन्निति झ. पाठ ॥ ४ ॥

विदुर उवाच ।
शृणु भूयः प्रवक्ष्यामि मार्गस्यैतस्य विस्तरम् ।
यच्छ्रुत्वा विप्रमुच्यन्ते संसाराद्धि विचक्षणाः ॥ २

षष्ठोऽध्याय ॥ ६ ॥

यथा तु पुरुषो राजन्दीर्घमध्वानमास्थितः ।
क्वचित्क्वचिच्छ्रमस्थानं कुरुते वासमेव वा ॥ ३
एवं संसारपर्याये गर्भवासेषु भारत ।
कुर्वन्ति दुर्बुधा वासं मुच्यन्ते तत्र पण्डिताः ॥ ४
तस्मादध्वानमेवैतमाहुः शास्त्रविदो जनाः ।
यत्तत्संसारगहनं वनमाहुर्मनीषिणः ॥ ५
सोयं लोकसमावर्तो मर्त्यानां भरतर्षभ ।
चराणां स्थावराणां च न गृध्येत्तत्र पण्डितः ॥ ६
शारीरा मानसाश्चैव मर्त्यानां व्याधयश्च ये ।
प्रत्यक्षाश्च परोक्षाश्च ते व्यालाः कथिता बुधैः ॥ ७
क्लिश्यमानाश्च तैर्नित्यं मार्यमाणाश्च भारत ।
स्वकर्मभिर्महाव्यालैर्नोद्विजन्त्यल्पबुद्धयः ॥ ८
अथापि तैर्विमुच्येत व्याधिभिः पुरुषो नृप ।
आवृणोत्येव तं पश्चाज्जरा रूपविनाशिनी ॥ ९
शब्दरूपरसस्पर्शगन्धैश्च विविधैरपि ।
मज्जमानं महापङ्के निरालम्बे समन्ततः ॥ १०
संवत्सरर्तवो मासाः पक्षाहोरात्रसंधयः ।
क्रमेणास्य प्रवृञ्जन्ति रूपमायुस्तथैव च ॥ ११
एते कालस्य विधयो नैताञ्जानन्ति दुर्बुधाः ।
धात्राऽभिलिखितान्याहुः सर्वभूतानि कर्मणा १२
रथः शरीरं भूतानां सत्वमाहुस्तु सारथिम् ।
इन्द्रियाणि हयानाहुः कर्मबुद्धिस्तु रश्मयः ॥ १३
तेषां हयानां यो वेगं धावतामनु धावति ।
सतु संसारचक्रेऽस्मिंश्चक्रवत्परिवर्तते ॥ १४
यस्तान्संयमते बुद्ध्या संयतो न निवर्तते ।
यस्तु संसारचक्रेऽस्मिंश्चक्रवत्परिवर्तते ॥ १५
[भ्रममाणा न मुह्यन्ति संसारे न भ्रमन्ति ते ।
संसारे भ्रमतां राजन्दुःखमेतद्धि जायते ॥ १६
तस्मादस्य निवृत्त्यर्थं यत्नमेवाचरेद्बुधः ।
उपेक्षा नात्र कर्तव्या शतशाखः प्रवर्धते ॥ १७
यतेन्द्रियो नरो राजन्क्रोधलोभनिराकृतः ।
संतुष्टः सत्यवादी यः स शान्तिमधिगच्छति ॥] १८
याम्यमाहू रथं ह्येनं मुह्यन्ते येन दुर्बुधाः ।
स चैतत्प्राप्नुयाद्राजन्यत्त्वं प्राप्तो नराधिप ॥ १९
अनुतर्षुलमेवैतदुःखं भवति मारिष ।
राज्यनाशः सुहृन्नाशः सुतनाशश्च भारत ।
साधुः परमदुःखानां दुःखमैषज्यमारभेत् ॥ २०
ज्ञानौषधमवाप्येह दूरपारं महौषधम् ।
छिन्द्याद्दुःखमहाव्याधिं नरः संयतमानसः ॥ २१
न विक्रमो न चाप्यर्थो न मित्रं न सुहृज्जनः ।
तस्मान्मोचयते दुःखाद्यथात्मा स्थिरनिश्चयः ॥ २२
तस्मान्मैत्रं समास्थाय शीलमापदि भारत ।
दमस्त्यागोऽप्रमादश्च ते त्रयो ब्रह्मणो हयाः ॥ २३
शीलरश्मिसमायुक्ते स्थितो यो मानसे रथे ।
त्यक्त्वा मृत्युभयं राजन्ब्रह्मलोकं स गच्छति ॥ २४
अभयं सर्वभूतेभ्यो यो ददाति महीपते ।
स गच्छति परं स्थानं विष्णोः पदमनामयम् ॥ २५
न तत्क्रतुसहस्रेण नोपवासैश्च नित्यशः ।
अभयस्य च दानेन यत्फलं प्राप्नुयान्नरः ॥ २६
न ह्यात्मनः प्रियतरं किंचिद्भूतेषु निश्चितम् ।
अनिष्टं सर्वभूतानां मरणं नाम भारत ॥ २७
तस्मात्सर्वेषु भूतेषु दया कार्या विपश्चिता ॥ २८
नानायोगसमायुक्ता बुद्धिजालेन संवृताः ।
असूक्ष्मदृष्टयो मन्दा भ्राम्यन्ते तत्रतत्र ह ।
सुसूक्ष्मदृष्टयो राजन्व्रजन्ति ब्रह्मसाम्यताम् ॥ २९
एवं ज्ञात्वा महाप्राज्ञ स तेषामौर्ध्वदैहिकम् ।
कर्तुमर्हति तेनैव फलं प्राप्स्यति वै भवान् ॥ ३०

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

श्रमाच्छ्रान्त इति झ. पाठ ॥ ३ ॥ वार्यमाणाश्च भारतेति झ. पाठ॰ ॥ ८ ॥ अथापि तैर्न मुच्येतेति क पाठ॰ ॥ ९ ॥ मज्जमासमहापङ्के इति झ. पाठः ॥ १० ॥ ये तु संसारचक्रेऽस्मिन्निति झ पाठः ॥ १५ ॥ शतशाख संसारवृक्ष ॥ १७ ॥ क्रोधलोभौ निराकृतौ यैन सः ॥ १८ ॥ याम्य यमलोकप्रापक ससारगहनम् ॥ १९ ॥ अनुतर्षुल तृष्णाशील लक्षीकृत्य । अनुकर्षणमेवैतदु ख भवति भारतेति क छ पाठ ॥ २० ॥ दूरपार ब्रह्मज्ञानम् ॥ २१ ॥ ब्रह्मण ब्रह्मलोकस्य प्रापका इति शेष ॥ २३ ॥ सप्तमोऽध्याय ॥ ७ ॥

अष्टमोऽध्यायः ॥ ८ ॥

व्यासेन धृतराष्ट्रस्य शोकापनोदनम् ॥ १ ॥

वैशंपायन उवाच ।
विदुरस्य तु तद्वाक्यं निशम्य कुरुसत्तमः ।
पुत्रशोकाभिसंतप्तः पपात भुवि मूर्छितः ॥ १
तं तथा पतितं भूमौ निःसंज्ञं प्रेक्ष्य बान्धवाः ।
कृष्णद्वैपायनश्चैव क्षत्ता च विदुरस्तथा ॥ २
सञ्जयः सुहृदश्चान्ये द्वास्था ये चास्य संमताः ।
जलेन सुखशीतेन तालवृन्तैश्च भारत ॥ ३
पस्पर्शुश्च करैर्गात्रं वीजमानाश्च यत्नतः ।
अन्वासत चिरं कालं धृतराष्ट्रं तथाविधम् ॥ ४
अथ दीर्घस्य कालस्य लब्धसंज्ञो महीपतिः ।
विललाप चिरं कालं पुत्राधिभिरभिप्लुतः ॥ ५
धिगस्तु खलु मानुष्यं मानुष्ये च परिग्रहम् ।
यतोमूलानि दुःखानि संभवन्ति पुनःपुनः ॥ ६
मित्रनाशेऽर्थनाशे च ज्ञातिसंबन्धिनामपि ।
प्राप्यते सुमहद्दुःखं विषाग्निप्रतिमं विभो ॥ ७
येन दह्यन्ति गात्राणि येन प्रज्ञा विनश्यति ।
येनाभिभूतः पुरुषो मरणं प्रतिपद्यते ॥ ८
तदिदं मरणं प्राप्तं मया भाग्यविपर्ययात् ।
[तस्यान्तं नाधिगच्छामि ऋते प्राणविमोक्षणात्] ९
तच्चैवाहं करिष्यामि अद्यैव द्विजसत्तम ।
इत्युक्त्वा तु महात्मानं पितरं ब्रह्मवित्तमम् ॥ १०
धृतराष्ट्रोऽभवन्मूढः स शोकं परमं गतः ।
अभूच्च तूष्णीं राजाऽसौ ध्यायमानो महीपतिः ११
तस्य तद्वचनं श्रुत्वा कृष्णद्वैपायनः प्रभुः ।
पुत्रशोकाभिसंतप्तं पुत्रं वचनमब्रवीत् ॥ १२
व्यास उवाच ।
धृतराष्ट्र महाबाहो शृणु वक्ष्यामि पुत्रक ।
श्रुतवानसि मेधावी धर्मार्थकुशलः प्रभो ॥ १३
न तेऽस्त्यविदितं किंचिद्वेदितव्यं परंतप ।
अनित्यतां हि भूतानां विजानासि न संशयः ॥ १४
अध्रुवे जीवलोके च स्थाने वा शाश्वते सति ।
जीविते मरणान्ते च कस्माच्छोचसि पुत्रक ॥ १५
प्रत्यक्षं तव राजेन्द्र वैरस्यास्य समुद्भवः ।
पुत्रं ते कारणं कृत्वा कालयोगेन निर्मितः ॥ १६
अवश्यं भवितव्ये च कुरूणां संक्षये नृप ।
कस्माच्छोचसि ताञ्शूरान्गतान्परमिकां गतिम् १७
जानता च महाबाहो विदुरेण महात्मना ।
यतितं सर्वयत्नेन शमं प्रति जनेश्वर ॥ १८
न च दैवकृतो मार्गः शक्यो भूतेन केनचित् ।
घटताऽपि चिरं कालं नियन्तुमिति मे मतिः ॥ १९
देवतानां हि यत्कार्यं मया प्रत्यक्षतः श्रुतम् ।
तत्तेऽहं संप्रवक्ष्यामि यथा स्थैर्यं भवेत्तव ॥ २०
पुराऽहं परितो यातः सभामैन्द्रीं जितक्लमः ।
अपश्यं तत्र च सदा समवेतान्दिवौकसः ॥ २१
नारदप्रमुखांश्चापि सर्वान्देवर्षिसत्तमान् ।
तत्र चापि मया दृष्टा पृथिवी पृथिवीपते ॥ २२
कार्यार्थमुपसंपन्ना देवतानां समीपतः ।
उपगम्य तदा धात्री देवानाह समागतान् ॥ २३
यत्कार्यं मम युष्माभिर्ब्रह्मणः सदने तदा ।
प्रतिज्ञातं महाभागास्तच्छीघ्रं संविधीयताम् ॥ २४
तस्यास्तद्वचनं श्रुत्वा विष्णुर्लोकनमस्कृतः ।
उवाच वाक्यं प्रहसन्प्रभुस्तां देवसंसदि ॥ २५
धृतराष्ट्रस्य पुत्राणां यस्तु ज्येष्ठः शतस्य वै ।
दुर्योधन इति ख्यातः स ते कार्यं करिष्यति ॥ २६
तं च प्राप्य महीपालं कृतकृत्या भविष्यसि ।
तस्यार्थे पृथिवीपालाः कुरुक्षेत्रं समागताः ॥ २७
अन्योन्यं घातयिष्यन्ति दृढैः शस्त्रैः प्रहारिणः ।
ततस्ते भविता देवि भारस्य युधि नाशनम् ॥ २८
गच्छ शीघ्रं स्वकं स्थानं लोकान्धारय शोभने ।
स एष ते सुतो राजँल्लोकसंहारकारणात् ॥ २९
कलेरंशः समुत्पन्नो गान्धार्या जठरे नृप ।
अमर्षी बलवाञ्शूरः क्रोधनो दुष्प्रसाधनः ॥ ३०
दैवयोगात्समुत्पन्ना भ्रातरस्तस्य तादृशाः ।

काल सहारकारणादिति क. छ. ठ. पाठ ॥ २९ ॥

शकुनिर्मातुलश्चैव कर्णश्च परमः सखा ॥ ३१
समुत्पन्ना विनाशार्थं पृथिव्यां सहिता नृपाः ।
[यादृशो जायते राजा तादृशोऽस्य जनो भवेत्॥३२
अधर्मो धर्मतां याति स्वामी चेद्धार्मिको भवेत् ।
स्वामिनो गुणदोषाभ्यां भृत्याः स्युर्नात्र संशयः३३
दुष्टं राजानमासाद्य गतास्ते तनया नृप ।]
एतमर्थं महाबाहो नारदो वेद तत्त्ववित् ॥ ३४
आत्मापराधात्पुत्रास्ते विनष्टाः पृथिवीपते ।
मा ताञ्शोचस्व राजेन्द्र न हि शोकेऽस्ति कारणम् ॥
न हि ते पाण्डवाः स्वल्पमपराध्यन्ति भारत ।
पुत्रास्तव दुरात्मानो यैरियं घातिता मही ॥ ३६
नारदेन च भद्रं ते पूर्वमेव न संशयः ।
युधिष्ठिरस्य समितौ राजसूये निवेदितम् ॥ ३७
पाण्डवाः कौरवाः सर्वे समासाद्य परस्परम् ।
नभविष्यन्ति कौन्तेय यत्ते कृत्यं तदाचर ॥ ३८
नारदस्य वचः श्रुत्वा तथाऽकुर्वत पाण्डवाः ।
एतत्ते सर्वमाख्यातं देवगुह्यं सनातनम् ॥ ३९
कथं ते शोकनाशः स्यात्प्राणेषु च दया प्रभो ।
स्नेहश्च पाण्डुपुत्रेषु ज्ञात्वा दैवकृतं विधिम् ॥ ४०
एष चार्थो महाबाहो पूर्वमेव मया श्रुतः ।
कथितो धर्मराजस्य राजसूये कुरूत्तम ॥ ४१
यतितं धर्मपुत्रेण मया गुह्ये निवेदिते ।
अविग्रहे कौरवाणां दैवं तु बलवत्तरम् ॥ ४२
अनतिक्रमणीयो हि विधी राजन्कथंचन ।
कृतान्तस्य तु भूतेन स्थावरेण चरेण च ॥ ४३
भवान्धर्मपरो यत्र बुद्धिश्रेष्ठश्च भारत ।
मुह्यते प्राणिनां ज्ञात्वा गतिं चागतिमेव च ॥ ४४
त्वां तु शोकेन संतप्तं मुह्यमानं मुहुर्मुहुः ।
ज्ञात्वा युधिष्ठिरो राजा प्राणानपि परित्यजेत् ॥ ४५
कृपालुर्नित्यशो वीरस्तिर्यग्योनिगतेष्वपि ।
स कथं त्वयि राजेन्द्र कृपां नैव करिष्यति ॥ ४६
मम चैव नियोगेन विधेश्चाप्यनिवर्तनात् ।
पाण्डवानां च कारुण्यात्प्राणान्धारय भारत ॥ ४७
एवं ते वर्तमानस्य लोके कीर्तिर्भविष्यति ।
धर्मार्थः सुमहांस्तात तप्तं स्याच्च तपश्चिरात् ॥ ४८
पुत्रशोकं समुत्पन्नं हुताशं ज्वलितं यथा ।
प्रज्ञाम्भसा महाराज निर्वापय सदा सता ॥ ४९
वैशंपायन उवाच ।
तच्छ्रुत्वा तस्य वचनं व्यासस्यामिततेजसः ।
मुहूर्तं समनुध्यायन्धृतराष्ट्रोऽभ्यभाषत ॥ ५०
महता शोकजालेन प्रणुन्नोऽस्मि द्विजोत्तम ।
नात्मानमवबुध्यामि मुह्यमानो मुहुर्मुहुः ॥ ५१
इदं तु वचनं श्रुत्वा तव देवनियोगजम् ।
धारयिष्याम्यहं प्राणान्यतिष्ये च न शोचितुं ५२
एतच्छ्रुत्वा तु वचनं व्यासः सत्यवतीसुतः ।
धृतराष्ट्रस्य राजेन्द्र तत्रैवान्तरधीयत ॥ ५३

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि अष्टमोऽध्यायः ॥ ८ ॥*

नारदेन समाख्यातमिति क छ. ठ. पाठः ॥ ३७ ॥ तदाऽशोचन्त पाण्डवा इति झ. पाठ ॥ ३९ ॥ धर्मश्च सुमहास्तात तप्तस्य तपसश्चिरादिति क. छ. ठ. पाठः ॥ ४८ ॥ अष्टमोऽध्यायः ॥ ८ ॥

---

* अत्र झ पाठे श्लोकद्वयसहित एकोऽध्यायोऽधिको दृश्यते ।

[जनमेजय उवाच ।
गते भगवति व्यासे धृतराष्ट्रो महीपतिः ।
किमचेष्टत विप्रर्षे तन्मे व्याख्यातुमर्हसि ॥ १
तथैव कौरवो राजा धर्मपुत्रो महामनाः ।
कृपप्रभृतयश्चैव किमकुर्वत ते त्रयः ॥ २
अश्वत्थाम्नः श्रुतं कर्म शापश्चान्योन्यकारितः ।
वृत्तान्तमुत्तरं ब्रूहि यदभाषत सञ्जयः ॥ ३
वैशंपायन उवाच ।
हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
सञ्जयो विगतप्रज्ञो धृतराष्ट्रमुपस्थितः ॥ ४
सञ्जय उवाच ।
आगम्य नानादेशेभ्यो नानाजनपदेश्वराः ।
पितृलोकं गता राजन्सर्वे तव सुतैः सह ॥ ५

विगता प्रज्ञा व्यासदत्त दिव्यज्ञान यस्य स विगतप्रज्ञ. ॥ ४ ॥

नवमोऽध्यायः ॥ ९ ॥

धृतराष्ट्रेण गान्धारीप्रभृतिभि स्त्रीभिः सह मृतजनावलोकनाय रणाङ्गणंप्रति प्रयाणम् ॥ १ ॥

'जनमेजय उवाच ।
गते व्यासे तु धर्मात्मा धृतराष्ट्रो महीपतिः ।
किमचेष्टत विप्रर्षे तन्मे व्याख्यातुमर्हसि ॥ १
वैशंपायन उवाच ।
एतच्छ्रुत्वा नरश्रेष्ठश्चिरं ध्यात्वा त्वचेतनः ।
सञ्जयं योजयेत्युक्त्वा विदुरं प्रत्यभाषत ॥ २
क्षिप्रमानय गान्धारीं सर्वाश्च भरतस्त्रियः ।
कुन्तीं चैव तथा क्षत्तः समानय ममाऽन्तिकम् ॥' ३
एवमुक्त्वा स धर्मात्मा विदुरं धर्मवित्तमम् ।
शोकविग्रहतज्ञानो यानमेवान्वरोहत ॥ ४
गान्धारी पुत्रशोकार्ता भर्तुर्वचननोदिता ।
सह कुन्त्या यतो राजा सह स्त्रीभिरुपाद्रवत् ॥ ५
ताः समासाद्य राजानं भृशं शोकसमन्विताः ।
आमृश्यान्योन्यमायस्ता भृशमुच्चुक्रुशुस्ततः ॥ ६
ताः समाश्वासयत्क्षत्ता ताभ्यश्चातितरः स्वयम् ।
अश्रुकण्ठीः समारोप्य ततोऽसौ निर्ययौ पुरात् ॥ ७
ततः प्रणादः संजज्ञे सर्वेषु कुरुवेश्मसु ।
आकुमारं पुरं सर्वमभवच्छोककर्शितम् ॥ ८
अदृष्टपूर्वा या नार्यः पुरा देवगणैरपि ।

समारोप्य वाहनेष्विति शेष ॥ ७ ॥

याच्यमानेन सततं तव पुत्रेण भारत ।
घातिता पृथिवी सर्वा वैरस्यान्तं विधित्सता ॥ ६
पुत्राणामथ पौत्राणां पितॄणां च महीपते ।
आनुपूर्व्येण सर्वेषां प्रेतकार्याणि कारय ॥ ७
वैशंपायन उवाच ।
तच्छ्रुत्वा वचनं घोरं सञ्जयस्य महीपतिः ।
गतासुरिव निश्चेष्टो न्यपतत्पृथिवीतले ॥ ८
तं शयानमुपागम्य पृथिव्यां पृथिवीपतिम् ।
विदुरः सर्वधर्मज्ञ इदं वचनमब्रवीत् ॥ ९
उत्तिष्ठ राजन्किं शेषे मा शुचो भरतर्षभ ।
एषा वै सर्वसत्वानां लोकेश्वर परा गतिः ॥ १०
अभावादीनि भूतानि भावमध्यानि भारत ।
अभावनिधनान्येव तत्र का परिदेवना ॥ ११
न शोचन्मृतमन्वेति न शोचन्म्रियते नरः ।
एवं सांसिद्धिके लोके किमर्थमनुशोचसि ॥ १२
अयुध्यमानो म्रियते युध्यमानस्तु जीवति ।
कालं प्राप्य महाराज न कश्चिदतिवर्तते ॥ १३
कालः कर्षति भूतानि सर्वाणि विविधानि च ।
न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम ॥ १४
यथा वायुस्तृणाग्राणि संवर्तयति सर्वतः ।
तथा कालवशं यान्ति भूतानि भरतर्षभ ॥ १५
एकसार्थप्रयातानां सर्वेषां तत्र गामिनाम् ।
यस्य कालः प्रयात्यग्रे तत्र का परिदेवना ॥ १६
यांश्चापि निहतान्युद्धे राजंस्त्वमनुशोचसि ।
न शोच्या हि महात्मानः सर्वे ते त्रिदिवं गताः ॥ १७
न यज्ञैर्दक्षिणावद्भिर्न तपोभिर्न विद्यया ।
तथा स्वर्गमुपायान्ति यथा शूरास्तनुत्यजः ॥ १८
सर्वे वेदविदः शूराः सर्वे सुचरितव्रताः ।
सर्वे चाभिमुखाः क्षीणास्तत्र का परिदेवना ॥ १९
शरीराग्निषु शूराणां जुहुवुस्ते शराहुतीः ।
ह्रियमाणाञ्शरांश्चैव सेहुरुत्तमपूरुषाः ॥ २०
एवं राजंस्त्वाचक्षे स्वर्ग्यं पन्थानमुत्तमम् ।
न युद्धादधिकं किंचित्क्षत्रियस्येह विद्यते ॥ २१
क्षत्रियास्ते महात्मानः शूराः समितिशोभनाः ।
आशिषं परमां प्राप्ता न शोच्याः सर्व एव हि ॥ २२
आत्मनाऽऽत्मानमाश्वास्य मा शुचः पुरुषर्षभ ।
नाद्य शोकाभिभूतस्त्वं कार्यमुत्सृष्टुमर्हसि ॥ २३

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि अध्यायः ॥

वैशंपायन उवाच ।
विदुरस्य तु तद्वाक्यं श्रुत्वा तु पुरुषर्षभः ।
युज्यतां यानमित्युक्त्वा पुनर्वचनमब्रवीत् ॥ १
धृतराष्ट्र उवाच ।
शीघ्रमानय गान्धारीं सर्वाश्च भरतस्त्रियः ।
वधूं कुन्तीमुपादाय याश्चान्यास्तत्र योषितः ॥] २

शोकस्यातिगाढत्वात्पुनर्विदुरेणोक्त अभावादीनीत्यादि ॥ ११ ॥ संवर्तयति वर्तुलयति कम्पयति वा ॥ १५ ॥ आचक्षे कथयामि ॥ २१ ॥ कार्य अवश्यकर्तव्यमुदकदानादि ॥ २३ ॥ अध्याय ॥

पृथग्जनेन दृश्यन्ते तास्तदा निहतेश्वराः ॥ ९
प्रकीर्य केशान्शुभान्भूषणान्यवमुच्य च ।
एकवस्त्रधरा नार्यः परिपेतुरनाथवत् ॥ १०
श्वेतपर्वतरूपेभ्यो गृहेभ्यस्ता निराक्रमन् ।
गुहाभ्य इव शैलानां गृपत्यो हतयूथपाः ॥ ११
तान्युदीर्णानि नारीणां तदा पृन्दान्यनेकशः ।
शोकार्तान्यद्रवन्राजन्किशोरीणामिवाङ्गणे ॥ १२
प्रगृह्य बाहून्क्रोशन्त्यः पुत्रान्भ्रातॄन्पितॄनपि ।
दर्शयन्ति हता हि स्म युगान्ते लोकसंक्षयम् ॥ १३
विलपन्त्यो रुदन्त्यश्च धावमानास्ततस्ततः ।
शोकेनोपहतज्ञानाः कर्तव्यं न प्रजज्ञिरे ॥ १४
व्रीडां जग्मुः पुरा याः स्म सखीनामपि योषितः ।
ता एकवस्त्रा निर्लज्जाः श्वश्रूणां पुरतोऽभवन् ॥ १५
परस्परं समुक्ष्मेषु शोकेष्वाश्वासयन्ति याः ।
ताः शोकविह्वला राजन्नवैक्षन्त परस्परम् ॥ १६
ताभिः परिवृतो राजा रुदतीभिः सहस्रशः ।
निर्ययौ नगरादीनस्तूर्णमायोधनं प्रति ॥ १७
शिल्पिनो वणिजो वैश्याः सर्वे कर्मोपजीविनः ।
ते पार्थिवं पुरस्कृत्य निर्ययुर्नगराद्बहिः ॥ १८
तेषां विक्रोशमानानामार्तानां कुरुसंक्षये ।
प्रादुरासीन्महाञ्शब्दो व्यथयन्भुवनान्युत ॥ १९
युगान्तकाले संप्राप्ते भूतानां दह्यतामिव ।
अभावस्योदयः प्राप्त इति भूतानि मेनिरे ॥ २०
भृशमुद्विग्नमनसस्ते पौराः कुरुसंक्षये ।
प्राक्रोशन्त महाराज स्वनुरक्तास्तदा भृशम् ॥ २१

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ॥ १० ॥

मृतबन्धुदिदृक्षया समरभूमिं गच्छतो धृतराष्ट्रस्य मध्येमार्गं कृपकृतवर्मद्रौणिभि. समागम. ॥ १ ॥ तेषां त्रयाणां धृतराष्ट्राश्वासनपूर्वकं स्वाभिमतदेशगमनम् ॥ २ ॥

वैशंपायन उवाच ।
क्रोशमात्रं ततो गत्वा ददृशुस्तान्महारथान् ।
शारद्वतं कृपं द्रौणिं कृतवर्माणमेव च ॥ १
ते तु दृष्ट्वैव राजानं प्रज्ञाचक्षुषमीश्वरम् ।
अश्रुकण्ठा विनिःश्वस्य रुदन्तमिदमब्रुवन् ॥ २
पुत्रस्तव महाराज कृत्वा कर्म सुदुष्करम् ।
गतः सानुचरो राजञ्शक्रलोकं महीपते ॥ ३
दुर्योधनबलान्मुक्ता वयमेव त्रयो रथाः ।
सर्वमन्यत्परिक्षीणं सैन्यं ते भरतर्षभ ॥ ४
इत्येवमुक्त्वा राजानं कृपः शारद्वतस्ततः ।
गान्धारीं पुत्रशोकार्तामिदं वचनमब्रवीत् ॥ ५
अभीता युध्यमानास्ते घ्नन्तः शत्रुगणान्बहून् ।
वीरकर्माणि कुर्वाणाः पुत्रास्ते निधनं गताः ॥ ६
ध्रुवं संप्राप्य लोकांस्ते निर्मलाञ्शस्त्रनिर्जितान् ।
भास्वरं देहमास्थाय विहरन्त्यमरा इव ॥ ७
सर्वे ह्यभिमुखा राज्ञि युध्यमाना हता युधि ।
न हि कश्चिद्धि शूराणां युध्यमानः पराङ्मुखः ।
शस्त्रेण निधनं प्राप्तो न च कश्चित्कृताञ्जलिः ॥ ८
एतां तां क्षत्रियस्याहुः पुराणाः परमां गतिम् ।
शस्त्रेण निधनं सङ्ख्ये तान्न शोचितुमर्हसि ॥ ९
न चापि शत्रवस्तेषां मुच्यन्ते राज्ञि पाण्डवाः ।
शृणु यत्कृतमस्माभिरश्वत्थामपुरोगमैः ॥ १०
अधर्मेण हतं श्रुत्वा भीमसेनेन ते सुतम् ।
सुप्तं शिबिरमासाद्य पाण्डूनां कदनं कृतम् ॥ ११
पाञ्चाला निहताः सर्वे धृष्टद्युम्नपुरोगमाः ।
द्रुपदस्यात्मजाश्चैव द्रौपदेयाश्च पातिताः ॥ १२
तथा विशसनं कृत्वा पुत्रशत्रुगणस्य ते ।
प्राद्रवाम रणे स्थातुं न हि शक्ष्यामहे त्रयः ॥ १३

पृषत्यश्चित्रहरिण्य ॥ ११ ॥ किशोरीणा अश्वशावकीना । अङ्गणे नृत्यशिक्षाभूमौ ॥ १२ ॥ नवमोऽध्याय ॥ ९ ॥

ते हि शूरा महेष्वासाः क्षिप्रमेष्यन्ति पाण्डवाः ।
अमर्षवशमापन्ना वैरं प्रतिजिहीर्षवः ॥ १४
ते हतानात्मजाञ्श्रुत्वा प्रमत्ताः पुरुषर्षभाः ।
अन्विष्यन्तः पदं शूराः क्षिप्रमेष्यन्ति पाण्डवाः १५
तेषां तु किल्बिषं कृत्वा संस्थातुं नोत्सहामहे ।
अनुजानीहि नो राज्ञि मा च शोके मनः कृथाः १६
राजंस्त्वमनुजानीहि धैर्यमातिष्ठ चोत्तमम् ।
दिष्टान्तं पश्य चापि त्वं क्षात्रं धर्मं च केवलम् ॥१७
इत्येवमुक्त्वा राजानं कृत्वा चाभिप्रदक्षिणम् ।
कृपश्च कृतवर्मा च द्रोणपुत्रश्च भारत ॥ १८
अवेक्षमाणा राजानं धृतराष्ट्रं मनीषिणम् ।
गङ्गामनु महाराज तूर्णमश्वानचोदयन् ॥ १९
अपक्रम्य तु ते राजन्सर्व एव महारथाः ।
आमन्त्र्यान्योन्यमुद्विग्नास्त्रिधा ते प्रययुस्तदा ॥ २०
जगाम हास्तिनपुरं कृपः शारद्वतस्तदा ।
स्वमेव राष्ट्रं हार्दिक्यो द्रौणिर्व्यासाश्रमं ययौ ॥२१
एवं ते प्रययुर्वीरा वीक्षमाणाः परस्परम् ।
भयार्ताः पाण्डुपुत्राणामागस्कृत्वा महात्मनाम्२२
समेत्य वीरा राजानं तदा त्वनुदिते रवौ ।
विप्रजग्मुर्महात्मानो यथेष्टकमरिंदमाः ॥ २३
[समासाद्याथ वै द्रौणिं पाण्डुपुत्रा महारथाः ।
व्यजयंस्ते रणे राजन्विक्रम्य तदनन्तरम् ॥] २४

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः ॥ ११ ॥

युधिष्ठिरेण कृष्णादिभिः सह धृतराष्ट्रसमीपमेत्याभिवादनम् ॥ १ ॥ धृतराष्ट्रेण युधिष्ठिरं मृदुलमालिङ्ग्य पश्चाद्भावज्ञेन कृष्णेन पुरतः स्थापितलोहभीमस्य दृढालिङ्गनेन भञ्जनम् ॥ २ ॥

वैशंपायन उवाच ।
हतेषु सर्वसैन्येषु धर्मराजो युधिष्ठिरः ।
शुश्रुवे पितरं वृद्धं निर्यान्तं गजसाह्वयात् ॥ १
सोऽभ्ययात्पुत्रशोकार्तं पुत्रशोकपरिप्लुतः ।
शोचमानो महाराज भ्रातृभिः सहितस्तदा ॥ २
अन्वीयमानो वीरेण दाशार्हेण महात्मना ।
युयुधानेन च तथा तथैव च युयुत्सुना ॥ ३
तमन्वगात्सुदुःखार्ता द्रौपदी शोककर्शिता ।
सह पाञ्चालयोषिद्भिर्यास्तत्रासन्समागताः ॥ ४
संग्राममनु बृन्दानि स्त्रीणां भरतसत्तम ।
कुररीणामिवार्तानां क्रोशन्तीनां ददर्श ह ॥ ५
ताभिः परिवृतो राजा क्रोशन्तीभिः सहस्रशः ।
ऊर्ध्वबाहुभिरार्ताभी रुदतीभिः प्रियाप्रियैः ॥ ६
क नु धर्मज्ञता राज्ञः क नु साध्वानृशंसता ।
यच्चावधीत्पितॄन्भ्रातॄन्गुरुपुत्रान्सखीनपि ॥ ७
घातयित्वा कथं द्रोणं भीष्मं चापि पितामहम् ।
मनस्तेऽभून्महाबाहो हत्वा चापि जयद्रथम् ॥ ८
किं नु राज्येन ते कार्यं पितॄन्भ्रातॄनपश्यतः ।
अभिमन्युं च दुर्धर्षं द्रौपदेयांश्च भारत ॥ ९
वैशंपायन उवाच ।
अतीत्य ता महाबाहुः क्रोशन्तीः कुररीरिव ।
ववन्दे पितरं ज्येष्ठं धर्मराजो युधिष्ठिरः ॥ १०
ततोऽभिवाद्य पितरं क्रमेणामित्रकर्शनाः ।
न्यवेदयन्त नामानि पाण्डवास्तेऽपि सर्वशः ॥ ११
तमात्मजान्तकरणं पिता पुत्रवधार्दितः ।
अप्रीयमाणः शोकार्तः पाण्डवं परिषस्वजे ॥ १२
धर्मराजं परिष्वज्य सान्त्वयित्वा च भारत ।
दुष्टात्मा भीममन्वैच्छद्दिधक्षुरिव पावकः ॥ १३
स कोपपावकस्तस्य शोकवायुसमीरितः ।
भीमसेनमयं दावं दिधक्षुरिव दृश्यते ॥ १४

वैर प्रतिचिकीर्षव इति क पाठ ॥ १४ ॥ दिष्टान्त मरणम् ॥ १७ ॥ तदनन्तर कृपाचार्यकृतवर्मभ्या वियोगानन्तरम् ॥ २४ ॥ दशमोऽध्याय ॥ १० ॥

स गङ्गामन्विति झ पाठ ॥ ५ ॥ प्रियाप्रियै पाण्डवाना प्रिया अभिमन्युप्रभृतय अप्रिया दुर्योधनादय. तैर्हेतुभि क्रोशन्तीभिरिति सबन्ध ॥ ६ ॥

तस्य संकल्पमाज्ञाय भीमं प्रत्यशुभं हरिः ।
भीममाक्षिप्य पाणिभ्यां प्रददौ भीममायसम् ॥१५
प्रागेव तु महाबुद्धिर्बुद्ध्वा तस्येङ्गितं हरिः ।
संविधानं महाप्राज्ञस्तत्र चक्रे जनार्दनः ॥ १६
उपगुह्यैव पाणिभ्यां भीमसेनमयस्मयम् ।
बभञ्ज बलवान्राजा मन्यमानो वृकोदरम् ॥ १७
नागायुतसमप्राणः स राजा भीममायसम् ।
भङ्क्त्वा विमथितोरस्कः सुस्राव रुधिरं मुखात् ॥
ततः पपात मेदिन्यां तथैव रुधिरोक्षितः ।
प्रपुष्पिताग्रशिखरः पारिजात इव द्रुमः ॥ १९
प्रत्यगृह्णाच्च तं विद्वान्सूतो गावल्गणिस्तदा ।
मैवमित्यब्रवीच्चैनं शमयन्सान्त्वयन्निव ॥ २०
हतो भीम इति ज्ञात्वा गतमन्युर्महामनाः ।
हाहाभीमेति चुक्रोश नृपः शोकसमन्वितः ॥ २१
तं विदित्वा गतक्रोधं भीमसेनवधार्दितम् ।
वासुदेवो वरः पुंसामिदं वचनमब्रवीत् ॥ २२
मा शुचो धृतराष्ट्र त्वं नैव भीमस्त्वया हतः ।
आयसी प्रतिमा ह्येषा त्वया निष्पातिता विभो ॥२३
त्वां क्रोधवशमापन्नं विदित्वा भरतर्षभ ।
मयाऽपकृष्टः कौन्तेयो मृत्योर्दंष्ट्रान्तरं गतः ॥ २४
न हि ते गजशार्दूल बले तुल्योऽस्ति कश्चन ।
कः सहेत महाबाहो बाह्वोर्विग्रहणं नरः ॥ २५
यथान्तकमनुप्राप्य जीवन्कश्चिन्न मुच्यते ।
एवं बाह्वन्तरं प्राप्य तव जीवेन्न कश्चन ॥ २६
तस्मात्पुत्रेण या तेऽसौ प्रतिमा कारिताऽऽयसी ।
भीमस्य सेयं कौरव्य तवैवोपहृता मया ॥ २७
पुत्रशोकाभिसंतप्तं धर्मादपकृतं मनः ।
तव राजेन्द्र तेन त्वं भीमसेनं जिघांससि ॥ २८
न त्वेतत्ते क्षमं राजन्हन्यास्त्वं यद्वृकोदरम् ।
न हि पुत्रा महाराज जीवेयुस्ते कथंचन ॥ २९
तस्माद्यत्कृतमस्माभिर्मन्यमानैः शमं प्रति ।
अनुमन्यस्व तत्सर्वं मा च शोके मनः कृथाः ॥ ३०

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ॥ १२ ॥

कृष्णवाक्याङ्कुशमन्युना धृतराष्ट्रेण भीमादीनामालिङ्गनम् ॥ १ ॥

वैशंपायन उवाच ।
तत एनमुपातिष्ठञ्शौचार्थं परिचारकाः ।
कृतशौचं पुनश्चैनं प्रोवाच मधुसूदनः ॥ १
राजन्नधीता वेदास्ते शास्त्राणि विविधानि च ।
श्रुतानि च पुराणानि राजधर्माश्च केवलाः ॥ २
एवं विद्वान्महाप्राज्ञः समर्थः सन्बलाबले ।
आत्मापराधात्कस्मात्त्वं कुरुषे कोपमीदृशम् ॥ ३
उक्तवांस्त्वां तदैवाहं भीष्मद्रोणौ च भारत ।
विदुरः सञ्जयश्चैव वाक्यं राजन्न तत्कृथाः ॥ ४
स वार्यमाणो नास्माकमकार्षीर्वचनं तदा ।
पाण्डवानधिकाञ्ज्ञानन्बले शौर्ये च कौरव ॥ ५
राजा हि यः स्थिरप्रज्ञः स्वयं दोषानवेक्षते ।
देशकालविभागं च परं श्रेयः स विन्दति ॥ ६
उच्यमानस्तु यः श्रेयो गृह्णीते नो हिताहिते ।
आपदः समनुप्राप्य सोऽभ्येति विलयं किल ॥७
ततोऽन्यवृत्तमात्मानं समवेक्षस्व भारत ।
राजंस्त्वं ह्यविधेयात्मा दुर्योधनवशे स्थितः ॥ ८
आत्मापराधादापन्नस्तत्किं भीमं जिघांससि ।
तस्मात्संयच्छ कोपं त्वं स्वमनुस्मृत्य दुष्कृतम् ॥ ९
यस्तु तां स्पर्धया क्षुद्रः पाञ्चालीमानयत्सभाम् ।
स हतो भीमसेनेन वैरं प्रतिजिहीर्षता ॥ १०
आत्मनोऽतिक्रमं पश्य पुत्रस्य च दुरात्मनः ।

आक्षिप्य निवार्य । आयस लोहमयम् ॥१५॥ स तु कोप समुत्सृज्येति झ पाठ· ॥ २१ ॥ पुत्रेति धर्मादपकृतमालिङ्गनच्छलेन भीमवध. कर्तव्य इत्याशया ॥२८॥ एकादशोऽध्याय. ११

न तत्कृथा· तत्र कृतवानसि । अडभाव आर्ष· ॥ ४ ॥ श्रेयो हिताहिते उच्यमानो न गृह्णीत इत्यन्वय· ॥ ७ ॥ वैरं प्रतिचिकीर्षतेति क पाठः ॥ १० ॥

यदनागसि पाण्डूनां परित्यागस्त्वया कृतः ॥ ११
वैशंपायन उवाच ।
एवमुक्तः स कृष्णेन सर्वं सत्यं जनाधिप ।
उवाच देवकीपुत्रं धृतराष्ट्रो महीपतिः ॥ १२
एवमेतन्महाबाहो यथा वदसि माधव ।
पुत्रस्नेहस्तु बलवान्धर्मान्मां समचालयत् ॥ १३
दिष्ट्या तु पुरुषव्याघ्रो बलवान्सत्यविक्रमः ।
त्वद्भुजो नागमत्कृष्ण भीमो बाह्वन्तरं मम ॥ १४
इदानीं त्वहमव्यग्रो गतमन्युर्गतज्वरः ।
मध्यमं पाण्डवं वीरं स्पष्टुमिच्छामि माधव ॥ १५
हतेषु पार्थिवेन्द्रेषु पुत्रेषु निहतेषु च ।
पाण्डुपुत्रेषु मे धर्मः प्रीतिश्चाप्यवतिष्ठते ॥ १६
ततः स भीमं च धनञ्जयं च
माद्र्याश्च पुत्रौ पुरुषप्रवीरौ ।
पस्पर्श गात्रैः प्ररुदन्सुगात्रा-
नाश्वास्य कल्याणमुवाच चैनान् ॥ १७

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः ॥ १३ ॥

कृष्णयुधिष्ठिरादिभिर्गान्धारीसमीपगमनम् ॥ १ ॥ गान्धारीं युधिष्ठिरंशमुकामां विज्ञाय पूर्वमेवागतेन व्यासेन गान्धार्याः कोपापनोदनम् ॥ २ ॥

वैशंपायन उवाच ।
धृतराष्ट्राभ्यनुज्ञातास्ततस्ते कुरुपुङ्गवाः ।
अभ्ययुर्भ्रातरः सर्वे गान्धारीं सहकेशवाः ॥ १
ततो ज्ञात्वा हतामित्रं धर्मराजं युधिष्ठिरम् ।
गान्धारी पुत्रशोकार्ता शमुमैच्छदनिन्दिता ॥ २
तस्याः पापमभिप्रायं विदित्वा पाण्डवान्प्रति ।
ऋषिर्गन्धवतीपुत्रः प्रागेव समबुध्यत ॥ ३
स गङ्गायामुपस्पृश्य ब्रह्मर्षिः प्रयतः शुचिः ।
तं देशमुपसंपेदे पाराशर्यो मनोजवः ॥ ४
दिव्येन चक्षुषा ज्ञात्वा मनसाऽनुद्धतेन च ।
सर्वप्राणभृतां भावं सततं स तु बुध्यति ॥ ५
स स्नुषामब्रवीत्काले कल्याणानि महातपाः ।
शापकालमवाक्षिप्य शमकालमुदीरयन् ॥ ६
न कोपः पाण्डवे कार्यो गान्धारि शममाप्नुहि ।
रजो निगृह्यतां चैव शृणु चेदं वचो मम ॥ ७
पुरोक्ता युद्धकाले त्वं पुत्रेण जयमिच्छता ।
जयमाशास्व मे मातर्युध्यमानस्य शत्रुभिः ॥ ८
सा तथा याच्यमाना त्वं युद्धकाले जयैषिणा ।
उक्तवत्यसि कल्याणि यतो धर्मस्ततो जयः ॥ ९
वाचाऽप्यतीते मा क्रोधे मनः कुरु यशस्विनि ।
स्मरामि भाषमाणां हि त्वामहं सत्यवादिनीम् ॥ १०
विग्रहे तुमुले राज्ञां गत्वा परमसंशयम् ।
जितं पाण्डुसुतैर्युद्धे नूनं धर्मस्ततोऽधिकः ॥ ११
क्षमाशीला पुरा भूत्वा साऽद्य न क्षमसे कथम् ।
अधर्मं जहि धर्मज्ञे यतो धर्मस्ततो जयः ॥ १२
सा त्वं धर्मं परिस्मृत्य वाचं चोक्तां मनस्विनि ।
कोपं संयच्छ गान्धारि पाण्डवेषु सुतेषु ते ॥ १३
गान्धार्युवाच ।
भगवन्नाभ्यसूयामि नैतानिच्छामि नश्यतः ।
पुत्रशोकेन तु बलान्मनो विह्वलतीव मे ॥ १४
यथैव कुन्त्या कौन्तेया रक्षितव्यास्तथा मया ।
तथैव धृतराष्ट्रेण रक्षितव्या यथा त्वया ॥ १५
दुःशासनापराधेन शकुनेः सौबलस्य च ।
कर्णदुर्योधनाभ्यां च कृतोऽयं कुरुसंक्षयः ॥ १६

अनागसि अपराधाभावे । परित्यागो राज्याप्रदानेन तिरस्कार ॥ ११ ॥ द्वादशोऽध्याय ॥ १२ ॥

न चाप्यतीता गान्धारि वाच ते वितथामहम् । स्मरामि तोषमाणायास्तथा प्रणिहिता ह्यसि इति झ. पाठे अस्य एन दुर्योधन तोषमाणाया आशीर्वचनेन तोषयन्त्यास्ते तव ता ता वाच वितथा न स्मरामीत्यन्वय ॥ १० ॥ सा त्व धर्म परित्यज्य वाचा चोक्त्वा मनस्विनि । इति छ. ट पाठ ॥ १३ ॥

नापराध्यति बीभत्सुर्न च पार्थो वृकोदरः ।
नकुलः सहदेवश्च नैव राजा युधिष्ठिरः ॥ १७
युध्यमाना हि कौरव्याः कृतमानाः परस्परम् ।
निहताः सहिताश्चान्यैस्तत्र नास्त्यप्रियं मम ॥ १८
किं तु कर्माकरोद्भीमो वासुदेवस्य पश्यतः ।
दुर्योधनं समाहूय गदायुद्धे महामनाः ॥ १९
शिक्षयाऽभ्यधिकं ज्ञात्वा चरन्तं बहुधा रणे ।
अधो नाभ्याः प्रहृतवांस्तन्मे कोपमवर्धयत् ॥ २०
कथं नु धर्मं धर्मज्ञाः समुद्दिष्टं महात्मभिः ।
त्यजेयुराहवे शूराः प्राणहेतोः कथंचन ॥ २१

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः ॥ १४ ॥

भीमगान्धारीसंवादः ॥ १ ॥

वैशंपायन उवाच ।
तच्छ्रुत्वा वचनं तस्या भीमसेनोऽथ भीतवत् ।
गान्धारीं प्रत्युवाचेदं वचः सानुनयं तदा ॥ १
अधर्मो यदि वा धर्मस्त्रासात्तत्र मया कृतः ।
आत्मानं त्रातुकामेन तन्मे त्वं क्षन्तुमर्हसि ॥ २
न हि युद्धेन पुत्रस्ते धर्मेण स महाबलः ।
दुःशक्यः केनचिद्धर्तुमतो विषममाचरम् ॥ ३
अधर्मेण जितः पूर्वं तेन चापि युधिष्ठिरः ।
निकृताश्च सदैव स्म ततो विषममाचरम् ॥ ४
सैन्यस्यैकोऽवशिष्टोऽयं गदायुद्धे च वीर्यवान् ।
न त्यक्ष्यति हृतं राज्यमिति वै तत्कृतं मया ॥ ५
एकपत्नीं च पाञ्चालीमेकवस्त्रां रजस्वलाम् ।
भवत्या विदितं सर्वमुक्तवान्यत्सुतस्तव ॥ ६
सुयोधनं त्वसंहृत्य न शक्या भूः ससागरा ।
केवला भोक्तुमस्माभिरतश्चैतत्कृतं मया ॥ ७
तच्चाप्यप्रियमस्माकं पुत्रस्ते समुपाचरत् ।
द्रौपद्या यत्सभामध्ये सव्यमूरुमदर्शयत् ॥ ८
तत्रैव वध्यः सोऽस्माकं दुराचारोऽम्ब ते सुतः ।
धर्मराजाज्ञया चैव स्थिताः स्म समये पुरा ॥ ९
वैरमुद्दीपितं राज्ञि पुत्रेण तव यन्महत् ।
क्लेशिताश्च वने नित्यं तत एतत्कृतं मया ॥ १०
वैरस्यास्य गताः पारं हत्वा दुर्योधनं रणे ।
राज्यं युधिष्ठिरे प्राप्ते वयं च गतमन्यवः ॥ ११

गान्धार्युवाच ।
न तस्यैवं वधस्तात यं प्रशंससि मे सुतम् ।
कृतवांश्चापि तत्सर्वं यदिदं भाषसे मयि ॥ १२
हताश्वे नकुले यत्तु वृषसेनेन भारत ।
अपिबः शोणितं सङ्ख्ये दुःशासनशरीरजम् ॥ १३
सद्भिर्विगर्हितं घोरमनार्यजनसेवितम् ।
क्रूरं कर्माकृथास्तस्मात्तदयुक्तं वृकोदर ॥ १४
भीम उवाच ।
हताश्वं नकुलं दृष्ट्वा वृषसेनेन संयुगे ।
शत्रूणां तु प्रहृष्टानां त्रासः संजनितो मया ॥ १५
'स प्रतिज्ञामकरवं पिबाम्यसृगरेरिति ।'
रुधिरं नातिचक्राम दन्तोष्ठादम्ब मा शुचः ॥ १६
[अन्यस्यापि न पातव्यं रुधिरं किंपुनः स्वकम् ।
यथैवात्मा तथा भ्राता विशेषो नास्ति कश्चन ॥ १७]
वैवस्वतो हि तद्वेद यथावत्कुलनन्दिनि ।
मा कृथा हृदि तन्मातर्न तत्पीतं मयाऽनघे ॥ १८
केशपक्षपरामर्शे द्रौपद्या द्यूतकारिते ।
क्रोधाद्यदब्रवं चाहं तच्च मे हृदि वर्तते ॥ १९
क्षत्रधर्माच्युतो राज्ञि भवेयं शाश्वतीः समाः ।
प्रतिज्ञां तामनिस्तीर्य ततस्तत्कृतवानहम् ॥ २०
अनिगृह्य पुरा पुत्रानस्मास्वनपकारिषु ।
न ममार्हसि कल्याणि दोषेण परिशङ्कितुम् ॥ २१

कृतमानाः कृताहंकाराः ॥ १८ ॥ त्रयोदशोऽध्यायः ॥ १३ ॥
उक्तवान् नहि ते पतयः सन्तीत्यादि । राजपुत्री च पाञ्चली-
मिति झ. पाठः ॥ ६ ॥ चतुर्दशोऽध्यायः ॥ १४ ॥

गान्धार्युवाच ।
वृद्धस्यास्य शतं पुत्रान्निघ्नंस्त्वमपराजितः ।
कस्मान्नाशेषयः कंचिद्येनाल्पमपराधितम् ॥ २२
संतानमावयोस्तात वृद्धयोर्हृतराज्ययोः ।
नाशेषयः कथं यष्टिमेकां वृद्धयुगस्य वै ॥ २३
शेषे ह्यवस्थिते तात पुत्राणामल्पकेऽपि च ।
मन्ददुःखं भवेदद्य यदि त्वं धर्ममाचरेः ॥ २४

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः ॥ १५ ॥

युधिष्ठिरादिभिर्गान्धारीकुन्त्योरभिवादनम् ॥ १ ॥ सकुन्त्या गान्धार्या द्रौपदीसमाश्वासनम् ॥ २ ॥

वैशंपायन उवाच ।
तमेवमुक्त्वा गान्धारी युधिष्ठिरमपृच्छत ।
क्व स राजेति सक्रोधा पुत्रपौत्रवधार्दिता ॥ १
तामभ्यगच्छत्कौन्तेयो वेपमानः कृताञ्जलिः ।
युधिष्ठिरस्तु गान्धारीं मधुरं वाक्यमब्रवीत् ॥ २
पुत्रहन्ता नृशंसोऽहं तव देवि युधिष्ठिरः ।
शापार्हः पृथिवीनाशे हेतुभूतः शपस्व माम् ॥ ३
नहि मे जीवितेनार्थो न राज्येन सुखेन वा ।
तादृशान्सुहृदो हत्वा प्रमूढस्य सुहृद्द्रुहः ॥ ४
तमेवंवादिनं भीतं संनिकर्षागतं तदा ।
नोवाच किंचिद्गान्धारी निःश्वासपरमा नृप ॥ ५
तस्यावनतदेहस्य पादयोर्निपतिष्यतः ।
युधिष्ठिरस्य नृपतेर्धर्मज्ञा दीर्घदर्शिनी ॥ ६
अङ्गुल्यग्राणि ददृशे देवी पट्टान्तरेण सा ।
ततः स कुनखीभूतो दर्शनीयनखो नृपः ॥ ७
तं दृष्ट्वा चार्जुनोऽगच्छद्वासुदेवस्य पृष्ठतः ॥ ८
एवं संचेष्टमानांस्तानितश्चेतश्च भारत ।
गान्धारी विगतक्रोधा सांत्वयामास मातृवत् ॥ ९
ते पाण्डवा अनुज्ञाता मातरं वीतमत्सराः ।
अभ्यगच्छन्त सहिताः पृथां पृथुलवक्षसः ॥ १०
चिरस्य दृष्ट्वा पुत्रान्सा पुत्राधिभिरभिप्लुता ।
बाष्पमाहारयद्देवी वस्त्रेणावृत्य वै मुखम् ॥ ११
ततो बाष्पं समुत्सृज्य सह पुत्रैस्तदा पृथा ।
अपश्यदेनाञ्शस्त्रौघैर्बहुधा परिविक्षतान् ॥ १२
सा तानेकैकशः पुत्रान्संस्पृशन्ती पुनःपुनः ।
अन्वशोचत दुःखार्ता द्रौपदीं निहतात्मजाम् ।
रुदन्तीमथ पाञ्चालीं ददर्श पतितां भुवि ॥ १३
द्रौपद्युवाच ।
आर्ये पौत्रास्तु ते सर्वे सौभद्रसहिता गताः ।
न त्वां तेऽद्याभिगच्छन्ति चिरं दृष्ट्वा अनिन्दिते ।
किंनु राज्येन मे कार्यं विहीनायाः सुतैर्वरैः ॥ १४
तां समाश्वासयामास पृथा पृथुललोचना ।
उत्थाप्याङ्केन सुदतीं रुदतीं शोककर्शिताम् ॥ १५
तयैव सहिता चापि पुत्रैरनुगता पृथा ।
अभ्यगच्छत गान्धारीमार्तामार्ततरा स्वयम् ॥ १६
वैशंपायन उवाच ।
तामुवाचाथ गान्धारी सह कुन्त्या यशस्विनीम् ।
मैवं पुत्रीति शोकार्ता पश्य मामपि दुःखितां ॥ १७
मन्ये लोकविनाशोऽयं कालपर्यायनोदितः ।
अवश्यभावी संप्राप्तः स्वभावाद्रोमहर्षणः ॥ १८
इदं तत्समनुप्राप्तं विदुरस्य वचो महत् ।
असिद्धानुनये कृष्णे यदुवाच महामतिः ॥ १९
तस्मिन्नपरिहार्येऽर्थे व्यतीते च विशेषतः ।
मा शुचो न हि शोच्यास्ते संग्रामे निधनं गताः ॥
यथैवाहं तथैव त्वं को वामाश्वासयिष्यति ।
ममैव ह्यपराधेन कुलमद्य्यं विनाशितम् ॥ २१

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥

समाप्तं जलप्रदानिकं पर्व १ ।

कुनखीभूतो हस्तदेश इति शेषः ॥ ७ ॥ आर्ये पौत्रा हता सर्वे इति क छ. पाठ ॥ १४ ॥ वा आवाम् ॥ २१ ॥

पञ्चदशोऽध्यायः ॥ १५ ॥

(अथ स्त्रीविलापपर्व ॥ २ ॥)

षोडशोऽध्यायः ॥ १६ ॥

गान्धार्या व्यासप्रसादलब्धदिव्यचक्षुषा रणाङ्गणदर्शनम् ॥ १ ॥ धृतराष्ट्रयुधिष्ठिरादीनां स्त्रीभिः सह रणभूमिप्रवेशः ॥ २ ॥ स्त्रीणां विलापः ॥ ३ ॥ गान्धार्या कृष्णाय विलपत्स्नुषादिप्रदर्शनम् ॥ ४ ॥

वैशंपायन उवाच ।
एवमुक्त्वा तु गान्धारी कुरूणामवकर्तनम् ।
अपश्यत्तत्र तिष्ठन्ती सर्वं तत्र यथास्थितम् ॥ १
पतिव्रता महाभागा समानव्रतचारिणी ।
उग्रेण तपसा युक्ता सततं सत्यवादिनी ॥ २
वरदानेन कृष्णस्य महर्षेः पुण्यकर्मणः ।
दिव्यज्ञानबलोपेता विविधं पर्यदेवयत् ॥ ३
ददर्श सा बुद्धिमती दूरादपि यथाऽन्तिके ।
रणाजिरं तद्वीराणामद्भुतं रोमहर्षणम् ॥ ४
अस्थिकेशवसाकीर्णं शोणितौघपरिप्लुतम् ।
शरीरैर्बहुसाहस्रैर्विनिकीर्णं समन्ततः ॥ ५
गजाश्वरथयोधानामावृतं रुधिराविलैः ।
शरीरैरशिरस्कैश्च विदेहैश्च शिरोगणैः ॥ ६
गजाश्वनरवीराणां निःसत्त्वैरभिसंवृतम् ।
सृगालबलगोमायुकङ्ककाकनिषेवितम् ॥ ७
रक्षसां पुरुषादानां मोदनं कुरराकुलम् ।
अशिवाभिः शिवाभिश्च नादितं गृध्रसेवितम् ॥ ८
ततो व्यासाभ्यनुज्ञातो धृतराष्ट्रो महीपतिः ।
पाण्डुपुत्राश्च ते सर्वे युधिष्ठिरपुरोगमाः ॥ ९
वासुदेवं पुरस्कृत्य हतबन्धुं च पार्थिवम् ।
कुरुस्त्रियः समादाय जग्मुरायोधनं प्रति ॥ १०
समासाद्य कुरुक्षेत्रं ताः स्त्रियो निहतेश्वराः ।
अपश्यन्त हतांस्तत्र पुत्रान्भ्रातॄन्पितॄन्पतीन् ॥ ११
क्रव्यादैर्भक्ष्यमाणांश्च गोमायुबलवायसैः ।
भूतैः पिशाचै रक्षोभिर्विविधैश्च निशाचरैः ॥ १२
रुद्राक्रीडनिभं दृष्ट्वा तदा विशसनं स्त्रियः ।
कुरर्य इव शोकार्ता विक्रोशन्त्यो निपेतिरे ॥ १३
अदृष्टपूर्वं पश्यन्त्यो दुःखार्ता भरतस्त्रियः ।
शरीरेषु स्खलन्त्यश्च न्यपतंश्च परासुवत् ॥ १४
श्रान्तानां चाप्यनाथानां क्रन्दन्तीनां भृशं तदा ।
पाञ्चालकुरुयोपाणां कृपणं तदभून्महत् ॥ १५
दुःखोपहतचित्ताभिः समन्तादनुनादितम् ।
दृष्ट्वाऽऽयोधनमत्युग्रं धर्मज्ञा सुबलात्मजा ॥ १६
ततः सा पुण्डरीकाक्षमामन्त्र्य पुरुषोत्तमम् ।
कुरूणां वैशसं दृष्ट्वा इदं वचनमब्रवीत् ॥ १७
पश्यैताः पुण्डरीकाक्ष स्नुषा मे निहतेश्वराः ।
प्रकीर्णकेशाः क्रोशन्तीः कुररीरिव माधव ॥ १८
अभूस्त्वभिसमागम्य स्मरन्त्यो भरतर्षभान् ।
पृथगेवानुपद्यन्ते पुत्रान्भ्रातॄन्पितॄन्पतीन् ॥ १९
वीरसूभिर्महाबाहो हतपुत्राभिरावृतम् ।
क्वचिच्च वीरपत्नीभिर्हतवीराभिरावृतम् ॥ २०
शोभितं पुरुषव्याघ्रैः कर्णभीष्माभिमन्युभिः ।
द्रोणद्रुपदशल्यैश्च ज्वलद्भिरिव पावकैः ॥ २१
काञ्चनैः कवचैर्निष्कैर्मणिभिश्च महाधनैः ।
अद्भुतैर्हस्तकेयूरैः स्रग्भिश्च समलंकृतम् ॥ २२
वीरबाहुविसृष्टाभिः शक्तिभिः परिघैरपि ।
खड्गैश्च विविधैस्तीक्ष्णैः सशरैश्च शरासनैः ॥ २३
क्रव्यादसङ्घैर्मुदितैस्तिष्ठद्भिः सहितैः क्वचित् ।
क्वचिदाक्रीडमानैश्च शयानैश्चापरैः क्वचित् ॥ २४
एतदेवंविधं वीर संपश्यायोधनं विभो ।
'त्वया तु श्रावितं कर्म पुष्कराक्ष महाद्युते ।'
पश्यमाना हि दह्यामि शोकेनाहं जनार्दन ॥ २५
पाञ्चालानां कुरूणां च विनाशं मधुसूदन ।
पञ्चानामपि भूतानामहं वधमचिन्तयम् ॥ २६
तान्सुपर्णाश्च गृध्राश्च कर्षयन्त्यसृगुक्षितान् ।
विगृह्य चरणैर्गृध्रा भक्षयन्ति सहस्रशः ॥ २७

अवकर्तनं युद्धस्थानम् । सर्वं दिव्येन चक्षुषेति झ पाठः ॥ १ ॥ पञ्चानां भूतानां पृथिव्यादीनाम् । कुरुपाञ्चालवधात्कृत्स्नं पाञ्चभौतिकं जगन्नष्टमिति भावः ॥ २६ ॥

जयद्रथस्य कर्णस्य तथैव द्रोणभीष्मयोः ।
अभिमन्योर्विनाशं च कश्चिन्तयितुमर्हति ॥ २८
अवध्यकल्पान्निहतान्गतसत्वानचेतसः ।
गृध्रकङ्कवलश्येनश्वसृगालसमावृतान् ॥ २९
अमर्षवशमापन्नान्दुर्योधनवशे स्थितान् ।
पंश्येमान्पुरुषव्याघ्रान्संशान्तान्पावकानिव ॥ ३०
शयनान्युचिताः सर्वे मृदूनि विमलानि च ।
विपन्नास्तेऽद्य वसुधां विवृतामधिशेरते ॥ ३१
बन्दिभिः सततं काले स्तुवद्भिरभिनन्दिताः ।
शिवानामशिवा घोराः शृण्वन्ति विविधा गिरः॥
ये पुरा शेरते वीराः शयनेषु यशस्विनः ।
चन्दनागुरुदिग्धाङ्गास्तेऽद्य पांसुषु शेरते ॥ ३३
तेषामाभरणान्येते गृध्रगोमायुवायसाः ।
आक्षिपन्ति शिवा घोरा विनदन्त्यःपुनः पुनः ३४
बाणान्विनिशितान्पीतान्निस्त्रिंशान्विमला गदाः ।
युद्धाभिमानिनः सर्वे जीवन्त इव बिभ्रति ॥ ३५
सुरूपवर्णा बहवः क्रव्यादैरवघट्टिताः ।
ऋषभप्रतिरूपाक्षाः शेरते च सहस्रशः ॥ ३६
अपरे पुनरालिङ्ग्य गदाः परिघबाहवः ।
शेरतेऽभिमुखाः शूरा दयिता इव योषितः॥ ३७
बिभ्रतः कवचान्यन्ये विमलान्यायुधानि च ।
न धर्षयन्ति क्रव्यादा जीवन्तीति जनार्दन ॥ ३८
क्रव्यादैः कृष्यमाणानामपरेषां महात्मनाम् ।
शातकौम्भ्यः स्रजश्चित्रा विप्रकीर्णाः समन्ततः३९
एते गोमायवो भीमा निहतानां यशस्विनाम् ।
कण्ठान्तरगतान्हारानाक्षिपन्ति सहस्रशः ॥ ४०
सर्वेष्वपररात्रेषु यानवन्दन्त बन्दिनः ।
स्तुतिभिश्च परार्ध्याभिरुपचारैश्च शिक्षिताः ॥४१
तानद्य परिदेवन्ति दुःखार्ताः परमाङ्गनाः ।
कृपणा वृष्णिशार्दूल दुःखशोकार्दिता भृशम् ४२
रक्तोत्पलवनानीव विभान्ति रुचिराणि च ।
मुखानि परमस्त्रीणां परिशुष्काणि केशव ॥ ४३
रुदित्वा विरता ह्येता ध्यायन्त्यः सपरिक्रमाः ।
कुरुस्त्रियोऽभिगच्छन्ति तेन तेनैव दुःखिताः॥४४

एतान्यादित्यवर्णानि तपनीयनिभानि च ।
पश्य रोदनताम्राणि वक्त्राणि कुरुयोषिताम् ॥४५
श्यामानां वरवर्णानां गौरीणामेकवाससाम् ।
दुर्योधनवरस्त्रीणां पश्य वृन्दानि केशव ॥ ४६
आसामपरिपूर्णार्थं निशम्य परिदेवितम् ।
इतरेतरसंक्रन्दान्न विजानन्ति योषितः ॥ ४७
एता दीर्घमिवोच्छ्वस्य विकृश्य च विलप्य च ।
विस्पन्दमाना दुःखेन वीरा जहति जीवितम् ४८
बह्व्यो दृष्ट्वा शरीराणि क्रोशन्ति विलपन्ति च ।
पाणिभिश्चापरा घ्नन्ति शिरांसि मृदुपाणयः ॥४९
शिरोभिः पतितैर्हस्तैः सर्वाङ्गैः खण्डशः कृतैः ।
इतरेतरसंपृक्तैराकीर्णा भाति मेदिनी ॥ ५०
विशिरस्कानथो कायान्दृष्ट्वा ह्येतानिनिन्दितान् ।
मुह्यन्त्यनुचिता नार्यो विदेहानि शिरांसि च ५१
शिरः कायेन संधाय प्रेक्षमाणा विचेतसः ।
अपश्यन्त्योऽपरं तत्र नेदमस्मेऽति दुःखिताः ॥५२
बाहूरुचरणानन्यान्विशिखोन्मथितान्पृथक् ।
संदधत्योऽसुखाविष्टा मूर्छन्त्येताः पुनःपुनः ॥५३
उत्कृत्तशिरसश्चान्यान्विजग्धान्मृगपक्षिभिः ।
दृष्ट्वा काश्चिन्न जानन्ति भर्तॄन्भरतयोषितः ॥ ५४
पाणिभिश्चापरा घ्नन्ति शिरांसि मधुसूदन ।
प्रेक्ष्य भ्रातॄन्पितॄन्पुत्रान्पतींश्च निहतान्परैः ॥ ५५
बाहुभिश्च सखड्गैश्च शिरोभिश्च सकुण्डलैः ।
अगम्यकल्पा पृथिवी मांसशोणितकर्दमा ।
बभूव भरतश्रेष्ठ प्राणिभिर्गतजीवितैः ॥ ५६
न दुःखेषूचिताः पूर्वं दुःखं गाहन्त्यनिन्दिताः ।
भ्रातृभिः पतिभिः पुत्रैरुपाकीर्णां वसुंधराम् ॥ ५७
यूथानीव किशोरीणां सुकेशीनां जनार्दन ।
स्नुषाणां धृतराष्ट्रस्य पश्य वृन्दान्यनेकशः ॥ ५८
इतो दुःखतरं किंनु केशव प्रतिभाति मे ।
यदिमाः कुर्वते सर्वा रवमुच्चावचं स्त्रियः ॥ ५९
नूनमाचरितं पापं मया पूर्वेषु जन्मसु ।
या पश्यामि हतान्पुत्रान्पौत्रान्भ्रातॄंश्च माधव ॥ ६०

शयनानि आस्तीर्यैति शेष· ॥३१॥ एता शोचन्तीरभिलक्ष्येति शेष. ॥४८॥ विजग्धान्भक्षितान् ॥५४॥ षोडशोऽध्याय ॥१६॥

एवमार्ता विलपती समाभाष्य जनार्दनम् । गान्धारी पुत्रशोकार्ता ददर्श निहतं सुतम् ॥ ६१

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः ॥ १७ ॥

गान्धार्या दुर्योधनमालिङ्ग्य परिदेवनम् ॥ १ ॥

वैशंपायन उवाच ।
दुर्योधनं हतं दृष्ट्वा गान्धारी शोककर्शिता ।
सहसा न्यपतद्भूमौ छिन्नेव कदली वने ॥ १
सा तु लब्ध्वा पुनः संज्ञां विकृश्य च विलप्य च ।
दुर्योधनमभिप्रेक्ष्य शयानं रुधिरोक्षितम् ॥ २
परिष्वज्याथ गान्धारी कृपणं पर्यदेवयत् ।
हाहापुत्रेति शोकार्ता विललापाकुलेन्द्रिया ॥ ३
सुगूढजत्रु विपुलं हारनिष्कविभूषितम् ।
वारिणा नेत्रजेनोरः सिञ्चन्ती शोकतापिता ॥ ४
समीपस्थं हृषीकेशमिदं वचनमब्रवीत् ।
उपस्थितेऽस्मिन्संग्रामे ज्ञातीनां संक्षये विभो ॥ ५
मामयं प्राह वार्ष्णेय प्राञ्जलिर्नृपसत्तमः ।
अस्मिञ्ज्ञातिसमुद्धर्षे जयमम्बा ब्रवीतु मे ॥ ६
इत्युक्ते जानती सर्वमहं स्वव्यसनागमम् ।
अब्रुवं पुरुषव्याघ्र यतो धर्मस्ततो जयः ॥ ७
तथा तु युध्यमानस्त्वं संप्रगृह्य सुपुत्रक ।
ध्रुवं शस्त्रजिताँल्लोकान्प्राप्स्यस्यमरवत्प्रभो ॥ ८
इत्येवमब्रुवं पूर्वं नैनं शोचामि वै प्रभो ।
धृतराष्ट्रं तु शोचामि कृपणं हतबान्धवम् ॥ ९
अमर्षणं युधां श्रेष्ठं कृतास्त्रं युद्धदुर्मदम् ।
शयानं वीरशयने पश्य माधव मे सुतम् ॥ १०
योऽयं मूर्धावसिक्तानामग्रे याति परंतपः ।
सोऽयं पांसुषु शेतेऽद्य पश्य कालस्य पर्ययम् ॥ ११
ध्रुवं दुर्योधनो वीरो गतिं न सुलभां गतः ।
तथा ह्यभिमुखः शेते शयने वीरसेविते ॥ १२
यं पुरा पर्युपासीना रमयन्ति वरस्त्रियः ।
तं वीरशयने सुप्तं रमयन्त्यशिवाः शिवाः ॥ १३
यं पुरा पर्युपासीना रमयन्ति महीक्षितः ।
महीतलस्थं निहतं गृध्रास्तं पर्युपासते ॥ १४
यं पुरा व्यजनैरम्यैरुपवीजन्ति योषितः ।
तमद्य पक्षव्यजनैरुपवीजन्ति पक्षिणः ॥ १५
एष शेते महाबाहुर्बलवान्सत्यविक्रमः ।
सिंहेनेव द्विपः सङ्ख्ये भीमसेनेन पातितः ॥ १६
पश्य दुर्योधनं कृष्ण शयानं रुधिरोक्षितम् ।
निहतं भीमसेनेन गदां संमृज्य भारत ॥ १७
अक्षौहिणीर्महाबाहुर्दश चैकां च केशव ।
आनयद्यः पुरा सङ्ख्ये सोऽनयान्निधनं गतः ॥ १८
एष दुर्योधनः शेते महेष्वासो महाबलः ।
शार्दूल इव सिंहेन भीमसेनेन पातितः ॥ १९
विदुरं ह्यवमत्यैष पितरं चैव मन्दभाक् ।
बालो वृद्धावमानेन मन्दो मृत्युवशं गतः ॥ २०
निःसपत्ना मही यस्य त्रयोदशसमाः स्थिता ।
स शेते निहतो भूमौ पुत्रो मे पृथिवीपतिः ॥ २१
अपश्यं कृष्ण पृथिवीं धार्तराष्ट्रानुशासिताम् ।
पूर्णां हस्तिगवाश्वैश्च वार्ष्णेय न तु तच्चिरम् ॥ २२
तामेवाद्य महाबाहो पश्याम्यन्यानुशासिताम् ।
हीनां हस्तिगवाश्वेन किंनु जीवामि माधव ॥ २३
इदं कष्टतरं पश्य पुत्रस्यापि वधान्मम ।
या इमाः पर्युपासन्ते हताञ्शूरान्रणे स्त्रियः ॥ २४
प्रकीर्णकेशां सुश्रोणीं दुर्योधनभुजाङ्कगाम् ।
रुक्मवेदिनिभां पश्य कृष्ण लक्ष्मणमातरम् ॥ २५
नूनमेषा पुरा बाला जीवमाने महाभुजे ।
भुजावाश्रित्य रमते सुभुजस्य मनस्विनी ॥ २६
कथं तु शतधा नेदं हृदयं मम दीर्यते ।
पश्यन्त्या निहतं पुत्रं पौत्रेण सहितं रणे ॥ २७
पुत्रं रुधिरसंसिक्तमुपजिघ्रत्यनिन्दिता ।
दुर्योधनं तु वामोरूः पाणिना परिमार्जती ॥ २८
किंनु शोचति भर्तारं हतपुत्रं मनस्विनी ।
तथा ह्यवस्थिता भाति पुत्रं चाप्यभिवीक्ष्य सा ॥ २९

पुत्रेण सहित रणे इति झ. पाठ. ॥ २७ ॥

स्वशिरः पञ्चशाखाभ्यामभिहत्यायतेक्षणा ।
पतत्युरसि वीरस्य कुरुराजस्य माधव ॥ ३०
पुण्डरीकनिभा भाति पुण्डरीकान्तरप्रभा ।
मुखं प्रमृज्य पुत्रस्य भर्तुश्चैव तपस्विनी ॥ ३१
यदि सत्यागमाः सन्ति यदि वै श्रुतयस्तथा ।
ध्रुवं लोकानवाप्तोऽयं नृपो बाहुबलार्जितान् ॥ ३२

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः ॥ १८ ॥

कृष्णंप्रति गान्धारीवचनम् ॥ १ ॥

गान्धार्युवाच ।
पश्य माधव पुत्रान्मे शतसङ्ख्याञ्जितक्लमान् ।
गदया भीमसेनेन भूयिष्ठं निहतान्रणे ॥ १
इदं दुःखतरं मेऽद्य यदिमा मुक्तमूर्धजाः ।
हतपुत्रा रणे बालाः परिधावन्ति मे स्नुषाः ॥ २
प्रासादतलचारिण्यश्चरणैर्भूषणान्वितैः ।
कायेनाद्य स्पृशन्तीमां रुधिरार्द्रां वसुंधराम् ॥ ३
कृच्छ्रादुत्सारयन्ति स्म गृध्रगोमायुवायसान् ।
दुःखेनार्ता विघूर्णन्त्यो मत्ता इव चरन्त्युत ॥ ४
एषाऽन्या त्वनवद्याङ्गी करसंमितमध्यमा ।
घोरमायोधनं दृष्ट्वा निपतत्यतिदुःखिता ॥ ५
दृष्ट्वा मे पार्थिवसुतामेतां लक्ष्मणमातरम् ।
राजपुत्रीं महाबाहो मनो न ह्युपशाम्यति ॥ ६
भ्रातॄंश्चान्याः पितॄंश्चान्याः पुत्रांश्च निहतान्भुवि ।
दृष्ट्वा परिपतन्त्येताः प्रगृह्य सुमहाभुजान् ॥ ७
मध्यमानां तु नारीणां वृद्धानां चापराजित ।
आक्रन्दं हतबन्धूनां दारुणे वैशसे शृणु ॥ ८
रथनीडानि देहांश्च हतानां गजवाजिनाम् ।
आश्रित्य श्रममोहार्ताः स्थिताः पश्य महाभुज ॥ ९
अन्या चापहृतं कायाच्चारुकुण्डलमुन्नसम् ।
स्वस्य बन्धोः शिरः कृष्ण गृहीत्वा पश्य तिष्ठति १०
पूर्वजातिकृतं पापं मन्ये नाल्पमिवानघ ।
एताभिर्निरवद्याभिर्मया चैवाल्पपुण्यया ।
यदिदं धर्मराजेन घातितं नो जनार्दन ॥ ११
न हि नाशोऽस्ति वार्ष्णेय कर्मणोः शुभपापयोः १२
प्रत्यग्रवयसः पश्य दर्शनीयकुचाननाः ।
कुलेषु जाता ह्रीमत्यः कृष्णपक्ष्माक्षिमूर्धजाः ॥ १३
हंसगद्गदभाषिण्यो दुःखशोकमोहिताः ।
सारस्य इव वाशन्त्यः पतिताः पश्य माधव ॥ १४
फुल्लपद्मप्रकाशानि पुण्डरीकाक्ष योषिताम् ।
अनवद्यानि वक्त्राणि तापयत्येष रश्मिवान् ॥ १५
सेर्ष्याणां मम पुत्राणां वासुदेवावरोधनम् ।
मत्तमातङ्गदर्पाणां पश्यन्त्यद्य पृथग्जनाः ॥ १६
शतचन्द्राणि चर्माणि ध्वजांश्चादित्यवर्चसः ।
रौक्माणि चैव वर्माणि निष्कानपि च काञ्चनान् ॥
शिरस्त्राणानि चैतानि पुत्राणां मे महीतले ।
पश्य दीप्तानि गोविन्द पावकान्सुहुतानिव ॥ १८
एष दुःशासनः शेते शूरेणामित्रघातिना ।
पीतशोणितसर्वाङ्गो युधि भीमेन पातितः ॥ १९
गदया भीमसेनेन पश्य माधव मे सुतम् ।
द्यूतक्लेशाननुस्मृत्य द्रौपदीचोदितेन च ॥ २०
उक्ता ह्यनेन पाञ्चाली सभायां द्यूतनिर्जिता ।
प्रियं चिकीर्षता भ्रातुः कर्णस्य च जनार्दन ॥ २१
सहैव सहदेवेन नकुलेनार्जुनेन च ।
दासीभूताऽसि पाञ्चालि क्षिप्रं प्रविश नो गृहान् ॥
ततोऽहमब्रुवं कृष्ण तदा दुर्योधनं नृपम् ।
मृत्युपाशपरिक्षिप्तां द्रौपदीं पुत्र वर्जय ॥ २३
निबोधैनं सुदुर्बुद्धिं मातुलं कलहप्रियम् ।
क्षिप्रमेनं परित्यज्य पुत्र संशाम्य पाण्डवैः ॥ २४
न बुद्ध्यसे त्वं दुर्बुद्धे भीमसेनममर्षणम् ।
वाङ्नाराचैस्तुदंस्तीक्ष्णैरुल्काभिरिव कुञ्जरम् ॥ २५
तानेवं रहसि क्रुद्धो वाक्शल्यानवधारयन् ।
उत्ससर्ज विषं तेषु सर्पो गोवृषभेष्विव ॥ २६

पञ्चशाखाभ्यां पञ्चाङ्गुलिभ्यां पाणिभ्याम् ॥ ३० ॥ सप्तदशोऽध्यायः ॥ १७ ॥

करसंमितमध्यमा मुष्टिप्रमितमध्या ॥ ५ ॥ क्षिप्त शकुनि पुत्र वर्जयेति झ. पाठः ॥ २३ ॥ अष्टादशोऽध्यायः ॥ १८ ॥

एष दुःशासनः शेते विक्षिप्य विपुलौ भुजौ ।
निहतो भीमसेनेन सिंहेनेव महागजः ॥ २७
अत्यर्थमकरोद्रौद्रं भीमसेनोऽत्यमर्षणः ।
दुःशासनस्य यत्क्रुद्धोऽपिबच्छोणितमाहवे ॥ २८

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः ॥ १९ ॥

कृष्णंप्रति गान्धारीवचनम् ॥ १ ॥

गान्धार्युवाच ।
एष माधव पुत्रो मे विकर्णः प्राज्ञसंमतः ।
भूमौ विनिहतः शेते भीमेन शतधा कृतः ॥ १
गजमध्ये हतः शेते विकर्णो मधुसूदन ।
नीलमेघपरिक्षिप्तः शरदीव निशाकरः ॥ २
अस्य चापग्रहेणैव पाणिः कृतकिणो महान् ।
कथंचिच्छिद्यते गृध्रैरत्तुकामैस्तलत्रवान् ॥ ३
अस्य भार्याऽऽमिषप्रेप्सून्गृध्रकाकांस्तपस्विनी ।
वारयत्यनिशं बाला न च शक्नोति माधव ॥ ४
युवा वृन्दारकसमो विकर्णः पुरुषर्षभ ।
सुखोषितः सुखार्हश्च शेते पांसुषु माधव ॥ ५
कर्णिनालीकनाराचैर्भिन्नमर्माणमाहवे ।
अद्यापि न जहात्येनं लक्ष्मीर्भरतसत्तमम् ॥ ६
एष संग्रामशूरेण प्रतिज्ञां पालयिष्यता ।
दुर्मुखोऽभिमुखः शेते हतोऽरिगणहा रणे ॥ ७
तस्यैतद्वदनं कृष्ण श्वापदैरर्धभक्षितम् ।
विभात्यभ्यधिकं तात सप्तम्यामिव चन्द्रमाः ॥ ८
शूरस्य हि रणे कृष्ण पश्याननमथेदृशम् ।
स कथं निहतोऽमित्रैः पांसून्ग्रसति मे सुतः ॥ ९
यस्याहवमुखे सौम्य स्थाता नैवोपपद्यते ।
स कथं दुर्मुखोऽमित्रैर्हतो विबुधलोकजित् ॥ १०
चित्रसेनं हतं भूमौ शयानं मधुसूदन ।
धार्तराष्ट्रमिमं पश्य प्रतिमानं धनुष्मताम् ॥ ११
तं चित्रमाल्याभरणं युवत्यः शोककर्शिताः ।
क्रव्यादसङ्घैः सहिता रुदन्त्यः पर्युपासते ॥ १२
स्त्रीणां रुदितनिर्घोषः श्वापदानां च गर्जितम् ।
चित्ररूपमिदं कृष्ण विमृश्य प्रतिभाति मे ॥ १३
युवा वृन्दारको नित्यं प्रवरस्त्रीनिषेवितः ।
विविंशतिरसौ शेते ध्वस्तः पांसुषु माधव ॥ १४
शरसंकृत्तवर्माणं वीरं विशसने हतम् ।
परिवार्यासते गृध्राः परिविंशं विविंशतिम् ॥ १५
प्रविश्य समरे शूरः पाण्डवानामनीकिनीम् ।
स वीरशयने शेते परः सत्पुरुषोचिते ॥ १६
स्मितोपपन्नं सुनसं सुभ्रु ताराधिपोपमम् ।
अतीव सौम्यवदनं कृष्ण पश्य विविंशतेः ॥ १७
यं स्म तं पर्युपासन्ते बहुधा वरयोषितः ।
क्रीडन्तमिव गन्धर्वं देवकन्याः सहस्रशः ॥ १८
हन्तारं परसैन्यानां शूरं समितिशोभनम् ।
निबर्हणममित्राणां दुःसहं विषहेत कः ॥ १९
दुःसहस्यैतदाभाति शरीरं संवृतं शरैः ।
गिरिरात्मरुहैः फुल्लैः कर्णिकारैरिवाचितः ॥ २०
शातकौम्भ्या स्रजा भाति कवचेन च भास्वता ।
अग्निनेव गिरिः श्वेतो गतासुरपि दुःसहः ॥ २१

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः ॥ २० ॥

कृष्णंप्रति गान्धार्या रुदन्तीनां स्त्रीणां प्रदर्शनम् ॥ १ ॥

गान्धार्युवाच ।
अध्यर्धगुणमाहुर्यं बले शौर्ये च केशव ।
पित्रा त्वया च दाशार्ह दृप्तं सिंहमिवोत्कटम् ॥ १
यो बिभेद चमूमेको मम पुत्रस्य दुर्भिदाम् ।
स भूत्वा मृत्युरन्येषां स्वयं मृत्युवशं गतः ॥ २

अध्यर्धगुण सार्धगुणम् ॥ १ ॥

तस्योपलक्षये कृष्ण कार्ष्णेरमिततेजसः ।
अभिमन्योर्हतस्यापि प्रभा नैवोपशाम्यति ॥ ३
एषा विराटदुहिता स्नुषा गाण्डीवधन्वनः ।
हतं बाला पतिं वीरं दृष्ट्वा शोचत्यनिन्दिता ॥ ४
तमेषा हि समागम्य भार्या भर्तारमन्तिके ।
विराटदुहिता कृष्ण पाणिना परिमार्जति ॥ ५
तस्य वक्त्रमुपाघ्राय सौभद्रस्य मनस्विनी ।
विबुद्धकमलाकारं कम्बुवृत्तशिरोधरम् ॥ ६
कामरूपवती चैषा परिष्वजति भामिनी ।
लज्जमाना पुरा चैनं माध्वीकमदमूर्च्छिता ॥ ७
तस्य क्षतजसंदिग्धं जातरूपपरिष्कृतम् ।
विमुच्य कवचं कृष्ण शरीरमभिवीक्षते ॥ ८
अवेक्षमाणा तं बाला कृष्ण त्वामभिभाषते ।
अयं ते पुण्डरीकाक्ष सदृशाक्षो निपातितः ॥ ९
बले वीर्ये च सदृशस्तेजसा चैव तेऽनघ ।
रूपेण च तथाऽत्यर्थं शेते भुवि निपातितः ॥१०
अत्यन्तं सुकुमारस्य राङ्कवाजिनशायिनः ।
कच्चिदद्य शरीरं ते भूमौ न परितप्यते ॥ ११
मातङ्गभुजवर्ष्माणौ ज्याक्षेपकठिनत्वचौ ।
काञ्चनाङ्गदिनौ शेते निक्षिप्य विपुलौ भुजौ ।
व्यायम्य बहुधा नूनं सुखसुप्तः श्रमादिव ॥ १२
एवं विलपतीमार्तां किं मां न प्रतिभाषसे ।
न स्नराम्यपराधं ते किं मां न प्रतिभाषसे ॥१३
ननु मां त्वं पुरा दूरादभिवीक्ष्याभिभाषसे ।
न स्नराम्यपराधं मे किं मां न प्रतिभाषसे ॥ १४
आर्यामार्य सुभद्रां त्वमिमांश्च त्रिदशोपमान् ।
पितॄन्मां चैव दुःखार्तां विहाय क्व गमिष्यसि १५
तस्य शोणितदिग्धान्वै केशानुन्नम्य पाणिना ।
उत्सङ्गे वक्त्रमाधाय जीवन्तमिव पृच्छति ॥ १६
स्वस्रीयं वासुदेवस्य पुत्रं गाण्डीवधन्वनः ।
कथं त्वां रणमध्यस्थं जघ्नुरेते महारथाः ॥ १७
धिगस्तु क्रूरकर्तॄंस्तान्कृपकर्णजयद्रथान् ।
द्रोणद्रौणायनी चोभौ यैरहं विधवा कृता ॥ १८
रथर्षभाणां सर्वेषां कथमासीत्तदा मनः ।
बालं त्वां परिवार्यैकमनेकेषां च जघ्नताम् ॥ १९
कथं नु पाण्डवानां च पाञ्चालानां तु पश्यताम् ।
त्वं वीर निधनं प्राप्तो नाथवान्सन्ननाथवत् ॥२०
दृष्ट्वा बहुभिराक्रन्दे निहतं त्वां पिता तव ।
वीरः पुरुषशार्दूलः कथं जीवति पाण्डवः ॥ २१
न राज्यलाभो विपुलः शत्रूणां च पराभवः ।
प्रीतिं धास्यति पार्थानां त्वामृते पुष्करेक्षण ॥२२
तव शस्त्रजितॉल्लोकान्धर्मेण च दमेन च ।
क्षिप्रमन्वागमिष्यामि तत्र मां प्रतिपालय ॥ २३
दुर्मरं पुनरप्राप्ते काले भवति केनचित् ।
यदहं त्वां रणे दृष्ट्वा हतं जीवामि दुर्भगा ॥ २४
कामिदानीं नरव्याघ्र श्लक्ष्णया स्मितया गिरा ।
पितृलोके समेत्यान्यां मामिवामन्त्रयिष्यसि ॥२५
नूनमप्सरसां स्वर्गे मनांसि प्रमथिष्यसि ।
परमेण च रूपेण गिरा च स्मितपूर्वया ॥ २६
प्राप्य पुण्यकृताँल्लोकानप्सरोभिः समेयिवान् ।
सौभद्र विहरन्काले स्मरेथाः सुकृतानि मे ॥ २७
एतावानिह संवासो विहितस्ते मया सह ।
षण्मासान्सप्तमे मासि त्वं वीर निधनं गतः ॥ २८
इत्युक्तवचनामेनामपकर्षन्ति दुःखिताम् ।
उत्तरां मोघसंकल्पां मत्स्यराजकुलस्त्रियः ॥ २९
उत्तरामपकृष्यैनामार्तामार्ततराः स्वयम् ।
विराटं निहतं दृष्ट्वा क्रोशन्ति विलपन्ति च ॥ ३०
द्रोणास्त्रशरसंकृत्तं शयानं रुधिरोक्षितम् ।
विराटं वितुदन्त्येते गृध्रगोमायुवायसाः ॥ ३१
वितुद्यमानं विहगैर्विराटमसितेक्षणाः ।
न शक्नुवन्ति विहगान्निवारयितुमातुराः ॥ ३२
आसामातपतप्तानामायासेन च योषिताम् ।
श्रमेण च विवर्णानां वक्त्राणां विप्लुतं वपुः ॥ ३३
उत्तरं चाभिमन्युं च काम्भोजं च सुदक्षिणम् ।

दुष्करं पुनरप्राप्त काले भवति केनचित् इति क पाठ. । दुष्करं प्रति न प्राप्तमित्यादि छ. ट. पाठ ॥ २४ ॥

वपु शस्त्राकृति । वपु क्लीब तनौ शस्त्राकृतावपीति मेदिनी ॥ ३३ ॥ विंशतितमोऽध्याय ॥ २० ॥

कार्ष्णिनाऽभिहतं पश्य लक्ष्मणं प्रियदर्शनम् । आयोधनशिरोमध्ये शयानं पश्य माधव ॥ ३४

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः ॥ २१ ॥

कृष्णंप्रति गान्धार्यां कर्णशरीरस्य विलपन्तीनां तत्स्त्रीणां च प्रदर्शनम् ॥ १ ॥

गान्धार्युवाच ।
एष वैकर्तनः शेते महेष्वासो महारथः ।
ज्वलितानलवत्सङ्ख्ये संशान्तः पार्थतेजसा ॥ १
पश्य वैकर्तनं कर्णं निहत्यातिरथान्बहून् ।
शोणितौघपरीताङ्गं शयानं पतितं भुवि ॥ २
अमर्षी दीर्घरोषश्च महेष्वासो महारथः ।
रणे विनिहतः शेते शूरो गाण्डीवधन्वना ॥ ३
यं स्म पाण्डवसंत्रासान्मम पुत्रा महारथाः ।
प्रायुध्यन्त पुरस्कृत्य मातङ्गा इव यूथपम् ॥ ४
शार्दूलमिव सिंहेन समरे सव्यसाचिना ।
मातङ्गमिव मत्तेन मातङ्गेन निपातितम् ॥ ५
तमेताः पुरुषव्याघ्र निहतं शूरमाहवे ।
प्रकीर्णमूर्धजास्तस्य स्त्रियस्तं पर्युपासते ॥ ६
उद्विग्नः सततं यस्माद्धर्मराजो युधिष्ठिरः ।
त्रयोदशसमा निद्रां चिन्तयन्नाध्यगच्छत ॥ ७
अनाधृष्यः परैर्युद्धे शत्रुभिर्मघवानिव ।
युगान्ताग्निरिवार्चिष्मान्हिमवानिव सुस्थिरः ॥ ८
स भूत्वा शरणं पूर्वं धार्तराष्ट्रस्य माधव ।
भूमौ विनिहतः शेते वातभग्न इव द्रुमः ॥ ९
पश्य कर्णस्य पत्नीं त्वं वृषसेनस्य मातरम् ।
लालप्यमानां करुणं रुदतीं पतितां भुवि ॥ १०
आचार्यशापोऽनुगतो ध्रुवं त्वां
यदग्रसच्चक्रमियं धरित्री ।
ततः शरेणापहृतं शिरस्ते
धनञ्जयेनाहवचक्रमध्ये ॥ ११
हाहा धिगेषा पतिता विसंज्ञा
समीक्ष्य जाम्बूनदबद्धकक्षम् ।
कर्णं महाबाहुमदीनसत्वं
सुषेणमाता रुदती भृशार्ता ॥ १२
अल्पावशेषोऽहि कृतो महात्मा
शरीरभक्षैः परिभक्षयद्भिः ।
द्रष्टुं न संप्रीतिकरः शशीव
कृष्णस्य पक्षस्य चतुर्दशाहे ॥ १३
सा वर्तमाना पतिता पृथिव्या-
मुत्थाय दीना पुनरेव चैषा ।
कर्णस्य वक्त्रं परिजिघ्रमाणा
रोरूयते पुत्रवधाभितप्ता ॥ १४

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि एकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः ॥ २२ ॥

गान्धार्यां कृष्णंप्रति बाह्लिकादीनां तथा तत्स्त्रीणां च प्रदर्शनम् ॥ १ ॥

गान्धार्युवाच ।
आवन्त्यं भीमसेनेन भक्षयन्ति निपातितम् ।
गृध्रगोमायवः शूरं दूरबन्धुमबन्धुवत् ॥ १
तं पश्य कदनं कृत्वा शूराणां मधुसूदन ।
शयानं वीरशयने रुधिरेण समुक्षितम् ॥ २
तं शृगालाश्च कङ्काश्च क्रव्यादाश्च पृथग्विधाः ।
तेनतेन विकर्षन्ति पश्य कालस्य पर्ययम् ॥ ३
शयानं वीरशयने शूरमाक्रन्दकारिणम् ।
आवन्त्यमभितो नार्यो रुदत्यः पर्युपासते ॥ ४
प्रातिपेयं महेष्वासं हतं भीमेन बाह्लिकम् ।
प्रसुप्तमिव शार्दूलं पश्य कृष्णमनस्विनम् ॥ ५
अतीव मुखवर्णोऽस्य निहतस्यापि शोभते ।

कलावशेषो हि इति क. पाठ ॥ १३ ॥ रोरूयते तु खचयाभितप्ता इति क. ट. पाठ ॥ १४ ॥ एकविंशतितमोऽध्यायः २१

सोमस्येवाभिपूर्णस्य पौर्णमास्यां समुद्यतः ॥ ६
पुत्रशोकाभितप्तेन प्रतिज्ञां चाभिरक्षता ।
पाकशासनिना सङ्ख्ये वार्धक्षत्रिर्निपातितः ॥ ७
एकादशचमूर्भित्त्वा रक्ष्यमाणं महात्मभिः ।
स्वल्पं चिकीर्षता पश्य हतमेनं जयद्रथम् ॥ ८
सिन्धुसौवीरभर्तारं दर्पपूर्णं मनस्विनम् ।
भक्षयन्ति शिवा गृध्रा जनार्दन जयद्रथम् ॥ ९
संरक्ष्यमाणं भार्याभिरनुरक्ताभिरच्युत ।
भीषयन्त्यो विकर्षन्ति गहनं निम्नमन्तिकात् १०
तमेताः पर्युपासन्ते वीक्षमाणा महाभुजम् ।
सिन्धुसौवीरकाम्भोजगान्धारयवनस्त्रियः ॥ ११
यदा कृष्णामुपादाय प्राद्रवत्केकयैः सह ।
तदैव वध्यः पाण्डूनां जनार्दन जयद्रथः ॥ १२
दुःशलां मानयद्भिस्तु तदा मुक्तो जयद्रथः ।
कथमद्य न तां कृष्ण मानयन्ति स्म ते पुनः १३
सैन्धवं मे सुता बाला प्रस्खलन्तीव दुःखिता ।
प्रमापयन्ती चात्मानमाक्रोशन्तीव पाण्डवान् १४
किंनु दुःखतरं कृष्ण परं मम भविष्यति ।
यत्सुता विधवा बाला स्नुषाश्च निहतेश्वराः ॥१५
हाहा धिग्दुःशलां पश्य वीतशोकभयामिव ।
भर्तुः शिर अपश्यन्तीं धावमानामितस्ततः ॥ १६
वारयामास यः सर्वान्पाण्डवान्पुत्रगृद्धिनः ।
स हत्वा विपुलाः सेनाः स्वयं मृत्युवशं गतः १७
तं मत्तमिव मातङ्गं वीरं परमदुर्जयम् ।
परिवार्य रुदन्त्येताः स्त्रियश्चन्द्रोपमाननाः ॥ १८

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः ॥ २३ ॥

कृष्णंप्रति गान्धार्या भीष्मद्रोणादिगुणानुवर्णनपूर्वकं तत्तच्छूराणां विलपन्तीनां तत्तत्स्त्रीणां च प्रदर्शनम् ॥ १ ॥

गान्धार्युवाच ।
एष शल्यो हतः शेते साक्षान्नकुलमातुलः ।
धर्मज्ञेन हतस्तात धर्मराजेन संयुगे ॥ १
यस्त्वया स्पर्धते नित्यं सर्वत्र पुरुषर्षभ ।
स एष निहतः शेते मद्रराजो महाबलः ॥ २
'जयद्रथे यदि ब्रूयुरुपरोधं कथंचन ।
मद्रपुत्रे कथं ब्रूयुरपराधं विवक्षवः ॥' ३
येन संगृह्नता तात रथमाधिरथेर्युधि ।
जयार्थं पाण्डुपुत्राणां तदा तेजोवधः कृतः ॥ ४
अहो धिक्पश्य शल्यस्य पूर्णचन्द्रसुदर्शनम् ।
मुखं पद्मपलाशाक्षं काकैरादृष्टमव्रणम् ॥ ५
एषा चामीकराभस्य तप्तकाञ्चनसप्रभा ।
आस्याद्विनिःसृता जिह्वा भक्ष्यते कृष्ण पक्षिभिः ६
युधिष्ठिरेण निहतं शल्यं समितिशोभनम् ।
रुदन्त्यः पर्युपासन्ते मद्रराजं कुलाङ्गनाः ॥ ७
एताः सुसूक्ष्मवसना मद्रराजं नरर्षभम् ।
क्रोशन्त्योऽथ समासाद्य क्षत्रियाः क्षत्रियर्षभम् ॥ ८
शल्यं निपतितं नार्यः परिवार्याभितः स्थिताः ।
वासिता गृध्र्यः पङ्के परिमग्नमिवर्षभम् ॥ ९
शल्यं शरणदं शूरं पश्येमं वृष्णिनन्दन ।
शयानं वीरशयने शरैर्विशकलीकृतम् ॥ १०
एष शैलालयो राजा भगदत्तः प्रतापवान् ।
गजाङ्कुशधरः श्रीमाञ्शेते भुवि निपातितः ॥ ११
यस्य रुक्ममयी माला शिरस्येषा विराजते ।
श्वापदैर्भक्ष्यमाणस्य शोभयन्तीव मूर्धजान् ॥ १२
एतेन किल पार्थस्य युद्धमासीत्सुदारुणम् ।
रोमहर्षणमत्युग्रं शक्रस्य त्वहिना यथा ॥ १३
योधयित्वा महाबाहुरेष पार्थं धनञ्जयम् ।
संशयं गमयित्वा च कुन्तीपुत्रेण पातितः ॥ १४
यस्य नास्ति समो लोके शौर्ये वीर्ये च कश्चन ।
स एष निहतः शेते भीष्मो भीष्मकृदाहवे ॥ १५
पश्य शान्तनवं कृष्ण शयानं सूर्यवर्चसम् ।
युगान्त इव कालेन पातितं सूर्यमम्बरात् ॥ १६
एष तप्त्वा रणे शत्रून्शस्त्रतापेन वीर्यवान् ।

वार्धक्षत्रिर्जयद्रथ ॥ ७ ॥ द्वाविंशोऽध्याय ॥ २२ ॥
परिमग्नमिव द्विपमिति झ. पाठ. ॥ ९ ॥ अहिना वृत्रा-
सुरेण ॥ १३ ॥ भीष्मकृत् भयकरकर्मकृत् ॥ १५ ॥

नरसूर्योऽस्तमभ्येति सूर्योऽस्तमिव केशव ॥ १७
शरतल्पगतं भीष्ममूर्ध्वरेतसमच्युतम् ।
शयानं वीरशयने पश्य शूरनिषेविते ॥ १८
कर्णिनालीकनाराचैरास्तीर्यं शयनोत्तमम् ।
आविश्य शेते भगवान्स्कन्दः शरवणं यथा ॥ १९
अतूलपूर्णं गाङ्गेयस्त्रिभिर्बाणैः समन्वितम् ।
उपधायोपधानाग्र्यं दत्तं गाण्डीवधन्वना ॥ २०
पालयानः पितुः शास्त्रमूर्ध्वरेता महायशाः ।
एष शान्तनवः शेते माधवाप्रतिमो युधि ॥ २१
धर्मात्मा तात सर्वज्ञः पारावर्येण निर्णये ।
अमर्त्य इव मर्त्यः सन्नेष प्राणानधारयत् ॥ २२
नास्ति युद्धे कृती कश्चिन्न विद्वान्न पराक्रमी ।
यत्र शान्तनवो भीष्मः शेतेऽद्य निहतः परैः ॥२३
स्वयमेतेन शूरेण पृच्छ्यमानेन पाण्डवैः ।
धर्मज्ञेनाहवे मृत्युरादिष्टः सत्यवादिना ॥ २४
प्रनष्टः कुरुवंशश्च पुनर्येन समुद्धृतः ।
स गतः कुरुभिः सार्धं महाबुद्धिः पराभवम् ॥२५
धर्मेण कुरवः केन परिद्रक्ष्यन्ति माधव ।
हते देवव्रते भीष्मे देवकल्पे नरर्षभे ॥ २६
अर्जुनस्य विनेतारमाचार्यं सात्यकेस्तथा ।
तं पश्य पतितं द्रोणं कुरूणां गुरुमुत्तमम् ॥ २७
अस्त्रं चतुर्विधं वेद यथैव त्रिदशेश्वरः ।
भार्गवो वा महावीर्यस्तथा द्रोणोऽपि माधव ॥२८
यस्य प्रसादाद्भीमत्सुः पाण्डवः कर्म दुष्करम् ।
चकार स हतः शेते नैनमस्त्राण्यपालयन् ॥ २९
यं पुरोधाय कुरव आह्वयन्ति स्म पाण्डवान् ।
सोऽयं शस्त्रभृतां श्रेष्ठो द्रोणः शस्त्रपृथक्कृतः ॥३०
यस्य निर्दहतः सेनां गतिरग्नेरिवाभवत् ।
स भूमौ निहतः शेते शान्तार्चिरिव पावकः ॥३१
धनुर्मुष्टिरशीर्णश्च हस्तावापश्च माधव ।
द्रोणस्य निहतस्यापि दृश्यते जीवतो यथा ॥ ३२
वेदा यस्माच्च चत्वारः सर्वाण्यस्त्राणि केशव ।
अनपेतानि वै शूराद्यथैवादौ प्रजापतेः ॥ ३३
चन्दनार्हावमौ तस्य बन्दिभिर्वन्दितौ शुभौ ।
गोमायवो विकर्षन्ति पादौ शिष्यशतार्चितौ ३४
द्रोणं द्रुपदपुत्रेण निहतं मधुसूदन ।
कृपी कृपणमन्वास्ते दुःखोपहतचेतना ॥ ३५
तां पश्य रुदतीमार्तां मुक्तकेशीमधोमुखीम् ।
हतं पतिमुपासन्तीं द्रोणं शस्त्रभृतां वरम् ॥ ३६
बाणैर्भिन्नतनुत्राणं धृष्टद्युम्नेन केशव ।
उपास्ते वै मृधे द्रोणं जटिला ब्रह्मचारिणी ॥ ३७
प्रेतकृत्ये च यतते कृपी कृपणमातुरा ।
हतस्य समरे भर्तुः सुकुमारी यशस्विनी ॥ ३८
अग्नीनाधाय विधिवच्चितां प्रज्वाल्य सर्वतः ।
द्रोणमाधाय गायन्ति त्रीणि सामानि सामगाः ॥
कुर्वन्ति च चितामेते जटिला ब्रह्मचारिणः ।
धनुर्भिः शक्तिभिश्चैव रथनीडैश्च माधव ॥ ४०
शरैश्च विविधैरन्यैर्धक्ष्यन्ते भूरितेजसम् ।
त एते द्रोणमादाय गायन्ति च रुदन्ति च ॥ ४१
सामभिस्त्रिभिरन्तस्थैरनुशंसन्ति चापरे ।
अग्नावग्निं समाधाय द्रोणं हुत्वा हुताशने ॥ ४२
गच्छन्त्यभिमुखा गङ्गां द्रोणशिष्या द्विजातयः ।
अपसव्यां चितिं कृत्वा पुरस्कृत्य कृपीं तथा ॥४३

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः ॥ २४ ॥

कृष्णंप्रति गान्धार्यां भूरिश्रव प्रभृतिशरीराणां तत्तत्स्त्रीणां च प्रदर्शनम् ॥ १ ॥

गान्धार्युवाच ।
सोमदत्तसुतं पश्य युयुधानेन पातितम् ।
वितुद्यमानं विहगैर्बहुभिर्माधवान्तिके ॥ १
पुत्रशोकाभिसंतप्तः सोमदत्तो जनार्दन ।

शास्त्र आज्ञाम् ॥ २१ ॥ निर्णये पारावर्येण । परावरौ परलोकेहलोको तद्विषयेण ज्ञानेन । तत्त्वज्ञानबलेन प्राणानधारयदित्यर्थः । पारपर्येऽथ निर्णय इति छ. पाठः । पाराशर्यस्य निर्णये इति क ट पाठ ॥ २२ ॥ धर्मेपु कुरव क नु परिप्रक्ष्यन्ति माधव । गते देवव्रते स्वर्गं देवकल्पे नरर्षभे इति झ पाठ ॥२६॥ शिष्यशरार्चितावितिक. पाठः ॥ ३४ ॥ त्रयोविंशोऽध्याय. ॥२३॥

युयुधानं महेष्वासं गर्हयन्निव दृश्यते ॥ २
असौ हि भूरिश्रवसो माता शोकपरिप्लुता ।
आश्वासयति भर्तारं सोमदत्तमनिन्दिता ॥ ३
दिष्ट्या नैनं महाराज दारुणं भरतक्षयम् ।
कुरुसंक्रन्दनं घोरं युगान्तमनुपश्यसि ॥ ४
दिष्ट्या यूपध्वजं पुत्रं वीरं भूरिसहस्रदम् ।
अनेकक्रतुयज्वानं निहतं नानुपश्यसि ॥ ५
दिष्ट्या स्नुषाणामाक्रन्दे घोरं विलपितं बहु ।
न शृणोषि महाराज सारसीनामिवार्णवे ॥ ६
एकवस्त्रास्तु पश्चैताः प्रकीर्णासितमूर्धजाः ।
स्नुषास्ते परिधावन्ति हतापत्या हतेश्वराः ॥ ७
श्वापदैर्भक्ष्यमाणं त्वमहो दिष्ट्या न पश्यसि ।
छिन्नबाहुं नरव्याघ्रमर्जुनेन निपातितम् ॥ ८
शलं विनिहतं सङ्ख्ये भूरिश्रवसमेव च ।
स्नुषाश्च विविधाः सर्वा दिष्ट्या नाद्येह पश्यसि ॥ ९
दिष्ट्या तत्काञ्चनं छत्रं यूपकेतोर्महात्मनः ।
विनिकीर्णं रथोपस्थे सौमदत्तेर्न पश्यसि ॥ १०
अमूस्तु भूरिश्रवसो भार्याः सात्यकिना हतम् ।
परिवार्यानुशोचन्ति भर्तारमसितेक्षणाः ॥ ११
एता विलप्य करुणं भर्तृशोकेन कर्शिताः ।
पतन्त्यभिमुखा भूमौ कृपणं बत केशव ॥ १२
बीभत्सुरतिबीभत्सं कर्मेदमकरोत्कथम् ।
प्रमत्तस्य यदच्छैत्सीद्बाहुं शूरस्य यज्वनः ॥ १३
ततः पापतरं कर्म कृतवानपि सात्यकिः ।
यस्मात्प्रायोपविष्टस्य प्राहार्षीत्संशितात्मनः ॥ १४
एको द्वाभ्यां हतः शेते क्षत्रधर्मेण धार्मिकः ।
किंनु वक्ष्यति वै सत्सु गोष्ठीषु च सभासु च ॥ १५
अपुण्यमयशस्यं च कर्मेदं सात्यकिः स्वयम् ।
इति यूपध्वजस्यैताः स्त्रियः क्रोशन्ति माधव ॥ १६
भार्या यूपध्वजस्यैषा करसंमितमध्यमा ।
कृत्वोत्सङ्गे भुजं भर्तुः कृपणं परिदेवति ॥ १७
अयं स हन्ता शूराणां मित्राणामभयप्रदः ।
पदाता गोसहस्राणां क्षत्रियान्तकरः करः ॥ १८
अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥ १९
वासुदेवस्य सान्निध्ये पार्थेनाक्लिष्टकर्मणा ।
युध्यतः समरेऽन्येन प्रमत्तस्य निपातितः ॥ २०
किंनु वक्ष्यसि संसत्सु कथासु च जनार्दन ।
अर्जुनस्य महत्कर्म स्वयं वा स किरीटभृत् ॥ २१
इत्येवं गर्हयित्वैषा तूष्णीमास्ते वराङ्गना ।
तामेतामनुशोचन्ति सपत्न्यः स्वामिव स्नुषाम् २२
गान्धारराजः शकुनिर्बलवान्सत्यविक्रमः ।
निहतः सहदेवेन भागिनेयेन मातुलः ॥ २३
यः पुरा हेमदण्डाभ्यां व्यजनाभ्यां स्म वीज्यते ।
स एष पक्षिभिः पक्षैः शयान उपवीज्यते ॥ २४
यः स्वरूपाणि कुरुते शतशोऽथ सहस्रशः ।
तस्य मायाविनो माया दग्धाः पाण्डवतेजसा २५
मायया निकृतिप्रज्ञो जितवान्यो युधिष्ठिरम् ।
सभायां विपुलं राज्यं स जहौ जीवितं कथम् २६
शकुन्ताः शकुनिं कृष्ण समन्तात्पर्युपासते ।
कितवं मम पुत्राणां विनाशायोपशिक्षितम् ॥ २७
एतेनैतन्महद्वैरं प्रसक्तं पाण्डवैः सह ।
वधाय मम पुत्राणामात्मनः सगणस्य च ॥ २८
यथैव मम पुत्राणां लोकाः शस्त्रजिताः प्रभो ।
एवमस्यापि दुर्बुद्धेर्लोकाः शस्त्रेण वै जिताः ॥ २९
कथं च नायं तत्रापि पुत्रान्मे भ्रातृभिः सह ।
विरोधयेदजुप्रज्ञाननृजुर्मधुसूदन ॥ ३०

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥

बीभत्सुरतिनिर्मलकर्मा । अतिबीभत्सं अतिगर्हितम् ॥१३॥ एको द्वाभ्या हत शेपे त्वमधर्मेण धार्मिक इति झ पाठ ॥१५॥ स पुनर्जीवित जित इति झ. पाठ ॥ २६ ॥ चतुर्विंशोऽध्याय ॥ २४ ॥

पञ्चविंशोऽध्यायः ॥ २५ ॥

कृष्णप्रति गान्धार्या कुरुपाण्डवसंक्षयस्य कृष्णोपेक्षणहेतुकत्वकथनपूर्वकं सर्ववन्धुसक्षयाय शापदानम् ॥ १ ॥

गान्धार्युवाच ।
काम्भोजं पश्य दुर्धर्षं काम्भोजास्तरणोचितम् ।
शयानमृषभस्कन्धं हतं पांसुषु माधव ॥ १
अस्य क्षतजसंदिग्धौ बाहू चन्दनरूपितौ ।
अवेक्ष्य कृपणं भार्या विलपत्यतिदुःखिता ॥ २
इमौ तौ परिघप्रख्यौ बाहू चन्दनरूपितौ ।
ययोर्विवरमापन्नां न रतिर्मां पुराऽजहात् ॥ ३
कां गतिं तु गमिष्यामि त्वया हीना जनेश्वर ।
दूरबन्धुरनाथा च वेपन्ती मधुरस्वरा ॥ ४
आतपे क्लाम्यमानानां विविधानामिव स्रजाम् ।
क्लान्तानामपि नारीणां जहाति श्रीर्न वै तनूः ॥ ५
शयानमभितः शूरं कालिङ्गं मधुसूदन ।
पश्य दीप्ताङ्गदयुतं प्रतिमानं धनुष्मताम् ॥ ६
मागधानामधिपतिं जयत्सेनं जनार्दन ।
परिवार्य प्ररुदिता मागध्यः पश्य योषितः ॥ ७
हरिणायतनेत्राणां सुस्वराणां जनार्दन ।
मनःश्रुतिहरो नादो मनो मोहयतीव मे ॥ ८
प्रकीर्णवस्त्राभरणा रुदत्यः शोककर्शिताः ।
स्वास्तीर्णशयनोपेता मागध्यः शेरते भुवि ॥ ९
कोसलानामधिपतिं राजपुत्रं बृहद्बलम् ।
भर्तारं परिवार्यैताः पृथक्प्ररुदिताः स्त्रियः ॥ १०
अस्य गात्रगतान्बाणान्कार्ष्णिबाहुबलेरितान् ।
उद्धरन्त्यसुखाविष्टा मूर्च्छमानाः पुनः पुनः ॥ ११
आसां सर्वानवद्यानामातपेन परिश्रमात् ।
प्रम्लाननलिनाभानि भान्ति वक्त्राणि माधव ॥ १२
द्रोणेन निहताः शूरा शेरते रुचिराङ्गदाः ।
धृष्टद्युम्नसुताः सर्वे शिशवो हेममालिनः ॥ १३
रथाभ्यगारं चापार्चि शरशक्तिगदेन्धनम् ।
द्रोणमासाद्य निर्दग्धाः शलभा इव पावकम् ॥ १४
तथैव निहताः शूराः शेरते रुचिराङ्गदाः ।
द्रोणेनाभिमुखाः सङ्ख्ये भ्रातरः पञ्च केकयाः ॥ १५
तप्तकाञ्चनवर्माणस्तालध्वजरथव्रजाः ।
भासयन्ति महीं भासा ज्वलिता इव पावकाः ॥ १६
द्रोणेन द्रुपदं सङ्ख्ये पश्य माधव पातितम् ।
महाद्विपमिवारण्ये सिंहेन महता हतम् ॥ १७
पाञ्चालराज्ञो विमलं पुण्डरीकाक्ष पाण्डुरम् ।
आतपत्रं समाभाति शरदीव निशाकरः ॥ १८
एतास्तु द्रुपदं वृद्धं स्नुषा भार्याश्च दुःखिताः ।
दग्ध्वा गच्छन्ति पाञ्चालराजानमपसव्यतः ॥ १९
धृष्टकेतुं महात्मानं चेदिपुङ्गवमङ्गनाः ।
द्रोणेन निहतं शूरं हरन्ति हृतचेतसः ॥ २०
द्रोणास्त्रमभिहत्यैष विमर्दे मधुसूदन ।
महेष्वासो हतः शेते वज्राहत इव द्रुमः ॥ २१
एष चेदिपतिः शूरो धृष्टकेतुर्महारथः ।
शेते विनिहतः सङ्ख्ये हत्वा शत्रून्सहस्रशः ॥ २२
वितुद्यमानं विहगैस्तं भार्याः पर्युपाश्रिताः ।
चेदिराजं हृषीकेश हतं सबलबान्धवम् ॥ २३
दाशार्हपुत्रजं वीरं शयानं सत्यविक्रमम् ।
आरोप्याङ्के रुदन्त्येताश्चेदिराज वराङ्गनाः ॥ २४
अस्य पुत्रं हृषीकेश सुवक्त्रं चारुकुण्डलम् ।
द्रोणेन समरे पश्य निकृत्तं बहुधा शरैः ॥ २५
पितरं नूनमाजिस्थं युध्यमानं परैः सह ।
नाजहात्पितरं वीरमद्यापि मधुसूदन ॥ २६
एवं ममापि पुत्रस्य पुत्रः पितरमन्वगात् ।
दुर्योधनं महाबाहो लक्ष्मणः परवीरहा ॥ २७
विन्दानुविन्दावावन्त्यौ पतितौ पश्य माधव ।
हिमान्ते पुष्पितौ शालौ मरुता गलिताविव ॥ २८
काञ्चनाङ्गदवर्माणौ बाणखड्गधनुर्धरौ ।
ऋषभप्रतिरूपाक्षौ शयानौ विमलस्रजौ ॥ २९
अवध्याः पाण्डवाः कृष्ण सर्व एव त्वया सह ।
ये मुक्ता द्रोणभीष्माभ्यां कर्णाद्वैकर्तनात्कृपात् ३०
दुर्योधनाद्द्रोणसुतात्सैन्धवाच्च जयद्रथात् ।

काम्भोजास्तरण कम्बलविशेष ॥ १ ॥ बाहू शुभतलाङ्गुली इति झ पाठ. ॥ ३ ॥ दीप्ताङ्गदयुगप्रतिनद्धमहाभुजमिति झ पाठ ॥ ६ ॥ दाशार्हपुत्रजमित्यत्र पुत्र्यामपि पुत्रशब्द ॥२४॥ पितरमिति पितृपदस्यावृत्ति शोकाकुलत्वान्न दोषाय ॥ २६ ॥

सोमदत्ताद्विकर्णाच्च शूराच्च कृतवर्मणः ॥ ३१
ये हन्युः शस्त्रवेगेन देवानपि नरर्षभाः ।
त इमे निहताः सङ्ख्ये पश्य कालस्य पर्ययम् ॥ ३२
नातिभारोऽस्ति दैवस्य ध्रुवं माधव कश्चन ।
नदिमे निहताः शूराः क्षत्रियैः क्षत्रियर्षभाः ।
'शूराश्च कृतविद्याश्च मम पुत्रा मनस्विनः ॥' ३३
तदैव निहताः कृष्ण मम पुत्रास्तरस्विनः ।
यदैवाकृतकामस्त्वमुपप्लाव्यं गतः पुनः ॥ ३४
शन्तनोश्चैव पुत्रेण प्राज्ञेन विदुरेण च ।
तदैवोक्तास्मि मा स्नेहं कुरुष्वात्मसुतेष्विति ॥ ३५
तयोर्हि दर्शनं नैतन्मिथ्या भवितुमर्हति ।
अचिरेणैव मे पुत्रा भस्मीभूता जनार्दन ॥ ३६
वैशंपायन उवाच ।
इत्युक्त्वा न्यपतद्भूमौ गान्धारी शोकमूर्च्छिता ।
दुःखोपहतविज्ञाना धैर्यमुत्सृज्य भारत ॥ ३७
ततः कोपपरीताङ्गी पुत्रशोकपरिप्लुता ।
जगाद शौरिं दोषेण गान्धारी व्यथितेन्द्रिया ॥ ३८
गान्धार्युवाच ।
पाण्डवा धार्तराष्ट्राश्च कृष्ण परस्परम् ।
उपेक्षिता विनश्यन्तस्त्वया कस्माज्जनार्दन ॥ ३९
शक्तेन बहुभृत्येन विपुले तिष्ठता बले ।
उभयत्र समर्थेन श्रुतवाक्येन चैव ह ॥ ४०
इच्छतोपेक्षितो नाशः कुरूणां मधुसूदन ।
यस्मात्त्वया महाबाहो फलं तस्मादवाप्नुहि ॥ ४१
पतिशुश्रूषया यन्मे तपः किंचिदुपार्जितम् ।
तेन त्वां दुरवापेन शपे चक्रगदाधरम् ॥ ४२
यस्मात्परस्परं घ्नन्तो ज्ञातयः कुरुपाण्डवाः ।
उपेक्षितास्ते गोविन्द तस्माज्ज्ञातीन्वधिष्यसि ॥ ४३
त्वमप्युपस्थिते वर्षे षट्त्रिंशे मधुसूदन ।
हतज्ञातिर्हतामात्यो हतपुत्रो वनेचरः ॥ ४४
अनाथवदविज्ञातो लोकेष्वनभिलक्षितः ।
कुत्सितेनाभ्युपायेन निधनं समवाप्स्यसि ॥ ४५
तवाप्येवं हतसुता निहतज्ञातिबान्धवाः ।
स्त्रियः परिपतिष्यन्ति यथैता भरतस्त्रियः ॥ ४६
वैशंपायन उवाच ।
तच्छ्रुत्वा वचनं घोरं वासुदेवो महामनाः ।
उवाच देवीं गान्धारीमीषदभ्युत्स्मयन्निव ॥ ४७
जानेऽहमेतदप्येवं चीर्णं चरसि क्षत्रिये ।
दैवादेव विनश्यन्ति वृष्णयो नात्र संशयः ॥ ४८
संहर्ता वृष्णिचक्रस्य नान्यो मद्विद्यते शुभे ।
अवध्यास्ते नरैरन्यैरपि वा देवदानवैः ॥ ४९
परस्परकृतं नाशं यतः प्राप्स्यन्ति यादवाः ।
इत्युक्तवति दाशार्हे पाण्डवास्त्रस्तचेतसः ।
बभूवुर्भृशसंविग्ना निराशाश्चापि जीविते ॥ ५०

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥

समाप्तं च स्त्रीविलापपर्व ॥ २ ॥

(अथ श्राद्धपर्व ॥ ३ ॥)

षड्विंशोऽध्यायः ॥ २६ ॥

शोकाद्भुवि पतिताया गान्धार्याः कृष्णेनाश्वासनम् ॥ १ ॥ युधिष्ठिराज्ञया विदुरसंजयादिभिर्मृतानां दाहक्रियाकरणम् ॥ २ ॥

श्रीभगवानुवाच ।
उत्तिष्ठोत्तिष्ठ गान्धारि मा च शोके मनः कृथाः ।
तवैव ह्यपराधेन कुरवो निधनं गताः ॥ १
यत्त्वं पुत्रं दुरात्मानमीर्षुमत्यन्तमानिनम् ।
दुर्योधनं पुरस्कृत्य दुष्कृतं साधु मन्यसे ॥ २
निष्ठुरं वैरपुरुषं वृद्धानां शासनातिगम् ।
कथमात्मकृतं दोषं मय्याधातुमिहेच्छसि ॥ ३
मृतं वा यदि वा नष्टं योऽतीतमनुशोचति ।

तयोर्भीष्मविदुरयो दर्शन अनागतावेक्षणम् ॥ ३६ ॥ जगाद शौरिं रोषेणेति ट पाठ ॥ ३८ ॥ अभ्युत्स्मयन्नीषद्धसयन् ॥ ४७ ॥ चीर्णं चरसि मदनुष्ठितमेवानुतिष्ठसि । स्वतपोनाशार्थमिति भाव ॥ ४८ ॥ पञ्चविंशोऽध्याय ॥ २५ ॥

दुष्कृत दुराचरित स्वकीयम् ॥ २ ॥ वैरप्रिय पुरुष वैरपुरुषम् ॥ ३ ॥

दुःखेन लभते दुःखं द्वावनर्थौ प्रपद्यते ॥ ४
तपोर्थीयं ब्राह्मणी धत्त गर्भं
गौर्वोढारं धावितारं तुरङ्गी ।
शूद्रा दासं पशुपालं च वैश्या
वधार्थीयं त्वद्विधा राजपुत्री ॥ ५

वैशंपायन उवाच ।
तच्छ्रुत्वा वासुदेवस्य पुनरुक्तं वचोऽप्रियम् ।
तूष्णीं बभूव गान्धारी शोकव्याकुललोचना ॥ ६
धृतराष्ट्रस्तु राजर्षिर्निगृह्यात्मबुद्धिजं तमः ।
पर्यपृच्छत धर्मज्ञो धर्मराजं युधिष्ठिरम् ॥ ७
जीवतां परिमाणज्ञः सैन्यानामसि पाण्डव ।
हतानां यदि जानीषे परिमाणं वदस्व मे ॥ ८

युधिष्ठिर उवाच ।
दशायुतसहस्राणि सहस्राणि च विंशतिः ।
कोट्यः षष्टिश्च षट् चैव ह्यस्मिन्राजन्मृधे हताः ॥९
आलक्षाणां च वीराणां सहस्राणि चतुर्दश ।
दश चान्यानि राजेन्द्र शतं षष्टिश्च भारत ॥ १०

धृतराष्ट्र उवाच ।
युधिष्ठिरगतिं कां ते गताः पुरुषसत्तम ।
आचक्ष्व मे महाबाहो सर्वज्ञो ह्यसि मे मतः ॥११

युधिष्ठिर उवाच ।
यैर्हुतानि शरीराणि हृष्टैः परमसंयुगे ।
देवराजसमॉल्लोकान्गतास्ते सत्यविक्रमाः ॥ १२
ये त्वहृष्टेन मनसा मर्तव्यमिति भारत ।
युध्यमाना हताः सङ्ख्ये गन्धर्वैः सह संगताः ॥१३
ये च संग्रामभूमिष्ठा याचमानाः पराङ्मुखाः ।
शस्त्रेण निधनं प्राप्ता गतास्ते गुह्यकान्प्रति ॥ १४
पात्यमानाः परैर्ये तु हीयमानाः निरायुधाः ।
ह्रीनिषेवा महात्मानः परानभिमुखा रणे ॥ १५
छिद्यमानाः शितैः शस्त्रैः क्षत्रधर्मपरायणाः ।
हतास्ते ब्रह्मसदनं गता वीराः सुवर्चसः ॥ १६
ये त्वत्र निहता राजन्नन्तरायोधनं प्रति ।
यथाकथंचित्पुरुषास्ते गता ह्युत्तरां गतिम् ॥ १७

धृतराष्ट्र उवाच ।
केन ज्ञानबलेनैवं पुत्र पश्यसि सिद्धवत् ।
तन्मे वद महाबाहो श्रोतव्यं यदि वै मया ॥१८

युधिष्ठिर उवाच ।
निदेशाद्भवतः पूर्वं वने विचरता मया ।
तीर्थयात्राप्रसङ्गेन संप्राप्तोऽयमनुग्रहः ॥ १९
देवर्षिर्लोमशो दृष्टस्ततः प्राप्तोऽस्म्यनुस्मृतिम् ।
दिव्यं चक्षुरपि प्राप्तं ज्ञानयोगेन वै पुरा ॥ २०

धृतराष्ट्र उवाच ।
ये त्वनाथा जनास्तात नाथवन्तश्च पाण्डव ।
कच्चित्तेषां शरीराणि धक्ष्यन्ति विधिपूर्वकम् ॥ २१

युधिष्ठिर उवाच ।
न येषां शान्तिकर्तारो न च येऽत्राहिताग्नयः ।
वयं च तेषां कुर्यामो बहुत्वात्तात कर्मणाम् ॥ २२
यान्सुपर्णाश्च गृध्राश्च विकर्षन्ति ततस्ततः ।
तेषां संकर्षणा लोका भविष्यन्ति न संशयः ॥ २३

वैशंपायन उवाच ।
एवमुक्त्वा महाराज कुन्तीपुत्रो युधिष्ठिरः ।
आदिदेश सुधर्माणं धौम्यं सूतं च सञ्जयम् ॥ २४
विदुरं च महाबुद्धिं युयुत्सुं चैव कौरवम् ।
इन्द्रसेनमुखान्भृत्यान्सूतांश्चैव सहस्रशः ॥ २५
भवन्तः कारयन्त्वेषां प्रेतकार्याण्यशेषतः ।
यथा नाथवतां किंचिच्छरीरं न विनश्यति ॥ २६
शासनाद्धर्मराजस्य क्षत्ता सूतश्च सञ्जयः ।
सुधर्मा धौम्यसहित इन्द्रसेनादयस्तथा ॥ २७
चन्दनागुरुकाष्ठानि तथा कालीयकान्युत ।
घृतं तैलं च गन्धांश्च क्षौमाणि वसनानि च ॥ २८
समाहृत्य महार्हाणि दारूणां चैव संचयान् ।
रथांश्च मृदितांस्तत्र नानाप्रहरणानि च ॥ २९
चिताः कृत्वा प्रयत्नेन यथामुख्यान्नराधिपान् ।
दाहयामासुरव्यग्राः शास्त्रदृष्टेन कर्मणा ॥ ३०
दुर्योधनं च राजानं भ्रातॄंश्चास्य महारथान् ।
शल्यं शलं च राजानं भूरिश्रवसमेव च ॥ ३१

द्वौ पूर्वापरदु खद्वयरूपौ ॥ ४ ॥ तपोरूपायार्थाय उत्पन्न तपोर्थायम् । त्वद्विधा वधार्थायमेव गर्भं धत्ते । अन्या तु जयार्थाय कीर्त्यर्थायमपीति भाव । तपोर्थिन, वधार्थिन इति क. पाठ. ॥ ५ ॥ ते गतास्तूत्तरान्कुरूनिति छ पाठ । ते गतास्तूत्तमा गतिमिति ट पाठ । ते गता ह्यवमा गतिमिति क. पाठ. ॥ १७ ॥ सुवर्माण दुर्योधनपुरोहितम् ॥ २४ ॥

जयद्रथं च राजानमभिमन्युं च भारत ।
दौःशासनिं लक्ष्मणं च धृष्टकेतुं च पार्थिवम् ॥ ३२
बृहद्बलं सोमदत्तं सृञ्जयं च महारथम् ।
राजानं क्षेमधन्वानं विराटद्रुपदौ तथा ॥ ३३
शैब्यखण्डिनं च पाञ्चाल्यं धृष्टद्युम्नं च पार्षतम् ।
युधामन्युं च विक्रान्तमुत्तमौजसमेव च ॥ ३४
कौसल्यं द्रौपदेयांश्च शकुनिं चापि सौबलम् ।
अचलं वृषकं चैव भगदत्तं च पार्थिवम् ॥ ३५
कर्णं वैकर्तनं चैव सहपुत्रममर्षणम् ।
केकयांश्च महेष्वासांस्त्रिगर्ताश्च महारथान् ॥ ३६
घटोत्कचं राक्षसेन्द्रं बकभ्रातरमेव च ।
अलम्बुसं राक्षसेन्द्रं जलसन्धं च पार्थिवम् ॥३७
एतांश्चान्यांश्च सुबहून्पार्थिवांश्च सहस्रशः ।
घृतधाराहुतैर्दीप्तैः पावकैः समदाहयन् ॥ ३८
पितृमेधाश्च केषांचित्प्रावर्तन्त महात्मनाम् ।
सामभिश्चाप्यगायन्त तेऽन्वशासत चापरैः ॥ ३९
साम्नामृचां च नादेन स्त्रीणां च रुदितस्वनैः ।
कश्मलं सर्वभूतानां निशायां समपद्यत ॥ ४०
हुताश्च तत्प्रदीप्ताश्च दीप्यमानाश्च पावकाः ।
नभसीवान्वदृश्यन्त ग्रहास्तन्वभ्रसंवृताः ॥ ४१
ये चाप्यनाथास्तत्रासन्नानादेशसमागताः ।
तांश्च सर्वान्समानीय राशीकृत्वा सहस्रशः ॥ ४२
चित्वा दारुभिरव्यग्रैः प्रभूतैः स्नेहपाचितैः ।
दाहयामास तान्सर्वान्विदुरो राजशासनात् ॥ ४३
कारयित्वा क्रियास्तेषां कुरुराजो युधिष्ठिरः ।
धृतराष्ट्रं पुरस्कृत्य गङ्गामभिमुखोऽगमत् ॥ ४४

॥ इति श्रीमन्महाभारते स्त्रीपर्वणि श्राद्धपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः ॥ २७ ॥

मृतानामुदकदानाय धृतराष्ट्रयुधिष्ठिरादिभिर्गङ्गातीरगमनम् ॥ १ ॥ उदकदानारम्भे कुन्त्या युधिष्ठिरंप्रति कर्णस्य स्वपुत्रत्वकथनपूर्वकं तस्या उदकदानचोदना ॥ २ ॥ धृतराष्ट्रयुधिष्ठिरादिभिर्बन्धुभ्यो जलदानम् ॥ ३ ॥

वैशंपायन उवाच ।
ते समासाद्य गङ्गां तु शिवां पुण्यजलान्विताम् ।
ह्रादिनीं च प्रसन्नां च महारूपां महावनाम् ॥ १
भूषणान्युत्तरीयाणि वेष्टनान्यवमुच्य च ।
'कवचानि विचित्राणि गङ्गामवजगाहिरे ॥' २
ततः पितॄणां भ्रातॄणां पौत्राणां स्वजनस्य च ।
पुत्राणामार्यकाणां च पतीनां च कुरुस्त्रियः ॥ ३
उदकं चक्रिरे सर्वा रुदन्त्यो भृशदुःखिताः ।
सुहृदां चापि धर्मज्ञाः प्रचक्रुः सलिलक्रियाम् ॥ ४
उदके क्रियमाणे तु वीराणां वीरपत्निभिः ।
सूपतीर्थोऽभवद्गङ्गा भूयो विप्रससार च ॥ ५
तन्महोदधिसंकाशं निरानन्दमनुत्सवम् ।
वीरपत्नीभिराकीर्णं गङ्गातीरमशोभत ॥ ६
ततः कुन्ती महाराज रुदन्ती शोककर्शिता ।
व्रीडया मन्दया वाचा पुत्रान्वचनमब्रवीत् ॥ ७
यः स वीरो महेष्वासो रथयूथपयूथपः ।
अर्जुनेन हतः सङ्ख्ये वीरलक्षणलक्षितः ॥ ८
यं सूतपुत्रं मन्यध्वं राधेयमिति पाण्डवाः ।
यो व्यराजच्चमूमध्ये दिवाकर इव प्रभुः ॥ ९
प्रत्ययुध्यत वः सर्वान्पुरा यः सपदानुगान् ।
दुर्योधनबलं सर्वं यः प्रकर्षन्व्यरोचत ॥ १०
यस्य नास्ति समो वीर्ये पृथिव्यामपि कश्चन ।
यो वृणीत यदुः शूरः प्राणैरपि सदा भुवि ॥ ११
कर्णस्य सत्यसन्धस्य संग्रामेष्वपलायिनः ।
कुरुध्वमुदकं तस्य भ्रातुरक्लिष्टकर्मणः ॥ १२
स हि वः पूर्वजो भ्राता भास्करान्मय्यजायत ।
कुण्डली कवची शूरो दिवाकरसमप्रभः ॥ १३
श्रुत्वा तु पाण्डवाः सर्वे मातुर्वचनमप्रियम् ।
कर्णमेवानुशोचन्तो भूयश्चात्यातुरा भवन् ॥ १४

स्नेहपाचितैः स्नेहसयुक्तैः ॥ ४३ ॥ षड्विंशोऽध्याय ॥ २६ ॥
वेष्टनानि उष्णीषकटिबन्धनादीनि ॥ २ ॥ सूपतीर्था शोभनजलावतरणमार्गा ॥ ५ ॥ भवन् अभवन् । अडभाव आर्ष. ॥ १४ ॥

ततः स पुरुषव्याघ्रः कुन्तीपुत्रो युधिष्ठिरः ।
उवाच मातरं वीरो निःश्वसन्निव पन्नगः ॥ १५
यः शरोर्मिर्ध्वजावर्तो महाभुजमहाग्रहः ।
तलशब्दप्रणुदितो महारथमहाह्रदः ॥ १६
यस्येषुपातमासाद्य कोऽन्यस्तिष्ठेद्धनञ्जयात् ।
कथं पुत्रो भवत्याः स देवगर्भः पुराऽभवत् ।
'कुण्डली कवची शूरो दिवाकरसमप्रभः ॥ १७
यस्य बाहुप्रतापेन तापिताः सर्वतो वयम् ।
तमग्निमिव वस्त्रेण कथं छादितवत्यसि ॥ १८
यस्य बाहुप्रभावेन वैरमस्मास्वरोचयत् ।
सुयोधनस्तु तं ज्येष्ठं कथं नोदितवत्यसि ॥ १९
तथा कर्णं महेष्वासं धार्तराष्ट्रैरुपासितम् ।
उपासितं यथाऽस्माभिर्बलं गाण्डीवधन्वनः ॥ २०
भूमिपानां च सर्वेषां बलं बलवतां वरः ।
नान्यः कुन्तीसुतात्कर्णाद्गृह्णाद्रथिनो रथी ॥ २१
स नः प्रथमजो भ्राता सर्वशस्त्रभृतां वरः ।
अमृत तं भवत्यग्रे कथमद्भुतविक्रमम् ॥ २२
अहो भवत्या मन्त्रस्य गूहनेन वयं हताः ।
निधनेन हि कर्णस्य पीडितास्तु सबान्धवाः ॥२३
अभिमन्योर्विनाशेन द्रौपदेयवधेन च ।
पाञ्चालानां विनाशेन कुरूणां घातनादपि ॥ २४
ततः शतगुणं दुःखमिदमापतितं महत् ।
कर्णमेवानुशोचामि दह्याम्यग्नाविवाहितः ॥ २५
नेह स्म किंचिदप्राप्यं भवेदपि दिवि स्थितम् ।
न चेदं वैशसं घोरं कौरवान्तकरं भवेत् ॥
एवं विलप्य बहुलं धर्मराजो युधिष्ठिरः ।
व्यरुदच्छनकै राजंश्चकारास्योदकं प्रभुः ॥ २७
ततो विनेदुः सहसा स्त्रियस्ताः खलु सर्वशः ।
अभितो याः स्थितास्तत्र तस्मिन्नुदककर्मणि ॥ २८
तत आनाययामास कर्णस्य सपरिच्छदाः ।
स्त्रियः कुरुपतिर्धीमान्भ्रातुः प्रेम्णा युधिष्ठिरः ॥२९
स ताभिः सह धर्मात्मा प्रेतकृत्यमनन्तरम् ।
'सर्वं चकार कर्णस्य विधिवद्भूरिदक्षिणम् ॥ ३०
स राजा धृतराष्ट्रश्च कृत्वा जलमतन्द्रितः ।
समुत्ततार गङ्गाया भार्यया सह भारत ॥' ३१
[पापेनासौ मया श्रेष्ठो भ्राता ज्ञातिर्निपातितः ।
अतो मनसि यद्दुःखं स्त्रीणां तन्न भविष्यति ॥ ३२
इत्युक्त्वा स तु गङ्गाया उत्ततारा कुलेन्द्रियः ।
भ्रातृभिः सहितः सर्वैर्गङ्गातीरमुपेयिवान् ॥] ३३

॥ इति श्रीमन्महाभारते शतसाहस्रिकायां संहिताया वैयासिक्यां स्त्रीपर्वणि श्राद्धपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥

समाप्तमिदं श्राद्धपर्व ॥ ३ ॥ स्त्रीपर्व च समाप्तम् ॥ ११ ॥

अतःपरं शान्तिपर्व भविष्यति तस्यायमाद्यः श्लोकः।
वैशंपायन उवाच ।
कृत्वोदकं ते सुहृदां सर्वेषां पाण्डुनन्दनाः ।
विदुरो धृतराष्ट्रश्च सर्वाश्च भरतस्त्रियः ॥ १

दग्धामग्नाविवाहुतिमिति क पाठ ॥ २५ ॥ कर्णे भ्रातृत्वेन ज्ञाते सति तदनुसारिणामस्माकमपि दुर्लभ नाभविष्यन्नापि कौरवाणा क्षयोऽभविष्यदित्यर्थ. । न च मे किंचिदप्राप्यमिति क पाठ ॥ २६ ॥ सप्तविंशोऽध्याय. ॥ २७ ॥

इदं स्त्रीपर्व कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८२९ सन १९०७.